कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

M - 2461

कविकुलबुरू कालिदास संस्कृत विश्वविद्याालय, रामटेक

हस्तलिखित संग्रह

दाखल क M2461 विषय धर्मशास्त्र

नाव गीताभाष्य

लेखक/लिपीकार नंदराम समर्थ

पृठ 800 काळ पूर्ण/~~अ~~पूर्ण

मः॥

फगीताभाष्यस्यैसमंलसटीकं वैंकोबाख्येन बाकडोपनामकेन·
स्वहस्तेनालिखित श्रीकाकृष्णप्रीत्या लक्ष्मोहनरामभटे प्रेषितं दत्तंच
॥श्रीकृष्णार्पणमस्तु॥रद्दपुस्तकं गीताभाष्य सानंदगिरिटीका समरंभ॥

श्रीराम
॥१॥

॥ अ० १ ॥

यनमः ॥ हरिः ॐ ॥ नमो भगवते वासुदेवाय ॥ ॐ ॥ दृष्टिंमयिविशिष्टार्थंहरू पापीयसर्ववर्षिणीं ॥ हेरंबयेहिप्र
त्यूहवारिणीं ॥ २ ॥ यद्वक्त्रपंकेरुहसंप्रसूतंगीतामृतंविश्वविभागनिष्ठं साध्येतराभ्यांपरिनिष्ठिताभ्यांतंवासुदेवंप्र
॥ प्रत्यंचमच्युतंनत्वागुरूनपिगरीयसः क्रियतेशिष्यशिक्षायैगीताभाष्यविवेचनं ॥ ३ ॥ कर्मनिष्ठाज्ञाननिष्ठे

॥ ॐ ॥ श्रीगणेशायनमः ॥ श्रीसरस्वत्यैनमः ॥ श्रीवेदपुरुषायनमः ॥ श्रीगुरुभ्योनमः ॥ छ ॥
॥ ॐ ॥ नारायणः परोऽव्यक्तादंडमव्यक्तसंभवं ॥ अंडस्यांतरित्तमेलोकाः सप्तद्वीपाचमेदिनी ॥ १ ॥ छ ॥

वृ

सुपायोपेयभूतंनिष्ठा [illegible] शास्त्रंव्याचिख्यासुर्भगवान्भाष्यकारोविघ्नोपप्लवोपशमनादिप्रयोजनसिद्धये प्रामा०
लोकव्यवहारप्रम [illegible] रणंमंगलाचरणंसंपादयन्ननवशेषेणेतिहासपुराणयोर्व्याचिख्यासितगीताशा ॥ १ ॥
स्त्रैकवाक्यता [illegible] नकमंनर्यामिविषयमुदाहरति ॥ नारायणइति आपोनाराइतिप्रोक्ताआपोवैन

चरा

रस्तनवः ॥ अयनंतस्यताः पूर्वं त इतिसम्मतिसिद्धः स्थूलदर्शिनां नारायणशब्दार्थः ॥ सूक्ष्मदर्शिनः पुनराचक्ष
ते ॥ नरशब्देन चरात्मकं शरीरजातं नमु यसन्निहिताश्चिदाभासाजीवानाराइति निरूप्यंते तेषामयनमाश्रयोनि
यामकोंतर्यामीनारायणइति ॥ यमधि मेब्राह्मणां श्रीनारायणाख्यं मंत्राम्नायं चार्थीयत्ते तदनेन शास्त्रप्रतिपाद्यं वि
शिष्टं तत्वमादिष्टं भवति ॥ ननु परस्या पासंबंधादंतर्यामित्वं शास्त्रप्रतिपाद्यत्वं च वक्तव्यं अन्यथाकूटस्थासंगाविषयाऽ
द्वितीयस्य तदयोगात्तथाचश्रुतौ ताऽसि यंययोक्तापरदेवताशास्त्रादावनुस्मर्यते शुद्धस्य हि तत्वस्यानुस्मरणमभीष्टफलव
दभीष्टं तत्राह ॥ परोव्यक्तादिति ॥ अव्यक्त गात्कृतं मायेत्यनर्थांतरं तस्मात्परो व्यतिरिक्तस्तेनास्पृष्टोऽयंपरः अक्षरात्परतः पर
इति श्रुतेर्गृहीतस्तुत्वनोमायाऽसंबंधोपि कल्पनयान दीयसंगतिमंगीकृत्यांतर्यामित्वादिकमुक्तं यंयस्मादीश्वरस्यव्यतिरे
कोविवक्षितस्तस्मिन्नव्यक्ते साक्षिसिद्धेपि कार्यलिंगकमनुमानमुपन्यस्यति ॥ अंडमिति ॥ अपंचीकृतपंचमहाभूतात्मकं हैरण्यगर्भं तत्व
मंडमित्यभिलप्यते ॥ तदव्यक्तात्पूर्वोक्तादुत्पद्यते ॥ प्रसिद्धा हि श्रुतिस्मृतिवादेषु हिरण्यगर्भस्य मूलकारणादुत्पत्तिः ॥ तथाच ॥ कार्यलिं
गादव्यक्ताभिव्यक्तिरित्यर्थः हिरण्यगर्भे श्रुतिस्मृतिसमधिगतेपि कार्यलिंगकमनुमानमस्तीति मन्वानो विराडुत्पत्तिमुपदर्शयति ॥ अं
डस्येति ॥ उक्तस्यांडस्य हिरण्यगर्भाभिधानस्यांतरे तेभूरादयोलोकाविराडात्मकावर्तंते ॥ कार्यं हि कारणस्यांतर्भवतीति तेन हिरण्यगर्भांतर्भूरा
दयोलोकाविराडात्मानस्तेनसृष्टाइति लिंगाद्धिरण्यगर्भसिद्धिरित्यर्थः ॥ लोकानेवपंचीकृतपंचमहाभूतात्मकविराडात्मकत्वेन व्युत्पाद
यति ॥ सप्तद्वीपेति ॥ सा पृथिव्यभवदिति श्रुतौ विराजो जन्म संकीर्तितमिति संगीकारादशेषयद्वीपोपेता पृथिवीसनेन सर्वलोकात्म
कोविराडेवोच्यते ॥ चशब्देन विराजो हिरण्यगर्भपूर्वोक्तांडात्मन्यंतर्भावात्तता ॥ संभवोनुकृष्यते ॥ परमात्मा हि स्वाज्ञानद्वाराजगदशेष
स्यात्मन्येवांतर्भाव्याऽखंडैकरससच्चिदानंदात्मनास्वेमहिम्नि तिष्ठतीत्यर्थः ॥ अत्रचनारायणशब्देनाभिधेयमुक्तं नरा
जीवा पदवाच्यास्तेषामयनमधिष्ठानं तत्पदवाच्यं परं ब्रह्म तथाच कल्पितस्याधिष्ठानातिरिक्तस्वरूपाभावाद्वाच्यस्यकस्मिन
त्मत्वमात्रत्वाद्ब्रह्मात्मैक्यं विषयोत्रसूच्यते ॥ तेनार्थाद्विषयविषयिभावरूपसंबंधोध्वनितः ॥ परोव्यक्तादित्यनेन मायासं
च्या सर्वानर्थनिवृत्त्यापरमानंदाविर्भावलक्षणोमोक्षोपि विवक्षितस्तेन च तत्कामस्याधिकारोद्योतितः परिशिष्टेन तु
न स्तुवमद्वितीयतत्वमावेदितं तेन च वस्तुद्वारापरमविषयत्वं तज्ज्ञाननिष्ठायास्तदुपायभूतकर्मनिष्ठायाश्चावांतरविष

८

वमि मित्यवधेयं ननु नैवं साध्यसाधनभूतं निष्टाद्वयमत्र भगवता प्रतिपाद्यते भूमिप्रार्थितेन ब्रह्मणाभ्यर्थितस्य भगवतो भूमिभा
उद्देवेन देवक्यामाविर्भूतस्य तादर्थ्येन मध्यमं पृथासुतं प्रख्यापितमहिमानं प्रेरयितुं धर्मयोरिहानूद्यमानत्वादतो नास्य शास्त्रस्य निष्टा
ष्प र्विषयभावमनुभवितुमलमिति तत्र ॥ भगवतो धर्मसंस्थापनस्वाभाव्यश्रौव्याद्धर्मद्वयस्थापनार्थमेव प्रादुर्भावाभ्युप
ग परिहारस्य चार्थिकत्वादर्जुनं निमित्तीकृत्याधिकारिणं स्वधर्मप्रवर्तनद्वारा ज्ञाननिष्ठायामवतारयितुं गीताशास्त्रस्य
प्र॰ त्वादुचितमस्य निष्ठाद्वयविषयत्वमिति परिहरति ॥ स भगवानित्यादिना धर्मद्वयमर्जुनायोपदिदेशेत्यन्तेन भाष्येण तत्रेदं गीता
शास्त्रं व्याख्यातुमुचितं आप्तप्रणीतत्वानिर्धारणात्तथाविधशास्त्रान्तरवदित्याशंक्य मंगलाचरणस्योद्देश्यं दर्शयन्नादौ शास्त्रप्रणेतु

॥ स भगवान्सृष्ट्वेदं जगत्तस्य च स्थितिं चिकीर्षुः ॥

राप्तत्वनिर्धारणार्थं सर्वज्ञत्वादि प्रतिज्ञाप गज्जनयितृत्वमाह ॥ स भगवानिति ब्रह्मणो नारायणाख्यो देवः सर्वज्ञः सर्वेश्वरः ॥ आ॰टी ॥
समस्तमपि प्रपंचमुत्पाद्य व्यवस्थितः ॥ यानामतत्त्वमीश्वरानुगृहीतानामाप्तत्वसिद्ध्या तस्य परमाप्तत्वसिद्धेरित्यर्थः ॥ ननु
भगवतास्सृष्टमपि चातुर्वर्ण्यादिविशिष्टं हिर त्वक्षणं जगद्व्यवस्थितिमास्थातुं शक्यते व्यवस्थापकाभावान्न च परस्यैवेश्वरस्य ॥ २ ॥
व्यवस्थापकत्वं वैषम्यादिप्रसंगात्त्राह तस्य स्य जगतो मर्यादाविरहितत्त्वे शंकितेनेदीयां व्यवस्थां कर्तुमिच्छन्व्यवस्थापक
मालोच्य क्षत्रस्यापि क्षत्रत्वे नप्र धर्ममधिगम्य स्रष्टवानित्यर्थः ॥ ।। ५ ।। ५ ।। ५ ।। ५ ।। ५ ।। ५ ।।०

वेदं [illegible] स्थते तर्हि वर्णित्वमाश्रमित्वं चोपेक्ष्य सर्वैरेव पुरुषार्थार्थिभिर्द्धर्मविधिर्मौ यथायोग्यमनुष्ठेया विध्यनुष्ठान्नियमात्सिद्धि
[illegible] स्याह ॥ ब्राह्मणस्येति ॥ अर्थिताविशेषेपि स्मृतिस्मृतिपर्यालोचनयाऽनुष्ठाननियमसिद्धिरित्यर्थः ॥ नित्यनैमित्तिकेषु यावज्जी
वं काम्येषु करणं शेरागाधीनाम्रुचत्तिरिति कर्तव्यत्वांशे वैधीति विभागेपि कदाचिदेवानुष्ठानमिति विभागमभिप्रेत्याह ॥
दे [illegible] ति ॥ यथोक्तधर्मवशादेव जगतो विनश्विनः स्थितिसिद्धेर्भगवतो नारायणस्यादिकर्तुरन्येकानर्थकत्वभिन्नशरीरपरिग्र

॥ ब्राह्मणाद्यैर्वर्णिभिराश्रमिभिश्चानुष्ठीयमानो दीर्घेण कालेनानुष्ठातॄणां कामोद्भवाद्धीयमाण
विवेकविज्ञानहेतुकेनाधर्मेणाभिभूयमाने धर्मे प्रवर्धमाने चाधर्मे जगतः स्थितिं परिपिपालयिषुः स आ॥
॥ दिकर्ता नारायणाख्यो ॥

हासंभवादन्यस्येव कस्यचिदनाप्तस्य वैषम्यनै [illegible] स्य भगवतो विग्रहपरिग्रहद्वारेण गीताशास्त्रप्रणयनमिति कुतोऽस्यात्र प्रणीतत्वं तत्राह ॥
अनुष्ठातॄणामिति ॥ अथ वा यथोक्तशंकाय [illegible] र्द्रोस्यारम्भो नरं ॥ महता कालेन हृतत्वेनात्यपेक्षापरावसाने साधकानां कामक्रोधादि
पूर्वकाविवेकादधर्मबाहुल्याद्धर्माभिभ [illegible] यमभिवृद्धेश्च जगतो मर्यादाभेदे तदीयां मर्यादामात्मनानिर्मितां पालयितु०
मिच्छन्प्रवृत्तो भगवानेन तदर्थ्येन चा [illegible] रक्षणार्थं त्रिगुणमयं मायाशक्तिं प्रयुक्तस्वेच्छाविग्रहं जग्राहेत्यर्थः ॥८

आ०द॥
३

स्रष्टस्य धर्मस्य साध्यस्वभावतया णसंभवात्तस्यैव तदनुष्ठानत्वानभ्युपगमात्प्राणिप्रभेदानामधर्मप्रायाणां तदयोगा
त्कुतस्तदीयास्थितिरित्याशंक्याह ॥ मरी सृष्टवेतनास्रष्टानां प्रजानां स्थितिहेतूनां यागदानादिप्रवृत्तिसाध्यं धर्ममनुष्ठातुमधिकृ
तानां स्वकीयत्वेन तदुपादानमुपपन्नमित्य सनंदनादिभ्यो विशेषार्थं धर्मं विशिनष्टि ॥ वेदोक्तमिति ॥ ननु नैतावता जगदशेषम•
पि व्यवस्थापयितुं शक्यते ॥ प्रवृत्तिमार्गे क्तं धर्मं प्रतिनियतत्वेपि निवृत्तिमार्गस्य पूर्वोक्तधर्मत्वेन व्यवस्थापनायोगात्तत्राह
ततोन्यांश्चेति ॥ निवृत्तिरूपस्य धर्मस्य शमद पात्मनो गमकमाह ॥ ज्ञानेति ॥ विवेकवैराग्यातिशये शमदमाद्युक्ति [illegible] योगम्यते तन्नो ॥

॥ मरीच्यादीनग्रे सृष्ट्वा प्रजापतीन्प्रवृत्तिलक्षणं धर्मं ग्राहयामास वेदोक्तं ततोन्यांश्च सनकसनंदनादी ॥
॥ नुत्पाद्य निवृत्तिलक्षणं धर्मं ज्ञानवैराग्यलक्षणं ग्राहयामास ॥ द्विविधो हि वेदोक्तो धर्मः प्रवृत्तिलक्ष ॥
॥ णो निवृत्तिलक्षणश्च जगतः स्थितिकारणं प्राणिनां साक्षादभ्युदयनिःश्रेयसहेतुर्यो धर्मो ॥ ध ॥ ध ॥ • ॥

वि ादित्तस्य गमकमित्यर्थः ॥ धर्मे बहुविदां विवाददर्शनाज्जगतः स्थैर्ये कारणीभवद्धर्मांतरमपि संभाव्यमस्तीत्याशंक्याह ॥ द्विविधो हीति
संगाप्रसंगस्य व्यावर्त्तये प्रकृतं धर्मं लक्षयति ॥ प्राणिनामिति प्रवृत्तिलक्षणो धर्मोऽभ्युदयार्थिनां साक्षादभ्युदयहेतुः
यसार्थिनां परंपरया निःश्रेयसहेतुर्निवृत्तिलक्षणस्तु धर्मः साक्षादेव निःश्रेयसहेतुरिति विभागः ॥ ज्ञानस्यैव निः
त्वेपि शमादीनां तद्वारा तद्धेतुत्वं ज्ञानातिरिक्तव्यवधानाभावाच्च साक्षादित्युक्तं ॥ ५४ ॥ राम राम राम राम

॥आ०टि॥

अथैवमपि कथमीश्वरस्यानादिनिधनस्य नित्यशुद्धबुद्धमुक्तस्वभावस्य स्वभावविपरीतं जन्मादि संभवति ॥ न हि भूतानामीशि-
तास्वतंत्रः स्यात्मनोनर्थं स्वयमेव संपादयितुमर्हति न चास्य देहादिग्रहे किमपि फलमुपलभ्यते तत्राह ॥ त्रिगुणात्मिकामिति सिसृक्षि-
तदेहादिगनवैरूप्यसिध्यर्थमिदं विशेषणं ॥ तस्या ॥ व्यापकत्वं वक्तुं वैष्णवीमित्युक्तं ॥ ईश्वरपारवश्यं तस्या ॥ दर्शयति ॥ स्वामिति
तस्याः प्रतिभासमात्रशरीरत्वमेव न तु वस्तुत्वमित्याह ॥ मायामिति ॥ नानाविधकार्याकारेण परिणमितृत्वं सूचयति प्रकृति-
मिति ॥ ईश्वरस्य प्रकृत्यधीनत्वं वारयति ॥ वशीकृत्येति ॥ नित्यत्वं कार्याकारविरहितत्वं शुद्धत्वमकारणत्वं बुद्धत्वमजडत्वं मुक्तत्व

॥ त्रिगुणात्मिकां वैष्णवीं स्वां मायां प्रकृतिं वशीकृत्याजोऽव्ययोऽभूतानामीश्वरो नित्यशुद्धबुद्धमुक्त॥
॥ स्वभावोऽपि सन् स्वमायया देहवानिव जात इव च लोकानुग्रहं कुर्वन् लक्ष्यते ॥ ६ ॥

मविद्याकामकर्मपारतंत्र्यराहित्यं ॥ न च नित्यत्वादयः संसारावस्थायामसंतो मोक्षावस्थायां संभवंतीति युक्तमित्याह ॥ स्वभाव इ-
ति देहग्रहे प्राधान्यं मायायाः दर्शयितुं पुनः स्वमाययेत्युक्तं ॥ स वा अयं पुरुषो जायमानः शरीरमभिसंपद्यमान इति श्रुतिमाश्रि-
त्याह ॥ देहवानिति ॥ इवकाराभ्यां देहादेरवस्तुत्वेन कल्पितत्वं द्योत्यते ॥ धर्मद्वयोपदेशद्वारा प्राणिवर्गस्याभ्युदयनिःश्रेयसप्र-
वणत्वापादनं लोकानुग्रहः ॥ यद्यपि कूटस्थः स्वतंत्रो नित्यत्वादिलक्षणश्चायमीश्वरः स्वतो दृश्यते तथापि यथोक्तमायाशक्त्या देहादि गृहीत्वा
॥१०॥ ध्यौ ॥ ॥ प्राणिनामनुग्रहमादधानो न स्वभावविपर्ययं पर्येतीत्यर्थः ॥ ॥

अ० ९
॥ ४ ॥

भौमस्य ब्रह्मणो गुप्त्यै वसुदेवादजीजनदिति स्मृतिमनुसृत्य पदद्वयमन्वयं व्याचष्टे ॥ भौमस्येति ॥ अंशेनेति ॥ स्वेच्छानिर्मितेन मायामयेन रूपेणेत्यर्थः ॥ किन्त्वेतस्मिन्नर्थे पौराणिकी प्रसिद्धिरनूद्यते ॥ न हि भगवतो व्यतिरिक्तस्येदं जन्मेति उच्यते युज्यते बहुविधागमविरोधादिति भावः ॥ ननु वैदिकधर्मसंरक्षणार्थं भगवतो जन्म यदा यदा हि धर्मस्येत्यादिदर्शनात्किमिदं ब्राह्मणत्वस्य रक्षणार्थमिति तत्राह ॥ ब्राह्मणत्वस्येति ॥ तथापि वर्णाश्रमभेदव्यवस्थापनं विना कथं यथोक्तधर्मसंरक्षणमित्याशंक्याह ॥ तदधीनत्वादिति ॥ ब्राह्मणं हि पुरोधाय यज्ञादिप्रतिष्ठा प्रतिपद्यते याजनाध्यापनयोस्तद्धर्मत्वात्तद्द्वारा वर्णाश्रमभेदव्यव

॥५.॥७॥ विष्णुर्भौमस्य ब्रह्मणो ब्राह्मणत्वस्य रक्षणार्थं देवक्यां वसुदेवादंशेन किल संबभूव ब्राह्मणत्वस्य हि रक्षणेन रक्षितः स्याद्वैदिको धर्मस्तदधीनत्वाद्वर्णाश्रमभेदानां स च भगवान् ज्ञानैश्वर्यशक्तिबलवीर्यतेजोभिः सदा संपन्नः ॥५॥ रामरामरामराम ॥

स्थापनादतो ब्राह्मण्ये रक्षिते सर्वमपि सुरक्षितं भवतीत्यर्थः ॥ नन्वेवमपि भगवतो नारायणस्य शरीरादिमत्त्वे सत्यस्मदादिभिरविशेषादनीश्वरत्वप्रसक्तिरित्याशंक्य ज्ञानादिकृतं विशेषमाह ॥ स चेति ॥ ज्ञानं ज्ञप्तिरर्थपरिच्छित्तिः ॥ ऐश्वर्यमीश्वरत्वं शक्तिस्तदर्थनिर्वर्तनसामर्थ्यं ॥ बलं सहायसंपत्तिः ॥ वीर्यं पराक्रमवत्त्वं ॥ तेजस्तु प्रागल्भ्यमधृष्यत्वमेते च षड्गुणाः सर्वविषयाः सर्वदा भगवति वर्तन्ते तथा च तस्य शरीरादिमत्त्वेऽपि नास्मदादिसाम्यमित्यर्थः ॥५॥ ५॥ रामा रामा

गणेशं २

ननु प्रयोजनमनुद्दिश्य न मंदोपि प्रवर्त्तत इति न्यायादीश्वरस्याप्तकामस्य न यावत्स्वप्रयोजनाभावादनुग्राह्याणां चाद्वैतवादे व्यतिरिक्तानामसत्वात्तद्धर्मद्वयमुपदेष्टुमुचितमिति नेत्याह ॥ स्वप्रयोजनेति ॥ कल्पितभेदभांजि भूतान्युपादायानुग्रहेच्छया चैत्यवंदनादिविलक्षणं धर्मद्वयमर्जुनं निमित्तीकृत्याप्तकामोपि भगवानुपदिष्टवानित्यर्थः ॥ अर्जुनस्योपदेशापेक्षास्तीति दर्शयितुं विशिनष्टि शोकेति ॥ ननु भूतानुग्रहे कर्त्तव्ये किमित्यर्जुनायैव धर्मद्वयं भगवतोपदिश्यते नेत्याह ॥ गुणाधिकैरिति ॥ प्रचयं गमिष्यतीति मत्वा धर्मद्वयमर्जुनायोपदिदेशेति संबंधः ॥ अथ तथागतेनोपदिष्टधर्मवदयमपि भगवदुपदिष्टो धर्मो न प्रामाणिकोपादेयता-

॥ स्वप्रयोजनाभावेपि भूतानुजिघृक्षया वैदिकं हि धर्मद्वयमर्जुनाय शोकमोहमहोदधौ निमग्नायोपदिदेश गुणाधिकैर्हि गृहीतोऽनुष्ठीयमानश्च धर्मः प्रचयं गमिष्यतीति तं धर्मं भगवता यथोपदिष्टं सर्वज्ञो भगवान् वेदव्यासो गीताख्यैः सप्तभिः श्लोकशतैरुपनिबबंध । तदिदं गीताशास्त्रं समस्तवेदार्थसारसंग्रहभूतं ॥ २॥

मुपगच्छेदित्याशंक्य वेदोक्तत्वान्नास्य तत्तुल्यत्वमित्युक्तमित्यभिप्रेत्य शिष्टपरिगृहीतत्वाच्च मैवमित्याह ॥ तं धर्ममिति ॥ अथ मे धर्मबुद्धिर्वेदव्यासस्य ज्ञाने त्वाशंक्याह ॥ सर्वज्ञ इति ॥ कृष्णद्वैपायनं विद्धि व्यासं नारायणं प्रभुमिति स्मृतेः ॥ सज्जनोपकारकभगवदवतारत्वाच्च व्यासस्य नान्यथाबुद्धिरित्याह ॥ भगवानिति ॥ गीताशास्त्रस्याप्तप्रणीतत्वमपाकृत्य व्याख्येयत्वमुपपादितमुपसंहरति ॥ तदिदमिति ॥ पौरुषेयस्य वचसो मूलप्रमाणाभावेनाप्रामाण्यमिति मत्वा विशि-

॥ नष्टि समस्तेति ॥

ण
शास्त्रांतरे तदर्थप्रतिपत्तिसंभवे किमिति व्याख्यानमित्याशंक्याह ॥ दुर्विज्ञेयार्थमिति ॥ पदच्छेदः पदार्थोक्तिरित्यादिक्रमेण
स्य शास्त्रस्य पूर्वाचार्यैर्व्याख्यातत्वात्किमर्थमिदमारभ्यते गतार्थत्वात्तत्राह ॥ तदर्थेति ॥ गीताशास्त्रार्थप्रकटीकरणार्थं पदवि
भागस्तदर्थोक्तिः समासद्वारा वाक्यार्थनिर्देशस्तत्रापेक्षितो न्यायश्चाक्षेपसमाधानलक्षणो वृत्तिकारैर्दर्शितस्तथापि तथा
विधमेव शास्त्रे शास्त्रपरिचयशून्यैः समुच्चयासमुच्चयवादिभिर्विरुद्धार्थत्वेनानेकार्थत्वेन च गृहीतमालक्ष्य तद्बुद्धि
मनुरोद्धुमिदमारभ्यमित्यर्थः येषां प्राचीने व्याख्याने बुद्धिरविष्टा तेषां संप्रति ततेऽतस्मिन्नसौ प्रवेक्ष्यतीति कुतो॰ आ॰ ॥ अ॰ ॥ १ प्रं

॥७॥ दुर्विज्ञेयार्थं तदर्थाविष्करणायानेकैर्विरचितपदपदार्थवाक्यार्थन्यायमप्यस्यं तद्विरुद्धाने
॥कार्थत्वेन तो किंकैर्गृह्यमाणमुपलभ्याहं विवेकतोऽर्थनिर्धारणार्थं संक्षेपतो विवरणं करिष्यामि ॥०

नियमस्तत्राह ॥ विवेकत इति ॥ पूर्वव्याख्याने न तदर्थनिर्धारणार्थो न्यायः संकीर्णवज्ञातीति न तत्र केषांचिन्मनीषा समुन्मिषति प्र
कृते त्वसंकीर्णतया न तत्पदार्थनिर्णयोपयोगी न्यायो विविच्यते तेनात्र मंदमध्यमयोरपि बुद्धिरवतरतीत्यर्थः ॥ किंचानपे ॥ राम ॥
क्षिताधिकग्रंथसद्भावान्न प्राचीने व्याख्याने ऽर्थिनोऽहरहं प्रवृत्तिरत्र त्वपेक्षितात्मग्रंथे विवरणे प्रायशः सर्वेषां प्रवृत्तिः स्यादिति मत्वाह ॥ संक्षेपत इति ॥१०॥
॥ ६ ॥

नन्वनाप्तप्रणीतत्वाद्यभावेपि नेदं शास्त्रं व्याख्येयं विषयाद्यनुबंधस्यानभिहितत्वेन शास्त्रत्वाभावादित्याशंक्य सर्वव्यापाराणां प्रयोजनार्थत्वा
द्दादौ प्रयोजनमाह॥ तस्येति॥ प्रसाधितप्रामाण्यस्य व्याख्येयत्वेन मनसि सन्निहितस्य गीताशास्त्रस्य संक्षेपः संग्रहः संपिंडितत्वमेकवाक्यत्वं
तेनेदं परमफलत्वं यन्निश्चितं श्रेयो निःश्रेयसं कैवल्यं॥ आवांतरफलत्वं तु तत्र तत्रावांतरवाक्यभेदेन मनोनिग्रहादि वक्ष्यते॥ निःश्रेय
सं च द्विविधं निरतिशयसुखाविर्भावो निःशेषानर्थोच्छित्तिश्च तत्राद्यमुदाहरति॥ परमिति॥ द्वितीयं दर्शयति॥ सहेतुकस्येति॥ संसारो

तस्यास्य गीताशास्त्रस्य संक्षेपतः प्रयोजनं परं निःश्रेयसं सहेतुकस्य संसारस्यात्यंतोप
रमलक्षणं तच्च सर्वकर्मसंन्यासपूर्वकात् आत्मज्ञाननिष्ठारूपात् धर्माद्भवति॥०॥

परमस्यात्यंतिकत्वं प्रतियोगिनः संसारस्य पुनरुत्पत्त्ययोग्यत्वं न च स्वापमूर्छादिव्यवच्छेदार्थं विशेषणं तदेव साधयितुं सहेतुकस्येत्युक्तं
उक्तं फलत्वं समुच्चितादेकाकिनो वा कर्मणः स्यादिति तस्यैव शास्त्रप्रतिपाद्यत्वेनेत्याशंक्याभिधेयमभिधित्समानः समाधत्ते॥ तच्चे
न ति॥ आत्मज्ञाननिष्ठाशेषत्वेन कर्मनिष्ठात्रोच्यते प्राधान्येन त्वात्मज्ञाननिष्ठैवात्र प्रतिपाद्यत इत्यर्थः ननु शेषिणी निष्ठा कुतो भवतीति संन्यासा
त्कर्मनिष्ठायाः शेषत्वात्तत्राह॥ सर्वेति॥ संन्यासद्वारेण सहृदनुदितश्रवणादेः शेषिणी निष्ठा सिध्यतीति शेषत्वं च कर्मणस्तत्र परंपरायतनमित्यर्थः॥ ॥

।०॥ ननु यज्ञदानतपःकर्म न त्याज्यं कार्यमेव तदिति वाक्यशेषात्समुच्चितमात्मज्ञानमत्र प्रतिपाद्यते नेत्याह ॥ तथेति ॥ सर्वकर्मसंन्यासपूर्वकमात्मज्ञान ॥आ०अ०॥
निष्ठारूपधर्मं निःश्रेयससाधनं प्रयोजनं ॥ प्रागुक्तं परामृशति ॥ इममेवेति ॥ वक्तृभेदादभिप्रायभेदाशंकां वारयति ॥ भगवतैवेति ॥ उक्तम ॥१॥
नुगीतास्विति संबंधः ॥ ब्रह्मणः पदं पूर्वोक्तं निःश्रेयसं तस्य वेदनं लाभस्तत्र विशिष्टो ज्ञाननिष्ठारूपो धर्मः समर्थो। भवतीत्यर्थः ॥ यज्ञदाना
व दिवाक्यस्य तु तद्व्याख्यानावसरे तात्पर्यं वक्ष्यते ॥ कर्मत्यागस्य भगवतोभिप्रेतत्वे वाक्यांतरमनुगीतागतमेवोदाहरति ॥ तत्रैवेति ॥ धर्माधर्मापू
र्वासंसर्गित्वे हेतुमाह ॥ नचैवेति ॥ क्रियाद्वयसंबंधाभावात्तन्निर्वर्त्यापूर्वाभ्यामसंबंधे प्राप्तमर्थमाह ॥ यः स्यादिति ॥ वागादि

॥ तथेममेव गीतार्थं धर्ममुद्दिश्य भगवतैवोक्तं ॥ स हि धर्मः सुपर्याप्तो ब्रह्मणः पदवेदने इत्यनुगीतासु किं ॥
॥ चान्यदपि तत्रैव चोक्तं ॥ नैव धर्मी न चाधर्मी न चैव हि शुभाशुभी यः स्यादेकासने लीनस्तूष्णीं किंचिद [illegible] चिंतन ॥ व३भा
॥ यत्र ॥ ज्ञानं संन्यासलक्षणमिति च ॥ इहापि चांते उक्तमर्जुनाय सर्वधर्मान्परित्यज्य मामेकं शरणं व्रजेति ॥

वां स्वकरणव्यापारविरहितत्वं तूष्णीमित्युच्यते नेकिंचिदचिंतयन्नित्यंतःकरणव्यापाराभावोभिप्रेतः ॥ द्विविधकरणव्यापारविरहितः
संप्रागुक्तो योधिकारी केवलमेकस्मिन्नद्वितीये ब्रह्मण्यासनमवस्थानं तत्र लीनस्तस्मिन्नेव समाप्तिभागी स्या
त्तस्य संप्रज्ञानसमाधिनिष्ठस्य सर्वकर्मत्यागहेतुकं ज्ञानं मुक्तिहेतुर्भवतीत्यर्थः ॥ न केवलमनु ॥राम॥
गीतास्वेवं यथोक्तं ज्ञानमुक्तं किंतु प्रकृतेपि शास्त्रे समाप्त्यवसरे दर्शितमित्याह ॥ इहापीति ॥१॥५॥६॥ ॥६॥

नन्वत्र निवृत्तिलक्षणधर्मात्मकं ससंन्यासमात्मज्ञानमेव न प्रतिपाद्यते कुरु कर्मैव तस्मात्त्वमित्यादौ प्रवृत्तिलक्षणस्यापि ध
र्मस्य वक्ष्यमाणत्वादुभयोश्च प्रकृतत्वाविशेषान्नाह॥ अभ्युदयार्थोऽपीति॥ ननु वर्णिभिराश्रमिभिश्चानुष्ठेयत्वेनान्यत्र वि
हितस्यापि तस्य न युक्तं मोक्षसाधनत्वाधिकारे विधानं देवादिस्थानप्राप्तिहेतुत्वेन मोक्षप्रतिपन्थित्वात्सत्यं॥ तथापि फला
भिलाषमन्तरेणेश्वरार्पणधियाकृतस्य बुद्धिशुद्धिहेतुत्वात्तस्येह वचनमित्याह॥ सदेवादीति फलाभिसंधिद्वाराकृतः

॥ अभ्युदयार्थोऽपि यः प्रवृत्तिलक्षणो धर्मो वर्णाश्रमांश्चोद्दिश्य विहितः॥ स देवादिस्थानप्राप्तिहेतुरपि सन्॥
ईश्वरार्पणबुद्ध्यानुष्ठीयमानः सत्त्वशुद्धये भवति फलाभिसंधिवर्जितः शुद्धसत्त्वस्य च विज्ञाननिष्ठायोग्यता
प्राप्तिद्वारेण ज्ञानोत्पत्तिहेतुत्वेन च निःश्रेयसहेतुत्वमपि प्रतिपद्यते॥ तथा चेममर्थमभिसंधाय वक्ष्यति ब्रह्मण्या
धाय कर्माणि॥ योगिनः कर्म कुर्वन्ति संगं त्यक्त्वात्मशुद्धये इति इमं द्विप्रकारं धर्मं निःश्रेयसप्रयोजनं परमार्थतत्त्वं
॥ वासुदेवाख्यं च परं ब्रह्माभिधेयभूतं॥ ५॥

सन्विति शेषः प्रवृत्तिलक्षणधर्मस्योक्तरीत्या चित्तशुद्धिहेतुत्वेऽपि मोक्षाहेतुत्वेन कुतो मोक्षाधिकारे निर्देशः स्यादित्याशंक्याह॥ शुद्धेति॥ प्रतिपद्य
ते प्रागुक्तो धर्म इति शेषः यदुक्तं फलाभिसंधिवर्जितमीश्वरार्पणबुद्ध्यानुष्ठितं कर्म बुद्धिशुद्धये भवतीति तत्र वाक्यशेषमनुकूलय
ति॥ तथा चेति॥ शास्त्रस्य प्रयोजनं संसाधनमुक्तमनूद्य विषयं दर्शयति॥ इममिति॥ ०॥ ॥ रामा रामा॥ रामा रामा॥।०

दर्शितेन फलत्वेन शास्त्रस्य निष्ठाद्वयद्वारा साध्यसाधनभावः संबंधो विषयेण विषयविषयित्वमिति विवक्षित्वाह॥ विशेषत॥ इति ए-
वमनुबंधत्रयविशिष्टशास्त्रव्याख्यानमर्हतीत्युपसंहरति॥ विशिष्टेति॥ सिद्धे व्याख्यानयोग्यत्वे व्याख्येयत्वं फलितमाह॥ यत ॥ आ० अ० ॥
इति॥ एवं गीताशास्त्रस्य साध्यसाधनभूतनिष्ठाद्वयविषयस्य परापराभिधेयप्रयोजनवतो व्याख्येयत्वं प्रतिपाद्य व्या० ॥ १ ॥
ख्यातुकामः शास्त्रैकदेशस्य प्रथमाध्यायस्य द्वितीयाध्यायैकदेशसहितस्य तात्पर्यमाह॥ अत्र चेति॥ गीताशास्त्रे
प्रथमेऽध्याये प्रथमश्लोके कथासंबंधप्रदर्शनपरे स्थिते सतीति यावत्॥ तत्रैषाक्षरयोजना॥ धृतराष्ट्रो हि प्रज्ञाचक्षुर्बाह्य-

॥ विशेषतोऽभिव्यंजयद्विशिष्टप्रयोजनसंबंधाभिधेयवद्गीताशास्त्रं ॥ यतस्तदर्थविज्ञाने समस्तपुरुषार्थसिद्धि-
रित्यतस्तद्विवरणे यत्नः क्रियते मया॥ अत्र च धृतराष्ट्र उवाच॥ धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः॥ मामकाः पां-
डवाश्चैव किमकुर्वत संजय॥ १॥

चक्षुरभावाद्बाह्यमर्थं प्रत्यक्षयितुमनीशः सन्नभ्याशवर्तिनं संजयमात्मनो हितोपदेष्टारं पृच्छति॥ धर्मक्षेत्र इति॥ धर्मस्य नहुद्देश्च
क्षेत्रमभिवृद्धिकारणं यदुच्यते कुरुक्षेत्रमिति तत्र समवेताः संगता युयुत्सवो योद्धुकामास्ते च केचिन्मदीया दुर्योधनप्रभृतयः
पांडवाश्चापरे युधिष्ठिरादयस्ते च सर्वे युद्धभूमौ संगता भूत्वा किं कृतवंतः किमस्मदीयं प्रबलं बलं प्रतिलभ्य वीरपुरु- ॥ रामः ॥
षैर्भीष्मादिभिरधिष्ठितं परेषां भयमाविरभूद्येन पक्षद्वयहिंसानिमित्ताधर्मभयमासीद्येन ते युद्धादुपरमेरन्॥ ध्र॥ ध्र॥ ॥ ७ ॥

३२

शि४ ४शि४

रतिपुत्रपरवशत्वाभिनिविष्टस्य धृतराष्ट्रस्य प्रश्ने संजयस्य प्रतिवचनं ॥ दृष्ट्वेत्यादि ॥ पाण्डवानां भयप्रसंगो नास्तीत्येव तुशब्देन •
द्योत्यते ॥ प्रत्युत दुर्योधनस्यैव राज्ञो भयं प्रसक्तं प्रादुर्भूतं पाण्डवानां पाण्डुसुतानां युधिष्ठिरादीनामनीकं सैन्यं धृष्टद्युम्नादिभिरति
धृष्टैर्व्यूढं स्वाधिष्ठितं दृष्ट्वा प्रत्यक्षेण प्रतीत्य त्रस्तहृदयो दुर्योधनो राजा तदा तस्यां संग्रामोद्योगावस्थायामाचार्यं द्रोणनामानमा
त्मनः शिक्षितारं शिक्षिताशस्त्राद्यपन्नुपसंगम्य तदीयं समीपं विनयेन प्राप्य भूयोद्विग्नहृदयत्वेपि नस्थित्वादेव वचनमर्थ
सहितं वाक्यमुक्तवानित्यर्थः ॥ २ ॥ तदेव वचनमुदाहरति ॥ पश्येति ॥ एतामस्मदभ्यासे महापुरुषानपि भवत्समुखानपरिगणय्य भयत्ले
शांश्रून्यांम

संजयउवाच ॥ दृष्ट्वा तु पांडवानीकं व्यूढं दुर्योधनस्तदा ॥ आचार्यमुपसंगम्य राजा वचनमब्रवीत् ॥ २ ॥
पश्यैतां पांडुपुत्राणामाचार्य महतीं चमूं ॥ व्यूढां द्रुपदपुत्रेण तव शिष्येण धीमता ॥ ३ ॥ • ॥

शाश्रून्यामवस्थितां चमूमिमां सेनां पाण्डुपुत्रैर्युधिष्ठिरादिभिरानीतां महतीमनेकाक्षौहिणीसहितामक्षोभ्यां पश्येत्याचार्यं •
दुर्योधनो नियुङ्क्ते नियोगद्वारा चैतस्मिन्परेषामवज्ञां विज्ञापयन्क्रोधातिरेकमुत्पादयितुमुत्सहते ॥ परकीयसेनाया वैशि
ष्ट्याभिधानद्वारा परपक्षेपि त्वदीयमेव बलत्वमिति सूचयन्नाचार्यस्य तन्निरसनं सुकरमिति मन्वानः सन्नाह ॥ व्यू
ढामिति ॥ राज्ञो द्रुपदस्य पुत्रस्तव च शिष्यो धृष्टद्युम्नो लोके ख्यातिमुपागतः स्वयं च शास्त्रास्त्रविद्यासंपन्नो म
हामहिमा तेन व्यूहमापाद्याधिष्ठितामिमां चमूं किमिति न प्रतिपद्यसे किमिति वा मर्षयसीत्यर्थः ॥१॥३॥।॥५।॥०॥

भ०गी०॥
॥

अन्येपि प्रतिपक्षाः पराक्रमभाजो बहवः संतीत्यनुपेक्षणीयत्वं परपक्षस्य विवक्षन्नाह ॥ अत्रेति ॥ अस्यां प्रतिपक्षभूतायां सेनायां
शूराः स्वयमभीरवः शास्त्रकुशला भीमार्जुनाभ्यां सर्वसंप्रतिपन्नशौर्याभ्यां तुल्या युद्धभ्रमावुपलभ्यं ते तेषां युद्धशौंडीरैर्विशादीकर्-
तुं विशिनष्टि ॥ महेष्वासा इति ॥ इषुरस्यतेस्मिन्निति व्युत्पत्त्या धनुस्तथोच्यते तच्च महदन्यैरप्रधृष्यं येषां ते राजानस्तथा वि-
वक्ष्यं ते तानेव परसेनामध्यं ध्यासीनान्परपक्षानुरागिणो राज्ञो विज्ञापयति ॥ युयुधानेत्यादिना द्रौपदेयाश्चेत्यंतेन तेषां सर्वेषा-
मपि महाबलपराक्रमभाक्त्वादनुपेक्षात्वं पुनर्विवक्षति ॥ सर्वएवेति ॥ ४ ॥ यद्येवं परकीयं बलमतिप्रभूतं प्रतीसातिभीतवद

आ० अ०॥
वं १

अत्र शूरा महेष्वासा भीमार्जुनसमा युधि ॥ युयुधानो विराटश्च द्रुपदश्च महारथः ॥४॥ धृष्टकेतुश्चेकितानः काशिराजश्च
वीर्यवान् ॥ पुरुजित्कुंतिभोजश्च शैब्यश्च नरपुंगवः ॥५॥ युधामन्युश्च विक्रांत उत्तमौजाश्च वीर्यवान् ॥ सौभद्रो द्रौपदे-
याश्च सर्वएव महारथः ॥६॥ अस्माकं तु विशिष्टा ये तान्निबोध द्विजोत्तम ॥ नायका मम सैन्यस्य संज्ञार्थं तान्ब्रवीमि ते ॥७॥

भिद्यथास्विहं न संधिरेव परैरिष्यतां अलं विग्रहाग्रहेणेत्याचार्याभिप्रायमाशंक्य ब्रवीति अस्माकमिति ॥ तुशब्देनांतरुत्पन्नमपि स्वकीयं भयं तिरोदधा-
नो धृष्टतामात्मनो द्योतयति ये स्वत्नुरुं मत्पक्षे व्यवस्थिताः सर्वेभ्यश्च समुत्कर्षजुषः तान्मयोच्यमानान्निबोध निश्चयेन मद्वचनादवधारयेत्यर्थः
यद्यपि त्वमेव त्रैवर्णिकेषु त्रैविद्यवृद्धेषु प्रधानतया तान्प्रतिपत्तुं प्रभवसि तथापि मदीयसैन्यस्य ये मुख्यास्तानहं ते तुभ्यं संज्ञार्थं असंख्येयेषु म-
ध्ये कतिचिन्नामभिर्गृहीत्वा परिशिष्टाननुपलक्षयितुं विज्ञापनं करोमि न त्वज्ञानं किंचित्तव विज्ञापयामीति मत्वाह ॥ द्विजोत्तमेति ॥०॥७॥ ०

॥राम॥
॥९॥

गी॰भा॰ तानेवस्वसेनानिविष्टान्पुरुषधौरेयानात्मीयभयपरिहारार्थंपरिगणयति॥भवानित्यादिना॥द्रोणादिपरिगणनस्यपरिशिष्टपरिसंख्यार्थ ओं॰अं॰
९ त्वंव्यावर्तयति॥ अन्येचेति॥सर्वेपिभवंतमारभ्यमदीयप्रयत्नानांप्रविष्टाःस्वजीवितादपिमत्संस्पृहयंतीत्याह मदर्थइति॥यत्तुते १
षांशूरत्वमुक्तंतद्दृढंनीविशदयति॥ नानेति॥नानाविधान्यनेकप्रकाराणिशस्त्राण्यायुधानिप्रहरणानिप्रहरणसाधनानियेषां
तेतथाबहुविधायुधसंपन्नावयितत्प्रयोगेनैपुण्याऽभावेनवैफल्यमितिचेत्तत्राहसर्वइति॥९॥राजापुनरपिस्वकीयभयाभावे न
हेतुंनरमाचार्यंप्रत्यावेदयति॥अपर्याप्तमिति॥अस्माकंत्विदमेकादशसंख्याकाक्षौहिणीपरिगणितमपरिमितं
बलंभीष्मेणचप्रथितमहामहिम्नासूक्ष्मबुद्धिनासर्वतोरक्षितंपर्याप्तंपरेषांपरिभवेसमर्थमेतेषांपुनस्तदल्पंसप्तसं॰

भवान्भीष्मश्चकर्णश्चकृपश्चसमितिंजयः॥अश्वत्थामाविकर्णश्चसौमदत्तिस्तथैवच॥८॥अन्ये
चबहवःशूरामदर्थेत्यक्तजीविताः॥नानाशस्त्रप्रहरणाःसर्वेयुद्धविशारदाः॥९॥अपर्याप्तं
तदस्माकंबलंभीष्माभिरक्षितं॥पर्याप्तंत्विदमेतेषांबलंभीमाभिरक्षितं॥ ५॥ ५॥ ५॥ ०॥

ख्याकाक्षौहिणीपरिगणितंपरिमितंबलंभीमेनचचपलबुद्धिनाकुशलताविकलेनपरिपालितमपर्याप्तमस्माननभिभवितुम
समर्थमित्यर्थः॥अथवातदिदमस्माकंबलंभीष्माभिरक्षितमपर्याप्तमपरिमितमप्रधृष्यमक्षोभ्यमेतेषांपांडवानांबलंभीमेन
रक्षितंपरिपर्याप्तंपरिमितंसोढुंशक्यमित्यर्थः॥अथवातत्पांडवानांबलमपर्याप्तंनालमस्माकमस्मभ्यंभीष्माभिरक्षितं॰ राम
भीष्मोऽभिरक्षितोऽस्मेपरबलनिवृत्त्यर्थमितितद्बलंतथोच्यते॥इदंपुनरस्मदीयंबलमेतेषांपांडवानांपर्याप्तंपरिभवेस
मर्थंभीमाभिरक्षितंभीमोऽबलस्तुदयोपस्मादस्मेपरबलनिवृत्त्यर्थमाभिरक्षितस्तस्मादस्माकंनकिंचिदपिभयकारणमस्तीत्यर्थः॥१०॥ ९

स्वकीयबलस्य भीष्माधिष्ठितत्वेन बलिष्ठत्वमुक्त्वा भीष्मशेषत्वेन तदनुगुणत्वं द्रोणादीनां प्रार्थयते ॥ अयनेष्विति ॥ कर्त्तव्यविशेषद्योतीतु शब्दः ॥ समरसमारंभसमये योधानां यथाप्रधानं युद्धक्रमोपूर्वापरादिदिग्विभागेनावस्थितिस्थानानि नियम्यंते तान्यत्रायनान्युच्यंते सेनापतिश्च सर्वसैन्यमधिष्ठाय मध्ये तिष्ठति तेषु सर्वेषु प्रत्येकं संविभागं अप्रत्याख्याय भवानश्वत्थामा कर्णश्चेत्येवमादयो भूत्वं ततः सर्वेवस्थिताः संतो भीष्ममेव सेनापतिं सर्वतो रक्षंतु तस्य हि रक्षणेन सर्वमस्मदीयं बलं रक्षितं स्यात्स्वरबलत्वनिह्नत्यर्थत्वेन तस्यास्माभी रक्षितत्वादित्यर्थः ॥११॥ तमेवमाचार्यं प्रति संवादं कुर्वंतं भयाविष्टं राजानं दृष्ट्वा तदभ्याशवर्ती पितामहस्तद्बुध्यनुरोधार्थमित्यं कृतवानित्याह ॥ तस्येति ॥ राज्ञो दुर्योधनस्य हर्षं बुद्धिगतमुल्लासं सवि

आ०अ०
१

अयनेषु च सर्वेषु यथाभागमवस्थिताः ॥ भीष्ममेवाभिरक्षंतु भवंतः सर्व एव हि ॥११॥ तस्य संजनयन्हर्षं कुरुवृद्धः पितामहः सिंहनादं विनद्योच्चैः शंखं दध्मौ प्रतापवान् ॥१२॥ ततः शंखाश्च भेर्यश्च पणवानकगोमुखाः सहसैवाभ्यहन्यंत स शब्दस्तुमुलोभवत् ॥१३॥

शेषं परपरिभवद्वारा स्वकीयविजयद्वारकं सम्यगुत्पादयन्भयं तदीयमपनिनीषुरुच्चैः सिंहनादं कृत्वा शंखमापूरितवान् किमिति दुर्योधनस्य हर्षमुत्पादयितुं पितामहो यतते कुरुवृद्धत्वात्तस्य कुरुराजत्वात्पितामहत्वाच्चास्य दुर्योधनभयापनयने यत्नार्थो प्रवृत्तिरुचिता तदुपजीवितया तद्वशत्वाच्च ॥ तस्य च सिंहनादे शंखशब्दे च परेषां हृदयव्यथा संभाव्यते ॥ दूरादेव अरिनिवहं प्रति भयजननलक्षणप्रतापत्वादित्यर्थः ॥१२॥ राजाभिप्रायं प्रतीत्य भीष्मप्रवर्त्तनं तरं तत्पक्षैस्तैस्तै राजभिः शंखादयो वाद्यविशेषाहतिशब्दवंतः ॥ संपादिताः स च शंखादिप्रयुक्तः शब्दस्तुमुलो बहुलत्वं भयं परेषां परिघोतयन्नासीदित्याह ॥ तत इति ॥१३॥

॥राम॥
२

एवं दुर्योधनपक्षे प्रवृत्तिमालक्ष्य परिसरवर्तिनौ केशवार्जुनौ श्वेतैरश्वैरतिबलपराक्रमैर्युक्ते महत्यपूर्वे रथे व्यवस्थितावप्याक्रान्तौ
शंखौ प्रतिनवंतावित्याह॥ ततः श्वेतैरिति॥१४॥ तयोः शंखयोः दिव्यत्वमेवावेदयति॥ पांचजन्यमिति॥ केशवार्जुनयोर्युद्धाभि
मुख्यं दृष्ट्वा संपत्तिसंहृष्टः स्वारस्येन समररसिको भीमसेनोपि युद्धाभिमुखोभवदित्याह॥ पौंड्रमिति॥१५॥ एतेषामीदृशीं
प्रवृत्तिं प्रतिस्वपरिपालनावकाशमासाद्य राज्ञो युधिष्ठिरस्यापि प्रवृत्तिं दर्शयति॥ अनंतेति ज्यायसां भ्रातॄणामनुसरणमाव
श्यकमिति मन्वानयोर्यवीयसोर्भ्रात्रोरपि प्रवृत्तिमाह॥ नकुल इति॥१६॥ अन्येषामपि तत्पक्षीयाणां राज्ञामैकमत्यं विज्ञापय

ततः श्वेतैर्हयैर्युक्ते महति स्यंदने स्थितौ॥ माधवः पांडवश्चैव दिव्यौ शंखौ प्रदध्मतुः॥१४॥ पांचजन्यं हृषीकेशो देवदत्तं
धनंजयः। पौंड्रं दध्मौ महाशंखं भीमकर्मा वृकोदरः॥१५॥ अनंतविजयं राजा कुंतीपुत्रो युधिष्ठिरः। नकुलः सहदेवश्च सु
घोषमणिपुष्पकौ॥१६॥ काश्यश्च परमेष्वासः। शिखंडी च महारथः। धृष्टद्युम्नो विराटश्च सात्यकिश्चापराजितः॥१७॥
द्रुपदो द्रौपदेयाश्च सर्वशः पृथिवीपते॥ सौभद्रश्च महाबाहुः शंखान्दध्मुः पृथक्पृथक्॥१८॥ स घोषो धार्त
राष्ट्राणां हृदयानि व्यदारयत्॥ नभश्च पृथिवीं चैव तुमुलो व्यनुनादयन्॥१९॥ ॥५॥ ॥५॥ ॥५॥ ॥५॥ ॥५॥

३

न्धृतराष्ट्रस्य दुराशां संजयो व्युदस्यति॥ काश्यश्चेत्यादिना परमेष्वासादिविशेषणचतुष्टयं प्रत्येकं संबध्यते॥१८॥ तैस्तै राजभिः
शंखानां पूरयद्भिराध्मापितो महाघोषस्तुमलोतिभैरवो नभश्चांतरिक्षं पृथिवीं च भुवनं लोकत्रयं सर्वमेव विशेषेणानुक्रमेणाना
दयन्नादयुक्तं कुर्वन्धार्तराष्ट्राणां दुर्योधनादीनां हृदयान्यंतःकरणानि व्यदारयत् विदारितवान् युज्यते हि तल्लोरित शंखघोषश्र
वणात्त्रैलोक्याकोपेनमुपपन्न एव तां तेषां हृदयेषु दोधूयमानत्वं तदाह॥ स घोष इति॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥॥॥॥॥०

दुर्योधनादीनां धार्तराष्ट्राणामेवं भयप्राप्तिं प्रदर्श्य पार्थादीनां पांडवानां तद्वैपरीत्यमिदानीमुदाहरति ॥ अथेत्यादिना ॥ भीतिप्रसुपस्थितेरनंतरं पलायने प्राप्तेपि धैर्यमुत्साद्य व्यवस्थितानान प्रचलितानेव पराक्रमलक्षणेनोपलभ्य हनूमंतं वानरवरं ध्वजलक्षणत्वेनादायावस्थितोर्जुनो भगवंतमाहेति संबंधः ॥ किमाहेत्यपेक्षायामिदं वक्ष्यमाणं हेतुमद्वचनमित्याह वाक्यमिदमिति कस्यामवस्थायामिदमुक्तवानित्यत्राह ॥ प्रवृत्त इति ॥ शस्त्राणामिषुपाशप्रभृतीनां संपातः समुदायस्तस्मिन्प्रवृत्ते प्रयोगाभिमुखे सतीति यावत् ॥ किंकृत्वा भगवंतं प्रत्युक्तवानित्यत्राह ॥ धनुरिति महीपतिशब्देन राजा प्रज्ञाचक्षुः संजयेन संबोध्यते ॥२०॥ तदेव गांडीवधन्वनो वाक्यमनुक्रामति ॥ सेनयोरिति ॥ उभयोरपि सेनयोः संनिहितयोर्मध्ये मदीयं रथं स्थापयेत्यर्जुनेन सारथ्ये सर्वेश्वरो नियुज्यते किं-

अथव्यवस्थितान्दृष्ट्वा धार्तराष्ट्रान्कपिध्वजः ॥ प्रवृत्ते शस्त्रसंपाते धनुरुद्यम्य पांडवः ॥२०॥ हृषीकेशं तदा वाक्यमिद-
माह महीपते ॥ सेनयोरुभयोर्मध्ये रथं स्थापय मेच्युत ॥२१॥ यावदेतान्निरीक्षेहं योद्धुकामानवस्थितान् ॥
॥ कैर्मया सह योद्धव्यमस्मिन्रणसमुद्यमे ॥२२॥

मिह भक्तानामशक्यं यद्भगवानपि तन्नियोगमनुतिष्ठति ॥ युक्तं हि भगवतो भक्तपारवश्यं अच्युतेति संबोधनेन तथा भगवतः स्वरूपं न कदाचिदपि प्रच्युतिं प्राप्नोतीत्युच्यते ॥२१॥ मध्ये रथं स्थापयेत्युक्तं तदेव रथस्थापनस्थानं निर्द्धारयति ॥ यावदिति ॥ एतान्प्रतिपक्षत्वेन प्रतिष्ठितान्भीष्मद्रोणादीनस्माभिः सार्द्धं योद्धुमपेक्षावतो यावदहं तान्निरीक्षितुमहं क्षमः स्यां तावत्प्रदेशे रथस्य स्थापनं कर्तव्यमित्यर्थः ॥ किंच प्रवृत्ते युद्धप्रारंभे बहवो राजानो मुख्या युद्धे मे नानुपलभ्यंते तेनैषां मध्ये कैः सह मया योद्ध-
॥ ॥व्यं न हि कश्चि ॥ दपि मम गतिं प्रतिहर्तेत्याह ॥ कैरिति ॥ ॥

लिर

प्रतियोगिनामभावे कथं तव युद्धौत्सुक्यं फलवद्भवेदिति तत्राह ॥ योत्स्यमानानिति ये के चिदिह ते राजानो नानादेशेभ्योत्र कुरुक्षेत्रे समवेतास्ता-
नहं योत्स्यमानान्परिगृहीतप्रहरणोपायान्नितरां संग्रामसमुत्सुकानुपलभे नेन प्रतियोगिनां बाहुल्यमित्यर्थः ॥ तेषामस्माभिः
सह एवं वैराभावेपि कथं प्रतियोगित्वं प्रकल्प्यमेतेनत्राह ॥ धार्त्तराष्ट्रस्येति ॥ धृतराष्ट्रपुत्रस्य दुर्योधनस्य दुर्बुद्धेः स्वरक्षणोपायम-
प्रतिपद्यमानस्य युद्धाय संरंभं कुर्वतो युद्धेस्मौस्थित्वा प्रियं कर्तुमिच्छवो राजानः समागतानाह श्यं नेतेन तेषामोपाधिकमस्म-
त्प्रतियोगित्वमुपपन्नमित्यर्थः ॥ २३ ॥ एवमर्जुनेन प्रेरितो भगवान् हिंसारूपं धर्ममाश्रित्य प्रायशो युद्धात्तं व्यावर्तयिष्यतीति धृ-

॥ योत्स्यमानानवेक्षेहं य एतेत्र समागताः ॥ धार्त्तराष्ट्रस्य दुर्बुद्धे युद्धे प्रियचिकीर्षवः ॥ २३ ॥ संजय उवाच ॥
एवमुक्तो हृषीकेशो गुडाकेशेन भारत ॥ सेनयोरुभयोर्मध्ये स्थापयित्वा रथोत्तमं ॥ २४ ॥ भीष्मद्रो-
णप्रमुखतः सर्वेषां च महीक्षितां उवाच पार्थ पश्यैतान्समवेतान्कुरूनिति ॥ २५ ॥ छ ॥ छ ॥

तराष्ट्रस्य मनीषां दूषयिषुः संजयो राजानं प्रत्युक्तवानित्याह ॥ संजय इति ॥ भगवतो हि भक्तभारापहारोद्यतस्यार्जुनस्याभिप्रायप्रतिपत्ति-
द्वारेण स्वाभिसंधिं प्रतिलंभमानस्य परोक्तिमनुसरतस्स्वाभिप्रायानुकूलमनुष्ठानमादर्शयति ॥ एवमिति ॥ २४ ॥ भीष्मद्रोणादीनामन्ये-
षां च राज्ञामंतिके रथं स्थापयित्वा भगवान्किं कृतवानिति तदाह ॥ उवाचेति ॥ एतानभ्याशे वर्तमानान्कुरुवंशप्रसूतान्भवद्भिः सा-
र्द्धं युद्धार्थं संगतान्पश्य दृष्ट्वा च यैः सहात्र युयुत्सा तवोपावर्तिनी तैः साकं युद्धं कुरु नोरवतत्वेनेषां शस्त्रास्त्रशिक्षावतां महीक्षिता-
मुपेक्षोपपद्यते सारथ्येतु न मनः खेदनीयमित्यर्थः ॥ २५ ॥

म

गी०॥ ॥आ०भ०॥

॥१॥

एवंस्थिते महानधर्मो हिंसेति विपरीतबुध्या युद्धादुपरिरंसामपार्थोपार्थस्य संभवन्तेति कथयति ॥ तत्रेत्यादिना ॥ सत्पुम्या भगवद-
भ्यनुज्ञाते समरसमारंभपसंरंभे सतीत्येदं तदुच्यते सेनयोरुभयोरपि स्थितान्पार्थोऽपश्यदिति संबंधः अथशब्दस्तथाशब्दपर्या-
यः ॥ श्वसुराभार्याणांजनयितारः सुहृदो मित्राणि एतानेव मर्मभ्म्नपः ॥२६॥ सेनाद्वयेप्यवस्थितान्यथोक्तान्प्येतान्पितामहादि-
नालोक्यपरमकृपापरवशः सन्नर्जुनो भगवंतमुक्तवानित्याह ॥ तानिति ॥ विषीदन्यथोक्तानां पित्रादीनां हिंसासंदर्भनिबंधनं
विषादमुपतापं कुर्वन्नित्यर्थः ॥२७॥ तदेवेदं शास्त्रं वाक्यं वचनमुदाहरति ॥ दृष्ट्वेममिति ॥ स आत्मीयं बंधुवर्गं युद्धेच्छयायुद्धभूमा-

तत्रापश्यत्स्थितान्पार्थः पितॄनथ पितामहान् ॥ आचार्यान्मातुलान्भ्रातॄन्पुत्रान्पौत्रान्सखींस्तथा ॥२८॥ श्व-
शुरान्सुहृदश्चैव सेनयोरुभयोरपि ॥ तान्समीक्ष्य स कौंतेयः सर्वान्बंधूनवस्थितान् ॥२७॥ कृपया परया-
विष्टो विषीदन्निदमब्रवीत् ॥ दृष्ट्वेमं स्वजनं कृष्ण युयुत्सुं समुपस्थितं ॥२८॥ सीदंति मम गात्राणि मुखं च परिशुष्यति ॥
वेपथुश्च शरीरे मे रोमहर्षश्च जायते ॥२९॥ गांडीवं स्रंसते हस्तात्त्वक्चैव परिदह्यते ॥ न च शक्नोम्यवस्थातुं भ्रमतीव च मे मनः ॥३०॥

वुपस्थितमुपलभ्य शोककृप्रवृत्तिं दर्शयति ॥ सीदंतीति ॥ देवांशस्येवार्जुनस्यानात्मविदः स्वपरदेहेष्वात्मात्मीयाभिमानवतः क्षत्रियस्य युद्धा-
रंभेनन्मृत्युप्रसंगदर्शिनः शोको महानासीदित्यर्थः ॥ अंगेषु स्यामुखे शोषश्चेत्युभयं शोकलिंगमुक्तं ॥ संप्रति वेपथुप्रभृती-
नि भीतिलिंगान्युपन्यस्यति वेपथुश्चेति रोमहर्षो रोमांचो गात्रेषु पुलकितत्वं ॥२९॥ किंचाधैर्यमपि संवृत्तमित्याह ॥ गांडीवेति ॥ ॥राम॥
मोहोपि महाननुभवतीत्याह ॥ भ्रमतीवेति ॥३०॥ ॐम् नमो भगवते वासुदेवाय ॥॥५॥॥ ॥ ॥॥५॥॥ ॥॥५॥॥ ॥११॥

विपरीतनिमित्तप्रतीतेरपि मोहो भवतीत्याह॥ निमित्तानीति॥ तानि विपरीतानि निमित्तानि यानि वामनेत्रस्फुरणादीनि युद्धे स्वजनहिंसायां फलत्वानुपलंभादपि तस्मादुपरिरंसा जायत इत्याह॥ नचेति॥ ३१॥ भ्रातानां युयुत्सूनां हिंसया विजयो राज्यसुखानि च लब्धुं शक्यानीति कुतो युद्धादुपरतिरित्याशंक्याह न कांक्ष इति॥ किमिति राज्यादिकं सर्वं कांक्षितं न कांक्षसि किंतु नहि त्वं पुत्रादीनां स्वास्थ्यमाधातुं शक्यमित्याशंक्याह॥ किमिति॥ ३२॥ राज्यादीनामाक्षेपे हेतुमाह॥ येषामिति॥ ३३॥ तानेव विशिनष्टि॥ आचार्या इति॥ श्यालो भार्याणां भ्राता नरो धृष्टद्युम्नप्रभृतयः॥ ३४॥ वध्येष्वपि स्वराज्यपरिपं॥ ५॥ ५॥ ५॥ ५॥

निमित्तानि च पश्यामि विपरीतानि केशव॥ न च श्रेयोनुपश्यामि हत्वा स्वजनमाहवे॥ ३१॥ न कांक्षे विजयं कृष्ण न च राज्यं सुखानि च॥ किं नो राज्येन गोविंद किं भोगैर्जीवितेन वा॥ ३२॥ येषामर्थे कांक्षितं नो राज्यं भोगाः सुखानि च॥ त इमेवस्थिता युद्धे प्राणांस्त्यक्त्वा धनानि च॥ ३३॥ आचार्याः पितरः पुत्रास्तथैव च पितामहाः॥ मातुलाः श्वशुराः पौत्राः श्यालाः संबंधिनस्तथा॥ ३४॥ एतान्न हंतुमिच्छामि घ्नतोपि मधुसूदन॥ अपि त्रैलोक्यराज्यस्य हेतोः किं नु महीकृते॥ ३५॥ ॥ ५॥ ॥ ॥०॥ ०॥ ०॥ ०॥ ०॥ ०रामा रामा

विख्यातमतापि सुकृपाबुध्या स्वधर्माद्युद्धात्सर्वैर्मोहादिवशात्स्वयुक्तिं दर्शयति॥ एतानिति॥ जिघांसंतं जिघांसीयादिति न्यायादेतेषां हिंसा न दोषायेत्याशंक्याह॥ घ्नतोपीति॥ पृथिवीप्राप्त्यर्थं किंह नन मे नेषामिष्यते न च तत्प्राप्तिः समीहितेति कैमुतिकन्यायेन दर्शयति॥ अपीति॥ नहि महदपि त्रैलोक्यलक्षणं राज्यं लब्धुं स्वजनहिंसायै मनो मदीयं स्पृहयति पृथिवीप्राप्त्यर्थं पुनर्बंधुवधं न श्राद्ध्यामिति किं वक्तव्यमित्यर्थः॥ ३५॥

भा०१

आ० अ॥
॥१॥
म

दुर्योधनादीनां शत्रूणां निग्रहे प्रीतिप्राप्तिसंभावनाया युद्धं कर्तव्यमित्याशंक्याह ॥ निहत्येति ॥ यदि पुनरमी दुर्योधनादयो न निग्रहेरन्भवंतस्तर्हि
तैर्निग्रहीता दुःखिता स्युरित्याशंक्याह ॥ पापमेवेति ॥ यदीमे दुर्योधनादयो निर्दोषा नेवास्मान्कस्मात्क्रुद्धभूमौ हन्युस्तदैतानग्नि
दो गरदश्चेत्यादिलक्षणोपेतानाततायिनो निर्दोषस्वजनहिंसाप्रयुक्तं पापं परमेव पापिनः समाश्रयेदित्यर्थः ॥ अथवा य
द्यप्येते भवंत्याततायिनस्तथाप्येतानानतिशोच्यान्दुर्योधनादीन्हिंसित्वा तत्कृतं पापमस्मानेवाश्रयेदतो नास्माभिरेते हंतव्या
इत्यर्थः ॥ अथवा गुरुभ्रातृसुहृत्प्रभृतीनेतान्हत्वा वयमाततायिनः स्यामः ततश्चैतान्हत्वा तत्कृतं पापमाततायिनोऽस्माने
व समाश्रयेदिति युद्धादुपरमणमस्माकं श्रेयस्करमित्यर्थः ॥३६॥ फलाभावादनर्थसंभवाच्च परहिंसा न कर्तव्येत्युपसंहरति ॥

निहत्य धार्तराष्ट्रान्नः का प्रीतिः स्याज्जनार्दन ॥ पापमेवाश्रयेदस्मान्हत्वैतानाततायिनः ॥३६॥ तस्मान्नार्हा वयं हंतुं धार्तराष्ट्रा
न्स्वबांधवान् ॥ स्वजनं हि कथं हत्वा सुखिनः स्याम माधव ॥३७॥ यद्यप्येते न पश्यंति लोभोपहतचेतसः ॥ कुलक्षयकृतं
॥ ० ॥ ०।॥ दोषं मित्रद्रोहे च पातकं ॥३८॥ कथं न ज्ञेयमस्माभिः पापादस्मान्निवर्तितुं ॥ कुलक्षयकृतं दोषं प्रपश्यद्भिर्जनार्दन ॥३९

प

तस्मादिति किंच राज्यसुखमुद्दिश्य युद्धमुपक्रम्यते न च स्वजनपरिक्षयेन सुखमुपपद्यते नेनन कर्तव्यं युद्धमित्याह ॥ स्वजनं हीति ॥३७॥ क
थं न हि परेषां कुलक्षयेस्वजनहिंसायां च प्रवृत्तिस्तत्राह ॥ यद्यपीति ॥ लोभोपहतबुद्धित्वात्तेषां कुलक्षयादिप्रयुक्तदोषप्रतीत्यभावात्प्र
वृत्तिविस्रंभः संभवतीत्यर्थः ॥३८॥ परेषामिवास्माकमपि प्रवृत्तिविस्रंभः संभवेदिति चेन्नेत्याह ॥ कथमिति ॥ कुलक्षयमित्रद्रो
हे च दोषं प्रपश्यद्भिरस्माभिस्तद्दोषशब्दितं पापं कथं न ज्ञातव्यं तदज्ञाने तत्परिहारासंभवादतोऽस्मात्पापान्निवृत्त्यर्थं तज्ज्ञा
नमपेक्षितमिति पापपरिहारार्थिनामस्माकं न युक्ता युद्धे प्रवृत्तिरित्यर्थः ॥३९॥ ॥ ॥छ॥ ॥ छ॥ ॥ छ॥ ॥ छ॥

॥राम॥

कोसौकुलक्षयेदोषोयद्दर्शनाद्युष्माकंयुद्धादुपरतिरपेक्ष्यतेतत्राह॥ कुलेति॥ कुलस्यहिक्षयेकुलसंबंधिनश्चिरंतनाधर्मास्तद
ग्निहोत्रादिक्रियासाध्याःनाशमुपयांतिकर्त्तुरभावादित्यर्थः॥ धर्मेनाशेपिकिंस्यादितिचेत्तत्राह॥ धर्मेइति॥ कुलप्रयुक्तेधर्मे
कुलनाशादेवनष्टेकुलक्षयकरस्यकुलंपरिशिष्टमखिलमपितदीयोऽधर्मोभिभवतीति॥ अधर्मस्त्वपिष्टंतस्यकुलंभवती
त्यर्थः॥४०॥ कुलक्षयकृतोऽवशिष्टकुलस्याधर्मप्रबलत्वेकोदोषःस्यादितितत्राह॥ अधर्मेति॥ पापप्रचुरेकुलेप्रसूतानां
स्त्रीणांप्रदुष्टत्वेकिंदुष्यतितत्राह॥ स्त्रीष्विति॥४१॥ वर्णसंकरस्यदोषपर्यवसायितामादर्शयति॥ संकरइति॥ कुलक्षयकराणां

सं

कुलक्षयेप्रणश्यंतिकुलधर्माःसनातनाः॥ धर्मेनष्टेकुलंकृत्स्नमधर्मोभिभवत्युत॥४०॥ अधर्माभिभवात्कृष्णप्रदुष्यंतिकु
लस्त्रियः॥ स्त्रीषुदुष्टासुवार्ष्णेयजायतेवर्णसंकरः॥४१॥ संकरोनरकायैवकुलघ्नानांकुलस्यच॥ पतंतिपितरोह्येषांलुप्तपिं
डोदकक्रियाः॥४२॥ दोषैरेतैःकुलघ्नानांवर्णसंकरकारकैः॥ उत्साद्यंतेजातिधर्माःकुलधर्माश्चशाश्वताः॥४३॥ उत्सन्नकु
॥०॥०॥०॥०॥०॥०॥०॥ कुलधर्माणांमनुष्याणांजनार्दन॥ नरकेनियतंवासोभवतीत्यनुशुश्रुम॥४४॥ ॥ ५

दोषाणांतरंसमुच्चिनोति॥ पतंतीति॥ कुलक्षयकृतांपितरोनिरयगामिनोभवंतीत्यत्रहेतुमाह॥ लुप्तेति॥ पुत्रादीनांकर्तृणामभावाल्लुप्तापिंडस्यो
दकस्यचक्रियायेषांतेतथा॥ ततश्चप्रेतत्वपरावृत्तिकारणाभावान्नरकपतनमेवावश्यमापद्यतइत्यर्थः॥४२॥ कुलक्षयकृतामेतैरुदाहृतै
र्दोषैर्वर्णसंकरहेतुभिर्जातिप्रयुक्तावंशप्रयुक्ताश्चधर्माःसर्वेसमुत्साद्यंतेतेनकुलक्षयकारणाद्युद्धादुपरिरेवश्रेयसीत्याह॥ दोषैरिति॥४३॥ किंचजातिध
र्मेषुकुलधर्मेषुचोत्सन्नेषुततद्धर्मवर्जितानांमनुष्याणामनधिकृतानांनरकपतनंचस्यादनर्थकरमिदमेवहेयमित्याह॥ उत्सन्नेति॥ यथो
क्तानांमनुष्याणांनरकपातस्यावश्यकत्वेप्रमाणमाह॥ इत्यनुशुश्रुमेति॥४४॥ ॥ ॥ ॥५॥ ॥ ॥ ॥५ ॥ ॥ ॥५॥ ॥ ॥५ ॥

से

भा० ॥ राज्यप्राप्तिप्रयुक्तसुखोपभोगलुब्धतयास्वजनहिंसायांप्रवृत्तिरस्माकंगुणदोषविज्ञानभागिनामतिकष्टेतिपरिभ्रमहृदयःसन्नाह ॥ भा० अ० ॥
२ अहोबतेति ॥ ४५ ॥ यद्येवंयुद्धविमुखःसन्परपरिभवप्रतीकाररहितोवर्तेथास्तर्हिंत्वांशस्त्रपरिग्रहरहितंशत्रुंशस्त्रपाणयोधार्तराष्ट्रानि ॥ १ अ
गृह्णीयुरित्याशंक्याह ॥ यदीति ॥ प्राणत्राणादपिप्रकृष्टोधर्मःप्राणभृतामहिंसेतिभावः ॥ ४६ ॥ यथोक्तमर्जुनस्यवृत्तांतंसंजयो

अहोबतमहत्पापंकर्तुंव्यवसितावयं ॥ यद्राज्यसुखलोभेनहंतुंस्वजनमुद्यताः ॥ ४५ ॥ यदिमामप्रतीकारमशस्त्रंश
स्त्रपाणयः ॥ धार्तराष्ट्रारणेहन्युस्तन्मेक्षेमतरंभवेत् ॥ ४६ ॥ संजयउवाच ॥ एवमुक्त्वार्जुनःसंख्येरथोपस्थउपाविशत्
विसृज्यसशरंचापंशोकसंविग्नमानसः ॥ ४७ ॥ इतिश्रीमद्भगवद्गीतासूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रेश्रीकृष्णार्जुन
॥ छ ॥ संवादेअर्जुनविषादोनामप्रथमोध्यायः ॥ १ ॥ छ ॥

धृतराष्ट्रंराजानंप्रतिप्रवेदितवानन्तमेवप्रवेदनप्रकारंप्रवेदयति ॥ एवमिति प्रदर्शितेनप्रकारेणभगवंतंप्रतिविज्ञानंकृत्वाशोकमोहाभ्यां
परिभूतमानसःसन्नर्जुनःसंख्येयुद्धमध्येशरेणसहितंगाडिवंत्यक्त्वानयोत्स्याहमितिब्रुवन्मध्येरथस्यसंन्यासमेवश्रेयस्करंमत्वो ॥ राम ॥
पविष्टवानित्यर्थः ॥ ४७ ॥ इतिश्रीमद्भगवद्गीताभाष्यटिकायांप्रथमोध्यायः ॥ १ ॥ संदर्भःसमाप्तः ॥ ॥ ॥ ॥ ॥ ॥ ॥ ० ॥ १३ ॥

श्रीमद्विश्वेश्वरःप्रीयतां॥ ॐ॥ अहिंसापरमोधर्मोभिक्षाशनंचेत्येवंलक्षणापाबुध्यायुद्धवैमुख्यमर्जुनस्यश्रुत्वास्यपुत्राणांरा
ज्यैश्वर्यमप्रचत्तिनमवधार्यस्वस्थहृदयंधृतराष्ट्रंदृष्ट्वातस्यदुराशामपनेष्यामीतिमनीषयासंजयस्तंप्रत्युक्तवानित्या
ह॥ संजयउवाचेति॥ परमेश्वरेणास्मार्यमाणोपिकृत्याकृत्येसहसानार्जुनःसस्मारविपर्ययप्रयुक्तस्यशोकस्यदृढतरमो
हहेतुत्वात्तथापितंभगवान्नोपेक्षितवानित्याह॥ तंतथेति॥ तंप्रकृतंपार्थंतथास्वजनमरणप्रसंगदर्शनेनकृपयाक
रुणयाऽऽविष्टमधिष्ठितमश्रुभिःपूर्णेसमाकुलेचेक्षणेयस्यतमश्रुव्याप्ततरलाक्षंविषीदंतंशोचंतमिदंवक्ष्यमा

वि

॥संजयउवाच॥ तंतथाकृपयाविष्टमश्रुपूर्णाकुलेक्षणं॥ विषीदंतमिदंवाक्यमुवाच
॥मधुसूदनः॥१ श्रीभगवानुवाच॥ कुतस्त्वाकश्मलमिदंविषमेसमुपस्थितं॥ अनार्य
॥जुष्टमस्वर्ग्यमकीर्तिकरमर्जुन॥ २॥ ५॥ ५॥ ५॥ ५॥ ५॥

णंवाक्यंसोपपत्तिकंवचनं॥ मधुनामानमसुरंसूदितवान्भगवानुक्तवान्तत्तुपैर्यथोक्तमर्जुनमुपेक्षितवानित्यर्थः॥१॥ किंत
द्वाक्यमित्यपेक्षायामाह॥ भगवानिति॥ कुतोहेतोस्त्वात्वांसर्वक्षत्रियप्रवरंकश्मलंमलिनंशिष्टगर्हितंयुद्धासेराभुरव
त्वंविषमेसभयस्थानेयदुपस्थितंप्राप्तंअनार्यैःशास्त्रार्थमविद्वद्भिःसेवितं॥ अस्वर्ग्यंस्वर्गानर्हंप्रत्यवायकरणं
रामिहचाकीर्तिकरमपयशस्करमर्जुन॥ नाम्नाप्रख्यातस्यतवनेत्युक्तमित्यर्थः॥२॥ ।॥५॥।।॥०॥

र्जु

२

भा०॥ पुनरपि भगवानर्जुनं प्रत्याह। क्लैब्यमिति। क्लैब्यं क्लीऽवभावमधैर्यं मास्मगमः मा गाः पार्थ पृथातनय न हि त्वयि म- ॥आ० अ०॥
४॥ हेश्वरेणापि कृता।हवे प्रख्यातपौरुषे महामहिम्न्येतदुपपद्यते। क्षुद्रं क्षुद्रत्वकारणं हृदयदौर्बल्यं मनसो दुर्बलत्वमधैर्यं स- ॥१॥
क्त्वोत्तिष्ठ युद्धायोपक्रमं कुरु परंतप परं शत्रुं तापयतीति तथा संबोध्यते॥३॥ एवं भगवता प्रतिबोध्यमानोपि शोकाक्रां-
तचेतस्त्वादप्रतिबुध्यमानः सन्नर्जुनः स्वाभिप्रायमेव प्रकटं भगवंतं प्रत्युक्तवान्। कथमित्यादिना। भीष्मं पितामहं द्रोणं
चाचार्यं संख्ये रणे हे मधुसूदन इषुभिः सायकैः तौ कथं प्रतियोत्स्यामि योत्स्ये तौ हि पूजार्हौ कुसुमादिभिरर्चनयोग्यौ

क्लैब्यं मास्मगमः पार्थ नैतत्त्वय्युपपद्यते। क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परंतप॥३॥ अर्जुन उवाच कथं भीष्ममहं संख्ये
द्रोणं च मधुसूदन। इषुभिः प्रतियोत्स्यामि पूजार्हावरिसूदन॥४॥ गुरूनहत्वा हि महानुभावान्छ्रेयो भोक्तुं भैक्ष्यमपीह लोके॥
हत्वार्थकामांस्तु गुरूनिहैव भुंजीय भोगान्रुधिरप्रदिग्धान्॥५॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

व सर्वानेवारीन्त्वं सूदितवानिति भगवानेवं संबोध्यते॥४॥ ॥राज्ञो धर्मेपि युद्धे गुर्वादिवधे रतिमात्रफलत्वं गृहीत्वा पापमारोप्य
कृते। गुरूनिति। गुरून्भीष्मद्रोणादीन्भ्राताहीं श्वान प्रात्सान्।ऽहिंसित्वा महानुभावान्महामाहात्म्यान्श्रुताध्ययनसंपन्नान्छ्रे-
यः प्रशस्यतरं युक्तं भोक्तुमभ्यवहर्तुं भैक्ष्यं भिक्षान्नं समुहं भिक्षाशनं नृपादीनां निषिद्धमपीह लोके व्यवहारभुमौ। न हि गु-
र्वादिहिंसया राज्यभोगोऽपेक्ष्यते। किंच हत्वा गुर्वादीनर्थकामानेव भुंजीय न मोक्षमनुभवेयं। इहैव च भोगः न स्वर्गे। अर्थका-
मानेव विशिनष्टि भोगानिति। भुज्यंत इति भोगास्तान् रुधिरप्रदिग्धान् लोहितलिप्तानिवात्यंतगर्हितानतो भोगान्गुरुवधात् हिंसा-
ध्यात्परित्यज्य भिक्षाशनमेव युक्तमित्यर्थः॥५॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥राम॥

॥१४॥

क्षत्रियाणांस्वधर्मत्वाद्युद्धमेवश्रेयस्करमित्याशंक्याह। नचैतदिति। एतदपिनजानीमोभैक्ष्ययुद्धयोःकतरन्नोस्माकं
गरीयःश्रेष्ठंकिंभैक्षंहिंसाशून्यत्वादुतयुद्धंस्वधर्मत्वादितिसंदिग्धाचनपस्थितिःकिंसाम्यमेवोभयेषां। यद्वावयंजये
मअतिशयीमहि। यदिवानोस्मान्धार्तराष्ट्रादुर्योधनादयोजयेयुः। जातोपिजयोनफलवान्यतोयान्हत्वानजिजीवि
षामोजीवितुंनेच्छामस्तएवावस्थिताःप्रमुखेसंमुखेधार्तराष्ट्राधृतराष्ट्रस्यापत्यानितस्मान्नैक्षाद्युद्धस्यश्रेष्ठत्वंनसिद्ध
मित्यर्थः ६ समधिगतसंसारदोषजातस्यातितरांनिर्विण्णस्यमुमुक्षोरुपसन्नस्यात्मोपदेशम्नहलोऽधिकारंसूचयति।
कार्पण्येति। योऽल्पःस्वल्पामपिस्वक्षतिंनक्षमतेसकृपणस्तद्विधत्वादाखिलोऽनात्मविदप्राप्तपरमपुरुषार्थतयाकृपणोभ॥

नचैतद्विद्मःकतरन्नोगरीयोयद्वाजयेमयदिवानोजयेयुः॥ यानेवहत्वानजिजीविषामस्तेवस्थिताःप्रमुखेधार्तराष्ट्राः ६
कार्पण्यदोषोपहतस्वभावःपृच्छामित्वाधर्मसंमूढचेताः यच्छ्रेयःस्यान्निश्चितंब्रूहितन्मेशिष्यस्तेहंशाधिमांत्वांप्रपन्नं ॥७

वति। योवाएतदक्षरंगार्ग्यविदित्वास्माल्लोकात्प्रैतिसकृपणइतिश्रुतेस्तस्याभावःकार्पण्यंदैन्यंतेनदोषेणोपहतोदूषितःस्वभावश्चित्तनम
स्येतिविग्रहः। सोहंपृच्छामिअनुयुंज्येत्वात्वांधर्मसंमूढचेताःधर्मोधारयतीतिपरंब्रह्मतस्मिन्संमूढमविवेकितांगतंचेतोयस्यममेतितथा
हमुक्तःकिंपृच्छसि। यन्निश्चितमैकांतिकमनपेक्षिकंश्रेयःस्यान्नरोगनिवृत्तिवदनैकांतिकमनात्यंतिकंस्वर्गवदापेक्षिकंवा। तन्निश्रेय
संमेमह्यंब्रूहि। नापुत्रायाशिष्यायेतिनिषेधान्नप्रवक्तव्यमितिमामंस्थाःयतःशिष्यस्तेहंभवामिशाध्यनुशाधिमांनिःश्रेयसंत्वा
॥ महंप्रपन्नोस्मि ॥७॥

ी०भा०
५

कुतोनिःश्रेयसमेवेछसितत्राह।नहीति।यस्मान्नप्रपश्यामिकिंनप्रपश्यसिममापनुद्यादपनयेच्छोकमुच्छोषणंप्रतपनमिंद्रियाणांतन्न
पश्यामि।ननुशत्रून्निहत्सराज्येप्राप्तेशोकनिवृत्तिर्भविष्यतीत्याह।अवाप्येति।अविद्यमानःसपत्नःशत्रुर्यस्मिंस्तदृद्धंराज्यंरा
ज्ञःकर्मप्रजारक्षणंप्रशासनंदिनदिद्धमुत्स्यांभूमौवावाप्यापिशोकापनयनकारणंनपश्यामीत्यर्थः।नहिदेवेंद्रत्वादिप्राप्त्याशोकाप
नयनंभविष्यतीत्याह।सुराणामपीति।तेषामाधिपत्यमधिपतित्वंस्वामित्वमिंद्रत्वंब्रह्मत्वंवावाप्यापिममशोकोनापगच्छेदि
त्यर्थः॥८॥एवमर्जुनेनस्वाभिप्रायंभगवंतंप्रतिप्रकाशितंसंजयोराजानमावेदितवानित्याह।संजयइति।एवंप्रागुक्तप्रकारेणभग

नहिप्रपश्यामिममापनुद्याद्यच्छोकमुच्छोषणमिंद्रियाणां॥अवाप्यभूमावसपत्नमृद्धंराज्यंसुराणामपिचाधिपत्यं॥८॥
संजयउवाच।एवमुक्त्वाहृषीकेशंगुडाकेशःपरंतपः।नयोत्स्यइतिगोविंदमुक्त्वातूष्णींबभूवह॥९॥तमुवाचहृषीकेशः
प्रहसन्निवभारत॥सेनयोरुभयोर्मध्येविषीदंतमिदंवचः॥१०॥श्रीभगवानुवाच॥॥ ७॥ ॥॥ ॥॥

वंतंप्रत्युक्त्वापरंतपोऽर्जुनोनयोत्स्येनसंप्रहरिष्यइत्यसंतापस्यशोकप्रसंगादितिगोविंदमुक्त्वातूष्णीमब्रुवन्बभूवकिलेत्यर्थः॥९॥तमर्जुनं
सेनयोर्बहिर्योरुभयोर्मध्येविषीदंतंविषादंकुर्वन्तमतिदुःखितंशोकमोहाभ्यामभिभूतंस्वधर्मात्प्रच्युतप्रायंप्रातीत्यप्र[illegible]हसन्नि
वोपहासंकुर्वन्निवतदाश्वासार्थंभारतभरतान्वयेत्येवंसंबोध्यभगवान्निर्दिष्टोत्तरंनिःश्रेयसाधिगमसाधनंवचनमु
चिवानित्याह॥तमुवाचेति॥१०॥तदेववचनमुदाहरति॥ भगवानिति॥॥॥ ५॥ ॥॥ ॥॥ ५॥ ॥ ॥॥ ५॥॥॥ ५॥

ह्य

आ०अ०
२

ये

रामा
१५

अतीतसंदर्भस्यैष्यमक्षरोष्यमर्थे विवक्षितात्तस्मिन्नेव वाक्यविभागमवगमयति। दृष्ट्वा त्विति। धर्मक्षेत्रे कुरुक्षेत्र इत्यादिराद्यश्लोकस्तावदेकं वाक्यं शास्त्रस्य कथासंबंधपरत्वेन पर्यवसानात् दृष्ट्वेत्यारभ्य यावत्तूष्णीं बभूव हेति तावच्चैकं वाक्यं। इत आरभ्येदं वच इत्येतदंतो ग्रंथो भवत्यपरं वाक्यमिति विभागः। नन्वाद्यश्लोकस्य युक्तमेकवाक्यत्वं प्रकृतशास्त्रस्य महाभारतेऽवतारावद्योतित्वादंते तिमध्यापि संभवत्येकवाक्यत्वमर्जुनाश्वासार्थतया प्रवृत्तत्वान्मध्यमस्य तु कथमेकवाक्यत्वमित्याशंक्यार्थैकत्वादित्याह। प्राणिनामिति। शोको मानससंतापो मोहो विवेकाभावः। आदिशब्दस्तदवांतरभेदार्थः। स एव संसारस्य दुःखात्मनो बीजभूतो दोषस्तस्योद्भवे कारणमहंकारो ममकारस्तद्धेतुरविद्या तत्प्रदर्शनार्थत्वेनेति योजना। संग्रहितमर्थं विवृणोति। तथा हीति। राज्यं राज्ञः कर्मपरिपालना

दृष्ट्वा तु पांडवानीकमित्यारभ्य यावन्नयोत्स्य इति गोविंदमुक्त्वा तूष्णीं बभूव हेत्येतदंतः प्राणिनां शोकमोहादिसंसारदुःख।बीजभूतदोषोद्भवकारणहेतुप्रदर्शनार्थत्वेन व्याख्येयो ग्रंथः तथा ह्यर्जुनेन राज्यगुरुपुत्रमित्रसुहृत्स्वजनसंबंधिबांधवेष्वहमेषां ममैते इत्येवंप्रत्ययनिमित्तस्नेहविच्छेदादिनिमित्तावात्मनः शोकमोहौ प्रदर्शितौ। कथं भीष्ममहं ॥ संख्य इत्यादिना ॥

दिपूजार्हा गुरवो भीष्मद्रोणादयः पुत्राः स्वयमुत्पादिताः सौभद्राद्यः ।। संबंधांतरमंतरेण स्नेहगोचराः गुरुपुत्रप्रभृतयो मित्रशब्देनोच्यंते। उपकारनिरपेक्षतया स्वयमुपकारिणः सुहृदयानुरागभाजो भगवत्प्रमुखाः सुहृदः स्वजनाः ज्ञातयो दुर्योधनादयः संबंधिनः श्वशुरद्रुपदप्रभृतयोऽनुपदधृष्टद्युम्नप्रभृतयः परंपरया पितृपितामहादिष्वनुरागभाजो राजानो बांधवास्तेषु यथोक्तप्रत्ययं निमित्तीकृत्य यः स्नेहो यश्च तैः सह विश्लेषोपचृय तेषामपघातेन पातकं पारलोकगर्हासंवर्तन्त्विति निमित्ते ययोरात्मनः शोकमोहयोस्तावेतौ संसारबीजभूतौ। कथमित्यादिना दर्शितौ। इत्यर्थः।। ।। ॰ ।। ॰।। ।। ॰।। ॰।। ॰ ।। ॰।।

कथंपुनरनयोः संसारवीजयोरर्जुने संभावनोपपद्यते न हि प्रथितमहामहिम्नो विवेकविज्ञानवतः स्वधर्मे प्रवृत्तस्य शोकमोहावन
र्थहेतु संभावितावित्याशंक्य विवेकतिरस्कारेण नयोर्विहित्ताकरणप्रतिषिद्धाचरणकारणत्वादनर्थाऽथायकयोरस्तित्व स्मि
न्संभावने त्याह शोकमोहाभ्यामिति निक्षिप्य जीवनं प्राणधारणमादिशब्दादशेषकर्मसंन्यासलक्षणं पारिव्राज्यमात्माभिध्यानमि
त्यादि गृह्यते। किंचार्जुने दृश्यमानौ शोकमोहौ संसारबीजं शोकमोहत्वादस्मदादिनिष्ठशोकमोहवदिति उपलब्धौ शोकमोहौ प्रसे
कं पक्षीकृत्यानुमानव्यमित्याह।। तथाचेति। मोहादीत्यादिशब्देनाभिध्याभिमानस्नेहगर्हादयो गृह्यंते स्वभावतश्चित्त

कर्तुं

शोकमोहाभ्यां ह्यभिभूतविवेकविज्ञानः स्वतएव क्षात्रधर्मे युद्धे प्रवृत्तोपि तस्माद्युद्धादुपरराम। परधर्मं च भिक्षाजीव
नादिकं तु प्रववृते तथा च सर्वप्राणिनां शोकमोहादिदोषाविष्टचेतसां स्वभावतएव स्वधर्मपरित्यागः प्रतिषिद्धसे०
वा च स्यात् स्वधर्मे प्रवृत्तानामपि तेषां वाङ्मनःकायादीनां प्रवृत्तिः फलाभिसंधिपूर्विकैव साहंकारा च भवति। तत्रैवं
सति धर्माधर्मोपचयादिष्टानिष्टजन्ममरणसुखदुःखसंप्राप्तिलक्षणः संसारोनुपरतो भवतीति ।। •।। •।। •

दोषसामर्थ्यादित्यर्थः अस्मदादीनामपि स्वधर्मे प्रवृत्तानां विहिताकरणाद्यभावान्न शोकादेः संसारबीजत्वं नेति दृष्टांतस्य साध्यविक
लतेति चेत्तत्राह। स्वधर्मेति। कायादीनामित्यादिशब्दादवशिष्टानींद्रियाण्युपादीयंते। फलाभिसंधिस्तद्विषयाभिलाषः कर्तृत्वभो
क्तृत्वाभिमानोऽहंकारः। प्रागुक्तप्रकारेण वागादिव्यापारे सति किं सिध्यतीति तत्राह। तत्रेति। शुभकर्मानुष्ठानेन धर्मोपचयादिष्टं दे
वताजन्म ततः सुखप्राप्तिः। अशुभकर्मानुष्ठानेन चाधर्मोपचयादनिष्टं तिर्यगादिजन्म ततो दुःखप्राप्तिः। व्यामिश्रकर्मानु
ष्ठानाच्छुभाशुभाभ्यां धर्माधर्माभ्यां मनुष्यजन्म ततः सुखदुःखे संभवतः एवमात्मकः संसारः संततो वर्तत इत्यर्थः ।। ।। ।। ।।•।।

अर्जुनस्यान्येषांच शोकमोहयोः संसारवीजत्वमुपपादितमुपसंहरति।अत इति।तदेवं प्रथमाध्यायस्य द्वितीयाध्यायैक
ति देशसहितस्यात्माज्ञानोत्थं निवर्तनीयं शोकमोहाख्यसंसारवीजप्रदर्शनपरत्वं दर्शयित्वा वक्ष्यमाणसंदर्भस्य सहेतुकसंसा
सं रनिवर्तकसम्यग्ज्ञानोपन्यासस्य तात्पर्यं दर्शयति।तयोश्चेति।तद्यथोक्तं ज्ञानमुपदिदिक्षुरुपदेष्टुमिच्छन्भगवानाहेतिसंबंधः
सर्वलोकानुग्रहार्थं यथोक्तं ज्ञानं भगवानुपदिदिक्षतीतियुक्तमर्जुनं प्रत्येवोपदेशादित्याशंक्याह।अर्जुनमिति।नहि तस्या
मवस्थायामर्जुनस्य भगवता यथोक्तं ज्ञानमुपदेष्टुमिष्टं किंतु स्वधर्मानुष्ठानाद्बुद्धिशुद्ध्युत्तरकालमित्यभिप्रेत्योक्तं।नि अँसे:

॥अतः संसारवीजभूतौ शोकमोहौ तयोश्च सर्वकर्मसंन्यासपुर्वकात्ससंन्यासादात्मज्ञानान्नान्यतो निवृत्ति॥
॥रितितदुपदिदिक्षुः सर्वलोकानुग्रहार्थमर्जुनं।निमित्तीकृत्याह भगवान्वासुदेवोऽशोच्यानित्यादितत्र केचि
॥दाहुः सर्वकर्मसंन्यासपुर्वकादात्मज्ञाननिष्ठामात्रादेव केवलात्कैवल्यं न प्राप्यत एव किंतर्ह्यग्निहोत्रा॥
॥दिश्रौतस्मार्तकर्मसहिताज्ज्ञानात्कैवल्यप्राप्तिः॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

मितीकृत्येति।सर्वकर्मसंन्यासपूर्वकादात्मज्ञानादेव केवलात्कैवल्यप्राप्तिरिति गीताशास्त्रार्थः स्वाभिप्रेतो व्याख्यातः॥ संप्रतिवृत्ति
कृताभिमतं निरसितुमनुवदति।तत्रेति।निर्धारितः शास्त्रार्थः सतिसप्तम्यापरामृश्यते।तेषामुक्तिमेव विवृण्वन्नादौ सैद्धांतिक
मभ्युपगमं प्रत्यादिशति।सर्वकर्मेति।वैदिकेन कर्मणा समुच्चयं व्युदसितुं मात्रपदं।स्मार्तेन कर्मणा समं समुच्चयं निरसि
तुमवधारणं।अभ्याससंबंधं धुतिने।केवलादिति।नैवेत्येवकारः संबध्यते।केन तर्हि प्रकारेण ज्ञानं कैवल्यप्राप्ति
कारणमित्याशंक्याह।किं तर्हीति॥ ७२॥ ॥ ॥ ॥ ॥ ७२॥

भा०
॥

आ०अ०
२

किंतत्रज्ञापकमित्याशंक्येदमेवशास्त्रमित्याह।इतिसर्वास्विति।यथाप्रयाजानुयाजाद्युपकृतमेवदर्शपूर्णमासादिस्वर्गसाधनंतथा श्रौतस्मार्तकर्मोपकृतमेवब्रह्मज्ञानंकैवल्यंसाधयति।विमतंसेतिकर्तव्यताकमेवस्वफलसाधकंकरणत्वाद्दर्शपूर्णमासादिवदेवंज्ञानकर्म समुच्चयपरंशास्त्रमित्यर्थः।इतिपदमाहुरित्यनेनपूर्वेणसंबध्यते।पौर्वापर्यपर्यालोचनायांशास्त्रस्यसमुच्चयपरत्वंनिर्धारितमित्या शंक्याह।ज्ञापकंचेति।नकेवलंज्ञानंमुक्तिहेतुरपितुसमुच्चितमित्यस्यार्थस्यस्वधर्माननुष्ठानेपापप्राप्तिवचनसामर्थ्यलक्षणंलिंगंग मकमित्यर्थः।शास्त्रस्यसमुच्चयपरत्वेलिंगवद्वाक्यमपिप्रमाणमित्याह॥कर्मण्येवेति।तत्रैववाक्यांतरमुदाहरति।कुरुकर्मैवेति॥०

रतिसर्वासुगीतासुनिश्चितोऽर्थइति।ज्ञापकंचाहुरस्यार्थस्य।अथचेत्त्वमिमंधर्म्यंसंग्रामंनकरिष्यसि।ततःस्वधर्मंकीर्तिं॥ चहित्वापापमवाप्स्यसि।कर्मण्येवाधिकारस्ते।कुरुकर्मैवतस्मात्त्वमित्यादि।हिंसादियुक्तत्वाद्वैदिकंकर्मनधर्मायेति। यमप्याशंकानकार्या।कथं।क्षात्रंकर्मयुद्धलक्षणंगुरुभ्रातृपुत्रादिहिंसालक्षणमत्यंतंक्रूरमपिस्वधर्मइतिकृत्वानाधर्माय।

ननुनहिंस्यात्सर्वाभूतानीत्यादिनाप्रतिषिद्धत्वेनहिंसादेरनर्थहेतुत्वावगमात्तद्रूपेणवैदिकंकर्माधर्मायेतिनानुष्ठानंशक्यतेतथाचतस्य मोक्षज्ञानेनसमुच्चयोनसिध्यतीतिसांख्यमतमाशंक्यपरिहरति।हिंसादीति॥आदिशब्दादुच्छिष्टभक्षणंगृह्यते।यथोक्ताशंकानक र्तव्येत्यत्राकांक्षापूर्वकंहेतुमाह।कथमित्यादिना।स्वशब्देनक्षत्रियोविवक्ष्यते॥ २८॥ ॥ ॥ ॥ ॥

रामा
॥१७॥

युद्धाकरणे क्षत्रियस्य प्रत्यवायश्रवणात्तस्य तं प्रति नित्यत्वेनावश्यकर्तव्यत्वप्रतीतेर्गुर्वादिहिंसायुक्तमतिक्रूरमपि कर्म नाधर्मायेति
हेत्वंतरमाह। तदकरणे चेति। आचार्यादिहिंसायुक्तमतिक्रूरमपि युद्धं नाधर्मायेति ब्रुवता भगवता श्रौतानां हिंसायुक्तानामपि कर्म
णां दूरतो नाधर्मत्वमिति स्पष्टमुपदिष्टं भवति सामान्यशास्त्रस्य व्यर्थहिंसानिषेधार्थत्वात्क्रतुविषये चोदितहिंसायास्तदविषयत्वा
त्क्रतौ वैदिककर्मानुष्ठानानुपपत्तिरित्यर्थः। ज्ञानकर्मसमुच्चयात्कैवल्यसिद्धिरित्युपसंहर्तुमितिशब्दः। एतावद्ब्रह्मज्ञानं सेतिकर्तव्य
ताकं स्वफलसाधकं करणत्वादिति न दूषयति। तदसदिति। नहि मुक्तिकारि ज्ञानमज्ञाननिवृत्तौ स्वफले सहकारि किंचिदपेक्षते

तदकरणे च ततः स्वधर्मं कीर्तिं च हित्वा पापमवाप्स्यसीति ब्रुवता यावज्जीवादिश्रुतिचोदितानां पश्वादिहिंसालक्षणानां
च कर्मणां प्रागेव नाधर्मत्वमिति सुनिश्चितमुक्तं भवतीति। तदसत्॥ ज्ञानकर्मनिष्ठयोर्विभागवचनात्तद्बुद्धिद्वयाश्रययो
रशोच्यानित्यादिना ग्रंथेन भगवता यावत्स्वधर्ममपि चावेक्ष्येत्येतदंतेन ग्रंथेन यत्परमार्थात्मतत्त्वनिरूपणं कृतं तत्सांख्यं

तथा च व्यभिचारादसाधकं करणत्वमित्यर्थः। यत्तु गीताशास्त्रे समुच्चयस्यैव प्रतिपाद्यतेति प्रतिज्ञातं तदपि विभागवचनविरुद्धमित्याह। ज्ञानेति।
सांख्यबुद्धिर्योगबुद्धिश्चेति बुद्धिद्वयं तत्र सांख्यबुद्ध्याश्रयां ज्ञाननिष्ठां व्याख्यातुं सांख्यशब्दार्थमाह। अशोच्यानित्यादिनेति। अशोच्या
नित्यादि स्वधर्ममपि चावेक्ष्येत्येतदंतं वाक्यं यावद्विष्यति तावता ग्रंथेन यत्परमार्थभूतमात्मतत्त्वं भगवता निरूपितं तस्य या
सम्यग्व्याख्यायते प्रकाश्यते सा वैदिकी सम्यग्बुद्धिः संख्या तया प्रकाश्यत्वेन संबंधि प्रकृतं तत्त्वं सांख्यमित्यर्थः॥ ३९॥०

ां०भा०
८॥

सांख्यशब्दार्थमुक्त्वातत्प्रकाशिकांबुद्धिंतद्गतश्चसांख्यान्व्याकरोति।तद्विषयेति।तद्विषयाबुद्धिःसांख्येबुद्धिरितिसंबंधः।तामेवप्र
करयति।आत्मानइति।नजायतेम्रियतेवेत्यादिप्रकरणार्थनिरूपणद्वारेणात्मनःषड्भावविक्रियाऽसंभवात्कूटस्थोसाविति
याबुद्धिरुत्पद्यतेसासांख्येबुद्धिस्तत्पराःसंन्यासिनःसांख्याइत्यर्थः।संप्रतियोगबुद्ध्याश्रयांकर्मनिष्ठांव्याख्यातुकामो
योगशब्दार्थमाह।एतस्यामिति।यथोक्तबुद्ध्युत्पत्तौविरोधादेवानुष्ठानायोगात्तस्यास्तन्निवर्तकत्वात्पूर्वमेवतदुत्पत्तेरात्मन

आ०अ०
२

तद्विषयाबुद्धिःआत्मनोजन्मादिषड्विक्रियाभावात्अकर्तात्मेतिप्रकरणार्थनिरूपणात्याजायतेसासांख्येबुद्धिःसाये
षांज्ञानिनामुचिताभवतितेसांख्याः।एतस्याःबुद्धेर्जन्मनःप्रागात्मनोदेहादिव्यतिरिक्तस्यकर्तृत्वभोक्तृत्वाद्यपेक्षोधर्मा
धर्मविवेकपूर्वकोमोक्षसाधनानुष्ठाननिरूपणलक्षणोयोगस्तद्विषयाबुद्धिर्योगेबुद्धिःसायेषांकर्मिणामुचिताभ
वतितेयोगिनः।तथाचभगवताविभक्तेबुद्धीनिर्दिष्टे॥एषातेऽभिहितासांख्येबुद्धिर्योगेत्विमांशृणुइति॥

टि२

अदेहादिव्यतिरिक्तत्वाद्यपेक्षोधर्मोद्धर्मनिष्ठातेनेश्वराराधनरूपेणकर्मणापुरुषोमोक्षायाभियुज्यतेयोगः।संपद्यते
तेनमोक्षसिद्धयेपरंपरयासाधनीभूतःप्राक्तधर्मानुष्ठानात्मकोयोगइत्यर्थः।अथयोगेबुद्धिंविभजन्योगिनो
विभजते।तद्विषयेति।उक्तेबुद्धिद्वयेभगवतोनुमतिंदर्शयति।तथाचेति॥३९॥ ॥ ॥ ॥३९॥

रामा०
॥१८॥

सांख्यबुध्याश्रयाज्ञाननिष्ठेत्येतदपि भगवतः संमतमित्याह। तयोश्चेति ज्ञानमेव योगो ज्ञानयोगस्तेन हि ब्रह्मणा युज्यते तादात्म्यमापद्यते तेन संन्यासिनां निष्ठा निश्चयेन स्थितिस्तात्पर्येण परिसमाप्तिस्तां कर्मनिष्ठातो व्यतिरिक्तां निष्ठयोर्मध्ये निष्कृष्य भगवान्वक्ष्यतीति योजना। पुरा प्रोक्ता मयानघ ज्ञानयोगेन सांख्यानामित्येतद्भाष्यमुक्तार्थविषयमर्थतोनुवदति। पुरेति योगबुध्याश्रयाकर्मनिष्ठेत्यत्रापि भगवदनुमतिमावेदयति। तथा चेति। कर्मैव योगः कर्मयोगः तेन हि बुद्धिशुद्धिद्वारा मोक्षहेतुज्ञानाय पुमान्युज्यते

तयोश्च सांख्यबुद्ध्याश्रयां ज्ञानयोगेन निष्ठां सांख्यानां विभक्तां वक्ष्यति पुरा वेदात्मना मया प्रोक्तेति। तथा च योगबुध्याश्रयां कर्मयोगेन निष्ठां विभक्तां वक्ष्यति। कर्मयोगेन योगिनामित्येवं सांख्यबुद्धिं योगबुद्धिं चाश्रित्य द्वे निष्ठे विभक्ते भगवतैवोक्ते ज्ञानकर्मणोः कर्तृत्वाकर्तृत्वानेकत्वैकत्वबुध्याश्रययोरेकपुरुषाश्रयत्वासंभवं पश्यता यथैतद्विभागवचनं तथैव दर्शितं शातपथीये ब्राह्मणे॥

तेन निष्ठां कर्मिणां ज्ञाननिष्ठातो विलक्षणां कर्मयोगेनेत्यादिना वक्ष्यति भगवानिति योजना। निष्ठाद्वयं बुद्धिद्वयाश्रयं भगवता विभज्योक्तमुपसंहरति॥ एवमिति॥ कयापुनरनुपपत्त्या भगवता निष्ठाद्वयं विभज्योक्तमित्याशंक्याह॥ ज्ञानकर्मणोरिति॥ कर्महि कर्तृत्वाद्यनेकबुध्याश्रयं॥ ज्ञानं पुनरकर्तृत्वैकत्वबुध्याश्रयं तदुभयमित्थं विरुद्धे साधनसाध्यत्वान्नैकावस्थस्यैव पुरुषस्यासंभवस्ततो युक्तमेव
क भगवतो विभागवचनमित्यर्थः। भगवदुक्तविभागवचनस्य मूलत्वेन श्रुतिमुदाहरति। यथेति॥ ५॥ ६॥ ७॥ ८॥

॰भा॰॥
॥

तत्र ज्ञाननिष्ठाविषयं वाक्यं पठति। एतमेवेति। प्रकृतमात्मानं नित्यविज्ञप्तिस्वभावं वेदितुमिच्छंतस्त्रिविधेपि कर्मफले वैतृष्ण्यभाजः
सर्वाणि कर्माणि परित्यज्य ज्ञाननिष्ठा भवंतीति पंचमलकारस्वीकारेण संन्यासविधिं विवक्षितवान् तस्यैव विधेः शेषेणार्थवादेन
किं प्रजयेत्यादिना मोक्षफलं ज्ञानमुक्तमित्यर्थः। ननु फलाभावात्प्रजाक्षेपो नोपपद्यते पुत्रेणैव तल्लोकजयस्य वाक्यांत
रसिद्धत्वादित्याशंक्य विदुषां प्रजासाध्यमनुष्यलोकस्यात्मव्यतिरेकेणाभावादात्मनैवासाध्यत्वादाक्षेपो युक्तिमानिति
विवक्षित्वाह। येषामिति। इति ज्ञानंदर्शिनामिति शेषः। तस्मिन्नेव ब्राह्मणे कर्मनिष्ठाविषयं वाक्यं दर्शयति। तत्रैव चेति ॥०

आ॰उ॰
२

एतमेव प्रव्राजिनो लोकमिच्छंतो ब्राह्मणाः प्रव्रजंतीति सर्वकर्मसंन्यासं विधाय तच्छेषेण किं प्रजया करिष्यामो येषां नोयमात्मायं लोक
इति। तत्रैव च प्राग्दारपरिग्रहात्पुरुष आत्मा प्राकृतो धर्मजिज्ञासोत्तरकालं लोकत्रयसाधनं पुत्रं द्विप्रकारं च वित्तं सोयं मनु
ष्यलोकः पुत्रेणैव जय्यो नान्येन कर्मणा द्विप्रकारं च वित्तं मानुषं दैवं च तत्र मानुषं वित्तं कर्मरूपं पितृलोकप्राप्तिसाधनं विद्यां च॥
॥ दैवं वित्तं देवलोकप्राप्तिसाधनं सोकामयतेति ॥ ५॥

प्राकृतत्वमतत्त्वदर्शित्वेनाज्ञत्वं। स च ब्रह्मचारी गुरुसमीपे यथाविधि वेदमधीत्यार्थज्ञानार्थं धर्मजिज्ञासां कृतवान् तदुत्तरकालं लोकत्रय
प्राप्तिसाधनं पुत्रादित्रयं सो। कामयत जाया मे स्यादित्यादिना कामितवानिति श्रुतमित्यर्थः। वित्तं विभजते द्विप्रकारमिति। तदेव प्रकार
द्वैरूप्यमाह। मानुष्यमिति। मानुषं वित्तं व्याचष्टे। कर्मरूपमिति॥ तस्य फलपर्यवसायित्वमाह। पितृलोक इति। दैवं वित्तं विभज
ते विद्यां चेति। तस्यापि फलनिष्ठत्वमाह॥ दैवेति॥ ५॥ " " " " " " ॰

रामा॰॥
॥१२॥

कर्मनिष्ठाविषयत्वेनोदाहृतश्रुतेस्तात्पर्यमाह। अविद्येति। अज्ञस्यकामनाविशिष्टस्यैवकर्माणिसोकामयतेत्यादिनादर्शितानीत्यर्थः॥ ज्ञाननिष्ठाविषयत्वेनदर्शितश्रुतेरपितात्पर्यंदर्शयति। तेभ्यइति। कर्मसुविरक्तस्यैवसंन्यासपूर्विकाज्ञाननिष्ठाप्रागुदाहृतश्रुत्यादर्शितेत्यर्थः॥ अवस्थाभेदेनज्ञानकर्मणोर्भिन्नाधिकारित्वस्यश्रुतत्वात्तन्मूलेनभगवतोविभागवचनेनशास्त्रस्यसमुच्चयपरत्वप्रतिज्ञानमपिबाधितमितिसाधितं। किंचसमुच्चयोज्ञानस्यश्रौतेनस्मार्तेनवाकर्मणाविवक्षितोयदिप्रथमस्तत्राह॥ तदेतदिति। समुच्चयेभिप्रेतेप्रश्नानुपपत्तिंदोषांतरमाह। नचेति। तामेवानुपपत्तिंप्रकटयतिएकपुरुषेति। यदिसमुच्चयःशास्त्रार्थोभग

अविद्याकामवतएवकर्माणिश्रौतानीतिदर्शितानि। तेभ्योव्युत्थायप्रव्रजंतीतिव्युत्थानमात्मानमेवबुबुभुत्सयैतमात्मानमेव॥ लोकमिच्छतोकामस्यविहितं। तदेतद्विभागवचनमनुपपन्नंस्यात्। यदिश्रौतकर्मज्ञानयोःसमुच्चयोभिप्रेतःस्यात्। नचार्जुनस्यप्रश्नउपपन्नोभवतिज्यायसीचेत्कर्मणस्तेइत्यादिः। एकपुरुषानुष्ठेयत्वासंभवंबुद्धिकर्मणोर्भगवतापूर्वमनुक्तंकथमर्जुनोनश्रुतंबुद्धेश्चकर्मणोज्यायस्त्वंभगवत्यध्यारोपयेन्मृषैवज्यायसीचेत्कर्मणस्तेमताबुद्धिरिति॥ ०॥ १॥

वतोविवक्षितस्तत्राह। ज्ञानकर्मणोरेकेनपुरुषेणानुष्ठेयत्वमेवतेनोक्तमर्जुनेनचश्रुतंतत्कथंतदसंभवमनुक्तमश्रुतंचमिथ्यैवश्रोताभगवत्यारोपयेन्नचतदारोपादृतेकिमितिमांकर्मण्येवातिक्रूरेयुद्धलक्षणेनियोजयसीतिप्रश्नोवकल्पते॥ तथाचप्रश्नालोचनयाप्रष्टृप्रतिवक्त्रोःशास्त्रार्थतयासमुच्चयोभिप्रेतोनभवतीतिप्रतिभातीत्यर्थः। किंचसमुच्चयपक्षेकर्मापेक्षयाबुद्धेर्ज्यायस्त्वंभगवतापूर्वमनुक्तमर्जुनेनचाश्रुतंकथमसौतस्मिन्नारोपयितुमर्हतीतितश्यानुवादवचनंश्रोतुरनुचितमित्याह। बुद्धेश्चेति॥ ५॥

एतश्च समुच्चयः शास्त्रार्थो न भगवतस्तथा पंचमाद्यावर्जुनस्य प्रश्नानुपपत्तेरित्याह। किंचेति। ननु सर्वान्प्रत्युक्तेपि समुच्चयेनार्जुनं प्रत्युक्तोसाविति तदीयप्रश्नोपपत्तिरित्याशंक्याह यदीति। एतयोः कर्मतत्त्यागयोरितिपक्षवत्। ननु कर्मापेक्षया कर्मत्यागपूर्वकस्य ज्ञानस्य प्राधान्यात्तस्य श्रेयस्त्वात्तद्विषयप्रश्नोपपत्तिरिति चेन्नेत्याह। नहीति। तथैव समुच्चये पुरुषार्थसाधने भगवता दर्शिते सत्यन्यतरगोचरो न प्रश्नो भवतीति शेषः। समुच्चये भगवतोक्तेपि नदज्ञानादर्जुनस्य प्रश्नोपपत्तिरिति शंकते। अथेति। आज्ञानतिमिरं प्रश्नमंगीकृत्यापि प्रत्याचष्टे। तथापीति। भगवतो भ्रांत्यसंभावेन पूर्वापरानुसंधानसंभवादित्यर्थः। प्रश्नानुरूपत्वमेव प्रतिवचनस्य

॥ किंच यदि बुद्धिकर्मणोः सर्वेषां समुच्चय उक्तः स्यादर्जुनस्यापि स उक्त एवेति यच्छ्रेय एतयोरेकं तन्मे ब्रूहि सुनिश्चितमिति कथ॥
॥ मुभयोपदेशे सत्यन्यतरविषय एव प्रश्नः स्यात् न हि पित्तप्रशमनार्थिनो वैद्येन मधुरं शीतलं च भोक्तव्यमित्युपदिष्टे तयोरन्य॥
॥ तरत्पित्तप्रशमकारणं ब्रूहीति प्रश्नोऽसंभवति॥ अथार्जुनस्य भगदुक्तवचनार्थाविवेकानवधारणनिमित्तः प्रश्नः कल्पेत
तथापि भगवता प्रश्नानुरूपं प्रतिवचनं देयं मया बुद्धिकर्मणोः समुच्चय उक्तः किमर्थमित्थं त्वं भ्रांतोसीति न तु पुनः प्रतिवचन॥
मननुरूपं पृष्टादन्यदेव द्वे निष्ठे मया पुरा प्रोक्ते इति वक्तुं युक्तं। नापि स्मार्तेनैव कर्मणा बुद्धेः समुच्चयेऽभिप्रेते विभागवचनादि स
र्वमुपपन्नं किंच क्षत्रियस्य युद्धं स्मार्तं स्वधर्ममभिजानतः तत्किं कर्मणि घोरे मां नियोजयसीत्युपालंभोऽनुपपन्नः॥ ०॥

प्रकटयति। मयेति। व्यावर्त्यमंशमादर्शयति। नत्विति। प्रतिवचनस्य प्रश्नानुरूपत्वमेव स्पष्टयति। पृष्टादिति। श्रौतेन कर्मणा समुच्चयो ज्ञानस्येतिपक्षं प्रतिक्षिप्य पक्षांतरं प्रतिक्षिपति। नापीति। स्मृतिसमस्तो ज्ञानकर्मणोर्विभागवचनमादिशब्देन गृहीतं बुद्धेर्ज्यायस्त्वं पंचमादौ प्रश्नो भगवत्प्रतिवचनं सर्वमिदं श्रौतेनेव स्मार्तेनापि कर्मणा बुद्धेः समुच्चये विरुद्धं स्यादित्यर्थः। द्वितीयप्रश्नासंभवे हे
॥ त्वंतरमाह॥ किंचेति॥

श्रं

समुच्चयपक्षे प्रश्नप्रतिवचनयोरसंभवान्नेदं गीताशास्त्रं तत्परमित्युपसंहरति। तस्मादिति। विशुद्धसत्त्वस्यात्मज्ञानं स्वफलसि॥
द्धौ न सहकारिसापेक्षमज्ञाननिवृत्तिफलत्वाद्रज्ज्वादितत्वज्ञानवत्। अथवा बंधः सहायानपेक्षेण ज्ञानेन निवर्त्यते अज्ञानात्मक
त्वाद्रज्जुसर्पवदिति भावः। ननु कुर्याद्विद्वांस्तथासक्तश्चिकीर्षुर्लोकसंग्रहमिति वक्ष्यमाणत्वात्कथं गीताशास्त्रे समुच्चयो नास्तीत्यत
त्राह। यस्य त्विति। चोदनातन्त्रानुसारेण विधितोनुष्ठेयस्य कर्मणो धर्मत्वादापातमात्रस्य तथात्वाभावान्न त्वविरुद्धवर्णाश्रमा
भिमानशून्यस्याधिकारप्रतिपत्त्यभावाद्रागादिप्रवृत्तीनामविद्यालेशतो जायमानानां कर्माभासत्वात्कुर्याद्विद्वानित्यादिवाक्यं
न समुच्चयप्रापकमिति भावः। वाशब्दस्यार्थं द्वितीयमस्तु विविदिषावाक्यीयसाधनांतरसंग्रहार्थः संसारिकं ज्ञानं व्यावर्तयति प

तस्माद्गीताशास्त्रे ईषन्मात्रेणापि श्रौतेन स्मार्तेन वा कर्मणात्मज्ञानस्य समुच्चयो न केनचिद्दर्शयितुं शक्यः। यस्य त्वज्ञानाद्रागादि
दोषतो वा कर्मणि प्रवृत्तस्य यज्ञेन दानेन तपसा वा विशुद्धसत्वस्य ज्ञानमुत्पन्नं परमार्थतत्वविषयमेकमेवेदं सर्वं ब्रह्माकर्तृ चेति॥
तस्य कर्मणि कर्मप्रयोजने च निवृत्तेपि लोकसंग्रहार्थं यत्नपूर्वकं यथा प्रवृत्तस्तथैव प्रवृत्तस्य कर्मणि यत्प्रवृत्तिरूपं दृश्यते।
न तत्कर्म येन बुद्धेः समुच्चयः स्यात्। यथा भगवतो वासुदेवस्य क्षात्रधर्मचेष्टितं न ज्ञानेन समुच्चीयते। पुरुषार्थसिद्धये त
द्वत्फलाभिसंध्यहंकाराभावस्य तुल्यत्वाद्विदुषस्तत्वविद्धि नाहं करोमीति मन्यते। न च तत्फलमभिसंधत्ते॥ ०॥

रमार्थेति। तदेवाभिनयति। एकमिति। प्रवृत्तिरूपमिति रूपग्रहणमाभासत्वप्रदर्शनार्थं कर्माभाससमुच्चयस्य यादृच्छिकत्वान्न
तीय मोक्षं फलयतीति शेषः। किंचज्ञानिनो रागादिप्रवृत्तिर्न ज्ञानेन फले समुच्चीयते फलाभिसंधिविकलप्रवृत्तित्वादहंकारविधुर
प्रवृत्तित्वाद्भगवत्प्रवृत्तिवदितीत्याह। यथेति। हेतुद्वयस्यासिद्धिमाशंक्य परिहरति। तत्वविदिति। कूटस्थब्रह्मैवाहमिति मन्वा
नो विद्वान् प्रवर्तितत्फलं वा नैव स्वगतत्वेन पश्यति रूपादिवद्दृश्यस्य द्रष्टृधर्मत्वायोगात् किंतु कार्यकरणसंघातानुगतत्वेनैव प्रवृत्त्या स्य
दि प्रतिपद्यते अतस्तत्वविदो व्याख्यानसिद्धानहंकारस्य तत्साध्यादिफलाभिसंधेश्चाभासत्वान्नासिद्धं हेतुद्वयमित्यर्थः॥

गी०भा० ननुज्ञानोदयात्प्रागवस्थायामिवोत्तरकालेपिप्रवृत्तिनियतप्रवृत्त्यादिदर्शनान्नतत्त्वदर्शिनिप्रवृत्त्यादेराभासत्वमितितत्राह। आ०अ०४॥
यथाचेति। स्वर्गादिरेवकाम्यमानत्वात्कामस्तदर्थिनःस्वर्गादिकामस्याग्निहोत्रादेरपेक्षितस्वर्गादिसाधनस्यानुष्ठानार्थमग्नीना ॥२॥
२१॥ धायव्यवस्थितस्यतस्मिन्नेवकाम्यकर्मणिप्रवृत्तस्यार्द्धकृतेकेनापिहेतुनाकामेविनष्टेतदेवाग्निहोत्रादिनिर्वर्तयतोननतत्का
म्यंभवतिनित्यकाम्यविभागस्यास्वाभाविकत्वाभावात्कामोपबंधाऽनुपबंधकृतत्वात्तथाविदुषोपिविध्यधिकाराभावा
द्रागादिप्रवृत्तीनांकर्माभासनेस्यर्थः॥ विद्वत्प्रवृत्तीनांकर्माभासत्वमित्यत्रभगवदनुमतिमुपन्यस्यति। दर्शयति॥

यथाचस्वर्गादिकामार्थिनोऽग्निहोत्रादिकामसाधनानुष्ठानायाहिताग्नेःकाम्यएवाग्निहोत्रादौप्रवृत्तस्यसामिकृतेवि
नष्टेऽपिकामेतदेवाग्निहोत्राद्यनुतिष्ठतोपिनतत्काम्यमग्निहोत्रादिभवति। तथादर्शयतिचभगवान्कुर्वन्नपिनकरो
त्र तिनलिप्यतइतितत्रतत्रदर्शितंयच्चपूर्वैःपूर्वतरंकृतंकर्मकर्मणैवहिसंसिद्धिमास्थिताजनकादयइतितत्तुप्रविभज्यविज्ञेयं
तत्कथंयदितावत्पूर्वेजनकादयस्तत्त्वविदोपिप्रवृत्तकर्माणःस्युस्तेलोकसंग्रहार्थंगुणागुणेषुवर्तन्तइति॥ ५॥ ५॥

च्चेति। ननुविद्वद्व्यापारेपिकर्मशब्दप्रयोगदर्शनान्नव्यापारस्यकर्माभासत्वानुपपत्तेःसमुच्चयसिद्धिरितितत्राह॥ यच्चेति। ज्ञानकर्मणोः
समुच्चितयोरेवसंसिद्धिहेतुत्वेप्रतिपन्नेकुतोविभज्यार्थज्ञानमितिपृच्छतितत्कथमितितत्रकिंजनकादयस्तत्त्वविदोपिप्रवृत्तक
र्माणःस्युराहोस्विदतत्त्वविदइतिविकल्प्यप्रथमंप्रत्याह। यदीति। तत्त्वविवेकपूर्वंप्रवृत्तंकर्मणामकिंचित्करत्वादित्याशंक्या रामा॥
ह। तेलोकेति। तेषामुक्तंप्रयोजनार्थमपिनप्रवृत्तिर्युक्तासर्वत्रोदासीनत्वादित्याशंक्याह॥ गुणाइति॥ ०॥ ०॥ ०॥ ॥२१॥

कर्मणः

इंद्रियाणां विषयेषु प्रवृत्तिद्वारा नत्वविद्वांसं प्रवर्तनकर्मत्वेपि ज्ञानेनैव तेषां मुक्तिरित्याह॥ ज्ञानेनेति। उक्तमेवार्थं संक्षिप्य दर्शयति। कर्मणेति। कर्मणेत्यादौ बाधितानुवृत्त्या प्रवृत्त्याभासो गृह्यते। द्वितीयमनुवदति। अथेति। तत्रनास्यार्थं कथयति। स्वेस्वेति। विभज्य विशेषतं वाक्यार्थस्योक्तमुपसंहरति। इतिव्याख्येयमिति। कर्मणां चित्तशुद्धिद्वारा ज्ञानहेतुत्वमित्युक्तेऽर्थे वाक्यशेषं प्रमाणयति। एनमेवेति। योगिनः कर्म कुर्वंतीत्यादिवाक्यमर्थतोनुवदति। सतेति। स्वकर्मणेत्यादौ साक्षादेव मोक्षहेतुत्वं कर्मणां न स्या

ज्ञानेनैव संसिद्धिमास्थिताः। कर्मसंन्यासे प्राप्तेपि कर्मणा सहैव संसिद्धिमास्थिता न तु कर्मसंन्यासं कृतवंत इत्यर्थः॥ अथवनतेन त्वविद ईश्वरसमर्पितेन कर्मणा साधनभूतेन संसिद्धिं सत्त्वशुद्धिं ज्ञानोत्पत्तिलक्षणां वा संसिद्धिमास्थिता जनकादय इति व्याख्येयं। एतमेवार्थं वक्ष्यति भगवान् सत्त्वशुद्धयै कर्म कुर्वंति स्वकर्मणा तमभ्यर्च्य सिद्धिं विंदति मानव इति उक्ता सिद्धिं प्राप्तस्य पुनर्ज्ञाननिष्ठां वक्ष्यति। सिद्धिं प्राप्तो यथा ब्रह्मेत्यादिना। तस्माद्गीतासु केवलादेव तत्त्वज्ञानात्। मोक्षप्राप्तिर्न कर्मसमुच्चितादिति निश्चितोऽर्थो
॥ यथाचायमर्थस्तथा प्रकरणशो विभज्य तत्र तत्र प्रदर्शयिष्यामः॥५

दित्याशंक्याह। स्वकर्मणेति। स्वकर्मानुष्ठानादीश्वरप्रसादद्वारा ज्ञाननिष्ठायोग्यता लभ्यते ततो ज्ञाननिष्ठया मुक्तिस्तेन न साक्षात्कर्मणो मुक्तिहेतुत्वेऽग्रे भविष्यतीत्यर्थः तत्त्वज्ञानोत्तरकालं कर्मासंभवे फलितमुपसंहरति। तस्मादिति। ननु यद्यपि गीताशास्त्रं तत्त्वज्ञानप्रधानमेकं वाक्यं तथापि तन्मध्ये स्वधर्माणां कर्म तदंगमंगीकर्तव्यं प्रकरणप्रामाण्यादिति समुच्चयसिद्धिस्तत्राह। यथाचेति॥ अर्थशब्देनात्मज्ञानमेव केवलं कैवल्यहेतुरिति गृह्यते। इति कृतामभिप्रायं प्रत्याख्याय स्वाभिप्रेतः शास्त्रार्थः समर्पितः॥ ०॥

गी॰भा॰
२॥

सं प्रति अशोच्यानित्यस्मात्प्राक्तनग्रंथसंदर्भस्य प्रागुक्तं तात्पर्यार्थमनूद्याशोच्यानित्यादेः स्वधर्ममपि चावेक्ष्येत्येतदंतस्य समुदाय
स्य तात्पर्यमाह। तत्रेति। अत्र हि शास्त्रे त्रीणि कांडान्यष्टादशसंख्याकानामध्यायानां षट्कत्रितयमुपादाय त्रेविध्यात्तत्र पूर्वषट्कात्म
कं पूर्वकांडं त्वंपदार्थं विषयीकरोति। मध्यमषट्करूपं मध्यमकांडं तत्पदार्थं गोचरयति। अंतिमषट्कलक्षणमंतिमं कांडं पदार्थयो॰
रैक्यं वाक्यार्थमधिकरोति। तत्र ज्ञानसाधनानि च तत्र तत्र प्रसंगादुपन्यस्यैंते ज्ञानस्य तदधीनत्वात्तज्ज्ञानमेव केवलं कैवल्यसा

तत्र धर्मसंमूढचेतसो महति शोकसागरे निमग्नस्यार्जुनस्यान्यत्रात्मज्ञानादुद्धरणमपश्यन् भगवान्वासुदेवस्ततोर्जुनमुद्दिधार
यिषुरात्मज्ञानायावतारयन्नाह अशोच्यानित्यादि न शोच्या अशोच्या भीष्मद्रोणादयः सद्वृत्तत्वात्परमार्थस्वरूपेण च नित्यत्वात्तान्
अशोच्यानन्वशोच[illegible]त्वं अनुशोचितवानसि ते म्रियंते मन्निमित्तमहं तैर्विनाभूतः किं करिष्यामि राज्यसुखादिनेति॥

॥ अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे॥ गतासूनगतासूंश्च नानुशोचंति पंडिताः॥११॥

ते

त्वं प्रज्ञावतां बुद्धिमतां वादांश्च वचनानि च भाषसे तदेतन्मौढ्यं पांडित्यं च विरुद्धमात्मनि दर्शयसि उन्मत्त इवेत्यभिप्रायो यं
यस्माद्गतासून्गतप्राणान्मृतान् अगतासूंश्च अगतप्राणान्जीवतश्च नानुशोचंति पंडिताः आत्मज्ञास्ते हि पंडिताः पांडि
त्यं निर्विद्येति श्रुतेः परमार्थतस्तांस्तु नित्यानशोच्याननुशोचस्यतो मूढोसीत्येतत्॥ ५॥ श्रीराम॥ ०॥

यंनमितिश्च सर्वत्राविगीतं। एवं पूर्वोक्तरीत्या शास्त्रार्थे परिनिश्चिते सतीति यावत्। धर्मसंमूढं कर्तव्याकर्तव्यविवेकविकलं चेतो यस्य
तस्य मिथ्याज्ञानवतोहंकारममकारवतः शोकाख्ये सागरे दुरुत्तरे प्रविश्य क्लिश्यतो जीवात्मैक्यलक्षणवाक्यार्थज्ञानमात्मज्ञा
नं तद्व्यतिरेकेणोद्धरणासिद्धेस्तमतिभक्तमतिस्निग्धं शोकाब्धेरुद्धर्तुमिच्छन्भगवान्यथोक्तज्ञानार्थं तमवतारयन्यदार्थपरिशो
धने प्रवर्तयन्नाहेति त्वंपदार्थं शोधयितुमशोच्यानित्यादिवाक्यमाहेति योजना यस्याज्ञानं तस्य भ्रमो यस्य भ्रमस्तस्य प॥

आ॰अ॰
॥२॥

रामा॥
॥२२॥

दार्थपरिशोधनपूर्वकं सम्यग्ज्ञानं वाक्यादुदेतीति ज्ञानाधिकारिणमभिप्रेत्याह ॥ अशोच्यानिति तत्र तु केचिदात्मा वा अ
रे द्रष्टव्य इत्यात्मयाथात्म्यदर्शनविधिवाक्यार्थमनेन श्लोकेन व्याचक्षते स्वयं हरिरित्यूचुः ॥ तदयुक्तमिति योग्यतैकार्थस
मवेतश्रेयःसाधनताबोधनापराभिमतनियोगस्य वा विध्यर्थस्याप्रतीयमानस्य कल्पनाहेत्वभावात् न च दर्शने पुरु
षतंत्रत्वरहिते विधेययागादिविलक्षणे विधिरुपपद्यते ॥ कल्यां तन्नर्जनस्याहार्थत्वान्न व्योन विधिमधिकरोतीत्यभिप्रेत्य
व्याचष्टे अशोच्यानिति ॥ कथं तेषामशोच्यत्वमित्युक्ते भीष्मादिशब्दवाच्यानां वा शोच्यत्वं तत्पदलक्ष्याणां वेति विक
ल्प्याद्यं दूषयति ॥ सद्वृत्तत्वादिति ये भीष्मादिशब्दैरुच्यंते ते श्रुतिस्मृत्युदीरिताविगीताचारवत्त्वान्न शोच्यतामर्हंति वीरत्वि
त्यर्थः द्वितीयं प्रत्याह । परमार्थेति अरजने रजनबुद्धिवदशोच्येषु शोच्यबुद्ध्या भ्रांतोसीत्याह ॥ तानीति ॥ अनुशोचनप्र
कारमभिनयन्भ्रांतिमेव प्रकटयति ॥ तेन्वियंत इति ॥ पुत्रभार्यादिप्रयुक्तं सुखमादिशब्देन गृह्यते इत्यनुशोचित
वानसीति संबंधः विरुद्धार्थाभिधायित्वेनापि भ्रांतत्वमर्जुनस्य साधयति ॥ त्वं प्रज्ञावतामिति ॥ उत्सन्नकुलधर्मा॰
णामित्यादीनि वचनानि । किमेतावता फलितमिति तदाह ॥ तदेतदिति ॥ तन्मोहस्य मशोच्येषु शोच्यदृष्टित्वं ॥
एतत्पाडित्यं बुद्धिमतां वचनभाषित्वमिति यावत् । अर्जुनस्य पूर्वोक्तभ्रांतिभावे निमित्तमात्माऽज्ञानमित्या
ह ॥ यस्मादिति । ननु सूक्ष्मबुद्धिमत्त्वमेव पांडित्यं न त्वात्मज्ञत्वं हेत्वभावादित्याशंक्याह ॥ तेहीति ॥ पांडित्यं पंडि
तभावमात्मज्ञानं निर्विघ्ननिश्चयेन लब्ध्वा बाल्येन तिष्ठासेदिति बृहदारण्यकश्रुतिमुक्तार्थामुदाहरंति ॥ पांडित्यमिति
यथोक्तपांडित्यराहित्यं कथं ममावगतमित्याशंक्य कार्यदर्शनादित्याह । परमार्थं नास्तीति ॥ यस्मादित्यस्यापेक्षितं दर्शय
ति ॥ अत इति ॥ छ ॥ ११ ॥

ी॰भा॰
३॥

नित्यत्वमशोच्यत्वे कारणमिति तच्चिंतं विवेचयितुं प्रश्नपूर्वकं प्रतिजानीते। कुत इत्यादिना। नित्यत्वमसिद्धं प्रमाणाभावादिति चोदयति।
कथमिति॥ आत्मा न जायते प्रागभावशून्यत्वात्खरविषाणवदिति परिहरति। न त्वेवेति। किंचात्मा नित्यो भावत्वे सत्यजन्यत्वाद्व्यति
रेकेण घटवदित्यनुमानांतरमाह। न चैवेति। यत्तु कैश्चिदात्मयाथात्म्यजिज्ञासितं भगवानुपदिशतीति। न त्वित्यादिना श्लोकचतु
ष्टयेनेत्यादिष्टं तदसद्विशेषवचनेहेत्वभावात्सर्वत्र वात्मयाथात्म्यप्रतिपादनाविशेषादित्याशयेन पदच्छेदः॥ ५॥ ॰
पदार्थोक्तिर्विग्रहो वाक्ययोजनेति त्रितयमपि व्याख्यानांगं प्रतिपादयति। न त्वित्यादिना। नन्वात्मनो देहोत्पत्तिविनाशयोरुत्पत्तिवि

आ॰अ॰
॥२॥

कुतस्तेऽशोच्याः यतो नित्याः कथं। न तु एव जातु कदाचिदहं नासं किं त्वासमेवातीतेषु देहोत्पत्तिविनाशेषु घटादिषु वि तेर्दे
यद्विव नित्यमेवाहमासमित्यभिप्रायः तथा न त्वं नासीः किं त्वासीरेव तथा[illegible]नेमे जनाधिपा नासन् किं त्वासन्नेव॥
॥ न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः॥ न चैव न भविष्यामः सर्वे वयमतः परं॥१२॥
तथा न च न भविष्यामः॥ किं तु भविष्याम एव च सर्वे वयमतोऽस्मात् देहविनाशात् परमुत्तरकालेऽपि॥ ५॥ ५॥ ॰

नाशप्रसिद्धेरुक्तमनुमानद्वयं प्रसिद्धिविरुद्धतया कालात्ययापदिष्टमिति नेत्याह॥ अंतीति। नेष्विति। चराचरव्यपाश्रयस्तु॰
स्यादिति न्यायेनात्मनो जननविनाशप्रसिद्धेरौपाधिकजन्मविनाशविषयत्वान्निरुपाधिकस्य तस्य जन्मादिराहित्यमि
ति भावः। यद्यपि तवेश्वरस्य जन्मादिराहित्यं तथापि कथं ममेत्याशंक्याह। तथेति। तथापि भीष्मादीनां कथं जन्माभावस्त
त्राह। तथा नेति। द्वितीयमनुमानं प्रपंचयन्नुत्तरार्द्धं व्याचष्टे। तथेत्यादिना॥ ५॥ ५॥ ५॥ ५॥ ५॥

रामा॰
२३॥

यस्य साध्याभावः प्रमाणान्तरेण निश्चितः स बाधित इति लक्षणलक्षि
तत्वमेव कालात्ययापदिष्टत्व

दि

ननु देहोत्पत्तिविनाशयोरात्मनो जन्मविनाशाभावेपि महासर्गमहाप्रलययोस्तस्याग्निविस्फुलिंगदृष्टांतेन श्रुत्या जन्मविनाशावेष्टव्यावित्याशंक्य नात्माश्रुतेरिति न्यायेन परिहरति॥ त्रिष्वपीति। यावद्विकारं तु विभागो लोकवदिति न्यायेन भिन्नत्वादिकारित्वमात्मनोनुमीयते भिन्नत्वं च बहुवचनप्रयोगप्रमितमित्याशंक्याह। देहेति॥१२॥ ननु पूर्वदेहं विहायापूर्वदेहमुपाददानस्य विक्रियावत्त्वेनोत्पत्तिविनाशवत्त्वविभ्रमः समुद्भवेतिशंकते। तत्रेति। अशोच्यत्वप्रतिज्ञायां नित्यत्वे हेतूकृते सतीति यावत्॥ अवस्थाभेदे सत्यपि वस्तुतो विक्रियाभावादात्मनो नित्यत्वमुपपन्नमित्युत्तरश्लोकेन दृष्टांतावष्टंभेन प्रतिपादयतीत्याह। दृष्टांतमिति।

त्रिष्वपि कालेषु नित्या आत्मस्वरूपेणेत्यर्थः। देहभेदानुवृत्त्या बहुवचनं। नात्मनो भेदाभिप्रायेण। तत्र कथमिव नित्य आत्मेति दृष्टां॥ तमाह देहिनो देहोऽस्यास्तीति देही तस्य देहिनो देहवत आत्मनोऽस्मिन्वर्त्तमाने देहे यथा येन प्रकारेण कौमारं कुमारस्य भावो बा॥ल्यावस्था यौवनं तरुणो भावो मध्यमावस्था। जरा वयोहानिः जीर्णावस्थेत्येतास्तिस्रोवस्था अन्योन्यविलक्षणास्तासां प्रथ

देहिनोस्मिन् यथा देहे कौमारं यौवनं जरा। तथा देहांतरप्राप्तिर्धीरस्तत्र न मुह्यति ॥१३॥ ॥

मावस्थानाशेन नाशो द्वितीयावस्थोपजननेनोपजननमात्मनः किं तर्ह्यविक्रियस्यैव द्वितीयातृतीयावस्थाप्राप्तिरात्मनो दृष्टा यथा तथा तद्देवदेहादन्यो देहो देहांतरं तस्य प्राप्तिर्देहांतरप्राप्तिरविक्रियस्यैव आत्मन इत्यर्थः। धीरो धीमांस्तत्रैवं सति न मुह्यति न मोहमापद्यते॥१३॥

न केवलमागमादेवात्मनो नित्यत्वं किंत्ववस्थांतरवज्जन्मांतरे पूर्वसंस्कारानुवृत्तेश्चेत्याह। देहिन इति। देहवत्त्वं तस्मिन्नहं ममाभिमानभाक्। तासामिति निर्धारणे षष्ठी। आत्मनः श्रुतिस्मृत्युपपत्तिभिर्नित्यत्वज्ञानं धीमानित्यत्र धीर्विवक्ष्यते। एवं सतीति। तत्त्वतो विक्रियाभावान्नित्यत्वे समधिगते सतीत्यर्थः॥॥१३॥ ॥

टी०भा०
४१।

आ०अ०
२

आत्मनः श्रुत्यादिप्रमिते नित्यत्वे नदुत्पत्तिविनाशप्रयुक्तशोकमोहाभावेपि प्रकारांतरेण शोकमोहौ स्यातामिति शंकामनूद्योत्तरत्वेन श्लोकमवतारयति। यदीत्यादिना। शीतोष्णयोस्ताभ्यां सुखदुःखयोश्च प्राप्तिं निमित्तीकृत्य यो मोहो दृश्यते तेन तस्यान्वयव्यतिरेकाभ्यां दृश्यमानत्वमाश्रित्य लौकिक इति विशेषणं। अशोच्यानित्यत्र यो विद्याधिकारी सूचितस्तस्य तितिक्षुः समाहितो भूत्वेति श्रुतेस्तितिक्षुत्वं विशेषणमिहोपदिश्यते व्याख्येयं पदमुपादाय करणव्युत्पत्त्या तस्येंद्रियविषयत्वं दर्शयति। मात्रा इत्यादिना षष्ठीसमासं दर्शयन्भावव्युत्पत्त्या स्पर्शशब्दार्थमाह। मात्रा

मोह

यद्यप्यात्मनः नाशनिमित्तो मोहो न संभवति॥ नित्य आत्मेति विजानतस्तथापि शीतोष्णसुखदुःखप्राप्तिनिमित्तो मोहो लौकिको दृश्यते। सुखवियोगनिमित्तो दुःखसंयोगनिमित्तश्च शोक इत्येतदर्जुनस्य वचनमाशंक्याह। मात्रा आभिर्मीयंते शब्दादय इति श्रोत्रादीनींद्रियाणि मात्राणां स्पर्शाः शब्दादिभिः संयोगास्ते शीतोष्णसुखदुःखदाः शीतं उष्णं सुखं दुःखं च शब्दादारभ्य प्रयच्छंतीति। अथवा स्पृश्यंत इति स्प

मात्रास्पर्शास्तु कौंतेय शीतोष्णासुदुःखदाः॥ आगमापायिनोऽनित्यास्तांस्तितिक्षस्व भारत ॥१४॥

ख

र्शाः शब्दादयो विषयाः मात्राश्च स्पर्शाश्च शीतोष्णसुखदुःखदाः॥ शीतं कदाचित्सुखं॥ कदाचिद्दुःखं तथोष्णमप्यनियतरूपं सुखदुःखे पुनर्नियतरूपे यतो न व्यभिचरतोऽतस्ताभ्यां पृथक् शीतोष्णयोर्ग्रहणं॥१४॥ ० ० ०॥ १४॥ ०

णामिति। तेषामर्थक्रियामादर्शयति। ते शीतेति। संप्रति शब्दद्वयस्य कर्मव्युत्पत्त्या शब्दादिविषयपरत्वमुपेत्य समासांतरं दर्शयन्विषयाणां कार्यं कथयति। अथवेति। ननु शीतोष्णप्रदत्वे सुखदुःखप्रदत्वस्य सिद्धत्वात् किमिति शीतोष्णयोः सुखदुःखाभ्यां पृथग्ग्रहणमिति तत्राह शीतमिति। विषयेभ्यस्तु पृथक्कथनं तदंतर्भूतयोरेव तयोः सुखदुःखहेतोरानुकूल्यप्रातिकूल्ययो रूपलक्षणार्थं। अध्यात्मे हि शीतमुष्णं वा अनुकूलं प्रातिकूल्यं वा संपाद्य बाह्या विषयाः सुखादि जनयंति॥ ॥ ॥ ॥

रामा॥
॥२४॥

ननु विषयेंद्रियसंयोगस्यात्मनि सदासत्वात्तत्प्रयुक्तशीतादेरपि तथात्वात्तन्निमित्तौ हर्षविषादौ तथैव तस्मिन्नापन्नावित्याशंक्योत्त
रार्द्धं व्याचष्टे । यस्मादित्यादिना ॥ अत्र कौंतेयभारतेति संबोधनाभ्यां उभयकुलशुद्धस्यैव विद्याधिकारित्वमित्यनेन द्योत्यते ॥१४॥
अधिकारिविशेषणं तितिक्षुत्वं नोपयुक्तं केवलस्य तस्य पुमर्थाहेतुत्वादिति शंकते । शीतेति । विवेकवैराग्यादिसहितं तन्मोक्षहेतुर्ज्ञान
द्वारा तदर्थमिति परिहरति । श्र एवेति । तितिक्षमाणस्य विवक्षितं लाभमुपलंभयति । यं हीति । विषादहर्षरहितमित्यत्र शमादिसाधन॰

यस्मात्ते मात्रास्पर्शादयः आगमापायिनः आगमापायशीलास्तस्मादनित्याः उत्पत्तिविलयरूपत्वात् अतस्तान् शीतोष्णादीन्
तितिक्षस्व प्रसहस्व तेषु हर्षं विषादं च मा कार्षीरित्यर्थः ॥ शीतोष्णादीन् सहतः किं स्यादिति शृणु ॥ यं हि न व्यथयंत्येते पुरुषं
पुरुषर्षभ ॥ समदुःखसुखं धीरं सोऽमृतत्वाय कल्पते ॥१५॥ यं हि पुरुषं समदुःखसुखं समे तुल्ये दुःसुखे[illegible]खे यस्य तं
सुख समदुःखसुखं दुःखप्राप्तौ हर्षविषादरहितं धीरं धीमंतं न व्यथयंति न चालयंति नुचालयंति नित्यात्मदर्शनादेते यथोक्ताः
शीतोष्णादयः स नित्यात्मस्वरूपदर्शननिष्ठो द्वंद्वसहिष्णुरमृतत्वाय अमृतभावाय मोक्षायेत्यर्थः कल्पते समर्थो भवति ॥ इतश्च
॥ शोकमोहावकृत्वा शीतोष्णादिसहनं युक्तं । यस्मात् ॥

संपन्नत्वमुच्यते धीमंतमिति नित्यानित्यविवेकभागित्वमनेन चोभयं वैराग्यादेरुपलक्षणं नित्यात्मदर्शनं त्वमर्थज्ञानं साधनचतु
ष्टयवंतमधिका[illegible]णमनूद्य त्वंपदार्थज्ञानवतस्तस्य मोक्षौपयिकवाक्यार्थज्ञानयोग्यतामाह । स नित्येति ॥१५॥ अधिकारिवि
शेषणे तितिक्षुत्वे हेतुं तरपरत्वेनोत्तरश्लोकमवतारयति । इतश्चेति इतः शब्दार्थमेव स्फुटयति । यस्मादिति ॥ [illegible] ॥ [illegible] ॥

॰भा॰
ग

यतः शीतोष्णादेः शोकादिहेतोरनात्मनो नास्ति वस्तुत्वं वस्तुतस्त्वात्मनो निर्विकारत्वेनैकरूपत्वमतो मुमुक्षोर्विशेषणं तितिक्षुत्वं युक्तमित्याहानेत्यादिना। कार्यस्यासत्त्वेपि कारणस्य सत्त्वेनात्यंतासत्त्वसिद्धिरित्याशंक्याविशिनष्टि। सकारणस्येति। नासत इत्युपादाय पुनर्नकारानुकर्षणमन्वाचार्य्यं। असतः शून्यस्यास्तित्वप्रसंगाभावादप्रसक्तप्रतिषेधप्रसक्तिरित्याशंक्याह। ना। हीति। विमतमनात्मिकमप्रमाणिकत्वात् रज्जुसर्पवत्।। नहि धर्मिग्राहकस्य प्रत्यक्षादेस्तत्त्वावेदकं नं गामात्त्वे प्रकल्प्येति विषयस्य दुर्निरूपत्वादतोऽनिर्वाच्यं द्वैतमित्यर्थः। कथं पुनरध्यक्षादिविषयस्य शीतोष्णादिद्वैतस्य दुर्निरूपत्वेनानिर्वाच्यत्वं तत्राह। विकारो हीति।।•

आ॰अ॰
२

नासतो विद्यते भावो नाभावो विद्यते सतः। उभयोरपि दृष्टोंतस्त्वनयोस्तत्त्वदर्शिभिः १६ ॥ ५॥

न असतोऽविद्यमानस्य शीतोष्णादेः सकारणस्य न विद्यते नास्ति भावो भवनमस्तिता नहि शीतोष्णादि सकारणं प्रमाणैर्निरूप्यमाणं वस्तु सद्भवति विकारो हि सः विकारश्च व्यभिचरति यथा घटादिसंस्थानं चक्षुषा निरूप्यमाणं मृद्व्यतिरेकेणानुपलब्धेरसत्तथा सर्वो विकारः कारणव्यतिरेकेणानुपलब्धेरसन् जन्मप्रध्वंसाभ्यां प्रागूर्ध्वं चानुपलब्धेः॥ ५॥ ५॥•

ततश्च विमतं मिथ्या आगमापायित्वात् संप्रतिपन्नवदिति फलितमाह॥ विकारश्चेति। वाचारंभणश्रुतेर्द्वैतमिथ्यात्वेऽनुग्राहकत्वं दर्शयितुं चकारः। किंच कार्यं कारणाद्भिन्नमभिन्नं वेति विकल्प्याद्यं दूषयति। यथेति निरूप्यमाणमंतर्बहिश्चेति शेषः। विमतं कारणान्न तत्त्वतो भिद्यते कार्यत्वाद्घटवदित्यर्थः। इतो विकारणाद्भेदेन नास्ति कार्यमादावंते च यन्नास्ति वर्तमानेऽपि तत्तथेति न्यायादित्याह।
॥ जन्मेति॥

॥रा मा॥
॥२५॥

यदि कार्यकारणभिन्नं तदा तस्य भेदेनासत्वेऽपूर्वस्मादविशेषः। तादात्म्येनावस्थानं तु न युक्तं तस्यापि कारणव्यतिरेकेणाभावात्कार्यकारण
विभागविधुरे वस्तुनि कार्यकारणपरंपराया विश्रमत्वादित्यभिप्रेत्याह। मृदादीति। कार्यकारणविभागविहीनं वस्त्वेव नास्तीति मत्वा
नश्चोदयति। तदसत्वइति। अनुवृत्तव्यावृत्तबुद्धिद्वयदर्शनादनुवृत्तेन व्यावृत्तानां कल्पितत्वादकल्पितं सर्वभेदविकल्पाधिष्ठा
नमकार्यकारणं वस्तु सिध्यतीति परिहरति। न सर्वत्रेति। संप्रति सतो वस्तुत्वे प्रमाणमनुमानमुपन्यस्यति। यद्विषये इति। यद्व्यावृत्ते
ष्वनुवर्तनं तत्परमार्थसत् यथा सर्पधारादिष्वनुगतो रज्ज्वादेरिदमंशः। विमतं सत्सत्यम् अव्यभिचारित्वात्संप्रतिपन्नवदित्यर्थः। व्यावृत्त
दि
स्य कल्पितत्वे प्रमाणमाह। यद्विषये त्यादिना। यद्व्यावृत्तं तन्मिथ्या यथा सर्पधारादि। विमतं मिथ्या व्यभिचारित्वात्संप्रतिपन्नव

मृदादिकारणस्य च तत्कारणव्यतिरेकेणानुपलब्धेरसत्त्वं तदसत्त्वे सर्वतोऽसत्त्वप्रसंग इति चेन्न सर्वत्र बुद्धिद्व
योपलब्धेः सद्बुद्धिरसद्बुद्धिरिति तत्र यद्विषया बुद्धिर्न व्यभिचरति तत्सत् यद्विषया व्यभिचरति॥
तदसदिति॥ सदसद्विभागे बुद्धितन्त्रे स्थिते न सर्वत्र द्वे बुद्धी सर्वैरुपलभ्येते॥ ० ॥ ० ॥

दित्यर्थः। इत्यनुमानद्वयमनुसर्तव्यं सतोऽकल्पितत्वमसतश्च कल्पितत्वं स्थितमिति शेषः ननु नेदमनुमानद्वयमुपपद्यते समस्त
द्वैतवैतथ्यवादिनो विभागाभावादनुमानादिव्यवहारानुपपत्तेस्तत्राह। सदसदिति। उक्ते विभागे बुद्धिद्वयाधीने स्थिते सत्यनुमा
नादिव्यवहारो निर्वहति प्रातिभासिकविभागेन तद्योगात्परमार्थस्यैव तद्धेतुत्वे केवलव्यतिरेकाभावादित्यर्थः। कुतः सदसद्वि
भागस्य बुद्धिद्वयाधीनत्वं बुद्धिविभागस्यापि तथाभावात्तत्राह। सर्वत्रेति। व्यवहारभूमिःसत्यम्प्यर्थः। बुद्धिविभागस्यापि
कल्पितस्यैव बोध्यविभागप्रतिभासहेतुत्वेनेति भावः॥ २५॥ २५ २५ २५ः

मा

बुद्धिद्वयमनुरुध्य सदसद्विभागे सतः सामान्यरूपतया विशेषाकांक्षायां सामान्यविशेषद्वे वस्तुनी वस्तुभूते स्यातामिति चेन्नेत्याह । समानाधि आ भ ०
करणे इति । पदद्वयोः सामानाधिकरण्यं बुध्योरुपचर्यते सोयमिति सामानाधिकरण्यवद्घटः सन्नित्यादि सामानाधिकरण्यमेकव २
स्तुनिष्ठं वस्तुभेदे घटपटयोरिव तदयोगादित्यर्थः । नीलमुत्पलमिति वद्धर्मधर्मिविषयतया सामानाधिकरण्यस्य सुवचत्वान्नैव
रत्वैकस्य विषयत्वमिति चेन्नेत्याह । न नीलेति । न हि सामान्यविशेषयोर्भेदःऽभेदे वानन्द्रा वो भेदाभेदौ च विरुद्धावतो जातिव्यक्त्योः ।
सामानाधिकरण्यं नीलोत्पलयोरिव न गौणं किं तु व्यावर्तनमनुवर्तते कल्पितमित्यैकस्यनिष्ठमित्यर्थः सामान्यविशेषयोः । उक्त
न्यायं गुणगुण्यादावतिदिशति । एवमिति नु त्सौ हि न त्रापि विकल्पदोषादिति भावः । सामानाधिकरण्यानुपपत्त्या द्वे वस्तुनी

समानाधिकरणेन नीलोत्पलवत् । सन् घटः सन् पटः सन् हस्तीत्येवं सर्वत्र तयोर्बुद्ध्योर्घटादिबुद्धिर्व्यभिचरति
तथा च दर्शितं नतु सद्बुद्धिस्तस्मात् घटादिबुद्धिविषयोऽसन् व्यभिचारात् न तु सद्बुद्धिविषयोऽव्यभिचारात् ॥ १६ ॥ ५

सामान्यविशेषाविति पक्षं प्रतिक्षिप्य विशेषा एव वस्तूनीति पक्षं प्रतिक्षिपति । तयोरिति । बुद्धिव्यभिचाराद्बोध्यव्यभिचारेऽपि कथं व्यावर्तना
नां विशेषाणामवस्तुत्वमित्याशंक्याह । तथा चेति । विकारो हि सइत्याहाविति शेषः । न चैकं वस्तु सामान्यविशेषात्मकं । एकस्य द्वैरूप्य
विरोधादित्यभिप्रेत्य सामान्यमेकमेव वस्तु नं न बुद्धेर्व्यभिचाराद्बोध्यस्यापि सत्त्वं न स्तथात्वादित्याह । नातिति । व्यभिचरतो सामा ॥
ति पूर्वेण संबंधः । विशेषाणां व्यभिचारे सत्यव्यभिचारेफलितमुपसंहरति । तस्मादिति ॥ असत्त्वं कल्पितत्वं ॥ तच्छब्दार्थमेवस्फोर २६ ॥
यति । व्यभिचारादिति । सद्बुद्धिविशेषयस्य सतोऽकल्पितत्वेन तत्त्वज्ञापनमेव हेतुमाह । अव्यभिचारादिति ॥ ० ॥ ५ ॥ ०

सर्व

बुद्धिव्यभिचारद्वारा बोध्यस्यापि व्यभिचारात्तद्व्यभिचारित्वहेतोरसिद्धिरिति शंकते। घटे विनष्ट इति। सद्बुद्धेर्घटमात्राबुद्धिवद्घटविषयत्वाभावान्न घटनाशे व्यभिचारोस्तीति परिहरति। न पटादाविति। सद्बुद्धेरघटविषयत्वे निरालंबनत्वायोगाद्विषयांतरं वक्तव्यमित्याशंक्याह। विशेषणेति। सतोऽकल्पितत्वहेतोरव्यभिचारित्वस्यासिद्धिमुपेत्य विशेषणांकल्पितत्वहेतोर्व्यभिचारित्वस्यासिद्धिमाशंकते। सदिति। यथा सद्बुद्धिर्घटे नष्टे पटादौ दृष्टत्वादव्यभिचारिणी स्वव्यभिचारः सतो दर्शितस्तथा घटबुद्धिरपि घटे नष्टे घटांतरे दृष्टत्वादव्यभिचारी घटव्यभिचारासिद्धौ विशेषणांतरस्यापि कल्पितत्वहेतोर्व्यभिचारो न सिध्यतीत्यर्थः। घटबुद्धेर्घटांतरे दृष्टत्वेपि पटादावदृष्टत्वेन व्यभिचारात्तु यदि विशेषस्यापि व्यभिचारित्वसिद्धिरित्यत आह। नप।

घटे विनष्टे घटबुद्धौ व्यभिचरंत्यां सद्बुद्धिरपि व्यभिचरतीति चेन्न पटादावपि सद्बुद्धिदर्शनाद्विशेषणविषयैव सा सद्बुद्धिः अतोपि न विनश्यति। अथ सद्बुद्धिवत् घटबुद्धिरपि घटांतरे दृश्यत इति चेन्न। पटादावदर्शनात्॥ सद्बुद्धिरपि नष्टे घटे न दृश्यत इति चेन्न विशेषणाभावात्॥ सद्बुद्धिर्विशेषणविषया सती। विशेष्याभावे विशेषणानुपलब्धौ किंविषया स्यान्न तु पुनः सद्बुद्धेर्विषयाभावात्॥ ७॥ ॥ ॥ ॥

४५

टादावीति। विशेषणमेवं व्यभिचारीत्वेन ततोपि तदुपपत्तेरव्यभिचारित्वहेत्वसिद्धितादवस्थ्यमिति शंकते। सद्बुद्धिरिति। घटादिनाशदेशे तदुपरक्ताकारेण सत्त्वाभानेपि नासत्त्वं घटाद्यभावाधिष्ठाने तथाभानादित्याह। न विशेष्येति। यथा सर्वगता जातिरित्यत्र खंडमुंडादिव्यक्त्यभाववद्देशे गोत्वं व्यंजकाभावान्न व्यज्यते न गोत्वाभावात्तथा सत्त्वमपि घटादिनाशे व्यंजकाभावान्न भाति न स्वरूपाभावादित्युक्तमेव प्रपंचयति। सदित्यादिना। सप्रतियोगिकविशेषणत्वव्यभिचारेपि स्वरूपाव्यभिचारादुक्तं सतः सत्त्वमिति भावः॥ ७॥

स

द्वयोः सतोरेव विशेषणविशेष्यत्वदर्शनात् घटसतोरपि विशेषणविशेष्यत्वे द्वयोः सत्वध्रौव्यात् घटादिकल्पितत्वानुमानं सामानाधिक
रण्यधीबाधितमिति चोदयति। एकेति। अनुभवमनुसृत्य सबाधितविषयत्वमुक्त्वानुमानस्य निरस्यति। नेत्यादिना घटादेः सत्ति
कल्पितत्वानुमानस्य दोषराहित्ये फलितमुपसंहरति। तस्मादित्यैंति। प्रथमपादव्याख्यानपरिसमाप्ताविति शब्दः। ननु ने
द्व्याख्यानं भाष्यकाराभिप्रेतं सर्वद्वैतस्य शून्यत्वविवक्षायां शास्त्रतद्भाष्यविरोधात्केनापि पुनर्दुर्विदग्धेन स्वमनीषिक
योत्प्रेक्षितमिति चेन्मैवं किमिदं द्वैतप्रपंचस्य शून्यत्वं किं तुच्छत्वं किंवा सद्विलक्षणत्वं। नाद्यः अनभ्युपगमात्। द्वितीयानन

एकाधिकरणत्वं घटादिविशेष्याभावेन युक्तमिति चेन्नेदमुदकमिति मरीच्यादौ अर्थांतराभावेऽपि सामानाधिकरण्यदर्शनात्तस्मा
द्देहादेर्द्वन्द्वस्य च सकारणस्यासत्तो न विद्यते भाव इति। तथा सत आत्मनोऽभावोऽविद्यमानता न विद्यते सर्वत्राव्यभिचारादित्यैवो
॥ चाम ॥

भ्युपगमे तु तत्त्वैव शास्त्रविरोधो भाष्यविरोधश्च। सर्वं हि शास्त्रं तद्भाष्यं च द्वैतस्यासत्यत्वानधिकरणत्वसाधनेनाद्वैतसत्यत्वे पर्यवसि
तमिति त्रैविध्येऽद्वैतसत्त्वं तत्र प्रतिष्ठापितं तथा च प्रक्षेपाशंका संप्रदायपरिचयाभावादिति द्रष्टव्यं। अनात्मजातस्य कल्पितत्वेनाव
स्तुत्वप्रतिपादनपरतया प्रथमपादं व्याख्याय द्वितीयपादमात्मनः सर्वकल्पनाधिष्ठानस्याकल्पितत्वेन वस्तुत्वप्रसाधनपरतया व्याक
रोति। तथेति। नन्वात्मनः सदात्मनो विशेषेषु विनाशिषु तदुपरक्तस्य विनाशः स्यादित्याशंक्य विशिष्टनाशोऽपि स्वरूपानाशस्यो
॥ क्तत्वान्मैवमित्याह। सर्वत्रेति॥ ५॥

ननु कदाचिदसदेव पुनः सत्वमापद्यते प्रागसतो घटस्य जन्मना सत्वाभ्युपगमात् सच्च कदाचिदसत्वं प्रतिपद्यते ध्वस्तिकाले सतो घटस्य
पुनर्नाशेनासत्वांगीकारादेवं सदसतोरव्यवस्थितत्वाविशेषादुभयोरपि हेयत्वमादेयत्वं वानुषक्तं स्यादिति तत्राह एवमिति ॥
तुशब्दो दृष्टशब्देन संबध्यमानो दृष्टिमवधारयति । न हि प्रागसतो घटस्य सत्वमसत्वे स्थिते सत्वप्राप्तिविरोधादसत्वनिरस्तिश्च सत्वप्रा॰
प्त्या चेत्प्राप्तमितरेतराश्रयत्वमंतरेणैव सत्वापत्तिमसत्वनिरस्तावसत्वमनवकाशि भवेदनेन सतोऽसत्वापत्तिरपि प्रतिनीतेति भावः ॥
कथं तर्हि सतोऽसत्वमसतश्च सत्वं प्रतिभातीत्याशंक्य तत्त्वदर्शनाऽभावादित्याह । तत्त्वेति । तत्स्वभावस्तत्त्वं न चेतनपरामर्शयोग्यं किं
चिदस्ति प्रकृतं प्रतिनियतमित्याशंक्य वाच दृष्टे । नदृष्टेत्यादिना ॥ ननु सदसतोरन्यथात्वं केचिन्नियच्छन्ते केचित्तु नयोरुक्तनिर्णयमनुस्म

एवमात्मानात्मनोः सदसतोरुभयोरपि दृष्ट उपलब्धोऽन्तो निर्णयः सत्सदेवासदेवेति तु अनयोर्यथोक्तयोस्तत्त्वदर्शिभिः तदिति सर्वना सद ८
म सर्वं च ब्रह्म तस्य नाम तदिति तद्भावस्तत्त्वं ब्रह्मणो याथात्म्यं तद्द्रष्टुं शीलं येषां तेन तत्त्वदर्शिनस्तैस्तत्त्वदर्शिभिस्त्वमपि तत्त्वदर्शिनां
दृष्टिमाश्रित्य शोकं मोहं च हित्वा शीतोष्णादीन् [redacted] नियतरूपाणीदं द्वन्द्वानि विकारोऽयमसन्नेव मरीचिजलवन्मिथ्यावभासत इति
॥ मनसि व्यवसाय[redacted] ॥ किं पुनस्तद्यत्सदेव सर्वदैवेत्युच्यते ।

यच्चनेकिंचित्तु नयोरुक्तनिर्णयमनुसृत्य तथात्वमेवाधिगच्छति तत्र केषां मतमेषितव्यमिति तत्राह ॥ त्वमपीति १६ ननु सदिति सामान्यं स्व
रूपं वा प्रथमे तस्य विशेषसापेक्षतया प्रलयदशायामशेषविशेषविनाशे विनाशः स्यात् । न चेत्तस्मादयो विशेषास्तदापि संतीति वाच्यं
आत्मातिरिक्तानां विशेषाणां कार्यत्वांगीकारात्प्रलयावस्थायामनवस्थानादात्मनस्तु सामान्यात्मनो धर्मित्वादुक्तदोषात् । द्वितीये तु
स्वरूपस्य व्यावर्तनत्वे कस्मिंश्चित्तत्वाद्विनाशित्वमनुवर्तितेन तस्यैव सामान्यतया प्रागुक्तदोषानुषक्तिरिति मन्वानश्चोदयति । किं पु
नरिति । सामान्यविशेषभावशून्यमखंडैकरसं सदेवेत्यादिश्रुतिप्रमितं सर्वक्रियारहितेन वस्तु प्रकृतं सद्विवक्षितमित्युत्तरमाह उ
॥ न्यन इति ॥ ५ ॥

०भा०
गी

आ०भ०
२

आत्मनः सद्रात्मनो विनाशराहित्यविज्ञाने सर्वं । जगद्व्यापकत्वहेतुमाह येनेति । आत्मनो विनाशाभावे युक्तिमाह । विनाशमिति । आत्मनो
विनाशमित्युक्तास्वतो वा परतो वा विनाशस्तस्य व्यनेनाघ इत्याह । अविनाशीति देहादिद्वैतमसदुच्य नेन नः स्वतो विशेषणं स्वतो नाशरा
हित्यं तस्य द्योतको निपात इत्याह । तु शब्द इति । आकांक्षापूर्वकं विशेष्यं दर्शयति । किमित्यादिना विमतमविनाशि व्यापकत्वादाका
शवन्नहि प्रातीतमेवोदाहरणं किंतु प्रसिद्धमपीति भावः । न द्वितीय इत्याह । विनाशमिति । न खल्वात्मनस्य विनाशं कर्तुं कश्चिदर्हती
ति संबंधः । विनाशस्य सावशेषत्वनिरवशेषत्वाभ्यां द्वैराश्यमाश्रित्य व्याकरोति । अदर्शनमभावमिति । न कश्चिदस्याभावं कर्तुं शा

अविनाशि तु तद्विद्धि येन सर्वमिदं ततं । विनाशमव्ययस्यास्य न कश्चित्कर्तुमर्हति १७ अविनाशि न विनष्टुं शीलमस्येति ॥
तु शब्दोऽसतो विशेषणार्थः तद्विद्धि जानीहि । किं येन सर्वमिदं जगत्ततं व्याप्तं सदाख्येन ब्रह्मणा साकाशमाकाशेनेव घटादयो
। विनाशमदर्शनमभावमव्ययस्य नैतत्सदाख्यं ब्रह्म स्वेन रूपेण व्येति निरवयवत्वात् ॥ देहादिवन्नाप्यात्मीयेनात्मीयाभा
वात् यथा देवदत्तो धनहान्या व्येति त्वेवं ब्रह्म व्येत्यतोऽव्ययस्यास्य ब्रह्मणो विनाशं न कश्चित्कर्तुमर्हति न कश्चिदात्मानं
॥ विनाशयितुं शक्नोति ईश्वरोप्यात्मा हि ब्रह्म स्वात्मनि च क्रियाविरोधात् ॥

क्नोमीसत्र हेतुमाह । अव्ययस्येति । ब्रह्म हि स्वरूपेण व्येति स्वसंबंधिना वेति विकल्पं दूषयति । नैतदिति । न हि निरवयवस्य स्वाव
यवापचयरूपः स्वरूपव्ययः संभवतीत्यत्र वैधर्म्यदृष्टांतमाह । देहादिवदिति । द्वितीयं निरस्यति । नापीति । तद्व्यतिरेकदृष्टांतेन स्प
ष्टयति । यथेति द्विधापि व्ययायोगे फलितमाह । अत इति किंच ब्रह्मपरतो न नश्यति आत्मत्वाद्देववदित्याह न कश्चिदिति आत्मत्वहेतो
रसिद्धिमुद्धरति । आत्मा हीति । तादात्म्यस्फूर्तिरन्न हीति हेतुक्रियत्ने । अस्तु तर्हि स्वयमेव ब्रह्म स्वात्मनो नाशकमुद्बंधनादि
दर्शनान्नेत्याह । स्वात्मनीति ॥ १७॥

राम॥
२९॥

सदसतोरंतं नरद्रष्टृतयोः स्वरूपाव्यभिचारित्वेन परमार्थतया सन्निर्द्धारितमिदानीमस्य सन्निर्द्धारविषयापदर्शयति। किं पुनरिति॥ असदसद्देवेति यन्निर्द्धारितत्वात्मस्थस्य निरवकाशत्वमाशंक्य श्रुत्यव्याचष्टे विवक्षितमसन्निर्धारयितुं तस्य सावकाशत्वमाह। यत्त्वात्मेति॥ देहादेरनात्मवर्गस्य प्रकृतासत्त्वदवि[illegible]षयतेत्याह। उच्यत इति। तेषांस्वानंत्यंबुद्धस्येति। नित्यस्येति। आकाशादिव्यावृत्त्यर्थं विशिनष्टि। शारीरिण इति। परिणामिनित्यत्वं व्यवच्छिनत्ति। अनाशिन इति। तस्य प्रत्यक्षाद्यविषयत्वमाह। अप्रमेयस्येति। देहादेरवस्तुतादात्मनश्चैकरूपत्वाद्युद्धस्य धर्मे प्रवर्तस्यापि तव न हिंसादिदोषसंभावनेत्याह। तस्मादिति। ननु देहादिषु सद्बुद्धेरनुवर्तनेस्तस्य।

किं पुनस्तदसद्यत्स्वात्मसत्तां व्यभिचरतीत्युच्यते अंतवंत इमे देहा नित्यस्योक्ताः शारीरिणः॥ अनाशिनोऽप्रमेयस्य तस्माद्युध्यस्व भारत॥
॥१८॥ अंतवंतोऽंतो विनाशो येषां ते अंतवंतो यथा मृगतृष्णिकादौ सद्बुद्धिरनुवृत्ता प्रमाणनिरूपणेन विच्छिद्यते। स तस्यांतस्तथे
मे देहाः स्वप्नवन्मायादेहादिवच्चांतवंतो। नित्यस्य शारीरिणः शरीरवतोऽनाशिनोऽप्रमेयस्यात्मनो अंतवंत इत्युक्ता विवेकिभि
रित्यर्थः। नित्यस्यानाशिन इति न पुनरुक्तं नित्यत्वस्य द्विवि[illegible]त्वात् लोके नाशस्य च यथा देहो भस्मीभूतोऽदर्शनं गतो नष्ट इत्यु
॥ च्यते विद्यमानोपि यथान्यथापरिणतो व्याध्यादिप्रकृतो जातो नष्ट इत्युच्यते॥

विच्छेदाभावात्कथमंतवत्त्वं तेषामित्यते तत्राह। यथेति। तथेमे देहाः सद्बुद्धिभाजोपि प्रमाणतो निरूपणायामवसाने विच्छेदादंतवंतो भवंतीति शेषः॥ देहत्वादिना वजाग्रद्देहादेरंतवत्त्वं संप्रतिपन्नवदनुमातुं शक्यमित्याह। स्वप्नेति। शारीरादेरंतवत्त्वेपि प्रवाहरूपेणात्मनस्तत्संबंधस्यानंतत्वमाशंक्याह। नित्यस्येति। प्रवाहस्य प्रवाहिव्यतिरेकेणानिरूपणात्तन्नदात्मना देहाद्यभावे संबंधसिद्धि
गि०२ रित्यभिसंधायोक्तं विवेकिभिरिति परद्वयस्यैकार्थत्वमाशंक्य निरस्यति। नित्यस्येत्यादिना। नित्यत्वस्य द्वैविध्यसिद्ध्यर्थं नाशद्वैविध्यं प्रतिज्ञातं प्रकटयति। यथेत्यादिना॥ १८॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ०

•आ• नाशस्य निरवशेषत्वेन सावशेषत्वेन च सिद्धे द्वैविध्ये फलितमाह। नत्वेति। विशेषणाभ्यां कूटस्थनित्यत्वमात्मनो विवक्षितमित्यर्थः॥ आ० अ०
अन्यतरविशेषणमात्रोपपादने परिणामिनित्यत्वमात्मनः शंक्येनेत्यनिष्टापत्तिमाह। अन्यथेति। औपनिषदत्वविशेषणमाश्रित्याप्रमे २
यत्वमाक्षिपति॥ नन्वीति॥ इतश्चात्मनो नाप्रमेयत्वमित्याह॥ प्रत्यक्षादिनेति। नेन चागमप्रवृत्त्यपेक्षया पूर्वावस्थायामात्मैव परि
च्छिद्यते तस्मिन्नेवाज्ञाततत्वसंभवादस्यानज्ञापकं प्रमाणमिति न च प्रमाणलक्षणादित्यर्थः। एतदप्रमेयमित्यादिश्रुतिमनुसरन्परिह
रति। नेत्यादिना॥ कथं मानमनपेक्ष्यात्मनः सिद्धत्वमित्याशंक्यानुक्तं विवृणोति सिद्धे हीति। प्रमित्सोः प्रमेयमितिशेषः। न हि वक्ष्य

नेत्रानाशिनो नित्यस्येति द्विविधे नापि नाशेनासंबद्धस्येत्यर्थः अन्यथा पृथिव्यादिवदपि नित्यत्वं स्यादात्मनस्तन्माभूदिति नित्यस्या
नाशिनस्त्वाह अप्रमेयस्य न प्रमेयस्य प्रत्यक्षादिप्रमाणैरपरिच्छेद्यस्येत्येतेन नन्वागमेनात्मापरिच्छिद्यते प्रत्यक्षादिना च पूर्वं। ना आत्मनः॥
त्मनः सिद्धत्वात् सिद्धे ह्यात्मनि प्रमातरि प्रमित्सोः प्रमाणान्वेषणा भवति॥ न हि पूर्वमित्थमहमित्यात्मानं अप्रमाय पश्चात्प्रमे
यपरिच्छेदाय प्रवर्तते न ह्यात्मा नाम कस्यचिदप्रसिद्धो भवति शास्त्रं त्वंतस्य प्रमाणं॥ • ॥ • ॥ • ॥ ॥

((प्रमित्सोः प्रमेयमितिशेषः॥ तिरेकमुखेन विशदयति। नहीति। आत्मनः सर्वलोकप्रसिद्धत्वाच्च तस्मिन्न प्रमाणमन्वेषणीयमित्याह। न ह्या
त्मेति। प्रत्यक्षादेरनात्मविषयत्वात्तत्र चाज्ञाननज्ञानेनुपाव्यवहारे संभवान्नतत्प्रमाणस्य च व्यावहारिकत्वाद्विशिष्टेत स्वरूपावपि के
प वलेतदप्रवर्तनेर्थेपि नात्मनि तत्प्रामाण्यं तथापि तद्वित श्रुत्या शास्त्रस्य तत्र प्रवृत्तिरवश्यंभाविनीत्याशंक्याह। शास्त्रं त्विति॥ शास्त्रेण राम॥
प्रत्यगात्मने ब्रह्मणि प्रतिपादिते प्रमात्रादिविभागस्य व्यावर्तनत्वाद्धक्तमस्याप्यत्वमपौरुषेयतया निर्दोषत्वाच्चागमस्य प्रामाण्यमित्यर्थः २१॥

तथापिकथमस्यप्रत्यगात्मनिप्रामाण्यंनस्यस्वतःसिद्धत्वेनाविषयत्वाद्ज्ञानज्ञापनायोगादित्याशंक्यस्वतोभासमानस्यापिप्रतीचोमनुष्योहंकर्त्ताहमित्यादिनामनुष्यत्वकर्तृत्वादीनामतद्धर्माणामध्यारोपणेनात्मनिप्रतीयमानत्वात्तन्मात्रनिवर्त्तकत्वेनात्मनोविशयत्वमनापाद्यैवशास्त्रंप्रामाण्यंप्रतिपद्यते। सिद्धंतुनिवर्त्तकत्वादितिन्यायादित्याह। अतद्धर्मेति। घटादाविवस्फुरणातिशयजनकत्वेनकिमित्यात्मनिशास्त्रंप्रामाण्यंनेष्टमित्याशंक्यजडत्वाजडत्वाभ्यांविशेषादितिमत्वाह। नत्विति। अस्यात्मनोमानानापेक्षामंतरेणस्वतःस्फुरणेप्रमाणमाह। तथाचेति।।

।। साक्षादन्यापेक्षामंतरेणपरोक्षादपरोक्षस्फुरणात्मकेय।।

अतद्धर्माध्यारोपणमात्रनिवर्त्तकत्वेनप्रमाणत्वमात्मनिप्रतिपद्यते नत्वज्ञातार्थज्ञापकत्वेन तथाचश्रुतिःयत्साक्षादपरोक्षाद्ब्रह्मयआत्मासर्वांतरइतियस्मादेवंनित्योऽविक्रियश्चात्मातस्माद्युध्यस्वयुद्धादुपरमंमाकार्षीरित्यर्थःनह्यत्रयुद्धकर्तव्यताविधीयते युद्धेप्रवृत्तएवत्वसौशोकमोहप्रतिबद्धस्तूष्णीमास्तेतस्यकर्तव्यप्रतिबंधापनयन।।०।।मात्रंभगवताक्रियतेतस्माद्युध्यस्वेत्यनुवादमात्रंनविधिः।।

र्व अस्य। नचतस्यात्मनोर्थांतरत्वंसर्वाभ्यंतरत्वेनसर्ववस्तुसारत्वात्तमात्मानंव्याचष्टेतियोजना। अप्रमेयत्वेनाविनाशित्वंप्रतिपाद्यफलितंनिगमयति। यस्मादिति। स्वधर्मनिवृत्तिहेतुनिषेधेनासर्थ्यंदर्शयति। युध्यस्वेति। आत्मनोनित्यत्वादिस्वरूपमुपपाद्ययुद्धकर्तव्यत्वविधानात्ज्ञानकर्मसमुच्चयोत्रभातीत्याशंक्याह। नहीति। युध्यस्वेतिवचनात्कर्तव्यत्वविधिरस्तीत्याशंक्याह। युद्धइति। कथंतर्हिभीष्ममहमित्याद्यर्जुनस्ययुद्धोपरमपरंवचनमितितत्राह। शोकेति। यदिस्वतोयुद्धेप्रवृत्तिस्तर्हिभगवद्वचनस्यकागतिरित्याशंक्याह। तस्येति। भगवद्वचनस्यप्रतिबंधनिवर्त्तकत्वेसत्यर्जुनप्रवृत्तेःस्वाभाविकत्वेफलितमाह। तस्मादिति।। १८।।

भा०

अविनाशितु तद्विद्धीत्यत्र पूर्वार्धेन तत्पदार्थसमर्थनमुत्तरार्धेन निरीश्वरवादस्य परीणामवादस्य वा निराकरणमात्मनि जन्मादिभ्रांति
भानस्यौपाधिकत्वप्रदर्शनार्थमंतवंत इत्यादिवचनमिति केचित् अस्कनामायमपिपंथाः॥ पूर्वोक्तस्य गीताशास्त्रार्थस्य उत्प्रे
क्षामात्रमूलत्वं निराकर्तुं मंत्रद्वयं भगवानानीनवानिति श्लोकद्वयस्य संगतिं दर्शयति। शोकमोहादीति। तत्र प्रथममंत्रस्य
संगतिमाह। यदिति। प्रत्यक्षनिबंधनत्वादमुष्यानुदेर्मृषात्वमयुक्तमित्याक्षिपति। कथमिति। प्रत्यक्षस्याज्ञानप्रसूतत्वे

आ०अ०
२

शोकमोहादिसंसारकारणनिवृत्त्यर्थं गीताशास्त्रं न प्रवर्तकमित्येतस्यार्थस्य साक्षिभूते ऋचावानिनाय भगवान्॥
यन्मन्यसे घ्नद्वेभीष्मादयो मया हन्यंते ऽहमेव तेषां हंतेत्येषा बुद्धिर्मृषैव ते कथं य एनं वेत्ति हंतारं यश्चैनं मन्यते हतं॥
उभौ तौ न विजानीतो नायं हंति न हन्यते १८ य एनं हि प्रकृतं देहिनं वेत्ति विजानाति हंतारं हननक्रियायाः कर्तारं यश्चै
नमन्यो मन्यते हतं देहहननेन हतोहमिति हननक्रियायाः कर्मभूतं तावुभौ न विजानीतो नैं ज्ञातवंतौ अविवेकेनात्मानं हंता ऽ
हं हतोहमिति देहहननेन आत्मानमहं प्रत्ययविषयं यो विजानीतस्तावात्मस्वरूपानभिज्ञावित्यर्थः यस्मान्नायमात्मा
हंति न हननक्रियायाः कर्ता न च हन्यते न च कर्म भवतीत्यर्थः ऽविक्रियत्वात्॥ कथमविक्रिय आत्मेति द्वितीयो मंत्रः॥०

तेद्

न आभासत्वात्तत्कर्तृताबुद्धिर्न प्रमेति परिहरति य एनमिति। हंता चेन्मन्यते हंतुमित्याद्यामस्य चमर्थतो दर्शयिता व्याचष्टे। य एनं प्रकृत
मिति। हंतारं। हंतारो हतमात्मानं मन्यमाने कथमज्ञानमित्याशंक्याह। हंताहमिति। हंतृत्वादिज्ञानमज्ञानमित्यत्र हेतुमाह।
यस्मादिति। आत्मनो हननं प्रति कर्तृत्वकर्मत्वयोरभावे हेतुं दर्शयति अविक्रियत्वादिति। १९ तदेव साधयितुं न जायते म्रियते
वा विपश्चिदित्यादि मंत्रांतरमवतारयति। कथमिति॥ ५॥ ॥ ॥ ॥ ॥ ॥ ॥

राम॥
॥३०॥

सर्वविक्रियाराहित्यप्रदर्शनेन हेतुं विशदयन्मंत्रमेव पठति। न जायत इति। जन्ममरणाविक्रियाद्वयप्रतिषेधं साधयति। नायमिति। अयमात्मा भूत्वाना
ऽभविता न चाभूत्वा भूयो भवितेति योजना। न केवलं विक्रियाद्वयमेवात्र निषिध्यते किंतु सर्वमेव विक्रियाजातमित्याह। अजयं इति।। वाच्य
मर्थमुक्त्वा विवक्षितमर्थमाह। जनिलक्षणेति विकल्पार्थत्वं वारयति। वाशब्द इति। निष्पन्नमर्थं निर्दिशति नेत्यादिना। संबंधमेवाभिनयति।।
न कदाचिदिति। अंत्यविक्रियाभावे हेतुत्वेन नायमित्यादि व्याचष्टे। यस्मादिति। उक्तमेव व्यनक्ति। यो हीति। आत्मनि तु भूत्वा पुनरभवनाभावा

न जायते म्रियते वा कदाचिन्नायं भूत्वा भविता वा न भूयः अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे ।।२०।। न जा
ने यते नोत्पद्यते जनिलक्षणा वस्तुविक्रिया नात्मनो विद्यत इत्यर्थः तथा न म्रियते वा तत्र वाशब्दश्चार्थे न म्रियते चेत्यंत्या विनाशल
क्षणा विक्रिया प्रतिषिध्यते।। कदाचिच्छब्दः सर्वविक्रियाप्रतिषेधैः संबध्यते। न कदाचिज्जायते न कदाचिन्म्रियत इत्येवं।। ०
यस्मादयमात्मा भूत्वा भवनक्रियामनुभूय पश्चादभविता अभावं गंता न भूयः पुनस्तस्मान्न म्रियते। यो हि भूत्वा न भवति
स म्रियत इत्युच्यते लोके।। वाशब्दान्नशब्दाच्चायमात्माऽभूत्वा भविता वा देहवन्न भूयः पुनस्तस्मान्न जायते।। यो ह्यभूत्वा भवि
ता स जायत इत्युच्यते नैवमात्माऽतो न जायते यस्मादेवं तस्मादजो यस्मान्न म्रियते तस्मान्नित्यश्च ।। ।। ।। ।।

न्नास्ति मृत्युरित्यर्थः।। आत्मनो जन्माभावेऽपि हेतुरिहैव विवक्षित इत्याह। वाशब्दादिति। अभूत्वेति च्छेदः। देहवदिति व्यतिरेकोदाहरणमुक्तमेवा
र्थं साधयति। यो हीति। जन्माभावेन तत्पूर्विकास्तित्वविक्रियापि नात्मनोऽस्तीत्याह। यस्मादिति। प्राणवियोगाद्धात्मणो नाम्रतेरभावे सावशेष
नाशाभाववन्निरवशेषनाशाभावोऽपि सिध्यतीत्याह। यस्मादिति ।।६।। ६ ६ ।।

टी०भा०
१॥

ननुजन्मविनाशयोर्निषेधेतदंतर्गतानांविक्रियांतराणामपिनिषेधसिद्धेस्तन्निषेधार्थंनपृथक्प्रयतितव्यमितितत्राह।यद्यपीति॥तदर्थैर्मध्यव
र्तिविक्रियानिषेधवाचकैरित्तियावत्।आर्थिँपिनिषेधेनिषेधस्यसिद्धतयाशाब्दोनिषेधोनपृथगर्थवानित्याशंक्याह।अनुक्तानामितिनित्य
शब्देनशाश्वतशब्दस्यपौनरुक्त्यंपरिहरन्व्याकरोति।शाश्वतइत्यादिना॥अपक्षयोहिस्वरूपेणवास्याद्गुणापचयतोवेतिविकल्पक्रमेण
दूषयति।नेत्यादिना।पुराणपदस्यागतार्थत्वंकथयति।अपक्षयेति।तदेवस्फुटयते।यो।हीति।नम्रियतेवेत्यनेनचतुर्थपादस्यपौन
रुक्त्यमाशंक्यव्याचष्टे।तथेत्यादिना।ननुहिंसार्थोहंतिरूपनेनतत्कथंविपरिणामोनिषिध्यतेतत्राह॥हंतिरिति॥हिंसार्थत्वे

यद्यप्याद्यंतयोर्विक्रिययोःप्रतिषेधेसर्वाविक्रियाःप्रतिषिद्धाभवंति तथापिमध्यमभाविनीनांविक्रियाणांस्वशब्दैरेवत
दर्थैःप्रतिषेधःकर्तव्यइति।अनुक्तानामपियौवनादिसमस्तविक्रियाणांप्रतिषेधोयथास्यादित्याह।शाश्वतइत्यादि।शाश्वत
इत्यपक्षयलक्षणाविक्रियाप्रतिषिध्यते शाश्वद्भवः शाश्वतोनापक्षीयतेस्वरूपेणनिरवयवत्वान्निर्गुणत्वाच्च।नापिगुण
पैक्षेणापक्षयः॥अपक्षयविपरीतापिवृद्धिलक्षणाविक्रियाप्रतिषिध्यतेपुराणइतियोह्यवयवागमेनउपचीयते
सवर्द्धतेअभिनवइत्युच्यते अयंत्वात्मानिरवयवत्वात्पुरापिनवएवेतिपुराणोनवर्द्धतइत्यर्थः।तथानहन्यते॥
नविपरिणम्यते हन्यमाने।विपरिणाम्यमानेपिशरीरे॥हंतेरत्रविपरिणामार्थोद्रष्टव्योपुनरुक्ततायै।नविपरिणमतइत्यर्थः॥

संभवेत्किमित्यर्थांतरंहंतेरिष्यतेतत्राह।अपुनरुक्ततायाइति।हिंसार्थत्वेमृतिनिषेधेनपौनरुक्त्यंस्यात्तन्निषेधार्थंविपरिणा
मार्थत्वमेष्टव्यमित्यर्थः पूर्वावस्थात्यागेनावस्थांतरापत्तिर्विपरिणामस्तदर्थश्चेदत्रहंतिः।रिष्यतेतदानिष्पन्नमर्थमाह।नेति॥

के

आ०अ०१
ना २

राम॥
३१॥

ग न जायत इत्यादिमंत्रार्थमुपसंहरति। अस्मिन्निति। षड्भावविकाराणामात्मनि प्रतिषेधे फलितमाह। सर्वेति ॥२०॥ आत्मनः सर्वविक्रियाराहित्ये
विक्रिमानमित्याशंक्याह। यस्मादिति। पूर्वश्लोकार्थस्यैवोत्तरत्रापि प्रतिभानात्पौनरुक्त्यमाशंक्य वृत्तानुवादपूर्वकमुत्तरश्लोकमवतारयति
य एनमित्यादिना॥ कर्तृत्वाद्यभिमानविरोधादद्वैतरूपस्यात्मनिश्चयसामर्थ्यात्तत्त्वं विदुषः संन्यासं विद्यापरिपाकार्थमभ्यनुजानाति
वेदेति। पदद्वयस्य पूर्वमेव पौनरुक्त्यपरिहारेऽपि प्रकारान्तरेण पौनरुक्त्यमाह। अविनाशिनमित्यादिना प्रश्नेऽपि संभवति किमिति नञु

सं२ अस्मिन्मंत्रे षड्भावविकारा लौकिकवस्तुविक्रिया आत्मनि प्रतिषिद्धांते। सर्वप्रकारविक्रियारहित आत्मेति वाक्यार्थः। यस्मा
देवं तस्मादुभौ तौ न विजानीत इति पूर्वेण मंत्रेणास्य संबंधः॥ य एनं वेत्ति हंतारं इत्यनेन मंत्रेण हननक्रियायाः कर्ता कर्म च न भवतीति
प्रतिज्ञातं न जायते इत्यनेन अविक्रियत्वं हेतुमुक्त्वा प्रतिज्ञातार्थमुपसंहरति। वेदाविनाशिनं नित्यं य एनमजमव्ययं॥ कथं
स पुरुषः पार्थ कं घातयति हंति कं ॥२१॥ वेद विजानाति। अविनाशिनं अंत्यभावविकाररहितं। नित्यं विपरिणामरहितं। यो वे
देति संबंधः। एनं पूर्वेण मंत्रेणोक्तलक्षणं। अजमव्ययमुपजननापक्षयरहितं। कथं केन प्रकारेण स विद्वान्पुरुषः अभि
हंतीति हंति हननक्रियां करोति। कथं वा घातयति। हंतारं प्रयोजयति न कथंचित्कंचिद्धंति न कथंचित्कंचिद्घातयतीत्युभ
यत्राप्याक्षेप एवार्थः प्रश्नासंभवात्। हेत्वर्थस्याविक्रियत्वस्य तुल्यत्वात् विदुषः सर्वकर्मप्रतिषेध एव प्रकरणार्थोऽभिप्रेतो भ
गवता॥ हंतेस्त्वाक्षेप उदाहरणार्थत्वेन विदुषः किंचित्कर्मासंभवहेतुविशेषं पश्यन्कर्माण्याक्षिपति भगवान्कथं स पुरुष इति॥५

त्वेव व्याख्यायतेन चाह। तुभयत्रेति। उत्तरप्रतिवचनादर्शनाच्चात्र प्रश्नः संभवतीत्यर्थः। विवक्षितं प्रकरणार्थं निगमयति। हेत्वर्थस्येति॥
अविक्रियत्वं हेत्वर्थस्तस्य विदुषः सर्वकर्मनिषेधे समानत्वादितियावत्। यदि विदुषः सर्वकर्मनिषेधोऽभिमतस्तर्हि किमिति हंत्यर्थ एवाक्षिप्यते त
त्राह। हंतेस्त्विति। उक्तं हेतुमाक्षेप्तुं पश्यति। विदुष इति॥५॥ ॥ ॥ ॥ ॥ ॥

अभिप्रायमप्रतिपद्यमानो हेतुविशेषं पूर्वोक्तं स्मारयति। नत्विति।। उक्तमंगीकृत्याक्षिपति। सत्यमिति। विदुषो विज्ञानात्मनो ब्रह्मणएकत्व
र त्वेऽस्य विरुद्धधर्मवत्त्वेन देहेन तु हि नवच्छिन्नत्वाद्विदुषः सर्वकर्मत्यागेनासौ कारणविशेषः स्यादित्याह। अन्यत्वादिति। अविक्रियत्वा
दिति परस्याभेदः। तथापि कूटस्थमविक्रियं ब्रह्म प्रतिपद्यमानस्य कुतो विक्रियासंभवेत् ब्रह्मप्रतिपत्तिविरोधादित्याशंक्याह। नहीति।
अयमात्मा ब्रह्मेत्यादिश्रुत्या समाधत्ते। न विदुष इति।। किंच विद्वत्ता विशिष्टस्य केवलस्य वा। नाद्यः विशिष्टस्य विद्वत्तायां विशेषणस्या
पि तत्र संगात्तच्च विशेषणीभूतसंघातस्याचेतनत्वाद्विद्वत्तानुपपत्तेरित्याह। न देहेति। द्वितीये तु जीवब्रह्मविभागासिद्धिरित्याह। अनुद इति।।
किंचाप्रामाणिकविरुद्धधर्मवत्त्वस्यासिद्धत्वात्प्रातिभासिकस्य च बिंबप्रतिबिंबयोरनैक्यात् द्वैतानुमानायोगाज्जीवब्रह्मणोरभेद

ननूक्तमेव आत्मनोऽविक्रियत्वं सर्वकर्मासंभवे कारणविशेषः। सत्यमुक्तो न तु स कारणविशेषोऽन्यत्वाद्विदुषोऽविक्रियत्वादात्मन इति।। न ह्य
विक्रियं स्वात्मानं विदितवतः कर्म न संभवतीति चेत् न विदुष आत्मत्वात् न देहादिसंघातस्य विद्वत्ता। अतः पारिशेष्यादसंहत आत्मा विद्वानवि
क्रिय इति तस्य विदुषः कर्मासंभवादाक्षेपो युक्तः कथं स पुरुष इति यथा बुद्ध्याहृतस्य शब्दाद्यर्थस्याविक्रिय एव सन् बुद्धिवृत्त्यविवेक धा
विज्ञानेनाविद्ययोपलब्धात्मा कल्प्यते। एवमेवात्मानात्मविवेकविज्ञानेन बुद्धिवृत्त्याऽविद्यया।। ।। ।। ।। ।। ।।

सिद्धिरित्यभिप्रेत्य फलितमाह।। इति तस्येति। नन्वविक्रियब्रह्मस्वरूपतया सर्वकर्मासंभवे विदुषो विद्वत्तापि कथं संभवति। न हि ब्रह्मणोऽविक्रिय
स्याविद्यालक्षणा विक्रियास्वीक्रियामर्हतीति चेत्तत्राह। यथेति। अदृष्टेन्द्रियादिसहकृतमंतःकरणं प्रदीपप्रभावत् विषयपर्यंतं परिणतं बुद्धिरित्युच्य
ते। तत्र प्रतिबिंबितं चैतन्यमभिव्यंजकबुद्धिवृत्त्यविवेकाद्विषयज्ञानमिति व्यवह्रियते तेनात्मोपलब्धा कल्प्यते तेन चाविद्याप्रयुक्तमिथ्यासंबं
धनिबंधनेन तथैवाध्यासिकसंबंधेन ब्रह्मात्मैक्याभिव्यंजकवाक्योत्थबुद्धिवृत्तिद्वारा विद्वानात्मा व्यपदिश्यते तेन च मिथ्यासंबंधेन पारमार्थिका।
।। विक्रियत्वविहतिरस्तीत्यर्थः।। २१।।

अहं ब्रह्मेति बुद्धिवृत्तेर्मोक्षावस्थायामपि भावादात्मनः सविशेषत्वमाशंक्य तस्या यावदुपाधिसत्त्वमेवेत्याह॥ असत्वेति। ननु कूटस्थस्यात्मनो मिथ्यैवाविद्यावत्त्वेपि तस्य कर्माधिकारनिवृत्तौ कस्य कर्माणि विधीयंते। न हि निरधिकाराणां तेषां विधिरित्याशंक्याह। विदुष इति। कर्माण्यविदुषो विहितानीति विशेषमाक्षिपति। न त्विति। कर्मविधानमविदुषो विदुषश्च विद्याविधानमिति विभागे का हानिरित्याशंक्याह। विहितेति। विद्याया विदितत्वं लब्धत्वं। कर्मविधिरविदुषो विदुषो विद्याविधिरिति विभागासंभवे फलितमाह। तत्रेति। धर्मज्ञानानंतरमनुष्ठेयस्य भावाद्ब्रह्मज्ञानोत्तरकालं च तदभावाद्ब्रह्मज्ञानहीनस्यैव कर्मविधिरिति समाधत्ते।

असंसाररूपयैव परमार्थतोऽविक्रिय एवात्मा विद्वानुच्यते विदुषः कर्मासंभववचनात्। यानि कर्माणि शास्त्रेण विधीयंते तान्यविदुषो विहितानीति भगवतो निश्चयोऽवगम्यते ननु विद्याप्यविदुष एव विधीयते। विदितविद्यस्य पिष्टपेषणवत् विद्याविधानानर्थक्यात्। तत्राविदुषः कर्माणि विधीयंते न विदुष इति विशेषो नोपपद्यते। नानुष्ठेयस्य भावाभावविशेषोपपत्तेरग्निहोत्रादिविध्यर्थज्ञानोत्तरकालमग्निहोत्रादिकर्मानेकसाधनोपसंहारपूर्वकमनुष्ठेयं कर्ताहं मम कर्तव्यमित्येवंप्रकारविज्ञानवतोऽविदुषो यथानुष्ठेयं भवति। न तु तथा न जायत इत्याद्यात्मस्वरूपविध्यर्थज्ञानोत्तरकालभावि किंचिदनुष्ठेयं भवतीति किंतु॥

नाऽनुष्ठेयस्येति। विशेषोपपत्तिमेव प्रपंचयति। अग्निहोत्रादीति। ननु देहादिव्यतिरिक्तात्मज्ञानं विना पारलौकिकेषु कर्मसु प्रवृत्तेरनुपपत्तेस्तथाविधज्ञानवता कर्मानुष्ठेयमिति चेत्तत्राह। कर्ताहमिति। आत्मनि कर्तृभोक्तृत्वेव विज्ञानवत्वेपि ब्रह्मज्ञानविहीनत्वेनाविदुषोनुष्ठेयं कर्मेत्यर्थः देहादिव्यतिरेकज्ञानवद्ब्रह्मज्ञानमपि ज्ञानत्वाविशेषात्कर्मप्रवर्तनायोपकरिष्यतीत्याशंक्याह। न त्विति। अनुष्ठेयविरोधित्वादविक्रियात्मज्ञानस्येति शेषः॥ ॥ ॥ ॥ ॥ ॥ ॥

गी॰भा॰।।
टी॰

आ॰अ॰२।।

ननुब्रह्मात्मैकत्वज्ञानादुत्तरकालमपिकर्ताहमित्यादिज्ञानोत्पत्तौकर्मविधिःसावकाशःस्यादितिनेत्याह।नाहमिति।कारणाभावादितिशे
षः।कर्तृत्वादिज्ञानमन्यदित्युक्तं।अनुष्ठानाननुष्ठानयोरुक्तविशेषादविदुषोनुष्ठानंविदुषोनेत्युपसंहरति।इत्येषइति।नन्वात्मविदो
नचेदनुष्ठेयंकिंचिदस्तिकथंतर्हिविद्वान्यजेतेत्यादिशास्त्रात्तंप्रतिकर्माणिविधीयंतेतत्राह।यःपुनरिति।आत्मनिकर्तृत्वादिज्ञाना
पेक्षयाकर्मस्वधिकृतत्वज्ञानेतथाविधंपुरुषंप्रतिकर्माणिविधीयंतेसचप्राचीनवचनादविद्वानेवेतिनिश्चीयतेनखल्वक
र्तृत्वादिज्ञानवतस्तद्विपरीतकर्तृत्वादिज्ञानद्वाराकर्मस्वप्रवृत्तिरित्यर्थः।।कर्मासंभवेज्ञानविरोधेहेत्वंतरमाह।विशेषितस्येति।।

विशेष

नाहंकर्तानभोक्तेत्यादिज्ञानमात्मैकत्वाकर्तृत्वादिविषयंज्ञानादन्यन्नोत्पद्यतेइसेषमुपपद्यते।यःपुनःकर्ताहमितिवेत्त्यात्मानंतस्य
ममेदंकर्तव्यमित्यवश्यंभाविनीबुद्धिःस्यात्।तदपेक्षयासोऽधिक्रियतइतितंप्रतिकर्माणिसंभवंति।सचाविद्वानुभौतौनविजानीत
इतिवचनात्।विशेषितस्यचविदुषःकर्माक्षेपवचनात्कथंसपुरुषइति।तस्माद्विशेषितस्यविदुषोमुमुक्षोश्चसर्वकर्मसं
न्यासएवाधिकारः।अतएवभगवान्नारायणःसांख्यान्विदुषोऽविदुषश्चकर्मिणःप्रविभज्यद्वेनिष्ठेग्राहयति।।ज्ञानयोगे
।। ।। ।। नसांख्यानांकर्मयोगेनयोगिनामिति।।२१।। ।। ।।

वेदाविनाशिनमित्यादिनेतिशेषः।यद्यपिविदुषोनास्तिकर्मतथापिविविदिषोःस्यादित्याशंक्याह।तस्मादिति।विद्ययाविरुद्धत्वादित्यमाश्र
मोक्षप्रतिपक्षत्वाच्चकर्मणामित्यर्थः।यद्यपिमुमुक्षोराश्रमकर्माण्यपेक्षितानितथापिविद्यातत्फलाभ्यामविरुद्धान्येवतान्यभ्युपग
तान्यन्यथाविविदिषासंन्यासविधिविरोधादित्यभिप्रेत्योक्तेर्थेभगवतोनुमतिमाह।।अतएवेति।।विदुषोविविदिषोश्चसंन्यासेधिका
रोविदुषस्तुकर्मणीतिविभागस्येष्टत्वादित्यर्थः।। ।। २१।। ।। ।। ।। ।। ०

वि३

राम।।
२२।।

अधिकारिभेदेन निष्ठाद्वयं भगवता वेदव्यासेनापि दर्शितमित्याह ॥ तथा चेति । अध्ययनविधिना स्वाध्यायपाठे त्रैवर्णिकस्य प्रवृत्त्यनंतरं त च क्रियामार्गो ज्ञानमार्गश्चेति द्वौ मार्गावधिकारिभेदेनावेदितावित्यर्थः ॥ आदिशब्दाद्यत्र वेदाः प्रतिष्ठिता इत्यादि गृह्यते । उक्तयोर्मार्गयोस्तुल्यमानतां परिहर्तुमुदाहरणांतरमाह । तथेति । बुद्धिशुद्धिद्वारा कर्मतत्फलयोर्वैराग्योदयात्पूर्वं कर्ममार्गो विहितः । विरक्तस्य पुनः संन्यासपूर्वको ज्ञानमार्गो दर्शितः सचेतरस्मादतिशयशालीति सूचनमित्यर्थः ॥ उक्ते विभागे पुनरपि वाक्यशेषानुकूल्यमादर्शयति । एतमेवेति ॥ अहंकारविमूढात्मेत्यस्य व्याख्यानमतत्त्वविदिति । नतत्त्ववित्वेति श्लोके भवतार्थतात्पर्यार्थं संगृह्णाति । नाहमिति ॥ पूर्वं साक्रियापदे

तथा च पुरा यथाह भगवान् व्यासो द्वाविमावथ पंथानावित्यादि ॥ तथा क्रियापथश्चैव पुरस्तात्पश्चात् संन्यासश्चेत्येवमेव विभागं पुनः पुनर्दर्शयिष्यति भगवान् । अतत्त्वविदहंकाराविमूढात्मा कर्ताहमिति मन्यते ॥ तत्त्ववित्तु नाहं करोमीति । तथा च सर्वकर्माणि मनसा संन्यस्यास्त इत्यादि ॥ तत्र केचित्पंडितंमन्या वदंति ॥ जन्मादिषड्भावविकाररहितो विक्रियोऽकर्तैकोऽहमात्मेति न कस्यचिज्ज्ञानमुत्पद्यते यस्मिन्सति सर्वकर्मसंन्यासमुपदिश्यते तन्न ॥ न जायत इत्यादिशास्त्रोपदेशानर्थक्यप्रसंगात् ॥ ५ ॥

नेतिशब्दः संबध्यते । विरक्तं त्वमधिकृत्य वाक्यांतरं पठति ॥ तथा चेति । आदिशब्दस्तस्यैव श्लोकस्य शेषसंग्रहार्थः ॥ अविक्रियात्मज्ञानात्कर्मसंन्यासे दर्शिते मीमांसकमनुमुत्थापयति ॥ न चेति ॥ आत्मनो ज्ञानक्रियाशक्त्याधारत्वेनाविक्रियत्वाभावादविक्रियात्मज्ञानं संन्यासकारणीभूतं न संभवतीत्यर्थः ॥ यथोक्तज्ञानाभावो विषयाभावात्प्रमाणाभावाद्वेति विकल्प्याद्यं दूषयति । नेत्यादिना । न तावदविक्रियात्माभावो न जायते म्रियते वेत्यादिशास्त्रस्य आप्तवाक्यतया प्रमाणस्यांतरेण कारणमानर्थक्यायोगादित्यर्थः ॥ ॥ ६ ॥

०भा०
॥

द्वितीयं प्रत्याह। यथा चेति॥ पारलौकिककर्मविधिसामर्थ्यसिद्धं विज्ञानमुदाहरति॥ कर्तुश्चेति॥ कर्मकांडादज्ञाने धर्मादौ विज्ञानोत्पत्तिवत् ज्ञान
कांडादज्ञाने ब्रह्मात्मनि विज्ञानोत्पत्तिरविरुद्धा प्रमाणत्वाविशेषादित्यर्थः॥ ज्ञानस्य मनःसंयोगजन्यत्वादात्मन[illegible]श्च श्रुत्वामनोगोचरत्वनि
रासान्नात्मज्ञाने साधनमस्तीति शंकते॥ करणेति॥ श्रुतिमाश्रित्य परिहरति। नमनसेति नत्वमस्यादिवाक्योत्थमनोवृत्ते च शास्त्राचार्योपदेश
मनुसंस्कृत्य द्रष्टव्यं नत्वमिति श्रूयते स्वरूपेणास्य प्रकाशमपि ब्रह्मात्मवस्तु वाक्योत्थबुद्धिवृत्त्यभिव्यक्तं सविकल्पकव्यवहारालंबनं भवती
ति मनोगोचरत्वोपचारादसिद्धं करणगोचरत्वमित्यर्थः। कथं तर्हि ब्रह्मात्मनो मनोविषयत्वनिषेधश्रुतिरित्याशंक्या संस्कृतमनोव

भा०जे०
२

यथा च शास्त्रोपदेशसामर्थ्यात् धर्माधर्मास्तित्वविज्ञानं कर्तुश्च देहांतरसंबंधविज्ञानमुत्पद्यते। तथा च शास्त्रादस्यैवात्मनोऽवि
क्रियत्वाकर्तृत्वैकत्वादिविज्ञानं कस्मान्नोत्पद्यत इति प्रष्टव्यास्ते। करणागोचरत्वादिति चेन्न मनसैवानुद्रष्टव्यमिति श्रुतेः शास्त्रा
त३ चार्योपदेशजनितशमदमादिसंस्कृतं मनः आत्मदर्शने करणं। तथा च तदधिगमायानुमाने आगमे च सति ज्ञानं नोत्पद्यत इति
साहसमेतत्। ज्ञानं चोत्पद्यमानं तद्विपरीतमज्ञानमवश्यं बाधत इत्यभ्युपगंतव्यं। त९॥ ॥ ॥

स्वविषयत्वविषयेसंतिमन्वानः सन्नाह। शास्त्रेति। सत्स्वपि श्रुत्यादौ तदनुग्राहकाभावान्नास्माकमविक्रियात्मज्ञानमुत्पत्तुमर्हतीत्याशं
क्याह। तथेति। तस्याविक्रियस्यात्मनोऽधिगत्यर्थं विमतो। विकारो नात्मधर्मो विकारत्वादुभया[illegible]मनोविम[illegible]वदित्यनुमाने पूर्वोक्त
श्रुतिस्मृतिरूपागमे च सत्येव नतस्मिन्नोत्पद्यते ज्ञानमिति विवचः साहसमात्रं। सत्येव माने मे[illegible]ये न भवतीति न वदित्यर्थः। ननु
यथोक्तज्ञानमुत्पन्नमपि हानायोपादानाय वा न भवतीति कुतोस्य फलवत्त्वं तत्राह। ज्ञाने चेति। अनर्थमिति प्रकाशप्रवर्तने
स्तमोनिरतिश्यतिरेकेणानुपपत्तिवदात्माज्ञाननिवृत्तिमंतरेणात्मज्ञानोत्पत्तेरनुपपन्नेरित्यर्थः॥ ॥ ॥ ॥

३९॥
राम॥

नन्वज्ञानस्य ज्ञानप्रागभावत्वात् तन्निवृत्तिरेव ज्ञानं न तु निवर्तकमिति तत्राह। नचेति। कथं पुनर्भगवता विज्ञानाभावातिरिक्तम्
ज्ञानं दर्शितमित्याशंक्याह। अत्र चेति। विमतं ज्ञानाभावो न भवति उपादानत्वात् घटादिवदिति भावः॥ ननु हननक्रियायाश्च न हिं
स्यादिति निषिद्धत्वात् कर्तृत्वादेरज्ञानकृतत्वेपि विहितक्रियाकर्तृत्वादेर्न तथात्वमितिनेत्याह। नचेति। न तावदात्मनि कर्तृत्वादि नि
त्यमुक्तिप्रसंगात् नचानित्यमपि निरुपादानं भावकार्यस्योपादाननियमात् नचानात्मोपादानमात्मनि तच्छानिभानात्र त
यात्मैव तदुपादानं कूटस्थस्य तस्याविद्यां विना तद्योगादित्याह। अविक्रियत्वादिति। कर्तृताभावेपि कारयितृत्वं स्यादित्याशंक्या

तत्राज्ञानेन दर्शितं हं नाहं हतोस्मीत्युभौ तौ न विजानीत इत्यत्र चात्मनो हननक्रियायाः कर्तृत्वं कर्मत्वं हेतुकर्तृत्वं चाज्ञानकृतं दर्शि
तं तच्च सर्वक्रियास्वपि समानं कर्तृत्वादेरविद्याकृतत्वमविक्रियत्वादात्मनः॥ विक्रियावान् हि कर्तात्मनः कर्मभूतमन्यं प्र
योजयति कुर्विति॥ तदेतद्विशेषेण विदुषः सर्वक्रियासु कर्तृत्वं हेतुकर्तृत्वं च प्रतिषेधति भगवान् विदुषः कर्माधिकारा
भावप्रदर्शनार्थं वेदाविनाशिनं कथं स पुरुष इत्यादिना॥ कः पुनर्विदुषोधिकार इत्येतदुक्तं पूर्वमेव ज्ञानयोगेन सांख्याना
मिति तथा च सर्वकर्मसंन्यासं वक्ष्यति सर्वकर्माणि मनसा संन्यस्येत्यादिना॥ ५॥ ॥ ५॥ ५॥

ह। विक्रियावानिति॥ आत्मनि कर्तृत्वादिप्रतिभानस्यानाद्यनिर्वाच्यमज्ञानमुपादानं तन्निवृत्तिश्च तत्त्वज्ञानादित्युक्तमिदानीं कर्तृत्व
२ त कारयितृत्वयोरविद्याकृतत्वं भगवतोनुमतं दर्शयति। तदेतदिति। विदुषो यदि कर्माधिकाराभावो भगवतोभिप्रेतस्तर्हि कुतस्य
जीवतोधिकारः स्यादिति पृच्छति। कः पुनरिति। ज्ञाननिष्ठायामित्युक्तं स्मारयति। उक्तमिति। तदङ्गभूते सर्वकर्मसंन्यासे च तस्या त्र
धिकारोस्तीत्याह। तथेति॥ ॥ ५॥
॥५॥०

गी॰भा॰
॥२॥

वक्ष्यमाणेवाक्येसर्वकर्मसंन्यासोनप्रतिभातिमानसानामेवकर्मणांविशेषणवशात्त्यागावगमादितिशंकते॥नत्वितिविशेषणांतर
माश्रित्यदूषयति॥नसर्वेति॥मानसेतिविशेषणान्मानसेष्वेवकर्मसुसर्वशब्दःसंकुचितःस्यादितिशंकतेमानसानामिति॥
सर्वात्मनामनोव्यापारत्यागेव्यापारांतराणामनुपपत्तेःसर्वकर्मसंन्यासःसिध्यतीतिपरिहरति॥नेत्यादिनामानसेष्वपिकर्मसु
संन्यासेसंकोचाद्वागादिव्यापारानुपपत्तिरितिशंकते॥शास्त्रीयाणामिति॥अन्यानीत्यशास्त्रीयवाक्कायकर्मकारणान्यशा
स्त्रीयाणिमानसानितानिचसर्वाणिकर्माणीत्यर्थः॥वाक्यशेषमादायदूषयति॥नैवेति॥नहिविवेकबुध्यासर्वस्यशास्त्रीयाशि

आ॰अ॰
२

ननुमनसेतिवचनात्नवाचिकानांकायिकानांचसंन्यासइतिचेत्।नसर्वकर्माणीतिविशेषितत्वात्॥मानसानामेवसर्वकर्मणामितिचे
त्।मनोव्यापारपूर्वकत्वाद्वाक्कायव्यापाराणांमनोव्यापाराभावेभावानुपपत्तेः॥शास्त्रीयाणांवाक्कायकर्मणांकारणानि
मानसानिमनोव्यापाराणिवर्जयित्वाअन्यानिसर्वकर्माणिमनसासंन्यस्यास्तइतिचेत्न।नैवकुर्वन्नकारयन्नितिविशेषणात्।
सर्वकर्मसंन्यासोयंभगवतोक्तोमुरिष्यतोनजीवतइतिचेत्।नवद्वारेपुरेदेहीआस्तइतिविशेषणानुपपत्तेः।नहिसर्वकर्मसंन्यासे
॥ नमृतस्यतद्देहेआसनंसंभवति॥ ५॥ श्रीगणेशायनमः॥ श्रीरामायनमः॥ ५॥

न

कर्माणिसंन्यस्यतिष्ठतीतियुक्तंनैवकुर्वन्नित्यादितिविशेषणस्यविवेकबुद्धेस्त्यागहेतोस्तत्मत्वादित्यर्थः॥भगवतो
दृष्टिमनसर्वकर्मसंन्यासस्यावस्थाविशेषेसंकोचंदर्शयन्नाशंकते॥मरिष्यतोरितिसंन्यासोजीवदवस्थायामेवात्रविवक्षि
तइत्यत्रलिंगंदर्शयन्नुत्तरमाह॥नवेति॥अनुपपत्तिमेवस्फोरयति॥नहीति॥५॥ श्रीराचंद्रायनमः॥ श्रीरामायनमः॥

रामा॥
३५॥

अन्वयविशेषाव्याख्यानेन लिंगासिद्धिं चोदयति। अकुर्वन्निति। विवेकवशादशेषाण्यपि कर्माणि देहे यथोक्ते निक्षिप्याकुर्वन्नकारयं
श्च विद्वानवतिष्ठते तथा च देहे कर्माणि संन्यस्याकुर्वतोऽकारयतश्च सुखमासनमिति संबंधसंभवाद्विशेषणस्य सति देहे कर्मसा
गविषयत्वाभावाज्जीवतः सर्वकर्मत्यागो नास्तीत्यर्थः। अथवाऽकुर्वन्नित्यादि पूर्वत्रैव संबंधनीयं लिंगासिद्धिचोद्यं तु दे
हे संन्यस्येत्यारभ्येति उन्नेयं आत्मनः सर्वत्राविक्रियत्वनिर्धारणाद्देहसंबंधमंतरेण कर्तृत्वकारयितृत्वप्राप्त्योरप्राप्तप्रतिषेधप्रसंगप
रिहारार्थमस्मदुक्त एव संबंधः साधीयानिति समाधत्ते। न। सर्वत्रेति। श्रुतिस्मृतिषु चेत्यर्थः। किंच संबंधस्याकांक्षासन्निधियोग्यता
१८ धीनत्वादाकांक्षावशाद्देहमिमं न संबंधसिद्धिरित्याह॥ आसनेति॥ अवस्थितस्य संबंधो न सिध्यति ॥आकांक्षाभावादित्याह॥ नद ८

अकुर्वतोऽकारयतश्च देहे संन्यस्येति संबंधो न देह आस्त इति चेन्न। सर्वत्रात्मनोऽविक्रियत्वावधारणादासनक्रियाया
श्चाधिकरणापेक्षत्वात्तदनपेक्षत्वाच्च संन्यासस्य॥ संपूर्वस्तु न्यासशब्दोऽत्र त्यागार्थो न निक्षेपार्थः॥ तस्माद्गीता
शास्त्रे आत्मज्ञानवतः संन्यास एवाधिकारो न कर्मणीति तत्र तत्रोपरिष्टादात्मज्ञानप्रकरणे दर्शयिष्यामः

नपेक्षत्वाच्चेति। संन्यासशब्दस्य निक्षेपार्थत्वात्तस्य चाधिकरणसापेक्षत्वादस्मदिष्टसंबंधसिद्धिरित्याशंक्याह॥ संपूर्वस्त्विति॥ अ
न्यथोपसर्गवैयर्थ्यादित्यर्थः॥ मनसा विवेकविज्ञानेन सर्वाणि कर्माणि परित्यज्यास्ते देहे विद्वानित्यस्यैव संबंधस्य साधुत्वं मत्वो
पसंहरति॥ तस्मादिति॥ सर्वव्यापारोपरमात्मनः सर्वकर्मसंन्यासस्याविक्रियात्मज्ञानाविरोधित्वात्तस्योक्तज्ञानवतो
वैधे संन्यासेऽधिकारः॥ सम्यगभ्युपेत्योक्तेऽर्थे वाक्यशेषानुगुण्यं दर्शयति तत्र तत्रेति २१॥
४ ज्ञानवतस्तु वैधे स्वाभाविके फलात्मेनीति विभागे × ॥ ॥ ॥ ॥

आत्मनोऽविक्रियत्वेन कर्मासंभवं प्रतिपाद्य अविक्रियत्वहेतुसमर्थनार्थमेवोत्तरग्रंथमवतारयति॥ प्रकृतं त्विति किं तत्प्रकृतमिति शंकमानं प्रत्याह। तत्रेति॥ अविनाशित्वमित्युपलक्षणमविक्रियत्वमित्यर्थः। तदेव दृष्टांतेन स्पष्टयितुमुत्तरश्लोकमुत्थापयति॥ तदित्या
दिना॥ आत्मनः स्वतो विक्रियाभावेपि पुरातनदेहत्यागेन नूतनदेहोपादाने च विक्रियावत्वध्रौव्यादविक्रियत्वमसिद्धमिति चेन्नेत्याह॥
वासांसीति॥ शरीराणि जीर्णानि वयोहानिं गतानि त्वग्वलीपलितादिसंगतानीत्यर्थः॥ वाससां पुरातनानां परित्यागेन नवीनोपा

प्रकृतं तु वक्ष्यामः॥ तत्रात्मनोऽविनाशित्वं प्रतिज्ञातं। तत्कथमिवेत्युच्यते॥ वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि॥
तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही॥२२॥ वासांसि वस्त्राणि जीर्णानि दुर्बलतां गतानि यथा लोके वि
हाय परित्यज्य नूतनं वा[illegible]सि नवानि गृह्णाति उपादत्ते॥ नरः पुरुषोऽपराण्यन्यानि तथा तद्वद्देवशरीराणि विहाय जीर्णान्यन्यानि संयाति
संगच्छति नवानि देही आत्मा पुरुषवदविक्रिय एवेत्यर्थः। कस्मादविक्रिय एवेत्यत आह। नैनं छिंदंति शस्त्राणि नैनं दहति पाव
कः॥ न चैनं क्लेदयंत्यापो न शोषयति मारुतः॥२३॥ नैनं प्रकृतं देहिनं छिंदंति शस्त्राणि निरवयवत्वान्नावयवविभागं
कुर्वंति शस्त्राण्यस्यादीनि॥ तथा नैनं दहति पावकोऽग्निरपि न भस्मीकरोति। तथा नैनं क्लेदयंत्यापोऽपां हि सावयवस्य वस्तु
न[illegible]आर्द्रीभावकरणेनावयवविश्लेषापादने सामर्थ्यं। तन्न निरवयव आत्मनि संभवति॥ तथा स्नेहवद्द्रव्यं स्नेहशोषणेन नाश
यति॥ वायुरेवं एनं त्वात्मानं न शोषयति मारुतोऽपि॥ ५॥ ॥ ५॥ ५॥ ॥५॥

दानेत्यागोपादानकर्तृभिन्नलौकिकपुरुषस्याऽविकारित्वेनैकरूपत्ववदात्मनो देहत्यागादानयोरविरुद्धमविक्रियत्वमिति वाक्या
र्थमाह॥ पुरुषवदिति॥२१॥ पृथिव्यादिभूतचतुष्टयप्रयुक्तविक्रियाभावात्कथमात्मनोऽसिद्धमविक्रियत्वमिति शंकते॥
कस्मादिति॥ यतो न भूतान्यात्मानं गोचरयितुमर्हंत्यतो यत्कमाकाशवत्तस्याविक्रियत्वमित्याह। आहेत्यादिना॥२२॥ ५॥

पृथिव्यामंदिरन्तप्रयुक्तच्छेदनाद्यर्थक्रियाभावे योग्यताऽभावं कारणमाह। यत इति पूर्वार्द्धमुत्तरार्द्धहेतुत्वेन योजयन्ति। यथांस्मा
दिति। नित्यत्वादीनामन्योन्यहेतुहेतुमद्भावं सूचयति। नित्यत्वादित्यादिना॥ न च नित्यत्वं परमाणुषु व्यभिचारादसाधकं सर्वगतत्व
स्येति वाच्यं॥ तेषामेवाप्रामाणिकत्वेन व्यभिचाराभावात्॥ न च सर्वगतत्वेपि विक्रियाशक्तिमत्वमात्मनोस्तीति युक्तं विभुत्वे
नाभिमतेन नभसि तदनुपलंभात्तत्र च विक्रियाशक्तिमत्वे स्थैर्यमास्थातुंशक्यं। तथाविधस्य महदादेरस्थिरत्वदर्शनादित्याश
नाशा येनाह। स्थिरत्वादिति। स्वतो नित्यत्वेपि कारणैर्बाधसंभवादुत्पा।ण।त्पत्तिर्योरसंभावितेति कुतश्चिरंतनत्वमित्याशंक्याह॥

यत एवं तस्मात्॥ अच्छेद्योयमदाह्योयमक्लेद्योशोष्य एव च॥ नित्यः सर्वगतः स्थाणुरचलोयं सनातनः॥ २४॥ यस्माद
न्योन्यनाशहेतूनि भूतानि एनं आत्मानं नाशयितुं नोत्सहंते यतः॥ तस्मान्नित्यो नित्यत्वात् सर्वगतः सर्वगतत्वात्॥
स्थै स्थाणुः स्थाणुरिव स्थिर[illegible]। स्थिरत्वादचलोऽयमात्माऽतः सनातनश्चिरंतनो न कारणात्कुतश्चिन्निष्पन्नोऽभिन
व इत्यर्थः। नैतेषां श्लोकानां पौनरुक्त्यं चोदनीयं। यत एकेनैव श्लोकेनात्मनो नित्यत्वमविक्रियत्वं चोक्तं न जायते
म्रियते वेत्यादिना॥ तत्र यदेवात्मविषयं किंचिदुच्यते॥ तदेतस्मात्श्लोकार्थान्नातिरिच्यते॥ २५॥ ॥ ०

ह। न कारणादिति २४ आत्मनोऽविक्रियत्वस्य न जायते म्रियते वेत्यादिना साधितत्वात्तस्यैव पुनः पुनरभिधाने पुनरुक्तिरित्या
शंक्याह॥ नैतेषामिति॥ अनाशंकनीयस्य बो[illegible]धस्य प्रसंगं दर्शयति। यत इति अन्तोवेत्ताविनाशिनामित्यादौ शंक्यते पौनरुक्त्यमिति
शेषः॥ कथं पुनरत्र पौनरुक्त्याशंकासमुन्मिषतीति तत्राह। नत्रेति॥ वेदाविनाशिनमित्यादिश्लोकः॥ सत्यम्यापरामृश्यते॥ श्लो
॥ ॥ ॥ कशब्देन न जायते म्रियते वेत्यादिरुच्यते॥ २५॥ ॥ ॥ ॥

गी॰भा॰

नन्विह श्लोके जन्ममरणाद्यभावोभिलप्यते वेदेस्मादौ पुनरपक्षयाद्यभावो विवक्ष्यते नेनत्र कथमर्थातिरेकाभावमादाय पौनरुक्त्यं चोद्यते तत्
त्राह ।। किंचिदिति ।। कथं तर्हि पौनरुक्त्यं न चोदनीयमिति मन्यसे तत्राह । दुर्बोधत्वादिति ।। पुनः पुनर्द्विधा भेदेन वस्तु निरूपयतो भगव
तोऽभिप्रायमाह । कश्चिदिति ।। त्वंपदार्थपरिशोधनस्य प्रकृतत्वात्तत्रैव हेतंतरमाह ।। किंचेति आत्मनो नित्यत्वादिलक्षणस्यन्यथै
व प्रथा । किमिति न भवतीत्यत्राह ।। अव्यक्त इति ।। मा तर्हि प्रत्यक्षत्वं भूदनुमेयत्वं तु नस्यात्किं नस्यादित्याशंक्याह । अतएवेति ।।

आ॰अ॰
२

ता २

किंचिच्छब्दतः पुनरुक्तं किंचिदर्थतइति ।। दुर्बोधत्वादात्मवस्तुनः पुनः पुनः प्रसंगमायाद्यापायशब्दांतरेण तदेव वस्तु निरूपय
ति भगवान्वासुदेवः ।। कथं नु नाम संसारिणामसंसारित्वं बुद्धिगोचरमापन्नं सत्अव्यक्तनत्वं संसारनिवृत्तये स्यादिति किंच ।
अव्यक्तोयमचिंत्योयमविकार्योयमुच्यते । तस्मादेवं विदित्वैनं नानुशोचितुमर्हसि ।। २५ ।। अव्यक्तः सर्वकरणाविषयत्वा
न्नव्यज्यत इत्यव्यक्तोयमात्मा ।। अतएवाचिंत्योऽयं यद्धींद्रियगोचरं वस्तु तच्चिंताविषयमापद्यते ।। अयं त्वात्मा अनिंद्रिय
गोचरत्वात् अचिंत्योऽविकार्योयं यथा क्षीरं दध्यातंचनादिना विकारि [illegible] न तथायमात्मा निरवयव ।। ।। ।।
।। त्वाच्चाविक्रियो । नहि निरवयवं किंचित् विक्रियात्मकं दृष्टं ।। ५ ।। ।। ५ ।। ५

ता ८

अपमामा २

तदेव प्रपंचयति । यद्धीति । अतींद्रियत्वेपि सामान्यतोदृष्टविषयत्वं भविष्यतीत्याशंक्य कुटस्थेनात्मना व्याप्तिलिंगाभावान्मैवमित्याह ।
अविकार्य इति । अविकार्यत्वे व्यतिरेकदृष्टांतमाह । यथेति ।। किंचात्मा न विक्रियते निरवयवद्रव्यत्वाद्घटवदिति व्यतिरेक्यनुमान
माह ।। निरवयवत्वाच्चेति ।। निरवयवत्वेपि विक्रियावत्त्वे का क्षतिरित्याशंक्याह । नहीति ।। सावयवस्यैव विक्रियावत्त्वदर्शनाद्विक्रि
यावत्त्वे निरवयवत्वानुपपत्तिरित्यर्थः ।।

रा मा ।।
३(७)।।

यद्धिसावयवंसक्रियंक्षीरादितद्दध्यादिनाविकार्यतामापद्यते।नचात्मनःश्रुतिप्रमितनिरवयवत्वस्यसावयवत्वमतोऽविक्रियत्वान्नायंविका
र्योभवितुमर्हतीतिफलितमाह।अविक्रियत्वादिति॥आत्मयाथात्म्योपदेशमशोच्यानन्वशोचस्त्वमित्युपक्रम्यव्याख्यातमुपसंहरति।
तस्मादिति।अव्यक्तत्वाचिंत्यत्वाविकार्यत्वनित्यत्वसर्वगतत्वादिरूपोयस्मादात्मा।निर्धारितस्तस्मात्तथैवज्ञातुमुचितस्तज्ज्ञानस्यफलव
त्वादित्यर्थः।प्रतिषेध्यमनुशोकमेवाभिनयति।हंतनाहमिति॥२५॥आत्मनोनित्यत्वस्यप्रागेवासिद्धत्वादुक्तःश्लोकानुपपत्तिरित्या त
शंक्याह।आत्मन्नरति॥अनित्यत्वमितिद्वेहः।शाक्यानांलोकायतानांवामतमिदमापरामृश्यते॥श्रोतुरर्जुनस्यपूर्वोक्तमात्म

अविक्रियत्वादविकार्योयमात्मोच्यतेतस्मादेवंयथोक्तप्रकारेणैनमात्मानंविदित्वात्वंनानुशोचितुमर्हसि॥
हंतनाहमेतेषांमयेमेहन्यंतइति॥आत्मनोऽनित्यत्वमभ्युपगम्येदमुच्यते॥अथचैनंनित्यजातंनित्यंवामन्य
सेमृतं॥तथापित्वंमहाबाहोनैनंशोचितुमर्हसि॥२६॥अथचेत्यभ्युपगमार्थे॥एनंप्रकृतमात्मानंनित्य
जातंलोकप्रसिद्ध्याप्रत्यनेकशरीरोत्पत्तिंजातोजातइतिनित्यंमन्यसे॥तथाप्रतितनुंप्रतिविनाशंनित्यंवामन्यसेमृ त
तंमृतोमृतइति॥तथापितथाभाविन्यप्यात्मनित्वंमहाबाहोनैनंशोचितुमर्हसि॥ ५ ॥ ५ ॥

याथात्म्यंश्रुत्वापितस्मिन्निर्धारणासिद्धेर्द्वयोर्मतयोरनुत्तरमताभ्युपगमः॥शंकितःतदर्थोनिपातद्वयप्रयोगरस्याह।अथचेति
प्रकृतस्यात्मनोनित्यत्वादिलक्षणस्यपुनःपुनर्ज्ञानत्वाभिमानोमानाभावादसंभवीत्याशंक्याह।लोकेति।नित्यज्ञानत्वाभि
निवेशपौनःपुन्येनमरणत्वाभिनिवेशोव्याहतःस्यादित्याशंक्याह॥तथैः।परकीयमतमनुभाषितमभ्युपेत्याहोबतमहत्पा ति
पंकर्तुंव्यवसितावयमित्यादेस्त्वदीयश्लोकस्यनिरवकाशत्वमित्याह॥तथापीति॥ ५॥ ५ ॥ ॥ ॥ ॥

एवमित्यर्जुनस्य दृश्यमानमनुशोकप्रकारं दर्शयित्वा तस्य कर्तुमयोग्यत्वे हेतुमाह ॥ जन्मवत इति । जन्मवतो नाशो नाशवतश्च जन्मेत्येतौ
तावश्यंभाविनौ मिथो व्याप्ताविति योजना ॥ २६ ॥ तयोरवश्यंभावित्वेऽस्यानुशोकस्याकर्तव्यत्वे हेतुं तत्र माह । तथा चेति ॥ २७ ॥ आत्मा
नमुद्दिश्यानुशोकस्य कर्तुमयोग्यत्वेऽपि भूतसंघातात्मकानि भूतान्युद्दिश्य तस्य कर्तव्यत्वमाशंक्याह । कार्येति । समनंतरश्लोकस्य त्वं०

जन्मवतो जन्मनाशवतो जन्मनाशश्चावश्यंभाविनाविति । तथा च सति यस्मात् ॥ जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च ॥ तस्मा
दपरिहार्येऽर्थे न त्वं शोचितुमर्हसि ॥ २७ ॥ जातस्य हि लब्धजन्मनो ध्रुवोऽव्यभिचारी मृत्युर्मरणं ध्रुवं जन्म मृतस्य च ॥ तस्मादप
रिहार्योऽयं जन्ममरणलक्षणोऽर्थः तस्मिन्नपरिहार्येऽर्थे न त्वं शोचितुमर्हसि जातस्य जन्मवतो नाशवतो जन्मेसौ स्वाभाविकत्वादप
रीहार्यदेन तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि ॥ कार्यकरणसंघातात्मकान्यपि भूतान्युद्दिश्य शोको न युक्तः कर्तुं यतः ॥ ०
अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत ॥ अव्यक्तनिधनान्येव तत्र का परिदेवना ॥ २८ ॥ अव्यक्तादीन्यव्यक्तमदर्श
नमनुपलब्धिरादिर्येषां पुत्रमित्रादिकार्यकारणसंघातात्मकानां तान्यव्यक्तादीनि भूतानि प्रागुत्पत्तेरुत्पन्नानि च
प्राग्मरणाद्व्यक्तमध्यान्यव्यक्तनिधनान्येव पुनरव्यक्तमदर्शनं निधनं मरणं येषां तानि अव्यक्तनिधनानि मरणा
दूर्ध्वमप्यव्यक्ततामेव प्रतिपद्यंत इत्यर्थः तथा चोक्तं ॥ अदर्शनादापतितः पुनश्चादर्शनं गतः ॥ नासौ तव न तस्य त्वं वृ
था किं परिदेवना इति ॥ तत्र का परिदेवना को वा प्रलापः ॥

नाशः ६ र्थः ६

हेतुरित्याह । यत इति । चाक्षुषदर्शनमात्रं व्यावर्तयति ॥ अनुपलब्धिरिति । नहि यथोक्तसंघातरूपाणि भूतानि पूर्वमुत्पत्तेरुपलभ्यं
ते तेन तानि तथा व्यपदेशभांजि भवंतीत्यर्थः । किं तन्मध्यं यदेषां व्यक्तमिष्यते तदाह । उत्पन्नानीति । उत्पत्तेरूर्ध्वं मरणाच्च पूर्वं व्याव
हारिकसत्त्वं मध्यमेषां व्यक्तमिति तथोच्यते । जन्मानुसारित्वं विलपस्य युक्तमिति मत्वा तात्पर्यमाह । मरणादिति । उक्तेऽर्थे पौराणि

कस्मिन्नमितात्तथाहि ॥

तत्रेत्यस्यार्थमाह।अदृष्टेति।पूर्वमदृष्टानि संति पुनर्दृष्टानि तान्येव पुनर्नष्टानि तद्देवभ्रांतिविषयतया घटीयंत्रवच्चक्रीभूतेषु शोक
निमित्तस्य प्रलापस्य नावकाशोस्तीत्यर्थः ॥२८॥ अर्जुनं प्रत्युपालंभं दर्शयित्वा प्रकृतस्यात्मनो दुर्विज्ञेयत्वात्तं प्रत्येवोपालंभो न
संभवतीति मन्वानः सन्नाह दुर्विज्ञेय इति। तथा चात्माज्ञाननिमित्तविभ्रमस्य साधारणत्वाद् साधारणोपालंभस्य निरवकाश
तेत्याह। किं त्वामिति। अहंप्रत्ययवेद्यत्वादात्मनो दुर्विज्ञेयत्वमसिद्धमिति शंकते। कथमिति। विशिष्टस्यात्मनोहंप्रत्ययदृष्टत्वे
पि केवलस्य तदभावात् सिद्धं दुर्विज्ञेयत्वमिति श्लोकमवतारयति। आहेति॥ आश्चर्यवदित्याद्येन पादेनात्मविषयदर्शनस्य दुर्लभत्वं

अदृष्टदृष्टप्रनष्टभ्रांतिभूतेष्वित्यर्थः॥ दुर्विज्ञेयोऽयं प्रकृत आत्मा किं त्वामेवैकमुपालंभे साधारणे भ्रांतिनिमित्ते। कथं दुर्वि
ज्ञेय आत्मेत्यत आह। आश्चर्यवत्पश्यति कश्चिदेनमाश्चर्यवद्वदति तथैव चान्यः। आश्चर्यवच्चैनमन्यः शृणोति श्रुत्वाप्येनं वेद
न चैव कश्चित् ॥२९॥ आश्चर्यवदाश्चर्यमदृष्टमद्भुतमकस्माद् दृश्यमानं तेन तुल्यमाश्चर्यवदाश्चर्यमिवैनमात्मानं पश्यति
कश्चिदाश्चर्यवदेव वदति तथैव चान्य आश्चर्यवच्चैनमन्यः शृणोति। श्रुत्वा दृष्ट्वोक्त्वाप्येनं वेद न चैव कश्चित्। अथवा योयं आत्मा
नं पश्यति स आश्चर्यतुल्यो यो वदति यश्च शृणोति॥ सोऽनेकशतसहस्रेषु कश्चिदेव भवत्यतो दुर्बोध आत्मेत्यभिप्रायः॥

दर्शयता द्रष्टुर्दौर्लभ्यमुच्यते॥ द्वितीयेन तद्विषयवदनस्य दुर्लभत्वोक्त्या तदुपदेष्टृतथात्वं कथ्यते॥ तृतीयेन तद्विषयश्रवणस्य दुर्लभ
त्वद्वारा श्रोतुर्विरलत्वं नाविवक्षितं श्रवणदर्शनोक्तीनां भावेपि तद्विषयसाक्षात्कारस्यात्यंतायासलभ्यत्वं चतुर्थेनाभिमतमिति विभा
गः। आत्मगोचरदर्शनादिदुर्लभत्वद्वाराऽदुर्बोधत्वमात्मनः साधयति॥ आश्चर्यवदित्यादिना। संप्रत्यात्मनि द्रष्टृवक्तुःश्रोतुःसा
क्षात्कर्तुश्च दुर्लभत्वाभिधानेन तद्विषयं दुर्बोधत्वं कथयति॥ अथवेति॥ व्याख्यानद्वयेपि फलितमाह। अत इति ॥३१॥ ७९॥७९

०भा०।

श्लोकांतरमुत्थापयति॥ अथेति आत्मनो दुर्ज्ञानत्वप्रदर्शनानंतरमिति यावत् वस्तुवृत्तापेक्षया शोकमोहयोरकर्तव्यत्वं प्रकरणा-
र्थः। देहे वध्यमानेपि देहिनो वध्यत्वाभावे फलितमाह॥ तस्मादिति। हेतुभागं विभजते। सर्वस्येति। फलितं प्रदर्शनपरं श्लोका-
र्थं व्याचष्टे॥ तस्मात्सर्वाणीति ३०॥ श्लोकांतरमवतारयन् तत्कीर्तयति। इहेति। पूर्वश्लोकः सत्सम्प्यर्थः। यस्मा[illegible]मा-
र्थिकं तत्त्वं तदपेक्षायामेव केवलं शोकमोहयोरसंभवो न भवति किंतु स्वधर्ममपि चावेक्ष्येति संबंधः॥ स्वकीयपेक्षात्र धर्ममनुसंधा-

अ० अ०
२

अथेदानीं प्रकरणार्थउपसंह्रियते। देही नित्यमवध्योयं देहे सर्वस्य भारत॥ तस्मात्सर्वाणि भूतानि न त्वं शोचितुमर्हसि ३०
सर्वस्य प्राणिजातस्य देहे वध्यमानेप्ययं देही न वध्यो यस्मात् तस्मात् भीष्मादीनि सर्वाणि भूतानि उद्दिश्य न त्वं शोचितु-
मर्हसि॥ परमार्थतत्त्वापेक्षायां शोको वा मोहो वा न संभवतीत्युक्तं। न केवलं परमार्थतत्त्वापेक्षायामेव किंतु स्वधर्म-
मपि चावेक्ष्य न विकंपितुमर्हसि॥ धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत् क्षत्रियस्य न विद्यते ३१ स्वधर्ममपि स्वो धर्मः स्व-
धर्मः क्षत्रियस्य युद्धं तमप्यवेक्ष्य त्वं न विकंपितुं प्रचलितुं अर्हसि। स्वाभाविकात् धर्मात् आत्मस्वाभाव्यादिमिप्रायः॥ त्य
न२

च

यत्नतश्चलनं परिहर्तव्यमित्यर्थः। यद्धि क्षत्रियस्य धर्मादनपेतं श्रेयःसाधनं तदेवमयानुवर्तितव्य[illegible]नामित्याशंक्याह। धर्म्यादिति॥ जातिप्र-
युक्तं स्वाभाविकं धर्ममेव विशिनष्टि। क्षत्रियस्येति। पुनर्नकारोपादानमन्वयार्थं। प्रचलितुमयोग्यत्वे प्रतियोगिनं दर्शयति॥ स्वाभा-
विकादिति॥ स्वाभाविकत्वमशास्त्रीयत्वमिति शंकां वारयितुं तात्पर्यमाह॥ आत्मेति। आत्मनः। स्वस्यार्जुनस्य स्वाभाव्यं क्षत्रियस्व-
भावप्रयुक्तं वर्णाश्रमोचितं कर्म तस्मादित्यर्थः॥ ॥ ॥ ॥ ॥ ॥ ॥

राम॥
॥३१॥

धर्मार्थं प्रजापरिपालनार्थं च प्रयतमानस्य युद्धादुपरिरंसा श्रद्धातव्यो त्याशंक्याह ॥ तच्चेति ॥ ततोपि श्रेयस्क
रं किंचिदनुष्ठातुं युद्धादुपरितिरुचितेत्याशंक्याह ॥ तस्मादिति ॥ तस्माद्युद्धात्प्रचलनमनुचितमिति शेषः ३१
युद्धस्य गुर्वाद्यनेकप्राणिहिंसात्मकस्याहिंसाशास्त्रविरोधान्नास्तिकर्तव्यतेति शंकते ॥ कुतश्चेति ॥ अग्निषोमीयहिंसावद्युद्ध

तच्च युद्धं पृथिवीजयद्वारेण धर्मार्थं प्रजारक्षणार्थं चेति धर्मादनपेतं परं धर्म्यं तस्मात् धर्म्यात् युद्धात् श्रेयोऽ
न्यत् क्षत्रियस्य न विद्यते ॥ हि यस्मात् कुतश्च युद्धं कर्तव्यमित्युच्यते ॥ यदृच्छया चोपपन्नं स्वर्गद्वारमपावृतं ॥
सुखिनः क्षत्रियाः पार्थ लभन्ते युद्धमीदृशं ३२ यदृच्छया चाप्रार्थितमागतं उपपन्नं स्वर्गद्वारं अपावृतं उद्घा
टितं यत ईदृशं युद्धं लभन्ते क्षत्रियाः हे पार्थ किं न सुखिनस्ते ॥ एवं कर्तव्यता प्राप्तमपि ॥ अथ चेत्त्वमिमं धर्म्यं सं
ग्रामं न करिष्यसि ॥ ततः स्वधर्मं कीर्तिं च हित्वा पापमवाप्स्यसि ॥ ३३ ॥ ॥ ५ ॥ ५ ॥ ॥

मपि क्षत्रियस्य विहितत्वादनुष्ठेयं सामान्यशास्त्रतो विशेषशास्त्रस्य बलीयस्त्वादित्याह । उच्यत इति ॥ तथापि युद्धे प्रवर्तमा
नामैहिकामुष्मिकस्थायिसुखाभावादुपरतिरेव ततो युक्ता प्रतिभातीत्याशंक्याह । यदृच्छयेति । चिरेण चिरतरेण च
कालेन यागाद्यनुष्ठायिनः स्वर्गादिभा ॥ ॥ ॥ ॥ ॥

गी ॥

जोभवंतियुद्ध्यमानास्तुक्षत्रियाबहिर्मुखताविहीनाःसहसैवस्वर्गादिसुखभोक्तारस्तेनतवकर्त्तव्यमेवयुद्धमितिव्या
ख्यानेनस्फुटयति॥यदृच्छयेत्यादिना।इहामुत्रचभाविसुखवतामेवक्षत्रियाणांस्वधर्मभूतयुद्धसिद्धेस्तादर्थ्ये

आ॰ अ॰
२

नोत्थानं।शोकमोहौहित्वाकर्त्तव्यमित्यर्थः ३२ स्वधर्मस्ययुद्धस्यश्रद्धयाकरणेस्वर्गादिमहाफलप्राप्तिंप्रदर्शयित्वातद
करणेप्रत्यवायप्राप्तिंप्रदर्शयन्नुत्तरश्लोकगतार्थशब्दार्थंकथयति॥एवमिति।विहितत्वंफलवत्त्वमित्यनेन
ह
॥ प्रकारेणेत्यर्थः॥

रामा ता
४०

अवयार्थे पुनश्चेदित्यनूद्यते। महादेवादीत्यादिशब्देन महेंद्रादयो गृह्यंते ३३ युद्धाकरणे क्षत्रियस्य प्रत्यवायमामु
ष्मिकमापाद्येति। स्तृणगर्हालक्षणं दीर्घकालभाविनमैहिकमपि प्रत्यवायं प्रतिलंभयन्ति न केवलमिति युद्धेपि मरण
संदेहात्परिहारार्थमकीर्तिरपि सोढव्या आत्मसंरक्षणस्य श्रेयस्करत्वादित्याशंक्याह। धर्मान्येति। मान्यानामकीर्ति

अथ चेत्त्वमिमं धर्म्यं धर्मादनपेतं संग्रामं युद्धं न करिष्यसि चेत्ततस्तदकरणात्स्वधर्मं। कीर्तिं च महादेवादि
समागमनिमित्तां हित्वा केवलं पापमवाप्स्यसि॥ न केवलं स्वधर्मकीर्तित्यागः॥ अकीर्तिं चापि भूतानि कथयिष्य
न्तिते ऽव्ययां॥ संभावितस्य चाकीर्तिर्मरणादतिरिच्यते ३४ अकीर्तिं चापि भूतानि कथयिष्यन्ति ते तवाव्ययां दीर्घका
ति३ लां॥ धर्मात्मा शूर इत्येवमादिभिर्गुणैः संभावितस्य चाकीर्तिर्मरणादतिरिच्यते॥ संभावितस्य चाकीर्तेर्वरं म
रणमित्यर्थः॥ किंच। भयाद्रणादुपरतं मंस्यन्ते त्वां महारथाः॥ येषां च त्वं बहुमतो भूत्वा यास्यसि लाघवं ३५
भयात्कर्णादिभ्यो रणात्युद्धात् उपरतं निवृत्तं मंस्यन्ते चिंतयिष्यंति। न कृपयेति त्वां महारथाः दुर्योधनप्रभृत
यो नैमंस्यन्त इत्याह येषां च त्वं दुर्योधनादीनां बहुमतो बहुभिर्गुणैर्युक्त इत्येवं मतो बहुमतो भूत्वा पुनस्त्वं यास्यसि ला
घवं लघुभावं॥ किंच • ३
भवति मरणादपि दुःसहेति तात्पर्यमाह संभावितस्य चेति ३४ इतश्च त्वया युद्धं कर्तव्यमित्याह।
किंचेति। प्राणिषु कृपया नाहं युद्धं करिष्यामीत्याशंक्याह। भयादिति॥ महारथानेव विशिनष्टि येषां चेति। दुर्योधनादि
भिस्तवोपहास्यतानिरसनार्थं संग्रामे प्रवृत्तिरवश्यं भाविनीत्यर्थः ३५ इति [illegible] त्वं युद्धादुपरममा कार्षीरित्याह किंचेति ॰

ननुभीष्मद्रोणादिवधमयुक्तंकष्टतरंदुःखमसहमानोयुद्धान्निवृत्तःस्वसामर्थ्यनिंदनादिशत्रुकृतंसोढुंशक्ष्यामीत्याशंक्या
हातनइति ३६ नहियुद्धेगुर्वादिवधवशान्मम अस्थानि शत्रुतोनिवृत्तौशत्रुनिंदेतिउभयतःपाशारज्जुरित्याशंक्याह।युद्धेपुनरिति।
जयेपराजयेचलाभध्रौव्याद्युद्धार्थमुत्थानमावश्यकमित्याह।तस्मादिति।नहिपरिशुद्धकुलस्यक्षत्रियस्ययुद्धायोद्युक्तस्यतस्मा

अवाच्यवादांश्चबहून्वदिष्यंतितवाहिताः॥ निंदंतस्तवसामर्थ्यंततोदुःखतरंनुकिं ३६ अवाच्यवादानकथ्यान्
वादांश्चबहूननेकप्रकारान्वदिष्यंतितवाहिताः॥ शत्रवोनिंदंतः।कुत्सयंतःतवत्वदीयंसामर्थ्यं[redacted]
निवातकवचादियुद्धनिमित्तंततस्तस्मान्निंदाप्राप्तेर्दुःखात्दुःखतरंनुकिंनतःकष्टतरंदुःखंनास्तीत्यर्थः॥पक्षद्वयेपुनः
क्रियमाणेकर्णादिभिः॥ हतोवाप्राप्स्यसिस्वर्गंजित्वावाभोक्ष्यसेमहीं॥ तस्मादुत्तिष्ठकौंतेययुद्धायकृतनिश्चयः ३७
हतोवाप्राप्स्यसिस्वर्गंहतःसन्स्वर्गंप्राप्स्यसिजित्वावाकर्णादीन्शत्रून्भोक्ष्यसेमहीं उभयथापितेलाभएवेत्यभिप्रा
यः।यतएवं॥तस्मादुत्तिष्ठकौंतेययुद्धायकृतनिश्चयः॥ जेष्यामिशत्रून्मरिष्यामिवेतिनिश्चयंकृत्वेत्यर्थः॥ननुस्व
धर्मइत्येवंयुध्यमानस्योपदेशमिमंशृणु॥ सुखदुःखेसमेकृत्वालाभालाभौजयाजयौ॥ ततोयुद्धाययुज्यस्वनै
वंपापमवाप्स्यसि ३८ सुखदुःखेसमेतुल्येकृत्वारागद्वेषावकृत्वेत्येतत्

दुपरमःसाधीयानित्याह।कौंतेयेति।जयेपराजयेचसतितदुभयथैवोच्यतेजयादिनियमाभावेपिलाभनियमेफलितमाह।य
तइति।कृतनिश्चयत्वमेवविवृणोति।जेष्यामीति ३७ पापभीरुतयायुद्धायनिश्चयंकृत्वानोत्थातुंशक्नोमीत्याशंक्याह।त
त्रेतियुद्धस्यस्वधर्मत्वेनावश्यकर्तव्यत्वेसतीतिभावः।सुतज्जीवनमरणादिनिमित्तयोःसुखदुःखयोःसमताकरणंकथमितितत्रा
हे।रागद्वेषाविति

लाभः शत्रुकोशादिप्राप्तिरलाभस्तद्विपर्ययः। न्यायेन युद्धेनापरिभूतेन परस्य परिभवे जयस्तद्विपर्ययस्त्वजयस्तयोर्लाभालाभयो
र्जयाजययोश्च समताकरणे समानमेव रागद्वेषावकृत्वेत्येन दर्शयितुं तथेत्युक्तं। यथोक्तोपदेशवशात्परमार्थदर्शनप्रकरणे यु
द्धकर्तव्यतोक्तेः समुच्चयपरत्वं शास्त्रस्य प्राप्तमित्याशंक्याह। एष इति। क्षत्रियस्य तव धर्मभूतयुद्धकर्तव्यतानुवादः प्रसंगा स्यं ३
गतत्वाद्धस्योपदेशस्य नानेन मिषेण समुच्चयसिद्धिरित्यर्थः। ननु स्वधर्ममपि चावेक्ष्येत्यादिश्लोकैर्न्यायावष्टंभेन शोकमो म
हापनयनस्य तात्पर्येणोक्तत्वात्तस्मिन्नुपसंहर्तव्ये किमिति परमार्थदर्शनमुपसंह्रियतेतत्राह। शोकेति। स्वधर्ममपीत्या

तथा लाभालाभौ जयाजयौ च समौ कृत्वा ततो युद्धाय युज्यस्व घटस्व नैवं युद्धं कुर्वन् पापफलमवाप्स्यसि ए
ष उपदेशः प्रासंगिकः ३८ शोकमोहापनयनाय लौकिको न्यायः स्वधर्ममपि चावेक्ष्येत्याद्यैः श्लोकैरुक्तो न
तु तात्पर्येण। परमार्थदर्शनं त्विह प्रकृतं तच्चोक्तमुपसंहरत्येषा तेभिहितेति शास्त्रविषयविभागप्रदर्शनाय।०

दिभिरतीतैः श्लोकैः शोकमोहयोः स्वजनमरणगुर्वादिवधशंकानिमित्तयोः सम्यग्ज्ञानप्रतिबंधकयोरपनयार्थं वर्णा
श्रमकृतधर्ममनुतिष्ठतः स्वर्गादिसिध्यतिनात्पर्येणेति। अन्वयव्यतिरेकात्मको लोकसिद्धो न्यायोपपिदर्शितस्तथा
पि नासौ तात्पर्येणोक्त इत्यर्थः। किं तर्हि तात्पर्येणोक्तं तदाह। परमार्थेति। न त्वेवाहं जातु नासमित्यादि सह्म्यापरामृश्य
ते। उक्तं न जायते म्रियते वेत्यादिनोपपादितमित्यर्थः। उपसंहारप्रयोजनमाह। शास्त्रेति। तस्य वक्तृद्वारा विषयो नि
ष्टाद्वयं तस्य विभक्तस्य तेनैव विभागेन प्रदर्शनार्थं परमार्थदर्शनोपसंहार इत्यर्थः ३८

ननु किमित्यत्र शास्त्रस्य विषयविभागः प्रदर्श्यते उत्तरत्रैव तद्विभागप्रवृत्तिप्रतिपत्त्योः संभवादिति तत्राह। एषेति।
शास्त्रप्रवृत्तेः श्रोतृप्रतिपत्तेश्च सौकर्यार्थमादौ विषयविभागसूचनमित्यर्थः। उपसंहारस्य फलवत्त्वमेवमुक्त्वा तमेवोपसं-
हारमवतारयति एषेति। अत आहेति। परमार्थतत्त्वविषयं ज्ञाननिष्ठामुक्तामुपसंहृत्य वक्ष्यमाणां संगृह्णाति। योगे त्विति।
तामेव बुद्धिं विशिष्टफलवत्त्वेनाभिष्टौति। बुध्येति। तत्रोपसंहारभागे विभजते॥ एषेत्यादिना॥ बुद्धिशब्दस्यान्तःकरणविष-
यत्वं व्यावर्तयति। ज्ञानमिति। तस्य सहकारिनिरपेक्षस्य विशिष्टफलवत्त्वमाचष्टे साक्षादिति। शोकमोहौ रागद्वेषौ कर्तृत्वभो-

इहहि दर्शिते पुनः शास्त्रविषयविभाग उपरिष्टात्ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनामिति निष्ठाद्वयविषयं
शास्त्रं सुखं प्रवर्तिष्यते॥ श्रोतारश्च विषयविभागेन सुखं ग्रहीष्यन्तीत्यत आह॥ एषातेभिहितासांख्ये बुद्धिर्योगे त्विमां
शृणु॥ बुद्ध्या युक्तो यया पार्थ कर्मबंधं प्रहास्यसि ३९ एषा ते तुभ्यमभिहितोक्ता सांख्ये परमार्थवस्तुविवेकविष-
ये बुद्धिः ज्ञानं साक्षात्शोकमोहादिसंसारहेतुदोषनिवृत्तिकारणं। योगे तु तत्प्राप्त्युपाये निःसंगतया द्वंद्वप्रहाणपूर्वक-
मीश्वराराधनार्थे कर्मयोगे कर्मानुष्ठाने समाधियोगे च इमामनंतरमेवोच्यमानां बुद्धिं शृणु तां बुद्धिं स्तौति ७

क्तृत्वमित्यादिरनर्थः संसारस्तस्य हेतुर्दोषः स्वाज्ञानं तस्य निवृत्तौ निरपेक्षं कारणं ज्ञानमज्ञाननिवृत्तौ ज्ञानस्यान्वयव्यतिरे-
कसमधिगतसाधनत्वादित्यर्थः॥ योगे त्विमामित्यादिव्याकुर्वन्योगशब्दस्य प्रकृते चित्तवृत्तिनिरोधविषयत्वं व्यवच्छि-
नत्ति। तत्प्राप्तीति। प्रकृतं मुक्त्युपयुक्तं ज्ञानं तसंदेन परामृश्यते। ज्ञानोदयोपायमेव प्रकटयति निःसंगतयेति ७ फला-
भिसंधिवैधुर्यं निःसंगत्वं॥

बुद्धिस्तुतिप्रयोजनमाह। प्ररोचनार्थमिति। अभिष्टुतादिबुद्धिः श्रद्धानः सन् तदनुष्ठानारम्भमधिकरोतीति तेन स्तुतिरर्थवतीत्यर्थः
कर्मानुष्ठानविषयबुद्ध्या कर्मबंधस्य कुतो निवृत्तिः नहि तत्त्वज्ञानमन्तरेण समूलकर्महानं तदशक्यमित्याशंक्याह। नेहेति
३९ ननु कर्मानुष्ठानस्यानैकान्तिकफलत्वेनाकिंचित्करत्वादनेकानर्थकलुषितत्वेन दोषवत्त्वाच्च योगबुद्धिरपि न श्रेयसीति
तत्राह। किंचेति। अत्रेदं किंचिदुच्यते कर्मानुष्ठानस्यावश्यकत्वे कारणमिति। यावत् कर्मणा सह समाधेरनुष्ठानमशक्यत्वाद
नेकान्तरायसंभवात्तत्फलस्य च साक्षात्कारस्य दीर्घकालाभ्याससाध्यस्यैकस्मिन् जन्मन्यसंभवाद्धी योगभ्रष्टतानर्थे च निय

प्ररोचनार्थं बुद्ध्या यया योगविषयया युक्तो हे पार्थ कर्मबंधं कर्मैव धर्माधर्माख्यं बंधः कर्मबंधस्तं त्वं प्रहास्यसि। श्रवणप्र
सादनिमित्तज्ञानमात्रस्याभिप्रायः॥ किंचान्यत्॥ नेहाभिक्रमनाशोस्ति प्रत्यवायो न विद्यते॥ स्वल्पमप्यस्य धर्मस्य त्रा
यते महतो भयात् ४० नेह मोक्षमार्गे कर्मयोगे ऽभिक्रमनाशोस्ति अभिक्रमणमभिक्रमः॥ प्रारंभः तस्य नाशो नास्ति। य
थाकृष्यादौ योग विषये प्रारंभस्य नानैकान्तिकफलत्वमित्यर्थः किंच। नापि चिकित्सावत्प्रत्यवायो विद्यते॥ ॥ ॥

तेरित्याशंक्याह। नेहेति। प्रतीकत्वेनोपात्तस्य नकारस्य पुनरन्वयानुगुणत्वेन नास्तीत्यनुवादः। यत्तु कर्मानुष्ठानस्यानैका
न्तिकफलत्वेनाकिंचित्करत्वमुक्तं तद्दूषयति। यथेति। कृषिवाणिज्यादिप्रारंभस्यानियतफलसंभावनामात्रोपनीतत्वान्न
तथा कर्मणि वैदिके प्रारंभस्य फलमनिष्पन्नं युज्यते शास्त्रविरोधादित्यर्थः। यत्तु कर्मानेकानर्थकलुषितत्वेन दोषवदनु
ष्ठानमिति तत्राह। किंचेति। इतोपि कर्मानुष्ठानमावश्यकमिति प्रतिज्ञाय हेत्वन्तरमेव स्फुटयति। नापीति। चिकित्साया हि
क्रियमाणायां व्याध्यतिरेको वा रणं वा प्रत्यवायोपि संभाव्यते कर्मपरिपाकस्य दुर्विवेकत्वान्न तथा कर्मानुष्ठाने दोषोस्ति विहि
तत्वादित्यर्थः॥

गी०भा०टी०
४३

संप्रति कर्मानुष्ठानस्य फलं पृच्छति। किं त्विति। उत्तरार्द्धं व्याकुर्वन्विवक्षितं फलं कथयति स्वल्पमपीति। सम्यग्ज्ञानोत्पादनद्वा
रेण रक्षणं विवक्षितं॥ सर्वपापप्रसक्तोऽपि ध्यायन्निमिषमच्युतं। भूयस्तपस्वी भवति पंक्तिपावनपावन इति स्मृतेरित्यर्थः॥
४० ननु बुद्धिद्वयातिरिक्तानि बुध्यंतराण्यपि काणादादिशास्त्रप्रसिद्धानि विद्यंते तथा सति कथं बुद्धिद्वयमेव भगवतोप
दिष्टमिति तत्राह व्यवसायेति। सैवैका प्रमाणभूता बुद्धिरित्याह। व्यवसायात्मिकेति। बुध्यंतराण्यविवेकमूलान्यप्रमाणा
नीत्याह बहुशाखाहीति। व्यवसायात्मिकाया बुद्धेः श्रेयोमार्गप्रवृत्तायाः विवक्षितं फलमाह। इतरेति। प्रकृतबुद्धिद्वयापेक्ष ६५

किं तु भवति। स्वल्पमप्यस्य योगधर्मस्यानुष्ठितं त्रायते रक्षति महतः संसारभयात् जन्मजरादिलक्षणात्॥ येयं
सांख्ये बुद्धिरुक्ता योगे च वक्ष्यमाणलक्षणा सा॥ व्यवसायात्मिका बुद्धिरेकेह कुरुनंदन बहुशाखा ह्यनंताश्च [illegible]
बुद्धयोऽव्यवसायिनां ४१ व्यवसायात्मिका निश्चयस्वभावैकैव बुद्धिरितरविपरीतबुद्धिशाखाभेदस्य बाधिका
सम्यक्प्रमाणजनितत्वादिह श्रेयोमार्गे हे कुरुनंदन याः पुनरितरा बुद्धयो याः शाखाभेदप्रचारवशात् अनंतो २
२ पारोऽनुपरतः संसार॥

पारतरविपरीताश्चाप्रमाणजनिताः स्वकपोलकल्पिताः बुद्धयस्तासां शाखाभेदः संसारहेतुस्त
स्य बाधिकेति यावत्॥ तत्र हेतुः। सम्यगिति। निर्दोषवेदवाक्यसमुत्पन्नत्वादुक्तमुपायोपेयभूतं बुद्धिद्वयं मोक्षासारंपयी १
भ्यां संसारहेतुबाधकमित्यर्थः। उत्तरार्द्धं व्याचष्टे याः पुनरिति। प्रकृतबुद्धिद्वयापेक्षयार्थांतरत्वमितरत्वं तासामनर्थहेतुत्वं राम
दर्शयति। यासामिति। अप्रामाणिकबुद्धीनां प्रसक्तानुप्रसक्त्या जायमानानामतीव बहुशिखीरेणाप्रविशेषाः शाखाभेदास्तेषां ४३
प्रचारः प्रवृत्तिस्तद्वशादित्येतत्। अनंतत्वं सम्यग्ज्ञानमंतरेणानिवृत्तिरहितत्वं॥ अपारत्वं कार्यस्यैव सतो वस्तुभूतकारणवि

अनुपरतत्वं स्फोरयति नित्येति। कथं तर्हि तन्निवृत्त्या पुरुषार्थपरिसमाप्तिरत आह। प्रमाणेति। अन्वयव्यतिरेकाख्येनानु
मानेनागमेन च पदार्थपरिशोधनपरेण परिनिष्पन्ना विकात्मिका या बुद्धिस्तां निमित्तीकृत्य समुत्पन्नसम्यग्बोधानुरोधा
त्तत्कृता विपरीतबुद्धयो व्यावर्तन्ते तेनासुखसंख्यातासु व्याहतासु सतीषु निरालंबनतया संसारोपि स्थातुमशक्नुवन्नुप
रतो भवतीत्यर्थः। याः पुनरितरपक्षे नास्तत्वज्ञानापनोद्याः संसारहेतवस्ता विपरीतबुद्धीरनुक्रामति। ता बुद्धय इति॥ तु
परतो भवतीत्यर्थः ४१ बुद्धीनां वृक्षस्येव बहुनो बहुशाखात्वमत आह। बहुभेदा इत्येतद्धिति। एकैकां बुद्धिं प्रति शाखाभेदो वा

नित्यमनन्तो विस्तीर्णो भवति॥ प्रमाणजनितविवेकबुद्धिनिमित्तवशाच्चोपरतास्वनंतभेदबुद्धिषु संसारोप्युपर
मते॥ ता बुद्धयो बहुशाखावत्यः शाखायासां ता बहुशाखा बहुभेदा इत्येतत् प्रतिशाखाभेदेनत्यनंताश्च बुद्धयः
केषामव्यवसायिनां प्रमाणजनितविवेकबुद्धिरहितानामित्यर्थः॥ येषां व्यवसायात्मिका बुद्धिर्नास्ति ते यामि-
मां पुष्पितां वाचं प्रवदंत्यविपश्चितः। वेदवादरताः पार्थ नान्यदस्तीति वादिनः ४२ यामिमां वक्ष्यमाणां ८

नरविशेषस्तेन बुद्धीनामसंख्यात्वं प्रख्यातमित्याह प्रतिशाखेति। बुद्धीनामानंत्यं प्रसिद्धिप्रद्योतनार्थो हि शब्दः। सम्यग्ज्ञान
वतां यथोक्तबुद्धिभेदमात्रमप्रसिद्धमित्याशंक्य प्रत्याह। केषामित्यादिना ४१ यदि सांख्ययोगरूपेणैव प्रमाणजनिता बु
द्धिस्तर्हि सैव सर्वेषां चित्ते किमिति स्थिरा न भवति तत्राह येषामिति। तेषामिमां वाचं प्रवदंतीति तयापहृतचेतसां कापि
तां कामवशान्निश्चयात्मिका बुद्धिर्न प्रायशः स्थिरा भवतीत्याह। तेषामिति। इमामित्यध्ययनविध्युपात्तत्वेन प्रसिद्धत्वे
कर्मकांडरूपा वाचो। विवक्ष्यते। वक्ष्यमाणत्वं क्रियाविशेषबहुलामित्यादौ ४३ यं किंशुको हि पुष्पशाली शोभमानो नुप्र

मते न तु नरकभोग्यफलभागी लक्ष्यते ७

गी॰व्या॰टी॰
५४

तद्बोधमपि कर्मकाण्डात्मिकां श्रूयमाणरम्यां रमणीयां वाचमुपलभ्य ते साध्यसाधनसंबंधप्रतिभानान्न तेभ्यो निरतिशयफलभागिनो भवन्ति कर्मानुष्ठानफलस्यानित्यत्वादिति मत्वाह। पुष्पितामिति। वाक्यत्वेन लक्ष्यन्ते येवत्वप्रतिभाना इत्यर्थः। न स्फुटा। श्रममर्थाभासत्वादित्याह। वाक्यलक्षणामिति। प्रवक्तॄणां वेदवाक्यतात्पर्यपरिज्ञानाभावं सूचयति। अविपश्चित इति। वेदवादा वेदवाक्यानि तानि च बहूनामर्थवादानां फलानां च साधनानां च विधिविशेषाणां प्रकाशकानि तेषु रतिरासक्तिस्तन्निष्ठत्वं तद्रतत्वमपि तेषां विवेकाभावमित्याह। वेदवादेति। कर्मकाण्डनिष्ठत्वफलं कथयति। नान्यदिति। ईश्वरो मोक्षो वा

पुष्पितां पुष्पित इव वृक्षः शोभमानां श्रूयमाणरमणीयां वाचं वाक्यलक्षणां प्रवदन्ति। के। अविपश्चितः अल्पमेधसो अविवेकिन इत्यर्थः। वेदवादरताः बह्वर्थवादफलसाधनप्रकाशकेषु वेदवाक्येषु रताः। पार्थ नान्यत् स्वर्गपश्वादिफलसाधनेभ्यः कर्मभ्योऽस्तीत्येवंवादिनो वदनशीलाः। ते च॥ कामात्मानः स्वर्गपरा जन्मकर्मफलप्रदां। क्रियाविशेषबहुलां भोगैश्वर्यगतिं प्रति ४२ कामात्मानः कामस्वभावाः कामस्वभावाः कामपरा इत्य

नास्तीत्येवं वदनो नास्तिकाः। ते न सम्यग्ज्ञानवन्तो न भवन्तीत्यर्थः ४२ प्रकृतानामेवानूद्य अविवेकिनो व्यवसायात्मि र्थः ७ कबुद्ध्यभावात्संभवसिद्ध्यर्थं विधान्तरेण विशिनष्टि ते चेति। तेषां संसारपरिवर्तनपरिदर्शनार्थं प्रकृतां वाचमेव विशिनष्टि जन्मेति। ननु पुंसो कामस्वभावत्वमयुक्तं चेतनस्येच्छावतस्तदात्मत्वानुपपत्तेरिति तत्राह॥ कामपरा इति। तत्परत्वं तत्फलार्थित्वेन तत्तदुपायेषु कर्मस्वेव प्रवृत्ततया कर्मसंन्यासपूर्वकात् ज्ञानाद्बहिर्मुखत्वं ८ ८

राम
५४

ननुकर्मनिष्ठानामपिपरमपुरुषार्थापेक्षयामोक्षोपायेज्ञानेभवसाभिमुख्यमिति। नेत्याह। स्वर्गेति। तत्परत्वेंतस्मिन्ने
वासक्ततयाततोतिरिक्तपुरुषार्थस्याहित्सनिश्चयपवत्वेउच्चावचमध्यमदेहप्रभेदग्रहणंजन्मवाचोपयोक्तफलप्रदत्वम
प्रामाणिकयिस्ताशंक्यमन्ननशानद्वारातदुपपत्तिरित्याह। क्रियेति॥ क्रियाणामनुष्ठेयानांयागदानानांविशेषाःदेश
कालाधिकारिप्रयुक्ताःसत्याहीनेकामहत्क्ष्मास्तेखल्वस्यांवाचिमाधुर्येणप्रतिभांती[illegible]त्यर्थः। कथंपभोक्तायावा

स्वर्गपराः स्वर्गः परः पुरुषार्थोयेषांतेस्वर्गपराः स्वर्गप्रधानाः जन्मकर्मफलप्रदंकर्मणः फलंकर्मफलंजन्मै
वकर्मणःफलंजन्मकर्मफलंतत्प्रददातीतिजन्मकर्मफलप्रदांतांवाचंप्रवदंतीत्यनुषज्यते क्रियाविशेष
बहुलां क्रियाणांविशेषाः क्रियाविशेषाः तैर्बहुलायस्यांवाचितांस्वर्गपश्वन्नपुत्राद्यर्थायथावाचाबाहुल्येन
प्रकाश्यंतेभोगैश्वर्यगतिंप्रतिभोगश्चैश्वर्यंचभोगैश्वर्येतयोर्गतिःप्राप्तिर्भोगैश्वर्यगतिस्तांप्रतिसाधन
भूतास्तेक्रियाविशेषास्तद्बहुलांतांवाचंप्रवदंतोमूढाःसंसारेपरिवर्तंतइत्यभिप्रायः॥ तेषांच भोगैश्वर्यप्र
सक्तानांतयापहृतचेतसां॥ व्यवसायात्मिकाबुद्धिःसमाधौनविधीयते ४४ भोगैश्वर्यप्रसक्तानांभोगः
कर्तव्यः ऐश्वर्यंचेतिभोगैश्वर्ययोरेवप्रणयवतांतदात्मभूतानां॥ ॥ ॥

तिक्रियाविशेषाणांबाहुल्येनावस्थानमित्याशंक्यप्रकाश्यत्वेनैसेनहिशरयति। स्वर्गेति। तथापितेषांमोक्षोपायत्वोपपत्तेस्त
न्निष्ठानांमोक्षाभिमुख्यंभविष्यतीत्याह। भोगेति। यथोक्तांवाचमभिवदतांपर्यवसानेदर्शयति। यद्बहुलामिति ४३ ननु
कर्मकांडनिष्ठानांकर्मानुष्ठायिनामपिबुद्धिशुद्धिद्वारेणांतःकरणसाध्यसाधकंनभूतद्बुद्धिद्वयसमुदायसंभवादस्त
तोमोक्षोभविष्यतीत्याह। तेषांचेति। तदात्मभूतानांतयोरेवभोगैश्वर्ययोरात्मकर्तव्यत्वेनाऽरोपितयोरभिनिविष्टचेतसिता
दात्म्याध्यासवतांवहिर्मुखानामित्यर्थः॥

गी॰ भा॰ टी॰
४५

तथापिशास्त्रानुसारिण्याविवेकप्रज्ञयाव्यवसायात्मिकाबुद्धिस्तेषामुदेष्यतीत्याशंक्याहनयेति। ननुसमाधिःसंप्रज्ञाता
संप्रज्ञातभेदेनद्विधोव्यतेनतत्रबुद्धिरूपविधिरसक्तःसन्कथंनिषिध्यतेतत्राह। समाधीयतइति ४४ अविवेकिनामपि
वैराग्याभ्यासवतांविवेकबुद्धिरुदेष्यतीत्याशंक्याह। एवमिति। नहिवेदार्थस्तथाकामात्मतांप्रशास्तेत्याशंक्याह। निस्त्रैगु
ण्यइतिभवेतिपदंनिर्द्वंद्वादिविशेषणेष्वपिप्रत्येकंसंबध्यते। त्रयाणांसत्त्वादिगुणानांगुणापागुणपमिश्रकर्मेनतत्फल

तयाक्रियाविशेषबहुलयावाचाअपहृतचेतसांसांख्याप्यादिनविवेकप्रज्ञानांव्यवसायात्मिकासांख्येयोगेवाबु
द्धिःसमाधौसमाधीयतेअस्मिन्पुरुषोपभोगायसर्वमितिसमाधिरंतःकरणंबुद्धिस्तस्मिन्समाधौनविधीयते
नचभवतीत्यर्थः। एवंविवेकबुद्धिरहितानांतेषांकामात्मनांयत्फलंतदाह॥ त्रैगुण्यविषयावेदानिस्त्रैगुण्यो
भवार्जुन॥ निर्द्वंद्वोनित्यसत्त्वस्थोनिर्योगक्षेमआत्मवान् ४५ त्रैगुण्यविषयास्त्रैगुण्यंसंसारोविषयः
प्रकाशयितव्योयेषांतेवेदास्त्रैगुण्यविषयास्त्वंतुनिस्त्रैगुण्योभवार्जुन। निःकामोभवेत्यर्थः। निर्द्वंद्वःसु
खदुःखहेतूसप्रतिपक्षौपदार्थौद्वंद्वशब्दवाच्यौ। ततोनिर्गतोनिर्द्वंद्वोभवनित्यसत्त्वस्थःसदासत्त्वगुणाश्रि

संबंधलक्षणानांसमाहारस्त्रैगुण्यंत्रिसंगीकृत्यव्याख्यातःसंसारइति। वेदशब्देनात्रकर्मकांडमेवगृह्यतेतेनर ('तोभव ७
भ्यासवतांतदर्थानुष्ठानद्वारासंसारध्रौव्यान्नविवेकावसरोऽस्तीत्यर्थः। नहिसंसारपरिवर्जनार्थेविवेकसिद्धपेकिंकर्त
व्यमित्याशंक्याह। त्वंत्विति। कथंनिस्त्रैगुण्योभवेतिगुणत्रयराहित्यंविधीयतेनित्यसत्त्वस्थोभवेतिवाक्यशेषविरो
धादित्याशंक्याह। निष्कामइति। सप्रतिपक्षत्वंपरस्परविरोधित्वं। पदार्थौशीतोष्णादिलक्षणौ॥ निष्कामत्वेहेत्वन्ति

गेमत्वंशीतोष्णादिसहिष्णुत्वंहेतुमुक्त्वातत्रापिहेत्वपेक्षायांस
दसत्त्वगुणाश्रितत्वंहेतुमाहनित्येति
७

ए
४५

योगक्षेमग्रस्तचेतसो रजस्तमोभ्यामस्पृष्टे सत्त्वे मात्रे समाश्रितत्वमशक्यमित्याशंक्याह तथेति योगक्षेमयोर्जीवनहेतुतया पुरुषार्थ
साधनत्वान्निर्योगक्षेमो भवेत्कुतो विधिरित्याशंक्याह । योगेति । योगक्षेमप्रधानत्वं सर्वस्य स्वाभाविकमिति ततो निर्गमनमशक्यमित्या
शंक्याह । आत्मवानिति । अप्रमादो मनसो विषयपारवश्याभावस्तत्त्वे अथ यथोक्तोपदेशस्य मुमुक्षुविषयत्वात्तत्र तेनैव मुमुक्षुत्वमि
ह विवक्षितमिति नेत्याह । एषइति ४५ ईश्वरार्पणाधिया स्वधर्मानुष्ठानेपि फलकामनाभावाद्वैफल्यं योगमार्गस्येति मन्वानः शं
कते । सर्वेष्विति । कर्ममार्गस्य फलवत्त्वं प्रतिजानीते । उच्यत इति किं तत्फलमित्यपेक्षिते तद्विषयं श्लोकमवतारयति । भूरिवति

तथा निर्योगक्षेमोऽनुपात्तस्योपादानं योगः । उपात्तस्य रक्षणं क्षेमः । योगक्षेमप्रधानस्य श्रेयसि प्रवृत्तिर्दुष्करेत्यतो
निर्योगक्षेमो भवात्मवानप्र[illegible]मत्तश्च भव । एष तवोपदेशः स्वधर्ममनुतिष्ठतः ॥ सर्वेषु वेदोक्तेषु कर्मसु यान्युक्तान्यनंता
नि फलानि तानि नापेक्ष्यंते चेत्किमर्थं तानीश्वरायेत्यनुष्ठीयंत इत्युच्यते ॥ शृणु यावानर्थ उदपाने सर्वतः संप्लु
तोदके ॥ तावान्सर्वेषु वेदेषु ब्राह्मणस्य विजानतः ४६ ॥ ॥ ॥

यथोदपाने कूपादौ परिच्छिन्नोदके स्नानाचमनादिर्योर्थः प्रयोजनं स घटते स तावानपरिच्छिन्ने सर्वतः संप्लुतोदके समुद्रेन्तर्भवति परिच्छि
न्नोदकानामपरिच्छिन्नोदकांशत्वात्तथा सर्वेषु वेदोक्तेषु कर्मसु यावानर्थो विषयविशेषोपरक्तः सुखविशेषो जायते स तावानात्म
विदः स्वरूपभूते सुखेन्तर्भवति परिच्छिन्नानंदानामपरिच्छिन्नानंदांशत्वाभ्युपगमादेतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजी
वंतीति श्रुतेः तथा चापरिच्छिन्नानंदप्राप्तिपर्यवसायिनो योगमार्गस्य नास्ति वैफल्यमित्याह यावानिति ७ ॥ ॥ ॥

गी॰ भा॰ टी॰
५९

नुक्तमर्थमभ्रयोजनया प्रकटयति । यथेति । उदकं पीयतेऽस्मिन्निति व्युत्पत्त्या कूपादिः परिच्छिन्नोदकविषयत्वमुदपानशब्दस्य दर्शयति । कूपेति ॥ कूपादिगतस्याभिधेयस्य समुद्रेंऽतर्भावासंभवात्कथमिदमित्थमित्याशंक्यार्थवादस्य प्रयोजनविषयत्वं व्युत्पादयति । फलमिति । यस्फल्यत्वेन लीयते तत्फलमित्युच्यते तत्कथं तडागादिकृतं स्नानपानादि तथेत्याशंक्य तस्यापीयस्नानाद्योपपत्तेरित्याह । प्रयोजनमिति । तडागादिष्वप्युक्तप्रयोजनस्य समुद्रक्किमिति प्रयोजनमात्रत्वमप्युक्तमस्य सामान्यात्मत्वानुपपत्तेरित्याशंक्याह । तत्रैवेति घटाकाशादेरिव महाकाशे परिच्छिन्नोदककार्यस्यापरिच्छिन्नोदककार्येंऽतर्भावः संभवति न त्वाशाविततरापेक्षाभावादित्यर्थः । सर्वार्थे

त्थी

यथा लोके कूपतडागाद्यनेकस्मिन्नुदपाने परिच्छिन्नोदके यावान्यावत्परिमाणः स्नानपानादिरर्थः फलं प्रयोजनमित्यर्थः स सर्वोऽर्थः सर्वतःसंप्लुतोदके योऽर्थस्तावानेव संपद्यते तत्रांतर्भवतीत्यर्थः । एवं तावांस्तत्परिमाण एव संपद्यते । सर्वेषु वेदेषु वेदोक्तेषु कर्मसु योऽर्थो यत्कर्मफलं सोऽर्थो ब्राह्मणस्य संन्यासिनः परमार्थतत्त्वं विजानतो योऽर्थो यत्तु विज्ञानफलं सर्वतःसंप्लुतोदकस्थानीये । तस्मिंस्तावानेव संपद्यते तत्रैवांतर्भवतीत्यर्थः । यथा कृताय विजितायाधरेयाः संयंत्येवमेनं सर्वं तदभिसमेति यत्किंचित्प्रजाः साधु कुर्वंति यस्तद्वेद यत्स वेद इति श्रुतेः ॥ ॥ ॥

दृष्टांतभूतमेवं व्याख्याय दार्ष्टांतिकमुत्तरार्द्धं व्याकरोति । एवमित्यादिना कर्मसु योऽर्थ इत्यस्यार्थं व्यनक्ति यत्कर्मफलमिति सोऽर्थो विजानतो ब्राह्मणस्य योऽर्थस्तावानेव संपद्यत इति संबंधः । तदेव स्फुटयति । विज्ञानेति । तस्मिन्नंतर्भवतीति शेषः कथं कर्मफलं ज्ञानफलेंऽतर्भवतीत्यत्र प्रमाणमाह सर्वमिति । यत्किमपि प्रजाः साधुकर्म कुर्वंति तत्सर्वं सगुणषोऽभिसमेति प्राप्नोति । यः स्वरूपस्तद्वेद विजानाति यद्वस्तु स रैक्वो वेद तद्वेद्यमिति श्रुतेरर्थः कर्मफलस्य सगुणज्ञानफलेंऽतर्भावः सर्वत्र विद्यायां श्रूयते ॥ ॥ ॥

राम
५९

कथमेतावता निर्गुणा ज्ञानफले कर्मफलानामभावः संभवतीत्याशंक्याह । सर्वेष्विति । तर्हि ज्ञाननिष्ठैव कर्त्तव्या नात्वैतेन कर्मफलस्य लब्धे-
तया कर्मानुष्ठानानपेक्षणादित्याशंक्याह । तस्मादिति । योगमार्गस्य निष्फलत्वाभावस्तच्छब्दार्थः ४६ तर्हि परंपरया पुरुषार्थसाधनं यो-
गमार्गं परित्यज्य साक्षादेव पुरुषार्थकारणमात्मज्ञानं तदर्थमुपदेष्टव्यं तेभ्यो हि स्वरूपतिमनोमरीपक्वि त्याशंक्याह । तवचेति । तर्हि तत्फला-
भिलाषेऽपि स्यादित्याशंक्याह । मा फलेष्विति ॥ एवमेवार्थं प्रपंचयति । मा कर्मेति । फलाभिसंध्यसंभवे कर्माकरणमेव श्रेय इत्याशंक्याह ।

सर्वं कर्माखिलमिति वक्ष्यति च तस्मात्त्वं तु ज्ञाननिष्ठाधिकाराप्राप्तेः कर्मण्यधिकृतेन कूपतडागाद्यर्थस्थानीयमपि कर्म कर्तव्य-
मेव च कर्मण्येवाधिकारस्ते मा फलेषु कदाचन मा कर्मफलहेतुर्भूर्मा ते संगोऽस्त्वकर्मणि ४७ कर्मण्येवाधिकारो न ज्ञाननि-
ष्ठायां तेन यत्र तत्र च कर्म कुर्वतो मा फलेष्वधिकारोऽस्तु कर्मफलतृष्णां मा भूत्कदाचन कस्यांचिदप्यवस्थायामित्यर्थः
यदा कर्मफलतृष्णा ते स्यात्तदा कर्मफलप्राप्तेर्हेतुः स्याः एवं मा कर्मफले माहेतुर्भूः यदा हि कर्मफलतृष्णामं फलत्त
स्मांप्रफल्कः कर्मणि प्रवर्तते तदा कर्मफलस्यैव जन्मनो हेतुर्भवेत् ॥ ॥ ॥

तस्मात्त्वमिति । ज्ञानेऽनधिकारिणोऽपि कर्मत्यागप्रसक्तिं निवारयति । कर्मण्येवेति एवकारार्थमाह । न ज्ञानेति । नहि तत्राब्राह्मणस्यापरिपक्व-
कषायस्य मुमुक्षोरधिकारः स्यादित्यर्थः । फलेस्तर्हि विद्योदुर्वारः स्यादित्याशंक्याह । तवचेति । कर्मण्येवाधिकारे सतीति सम्बन्धार्थः
फलेष्वधिकाराभावं स्फोरयति कर्मेति । कर्मानुष्ठानात्प्रागूर्ध्वं तत्काले चेत्येतत्कदाचनेति विवक्षितमित्याह । कस्यांचिदिति । फलाभि-
संधौ दोषमाह । मेति । एवं कर्मफलतृष्णाद्वारेणेत्यर्थः । कर्मफल[illegible]हेतुत्वं विवृणोति । यदा हीति ७

न हि विफलं लौकिकं शास्त्रीयं कर्म न कर्तव्यमित्याशंकामुद्भाव्य दूषयति। यदीत्यादिना। अकर्मणि ते संगो मास्त्वित्युक्तमेव स्पष्टयति।
अकरण इति ४७ आसक्तिरकरणे न युक्ता चेन्न हि लौकिकं शास्त्रीयं कर्म किमुद्दिश्य कर्तव्यमित्याशंकामनूद्य श्लोकान्तरमवतारयति। य
दीत्यादिना। वक्ष्यमाणां योगबुद्धिमुपतन्निष्ठो भूत्वा कर्माणि लौकिकशास्त्रकाम्यान्यपि विहितत्वादनुतिष्ठेत्याह। योगस्थः सन्निति। कर्मानुष्ठानस्यो
द्देश्यं दर्शयति। केवलमिति। फलान्तरापेक्षामन्तरेणेश्वरार्थं तत्प्रसादनार्थमनुष्ठानमित्यर्थः। नहीश्वरसंतोषोऽभिलाषगोचरीभूतो भ॰वि

यदि कर्मफलं नेष्यते किं कर्मणा दुःखरूपेणेति मानेन तव संगोऽस्त्वकर्मण्यकरणे प्रीतिर्मास्त्वित्याह। यदि कर्मफलं न प्रेक्षेन न कर्तव्यं
व्य कर्म कथं तर्हि कर्तमित्यपेक्ष्यते। योगस्थः कुरु कर्माणि संगं त्यक्त्वा धनंजय। सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते॥ ४८॥ यो
गस्थः सन्कुरु त्वं कर्माणि केवलमीश्वरार्थं तत्रापीश्वरो मे तुष्यत्विति संगं त्यक्त्वा धनंजय फलं तस्माच्छुभमेनं क्रियमाणे कर्मणि
सत्त्वशुद्धिजा ज्ञानप्राप्तिलक्षणा सिद्धिस्तद्विपरीताऽसिद्धिः तयोः सिद्ध्यसिद्ध्योरपि समस्तुल्यो भूत्वा कुरु कर्माणि कोऽसौ योगो यत्र
स्थः कुर्वित्युक्तमिदमेव तत्सिद्ध्यसिद्ध्योः समत्वं योग उच्यते। बुत्तुनः समत्वबुद्धिफलमीश्वराराधनार्थं कर्मैतस्मात्कर्मणः॥ ॥ ॥

ष्यतीत्याह। तत्रापीति। ईश्वरप्रसादनार्थे कर्मानुष्ठाने स्थितेऽपीत्यर्थः। संगं त्यक्त्वा कुर्विति सर्वेणान्वयः। आकांक्षितं परायित्वा सिद्धिश
ब्दार्थमाह। फलेति। तद्विपर्ययजा सत्त्वाशुद्धिजन्मज्ञानाप्राप्तिलक्षणेति यावत्। कर्माण्यनुतिष्ठतो योगमुद्दिश्य शेषणतया प्रकृतमाकां
क्षापूर्वकं प्रकटयति। कोऽसावित्यादिना ४८ किमिति। योगस्थेन न तत्त्वज्ञानमुद्दिश्य कर्म कर्तव्यं फलाभिलाषेणापि तदनुष्ठानस्य
सलभत्वादित्याशंक्य यथोक्तयोगयुक्तं कर्म स्तुवन्ननन्तरश्लोकमुत्थापयति यस्मादिति। एवं कर्मबुद्धिसंबंधविधुरमिति शेष॰७

बुद्धियुक्तस्य बुद्धियोगाधीनं प्रकर्षं सूचयति बुद्धीति । बुद्धिसंबंधासंबंधाभ्यां कर्मणि प्रकर्षनिकर्षयोर्भावे करणीयं नियच्छति । बुद्धाविति ॥ यत्तु फलेच्छयापि कर्मानुष्ठानं स्वकरमिति तत्राह । कृपणा इति निकृष्टं कर्मैव विशिनष्टि । फलार्थिनेति । कस्मान्नियोगिनः सकाशादिदं निकृष्टमित्याशंक्य सप्रतीकमादाय व्याचष्टे । बुद्ध्यादिना । फलाभिलाषेण क्रियमाणस्य कर्मणो निकृष्टत्वे हेतुमाह । जन्मेति । समत्वबुद्धियुक्तात्कर्मणस्तु नैतस्य कर्मणो जन्मादिहेतुत्वेनानिकृष्टत्वं फलितमाह । यत इति योग

दूरेण ह्यवरं कर्म बुद्धियोगाद्धनंजय । बुद्धौ शरणमन्विच्छ कृपणाः फलहेतवः ४९ दूरेणातिविप्रकर्षेणासंतमेव हि अवरं निकृष्टं कर्म फलार्थिना क्रियमाणं बुद्धियोगात् समत्वबुद्धियुक्तात्कर्मणो जन्ममरणादिहेतुत्वात् धनंजय । यत एवं ततो योगविषयायां बुद्धौ तत्परिपाकजायां वा सां[illegible]बुद्धौ शरणमाश्रयमभयप्राप्तिकारणमन्विच्छ प्रार्थयस्व परमार्थज्ञा[illegible]नन्यशरणो भवेत्यर्थः । यतो ह्यवरं कर्म कुर्वाणाः कृपणाः दीनाः फलहेतवः फलतृष्णाप्रयुक्ताः संतः यो वा एतदक्षरं गार्ग्यविदित्वास्माल्लोकात्प्रैति स कृपण इति श्रुतेः ४९

विषया बुद्धिः समत्वबुद्धिः । बुद्धिशब्दस्यार्थांतरमाह । तत्परिपाकेति तच्छब्देन समत्वबुद्धिसमन्वितं कर्म गृह्यते तस्य परिपाकस्तत्फलभूता बुद्धिर्बुद्धिः । शरणशब्दस्य पर्यायं गृहीत्वा विवक्षितमर्थमाह । अभयेति । सप्तमीमविवक्षित्वा द्वितीयां प्रपंचं गृहीत्वा वाक्यार्थमाह । परमार्थेति । तथाविधज्ञानशरणत्वे हेतुमाह यत इति फलहेतुत्वं विशिनष्टीति । फलेति तेन परमार्थज्ञानशरणा नैव युक्तेति शेषः । परमार्थज्ञानबहिर्मुखानां कृपणत्वे श्रुतिं प्रमाणयति । यो वा इति । अस्थूलादिविशेषणमेतदित्युच्यते ४

ति १

ननूक्तसमत्वबुद्धियुक्तस्य स्वधर्मानुष्ठाने प्रवृत्तस्य किं स्यादित्याशंक्याह । समत्वेति । बुद्धियुक्तः स्वधर्माख्यं कर्मानुतिष्ठति विशे-
षं बुद्धियोगस्य फलवत्त्वे फलितमाह । तस्मादिति । पूर्वार्द्धं व्याचष्टे बुद्धीत्यादिना । ननु समत्वबुद्धिमात्रान्न पुण्यपापनिवृत्तिर्युक्ता
परमार्थदर्शनवतस्तन्निवृत्तिसिद्धेरिति तत्राह । सत्वेति । उत्तरार्द्धं व्याचष्टे । तस्मादिति । स्वधर्ममनुतिष्ठतो यथोक्तयोगार्थं किम-
र्थं कर्मणो योजनीयमित्याशंक्याह । योगो हीति । तर्हि यथोक्तयोगसामर्थ्यादेव दर्शितफलसिद्धेरनास्था स्वधर्मानुष्ठाने प्राप्तेत्या-
शंक्याह । स्वधर्माख्येष्विति ॥ ईश्वरार्पितचेतस्तया कर्मसु वर्तमानस्यानुष्ठाननिष्ठस्य या यथोक्ता बुद्धिस्तेषु कौशलमिति योज-

समत्वबुद्धियुक्तः सन स्वधर्ममनुतिष्ठन् यत्फलं प्राप्नोति तत् । शृणु बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते तस्मा-
द्योगाय युज्यस्व योगः कर्मसु कौशलं ५० बुद्धियुक्तः समत्वकर्मविषयया बुद्ध्या युक्तो बुद्धियुक्तो जहाति परित्यजति
इहास्मिन्लोके उभे सुकृतदुष्कृते पुण्यपापे सत्वशुद्धिज्ञानप्राप्तिद्वारेणापत्तीः तस्मात्समत्वबुद्धियोगाय युज्यस्व
घटस्व योगो हि कर्मसु कौशलं स्वधर्माख्येषु कर्मसु प्रवर्तमानस्य या सिद्ध्यसिद्ध्योः समत्वबुद्धिरीश्वरार्पितचेतस्तया
तत्कौशलं कुशलभावस्तद्धि कौशलं यद्बंधस्वभावान्यपि कर्माणि समत्वबुद्ध्या स्वभावान्निवर्त्यंते तस्मात्समत्वबु-
द्धियुक्तो भवत्वं यस्मात

ना । कर्मणां बंधस्वभावत्वान्न तदनुष्ठाने बंधानुबंधः स्यादित्याशंक्य कौशलमेव विशदयति तद्धी-
ति समत्वबुद्धेरेव फलवत्त्वे स्थितं फलितमुपसंहरति । तस्मादिति ५० समत्वबुद्धियुक्तस्य सुकृतदुष्कृततत्फलपरित्यागेपि कथं मो-
क्षः स्यादित्याशंक्याह । यस्मादिति समत्वबुद्ध्या यस्मात्कर्मानुष्ठीयमानं दुरितादिसाजयति तस्मात्तथा सो मुक्तिहेतुरित्यर्थः ॥ ॥ ॥

वा३

कु२

मनीषिणो हि ज्ञानिनो भूत्वैवं बुद्धियुक्ताः सन्तः स्वधर्माख्यं कर्मानुतिष्ठन्तस्ततो जातं फलं देहसहितं हित्वा जन्मलक्षणाद्बन्धाद्विनि
र्मुक्ता वैष्णवं पदं सर्वसंसारसंस्पर्शशून्यं मोक्षाख्यं गच्छन्तीति श्लोकोक्तमर्थं श्लोकाक्षरयोजनया दर्शयति। कर्मजमित्यादिना। इष्टो देहो देवा
दिलक्षणः। निष्टदेहस्तिर्यगादिलक्षणस्ताभ्यां मिश्रैव कर्मणो जातं फलं तद्यथोक्तबुद्धियुक्ता ज्ञानिनो भूत्वा त्यक्त्वा तदुत्थस्वपरिस
्यबंधविनिर्मोकपूर्वकं जीवन्मुक्ताः सन्तो विदेहकैवल्यभाजो भवन्तीत्यर्थः। बुद्धियोगादित्यादौ बुद्धिशब्दस्य समत्वबुद्धिरर्थो

कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः जन्मबंधविनिर्मुक्ताः पदं गच्छन्त्यनामयं ५१ कर्मजं फलं त्यक्त्वेति व्यवहि
तेन संबंधः इष्टानिष्टदेहप्राप्तिः कर्मजं फलं कर्मभ्यो जातं बुद्धियुक्ताः समत्वबुद्धियुक्ताः हि यस्मात्फलं त्यक्त्वा परित्यज्य
मनीषिणो ज्ञानिनो भूत्वा जन्मबंधविनिर्मुक्ता जन्मैव बंधो जन्मबंधस्तेन विनिर्मुक्ताः जीवंत एव जन्मबंधाद्विनिर्मुक्ताः
संतः पदं परमं विष्णोर्मोक्षाख्यं गच्छन्त्यनामयं सर्वोपद्रवरहितमित्यर्थः। अथवा बुद्धियोगाद्धनंजयेत्यारभ्य परमा
र्थदर्शनलक्षणैव सर्वतः संप्लुतोदकस्थानीया कर्मयोगजा सत्वशुद्धिजनिता बुद्धिर्दर्शिता सा साक्षात्सुकृतदुष्कृतप्रहाणा
दिहेतुत्वश्रवणात ७

व्याख्यातः। संप्रति परंपरापरिहृतसुकृतदुष्कृतप्रहाणहेतुत्वस्य समत्वबुद्धावसिद्धेर्बुद्धिशब्द
स्य योगमर्थान्तरं कथयति। अथवेति। अनवच्छिन्नवस्तुगोचरत्वेनानवच्छिन्नत्वं तस्याः सा च यत्नुष्मंतराद्विशेषं दर्शयति। स
र्वत इति। असाधारणं निमित्तं तस्याः निर्दिशति। कर्मेति। यथोक्तबुद्धेर्बुद्धिशब्दार्थत्वे लिंगमाह साक्षादिति। जन्मबंधविनिर्मोकारि
एरित्याद्यर्थः ७

यस्मिन्कर्मणि क्रियमाणे परमार्थदर्शनलक्षणा बुद्धिरुद्देश्यतया उज्झते तस्मात्कर्मणा कौशलमिति तस्कर्मे तथा चोद्देश्यभूतद्रि बु
सत्वे य विशुरमति शपेन न निष्फल्यते। अतश्च परमार्थबुद्धिमुद्देश्यत्वेनाश्रित्य कर्मानुष्ठातव्यं। परिछिन्नफलोनरमुद्दिश्य तदनुष्ठाने का
पेयप्रसंगात् किंच परमार्थबुद्धिमुद्देश्यानुपाश्रित्य कर्मानुतिष्ठन्तः करणशुद्धिद्वारा परमार्थदर्शनसिद्धौ जीवन्नेव देहबन्धना
द्विहित्वा मोक्षमधिगच्छति। तथा च परमार्थदर्शनलक्षणायोगार्थं मनो धारयितव्यं योगशब्दिते द्विपरमार्थदर्शनमुद्देश्यतया
च कार्मस्वनुतिष्ठतो नैपुण्यमिष्यते यद्विवं परमार्थदर्शनमुद्दिश्यतष्कृताः संतः समारभे कर्माणि नद्यातरनुष्ठानजनितनबुद्धि ते

योगानुष्ठानजनितसत्वशुद्धिजा बुद्धिः कदा प्राप्यत इत्युच्यते। यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति॥ तदा गंतासि नि
र्वेदं श्रोतव्यस्य श्रुतस्य च ५२ यदा यस्मिन्काले ते तव मोहकलिलं मोहात्मकं अविवेकरूपं कालुष्यं येनात्मानात्मविवेक
बोधं कलुषीकृत्य विषयं प्रत्यंतःकरणं प्रवर्तते तेन तव बुद्धिर्व्यतितरिष्यति व्यतिक्रमिष्यति शुद्धभावमापत्स्यत इत्यर्थः ७

ण बुद्ध्याज्ञानिभो भूत्वा कर्मजं फलं परित्यज्य निर्मुक्तं बंधनामुक्तिभाजो भवंती त्येवमस्मिन्नपि श्लोके त्रयाणां व्याख्यानव्याप्ति
५१ यथोक्तबुद्धिप्राप्तकाले प्रश्नसर्वकं प्रकल्पति। योगेति। श्रुतं श्रोतव्यं दृष्टं द्रष्टव्यमित्यादि फलाभिलाषप्रवृत्ति बंधात्मको काबु
द्धिहरेष्यती त्याशंक्याह यदेति। विवेकपरिपाकावस्थां कालशब्देनोच्यते कालुष्यस्य शेषपर्यवसायित्वं दर्शयन्विशिनष्टि
येनेति। नरनर्थरूपं कालुष्यं तवेसन्नयार्थेऽनुवचनं॥ ॥ ॥ ॥

बुद्धिशुद्धिफलस्यविवेकस्यप्राप्त्यौवैराग्यप्राप्तिंदर्शयति।तदेति अध्यात्मशास्त्रातिरिक्तंशास्त्रंश्रोतव्यशब्देनगृह्यते।श्रुतंवैरा
ग्यमेवस्फोरयति।श्रोतव्यमिति।यथोक्तविवेकसिद्धौसर्वस्मिन्ननात्मविषयेनैष्फल्यप्रतिभातीत्यर्थः ५२ शुद्धिबुद्धिविवेकवैराग्य बु
सिद्धावपिसर्वोत्कबुद्धिप्राप्तिकालोदर्शितोनभवतीतिशङ्कते।मोहेति॥ मोहन॰ विवेकादियुक्तबुद्धेरात्मनिस्थैर्यावस्थायाम

नश्चतस्मिन्कालेगंतासिप्राप्स्यसिनिर्वेदंवैराग्यंश्रोतव्यस्यश्रुतस्यचतदाश्रोतव्यंश्रुतंचनिःफलंप्रतिपद्यतइत्यभिप्रा
यः॥ मोहकलिलात्मयद्वारेणालब्धात्मविवेकजन्मनः कदाकर्मयोगजेफलेपरमार्थयोगमवाप्स्यतीतितत्रशृणु श्रुति
विप्रतिपन्नातेयदास्थास्यतिनिश्चला समाधावचलाबुद्धिस्तदायोगमवाप्स्यसि ५३ श्रुतिविप्रतिपन्ना अनेक
साध्यसाधनसंबंधप्रकाशनश्रुतिभिः श्रवणैर्विप्रतिपन्नानानाप्रतिपन्नाअध्यात्मशास्त्रातिरिक्तशास्त्रस्यसर्थः' र्थ
श्रुतिविप्रतिपन्नाविक्षिप्तासतीतेनैवबुद्धिर्यदायस्मिन्कालेस्थास्यतिस्थिरीभूताभविष्यतिनिश्चलाविक्षेपचल
नवर्जितासतीसमाधौसमाधीयतेअस्मिन्नितिसमाधिःआत्मातस्मिन्नात्मनीत्येतदचलातत्रापिविकल्पवर्जिता
तेनैवबुद्धिरंतःकरणंतदायोगमवाप्स्यसियोगंविवेकप्रज्ञांसमाधिंप्राप्स्यसि

तत्रबुद्धिसि॰ द्धिरित्याह।तदेति।इष्टंकालविशेषाख्यंयत्तच्छब्देनगृह्यतेबुद्धेः श्रुतिविप्रतिपन्नत्वंविशदयति।अनेके
ति।नानाप्रतिपन्नत्वमेवसंक्षिपतिविक्षिप्तेति।उक्तहेतुद्वयमनुरुध्यवैराग्यपरिपाकावस्थाकालशब्दार्थः निश्चलत्वंविक्षेपरा
हित्यं।अचलत्वंविकल्पशून्यत्वंविक्षेपोविपर्ययः।विकल्पःसंशयइति।विवेकः ५३ ॥ ॥ ॥

विवेकद्वाराजातामज्ञामाप्रायुक्तावुद्धिः समाधिस्तत्रैवनिष्ठासंन्यासिनोज्ञाननिष्ठातत्प्राप्तिवचनंप्रश्नवीजं दृष्ट्वातोऽर्जुनस्याभिप्राय
द्धालब्धेतिलब्ध्वा समाधावात्मनि समाधानेन वाप्रज्ञापरमार्थदर्शनलक्षणा पेनतस्येतियावत्। ननुतस्यभाषातत्तत्कापोत
राखिनीभविष्यति धीमित्ससौजिज्ञास्यमानेनत्राह। कथमिति। ज्ञानविशिष्टस्यलक्षणाविवक्षयाप्रश्नमवतारयति। निष्ठासाधनमनु
भुत्संतस्याविशिनष्टि। समाधिस्थस्येति। तस्यैवार्थेक्रियापृच्छति। स्थितधीरिति॥ प्रश्नाक्षराणि व्याख्यायवाक्यार्थमाह। स्थित

प्रश्नवीजंप्रतिलभ्यलब्धसमाधिप्रज्ञस्यलक्षणबुभुत्सया अर्जुनउवाच स्थितप्रज्ञस्यकाभाषा समाधिस्थस्यकेशव
स्थितधीः किंप्रभाषेतकिमासीतव्रजेतकिं ५४ स्थितप्रज्ञस्यस्थिताप्रतिष्ठिताहमस्मिपरंब्रह्मेतिप्रज्ञायस्यसस्थितप्र
ज्ञस्तस्य स्थितप्रज्ञस्यकाभाषाभाषणंवचनंकथमसौपरैर्भाष्यते। समाधिस्थस्यसमाधौ॥ स्थितस्यकेशव। स्थितधीः स्थि
तप्रज्ञः स्वयंवाकिंप्रभाषेत॥ किमासीतव्रजेतकिं। किमासनंव्रजनंवाकिंकथंतस्येत्यर्थः। स्थितप्रज्ञस्यलक्षणमने
नश्लोकेनपृच्छ्यते योह्यादितएवसंन्यस्यकर्माणिज्ञानयोगनिष्ठायांप्रवृत्तोयश्चकर्मयोगेनतयोः स्थितप्रज्ञस्यप्रज
हातीत्यारभ्याध्यायपरिसमाप्तेः स्थितप्रज्ञस्यलक्षणसाधनंचोपदिश्यते॥ ॥ ॥

प्रज्ञस्येति। प्रतिवचनमवतारयितुंपातनिकांकरोति। योहीति। हिशब्देनकर्मसंन्यासकारणीभूतविरागतासंपत्तिः सूच्यते। आरि
तोब्रह्मचर्यावस्थायामितियावत्। ज्ञानमेवयोगोब्रह्मभावप्रापकत्वात्तस्मिन्निष्ठापरिसमाप्तिस्तस्यामित्यर्थः कर्मैवयोगस्तेनक
र्माणिसंन्यस्यतन्निष्ठायामेवप्रवृत्तइतिशेषः ७ ॥ ॥ ॥

ननुकथमेकेनवाक्येनार्थद्वयमुपदिश्यतेद्व्यर्थेवाक्यभेदाल्लक्षणमेवसाधनं। कृतार्थलक्षणस्यतत्स्वलयत्वेनफलत्वेसा
धनत्वानुपपत्तेरितिचेत्तत्राह। सर्वत्रैवेति। यद्यपिकृतार्थस्यज्ञानिनोज्ञानलक्षणानिरूपेणफलत्वान्नसाधनत्वमधिगच्छन्तितथापिजि
ज्ञासोस्तुदेवंयत्नसाध्यतयासाधनंसंपद्यतेलक्षणाचात्रज्ञानसामर्थ्यलब्धमनूद्यतेनविधीयतेविदुषोविधिनिषेधागोचरत्वा
त्तेनजिज्ञासोःसाधनानुष्ठानायलक्षणानुवादएकस्मिन्नेवसाधनानुष्ठानेतात्पर्यमिसर्थः। उक्तेर्थेभगवद्वाक्यमुत्थापयति।
यानीत्थंलक्षणानिविज्ञानसामर्थ्यलभ्यानिअयत्नसाध्यानीतिशेषः॥ स्थितप्रज्ञस्यकाभाषेतिप्रथमप्रश्नस्योत्तरमाहप्र

सर्वत्रैवह्यध्यात्मशास्त्रेकृतार्थलक्षणानियानितान्येवसाधनान्युपदिश्यन्ते यत्नसाध्यत्वात्तानियत्नसाध्यानिसा
धनानिलक्षणानिचभवन्तितानिभगवानुवाच प्रजहातियदाकामान्सर्वान्पार्थमनोगतान् आत्मन्येवात्मनातु
ष्टःस्थितप्रज्ञस्तदोच्यते ५५ प्रजहातिप्रकर्षेणजहातिपरित्यजतिसर्वान्समस्तान्कामान्यदाइच्छाभेदान्यस्मिन्का
लेहेपार्थमनोगतान्मनसिप्रविष्टान्सर्वकामपरित्यागेतुष्टिकारणाभावात्। शरीरधारणनिमित्तशेषेचसत्युन्मत्तप्र
मत्तस्येवप्रवृत्तिःप्राप्नोतीत्यतउच्यतेआत्मन्येवप्रत्यगात्मस्वरूपएवात्मना ७ ॥ ॥ ॥

जहातीति। कामत्यागस्यप्रकर्षोवासनाराहित्यं। कामानामात्मनिष्ठत्वंकैश्चिद्दृश्यतेतदयुक्तंतेषांमनोनिष्ठत्वस्फुटयतीत्याशय
नाह। मनोगतानिति। आत्मन्येवात्मनेतिसाधुतरभागनिरसंचायमनुवदतिसर्वकामेति। नहिप्रवर्तकाभावाद्विदुषःसर्वप्रवृत्ते
पशान्तिरितिनेत्याह। शरीरेति। उन्मादस्यानुमतोविवेक। विशमाह। नबुद्धिर्वाममभागीप्रकर्षेणामदस्मनुभवन्विद्यमानमपिविवे
कनिरसयन्नोन्मत्तवद्व्यवहरत्यप्रमत्ततृप्तिविभागः॥ उत्तरार्द्धमवतार्यव्याकरोति। उच्यतइति॥ ॥ ॥

गी॰ अ॰ २
५१

आत्मन्येवेत्येवकारस्यात्मनेत्यत्रापिसंबंधं द्योतयति । स्वेनैवेति । बाह्यलाभनिरपेक्षस्तेन तुष्टिमेव स्पष्टयति । परमार्थेति स्थितप्रज्ञं प्रवि
भजते स्थितेति । प्रज्ञामतीति । प्रज्ञामतिर्विवेकः सर्वकामविगमावस्थातदेति निर्दिश्यते । उक्तमेवप्रपंचयति । स्वल्पेति आत्मानं तितिक्षा
नामी वैराग्यद्वारा सर्वैषणात्यागात्मकं संन्यासमासाद्यश्रवणाद्यावर्त्यतज्ज्ञानं प्राप्य तस्मिन्नेवासक्त्या विषयवैतृष्ण्येन तत्फलस्वरू
पां परितुष्टिं तत्रैव प्रतिलभमानः स्थितप्रज्ञव्यपदेशभागित्यर्थः ५५ लक्षणभेदाननुवादद्वारा विविदिषोर्वक्तव्यान्तरमुपदि
शति । किंचेति । ज्वरशिरोरोगादिकृतानि दुःखान्याध्यात्मिकान्यादिशब्देनाधिभौतिकानि व्याघ्रसर्पादिप्रवृत्तानि आधिदैविकानि चाति

स्वेनैवबाह्यलाभनिरपेक्षस्तुष्टः परमार्थदर्शी नान्तरसलाभेनान्यस्मादलंप्रत्ययवान् स्थितप्रज्ञः स्थिता प्रतिष्ठितात्मा
नात्मविवेकजा प्रज्ञा यस्य स ॥ स्थितप्रज्ञो विद्वांस्तदोच्यते । त्यक्तपुत्रवित्तलोकैषणः संन्यासी आत्मारामआत्मक्रीडः स्थित
प्रज्ञ इत्यर्थः । किंच ॥ दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः ॥ वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ५६ दुःखेषु आध्यात्मि
कादिषु प्राप्तेषु नोद्विग्नं न प्रक्षुभितं दुःखप्राप्तौ मनो यस्य सोऽनुद्विग्नमनाः तथा च सुखेषु प्राप्तेषु विगता स्पृहा तृष्णा यस्य ॥

वाताग्निवर्षादिनिमित्तानि दुःखानि गृह्यंते तेषूपप्लवेष्वपि नोद्विग्नं मनो यस्य स तथेति संबंधः नोद्विग्नमित्येतद्व्याचष्टे । न प्रक्षुभित
मिति । दुःखानामुक्तानां प्राप्तौ परिहाराक्षमस्य तदनुभवपरिभावितः दुःखमुद्वेगस्तेन सहितं मनो यस्य न भवतीति स तथेत्याह । दुःखप्राप्ता
विति । मनो यस्य नोद्विग्नमिति शब्दैर्वासंबंधः सुखानामपि दुःखवत्त्रिविधानीति मत्वाह तेषूक्तेषु प्राप्तेषु सत्सु तृष्णा तेभ्यो विगता
स्पृहा तस्यापसमाविगतस्पृहः इति योजना । अज्ञस्य हि प्राप्तानि सुखान्यनुविवर्द्धते तस्मा ॥

राम
५१

।विदुषस्तेनैवमिसत्त्वं तथाज्ञस्यैव धर्म्ये दृष्टांतमाह। नाग्निरिवेति। यथा हि इहाग्नस्येंधनादेरभ्याधानेन वह्निरनुविवर्धते न तथा। हस्यस्य सुखान्नु
पनतानि सुखान्नुविवर्द्धमानानापि तस्याविदुषो न तान्यनुविवर्धते न हि वह्निरिहात्यमुपनतमपि स्वगंधुविहाह्निमधिगच्छति तेन जितात्मना सुखदुः
खयोस्तत्स्नोद्वेगो न कर्तव्याविसर्थः एगारपश्च तेन कर्तव्या न भवंतीत्याह। वीतेति। अभूताभिनिवेशोग्रहत्निहेतु विषयेषु रंजनात्मक
स्तस्माभेदो रागः परेणापकृतस्य गात्रनेत्रादिविकारकारणं भयं। क्रोधस्तु परवशीकृत्यात्मानं स्वपरापकारप्रवृत्तिहेतुर्बुद्धिवृत्ति वि
शेषः। मननं तद्रति मुनिरात्मविदित्संगीकृत्याह्ना संन्यासीति। सुखादिविषयतस्मादे रागादेश्चाभावावस्थानहेतुरुच्यते ५६ लक्षण

नाग्निरिवेंधनाद्याधाने सुखाद्यनुविवर्द्धते स विगतस्पृहः। वीतरागभयक्रोधो रागश्च भयं च क्रोधश्च वीता विगता यस्मात्स
वीतरागभयक्रोधः स्थितधीः स्थितप्रज्ञो मुनिः संन्यासी तदोच्यते॥ किंच॥ यः सर्वत्रानभिस्नेहस्तत्तत्प्राप्य शुभाशुभं नाभि
नंदति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता ५७ यो मुनिः सर्वत्र देहजीवनादिष्वपि अनभिस्नेहः अभिस्नेहवर्जितः तत्तत्प्राप्य शुभाशुभं
तत्तत्। शुभमशुभं वा लब्ध्वा नाभिनंदति न द्वेष्टि शुभं प्राप्य न तुष्यति न हृष्यति अशुभं तं च प्राप्य न द्वेष्टि इत्यर्थः तस्यैवं हर्षविषा
॥ दवर्जितस्य विवेकजा प्रज्ञा प्रतिष्ठिता भवति ७

भेदानुवादद्वारा विविदिषोरेव कर्तव्यांतरमुपदिशति किंचेति विवेकवतो विदुषो वि
वेकजन्यां प्रज्ञां कथयन्निष्ठामपि प्रयत्नाभिसाध्यामाह। यः सर्वत्रेति। ननु देहजीवितादौ स्नेहः शुभाशुभप्राप्तौ हर्षविषादौ विदुषो वि
विदिषोश्चावर्जनीयाविति प्रत्याख्येयौ सिद्धिं तत्राह। यो मुनिरिति। तत्तदिति शोभनत्वेनाशोभनत्वेन वा प्रसिद्धत्वं प्रतिनिर्दिश्यते
तदेव विभजते। शुभमिति। विषयेष्वभिषंगाभावः शुभादिप्राप्तौ हर्षविषादभावश्च प्रज्ञास्थैर्यकारणमित्याह। तस्येति ५७

जिज्ञासोरेव कर्तव्यांतरं सूचयति। किंचेति। इंद्रियाणां विषयेभ्यो वैमुख्यस्य प्रज्ञास्थैर्यकारणत्वाद्दार्ढ्ये जिज्ञासुनानुष्ठेयमित्याह। यदेति। मुमुक्षुणा मोक्षहेतुं प्रज्ञां प्रार्थयमानेन सर्वेभ्यो विषयेभ्यः सर्वाणींद्रियाणि विमुखानीति श्लोकव्याख्यानेन कथयति यदेत्यादिना। उपसंहारः स्ववशत्वापादनं तस्य च सम्यक्त्वमतिदृढत्वं। अयमिति प्रकृतस्थितप्रज्ञग्रहणं व्यावर्तयति। ज्ञाननिष्ठायामिति। इंद्रियोपसंहारस्य प्रलयरूपत्वं व्यावर्त्य संकोचात्मकत्वं दृष्टांतेन दर्शयति। कूर्म इति दृष्टांतं व्यावर्त्तयति यथेति। हा

कर्तव्यानी २

विवृणोति

किंच यदा संहरते चायं कूर्मोंगानीव सर्वशः॥ इंद्रियाणींद्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ५८ यदा संहरते सम्यगुपसंहरते चायं ज्ञाननिष्ठायां प्रवृत्तो यतिः॥ कूर्मोंगानीव यथा कूर्मो भयात्स्वान्यंगानि उपसंहरते सर्वशः सर्वतः एवं ज्ञाननिष्ठ इंद्रियाणि इंद्रियार्थेभ्यः सर्वविषयेभ्यः उपसंहरते तस्य प्रज्ञा प्रतिष्ठितेत्युक्तार्थं वाक्यं॥ तत्र विषयाननाहरत आतुरस्यापि इंद्रियाणि निवर्तंते कूर्मोंगानीव संह्रियंते न तु तद्विषयो रागः स कथं संह्रियत इत्युच्यते॥ विषया विनिवर्तंते निराहारस्य देहिनः रसवर्ज्यं रसोप्यस्य परं दृष्ट्वा निवर्तते ५९ ॥ ॥ ॥

र्थजिकेयोजयज्ञाननिष्ठापरं तत्र योजयति। एवमिति। इंद्रियाणां विषयेभ्यो वैमुख्यकरणं प्रज्ञास्थैर्ये हेतुरित्युक्तमुपसंहरति। तस्येति ५८ इंद्रियाणां विषयेभ्यो वैमुख्येपि तद्विषयरागानुवृत्तौ कथं प्रज्ञालाभः स्यादिति शंकते। नत्रेति। व्यवहारस्तभिः सश्रमार्थैः विषयाननाहरतः तदुपभोगविमुखस्य स्वार्थैः रागस्त्वनोपसंह्रियते न तर्हि प्रज्ञालाभः संभवति रागस्य तत्सत्त्वेऽपि स्थितत्वादिति मत्वाह सकृत्ययमिति। रागनिवृत्त्युपायमुपरिशंकोत्तरमाह। उच्यत इति

विषयोपभोगपराङ्मुखस्य कुतो विषयपरावृत्तिः ॥ तत्सरावृत्तिश्च मस्तकेनेत्याशंक्याह । यद्यपीति । निराहारस्येत्यस्य व्याख्यानम
नाह्रियमाणविषयस्येति । यो हि विषयप्रवरो न भवति तस्यासंनिहितैकतपसि क्लेशात्मकेऽवस्थितस्य विद्याविहीनस्यापी
न्द्रियाणि विषयेभ्यः सकाशाद्यद्यपि संह्रियन्ते तथापि रागोऽवशिष्यते स च न तत्त्वज्ञानादुच्छिद्यत इत्यर्थः ॥ रसशब्दस्य माधुर्यादि
बाह्यरसविषयत्वं निषेधति । रसशब्द इति । रूढप्रयोगमन्तरेण कथं प्रसिद्धिरित्याशंक्याह । स्वरसेनेति । स्वेच्छयेति यावत्

यद्यपि विषयोपलक्षितानि विषयशब्दवाच्यानि इन्द्रियाणि अथवा विषया एव निराहारस्य अनाह्रियमाणविष
यस्य निराहारस्य देहिनः कष्टे तपसि स्थितस्य मूर्खस्यापि विनिवर्तन्ते देहिनो देहवतो रसवर्जं रसो रागो विषयेषु य
स्तं वर्जयित्वा रसशब्दो रागे प्रसिद्धः स्वरसेन प्रवृत्तो रसिको रसज्ञ इत्यादिदर्शनात् सोऽपि रसो रंजनरूपः सूक्ष्मोऽस्य यतेः
परं परमार्थतत्त्वं ब्रह्म दृष्ट्वा उपलभ्य अहमेव तदिति वर्तमानस्य निवर्तते निर्बीजं विषयज्ञानं संपद्यत इत्यर्थः । नासति
सम्यग्दर्शने रसस्योच्छेदस्तस्मात् सम्यग्दर्शनात्मिकायाः प्रज्ञायाः स्थैर्यं कर्तव्यमित्यभिप्रायः २

रसिकः स्वेच्छावशवर्ती रसज्ञो विवक्षितपेक्षितज्ञान इत्यर्थः । कथं तर्हि तस्य निवृत्तिरित्याह । सोऽपीति । दृष्टिमेवोपलब्धिपर्यायां यस्य दृष
ति अहमेवेति । रागापगमे सिद्धमर्थमाह निर्बीजमिति । ननु सम्यग्ज्ञानं संभवति न तेन रागो नापगच्छति चेत्तदपगमादृते रागवतः स
म्यग्ज्ञानोदयायोगादितरेतराश्रयत्वमिति नेत्याह । नासतीति । इन्द्रियाणां विषयपारवश्ये विवेकह्रासप्रसिद्धेन स्थूलो रागो व्याव
र्त्यते तेन च सम्यग्ज्ञानोत्पत्त्या सूक्ष्मस्यापि रागस्य सर्वात्मना निवृत्तिरुपपद्यते नेतरेतराश्रयतेत्यर्थः । प्रज्ञास्थैर्यस्य सफलत्वे स्थितेन फ

लितमाह । तस्मादिति ५९

गीताटी
५३

श्लोकांतरमवतारयति। सम्यग्दर्शनेति। मनसः स्ववशत्वादेव प्रज्ञास्थैर्यं संभवे किमर्थमिंद्रियाणां स्ववशत्वापादनमित्याशंक्या
ह यस्मादिति। ननु विवेकवतो विषयदोषदर्शिनो विषयेभ्यः स्वयमेवेंद्रियाणि व्यावर्तंते किंतु प्रज्ञास्थैर्यं चिकीर्षता कर्तव्यमिति
तत्राह यततो हीति। विषयेषु भूयोभूयो दोषदर्शनमेव प्रयत्नः। हिशब्दस्य यस्मादर्थस्य समाप्तौ संबंधं वक्ष्यति। अपिशब्दस्य
प्रयत्नं कुर्वतोपीति संबंधांतरमाह। पुरुषस्येति। प्रमथनशीलत्वं प्रकटयति। विषयेति। विक्षोभस्याकुलीकरणस्य फलमाह

सम्यग्दर्शनलक्षणप्रज्ञास्थैर्यं चिकीर्षताऽऽदाविंद्रियाणि स्ववशे स्थापयितव्यानि यस्मात्तदनवस्थापने दोषमाह यत
तो ह्यपि कौंतेय पुरुषस्य विपश्चितः। इंद्रियाणि प्रमाथीनि हरंति प्रसभं मनः ६० यततः प्रयत्नं कुर्वतो हि यस्मादपि कौंते
य पुरुषस्य विपश्चितो मेधाविनोपीति व्यवहितेन संबंधः इंद्रियाणि प्रमाथीनि प्रमथनशीलानि विषयाभिमुखं हि पु
रुषं विक्षोभयंत्याकुलीकुर्वंति आकुलीकृत्य च हरंति प्रसभं प्रसह्य प्रकाशमेव पश्यतो विवेकविज्ञानयुक्तं मनो यतस्त
स्मात् ~~(तानि सर्वाणि संयम्य युक्त आसीत मत्परः वशे हि यस्येंद्रियाणि तस्य प्रज्ञा नयुक्तं मनो यतस्तस्मात्)~~ तानि सर्वा
णि संयम्य युक्त आसीत मत्परः वशे हि यस्येंद्रियाणि तस्य प्रज्ञा प्रतिष्ठिता ६१ तानि सर्वाणि संयम्य संयमनं वशीकरणं
कृत्वा युक्तः समाहितः सन्नासीत ७

आकुलीकृत्येति॥ प्रकाशमेवेत्युक्तं विशदयति। पश्यत इति। विपश्चितो विदुषोपि
प्रकाशमेवेति प्रकाशशब्दितविवेकाख्यविज्ञानेन युक्तमेव मनो हरंतींद्रियाणीति संबंधः ६० हिशब्दार्थमनूद्य तस्मादिंद्रियाणि स्व
वशे स्थापयितव्यानीति सर्वेषां संबंधमभिसंधायाह। तस्मादिति। इंद्रियाणां स्ववशत्वसंपादनानंतरं कर्तव्यमर्थमाह। आसीतेति। ए
वमासीनस्य किं स्यादिति तदाह वशे हीति॥

द्वि२

राम
५३

समाहितस्य विक्षेपविकल्पस्य कथमासनमित्यपेक्षायामाह । मत्पर इति । परापरभेदशंकामपाकृत्यासनमेव स्फोरयति । नान्यो-
हमिति । उत्तरार्द्धं व्याकरोति । एवमिति । हित्वाद्यर्थं स्फुरयति । अभ्यासेति । यस्मादात्मनो नान्योहमस्मीति प्रागुक्तानुसंधानस्याद-
रेणानैरंतर्यदीर्घकालानुष्ठानसामर्थ्यादित्यर्थः । अथ वा विषयेषु दोषदर्शनाभ्याससामर्थ्यादिंद्रियाणि संयतानीत्यर्थः ६१
समनंतरश्लोकद्वयतात्पर्यमाह । अथेति । पुरुषार्थोपायोपदेशानंतरमथशब्दार्थः । तन्निष्ठत्वराहित्यावस्थां दर्शयति । इदानीमिति ।

मत्परोहं वासुदेवः सर्वप्रत्यगात्मा परो यस्य स मत्परः । नान्योहं तस्मादित्यासीनेत्यर्थः । एवमासीनस्य यतेर्वशे हि यस्ये-
द्रियाणि वर्तंते । अभ्यासबलात्तस्य प्रज्ञा प्रतिष्ठिता ॥ अथेदानीं पराभविष्यतः सर्वानर्थमूलमिदमुच्यते ॥ ध्यायतो विष-
यान्पुंसः संगस्तेषूपजायते । संगात्संजायते कामः कामात्क्रोधोऽभिजायते ६२ ध्यायतश्चिंतयतो विषयाञ्छब्दादीन्वि-
षयविशेषानालोचयतः पुंसः पुरुषस्य संगः आसक्तिः प्रीतिस्तेषु विषयेषूपजायते । संगात्प्रीतेः संजायते समुत्पद्यते
कामः तृष्णा ॥ तस्मात्कामात्कुतश्चित्प्रतिहतात् क्रोधोऽभिजायते । क्रोधाद्भवति संमोहः संमोहात्स्मृतिविभ्रमः ॥ स्मृति-
भ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ६३ क्रोधाद्भवति संमोहः अविवेकः कार्याकार्यविषयः ॥ विभ्रमः क्रुद्धो हि संमू-
ढः सन् गुरुमप्याक्रोशति ॥ संमोहात्स्मृतिविभ्रमः

पराभविष्यतो महांतमनर्थं गमिष्यतो विवेकविज्ञानविहीनस्येति यावत् । सर्वा-
नर्थमूलं विषयाभिध्यानं । तस्य तथात्वमनुभवसिद्धमिति वक्तुमिदमित्युक्तं । विषयेषु विशेषत्वमारोपितरमणीयत्वं प्रीतिरिति
यारणासक्तिमात्रं गत्यनेन तस्मात्सुद्रिक्तासक्तिः तृष्णा । प्रतिबंधेन प्रणाशेन वा प्रतिहतेति ६२ क्रोधस्य संमोहहेतुत्वमनुभवेन द्योतयति ७
क्रुद्धो हीति । आक्रोशमधिक्षिपति । तस्योगपत्वमपेरर्थः संमोहकार्यं कथयति । संमोहादिति ॥ ॥ ॥

भा.टी.
५७

स्मृतेर्निमित्तनिवेदनद्वारा स्वरूपं कथयति स्मृत्येति। क्षणिकत्वादेवास्याः स्वतो नाशसंभवात्संमोहाधीनत्वं तस्येत्याशंक्याह स्मृतीति
[illegible]तिभ्रंशोपि कथं बुद्धिनाशः स्वरूपतः सिध्यतीत्यत्राह। कार्येति। ननु पुरुषस्य नित्यत्वे सति तस्य बुद्धिनाशेपि प्रणाशो न प्रकल्प्यते तत्राह प्रा
वदेवेति। कार्याकार्यविवेचनयोग्यातः करणाभावे सतोपि पुरुषस्य करभवदुपगततत्वविवेकविक्षयान ष्टत्वव्यपदेशः तदेतदा
ह। पुरुषार्थेति ६२ विषयाणां स्मरणमपि चेदनर्थकारणं तर्हि भोगस्ते न जीवनार्थं भुंजानैर्विषयानर्थं कथं न प्रतिपद्येतेसा

शास्त्राचार्योपदेशाहितसंस्कारजनितायाः स्मृतेः स्यात्तु विभ्रमो भ्रंशः स्मृत्युत्पत्तिनिमित्तप्राप्तौ अनुत्पत्तिस्ततः स्मृति
भ्रंशात्बुद्धेर्नाशः। कार्याकार्यविषयविवेकायोग्यतान्तःकरणस्य बुद्धेर्नाश उच्यते। बुद्धेर्नाशात्प्रणश्यति॥ तावदेव हि पुरु
षो यावदन्तःकरणं तदीयं कार्याकार्यविषयविवेकयोग्यं तदयोग्यत्वे नष्ट एव पुरुषो भवत्यतः तस्यान्तःकरणस्य बु
द्धेर्नाशात्प्रणश्यति पुरुषार्थायोग्यो भवतीत्यर्थः। सर्वानर्थस्य मूलमुक्तं विषयाभिध्यानमथेदानीं मोक्षकारणमिदमु
च्यते॥ रागद्वेषवियुक्तैस्तु विषयानिन्द्रियैश्चरन्॥ आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति ६४ रागद्वेषवियुक्तैः
रागश्च द्वेषश्च रागद्वेषौ तत्पुरःसरा हीन्द्रियाणां प्रवृत्तिः स्वाभाविकी तत्र यो मुमुक्षुर्भवति स ताभ्यां वियुक्तैः श्रोत्रा
दिभिरिन्द्रियैर्विषयान् अवर्जनीयांश्चरन्नुपलभमानः ८

शंक्य ६१ वृत्तानुवादपूर्वकमुत्तरश्लोकतात्पर्यमाह। सर्वानर्थ
स्येति। अनर्थमूलकथनानन्तर्यमथ। शब्दार्थं परिहरन्नस्य विज्ञानेन तत्सहितं रोधायेजिज्ञासां दर्शयति। इदानीमिति। रागद्वेषवि
कार्यवृत्तिरित्यत्रानुभवं प्रदर्शयति हि शब्दः। शास्त्रोपप्रवृत्तिन्या सेधार्थेयाभावि। किंतु स्वतंत्रेन्द्रियाधिकृतानाधिकृत्य प्रयोगः अ
वर्जनीयानशनपानादीन् देहस्थितिहेतूनिति यावत् ८

राम
५७

इंद्रियाणां विषयेषु प्रवृत्तिश्चेन्नियमानुपपत्तेर्वर्जनीयेष्वपि स्यादित्याशंक्याह । आत्मेति । अंतःकरणाधीनत्वेपींद्रियाणां इं
तन्नियमात्तेषामपि नियमानुपपत्तिरित्याशंक्याह । विधेयात्मेति ६४ तथापि नानाविधदुःखाभिभूतत्वान्नस्वास्थ्यमास्थानं
क्य शांमित्याशायेनरच्छमि । प्रसादमिति ॥ श्लोकार्धेनोत्तरमाह । उच्यत इति । सर्वदुःखहान्या बुद्धिस्वास्थ्यमपि भवतीत्याह प्रसादे इत्येकं थि

आत्मवश्यैरात्मनो वश्यानि वशीकृतानींद्रियाणि तैरात्मवश्यैर्विधेयात्मेत्यात्नो विधेय आत्मा अंतःकरणं यस्य सोऽयं
स्थ्यं ५ प्रसादमधिगच्छति प्रसादः प्रसन्नता स्वा प्रसादे सति किं स्यादित्युच्यते ॥ प्रसादे सर्वदुःखानां ापते । प्रसन्नचेतसो ह्याशु बुद्धिः हानिरस्योप२
पर्यवतिष्ठते ६५ प्रसादे सर्वदुःखानां आध्यात्मिकादीनां हानिर्विनाशोऽस्य यतेरुपजायते किंच प्रसन्नचेतसः स्व
स्थांतःकरणस्य हि यस्मादाशु शीघ्रं बुद्धिः पर्यवतिष्ठते आकाशमिव परिसमंतादवतिष्ठते आत्मस्वरूपेणैव निश्चलीभव
तीत्यर्थः । एवं प्रसन्नचेतसोऽवस्थितबुद्धेः कृतकृत्यतां तस्माद्रागद्वेषवियुक्तैरिंद्रियैः शास्त्राविरुद्धेष्ववर्जनीयेषु [illegible]ं स स्त्रा
त माचरेदिति वाक्यार्थः ॥ सेयं प्रसन्नता स्तूयते ॥ नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना । न चाभावयतः शांतिरशां
तस्य कुतः सुखं ६६ नास्ति न विद्यते न भवतीत्यर्थः । बुद्धिरात्मस्वरूपविषया अयुक्तस्यासमाहितस्य ५ ५ ॥

सिद्धमित्याशंक्याह प्रसन्नेति । बुद्धिप्रसादस्यैव फलांतरमाह ॥ किंचेति तस्माद्बुप्रसादार्थं प्रयतितव्यमिति शेषः । श्लोकद्वय द्धि
स्याक्षरोह्यमर्थं वृत्तान्तास्पष्टार्थमुपसंहरति । एवमिति । युक्तः समाहितो विषयपारवश्यभूम्यः रसान्निर्यावत् ६५ किंपुनः
स्तवशुद्धेर्वपयोगात् बुद्धिः सिद्ध्यतीत्याह सेयमिति । असमाहितस्यापि बुद्धिमात्रमुत्पद्यमानं प्रतिभातीत्याशंक्य विशिनष्टि आ
त्मस्वरूपेति ॥ ॥

भा टी
५५

ग्राहि विक्षिप्तचित्तस्यात्मस्वरूपविषयां बुद्धिं हेतुमर्हतीत्यत्र हेतुमाह॥ न चेति। आत्मज्ञाने शास्त्राद्यापाततो ज्ञाने स्मृतिसंता
नानुकरणं साक्षात्कारार्थमभिनिवेशो भावनेति चोच्यते। न चासौ विक्षिप्तबुद्धेः सिद्ध्यतीति हेत्वर्थे विवक्षित्वाह। आत्मज्ञा
नेति। भावनाद्वारा साक्षात्काराभावेपि काश्मंतिरित्याशंक्याह। न चेति। असमाहितस्य भावनाभावादिति यावत्। आत्म
न्यापाततो ज्ञाने श्रवणाद्यावृत्तिरूपात्स्मृतिसमन्वानस्यापरोक्षबुद्ध्यभावेनानर्थनिवृत्तिः सिद्ध्यतीत्याह। उपशम इति अ

न चास्ति अयुक्तस्य भावना आत्मज्ञानाभिनिवेशः तथा न चास्ति अभावयत आत्मज्ञानाभिनिवेशमकुर्वतः
शांतिरुपशमः अशांतस्य कुतः सुखं इंद्रियाणां हि विषयसेवातृष्णातो निवृत्तिर्या तत्सुखं न विषयविष
यात् तस्मात् दुःखमेव हि सा। न तृष्णायां सत्यां सुखस्य गंधमात्रमप्युपपद्यत इत्यर्थः। अयुक्तस्य कस्माद्बुद्धिर्नास्तीत्यु ६७
च्यते इंद्रियाणां हि चरतां यन्मनोऽनुविधीयते॥ तदस्य हरति प्रज्ञां वायुर्नावमिवांभसि ६७

शमहतानर्थस्य परमानंदसागराद्बहिर्भूतस्य संसारवारिधौ निमग्नस्य सुखाविर्भावो न संभवतीत्याह। अशांतस्येति। तस्या
पि विषयसेविनो वैषयिकसुखं संभवतीत्याशंक्याह। इंद्रियाणां हीति। तस्माश्रयस्य शास्त्रप्रसिद्धमानुभविकं च सुखत्वमि
निवर्त्तुं हि शब्दः॥ विषयसेवायां विषयोपभोगद्वारा सुखमुपलब्धमित्याशंक्याह। दुःखमेवेति। तत्रापि हि शब्दोऽनु राम
भवावद्योती। तदेव स्पष्टयति। संसारिणा ६६ आकांक्षाद्वारा श्लोकांतरमुत्थापयति। अयुक्तस्येति॥ ॥ ॥ ५५

दि ३

विक्षिप्तचेतसो भावना॥ भावे साक्षात्काररलक्षणा बुद्धिर्न भवतीति दृष्टान्तेन साधयति इंद्रियाणामिति। यत्तद्योपात्तं मन स्ससरेना
पिगत्यते। इंद्रियाणां श्रोत्रादीनां विषयाः शब्दादयस्तेषां विकल्पनं मिथो विभज्य ग्रहणं तेनेति यावत्। दृष्टान्तं व्याकरोति। उद
कइति। करोतीति यस्मात्तस्मादयुक्तस्य नोऽसयनेबुद्धिरिति योजना ६७ एतेनोद्दीसादिश्लोकाभ्यामुक्तस्येवार्थस्य प्रकृतस्तोकाभ्या
मिपिकथ्यमानत्वादस्ति पुनरुक्तिरित्याशंक्यपरिहरति। एतेनोद्दीसादीनां ध्यायतो विषयानित्यादावुपपत्तिवचनमत्रेयं। तस्मा

विरप३

इंद्रियाणां हि यस्मात् चरतां स्वविषयेषु प्रवर्तमानानां यन्मनोऽनुविधीयते अनुप्रवर्त्यते तदिंद्रियविषयविकल्पने
न प्रहृतं मनोऽस्य यतेर्हरति प्रज्ञामात्मानात्मविवेकजां कथं वायुर्नावमिवांभसि उदके जिगमिषतां मार्गादुद्धृत्यान्मार्गेन
वे यथा वायुः प्रवर्तयत्येवमात्मविषयां प्रज्ञां हृत्वा मनो विषयविकल्पनां करोति॥ एततोऽपीत्युपसंहृतस्यार्थस्यानेक
धोपपत्तिमुक्त्वा तं चार्थमुपपाद्योपसंहरति। तस्मादिति इंद्रियाणां प्रवृत्तौ दोषउपपादितो यस्मात्॥ तस्माद्यस्य महाबा
हो निगृहीतानि सर्वशः इंद्रियाणींद्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ६८ तस्माद्यस्य यतेः हे महाबाहो निगृहीतानि स
र्वशः इंद्रियाणींद्रियार्थेभ्यः शब्दादिभ्यस्तस्य प्रज्ञा प्रतिष्ठिता॥ योयं लौकिको वैदिको व्यवहारः स तु सत्वविवेकज्ञानस्य स्थि
तप्रज्ञस्याविद्याकार्यत्वादविद्यानिवृत्तौ निवर्तते॥

छि

कौ४

वापेक्षितार्थोक्तिद्वारा श्लोकमवतारयति। इंद्रियाणामिति। असमाहितेन
मनसा यस्मादनुविधीयमानानीन्द्रियाणि प्रसत्यप्रज्ञापहारीणि तस्मादिति योजना ६८ आत्मविदः स्थितप्रज्ञस्य सर्वकर्मपरि
त्यागेऽधिकारस्तद्विपरीतानात्मज्ञस्य कर्मणीति तस्मिन्नर्थे समनंतरश्लोकमवतारयति। योयमिति॥ ॥ ॥ ॥

ह

अविद्यानिवृत्तौ सर्वकर्मनिवृत्तौ स्थितनिवृत्तिरेव कथमित्याशंक्याह। अविद्यायाश्चेति। स्फुटीकुर्वन्व्याख्याम्यंतरकरणानोपरम स्वप्रस्व-
निष्ठेवं तत्पाविधेर्दर्शनेऽपि मिथो विरुध्येते परागदृशो नस्यानात्मावरणाविद्याकार्यत्वादात्मदर्शनस्य च तन्निवर्तकत्वात्तत्र स्थात्मदर्शी
नार्थमिंद्रियाणामर्थेभ्यो निगृहीयादित्याह नियोजनना। सर्वप्राणिनां निशापदार्थाविवेककरीत्यत्र हेतुमाह। तमःस्वभावत्वादिति।
सर्वप्राणिसाधारणीं प्रसिद्धां निशां दर्शयित्वा तामेव प्रकृतानुगुणत्वेनार्थविशेषं विशदयति। किंतदित्यादिना। स्थितप्रज्ञविषय
प्र

अविद्यायाश्चाविद्याविरोधाच्चनिवृत्तिरित्येतमर्थं स्फुटीकुर्वन्नाह। या निशा सर्वभूतानां तस्यां जागर्ति संयमी। यस्यां जाग्रति भू-
तानि सा निशा पश्यतो मुनेः ६९ या निशा रात्रिः सर्वपदार्थानामविवेककरी तमःस्वभावत्वात् निशा सर्वेषां भूतानां सर्व-
भूतानां किं तत्परमार्थतत्त्वं स्थितप्रज्ञस्य विषयो यथा नक्तंचराणामहरेव सदन्येषां निशा भवति तद्वत् नक्तंचरस्थानीया-
नामज्ञानां सर्वभूतानां निशेव निशा परमार्थतत्त्वमगोचरत्वादतद्बुद्धीनां तस्यां परमार्थतत्त्वलक्षणायामज्ञाननिद्रायाः
प्रबुद्धो जागर्ति संयमी संयमवान् जितेंद्रियो योगीत्यर्थः। यस्यां ग्राह्यग्राहकभेदलक्षणायामविद्यानिद्रायां प्रसुप्तान्येव भू-
तानि जाग्रतीत्युच्यंते। यस्यां निशायां प्रसुप्ता इव स्वप्नदृशः सा निशा ७ ॥ ५ ॥

स्य परमार्थतत्त्वस्य प्रकाशे कृतार्थस्य कथमज्ञान्प्रति निशात्वमित्याशंक्याह। यथेति॥ तत्र हेतुमाह। अगोचरत्वादिति। अतद्बुद्धीनामप-
रमार्थतत्त्वातिरिक्तद्वैतप्रपंचे प्रवृत्तबुद्धीनामप्रतिपन्नत्वात्परमार्थतत्त्वं निशेव। विदुषामित्यर्थः। तस्यामित्यादि व्याचष्टे। तस्यामि-
ति। निशावदुक्तायामवस्थायामिति यावत् योगिनि ज्ञानी कथ्यते द्वितीयार्धं विभजते यस्यामिति। प्रसुप्तानां जागरणं विरुद्धमित्याशं-
क्याह। प्रसुप्ता इवेति ॥ ७

परमार्थेन त्वमनुभवतो निवृत्ताविद्यस्य संन्यासिनो देहेनावस्थानिशेषोऽत्र हेतुमाह । अविद्यारूपत्वादिति । परमार्थावस्थानिशेषा
द्विदुषांविदुषां तु देहेनावस्थानधेन्निषिद्धेनेपूक्तिमाह । अत इति । अविद्यावस्थायामेव क्रियाकारकफलभेदप्रतिभानाविशेषादि
त्यर्थः । विद्योदयेपि तत्प्रतिभासाविशेषात्पूर्वमिव कर्माणि विधीयेरन्नित्याशंक्याह । विद्यायामिति । अविद्यानिवृत्तौ बाधितानुवृत्त्या
विभागभानेपि नास्ति कर्मविधिर्विभागाभिनिवेशाभावादित्यर्थः । अविद्यावस्थायामेव कर्माणीत्युक्तं व्यक्तीकरोति । प्रागिति । वि
द्योदयात्पूर्वं बाधकाभावादबाधिताऽविद्याक्रियादिभेदमापद्यप्रमाणरूपतयाऽभ्युपगतात्मनां प्रामाण्यं कर्महेतुत्वं भवतीति क्रियादिभेदप्र

अविद्यारूपत्वात् । परमार्थेन त्वं पश्यतो मुक्तेः अतः कर्माण्यपि विद्यावस्थायामेव चोद्यन्ते न विद्यावस्थायां विद्यायां हि स
सामुदिते सवितरि शार्वरमिव तमः प्रणाशमुपगच्छति अविद्यां प्राग्विद्योत्पत्तेरविद्याप्रमाणबुद्ध्या गृह्यमाणा क्रिया
कारकफलभेदरूपा सती सर्वकर्महेतुत्वं प्रतिपद्यते । नाप्रमाणबुद्ध्या गृह्यमाणायाः कर्महेतुत्वोपपत्तिः प्रमाणभूतेन वे
देन मम चोदितं कर्तव्यं कर्मेति हि कर्मणि कर्ता प्रवर्तते ॥

मानस्य तद्धेतुत्वादित्यर्थः । न विद्यावस्थायामित्युक्तं प्रपंचयति । नाप्रमाणेति । उत्पन्नायां विद्यायां अविद्याया निवृत्तत्वात् क्रियादि
भेदभानमप्रमाणमिति बुद्ध्या गृह्यमाणाया यथोक्तविभागभागिन्यविद्याया न कर्महेतुत्वं प्रतिपद्यते । बाधितत्वेनाभासतया
न हेतुत्वायोगादित्यर्थः । विद्याऽविद्याविभागेनोक्तमेव विशेषं विवृणोति । प्रमाणभूतेनेति । यथोक्तेनैव वेदेन कामनाजीवनादिमतो
मम कर्म विहितं तेन मया तत्कर्तव्यमिति मन्वानः सन्कर्मणि प्रवृत्तोऽधिक्रियते तं प्रति साधनविशेषबोधादिना वेदस्य प्रवर्तकत्वादित्यर्थः ॥ ॥

गी० भा०
५८

सर्वमिदमविद्यामात्रं द्वैतं निःशेषेणेति मन्वानस्तन्न प्रवर्तते कर्मणीति व्यावर्त्समाह । नाविद्येति । विदुषो न । कर्मण्यधिकारश्चेन्न साधि-
कारस्तर्हि कुत्रेत्याशंक्याह । यस्येति । आत्मज्ञस्य फलभूते संन्यासाधिकारे वाक्यशेषं प्रमाणयति । तथा चेति प्रवर्तकं प्रमाणं विधिस्त-
स्याभावे कर्मस्विव विदुषो ज्ञाननिष्ठायामपि प्रवृत्त्यनुपपत्तेरपेक्षणीयो ज्ञानवतोऽपि विधिरिति शंकते । तत्रापीति । किमात्मज्ञाने विधि-
मपेक्षते । किं वात्मानायः न स्वस्वरूपविषयस्य यथाप्रमाणप्रमेयमुपसत्तेर्विध्यनपेक्षत्वादित्याह । न स्वात्मेति । तं न हि हीयस्माह न

नाविद्यामात्रमिदं सर्वं निःशेषेणेति । यस्य पुनर्निःशेषेणाविद्यामात्रमिदं सर्वं भेदजातमिति ज्ञानं तस्यात्मज्ञस्य सर्वकर्मसंन्या-
सएवाधिकारो न प्रवृत्तौ । तथा च दर्शयिष्यति । तद्बुद्धयस्तदात्मान इत्यादिना तस्य ज्ञाननिष्ठायामेवाधिकारं तत्रापि प्रवर्त-
कप्रमाणाभावे प्रवृत्त्यनुपपत्तिरिति चेन्न स्वात्मविषयत्वादात्मज्ञानस्य न ह्यात्मनः स्वात्मनि प्रवर्तकप्रमाणापेक्षा । आत्म-
त्वादेव तदंतत्वाच्च सर्वप्रमाणानां प्रमाणत्वस्य । न ह्यात्मस्वरूपाधिगमे सति पुनः प्रमाणप्रमेयव्यवहारः संभवति ॥
॥ प्रमातृत्वं ह्यात्मनो निवर्तयत्यंत्यं प्रमाणं ॥

हीति । प्रवर्तकप्रमाणाप्रतिशब्दितस्य विधेः साध्यविषयत्वादात्मनश्चासाध्यत्वादिति
हेतुमाह । आत्मत्वादेवेति । आत्मनस्त्वानयोर्विध्यनपेक्षत्वेऽपि ज्ञानिनो मानमेयव्यवहारं प्रतिनियमार्थो विध्यपेक्षास्यादित्याशं-
क्याह । तदंतत्वाच्चेति । सर्वेषां प्रमाणानां प्रामाण्यस्यात्मज्ञानोदयावसानत्वात्तस्मिन्नुत्पन्ने व्यवहारस्य निरवकाशत्वान्न तत्प्रतिनि-
यमाय ज्ञानिनो विधिरित्यर्थः उक्तमेव व्यक्तीकरोति । नहीति । धर्माधिगमवदात्माधिगमेऽपि किमिति यथोक्तव्यवहारो न भवतीत्या-
शंक्याह ॥ प्रमातृत्वं हीति ७

राम
५७

तन्निवृत्तौ कथमद्वैतज्ञानस्य प्रामाण्यमित्याशंक्याह निवर्तयत्येवेति। प्रमातृत्वं निवर्तयदद्वैतज्ञानं स्वयं निवृत्तं तेनैव प्रमाणमित्यत्र दृष्टांतमाह। स्वप्नेति। आत्मज्ञानस्य विध्यनपेक्षत्वे हेत्वंतरमाह। लोके चेति। व्यवहारभूमौ हि प्रमाणस्य वस्तुनिश्चयफलपर्यंतत्वे सति प्रवर्तकविधिसापेक्षत्वानुपलंभादद्वैतज्ञानमपि प्रमाणत्वान्न विधिमपेक्षते रज्ज्वादिज्ञानवदित्यर्थः। आत्मज्ञानवतस्त्रिष्टापाविधिमंतरेणाज्ञानमात्मन्येनेव सिद्धत्वात्तस्य कर्मसंन्यासे[illegible]धिकारो न कर्मणीत्युपसंहरति। तस्मादिति ६९ नन्वसं

निवर्तयदेव चाप्रमाणीभवति। स्वप्नकालप्रमाणमिव च प्रतिबोधे। लोके च वस्त्वधिगमे प्रवृत्तिहेतुत्वादर्शनात्प्रमाणस्य। तस्मान्नात्मविदः कर्मण्यधिकार इति सिद्धं। विदुषस्त्यक्तैषणस्य स्थितप्रज्ञस्य यतेरेव मोक्षप्राप्तिर्न त्वसंन्यासिनः कामकामिन इत्येतमर्थं दृष्टांतेन प्रतिपादयिष्यन्नाह॥ आपूर्यमाणमचलप्रतिष्ठं समुद्रमापः प्रविशंति यद्वत्॥ तद्वत्कामा यं प्रविशंति सर्वे स शांतिमाप्नोति न कामकामी ७० आपूर्यमाणमद्भिः॥ ॥ ॥

मासिनापि विविदिषावता विद्याफलस्य मोक्षस्य लब्धुं शक्यत्वात् किमिति विदुषः संन्यासो नियम्यते नेत्याह। विदुष इति। आपातज्ञानवतो विवेकवैराग्यादिविशिष्टस्यैषणाभ्यः सर्वाभ्यो व्युत्थितस्य श्रवणादिद्वारा समुत्पन्नसाक्षात्कारवतो मुख्यस्य संन्यासिनो मोक्षो नान्यस्य विषयपरस्यापरिप्लुतस्येत्येतद्दृष्टांतेन प्रतिपादयितुं अनंतरश्लोकप्रवृत्तिरित्यर्थः। दृष्टांतेनैनमर्थं प्रतिपादयितुमिष्ट रागद्वेषवियुक्तैस्त्विति श्लोकोक्तमेवार्थं पुनराहेति योजना ७ ॥ ॥ ॥ त्रा३

वृद्धिः समुद्रस्य समंतात् पूर्यमाणत्वेपि वृद्धिह्रासवती नदीपास्थितिरापतेदित्याशंक्याह । अचलेति । नहि समुद्रस्योत्स्वात्मकं प्रतिनि
यतं रूपं कदाचिदपि वर्द्धते ह्रसते वा नेन नदीया स्थितिरेकरूपैवेत्यर्थः । ततश्च रेत्याश्व ह्यापः समुद्रं तं गच्छंति न तर्हि तस्य विक्रियावत्वास्म
न्निष्ठस्यापि स्यादित्याशंक्याह । स्वात्मस्थमिति । इच्छाविशेषाः विषयाणां सन्निधौपि दुषि निर्विकारे प्रविशंति । पि सन्निधानेन तस्मिन्न
विशंतो धिकास्यापादयंति इत्याशंक्याह । विषयेति । प्रवेशं विशदयति । सर्वे इति । यो कामदृष्ट्या रिक्तो विषयविमुखत्वेन निष्कामस्य मो

अचलप्रतिष्ठं अचलतया प्रतिष्ठा स्थितिर्यस्य तमचलप्रतिष्ठं समुद्रमापः सर्वतो गताः प्रविशंति स्वात्मस्थमविक्रियमेव
संतं यद्वत् तद्वत् कामा विषयसन्निधावपि सर्वतो रष्टा विशेषाः यं यति समुद्रमिवापो विकुर्वंतः प्रविशंति ~~स शांतिमाप्नोति~~
~~कामकामी न प्राप्नोतीत्यर्थः ॥ यस्मादेवं तस्मात् ॥~~ विहाय ~~कामान् यः सर्वान् पुमांश्चरति सा ह कामा~~ यं सर्वे आत्मन्येव प्र
लीयंते न स्वात्मवशं कुर्वंति । स शांतिं मोक्षमाप्नोति नेतरः कामकामी ॥ काम्यंत इति कामा विषयास्तान् कामयितुं शी
लं यस्य स कामकामी न प्राप्नोतीत्यर्थः यस्मादेवं तस्मात् विहाय कामान्यः सर्वान् पुमांश्चरति निःस्पृहः निर्ममो निरहंकारः
स शांतिमधिगच्छति ७१ विहाय परित्यज्य कामान्यः संन्यासी पुमान् सर्वानशेषतश्चरति ॥ ॥ ॥

सोनकामुकस्येत्याह । स शांतिमिति ७० यदीगृहस्थेनापि मनसा समस्ताभिमानं हित्वा कूटस्थं ब्रह्मात्मानं परिभावयता ब्र
ह्मनिर्वाणं प्राप्यते प्राप्तेन तर्हि मोक्षादि विडंबनमेवेत्याशंक्याह । यस्मादिति । शब्दादिविषयप्रवणस्यानंतरीक्ष्याभेदभागिनो न
मुक्तिरितिव्यतिरेकस्य ~~प्रपन्नेपि सति तर्हि मोक्षादि विडंबन~~ । सिद्धत्वात् सर्वोत्कृष्टमन्वयं निगमयितुमनंतरवाक्यमित्यर्थः

मां

अशेषविषयत्यागे जीवनमपि कथमित्याशंक्याह। जीवेदिति॥ संभवद्भागदेर्षदिके देशे निवासमात्रं सर्वं चरतीत्येतद्व्याचष्टे
पर्यटतीति। विहाय कामानित्यनेन पुनरुक्तिं परिहरति शरीरेति। निःस्पृहत्वमुक्त्वा निर्ममत्वं पुनर्वदन्कथं पुनरुक्तिमार्थिकीं न
पश्यतीत्याशंक्याह। शरीरजीवनेति। सत्यहंकारे ममकारस्यावश्यकत्वान्निरहंकारत्वमाकरोति। विद्यावत्साहीति। स शांतिमाप्नो

जीवनमात्रचेष्टाशेषः चरति पर्यटतीत्यर्थः। निस्पृहः शरीरजीवनमात्रेऽपि निर्गता स्पृहा यस्य सः निस्पृहः सन्नित्यभिप्रायः
निर्मम इति शरीरजीवनमात्रापेक्षितपरिग्रहेऽपि ममेदमित्यभिनिवेशवर्जितो निरहंकारो विद्यावत्त्वादिनिमित्तात्मसंभाव
नारहित इत्येतत् स एवंभूतः छिन्नप्ररोहो ब्रह्मवित्शांतिं सर्वसंसारदुःखोपरमलक्षणां निर्वाणाख्यामधिगच्छति। प्राप्नो
ति ब्रह्मभूतो भवतीत्यभिप्रायः सैषा ज्ञाननिष्ठा स्तूयते ७ ॥ ॥ ॥

तीत्युक्तमुपसंहरन्निसरति सन्यासिनो मोक्षमार्गस्य सर्वकामपरित्यागादीनि श्लोकोक्तानि विशेषणानि फलसाध्यानि तत्सं
पत्तिफलं तत्त्वकैवल्यमित्यर्थः ७१ तत्र तत्र संक्षेपविस्तराभ्यां प्रदर्शितां ज्ञानविष्ठामधिकारिप्रवृत्त्यंगत्वेन स्तोतुमुत्तरश्लोकमव
तारयति सैषेति॥७

भा० गी०
५९

गृहस्थः संन्यासी त्युभावपि चेन्मुक्तिभागिनौ किं न हि कृत्स्नेन सर्वथैव संन्यासेनेत्याशंक्य संन्यासिव्यतिरिक्तानामंतर एव संभवाद
पेक्षितः संन्यासो मुमुक्षोरित्याह। एषेति॥ स्थितिमेव व्याचष्टे। सर्वमिति। न विमुह्यतीति पुनर्नञोऽनुकर्षणमन्वयार्थं संन्यासिनो वि घ२
मोहाभावेपि गृहस्थो धनस्नानादिनिमित्तं पापेन विमुह्यति विक्षिप्तः सन् समाधेर्विवेकरहितो भवतीत्यर्थः। यथोक्ता ब्राह्मी स्थि
तिः सर्वकर्मसंन्यासपूर्विका ब्रह्मनिष्ठानस्यां स्थित्वा तामिमामायुषश्चतुर्थे विभागे कृत्वेत्यर्थः॥ अपिशब्दसूचितं कैमुतिकं

एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति॥ स्थित्वास्यामंतकालेपि ब्रह्मनिर्वाणमृच्छति ७२ इति एषा यथोक्ता
ब्राह्मी ब्रह्मणि भवेयं स्थितिः। सर्वकर्म संन्यस्य ब्रह्मरूपेणैवावस्थानमित्येतत् नैनां स्थितिं प्राप्य लब्ध्वा न विमुह्यति
न मोहं प्राप्नोति स्थित्वास्यां स्थितौ ब्राह्म्यां यथोक्तायामंतकालेप्यंते वयस्यपि ब्रह्मनिर्वाणं ब्रह्मणि निर्वाणं निर्वृतिं मोक्ष
मृच्छति गच्छति किमु वक्तव्यं ब्रह्मचर्यादेव संन्यस्य यावज्जीवं यो ब्रह्मण्येवावतिष्ठते॥ स ब्रह्मनिर्वाणमृच्छतीति॥
इति श्रीमद्भगवद्गीताभाष्ये शंकरभगवत्पादकृतौ द्वितीयोऽध्यायः॥ ॥ ॥

स्यापमाह। किमु वक्तव्यमिति। तदेवं तत्त्वंपदार्थौ तदैक्यं वाक्यार्थस्तज्ज्ञानाद्धेतोर्मुक्तिस्तदुपायश्चेत्येतेषामेकैकत्र श्लो
केषाध्यायेन प्रदर्शितमिति निष्ठाद्वयमुपायोपभूतमध्यायेनासिद्धं ७२ हरिः ॐ तत्सदिति श्रीमत्परमहंसपरिव्राजकाचार्य रम
श्रीमच्छुद्धानंदपूज्यपादशिष्यश्रीमदानंदज्ञानविरचिते श्रीमद्भगवद्गीताभाष्यव्याख्याने द्वितीयोऽध्यायः २ ५९

ॐ पूर्वोत्तराध्याययोः संबंधं वक्तुं पूर्वस्मिन्नध्याये वृत्तमर्थं संक्षिप्यानुवदति ॥ शास्त्रस्येति ॥ गीताशास्त्रे प्रारंभापेक्षितं हेतुफलभू
तं तद्द्वयं भगवतोपदिष्टमित्यर्थः ॥ अधुनार्जुनस्याभिप्रायं निर्दिश्य वृत्तमर्थांतरमनुवदति । तत्रेति ॥ अध्यायद्वये बुद्धिद्वयं निर्धार
णार्थं संगृह्यार्थः ॥ पारमार्थिकेनत्वेषज्ञानेन तन्निष्ठानामशेषकर्मत्यागिनां काम्यमलानां कर्मणामपि प्रतिपत्तिकर्मत्यागं कर्तव्यत्वे
न भगवानुक्तवानित्यर्थः तथापि मोक्षसाधने विकल्पसमुच्चययोरन्यतरस्यापि विवक्षितत्वबुद्ध्या समनंतरमप्रवृत्तिरित्याशंक्याह
उक्तेति ॥ अर्जुनस्य मनसि व्याकुलत्वं प्रश्नबीजं दर्शयितुमुक्तमर्थांतरमनुभाषते अर्जुनाय चेति सांख्यबुद्धिमाश्रित्य कर्मत्या
गमुक्त्वा पुनस्तस्यैव कर्तव्यत्वं कथं मिथो विरुद्धं वाचीत्याशंक्याह । योगेति । यथा सांख्यबुद्धिमाश्रितानां संन्यासद्वारा तन्निष्ठानां

शास्त्रस्य प्रवृत्तिनिवृत्तिविषयभूते द्वे बुद्धी भगवता निर्दिष्टे । सांख्ये बुद्धिर्योगे बुद्धिरिति च । तत्र प्रजहाति यदा कामानि
त्यारभ्याध्यायपरिसमाप्तेः सांख्यबुद्ध्याश्रितानां संन्यासं कर्तव्यमुक्त्वा तेषां तन्निष्ठतयैव च कृतार्थतोक्ता एषा ब्राह्मी स्थि
तिरित्यर्जुनाय च कर्मण्येवाधिकारस्ते मा ते संगोस्त्वकर्मणीति कर्मैव कर्तव्यमुक्तवान्योगबुद्धिमाश्रित्य । न तत एव
ऽऽऽऽश्रेयःप्राप्तिमुक्तवांस्तदेतदालक्ष्य पर्याकुलीभूतबुद्धिरर्जु

कृतार्थत्वोक्तं तथा योगबुद्धिमाश्रित्य कर्म कुर्वतोपि कृतार्थत्वमुक्त
मित्याशंक्याह ॥ न तत एवेति दूरेण ह्यवरं कर्म बुद्धियोगादिति दर्शितादिति शेषः । बुद्धिव्याकुलत्वं प्रश्नबीजं प्रतिलभ्य प्रश्नं
करोतीत्याह । तदेतदिति ॥ साक्षादेव श्रेयःसाधनं ज्ञानं न अन्येभ्यो दर्शितं तदित्युच्यते तद्विपरीतं कर्म स्वस्यानुष्ठेयत्वेनोक्तमे
वेति निर्दिश्यते भगवदुक्तेर्थे संदिह्यमानस्य निर्णयाकांक्षायां प्रश्नप्रवृत्तेरस्ति पूर्वोत्तराध्याययोरुत्थाप्योत्थापकत्वलक्षणः सं

१ स्थिति

१ [illegible]

अर्जुनस्य प्रश्नाभिमितं पर्याकुलत्वं प्रश्नपूर्वकं प्रपंचयति ॥ कथमित्यादिना यदि साक्षाच्छ्रेयःसाधनं सांख्यबुद्धिरिति परमार्थे
न त्वविषयवृद्धौ निष्ठारूपं तदन्यस्मै श्रेयस्मै श्रेयोर्थिने भक्ताय पश्चादपि त्वां मां पुनरभक्तमश्रेयोर्थिनमिव कर्मणि प्रवर्त्तके विपरीते
कथं भग॰ वान्नियोक्तुमर्हतीत्यर्जुनस्य पर्याकुलीभावो युक्त इति संबंधः ॥ ज्ञाननिष्ठातो वैपरीत्यं स्फोरयितुं कर्म विशिनष्टि १०
घोरेति ॥ फले दृष्टहिंसात्र कर्मणि दृष्टेनैकानर्थेन गुरुभ्रातृहिंसादिलक्षणेन संबंधेन बुद्धिभ्रुद्धिरपि वर्तमाने जन्मन्येव फलमित्यभि
प्रेतं मम भक्तस्य श्रेयोर्थिनो नियोगो भगवतातोपपन्नो न भवतीति शेषः ॥ यथोक्तनिमित्तेन प्रश्नस्य युक्तत्वं न दत्तगुणत्वात्तस्येति द्योत

कथं भक्ताय श्रेयोऽर्थिने यत्साक्षाच्छ्रेयःसाधनं सांख्यबुद्धिनिष्ठां श्रावयित्वा मां कर्मणि दृष्टादृष्टानेकानर्थफले
पारंपर्येणाप्यनैकान्तिकश्रेयःप्राप्तिफले नियुञ्ज्यादिति युक्तः पर्याकुलीभावोऽर्जुनस्य । तदनुरूपश्च प्रश्नो ज्यायसी चे
दित्यादिः ॥ प्रश्नापाकरणवाक्यं च भगवतो युक्तं यथोक्तविभागविषये शास्त्रे । केचित्त्वर्जुनस्य प्रश्नार्थमन्यथा कल्पयि
त्वा तत्प्रतिकूलं भगवतः प्रतिवचनं वर्णयन्ति

कमाह । तदनुरूपश्चेति ॥ ज्ञाननिष्ठानां कृतार्थता कर्मनिष्ठानां नूनं नयेऽकृतकृत्यविभागभागि शास्त्रमित्यत्र लोकेऽस्मिन्नित्यादिवा
क्यस्यापि द्योतकत्वं दर्शयति प्रश्नेति । साक्षादेव श्रेयःसाधनममेभ्यो भगवतोऽभिमतं मत्यमिति मत्वाकुलीभूतः सन् पृच्छतीति
स्वाभिप्रायेण संबंधमुक्त्वा वृत्तिकाराभिप्रायं दूषयति ॥ केचित्त्विति ॥ ज्ञानकर्मणोः समुच्चयमवधारयितुं प्रश्नाङ्गीकारे समुच्चयप
यधारणेनैव प्रतिवचनमुचितं । न च तथा भगवता प्रतिवचनमुक्तं न तथा च प्रश्नस्य समुच्चयविषयत्वोपगमात्यन्तमनुक्तेश्चासमुच्च एम
यविषयत्वात्तयोर्मिथो विरोधो वृत्तिकारमते स्यादित्यर्थः ॥ ॥ ५ १०

॥५

किंच केवलप्रश्नप्रतिवचनयोरेव परमतेन परस्परविरोधो न भवत्यपि तु परेषां स्वग्रंथेपि पूर्वापरविरोधोस्तीत्याह यथा चेति। आत्मना वृत्तिकारैरिति यावत् संबंधग्रंथो गीताशास्त्रारंभोपोद्घातः॥ इहेति तृतीयाध्यायारंभं परामृशति। तदेव विवृण्वन्नाकांक्षामाह कथमिति॥ पूर्वापरविरोधं स्फोरयितुं संबंधग्रंथोक्तमर्थमनुवदति॥ तत्रेति॥ परकीया वृत्तिः सप्तम्यास्समुल्लिख्यते संबंधग्रंथे तावदयमर्थ उक्तः इति संबंधः॥ तमेवार्थं विशदयति॥ सर्वेषामिति॥ सर्वकर्मसंन्यासपूर्वकाज्ज्ञानादेव केवलात्कैवल्यमित्यस्मिन्नर्थे शास्त्रस्य पर्यवसानात्तत्र समुच्चयो विवक्षितस्तत्रैवेत्याशंक्याह। पुनरिति॥ उक्तो गीतार्थो वृत्तिकारैरेव कर्मत्या

यथा चात्मना संबंधग्रंथे गीतार्थो निरूपितः न तत्प्रतिकूलं चेह तैः प्रश्नप्रतिवचनयोरर्थं निरूपयंति। कथं। तत्र संबंधग्रंथे तावत्। सर्वेषामाश्रमिणां ज्ञानकर्मणोः समुच्चयो गीताशास्त्रे निश्चितोर्थ इत्युक्तं। पुनर्विशेषितं च यावज्जीवश्रुतिचोदितानि कर्माणि परित्यज्य केवलादेव ज्ञानात्मोक्षं प्राप्यत इत्येतदेकांतेनैव विप्रतिषिद्धमिति॥ इह त्वाश्रमविकल्पं दर्शयता यावज्जीवश्रुतिचोदितानामेव कर्मणां परित्याग उक्तः ७ ॥ ॥ ॥ ॥ ॥

गायोगेन विशेषितत्वात्त्वाविवक्षितो भवितुमुत्सहते तथा च श्रौतानाम्निकर्माणि त्यक्त्वा ज्ञानादेव केवलान्मुक्तिर्भवतीत्येतन्मतं नियमेनैव यावज्जीवश्रुतिभिर्विप्रतिषिद्धत्वान्नाभ्युपगंतुमुचितमित्यर्थः॥ तथापि कथं मिथो विरोधधीरित्याशंक्याह। इह त्विति॥ प्रथमोहि संबंधग्रंथे समुच्चयो गीताप्रतिपाद्यत्वेन वृत्तिकृता प्रतिज्ञातः श्रौतकर्मपरित्यागस्य श्रुतिविरोधादेव न संभवतीत्युक्तं॥ तृतीयाध्यायारंभे पुनः संन्यासिनां ज्ञाननिष्ठा कर्मिणां कर्मनिष्ठेत्याश्रमविभागमभिदधता सर्वप्रतिषिद्धकर्मत्यागाभ्युपगमान्मिथो विरोधो दर्शितः स्यादित्यर्थः॥

ननु यथा भगवानात्मप्रतिपादने न तथैव वृत्तिकृता व्याख्यानमिति न तस्यापराधोऽस्तीत्याशंक्याह ॥ तत्कथमिति नहि भगवान् वि
रुद्धमर्थमभिधत्ते सर्वज्ञस्य परमाप्तस्य विरुद्धार्थवादित्वायोगात् किंतु तदभिप्रायापरिज्ञानादेव व्याख्यातुर्विरुद्धार्थवादि
तेत्यर्थः ॥ भगवतो विरुद्धार्थवादित्वाभावेऽपि श्रोतुर्विरुद्धार्थप्रतिपत्तिप्रतीत्यर्थमाचक्षाणो वृत्तिकारो नापराध्यतीत्याशंक्याह
श्रोता वेति ॥ अर्जुनो हि श्रोता सोऽपि बुद्धिपूर्वकारी भगवदुक्तमेवावधारयन्न विरुद्धमर्थमवधारयितुमर्हतीति तथा च परस्यैव वि
रुद्धार्थवादितेत्यर्थः । विरोधपरिहारायाशंकते ॥ तत्रेति ॥ संबंधग्रंथे हि वृत्तिकारस्येदमभिप्रेतं गृहस्थानामेव सतां परिपक्व

तत्कथमीदृशं विरुद्धमर्थमर्जुनाय ब्रूयात् भगवान् श्रोता वा कथं विरुद्धमर्थमवधारयेत् । तत्रेत्यस्यार्थः गृहस्थानामेव
श्रौतकर्मपरित्यागेन केवलादेव ज्ञानान्मोक्षः प्रतिषिध्यते । न त्वाश्रमांतराणामित्येतदपि सर्वापरविरुद्धमेव ७

ज्ञानमंतरेण यावज्जीवं श्रुतिचोदिताग्निहोत्रादिसाध्यं केवलादेवापाग्निकाज्ज्ञानान्मोक्षमपेक्षमाणानां यावज्जीवा
दिशास्त्रैरसौ निषिध्यते न तु स्वरूपेणैव कर्मत्यागो ज्ञानान्मोक्षो वा निषेद्धुमिष्यते ॥ तत्रापि तूत्तराध्याये कर्मत्यागिनां गृहस्थे
भ्योऽतिरिक्तानामेव केवलाज्ज्ञानान्मोक्षो विवक्ष्यते अतो भिन्नविषयत्वान्निषेधाभ्यनुज्ञानयोर्न विरोधाशंकेत्यर्थः
विषयांतरेण विरोधं दर्शयन्नुत्तरमाह एतदपीति ७ ॥ ॥ ॥

राम
६०

विरोधमेवाकांक्षाद्वारा साधयति ॥ कथमित्यादिना ॥ श्रौतं कर्म गृहस्थानां आवश्यकमनुष्ठेयमित्यनेनाभिप्रायेण तेषां केवलात्मज्ञा
नान्मोक्षो निषिध्यते। ननु गृहस्थानां ज्ञानमात्रान्न मोक्षं प्रति षिध्यात्येषां केवलज्ञानाधीनो मोक्षोऽपि वक्ष्यते आश्रमान्तराणामपि स्मा
र्तेन कर्मणा समुच्चयाभ्युपगमादिति चोदयति ॥ अथेति ॥ एतत्सदपरामृष्टवचनमेवाभिनयति केवलादिति ॥ ननु गृहस्थानां श्रौ
तकर्मरहितस्यापि सति स्मार्ते कर्मणि कुतो ज्ञानस्य केवलत्वं लभ्यते येन निषेधोक्तिरर्थवतीत्यत आह। तत्रेति ॥ प्रकृतवचनमेव सम्मर्थये:

कथं सर्वाश्रमाणां ज्ञानकर्मणोः समुच्चयो गीताशास्त्रे निश्चितोऽर्थ इति प्रतिज्ञायेह कथं न विरुद्धं केवलादेव ज्ञानान्मोक्षं ब्रूया
दाश्रमान्तराणामथ मतं श्रौतकर्मापेक्षयैतद्वचनं केवलादेव ज्ञानात् श्रौतकर्मरहितानां गृहस्थानां मोक्षं प्रतिषिध्यत इति
तत्र गृहस्थानां विद्यमानमपि स्मार्तं कर्माविद्यमानवदुपेक्ष्य ज्ञानादेव केवलादित्युच्यत इत्येतदपि विरुद्धं कथं गृहस्थ
स्यैव स्मार्तकर्मणा समुच्चितात् ज्ञानान्मोक्षः प्रतिषिध्यते न त्वाश्रमान्तराणामिति कथं विकिभिः शक्यमेवमवधारयितुं वे

मथानं हि श्रौतं कर्म तद्राहित्ये सति स्मार्तस्य कर्मणः सतोऽप्यसद्भावमभिप्रेत्य ज्ञानस्य केवलत्वमुक्तमिति युक्ता निषेधोक्तिरित्यर्थः। गृ
हस्थानामेव श्रौतेन कर्मणा समुच्चयो नान्येषामन्येषां तु स्मार्तेनेति पक्षपाते हेत्वभावं मन्वानः सम्परिहरति ॥ एतदपीति ॥ तमेव हे
त्वभावं प्रश्नद्वारा विवृणोति। कथमित्यादिना गृहस्थानां श्रौतस्मार्तकर्मसमुच्चितं ज्ञानं मुक्तिहेतुरित्यभ्युपगमात् केवलस्मार्तकर्मसमु
च्चितात्ततो न मुक्तिरिति निषेधो कल्प्यते ऊर्ध्वरेतसां तु स्मार्तकर्ममात्रसमुच्चितात् ज्ञानान्मुक्तिरिति विभागे नास्ति हेतुरित्यर्थः ७

ऽक्षपाते कारणं नास्तीत्युक्त्वा पक्षपातपरित्यागे कारणमस्तीत्याह ॥ किंचेति । गृहस्थानामपि ब्रह्मज्ञानं स्मार्तैरेव कर्मभिः समुच्चितेन मो
क्षसाधनं ब्रह्मज्ञानं त्वादूर्ध्वरेतसमभ्यवस्थितं ब्रह्मज्ञानं विहितमिति पक्षपातस्यागे हेतुमुपपादयति ॥ यदीत्यादिना । परिग्रहस्याग्नेर्ब्रह्मज्ञाने
स्मार्तैरेव कर्मभिः समुच्चितं मोक्षहेतुरिति विवक्षितं तत्र गृहानाग्नेतियावज्जीवश्रुतिविहितश्रौतपरित्यागे स्मार्तैरपि कर्मभिः समुच्चितेन मदीयपक्षे
नेमोक्षसाधनं विवक्षितेन तत्रासिद्धसाध्यतेतिभागुरुमभिप्रेत्य चोदयति ॥ अथेति । आश्रमान्तराणां तर्हि केवलादेव ज्ञानान्मुक्तिरि

किंच परिमोक्षसाधनत्वेन स्मार्तानि कर्माण्यूर्ध्वरेतसां समुच्चीयन्ते न तथा गृहस्थस्यापीष्यन्तां स्मार्तैरेव समुच्चयो न श्रौतैः अथ
श्रौतैः स्मार्तैश्च गृहस्थस्यैव समुच्चयो मोक्षाय । ऊर्ध्वरेतसां तु स्मार्तकर्ममात्रसमुच्चिताज्ज्ञानान्मोक्ष इति नैवं सति गृ
हस्थस्यायासबाहुल्यं श्रौतस्मार्तैश्च बहुदुःखरूपकर्मभिश्चिरस्यारोपितं स्यात् अथ गृहस्थस्यैवायासबाहुल्यकारणान्मोक्षः
स्यादाश्रमान्तराणां श्रौतनित्यकर्मरहितत्वादिति ७

तिभागुरुविरोधनादवस्थामित्याशंक्याह ऊर्ध्वरेतसामिति ॥ यथोक्ते विभागे गार्हस्थ्यं क्लेशात्मकं कर्मबाहुल्यादनुपादेयमापद्येत
इति दूषयति ॥ तत्रेति ॥ साधनभूयस्त्वफलभूयस्त्वमिति निष्कंपमाश्रित्य शंकते । अथेति क्लेशबाहुल्येऽपि तेन श्रौतस्मार्तैर्बहुकर्म
तस्यानुष्ठानाद्गृहस्थस्य मोक्षः स्यादेवेत्यर्थः । एवकारनिरस्यं दर्शयति ॥ नाश्रमान्तराणामिति । तेषां नास्ति मुक्तिरित्यत्र यावज्जीवा
दिश्रुतिविहितावश्यानुष्ठेयकर्मरहितत्वं हेतुमुपपादयति श्रौतेति ७ ॥ ॥ ॥

ज्ञात्त्वविरोधेन्यायस्य निवर्त्तकत्वात्तमभिप्रेत्याह सर्वपूर्त्ति ॥ तत्पीति । ऐकाश्रम्यमाचार्या आहुर्गार्हस्थ्यस्यैव प्राधान्यमाश्रित्य न विकल्पो धारीति वि
षयं कर्मसंन्यासविधानमित्याशंक्याह ॥ ज्ञानांगत्वेनेति ॥ नखल्वत्र न विकल्पता नाम धातृणां संन्यासः श्रवणाद्यावृत्तिद्वारा ज्ञानांग
गं तु मलं तेषां श्रवणाद्यभ्यासात् सामर्थ्यादितः श्रुत्यादिविरोधेनाहि गार्हस्थ्यस्य प्राधान्यमित्यर्थः । तस्य प्राधान्याभावे हेतुत्वेनतर
माह । आश्रमेति । ब्रह्मचर्यं समाप्य गृही भवेद्गृहाद्वनी भूत्वा प्रव्रजेद्यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेद्गृहाद्वा वनाद्वेति श्रुतेस्तस्या श्र
श्रमविकल्पमेके ब्रुवते यमिच्छेत्तमावसेदित्यादिस्मृतौ चाश्रमाणां समुच्चयेन विकल्पेन चाश्रमान्तरमिष्टं तं प्रति विधानात् नगा

प तदप्यमतं सर्वोपनिषदितिहासपुराणयोगशास्त्रेषु च ज्ञानांगत्वेन मुमुक्षोः सर्वकर्मसंन्यासविधानादाश्रमविकल्प
समुच्चयविधानाच्च श्रुतिस्मृत्योः सिद्धमिदं सर्वाश्रमिणां ज्ञानकर्मणोः समुच्चयः न मुमुक्षोः सर्वकर्मसंन्यासविधानाच्च मु२
प्यामायभिशापचंर्य्यचरंति तस्मान्न्यासमेषां तपसामतिरिक्तमाहुः ❁ ॥ ॥ ❁ ॥ ॥ ❁ ॥ ॥

र्हस्थ्यस्य प्रधानत्वमित्यर्थः ॥ यदि सर्वेषामाश्रमाणां श्रुतिस्मृतिफलत्वं नर्हि तत्तदाश्रमविहितकर्मणां तु ज्ञानेन समुच्चयः सि
ध्यतीति शंकते ॥ सिद्धमिदमिति ॥ यद्यपि ज्ञानोत्पत्तावाश्रमकर्मणां साधनत्वं तथापि ज्ञानमुत्पन्नं नैव फले सहकारित्वेन तान्यपे
क्षते अन्यथा संन्यासविध्यनुपपत्तेरिति दूषयति । न मुमुक्षोरिति ॥ संन्यासविधानमेवानुक्रामति व्युत्थायेत्यादिना एषणाभ्यो
व्युत्थानोत्थानंतत्परित्यागः आश्रमसंपत्त्यनंतरं तत्र विहितं धर्मकलापानुष्ठानमपि कर्तव्यमित्याह अपेतेति । प्रागुक्तानां सर्वा
दीनामल्पफलत्वात् संन्यासस्य ज्ञानद्वारमोक्षफलत्वादित्याहित्याह ॥ तस्मादिति ॥ अतिरिक्तमतिशायवत्त्वं महाफलमिति यावत्

गी॰भा॰टी
६३

अकृतकर्मभ्यःसकाशान्न्यासएवातिशयवानासीदित्युक्तेऽर्थेवाक्यांतरंपठति॥न्यासएवेति॥लोकत्रयहेतुसाधनत्रयंपरित्यज्यसंन्यस्ता सा
राह्निरन्तःसंन्यासः सर्वकारात्मज्ञानादेवप्राप्नुवंतोमोक्षमित्याह॥नकर्मणेति॥सन्निवेशेनास्तिकर्मापेक्षासत्स्यांमेमोक्षाकांक्षायांपे
क्षानुपपत्तेरित्याह ब्रह्मचर्यादेवेति इत्याद्याःसर्वकर्मसंन्यासविधायिनःश्रुतयोभवन्तीतिशेषः॥आत्मानमेवलोकमि
च्छन्तःप्रव्रजंतीत्यादिवाक्यसंग्रहार्थमादिपदं॥नत्रैवस्मृतीरुदाहरति॥त्यजेति॥धर्माधर्मयोःससाधनयोःसंसारारंभकत्वान्मुमु
क्षुणात्यागेप्रयतितव्यमित्यर्थः॥सत्यानृताभिमानस्यापितत्वतःस्वरूपसंबंधाभावात्साम्यत्वमविशिष्टमित्याह येनेति॥अनुभ

न्यासएवात्यरेचयदितिनकर्मणानप्रजयाधनेनत्यागेनैकेअमृतत्वमानशुरितिचब्रह्मचर्यादेवप्रव्रजेदित्याद्याःश्रुतयः ब्र
त्यजधर्ममधर्मंचउभेसत्यानृतेत्यज उभेसत्यानृतेत्यक्त्वायेनत्यजसितत्यज॥संसारमेवनिःसारंदृष्ट्वासारदिदृक्षयाप्र ९
व्रजंत्यकृतोद्वाहाःपरंवैराग्यमाश्रिताः इतिबृहस्पतिः।परमात्मनियोरक्तोयोरक्तो॰परस्मात्मनिसर्वैषणाविनिर्मु॰ रु
क्तःसभैक्ष्यंभोक्तुमर्हतिकर्मणाबध्यतेजंतुर्विद्ययाचविमुच्यते॥तस्मात्कर्मनकुर्वंतियतयःपारदर्शिनः इतिशुकानुशा

वानुसारेणाममानुत्तमपुरुषस्यसंसारस्यदुःखफलत्वमालक्ष्यमोक्षहेतुसम्यग्ज्ञानसिद्ध्येब्रह्मचर्यादेवपारिव्राज्यमनुष्ठेय
मित्युस्मृतिविधिमुपन्यस्यति॥संसारमिति तत्वज्ञानमुद्दिश्यब्रह्मचर्यादेवकर्मसंन्यासेसामग्रीमभिनोविनियोगविधिंसूच एम
यति।परमिति।ज्ञानकर्मणोरसमुच्चयार्थंफलविभागेकथयति कर्मणेतितदुक्तंविभागमनूद्यज्ञाननिष्ठानांकर्मसंन्यासस्यकर्त त्व शे
व्यत्वमाह॥तस्मादिति॥ ॥ ॥ ॥

वाक्यशेषेपि सर्वकर्मसंन्यासो विवक्षितोस्तीत्याह। इष्टापीति। ज्ञानार्थिनो मुमुक्षोः संन्यासविध्यनुपपत्तिर्बाधितं समुच्चयवचनमित्युक्तं। इदा
नीं मोक्षस्वभावालोचनयापि समुच्चयवचनमनुचितमित्याह। मोक्षस्येति॥ अकुर्वन्विहितं कर्म निंदितं च समाचरन्। प्रसज्जंश्चे
न्द्रियार्थेषु नरः पतनमृच्छतीति स्मृतेर्मुमुक्षूणामपि प्रत्यवायनिवृत्तये कर्तव्यं नित्यकर्मेत्याशंकते॥ नित्यानीति॥ यो यस्मिन्क
स्मृत४ र्मण्यधिकृतस्तस्य तदकरणात्प्रत्यवायो भवति न तु कर्मानधिकारिणः संन्यासिनस्तदकरणात्प्रत्यवायः संभवतीति परिहरति नासंन्यासी स ४

इष्टापि च सर्वकर्माणि मनसा संन्यस्येत्यादिर्मोक्षस्य चाकार्यत्वान्मुमुक्षोः सर्वकर्माणि न घटंति तानि प्रत्यवायपरिहारार्थानीति
चेन्नासंन्यासिविषयत्वात्प्रत्यवायप्राप्तेः न त्वग्निकार्याद्यकरणात्संन्यासिनः प्रत्यवायः कल्पयितुं शक्यः यथा प्रत्यवा
रिणामसंन्यासिनामपि न कर्मणां तावन्नित्यानामकरणात् अभावाद्भावरूपस्य प्रत्यवायस्योत्पत्तिः कल्पयितुं शक्या
अयुक्ता चं कथं मस्ततः संन्यासंभवत्कृतेर्विहिताकरणात्संभाव्यमपि प्रत्यवायं ब्रूयात्वेदस्तर्हानर्थकरणे वेदोऽप्रमाण वे ५
मित्युक्तं स्यात् ७

त्ति॥ तदेतस्य दूषयति। नहीति॥ समिदाधानाध्ययनाद्यकरणात्प्रत्यवायः संन्यासिनो नास्तीत्यत्र व्यतिरेकोदाहरणमाह॥ यथेति॥ अक
रणात्प्रत्यवायोस्तीत्यभ्युपेत्योक्तं संभवति प्रतिषिद्धकरणादेव प्रत्यवायो न त्वकरणादभावाद्भावोत्पत्तेर्लोकवेदविरुद्धत्वादित्याह॥ अ
संन्यासिनामपीति। ननु नित्यकर्मविधायी वेदस्तदकरणात्प्रत्यवायो भवतीति ब्रवीति तत्कथमकरणात्प्रत्यवायो न भवतीति
श्रुतिमाश्रित्योच्यते श्रुत्यंतराविरोधार्थमिति तत्राह॥ यदीति ५

५ ७

गी०भा०टी
६४

विहितस्याकरणेऽसत्यनर्थप्राप्तेर्नित्यकर्मविधायी वेदोऽनर्थकरत्वेनाप्रमाणमित्याशंक्याह ॥ विहितस्येति ॥ नविहितस्याकरणेऽपि प्र
त्यवायप्राप्तिस्तस्य[illegible]फलं भवतेष्यते प्रमादिनापि न पापपीडादिदुःखं तु प्रत्यक्षमेवाकरणे च प्रत्यवायोऽसतिरिक्तं भयं यथापि पुरुषस्या
नर्थकरो वेदोऽप्रमाणमेव स्यादित्यर्थः ॥ नैवं त्वभावस्यापि भावोत्सादकत्वमाप्यमीवेदः संपादयिष्यंति तथा च विहिताकरणनिमित्त
प्रत्यवायपरिहारो विविहितकरणे फलिष्यतीति नेत्याह ॥ तथा चेति लोकप्रसिद्धपदार्थशक्त्या श्रवणेन शास्त्रप्रवृत्तसंगे कार
२ दर्शवत्राम्याधानायोगाज्ज्ञापकमेव शास्त्रमित्यर्थः कारकत्वे च तस्याप्रामाण्यमप्रसक्तमित्याशंक्याह ॥ कारकमिति ॥ भवतु शास्त्र

विहितस्याकरणाकरणयोर्दुःखमात्रफलत्वात् ॥ तथा च कारकं शास्त्रं न ज्ञापकमित्यनुपपन्नार्थकल्पितं न स्यात् न चेत्तर्हि दृष्टं तस्मा
त्संन्यासिनां न कर्मणि अतो ज्ञानकर्मणोः समुच्चयानुपपत्तिः ॥ ज्यायसी चेदित्यर्जुनस्य प्रश्नानुपपत्तेश्च परिहृतं भगवता द्वि
तीयेऽध्याये ज्ञाने कर्म च समुच्चितं तत्र एकेनानुष्ठेयमित्युक्तं स्यात् ततो[illegible]र्जुनस्य प्रश्नोऽनुपपन्नो ज्यायसी चेत्कर्मणस्ते मता बुद्धि
॥ रिति ॥

स्याप्रामाण्यमित्याशंक्यापौरुषेयत्वेनपाः ज्ञेषदोषानागंधित्वान्नैवमित्याह ॥ न चेति ॥ अनिर्वाच्यानुपलंभस्यांते वेदेन भवार्द्धज्ञाने
कारणं समीहितसाधनज्ञानं तु चरणमात्रादिमहतीति कारणमित्यंगीकृत्योपसंहरति ॥ तस्मादिति ॥ अकरणात्प्रत्यवायोऽसंभवस्त
च्छब्दार्थः संन्यासिनां ज्ञाननिष्ठानां कर्मसंन्यासित्वादेव कर्मासंभवे फलितमाह ॥ अत इति समुच्चयानुपपत्तौ हेत्वंतरमाह ॥ ज्यायसी
चेदिति प्रश्नानुपपत्तिमेव प्रपंचयति यदीति ८ ॥

॥ ॥

एम
६४

समुच्चयोपदेशे प्रश्नैकदेशानुपपत्तेश्चाननुरूपदेशेऽपपत्तिरित्याह। अर्जुनाय चेदिति। कर्मण्येवाधिकारस्ते मा फलेषु कदाचनेत्य
र्जुनं प्रत्युपदेशात्तं प्रति ज्यायसी बुद्धिर्मतेति युक्तं तत्किमित्याद्युपालंभवचनमित्याशंक्याह॥ नचेति॥ येनं कस्मैचेनं ज्यायसी
वेदित्यारभ्य तत्किं कर्मणीत्युपालंभात्मकः प्रश्नः स्यात्तथा न युक्तं कल्पयितुं एषामंतेभिहिता सांख्ये बुद्धिरिति वचनविरोधादि
ति योजना। कस्मिन्पक्षे तर्हि प्रश्नस्योपपत्तिरित्याशंक्याह॥ यदीति॥ भगवदुक्तेर्थे सम्यग्विवेकाभावात्प्रश्नः स्यादित्यारंभ्य

अर्जुनाय चेद्बुद्धिकर्मणी त्वयानुष्ठेया इत्युक्तेऽपि विवेकतः कर्मणो ज्यायसी बुद्धिः सा प्युक्तेवेति तत्किं कर्मणि घोरे
मां नियोजयसि इति प्रश्नो वा उपालंभो वा न कथंचनोपपद्यते॥ न चार्जुनस्यैव ज्यायसी बुद्धिर्नोक्तेति भगवतोक्तेपूर्व नुष्ठे
मिति कल्पयितुं युक्तं येन ज्यायसी चेदिति प्रश्नः स्यात् यदि पुनरेकस्य पुरुषस्य ज्ञानकर्मणोर्विरोधात् युगपदनुष्ठानं न
संभवतीति भिन्नपुरुषानुष्ठेयत्वेन भगवतः प्रतिवचनं नोपपद्यते। न चाज्ञाननिमित्तं भगवतः प्रतिवचनं कल्प्यं। अस्मा
च्चाभिन्नपुरुषानुष्ठेयत्वेन ज्ञानकर्मनिष्ठयोर्भगवतः प्रतिवचनदर्शनात्॥ ज्ञानकर्मणोः समुच्चयानुपपत्तेः केवलादेव
ज्ञानान्मोक्षः इत्येषोऽर्थो निश्चितो गीतासु सर्वोपनिषत्सु च॥ ६२॥

वोत्मे वाविकविवस्यास्मारयति॥ अविवेकनर
ति। भगवतोपि प्रतिवचनमज्ञाननिमित्तं प्रश्नानुरूपत्वादित्याशंक्याधिकं दर्शयति॥ न चेति। भगवतः सर्वज्ञत्वप्रसिद्धेर्वि
रोधाद्दज्ञानाध्यानप्रतिवचनायोगादित्यर्थः इतश्च समुच्चयः शास्त्रार्थो न भवतीत्याह॥ अस्माच्चेति॥ कस्तर्हि शास्त्रार्थो वि
वाक्षितस्तत्राह केवलादिति॥ ६२ श्रीरामनारायण॥ ० ६२

५ प्रश्नत्वं भगवतोऽर्थभ्रमकं स्यात् ततोऽयं प्रश्नोऽवद्यं ज्यायसी चेत्यादिरविवेकतः प्रश्नकल्पनायामपि ज्ञानकर्मणोर्भिन्नपुरुषानुष्ठे ५

भा०टी

६८

भं२

ज्ञानकर्मणोः समुच्चयानुपपत्तौ कारणांतरमाह ॥ ज्ञानेति ॥ वाक्यशेषवशादपि समुच्चयस्याशास्त्रार्थत्वमाह ॥ कुरु कर्मेति ॥ प्राथमिकेन संबंधग्रंथेन समस्तशास्त्रार्थसंग्राहकेण तद्विवरणात्मनोऽस्य संदर्भस्यागतिपौनरुक्त्यमिति मत्वा प्रति । पदं व्याख्यातुं प्रश्नैकदेशमुत्थापयति ॥ ज्यायसी चेदिति ॥ चेदाश्चेत्समाराणामिति वक्ष्येदित्यनिश्चयार्थत्वं व्यावर्तयति ॥ यदीति ॥ बुद्धिशब्दस्यांतःकरणविषयत्वं व्यवच्छिनत्ति ॥ ज्ञानमिति ॥ पूर्वार्द्धस्याक्षरयोजनामुक्त्वा समुच्चयाभावे तात्पर्यमाह ॥ यदीति ॥ इष्टे भग

ते

ज्ञानकर्मणोरेकं वद निश्चित्येति चैकविषये वाक्यार्थे नानुपपन्नोभयोः संभवे । कुरु कर्मैव तस्मात्त्वमिति च ज्ञाननिष्ठासंभवमर्जुनस्यावधारणेन दर्शयिष्यति ॥ ६ ॥ ज्यायसी चेत्कर्मणस्ते मता बुद्धिर्जनार्दन । तत्किं कर्मणि घोरे मां नियोजयसि केशव ॥ २ ॥ ज्यायसी श्रेयसी चेद्यदि कर्मणः सकाशात्ते तव मताभिप्रेता बुद्धिर्ज्ञानं हे जनार्दन ॥ यदि बुद्धिकर्मणी समुच्चिते इष्टे तर्ह्येकं श्रेयःसाधनमिति कर्मणो ज्यायसी बुद्धिरिति । एककर्मणोऽतिरिक्तकरणं बुद्धेरनुपपन्नमर्जुनेनोक्तं स्यान्नहि तदेवं तस्मात्फलतोऽतिरिक्तं स्यात् ॥ ६ ॥ ० ० ०

वते इति शेषः । एकं ज्ञानं कर्म वा समुच्चितमिति यावत् ॥ ज्ञानकर्मणोरभीष्टे समुच्चये समुच्चितस्य श्रेयःसाधनत्वे कर्मणः सकाशात् ज्ञानस्य पृथक्करणमफलमित्यर्थः । एकमपि साधनं फलतोऽतिरिक्तं किं न स्यादित्याशंक्याह नहीति न च केवलात्कर्मणो ज्ञानस्य केवलस्य फलतोऽतिरिक्तत्वं विवक्षितं । त्वया पृथक्करणं समुच्चयपक्षे मते एकं श्रेयःसाधनत्वानभ्युपगमादिति भावः ॥ ७ ॥ ॥

एम

६५

परोक्तस्येवोत्तरार्द्धस्यापि समुच्चयपक्षे तुल्यानुपपत्तिरित्याह तथेति ॥ हेतुरात्यवचनं कर्मसत्त्वकर्मणःसकाशाद्बुद्धिः श्रेयस्करी भगवतोक्ता कर्मैव
श्रेष्ठः सकाशाच्छ्रेयस्करी मुक्तं तथापि तद्वकर्मैक मर्पयेवाधिकारस्ते मा फलेष्विति शिष्यं भक्तं च मां मानितिकुर्विति भगवद्वचनात्तिपादयति तत्र कारणा
नुपलंभादसंभृतमतिक्रूरे कर्मणि भगवतो मम नियोजनमिति पदच्छेदेनोऽब्रवीति तत्र च समुच्चयपक्षेऽनुपपन्नमस्याहित्वम्यवः पंक्तु वृतिकौ सन्दं स्त्रोने
श्रोतेन स्मार्त्तेन च कर्मणा समुच्चयो गृहस्थानां श्रेयःसाधनं तरेषां स्मार्त्तेनैवेति भगवतोक्तमन्येनेन च निर्द्धारितमित्तिनदेत्ता। रस्त्रुपहतित्ति ॥ अ

तथा कर्मणःश्रेयस्करी भगवतोक्ता बुद्धिरश्रेयस्करं च कर्म कुर्विति मां प्रति पादयति तत्किं न कारणमिति भगवत उपालंभमिव कुर्वं
श्लो किं कस्मात्कर्मणि घोरे क्रूरे हिंसालक्षणे मां नियोजयसि केशवेति च यदाह तच्च नोपपद्यते। अथ स्मार्त्तेनैव कर्मणा समुच्चयः
श्लो१ सर्वेषां भगवतोक्तो नेन चावधारितस्तत्किं कर्मणि घोरे मां नियोजयसीत्यादिकमयं वचनं नफलं किंच ॥ व्यामिश्रेणेव वाक्येन बुद्धिं मो
हयसीव मे तदेकं वद निश्चित्य येन श्रेयोऽहमाप्नुयां २ व्यामिश्रेणेव यद्यपि विविक्ताभिधायी भगवांस्तथापि मम मंदबुद्धेर्व्यामिश्र
मिव भगवद्वाक्यं प्रतिभातीति तेन मम बुद्धिं मोहयसीवेति। मम मंदबुद्धेर्व्यामोहापनयनाय हि प्रवृत्तस्त्वं कथं मोहयसीत्यतो ब्रवीमि बुद्धिं मो
॥ हयसीति यदुक्तं ७ वे

येति ॥ तत्रापि तत्किमित्याद्युपालंभवचनमनुपपन्नं कर्ममात्रसमुच्चयवादिनो भगवतो नियोजनाभावादिति ह
यथेति ॥ तत्किमिति १ इतश्चायमर्थः समुच्चयानुसारी न भवतीत्याह बुद्धिं चेति ॥ भगवतो विविक्तार्थवादित्वादयुक्तं व्यामिश्रेणेत्यादिवचनमि
त्याशंक्याह। यद्यपीति ॥ यदि भगवतो वचनं संकीर्णमिव ते भाति तर्हि तेन त्वदीयबुद्धिव्यामोहनं मन्दबुद्धेस्तवापि व्यवस्थितमिति किमिति मोहयसी
वेत्युच्यते तत्राह ममेति ७

ज्ञानकर्मणोर्मिथोविरोधाद्युगपदेकपुरुषानुष्ठेयतयाभिन्नकर्तृकैकव्येनैतत्प्रायान्वतयोरन्यतरस्मिन्नेवत्वंनियुक्तोनत्वितिबुद्धिव्यामोह
नमभिमतमितिभगवतोमतमनुवदति। त्वन्विति॥ तदेकमितिसार्द्धश्लोकाद्वयेनोत्तरमाह। लोकेति। उक्तंभगवन्मतंसम्यगपरामृश्यते॥ एव
मित्युक्तप्रकारोक्तिः। एकमित्युक्तमेवस्फुटयति॥ बुद्धिमिति॥ निश्चयप्रकारंप्रकटयति। इदमित्थमितियोग्यत्वंस्फुरयति बुद्धीति अस्माद्धि
क्षत्रियस्यमनोन्तःकरणस्यदेहस्यशान्तेः समरसमारंभावस्थायाश्चेदमेवज्ञानंकर्मवानुष्ठेयमितिनिर्द्धार्यवदेत्यर्थः निश्चित्यान्तरे
णोक्तेननश्रोतुः श्रेयोवाप्तिफलमाह येनेति॥ तदेकमित्यादिनावान्यस्याः शेषस्यमर्थमुक्त्वासमुच्चयस्यशास्त्रार्थत्वाभावेतात्पर्यमाह

त्वन्तुभिन्नकर्तृकयोर्ज्ञानकर्मणोरेकपुरुषानुष्ठानासंभवंपरिमन्यसे। नैवंसतितत्रयोरेकंतुहिकर्मणार्हमेवार्जुनस्ययोग्यं
बुद्धिशान्त्यवस्थानुरूपमितिनिश्चित्यवद। येनैवंज्ञानेनकर्मणावाऽन्यतरेणाश्रेयोऽहमाप्नुयांप्राप्नुयामितिपदयुक्तं तदपिनोप
पद्यते परिहितकर्मनिष्ठायांगुणीभूतमपिज्ञानंभगवतोक्तंस्यात्। कथंतयोरेकंवदस्येकविषयेवार्जुनस्यशुश्रूषास्या
त् नहिभगव तोक्तमन्यतरदेवज्ञानंकर्मणोवेत्स्यामिनैवहृदयमिति॥ येनोभयप्राप्त्यसंभवमाशङ्क्यमन्यमानएकमेवमा
।।येयेत

परिहृतेति गुणीभूतमपीत्यादिनाप्रधानभूतमपिचेतिविवक्षितं ननूभयप्राप्त्यसंभवमाशङ्क्यमन्यमानस्यार्जुनस्यान्यतरविषयाशुश्रू
षाभविष्यतीत्याह॥ नहीति यथोक्तभगवद्वचनाभावेद्वयप्राप्त्यसंभवदुर्ज्ञानान्यतरप्रार्थनासंभवतीत्याह॥ येनेति नह्येनया
विधंभगवद्वचनंभगवतेष्टं॥ भगवतःसमुच्चयपक्षादित्वांगीकारादतस्तदभावादुक्तदुर्ज्ञानयुक्त्यन्यतरप्रार्थनेत्यर्थः॥ ॥ ॥

समुच्चपविरोधितयाप्रश्नंआरभ्यापतद्विरोधयित्वैनेवप्रतिवचनमुत्थापयति ॥ प्रश्नेति येयंप्रवक्तारभिनिरुपलभ्यतेतत्रयेयेत्रैवर्णिकाः
ज्ञानंकर्मवाशास्त्रीयमनुष्ठातुमधिक्रियन्तेतेषांद्वयीस्थितिर्मयाप्रोक्तेतिपूर्वार्द्धंयोजयति ॥ लोकेस्मिन्निति ॥ स्थितिमेवव्याकरोति अनुष्ठे
येति ॥ सर्वप्रवचनमसंगदर्शीयस्यवक्तारंविशिनष्टि ॥ सर्गादाविति ॥ प्रवचनस्ययथार्थत्वशंकांवारयति ॥ सर्वज्ञेनेति ॥ अर्जुनस्यभगवदुप

प्रश्नानुरूपमेवप्रतिवचनं ॥ श्रीभगवानुवाच लोकेस्मिन्द्विविधानिष्ठापुराप्रोक्तामयानघ ॥ ज्ञानयोगेनसांख्यानांकर्मयोगे
नं५ नयोगिनां ३ लोकेऽस्मिन्शास्त्रार्थानुष्ठानाधिकृतानांत्रैवर्णिकानांद्विविधाद्विप्रकारानिष्ठास्थितिरनुष्ठेयतात्पर्यंपुरासर्वेस
र्गादौप्रजाःसृष्ट्वातासामभ्युदयनिःश्रेयसप्राप्तिसाधनंवेदार्थसंप्रदायमाविःकुर्वताप्रोक्तामयासर्वज्ञेनेश्वरेणेतिहेअन
घअपापकासाद्विविधानिष्ठेत्याह । तत्रज्ञानयोगेनज्ञानमेवयोगस्तेनज्ञानयोगेनसांख्यानामात्मानात्मविषयविवेकज्ञा
नवतांब्रह्मचर्याश्रमादेवकृतसंन्यासानांवेदांतविज्ञानसुनिश्चितार्थानांपरमहंसपरिव्राजकानांब्रह्मण्येवावस्थितानांनि
ष्ठाप्रोक्ता ८

पदेशाश्रवणयोग्यत्वंसूचयति । अनघेति । निर्धारणार्थात्रेतिसप्तमी ज्ञानंपरमार्थवस्तुविषयंतदेवयोगश्चित्तंयुज्यतेऽनेनब्रह्मणे
तिव्युत्पत्तेस्तेननिष्ठेत्यनुवर्तते ॥ उक्तज्ञानोपायमुपादिदिक्षुःसांख्यशब्दार्थमाह ॥ आत्मेति ॥ तेषामेवकर्मनिष्ठत्वंव्यावर्तयति ॥ ब्र
ह्मचर्येति ॥ तेषांजपादिपारवश्येनश्रवणादिपराङ्मुखत्वंपराकरोति ॥ वेदान्तेति ॥ उक्तविशेषणवतांमुख्यसंन्यासित्वेनफलवत्त्वं
दर्शयति ॥ परमहंसेति ॥

गी० भा० टी०
ध्या
६७

कर्मवर्णाश्रमविहितंधर्माख्यंतदेवयुज्यतेऽनेनाभ्युदयेनेतियोगस्तेननिष्ठाकर्मिणांप्रोक्तेत्यनुषंगंदर्शयन्नाह ॥ कर्मैवेत्यादिना ए
वंप्रतिवचनवाक्यस्थान्यक्षराणिव्याख्यायतस्यैवतात्पर्यंकथयति ॥ यदिचेति ॥ इष्टस्यापिदुर्बोधत्वमाशंक्याह ॥ उक्तमिति ॥ ज्ञानस्या
पिमलविकलतयाविभ्रमत्वमाशंक्याह । वेदेष्विति ॥ तस्याशिष्यत्वंबुध्वान्यथाकथनमित्याशंक्याह । उपसन्नायेति ॥ तथापितस्मि
न्नौदासीन्यादन्यथोक्तिरित्याशंक्याह । प्रियायेति । ब्रवीतिचभिन्नपुरुषकर्तृकंनिष्ठाद्वयंतेनसमुच्चयोभगवदभीष्टःशास्त्रार्थोनभव

कर्मयोगेनकर्मैवयोगः कर्मयोगस्तेनकर्मयोगेनयोगिनांकर्मिणांनिष्ठाप्रोक्तेत्यर्थः ॥ यदिचैकेनपुरुषेणैकस्मैपुरुषार्थायज्ञा
नंकर्मचसमुच्चित्यानुष्ठेयंभगवतेष्टमुक्तंवक्ष्यमाणंवागीतासुवेदेषुचोक्तं ॥ कथमिहार्जुनायोपसन्नायप्रियायविशिष्टभि
न्नपुरुषकर्तृकएवज्ञानकर्मनिष्ठेब्रूयाद्यदिपुनः अर्जुनोज्ञानंकर्मचद्वयंश्रुत्वास्वयमेवानुष्ठास्यत्यन्येषांतुभिन्नपुरुषा
नुष्ठेयतांवक्ष्यामीतिमतंभगवतःकल्प्येततदारागद्वेषवानप्रमा[illegible]णभूतोप्रमाणांभूतोंभगवानकल्पितःस्यात् ॥ तच्चायुक्तं ।
तस्मात्कयापियुक्त्यान्नसमुच्चयोज्ञानकर्मणोः ७

त तीतिशेषः नन्वर्जुनस्यमेधसःसर्वकारित्वाज्ज्ञानकर्मश्रवणानंतरमुभयोर्निर्देशानुपपत्त्यासमुच्चयानुष्ठानंसंपत्स्यतेतद्व्यतिरिक्तानां
तुज्ञानकर्मणोर्भिन्नपुरुषानुष्ठेयत्वंश्रुत्वामत्तोकतरदनुष्ठानंभविष्यतीतिभगवतोमतंकल्प्यतेतस्यार्जुनेनुरागातिरेकाद्धितोपवचनासंभा
वादितितत्राह ॥ यदिपुनरिति ॥ अप्रमाणभूतत्वमनाप्तत्वंनचभगवतोरागादिमत्वेनानाप्तत्वंयुक्तं । समंसर्वेषुभूतेषुतिष्ठंतमित्यादि
विरोधादित्याह ॥ तच्चेति निष्ठाद्वयस्यभिन्नपुरुषानुष्ठेयत्वनिर्देशफलमुपसंहरति । तस्मादिति ७ ॥ ॥ ॥

राम
६७

किमितिभगवता बुद्धेर्ज्यायस्त्वं ज्यायसी चेदित्यत्रोक्तमुपेक्षितमितिनत्वाह्लापरमर्जुनेनेति किंच ज्ञाननिष्ठायां संन्यासिनामेवाधिकारोगे
भैवतोभिप्रेतोःन्यथानरीपपविभागवचनविरोधादितिविभागवचनसामर्थ्यसिद्धमर्थमाह तस्याश्चेति तर्हि विभागवचनानुरोधाद
र्जुनस्यापिसंन्यासपूर्विकायांज्ञाननिष्ठायामेवाधिकारोभविष्यतिनेत्याह मांचेति बुद्धेर्ज्यायस्त्वमुपेक्ष्यापीति चकारार्थः। अर्जुनमाल
क्ष्यभगवानाहेतिसंबंधः॥ अंतरेणापिकर्माणिश्रवणादिभिर्ज्ञानावाप्तिर्भविष्यतीतिपराबुद्धिमनुरुध्याचिंतितानहि॥ कर्मेति॥ विभा

पर्जुनेनोक्तकर्मणोज्यायस्त्वंबुद्धेस्तच्चाविवक्षितमनिराकरणात्। तस्याश्चसंन्यासिनैवानुष्ठेयत्वंभिन्नपुरुषानुष्ठेयत्व
च नान्भागवतमेवानुमतमितिगम्यते ४ मांच॥ वैयकारणेकर्मण्येवनियोजयसीतिविषण्णमानसमर्जुनं कर्मनारभस्वे
वंमत्वानमालक्ष्याहभगवान् नकर्मणामनारंभादिति अथवाज्ञानकर्मनिष्ठयोःपरस्परविरोधादेकेनपुरुषेणयुगपदनु
ष्ठानुमशक्यत्वेसतीतरेतरानपेक्षयोरेवपुरुषार्थहेतुत्वेप्राप्तेकर्मनिष्ठायाज्ञाननिष्ठाप्राप्तिहेतुत्वेनपुरुषार्थहेतुत्वं न
तुस्वातंत्र्येण॥ ज्ञाननिष्ठातुकर्मनिष्ठोपायलब्धात्मिकासतीस्वातंत्र्येणपुरुषार्थहेतुरन्यानपेक्षेत्येतमर्थंप्रदर्शयन्नाहभगवा

मरपेक्षनेनेत्याह। अथेति॥

गवच्चवचशारसमुच्चयपक्षेडुभयोरपिज्ञानकर्मणोःस्वातंत्र्येणपुरुषार्थहेतुत्वमन्यथाकर्मवज्ज्ञानमपिनस्वातंत्र्येणपुरुषार्थसाधपे
रित्याशंक्यसंबंधात्तस्माह अथवेति। तर्हिज्ञाननिष्ठापिकर्मनिष्ठावन्निष्ठात्वाविशेषान्नस्वातंत्र्येणपुरुषार्थहेतुरितिसमुच्चयपक्षे
ऽस्थिरसाशंक्याह। ज्ञाननिष्ठात्विति॥ नहिरज्जुतत्त्वज्ञानमुत्पन्नंफलसिद्धौसहकारिसापेक्षमालक्ष्यते। नचैवमिपिसमुत्सन्नमोक्षापना

गी॰भा॰टी॰
६८

यस्मै चैतत्कर्मेति कृत्वा विविक्तकर्मशब्दस्य क्रियमाणाशब्दविषयत्वमाशंक्य। आचष्टे॥ क्रियमाणामिति॥ तान्यनित्यनैमित्तिकत्वेन विभजते॥ यज्ञादीनामिति॥ अस्मिन्नेव जन्मन्यनुष्ठितानां कर्मणां बुद्धिशुद्धिद्वारा ज्ञानकारणत्वे ब्रह्मचारिणां कुतो ज्ञानोत्पत्तिर्जन्मांतरकृतानां वा कर्मणां तद्धेतुत्वे गृहस्थादीनां ऐहिकानि कर्माणि न ज्ञानहेतवः स्युरित्याशंक्यानियमं दर्शयति॥ इहेति॥ नानूनि सत्वशुद्धिकारणानि उपात्तदुरितप्रतिबंधादित्याशंक्याह। उपात्तेति॥ तर्हि तावन्मे। बहूनां यागानां कुतो ज्ञाननिष्ठाहेतुत्वं नेत्याह॥ नकारणत्वेनेति॥ कर्मणां चित्तशु

न कर्मणामनारंभान्नैष्कर्म्यं पुरुषोऽश्नुते॥ न च संन्यसनादेव सिद्धिं समधिगच्छति ४ न कर्मणामनारंभात् अप्रारंभात् कर्मणां क्रियाणां यज्ञादीनां इह जन्मनि जन्मांतरे वानुष्ठितानामुपात्तदुरितक्षयहेतुत्वेन सत्वशुद्धिकारणानां तत्कारणत्वेन च ज्ञानोत्पत्तिद्वारेण ज्ञाननिष्ठाहेतूनां ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मणः। यथादर्शतलप्रख्ये पश्यत्यात्मानमात्मनीत्यादिवचनात् अनारंभात् अननुष्ठानान्नैष्कर्म्यं निष्कर्मभावं नैष्कर्म्यं कर्मशून्यतां ज्ञानयोगेन निष्ठां निष्क्रियात्मस्वरूपेणैवावस्थानमिति यावत्पुरुषो नाश्नुते न प्राप्नोति न प्राप्नोतीत्यर्थः। कर्मणामनारंभान्नैष्कर्म्यं नाश्नुत इति वचनात्॥ तद्विपर्ययात्तेषामारंभान्नैष्कर्म्यमश्नुत इति गम्यते

द्धिद्वारा ज्ञानहेतुत्वमानमाह॥ ज्ञानमिति॥ अनारंभशब्दस्य उपक्रममात्रविपरीतविषयत्वं व्यावर्तयति॥ अननुष्ठानादिति॥ निष्कर्मणः संन्यासिनः कर्म ज्ञानं तेन नैष्कर्म्यमिति व्याचष्टे। निष्कर्मेति कर्माभावावस्थां व्यवच्छिनत्ति॥ ज्ञानयोगेनेति॥ तस्याः साधनपक्षपातित्वं व्यावर्तयति॥ निष्क्रियेति॥ कर्मानुष्ठानोपायलभ्या ज्ञाननिष्ठा तत्रापुमर्थहेतुरिति महतार्थसमर्थनार्थं व्यतिरेकवचनस्यान्वये पर्यवसानमेवाचष्टे॥ कर्मणामिति तद्विपर्ययमेव व्याचष्टे। तेषामिति॥ ॥ ॥

राम
६८

उक्तेर्थेहेतुंपृछति॥कस्मादिति।जिज्ञासितंहेतुमाह।उच्यतइति॥उपायत्वेपितदभावेकुतोनैनैष्कर्म्यासिद्धिरित्याशंक्याह॥न
हीति॥ज्ञानंप्रतिकर्मयोगस्योपायत्वेश्रुतिस्मृतिप्रमाणयति कर्मयोगेनेति॥श्रौतमुपायोपेयत्वप्रतिपादनंप्रकटयति।श्रुता
विति॥यत्तुगी।ताशास्त्रेकर्मयोगस्यज्ञानयोगंप्रत्युपायत्वोपपादनेनदिदानीमुदाहरति।इहापिचेति वँनकर्मणामित्यादिस्वर्वोंदृ

कस्मात्पुनःकारणात्कर्मणामनारंभान्नैष्कर्म्यंनाश्नुतइत्युच्यते कर्मारंभस्यनैष्कर्म्योपायत्वात्॥नह्युपायमंतरेणोपेय
प्राप्तिरस्ति॥कर्मयोगोपायत्वंचनैष्कर्म्यलक्षणस्यज्ञानयोगस्यश्रुताविहचप्रतिपादनात्श्रुतौतावत्प्रकृतस्यात्मलोक
स्यवेद्यस्यवेदनोपायत्वेन॥तमेतंवेदानुवचनेनब्राह्मणाविविदिषंतियज्ञेनेत्यादिनाकर्मयोगस्यज्ञानयोगोपायत्वंप्र
तिपादितम्।इहापिच॥संन्यासस्तुमहाबाहोदुःखमाप्तुमयोगतः योगिनःकर्मकुर्वंतिसंगंत्यक्त्वात्मशुद्धये।यज्ञोदानंतप
श्चैवपावनानिमनीषिणामित्यादिप्रतिपादयिष्यति ननुचाभयंसर्वभूतेभ्योदत्त्वानैष्कर्म्यमाचरेदित्यादौकर्तव्यकर्मसं
न्यासादपिनैष्कर्म्यप्राप्तिंदर्शयति।लोकेचकर्मणामनारंभान्नैष्कर्म्यमितिप्रसिद्धतरं॥ ॥ ॥ ॥

न्याय्योनरांईख्याख्यानुमाशंकयति॥ननुचेति॥आदिशब्देनशांतोदांतउपरतस्तितिक्षुः।संन्यासयोगाद्यतयःशुद्धसत्त्वाइ
त्यादिगृह्यते।तत्रैवलोकप्रसिद्धिमनुकूलयति॥लोकेचेति।प्रसिद्धतरं।यतोयतोनिवर्तते ततस्ततोविमुच्यते॥निवर्तनाद्धिसर्व
तोनवेत्तिदुःखमणुमपीत्यादिदर्शनादितिशेषः॥

लौकिकवैदिककर्मसिद्धिभ्यांसिद्धमर्थमाह। अतश्चेति॥ तच्चोत्तरत्वेनोत्तरार्द्धमवतार्यव्याकरोति॥ अतआहसारिणा। एवकारा
र्थमाहकेवलादिति॥ तदेवस्पष्टयति॥ कर्मेति। उक्तमेवार्थमनुषंग्याक्रियापदेनसंगतिंदर्शयति॥ नप्राप्नोतीति ४ उक्तेर्थेबु
भुत्सितंहेतुंवक्तुमुत्तरश्लोकमुत्थापयति॥ कस्मादिति। कस्मात्कर्मसंन्यासादेवसिद्धिंसमधिगच्छतीतिपूर्वेणसंबंधः। करा
चित्क्षणमात्रमपि। नकश्चित्कर्मकृत्तिष्ठतीत्यत्रहेतुत्वेनोत्तरार्द्धंव्याचर्द्धंव्याचष्टे॥ कस्मादिति॥ सर्वशब्दाज्ज्ञानवानपिगुणैरस्ववशः

अतश्चैवंकर्म्मार्थिनः किंकर्मारंभेणेतिनिर्मामतआह। नचसंन्यसनादेवेतिनापिसंन्यसनादेवकेवलात्कर्मपरित्यागमा
त्रादेवज्ञानरहितान्नसिद्धिंनैष्कर्म्यलक्षणांज्ञानयोगेननिष्ठांसमधिगच्छतिनप्राप्नोति ४ कस्मात्पुनःकारणात्कर्मसं
न्यासमात्रादेवज्ञानरहितात्सिद्धिंनैष्कर्म्यलक्षणांपुरुषोनाधिगच्छतीति[illegible]कांक्षायामाह। नहिकश्चित्क्षणमपिजातु
तिष्ठत्यकर्मकृत्। कार्यतेह्यवशःकर्मसर्वःप्रकृतिजैर्गुणैः ५ नहियस्मात्क्षणमपिकालंजातुकदाचिदपिकश्चित्
तिष्ठत्यकर्मकृत्सन्नकस्मात्कार्यतेहियस्मादवशएवकर्मसर्वःप्राणीप्रकृतिजैःप्रकृतितोजातैःसत्वरजस्तमोभिर्गुणैर
ज्ञौइतिवाक्यशेषो यतोवक्ष्यतिगुणैर्योनविचाल्यतइति ४
सकर्मकार्यतेततश्चज्ञानवतःसंन्यासवचनमनवकाशंस्यादिसारांशं

स्यात्। अज्ञइति। तमेववाक्यशेषंवाक्यशेषावष्टंभेनस्पष्टयति॥ यतइति॥ आत्मज्ञानवतोगुणैरविचाल्यतयागुणातीतत्वव
नादज्ञस्यैवसत्वादिगुणैरभेदेनकार्यकारणसंघातंप्रवर्तयितुमशक्यस्याजितकार्यकरणसंघातस्यक्रियासुप्रवर्त्तमानत्वमि
सर्वः ०

हे

ज्ञानयोगेनेत्याद्युक्तव्यवस्थायाश्चायमुपपत्तिरित्याह ॥ सांख्यानामिति ॥ ज्ञानिनां गुणप्रयुक्तचलनाभावेपि स्वाभाविकचलनव
त्त्वात्कर्मयोगो भविष्यतीत्याशङ्क्याह ॥ ज्ञानिनां त्विति ॥ प्रसङ्गात्मनि स्वारसिकचलनासंभवे प्रागुक्तन्यायं स्मारयति ॥ तथा चेति ५
आत्मज्ञत्वदशात्मज्ञस्यापि तर्हि किं कर्माकुर्वतो नग्नस्य वा यः शरीरेन्द्रियसंघातं नियन्तुमसमर्थस्य सर्वस्यापि संन्याससंभवादित्याशङ्क्या

सांख्यानां प्रयमकरणान् अज्ञानामेव हि कर्मयोगो न ज्ञानिनां ज्ञानिनां तु गुणैश्चाल्यमानानामसत्त्वतश्चलनाभावात् कर्मयोगो नो
पपद्यते । तथा च व्याख्यातं वेदाविनाशिनमित्यत्र ५ यस्त्वनात्मज्ञश्चोदितं कर्म नारभत इति तदसदेवेत्याह । कर्मेन्द्रियाणि संयम्य
य आस्ते मनसा स्मरन् ॥ इन्द्रियार्थान्विमूढात्मा मिथ्याचारः स उच्यते ६ कर्मेन्द्रियाणि हस्तादीनि संयम्य संहृत्य य आस्ते तिष्ठति
मनसा स्मरन् इन्द्रियार्थान् विषयान् विमूढात्मा विमूढान्तःकरणो मिथ्याचारो मृषाचारः ~~कर्मेन्द्रियै कर्म~~ पापाचारः स उच्यते र:
५ यस्त्विन्द्रियाणि मनसा नियम्यारभतेऽर्जुन ॥ कर्मेन्द्रियैः [redacted] कर्मयोगमसक्तः स विशिष्यते ७ [redacted]
यस्तु पुनः कर्मण्यधिकृतोऽज्ञो बुद्धीन्द्रियाणि मनसा नियम्यारभतेऽर्जुन कर्मेन्द्रियैः कर्मयोगमसक्तः सन् स विशिष्यते इतरस्मान्मि
५ कर्मेन्द्रियैः वाक्पाण्यादिभिः किमारभत इत्यत आह ९ ५ फलाभिसंधिवर्जितः ९ ५ मिथ्याचारात् ७

थ्याचारात् ॥ यस्त्विति ९ तस्माच्चोदिताकरणात्तच्छ्रेष्ठत्वं प्रपञ्च्यते ॥ अनात्मज्ञस्य चोदितमकुर्वतो जाग्रतो विषयान्तरदर्शनध्या
नात् मिथ्याचारत्वेन ० मस्सदोषित्वमुक्त्वा विहितमनुतिष्ठतस्तस्यैव फलाभिलाषविकलस्य सदाचारत्वेन वैशिष्ट्यमाचष्टे ॥ यस्त्विन्द्रिया
णीति ॥ विहितमनुतिष्ठतो मुमुक्षोः कर्मसङ्गिनो वैशिष्ट्यमक्षरयोजनया स्पष्टयति यस्तु पुनरिति ७

गी॰भा॰टी॰
६०

कर्मानुष्ठायिनो वैशिष्ट्यमुद्दिष्टमन यत्तदनुष्ठानमधिकृतेन कर्तव्यमिति निगमयति ॥ यत इति ॥ उक्तमेव हेतुं भगवद्वचमतिक
षनेन स्पष्टयति ॥ कर्मेति ॥ एवं तस्याल्पाकर्तव्यं कर्मेत्याह । शरीरेति ॥ तन्नियतं तस्याधिकृतस्येति संबंधः । स्वर्गादिफले रुचीयेरा
मात्ताशावधिकृतस्य नस्यपि नित्यं संस्कारिसात्रंस्मात् विशिनष्टि ॥ फलापेक्षेति ॥ नित्यं कर्म नियमेन कर्तव्यमित्यत्र हेतुमाह ॥ यत इति
हिंसादोषात युक्तमेव हेतुमनुवदति यस्मादिति ॥ करणास्याकरणाज्ज्यायस्त्वमश्रेष्ठं सर्वं कर्म करयति ॥ कथमित्यादिना सत्येव क

यत एवमतः नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः । शरीरयात्रापि च ते न प्रसिद्ध्येदकर्मणः ॥ ८ ॥ नियतं नित्यं शास्त्रो
पदिष्टं यो यस्मिन् कर्मणि अधिकृतः फलाय चाश्रुतं । तन्नियतं कर्म तत्कुरु त्वं हे अर्जुन यतः कर्म ज्यायो अधिकतरं फलतो
हि यस्मात् अकर्मणो अकरणात् । अनारंभात् । कथं । शरीरयात्रा शरीरस्थितिरपि च ते तव न प्रसिद्ध्येत् न प्रसिद्धिं गच्छेदक
र्मणः कर्माकरणात् इतो दृष्टः कर्माकर्मणोर्विशेषो लोके ॥ ८ ॥ यच्च मन्यसे बंधार्थत्वात्कर्म न कर्तव्यमिति तदप्यस
त् कथं ॥ यज्ञार्थात्कर्मणोऽन्यत्र लोकोऽयं कर्मबंधनः । तदर्थं कर्म कौंतेय मुक्तसंगः समाचर ॥ ९ ॥ यज्ञार्थं यज्ञो वै विष्णु
रिति श्रुतेरीश्वरार्थं यत्क्रियतेन यज्ञार्थं कर्म २

र्मेति देहादिचेष्टाद्वारा शरीरस्थ्यनुपपत्ति ॥ नरभावे जीवनमेव दुर्लभं भवेदिति फलि
तमाह ॥ अत इति ॥ कर्मणा बध्यते जंतुरिति स्मृतेर्बंधार्थं कर्म तन्न श्रेयोऽर्थिना कर्तव्यमित्याशंकामनूद्य दूषयति ॥ यच्चेत्यादिना
कर्माधिकृतस्य तदकरणमयुक्तमिति प्रतिज्ञानेमध्य एवंकं विवृणोति । कथमित्यादिना ॥ फलाभिसंधिमंतरेण यज्ञार्थं कर्म कुर्वा
णस्य बंधाभावान्नारथ्येन कर्म कर्तव्यमित्याह । तदर्थमिति यज्ञार्थं कर्मेत्यत्र फलं । नहि कर्मार्थमेव कर्मेत्यात्रोऽन्य याचष्टे । यज्ञो वै विष्णु
रिति ॥

राम
६०

कथंतर्हिकर्मणाबध्यतेजंतुरितिस्मृतिस्तत्राह ॥ तस्मादिति ॥ ईश्वरार्पणबुद्ध्याकृतस्यकर्मणोबंधाधेतुत्वाभावेफलितमाह ॥ अत
इति ९ निसंगकर्मणोंत्रैवमितिकस्यचित्स्याधिकृतेनकर्तव्यत्वेहेतुत्वेनपरत्वेनोत्तरश्लोकमवतारयति। इतश्चेति कथंपुनरने
नयज्ञेनवृद्धिःस्यादिःशंकाकर्तुमित्याशंक्याह। एवमिति १० कथंपुनरभीष्टफलविशेषहेतुत्वंयज्ञस्यविज्ञायते। नहिदेव

यस्मात्कर्मणोऽन्यत्रान्येनकर्मणालोको। यमधिकृतःकर्मकृत्कर्मबंधनः कर्मबंधनंयस्यासोयंकर्मबंधनोलोकोननुय
व ज्ञार्थोऽतस्तदर्थंयज्ञार्थंकर्मकौंतेयमुक्तसंगः कर्मफलासंगवर्जितः सन्समाचरनिर्वर्तय ९ इतश्चाधिकृतेनकर्मकर्तव्यं।
सहयज्ञाःप्रजाःसृष्ट्वापुरोवाचप्रजापतिः। अनेनप्रसविष्यध्वमेषवोस्त्विष्टकामधुक् १० सहयज्ञाः यज्ञसहिताःप्रजास्त्र का३
योवर्णास्ता ४ सृष्ट्वासायपुरासृष्टेसर्गादौउवाचउक्तवान्प्रजापतिः ॥ प्रजानांस्रष्टा अनेनयज्ञेनप्रसविष्यध्वंप्रसवो
वृद्धिस्तस्येतिस्तांकुरुध्वं ॥ एषयज्ञोवोयुष्माकंअस्तुभवतुइष्टान्कामधुक् ७ इष्टान् अभिप्रेतान्कामान्फलविशेषा
न्दोग्धीतीष्टकामधुक् ॥ कथंदेवान्भावयतानेनतेदेवाभावयंतुवः ॥ परस्परंभावयंतःश्रेयःपरमवाप्स्यथ ११ देवा
निंद्रादीन्भावयतावर्द्धयतानेनयज्ञेनतेदेवाभावयंतुवोयुष्मान्वृष्ट्यादिनाभावयंतुआप्याययंतु। एवंपरस्परमन्यो
न्यंभावयंतःआप्याययंतः श्रेयःपरंमोक्षलक्षणंविज्ञानप्राप्तिक्रमेणावाप्स्यथ वापरंश्रेयोवाप्स्यथ ॥ ७ ॥

य
तापसादाद्देवेनस्वर्गापवर्गयोर्लभ्यतेनापिसम्यग्दृष्टीनमेतेरेणानिःश्रेयसंसेदुपारयतीतिशंकतेकथमिति ॥ तत्रश्लोकेनोत्तर
माह ॥ देवानिति ॥ मुमुक्षुत्वबुभुक्षुत्वविभागेनस्वपक्षविकल्पः ११ इतश्चाधिकृतेनकर्मकर्तव्यमित्याह। किंचेति ॥ ॥ ॥

गी॰टी॰, भा॰टी
७१ स

कथमस्माभिर्भाविताः संतो देवाः भावयिष्यंत्यस्मानिति तत्सह ॥ इष्टानिति ॥ यज्ञानुष्ठानेन सर्वोत्करीत्या स्वर्गापवर्गयोर्भाविष्य
कं यत्स्त्रीपशुपुत्रादिसिद्धिस्तासांक्षप सर्वोर्ध्वं व्याकरोति ॥ इष्टानभिप्रेतानिति ॥ पश्वादिभिश्च यज्ञानुष्ठानद्वारा भोगे निर्वृत्ते यो ऽन्य
थाप्रत्यवायप्रसंगादिस्युतरां हिं आचष्टे ॥ तैरिति १२ आनृण्यमकृत्वेत्यसमर्थः देवानामृषीणां पितृणां च यज्ञेन ब्रह्मचर्येण प्रजया

दि॰ इष्टान्भोगान्हि वो देवा दास्यंते यज्ञभाविताः तैर्दत्तानप्रदायैभ्यो यो भुंक्ते स्तेन एव सः ११ इष्टानभिप्रेतान्भोगान्हि वो
ष्मभ्यं देवा दास्यंते वितरिष्यंति। स्त्रीपशुपुत्रादीन्। यज्ञभाविताः यज्ञैर्वर्द्धितास्तोषिता इत्यर्थः। तैर्देवैर्दत्तान्भोगा
न् अप्रदायादत्वा आनृण्यमकृत्वैवेत्यर्थः एभ्यो देवेभ्यो यो भुंक्ते स्वदेहेंद्रियाण्येव तर्पयति स्तेन एव तस्कर एव स देवा
दिस्वापहारी ॥ ये पुनः यज्ञशिष्टाशिनः संतो मुच्यंते सर्वकिल्बिषैः भुंजते ते त्वघं पापा ये पचंत्यात्मकारणात् ॥ १३
देवयज्ञादीन्निर्वर्त्य तच्छिष्टमशनममृताख्यमशितुं शीलं येषां ते यज्ञशिष्टाशिनः संतो मुच्यंते सर्वकिल्बिषैः सर्वैः
पापैः चुल्ल्यादिपंचसूनाकृतैः प्रमादकृतहिंसाजनितैश्चान्यैः ॥ ॥ ॥ ॥

च संतोषमनापाद्य स्वकीयकार्यकरणसंघातमेव यो पुष्टुं भुंजानस्तस्करो भवतीति देवादिभ्यः संविभागमकृत्वा भुंजानानां प्रत्यवा
यित्वमुक्त्वा तदन्येषां सर्वदोषपरिहारं दर्शयति ॥ ये पुनरिति ॥ यज्ञशिष्टाशिनो ये पुनस्ते तादृशाः संतः सर्वकिल्बिषैर्मुच्यंत इति पाज
ना ॥ तैर्दत्तानित्यादिनोक्तं निगमयति भुंजत इति ७ ॥ ॥ ॥ ॥

एम
७१

देवयज्ञादीन्निर्वर्त्यादिशब्देन पितृयज्ञो मनुष्ययज्ञो भूतयज्ञो ब्रह्मयज्ञश्चेति चत्वारो यज्ञाः गृह्यंते चुल्ल्यादीनि पिठरधारणाद्यर्थक्रियां
कुर्वंतो विन्यासविशेषवंतस्त्वयोग्या वारणा विवक्ष्यंते ॥ आदिशब्देन कंडणी पेषणी मार्जन्युदकुंभश्चेत्येते हिंसाहेतवो गृहीता ए
तानि पंच प्राणिनां सूनास्थानानि हिंसाकारणानि तत्संयुक्तैः सर्वैरपि दुरितैः सर्वैः कैर्दुरितैर्विमुच्यंत इति संबंधः प्रमादो विचारव्यतिरेके
णां दुरितैः सर्वैः कथं पुनस्तेषां दृष्टा नास्ति कर्म तेन प्राणिनां हिंसा संभाव्यते ॥ आदिशब्देनाशुचिसंस्पर्शादि गृहीतं नदुष्येश्च पापैर्महायज्ञ
कारिणो मुच्यंते। उक्तं हि। कंडणी पेषणी चुल्ली उदकुंभश्च मार्जनी ॥ पंचसूना गृहस्थस्य पंचयज्ञात्प्रणश्यतीति ॥ पंचसूना गृहस्थस्य
चुल्ली पेषण्युपस्करः ॥ कंडनी चोदकुंभश्च बध्यंते यास्तु वाहयन्निति च ॥ तस्यायमर्थः ॥ याः यथोक्ताः पंचसंख्याकाः गृहस्थस्य स

ये त्वात्मंभरयो भुंजते ते त्वघं पापाः स्वयमपि पापा एव पचंति पाकं निर्वर्तयंति आत्मकारणादात्महेतोः इति व्याधि
के कृतेनेन कर्म कर्तव्यं ॥ जगच्चक्रप्रवृत्तिहेतुर्हि कर्म ॥ ॥ ॥ ॥

नास्तापो वाहयन्त्रापादपं न वर्तंते तेन प्राणिनो दुरितैः सर्वैः कथमदुरितैः सर्वैश्च वध्यंते नेनत्प्रयुक्तं सर्वमपि पापं महायज्ञानुष्ठानात्प्रणा
श्यतीति महायज्ञानुष्ठानं स्तुत्वार्थात्तदनुष्ठानविमुखान्निंदति ये त्विति ॥ आत्मंभरित्वमेव स्फोरयति ॥ ये पचंतीति ॥ स्वदेहें
द्रियपोषणार्थमेव पाकं कुर्वतां देवयज्ञादिपराङ्मुखानां पापभूयस्त्वं दर्शयति ॥ भुंजत इति ॥ पाठक्रमस्त्वर्थक्रमादपवाधनीयः
१३ देवयज्ञादिकं कर्मैवाधिकृतेनेन कर्तव्यमित्यत्र हेत्वंतरमितः श्लोकोपात्तमेंच दर्शयति ॥ जगदिति

ननु भुक्तमन्नं रेतोलोहितपरिणामक्रमेण प्रजारूपेण जायते न तु यज्ञात् अन्नं हि दृष्टसंभवं नभसश्च दृष्टं तत्कथं कर्मणो जगच्चक्रप्रवर्तकत्वमिति शं
क्यते ॥ कथमिति ॥ पारंपर्येण तु कर्मणो न्नस्य हेतुत्वं साधयति ॥ उच्यत इति ॥ उक्तेर्थे स्मृत्यंतरं संवादयति अग्नाविति ॥ तत्र हि देवताभि आ
न इष्टवैकं तदुद्देशेन प्रक्षिप्ताहुतिरिष्टवैनांगता रश्मिद्वारेणादित्यमधिरूढ्य वृष्ट्यात्मना पृथिवीं प्राप्य व्रीह्यादिरूपेणान्नभावमापद्य संस्कृतोपयु

कथमित्युच्यते ॥ अन्नाद्भवंति भूतानि पर्जन्यादन्नसंभवः यज्ञाद्भवति पर्जन्यो यज्ञः कर्मसमुद्भवः १४ अन्नात् भुक्तात् लोहि
तरेतः परिणामात्संभवंति जायंते भूतानि पर्जन्यात् वृष्टेः अन्नस्य संभवो ऽन्नसंभवः यज्ञाद्भवति पर्जन्यः । अग्नौ प्रास्ता
हुतिः सम्यगादित्यमुपतिष्ठते ॥ आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजा इति यज्ञो ऽपूर्वं स च कर्मसमुद्भवः ॥ ऋत्विग्यज
मानयोर्व्यापारः कर्म ततः समुद्भवो यस्य यज्ञस्यापूर्वस्य स यज्ञः कर्मसमुद्भवः ७ तथा ॥ कर्म ब्रह्मोद्भवं विद्धि ब्रह्माक्षर
समुद्भवं तस्मात्सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितं १५ कर्म ब्रह्मोद्भवं ब्रह्म वेदः समुद्भवः यस्य तत्कर्म ब्रह्मोद्भवं विद्धि जा
नीहि ॥ ब्रह्म पुनर्वेदाख्यमक्षरसमुद्भवं ७ ॥ ॥ ॥ ॥ ॥

न्नं भुक्तं शोणितरूपेण परिणतं प्रजाभावं प्राप्नोतीत्यर्थः ॥ यज्ञः कर्मसमुद्भव इत्यस्य फलं स्वस्यैव स्वोद्भवे करणत्वायोगादित्याशंक्या
ह ऋत्विगिति ॥ इष्यरेव तयोः सम्याहृत कश्चकारः १४ यद्यपि सर्वदेहेतुत्वेन कर्मोत्पत्तौ ताः किं चेतनमवं रनारि किं वाग्निहोत्रादि विधायके सवं रना
हूत्तिसंदिग्धं तत्रप्रसाह ॥ कर्मेति ॥ किमिति कर्मणो ब्रह्मोद्भवत्वमुच्यते सर्वस्य तदुद्भवत्वाविशेषादित्याशंक्याह ॥ ब्रह्म वेद इति ॥ ब्रह्म
नाद्ये वेदाख्यमनादि निधनमिति तत्राह ॥ ब्रह्म पुनरिति ७

अक्षरात्मनो वेदस्य पुनरक्षरेभ्यः सकाशादेव समुद्भवो न संभवतीत्याशंक्याह॥ अक्षरमिति॥ ब्रह्मेत्यक्षरमेवोक्तं न तत्क येन तत्कं
भा २ स्मादेवोद्भवतीत्याशंक्य ब्रह्मशब्दार्थमुक्तमेव स्मारयति॥ ब्रह्मवेद इति॥ ननु ब्रह्मशब्देन वेदस्यापि पौरुषेयत्वात्प्रामाण्य
२३ संदेहात्कथं तदुक्तमग्निहोत्रादिकं कर्म निर्धार्यितुं शक्यते तत्राह॥ यस्मादिति॥ कथं तर्हि तस्य यज्ञे प्रतिष्ठितत्वं सर्वगत

अक्षरं ब्रह्म परमात्मा तस्मात्समुद्भवः कारणं यस्य तदक्षरसमुद्भवं ब्रह्मवेद इत्यर्थः॥ यस्मात्साक्षात्परमात्मास्मात् अक्ष
यत् अक्षरं तं पुरुषनिश्वासवत्समुद्भूतं ब्रह्म तस्मात् सर्वार्थप्रकाशकत्वात्। सर्वगतमपि सत् नित्यं सदा यज्ञे वि
धिप्रधानत्वात्॥ यज्ञे प्रतिष्ठितं १४ एवं प्रवर्तितं चक्रं नानुवर्तयतीह यः॥ अघायुरिंद्रियारामो मोघं पार्थ स जी
वति १५ एवं इत्थमीश्वरेण वेदयज्ञसर्वकं जगच्चक्रं प्रवर्तितं॥ नानुवर्तयतीह लोके यः कर्मण्यधिकृतः सन् स च
घायुः अघं पापं यस्य आयुः जीवितं सोऽघायुः पापजीवन इत्यर्थः॥ इंद्रियाणामिंद्रियैरारमणं आक्रीडा विषयेषु य
स्य सः इंद्रियारामो मोघं व्यर्थं हे पार्थ स जीवति॥ तस्मादज्ञेनाधिकृतेन न कर्तव्यमेव कर्मेति प्रकरणार्थः १६

त्वे विशेषायोगादित्याशंक्याह सर्वगतमपीति १५ अधिकृतेनाध्ययनादिद्वारा जगच्चक्रमनुवर्तनीयमन्यथेष्टहानिरित्यधि
कृतस्य प्रत्यवायः स्यादित्याह॥ एवमिति॥ न कर्मणामनारंभादित्यादिनोक्तमुपसंहरति॥ तस्मादिति जगच्चक्रस्य प्रागुक्तप्रका
रेणानुवर्तनेन जीवनमयसाधनेन यस्मात्तस्माज्जीवता नियतं कर्म कर्तव्यमित्यर्थः १६ १६

यद्यधिकृतेन कर्तव्यमेव कर्म तर्हि किमित्सज्ञेनेति विशिष्यते ज्ञाननिष्ठेनापि न कर्तव्यमेवाधिकृतत्वाविशेषादित्याशंक्य पूर्वो
क्तमनुवदति ॥ प्रागिति ॥ नहि ज्ञानकर्मणोर्विरोधात् ज्ञाननिष्ठेन कर्म कर्तुं शक्यते ॥ तथा चानात्मज्ञेनैव चित्तशुद्ध्यादिपरंपरया ज्ञा
नार्थं कर्मानुष्ठेयमिति प्रतिपादितमित्यर्थः ॥ नहि यज्ञार्थादित्यादिकं किमर्थं । नहि तत्र ज्ञाननिष्ठा प्रतिपाद्यते ॥ कर्मानुष्ठानं सर्वमेवा
नत्वात्मज्ञस्येत्याशंक्य वृत्तमर्थं पुनरनुवदति ॥ प्रतिपाद्येति ॥ प्रासंगिकमज्ञस्य कर्मकर्तव्यत्वं तत्प्रसंगागतमिति यावत् तत्र बहु

प्रागात्मज्ञाननिष्ठायोग्यताप्राप्तेस्तादर्थ्येन कर्मयोगानुष्ठानमधिकृतेनानात्मज्ञेन कर्तव्यमित्येतत् न कर्मणामनारंभा
दित्यत आरभ्य शारीरयात्रापि च ते न प्रसिद्ध्येदकर्मणः इत्येवमंतेन प्रतिपाद्य यज्ञार्थात्कर्मणोऽन्यत्रेत्यादिना मोघं पार्थ दि
ती सजीवत्येवमंतेनापि ग्रंथेन प्रासंगिकं । अधिकृतस्यानात्मविदः कर्मानुष्ठाने बहुकारणमुक्तं तदकरणे च दोषसंकीर्त
ने कृतं । एवं स्थिते किमेवं प्रवर्तितं चक्रं सर्वैरनुवर्तनीयमाहोस्वित्पूर्वोक्तकर्मयोगानुष्ठानोपायप्राप्यामात्मविदा ज्ञान
योगेनैव निष्ठामात्मविद्भिः सांख्यैरनुष्ठेयामप्राप्तेनैवेत्येवमर्थमर्जुनस्य प्रश्नमाशंक्य स्वयमेव वा ॥ ॥ ॥ ह

कारणमीश्वरप्रसादे देवताप्रीतिश्चेत्यादिदोषसंकीर्तनं तैर्दत्तानप्रदायेत्यादिकृतमर्थमेवं विभज्यानूद्यानंतरश्लोकमाशंकोत्तरत्वे
नावतारयति ॥ एवमिति ॥ अर्जुनस्य प्रश्नमित्येवमर्थमाशंक्याह भगवानिति संबंधः । न चैषाशंकानवकाशमासादयति अना
त्मज्ञेन कर्तव्यं कर्मेति वदतो विशेषितत्वादित्याशंक्याह स्वयमेवेति ७ ॥ ॥ ॥

किमर्थं श्रुत्यर्थः स्वयमेव भगवानत्र प्रतिपादयतीत्याकांक्षितयतीसर्थे: तमेवश्रुत्यर्थं संगृह्याह। शास्त्रार्थस्येति गीताशास्त्रस्य ससंन्या
संज्ञानमेव मुक्तिसाधनमर्थानार्थांतरमिति विवेकार्थमिह श्रुत्यर्थं संक्षिपति॥ एतमिति॥ सिद्धं चेद्ज्ञानमनर्थकं तर्हि व्युत्था
नादीत्याशंक्यापातिकविज्ञानफलमाह। निवृत्तेति॥ ब्राह्मणानां ग्रहणं तेषामेव व्युत्थाने मुख्याधिकारित्वमिति ज्ञापनार्थं॥ क्लेशा
त्मकत्वादेषणानां ताभ्यो व्युत्थानं सर्वेषां स्वाभाविकत्वाद्विधित्सितमित्याशंक्याह॥ भिक्ष्येति भिक्षाचर्यं चरंतीति वचनेषु

शास्त्रार्थस्य विवेकप्रतिपत्त्यर्थमेतं वेतमात्मानं विदित्वा निवृत्तमिथ्याज्ञानाः संतो ब्राह्मणा मिथ्याज्ञानवद्भिरवश्यं
कर्तव्येभ्यः पुत्रैषणादिभ्यो व्युत्थायाथ भिक्षाचर्यं शरीरस्थितिमात्रप्रयुक्तं चरंति॥ न तेषामात्मज्ञाननिष्ठाव्यतिरेके
णान्यत्कार्यमस्तीत्येवमिमं श्रुत्यर्थमिह गीताशास्त्रे प्रतिपिपादयिषितमाविःकुर्वन्नाह भगवान् यस्त्वात्मरतिरेव स्या
स्व८ दात्मतृप्तश्च मानवः आत्मन्येव च संतुष्टस्तस्य कार्यं न विद्यते १७ यस्तु सांख्य आत्मज्ञाननिष्ठ आत्मरतिरात्मन्येव
रतिर्न विषयेषु यस्य स आत्मरतिरेव स्याद्भवेत्॥

व्युत्थानविरहमित्याशंक्याह॥ शरीरेति॥ तर्हि तद्वदेव तेषामग्निहोत्राद्यपि कर्तव्यमापद्येतेत्याशंक्य व्युत्थायिनां आश्रमधर्मे
वदग्निहोत्रादेरनुष्ठापकाभावान्मैवमित्याह न तेषामिति यथोक्तं श्रुत्यर्थमस्मिन्गीताशास्त्रेपोवीपयोगितापयोलोचमाने प्रतिपा
दयिषितमिष्टं प्रकटीकुर्वन् कर्तव्यमेव कर्म जीवतेति नियमं ज्ञानयोगेन सांख्यानामिति कथमुक्तमिति चोद्यपरिहारमुपदर्शयती
साह इसेतामिति आत्मनिष्ठस्याविषयासंगराहित्यसंदृष्टतरस्यात्मरतेर्न जिहासुना कर्तव्यमिति मत्वाह यस्तुसांख्य इति

गी भा

किंचात्मज्ञस्य ज्ञानेनात्मन्येव परितृप्तत्वान्नान्नपानादिना साध्यतृप्तिरिष्टा तेन विद्यार्थिना संन्यासिनापि नान्नरसादावासक्तिः कर्त्तव्यमित्याह आत्मतृप्तश्चेति॥ किंचात्मविदः सर्वतो वितृष्णं दृष्टं नदृष्टानात्मविद्वा विद्यार्थिना कर्तव्यमित्याह॥ आत्मन्येवेति। रतिस्तृप्तिः संतोषाणां मोदप्रमोदानंदवद्वा न भेदः अथवा रतिर्विषयासक्तिः तृप्तिर्विषयविशेषसंपर्कजं सुखं संतोषोऽभीष्टविषयमात्रलाभाभीनेऽसुखसामान्यमितिभेदः। तन्मात्मरतेरात्मतृप्तस्यात्मन्येव संतुष्टस्यापि किंचित्कर्तव्यमुक्तरूपे भविष्यतीति नेत्याह॥ यस्त्वा इति द्वाभ्यां

आत्मतृप्तः आत्मनैव तृप्तो नान्नरसादिना स मानवो मर्त्यः कृष्णः संन्यासी आत्मन्येव च संतुष्टः संतोषो हि बाह्यार्थलाभे सर्वे
स्य भवति तमनपेक्ष्यात्मन्येव च संतुष्टः सर्वतो वीततृष्ण इत्येतत् यदीदृशः आत्मवित् तस्य कार्यं करणीयं न विद्यते नास्तीत्य
र्थः ७ किंच। नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन नचास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः १ नैव तस्यैवमात्मरतेः
कृतेन कर्मणार्थः प्रयोजनमस्ति ७ ॥ ॥ ॥

कर्म

ता १७ इतश्चात्मविदो न किंचित्कर्तव्यमित्याह किंचेति॥ अभ्युदयनिःश्रेयसयोरन्यतरत्प्रयोजनं कृतेन सुकृतेनात्मविदो भविष्यतीत्याशंक्याह नैवेति प्रत्यवायपरिहृत्यै स्वहृत्पद्मश्रुतिप्रत्याख्यानाय वा कर्म स्यादित्याशंक्याह नेत्यादिना ब्रह्मादिस्थावरांतेषु भूतेषु कश्चिद्भूतविशेषमाश्रित्य कश्चिदर्थो विदुषः साध्यो भविष्यतीति तदर्थं तेन कर्तव्यं कर्मेत्याशंक्याह नचेति। तत्राद्यपादमादत्ते नैवेति तं व्याचष्टे तस्येति आत्मविदः स्वर्गाद्यभ्युदयानर्थित्वान्निःश्रेयसस्य च साधनत्वान्न कृतेन कर्मणार्थ इत्यर्थः ७

एम
७०

आत्मविदश्चेत्कर्म न क्रियते तेन हि तेनाकृतेन न तस्यानर्थो भविष्यतीति तत्प्रत्याख्यानार्थं तस्य कर्तव्यं कर्मेति शंकते ॥ तर्हीति द्विती
यपादेनोत्तरमाह नैवेति ना अतो न तन्निवृत्तस्य कृतमर्थवदिति शेषः द्वितीयं भागं विभजते नचास्येति ॥ व्यपाश्रयणमालंबनं चेति
संबंधः परार्थमत्वा वाक्यार्थमाह कश्चिदिति उक्तविशेषसापेक्षितस्यापि क्रियाद्वारा प्रयोजनप्रसवने हेतुत्वमिति मत्वाह येनेति ॥

तस्य कृतेन अकरणेन न प्रत्यवायाख्योनर्थो नाकृतेनेह लोके कश्चन कश्चिदपि प्रत्यवायप्राप्तिरूप आत्महानिलक्षणो वा नैवा ह
यः प्र२ स्ति नचास्य सर्वभूतेषु ब्रह्मादिस्थावरांतेषु कश्चिदर्थव्यपाश्रयोजननिमित्तः [illegible] क्रियासाध्यो व्यपाश्रयः व्यपाश्रयणं क
चिद्भूतविशेषमाश्रित्य न साध्यः कश्चिदर्थोस्ति येन तदर्था क्रियानुष्ठेया स्यात् ॥ न त्वमेतस्मिन् सर्वतः संप्लुतोदकस्थानीये
सम्यग्दर्शने वर्तसे ७ यत एवं तस्मादसक्तः सततं कार्यं कर्म समाचर असक्तो ह्याचरन्कर्म परमाप्नोति पूरुषः १९ तस्माद
सक्तः संगवर्जितः सततं सर्वदा कार्यं कर्तव्यं नित्यं कर्म समाचर निर्वर्तय असक्तो हि यस्मात् समाचरन्नीश्वरार्थं कर्म कुर्वन्परमा
प्नोति पूरुषः परं मोक्षं प्राप्नोति पुरुषः सत्वशुद्धिद्वारेणेत्यर्थः यस्माच्च कर्मणैव हि संसिद्धिमास्थिता जनकादयः ७

तर्हि मयापि यथोक्ततत्वज्ञानमाश्रित्य त्याज्यमेव कर्मेति अर्जुनस्य मतमाशंक्याह नत्वमिति १८ सम्यग्ज्ञाननिष्ठत्वाभावे कर्मा
नुष्ठानमावश्यकमित्याह ॥ यत इति । तस्माज्ज्ञाननैर्निष्ठा[illegible]हित्यादिति यावत् मोक्षमेवापेक्षमाणस्य कर्तव्यं कर्मणि फलान्तरं खवि
नियोगः स्यादिसाध्यं स्यात् । असक्तो हीति १५ यद्यपि जितेंद्रियो विवेकी श्रवणादिभिरनन्यब्रह्मणि निष्ठां कर्तुं शक्नोति तथापि क्षत्रि
यत्वाद्यावद्विहितकर्म न त्याज्यमित्याह यस्माच्चेति तस्मात्त्वमपि कर्म कर्तुमर्हसीति संबंधः ॥ कु ५

७५

ज्ञानोपि त्वयाविद्वानेन कर्म कर्तव्यमित्याह । लोकेति ॥ पूर्वार्द्धं विभजते ॥ कर्मणैवेति कथं जनकादीनां कर्मणैव संसिद्धिप्राप्तिरुच्यते क
र्मत्यागाद्धि सम्यग्दर्शनवतां प्रसिद्धा संसिद्धिरिति ॥ तत्किं जनकादयोपि प्राप्तसम्यग्दर्शनाः स्युरुताप्राप्तसम्यग्दर्शना भवेयुरिति श्री
विकल्पमभयमंप्रसाह परीति लोकसंग्रहार्थं कर्मणा सहैव संसिद्धिमास्थितास्त इति संबंधः ॥ कर्मणा सहैवेत्येतद्व्याकरोति ॥
असंन्यस्यैव कर्मेति तत्र हेतुमाह ॥ प्रारब्धेति ॥ जनकादीनां सत्यपि ज्ञानित्वे प्रारब्धकर्मवशात्कर्मापरित्यज्यैव लोकसंग्रहार्थं

लोकसंग्रहमेवापि संपश्यन्कर्तुमर्हसि २० कर्मणैव हि सर्वे क्षत्रियाः विद्वांसः संसिद्धिं मोक्षं गंतुमास्थिताः प्रवृत्ताः केन
नकारणेन जनकाश्वपतिप्रभृतयोपरिते प्राप्तसम्यग्दर्शना जनकादयस्ततो लोकसंग्रहार्थं प्रारब्धकर्मत्वात्कर्मणा सहै
वासंन्यस्यैव कर्म संसिद्धिमास्थिता इत्यर्थः । अथाप्राप्तसम्यग्दर्शना जनकादयः तदा कर्मणा सत्वशुद्धिसाधनभूतेन क्र
मेण संसिद्धिमास्थिता इति व्याख्येयः श्लोकः अथ मन्यसे पूर्वैरप्यजानद्भिरेव कर्तव्यं कृतं कर्मेतावता नावश्यमनेन कर्त ग
व्यं सम्यग्दर्शनवता कृतार्थेनेति तथापि प्रारब्धकर्मायत्तस्त्वं लोकसंग्रहमेवापि लोकस्योन्मार्गप्रवृत्तिनिवारणं लोक
संग्रहस्तमेवापि प्रयोजनं संपश्यन्कर्तुमर्हसि २ ॥ ॥ ॥

प्रवर्तमानानां ज्ञानमाहृत्योपपन्ना सिद्धिरित्यर्थः द्वितीयमनन्यपूर्वार्द्धं निवोत्तरमाह अथेत्यादिना द्वितीयार्द्धमावर्त्तीमाशं राम
कामुद्भावयति । अथेति अज्ञेनाकृतार्थेन कृतं कर्मसे तावता ज्ञानवता कृतार्थेन न तत्कर्तव्यमित्युक्तमंगीकरोति तथापीति त कृ ७५
र्हि मयापि ज्ञानवता कर्म न कर्तव्यमिति साशंक्यार्जुनस्य कर्तव्यमेव कर्मेत्युत्तरं व्याख्यानेन कथयति । प्रारब्धेति ॥ ॥ ॥

ज्ञानवता कृतार्थेन लोकसंग्रहार्थमपि न प्रवर्तितव्यमित्याशंकामुत्थाप्य परिहरति ॥ लोकेत्यादिना ॥ श्रुताध्ययनसंपन्नत्वेनाभिम
तोपयद्विहितं प्रतिषिद्धं वा कर्मानुतिष्ठति ततदेव प्राकृतो जनोनुवर्त्तते न विद्यावतापि लोकमर्यादास्थापनार्थं विहितं कर्तव्यमिति सर्व
श्रेष्ठानुसारित्वमितरेषामाचारे दर्शयित्वा प्रतिपन्नावपि दर्शयति ॥ किंचेति २२ कृतार्थस्यापि लोकसंग्रहार्थं विहितं कर्म कर्तव्य
मित्युक्त्वा तत्रैव भगवानात्मानमुदाहरणत्वेनोपन्यस्यति ॥ यदीत्यादिना ॥ अप्राप्तस्य प्राप्तये न कापि कर्तव्यत्वसंभवात् किंचिदपि वि

किमर्थं

लोकसंग्रहं कः कर्तुमर्हतीति कथं चेत्तदुच्यते ॥ यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः । स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते
२२ यद्यत्कर्माचरति येषु येषु श्रेष्ठः प्रधानस्तत्तदेव कर्माचरतीतरोऽन्योजनस्तदनुगतः किंच ॥ स श्रेष्ठो यत्प्रमाणं कुरुते
लौकिकं वैदिकं वा लोकस्तदनुवर्तते तदेव प्रमाणीकरोतीत्यर्थः किंच यद्यत्र लोकसंग्रहः कर्तव्यतायां विप्रतिपत्ति
स्तर्हि मां किं न पश्यसि ॥ न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किंचन नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि २१ न मे
मम पार्थ नास्ति न विद्यते कर्तव्यं त्रिष्वपि लोकेषु किंचिदपि कस्मात् मे अनवाप्तम् अप्राप्तं अवाप्तव्यं प्रापणीयं तथापि
वर्ते एव कर्मण्यहं ।

यत्नेकर्तव्यमिति कथमुक्तमित्याशंक्याह ॥ नानवाप्तमिति ॥ प्रतीकमुपादाय व्याख्यानद्वारा विद्याव
तोपि कर्मप्रसक्तिं संभावयति । नेत्यादिना ॥ अन्वयार्थं पुनर्नञोनुवादः भगवतो मे नास्ति कर्तव्यमित्येतदाकांक्षापूर्वकं स्फोरयति ॥
कस्मादित्यादिना ॥ प्रयोजनाभावेत्वयापि नानुष्ठेयं कर्मेत्याशंक्य लोकसंग्रहार्थं ममापि कर्मानुष्ठानमिति मत्वाह ॥ तथापीति २२

लोकसंग्रहो हीनेनेकर्तव्यो विफलत्वादित्याशंक्याह ।। यदि हीति ।। श्रेष्ठस्य तत्वमार्गानुवर्तित्वं तदनुवर्तित्वं मनुष्याणामुचितमेवेत्याशंक्य
दूषयति ।। तथा चेत्यादिना ।। ईश्वरस्य कर्मण्यप्रवृत्तो नरैरनुवर्तितामपि कर्मानुपपत्तिरिति हेतुमाह । लोकास्थितीति ।। इतश्चैश्वरेण कर्तव्य
७६ थ३ मित्याह ।। किं चेति ।। यदि कर्म न कुर्यामिति शेषः ।। संकरस्य कार्यं वर्णयति ।। तेनेति ।। प्रजोपहतिरकरणस्य पीप्यते चेत्किं तत्पापं तस्यादिति त
आह ।। प्रजानामिमा २४ त्वामनाचरंतं अनुवर्तनां सर्वेषां को दोषः स्यादित्यपेक्षायामीश्वरस्य कृतार्थेन यो कर्मानुष्ठानाभावे नरैरनुवर्तिनि

यदि ह्यहं नवर्तेयं जातुकर्मण्यतंद्रितः ।। ममवर्त्मानुवर्तंते मनुष्याः पार्थसर्वशः २३ यदि पुनरहं नवर्तेयं जातु कदाचित्कर्मण्य
तंद्रितोऽनलसः सन् मम श्रेष्ठस्य सतो वर्त्म मार्गं मनुवर्तंते मनुष्याः हे पार्थ सर्वशः सर्वप्रकारैः २३ तथा च को दोष इत्यत आह ।। उ तेओ२
त्सीदेयुरिमे लोका न कुर्यां कर्म चेदहं संकरस्य च कर्ता स्यामुपहन्यामिमाः प्रजाः २४ उत्सीदेयुर्विनश्येयुरिमे सर्वे लोका लो
कस्थितिनिमित्तस्य कर्मणोऽभावात् न कुर्यां कर्म चेदहं । किं च संकरस्य च कर्ता स्यां तेन कारणेनोपहन्यामिमाः प्रजाः प्रजाना
मनुग्रहार्थं प्रवृत्तः सन् तदुपहतिं उपहननं कुर्यामिति ममेश्वरस्याननुरूपमापद्येत ।। २४ यदि पुनरहमिव त्वं कृतार्थबुद्धिरात्म

मपि तर्ह्यभावादेवस्थितिहेत्वभावात् । यथा आदिभरतानां विनाशप्रसंगाद्वर्णाश्रमधर्मव्यवस्थानुपपत्तेश्चाधिकृतानां मार्गे '' वित २४
प्र२ २५ र्म्मो पापोपहतत्वसंगात्स्वरूपानुग्रहार्थं प्रवृत्तिरीश्वरस्येत्तं संप्रति लोकसंग्रहाय कर्म कुर्वीतास्य कर्तृत्वाभिमानेनज्ञानाभिभवे प्राप्ते
प्रत्याह यदि पुनरिति ।। कृतार्थबुद्धित्वे हेतुमाह आत्मविदिति ।। यथा परमात्मानमवगच्छन् कर्तृत्वाद्यभिमानाभावात्कृतार्थो भवसे एम
वेत्यर्थः ।। ७६

अर्जुनादन्यत्रापिज्ञानवतिकृतार्थेबुद्धित्वंकर्तृत्वाद्यभिमानहीनेनत्वमित्याह ।। अन्योवेति ।। तस्यतर्हिकर्मानुष्ठानमफलत्वाद
नवकाङ्क्षामित्याशंक्याह ।। तस्यापीति ।। कर्तव्यं इत्यात्मविदापिपरानुग्रहायकर्तव्यमेवकर्मेत्याहेतिशेषः दृष्टांतदार्ष्टांतिकरूपंश्लो व
कंव्याकरोति ।। सक्ताइत्यादिना ।। असक्तः सन्कर्तृत्वाभिमानफलाभिसंधिंचाकुर्वन्नितियावत ।। वृत्तमनुधोतरंश्लोकमवतारयति

अन्योवातस्याप्यात्मनःकर्तव्याभावेपिपरानुग्रहएवकर्तव्यइति ।। सक्ताः कर्मण्यविद्वांसोयथाकुर्वंतिभारत । कुर्याद्विद्वांस्तथा
सक्तश्चिकीर्षुर्लोकसंग्रहं २५ सक्ताः कर्मणएवसमिद्धिः फलंममभविष्यतीतिकेऽविद्वांसोयथाकुर्वंतिभारत कुर्यात्तविद्वा
नात्मवित्तथाअसक्तः सन्नतत्वं किमर्थंकरोतीतितत्रपुचिकीर्षुः कर्तुमिच्छुः लोकसंग्रहं ७ एवंलोकसंग्रहंचिकीर्षोर्न
ममआत्मविदः कर्तव्यमस्तनस्यावालोकसंग्रहेयुक्ता ।। तस्यात्मविदइदमुपदिश्यते ।। नबुद्धिभेदंजनयेदज्ञानांकर्मसंगिनां
जोषयेत्सर्वकर्माणिविद्वान्युक्तः समाचरन् २६ बुद्धेर्भेदोबुद्धिभेदः कर्तव्यंकर्मभोक्तव्यंचास्यकर्मणः फलमितिनिश्चिताया
बु पायाबुद्धेर्भेदस्तेनचालनंबुद्धिभेदस्तंनजनयेत्नोत्पादयेत् अज्ञानामविवेकिनांकर्मसंगिनांकर्मण्यासंगवतांकिंतुकु
र्यात् जोषयेत्कारयेत्सर्वकर्माणिविद्वान्स्वयंतदेवाविदुषांकर्मयुक्तोऽभियुक्तः समाचरन् ७ अविद्वानतः
कथंकर्मसुसज्जनइत्याह ७

एवमिति ।। कर्तव्यंकर्मेतिशेषः एवंविद्वमेवंव्याख्यायोत्तरार्द्धंप्रश्नस्यैकमवतार्यव्याचष्टे किंतु
कुर्यादिति सर्वकर्माणिकारयेतेत्यर्थात्कुर्वन्नितिशेषः कथंकारयेदित्याकांक्षायामाह तदेवेति २६ अज्ञानांकर्मसंगिनामित्युक्तंतेनो
त्तरश्लोकस्यसंगतिमाह । अविद्वानिति ।। ।। ।। ।। ।।

गी॰टी॰ ३
७७

कर्तृत्वमात्मनोऽवास्तवमित्यभ्युपगमाद्विद्वान् कथं कुर्वन्नेव तस्याभावं प्रपद्यते। सांख्याह प्रकृतेरिति॥ कर्मस्वविदुषः सक्तिप्रकारं प्रक
[illegible]करोति॥ प्रकृतेरित्यादिना॥ प्रधानशब्देन मायाशक्तिरुच्यते॥ अविद्ययेस्वभयतः संबध्यते। अज्ञस्य कर्मसु सक्तिमुक्त्वा विदुषस्त
स्मावमपि निरस्यति॥ यःतु नरीति॥ तत्त्वयाथात्म्यं वेत्तीति सुस्पष्टा तत्त्ववित् तु शब्देनाज्ञाद्विशिष्टे निर्दिष्टे प्रश्नः सर्वं केंद्वितो। यथाहमव

प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः। अहंकारविमूढात्मा कर्ताहमिति मन्यते २७ प्रकृतेः प्रकृतिः प्रधानं सत्त्वरजस्त
मसां गुणानां साम्यावस्था तस्याः प्रकृतेर्गुणैर्विकारैः कार्यकारणरूपैः क्रियमाणानि कर्माणि लौकिकानि शास्त्रीयाणि च सर्व
शः सर्वप्रकारैरहंकारविमूढात्मा कार्यकारणसंघाते आत्मप्रत्ययोऽहंकारस्तेन विविधं नानाविधं मूढ आत्मा अंतःकरणं यस्य सो ए३
ऽयं कार्यक[illegible]र्मपे [illegible]कारणाभिमान्यात्माऽविद्यया कर्माण्यात्मनि मन्यमानस्तत्कर्मणामहं कर्तेति मन्यते २७ यःतु
नाविद्वान् तत्त्ववित्तु महाबाहो गुणकर्मविभागयोः। गुणा गुणेषु वर्तंत इति मत्वा न सज्जते २८ तत्त्ववित्तु पुनर्महाबाहो कस्यचित्तत्त्व
वित् गुणकर्मविभागयोर्गुणविभागस्य कर्मविभागस्य च तत्त्वविदित्यर्थः। गुणाः करणात्मका गुणेषु विषयात्मकेषु व
र्तंते॥ नात्मेति मत्वा न सज्जते आसक्तिं न करोति २८

णधर्मा

तार्थमाचष्टे कर्मेत्यादिना गुणानामेव गुणेषु वर्तनं न पपुंक निर्गुणत्वात्तेषामिति सांख्यविभजने॥ गुणा इति॥ कार्यकरणानामेव वि
षयेषु प्रवृत्तिरात्मनस्तु कूटस्थत्वान्नैवमिति ज्ञात्वा तत्त्ववित्कर्मसु दृढं तरं कर्तृत्वाभिमानं न करोतीत्यर्थः ७ ७ ७

राम
७७

विद्वानविद्वांश्चोभावपि प्रकृतः स विद्वानविदुषो बुद्धिभेदं न कुर्यादित्युपसंहरति ॥ प्रकृतेरिति ॥ प्रकृतेः कार्याः गुणा देहेन्द्रियादिभिर्विकारैर्मू
ढास्तानेवात्मत्वेन मन्यमानाः पेते गुणानां तेषामेव देहादीनां कर्मसु व्यापारेषु सज्जन्ते सक्तिं दृढतरामात्मीयबुद्धिं कुर्वन्ती साहं प्रकृतेरिसा
द्व दिना तेषामनात्मविदां स्वयमात्मविद्बुद्धिभेदं नाचरेदित्याह ॥ तानिति ॥ यद्यपि कर्मण्यज्ञो विक्रियन्ते तथापि मोक्षमाणेन तेन क

येषु नः ॥ प्रकृतेर्गुणसंमूढाः सज्जन्ते गुणकर्मसु ॥ तानकृत्स्नविदो मंदान्कृत्स्नविन्न विचालयेत २९ प्रकृतेर्गुणैः सम्यक् मूढाः
संतः सज्जंते गुणानां कर्मसु गुणकर्मसु वयं कर्म कुर्मः फलायेति तान्कर्मसंगिनोऽकृत्स्नविदः कर्मफलमात्रदर्शिनो मंदान्
मंदमज्ञान्कृत्स्नवित् आत्मवित्स्वयं न विचालयेत् बुद्धिभेदकरणमेव चालनं तन्न कुर्यादित्यर्थः ७ कथं पुनः कर्मण्यधि
कृतेनाज्ञेन मुमुक्षुणा कर्म कर्तव्यमित्युच्यते ॥ मयि सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसा ॥ निराशीर्निर्ममो भूत्वा युध्यस्व
विगतज्वरः ३० मयि परमेश्वरे सर्वज्ञे सर्वात्मनि वासुदेवे सर्वाणि कर्माणि संन्यस्य निक्षिप्य अध्यात्मचेतसा विवेकबुद्ध्या
अहं कर्तेश्वराय भृत्यवत्करोमीत्यनया बुद्ध्या किंच निराशीः त्यक्ताशीर्निर्ममो ममभावश्च निर्गतो [illegible] यस्य तव स त्वं निर्ममो भूत्वा
॥ युध्यस्व ॥

मैमकर्तव्यं मोक्षस्य कर्मासाध्यत्वात्तत्तु नेन कर्म कर्तुं शक्यं ॥ कर्मणः स्वापेक्षितविरोधित्वादिति शंकते कथमिति ॥ श्लोकेनोत
रमाह ॥ उच्यत इति ॥ यथोक्ते परमेश्वरे आत्मनि सर्वकर्मणां समर्पणे कारणमाह अध्यात्मेति ॥ विवेकबुद्धिमेव व्याकरोति ॥ अहमिति ॥
रशीति ॥ आशाः कर्मसु प्रवृत्तस्य कर्तव्यान्तरमाह किंचेति ॥ निराशीः फलप्रार्थनाहीनः सन्नित्यर्थः ॥ निर्ममो भूत्वा पुत्रभ्रात्रादिष्विति शेषः ॥

म

ननु फलेच्छुर्नियोगेनोपपद्यते तत्र भ्रात्रादिहिंसात्मनस्तस्य संतापहेतोर्नियोगविषयत्वायोगादिति तत्राह॥ विगतेति ३० मत्कृतं भगवतो
मतमुक्तप्रकारमनुसैवानुतिष्ठतां कर्मण्यक्तिफलं कथयन्ति॥ यदेतदिति॥ शास्त्राचार्योपदिष्टेऽर्थे विश्वासवत्त्वं श्रद्धावत्त्वं। गुणेषु दो
षाविष्करणमसूया॥ अपि ये योक्तायाः मुक्तेरनुरक्षत्वयोजनार्थः ३१ भगवन्मतानुवर्तिनां प्रत्यवायित्वं प्रसाधयति॥ ये त्विति तद्विपरीत

विगतज्वरो विगतसंतापो विगतशोकः सन्नित्यर्थः ७ यदेतन्मम मतं कर्मकर्तव्यमिति सप्रमाणमुक्तं तत्तथा ये मे मतमिदं नित्यमनु
तिष्ठन्ति मानवाः॥ श्रद्धावन्तोऽनसूयन्तो मुच्यन्ते तेऽपि कर्मभिः ३१ ये मे मदीयं इदं मतमनुतिष्ठंत्यनुवर्तंते मानवा मनुष्याः॥ श्रद्धाव
तां श्रद्दधानाः अनसूयन्तः असूयां च मयि गुरौ वासुदेवे अकुर्वन्तो मुच्यन्ते तेऽप्येवंभूताः कर्मभिर्धर्माधर्माख्यैः ७ ये त्वेतदभ्यसूयन्तो ना
नुतिष्ठन्ति मे मतं सर्वज्ञानविमूढांस्तान्विद्धि नष्टानचेतसः॥ ३२ ये तु तद्विपरीता एतन्मम मतमभ्यसूयन्तो निंदन्तो नानुतिष्ठन्ति
नानुवर्तन्ते सर्वेषु ज्ञानेषु विविधमूढास्ते सर्वज्ञानविमूढाः तान्विद्धि नष्टान्नाशं गतान् अचेतसोऽविवेकिनः ७ कस्मात्तु
नः कारणात्त्वदीयं मतं नानुतिष्ठन्ति परधर्ममनुतिष्ठन्ति स्वधर्मं च नावर्तंते ७

त

३

त्वं भगवन्मतानुवर्तिभ्यो वैपरीत्यं तद्वेदर्शयति॥ एतादिसादिना अभ्यसूयन्तः तत्रासंतमपि दोषमुद्भावयंत इत्यर्थः ३१ ३२ सर्वज्ञा
नानि सगुणनिर्गुणविषयाणि प्रमाणप्रमेयप्रयोजनविभागतो विविधत्वं भगवन्मतानुवर्तनमंते तैः पापरधर्मानुष्ठाने स्वधर्मानुष्ठा
ने च कारणं पृच्छति॥ कस्मादिति॥

भगवत्प्रतिकूलत्वमेव नत्वकारणमित्याशंक्याह॥ त्वत्प्रतिकूला इति॥ राजानुशासनातिक्रमेपि दोषदर्शनाद्भगवदनुशा
सनातिक्रमेपि दोषसंभवात्त्वत्प्रतिकूलत्वं भयकारणमित्यर्थः॥ उत्तरश्लोकमवतारयति॥ सदृशमिति॥ सर्वस्य प्राणि
वर्ग[illegible]स्य प्रकृतिवशवर्तित्वे कैमुतिकन्यायं सूचयति॥ ज्ञानवानपीति॥ सर्वाण्यपि भूतान्यनिच्छन्त्यपि प्रकृतिसदृशीं चे
ष्टां गच्छन्तीति निगमयति॥ प्रकृतिमिति॥ भूतानां प्रकृत्यधीनत्वेपि प्रकृतिर्भगवता नियम्यतामित्याशंक्याह॥ निग्रह इति॥ का
पुनरेषा प्रकृतिर्यदनुसारिणी भूतानां चेष्टेति पृच्छति॥ प्रकृतिर्नामेति॥ भगवदभिप्रेतां प्रकृतिं प्रकटयति॥ सर्वेति॥ आ
दिशब्देन ज्ञानेच्छादिसंग्रहणे। यथोक्तः संस्कारः स्वसत्तया प्रवर्तकः स्वेष्वलपेपि प्रवृत्तिः स्यादित्याशंक्य विशिनष्टि॥ व

त्वत्प्रतिकूलाः कथं न बिभ्यति त्वच्छासनातिक्रमदोषात् सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि॥ प्रकृतिं याति
भूतानि निग्रहः किं करिष्यति ३३ सदृशमनुरूपं चेष्टते कस्याः स्वस्याः स्वकीयायाः प्रकृतेः प्रकृतिर्नाम सर्वे कृतधर्मा
धर्मादिसंस्कारो वर्तमानजन्मादावभिव्यक्तः सा प्रकृतिः तस्याः सदृशमेव सर्वो जन्तुर्ज्ञानवानपि चेष्टते किं पुनर्मू
र्खः तस्मात् प्रकृतिं यान्ति अनुगच्छन्ति भूतानि प्राणिनः निग्रहः निषेधरूपः किं करिष्यति मम चान्यस्य वा ७

र्तमानेति सर्वो जन्तुरित्यपुनरुक्तं विशेषे किं प्रवृत्तेरन्यथात्वादित्याशंक्य पश्वादिभ्यो विशेषादिति न्यायमनुसरन्नाह॥ ज्ञान
वानिति॥ ज्ञानवतामज्ञानवतां च प्रकृत्यधीनत्वाविशेषफलितमाह॥ तस्मादिति॥ प्रकृतिं यान्तीति प्रकृतिसदृशीं चेष्टां
गच्छन्तीत्यर्थः सर्वाणि भूतानीत्यर्थः। प्रकृतेर्भगवतापि तु त्वयेन वा केनचिन्नियन्तुमाशंक्यावतारितं चतुर्थपादस्या
पेक्षितं दर्शयति। मम चेति ३३ ३॥

गी॰भा॰टी
७९

सर्वस्य भूतवर्गस्य प्रकृतिवशवर्तित्वे लौकिकवैदिकपुरुषकारविषयाभावाद्विधिनिषेधानर्थक्यमिति शंकते ॥ यदीति ननु यस्य
न प्रकृतिरस्ति तस्य पुरुषकारसंभवादर्थवत्त्वं तद्विषये विधिनिषेधयोर्भविष्यतीत्याह । न चेति ॥ शंकितं दोषं श्लोकेन परिहरति ॥
इहेत्यादिना ॥ वीप्सायाः सर्वकरणगोचरत्वं दर्शयति ॥ सर्वेति ॥ प्रसक्ते रागद्वेषयोरवस्थापं प्राप्तौ प्रसारितशक्ति ॥ इष्टइति ।
प्रतिविषयं विभागेन तयोरन्यतरस्यावश्यकत्वेपि पुरुषकारविषयाभावप्रसक्त्या प्रागुक्तं दूषणं कथं समाधेयमित्याशंक्याह ॥ तत्रे

परिहरति ज्ञानवानपि आत्मनः प्रकृतेः सदृशमेव चेष्टते न च प्रकृतेर्निग्रहः कश्चिदस्ति ॥ ततः पुरुषकारस्य विषयानुपपत्तेः शास्त्रा
नर्थक्यप्राप्ताविदमुच्यते इंद्रियस्येंद्रियस्यार्थे रागद्वेषौ व्यवस्थितौ ॥ तयोर्न वशमागच्छेत्तौ ह्यस्य परिपंथिनौ ३४ इंद्रिय
स्येंद्रियस्यार्थे सर्वेंद्रियाणामर्थे शब्दादि विषये इष्टे रागः अनिष्टे द्वेष इत्येवं प्रतींद्रियार्थे रागद्वेषावश्यंभाविनौ ॥ तत्राय
म पुरुषकारस्य शास्त्रार्थस्य च विषय उच्यते शास्त्रार्थे प्रवृत्तः पूर्वमेव रागद्वेषयोर्वशं नागच्छेत् या हि पुरुषस्य प्रकृतिः सा
रागद्वेषपुरःसरैव स्वकार्ये प्रवर्तयति तदा स्वधर्मपरित्यागः परधर्मानुष्ठानं च भवति यदा पुनः रागद्वेषौ तत्प्रतिप
॥ क्षेण नियमयति तदा शास्त्रदृष्टिरेव पुरुषो भवति ७

त्ति ॥ तयोरित्यादिवचनादिते भागं विभजते शास्त्रार्थ इति ॥ प्रकृतिवशात्वाज्ञं
तोर्नैव नियोज्यत्वमित्याशंक्याह य्याहीति ॥ रागद्वेषद्वारा प्रकृतिवशवर्तित्वे स्वधर्मत्यागादि दुर्वारमित्युक्तमिदानीं विवेकविज्ञानेन
रागादिनिवारणे शास्त्रीयपरस्य प्रकृतिपारवश्यं परिहर्तुं शक्यमित्याह ॥ यदेति मिथ्याज्ञाननिबंधनौ रागद्वेषौ न तत्प्रतिपक्षत्वं विवेकविज्ञा
नस्य मिथ्याज्ञानविरोधित्वादेवं रागद्वेषयोर्मूलनिहत्या निहतौ प्रतिबंधे सेकार्यसिद्धिमभिसंधायोक्तं ॥ तत्रेति ७

ध धा २

राम
८०

एवकारस्यान्ययोगव्यवछेदकत्वं दर्शयति नेति सर्वात्मनियोगे उपसंहारः तस्मादिति तत्र हेतुमाह यत इति हिशब्दो यतो हेत्वर्थे नेतर इति १
तिप्रकटितः सच एवं रागद्वेषेन संबंधनीयः पुरुषपरिपंथित्वमेव तयोः सोदाहरणं स्फोरयति श्रेयोमार्गस्येति ३४ रागद्वेषयोः श्रे
थि योमार्गप्रतिपंथित्वं प्रकटं परमतापव्यासद्वारा समर्थनेन श्लोकमवतारयति ॥ तत्रेत्यादिना व्यवहारभूमिः सप्रम्यधेः शास्त्रार्थस्य

नप्रकृतिवशस्तस्मात्तयो रागद्वेषयोर्वशं नागच्छेत् यतस्तौ ह्यस्य पुरुषस्य परिपंथिनौ श्रेयोमार्गस्य विघ्नकर्तारौ तस्कराविव
पथि ७ तत्र रागद्वेषप्रयुक्तो मन्यते शास्त्रार्थमप्यन्यथा परधर्मोऽपि धर्मत्वादनुष्ठेय एवेति ~~तत्राह श्रेयान्स्वधर्मो विगु~~
~~णः परधर्मात्स्वनुष्ठितात् शास्त्रार्थमन्यथा परधर्मोऽपि धर्मत्वादनुष्ठेय एवेति तत्राह~~ श्रेयान्स्वधर्मो विगुणः परधर्मा
त्स्वनुष्ठितात् स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ३५ श्रेयान्प्रशस्यतरः स्वधर्मः स्वीयो धर्मो विगुणो ऽपि विगानगुणो
ऽप्यनुष्ठीयमानः परधर्मो[illegible]त्स्वनुष्ठितात् तत्साद्गुण्येन संपादितादपि स्वधर्मे स्थितस्य निधनं मरणमपि श्रेयः परधर्म
स्थस्य जीवितात् कस्मात् परधर्मो भयावहो यस्मात् नरकादिलक्षणं भयमावहति ७

मथामन्निपातिमेव प्रसाधयति ॥ परधर्मोपीति ॥ स्वधर्मे वादिस्पर्धेः अनुमानरूपमन्तुतरत्वेन श्लोकमुत्थापयति ॥ तस्मादिति ॥ अत्र
धर्मोघकत्वादुरनुष्ठानात्परिव्राजकधर्मस्य क्षेमादिलक्षणस्यानुष्ठेयतया ममापि कर्तव्यत्वं प्राप्तमित्याशंक्याचष्टे श्रेयानिति ॥
उक्तेऽर्थे प्रश्नपूर्वकं हेतुमाह ॥ कस्मादित्यादिना स्वधर्ममेव धर्ममपरधर्ममननुतिष्ठतः स्वधर्मो निःक्रमहूनरोपस्पदव्यधिकारत्वान्ननमागः
भि साधीयानित्यर्थः ३५

गीता टी
८८

प्रागेवानर्थमूलत्वस्योक्तत्वात्तु न तज्जिज्ञासा पापमूलस्यानुपपत्तिरित्याशंक्याह ।। यद्यपीति ।। विक्षिप्तं विविधेषु प्रदेशेषु क्षिप्तं दर्शितमिति भाव
न ।। अनवधारितमनेकत्वोक्तत्वादनेकधा वाग्विवेककामादिभिर्विकल्पितत्वादित्यर्थः । नन्वनर्थमूलं परिहर्तव्यं नास्ति किमिति ज्ञातुमि
ष्यते तत्राह ।। ज्ञाते हीति कुर्यामिति तत्त्वानमर्थपरिजिहीर्षः वाक्यारंभार्थत्वमथशब्दस्य गृहीत्वा मस्याप्रश्नत्वं व्याकरोति । अथेत्यादिना
अनिच्छतोऽपि बलादिव कुर्वीरितः प्रेरितस्तत्वे दृष्टांतमाचष्ट राजेवेति नियोज्यत्वस्यैच्छापेक्षत्वान्न स्वभावेन रसिद्धिमाशंक्य प्रागुक्तं स्मारय

यद्यप्यनर्थमूलं आपाततो विषयानुभवः रागद्वेषौ तौ त्वया परिपंथिना विति योक्तं । विक्षिप्तमनवधारितं च तदुक्तं तत्संक्षिप्तं नि
श्चितं चेदमेवेति ज्ञातुमिच्छन्नर्जुन उवाच ज्ञाते हि तस्मिंस्तदुच्छेदाय यत्नं कुर्यामिति तुं [illegible]मिति ॥ अथ केन प्रयुक्तोऽयं पापं चर
ति पूरुषः ।। अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः ३६ अथ केन हेतुभूतेन प्रयुक्तः सन्राजेव भृत्योऽयं पापं कर्माचर
त्याचरति पूरुषः स्वयमनिच्छन्नपि हे वार्ष्णेय वृष्णिकुलप्रसूत बलादिव नियोजितः राजेवेत्युक्तो दृष्टांतः ७ शृणु तं वैरिणं
सर्वानर्थकरं यं त्वं पृ[illegible]च्छसि ।। श्रीभगवानुवाच ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः । वैराग्यस्याथ मोक्षस्य षण्णां
भग इतीरणा ऐश्वर्यादिषट्कं यस्मिन्वासुदेवे नित्यमप्रतिबंधेन सामस्त्येन च वर्तते ७

ति ।। राजेवेत्युक्तमिति ३६ संप्रति प्रतिवचनं मत्स्तोति भगवानिति तस्य तत्र वैरिणं स्मारयति ।। सर्वेति । अप्रस्तुतं किमिति प्रल्कपनेन तत्राह
पंत्यमिति भगवच्छब्दार्थं निर्धारयितुं पौराणिकं वचनमुदाहरति । ऐश्वर्यस्येति समग्रस्येत्यनुषज्य सर्वविशेषणैः संबध्यते । अथशब्दस्तथा
शब्दपर्यायः समुच्चयार्थः ।। मोक्षशब्देन तदुपायं ज्ञानं विवक्ष्यते उदाहृतवचसस्तात्पर्यमाह । ऐश्वर्यादीति सर्वो बोधो भगवानिति तेन संबंधः ॥

गी एम
८०

तत्रैव पौराणिकवाक्यं पठति ॥ उत्पत्तिमिति भूतानामिति प्रत्येकमुत्पत्त्यादिभिः संबध्यते । कारणार्थे चोत्पत्तिप्रलयशब्दौ क्रियामा
त्रस्य पुरुषांतरगोचरत्वसंभवात् आगतिं गतिं चेत्यागामिन्यौ संपदापदौ संगृह्येते । व्याख्यांतरस्यापि तात्पर्यमाह ॥ उत्पत्त्यादीति ॥ वेत्तीत्य
त्रः साक्षात्कारो विज्ञानमित्युच्यते ॥ समग्रैश्वर्यादिसंपत्तिसमुच्चयार्थश्चकारः उक्तलक्षणो भगवान् किमुक्तं यन्निर्णीतं ताह काम इति नू ३ तं ३

उत्पत्तिं निधनं चैव भूतानामागतिं गतिं वेत्ति विद्यामविद्यां च सर्वानिति उत्पत्त्यादिविषयं च विज्ञानं यस्य स वासुदेवो वा वा-यो भग ४
च्यो भगवानिति अथ सर्वानर्थकरं वैरिणं शृणु काम एष क्रोध एष रजोगुणसमुद्भवः ॥ महाशनो महापाप्मा विद्ध्येनमि
ह वैरिणं ३७ काम एष सर्वलोकं वशीकुर्वन् शत्रुर्यन्निमित्ता तां सर्वानर्थप्राप्तिः प्राणिनां स एष काम: प्रतिहतः केन
चित् क्रोधत्वेन परिणमते । अतः क्रोधोऽप्येष एव रजोगुणसमुद्भवो रजश्च तद्गुणश्चेति रजोगुणः समुद्भवो यस्य स कामो
स० २ रजोगुणसमुद्भवो रजोगुणस्य वा समुद्भवः तमोगुणसमुद्भवः कामो ह्युद्भूतो रजः प्रवर्तयन् पुरुषं प्रवर्तयति नत्त्वया
त्वहंकारितश्चेत् दुःखितानां रजःकार्ये सेवादौ प्रवृत्तानां प्रलापः श्रूयते ५ ॥ ॥ ॥ ॥

कामस्य सर्वलोकशत्रुत्वं विशदयति यन्निमित्तेति तथापि कथं तस्यैव क्रोधत्वं तत्राह स एव इति ॥ कामक्रोधयोरेकहेतुत्वयो नाना
वैकारणां कथयति ॥ रजोगुणेति कारणद्वारा कामादेरेकहेतुत्वमुक्त्वा कार्यद्वारापि तस्यैकहेतुत्वं सूचयति ॥ रजोगुणस्येति । कामस्य तु
रूपप्रवर्तकत्वमेव । न रजोगुणजनकत्वमित्याशंक्याह कामो हीति तत्रैवानुभवानुसारिणीं लोकप्रसिद्धिं प्रमाणयति तत्त्वया हीति मा

यो
गी० भा
[illegible]

तस्य योग्यायोग्यविभागमंतरेणावष्टुविषयत्वं दर्शयति महाशन इति बहुविषयत्वप्रयुक्तं कार्यं निर्दिशति अत एवेति सर्वविषय
त्वेपि कुतोस्य पापत्वमित्याशंक्याह ॥ कामेनेति ॥ कामस्योक्तविशेषणत्वे फलितमाह ॥ अत इति ३७ उत्तरश्लोकमवतारयति
कथमिति अनेकदृष्टांतोपादनेन प्रतिपत्तिसौकर्यार्थं सहजस्य धर्मस्य प्रकाशात्मकवह्निं प्रत्यावरकत्वसिद्ध्यर्थं विशिनष्टि । अ

महाशनो महदशनमस्येति महाशनः अत एव महापाप्मा कामेन हि प्रेरितो जंतुः पापं करोति यतो विद्धि एनं काममिह संसारे वैरि
णं ७ कथं वैरीति दृष्टांतैः प्रतिपादयति । धूमेनाव्रियते वह्निर्यथादर्शो मलेन च यथोल्बेनावृतो गर्भस्तथा तेनेदमावृ
तं ३८ धूमेन सहजेनाव्रियते एव वह्निः प्रकाशात्मकोऽप्रकाशात्मकेन यथा चादर्शो मलेन च यथोल्बेन गर्भवेष्टनेन जरायु
णा आवृत आच्छादितो गर्भस्तथा तेनेदमावृतं ७ किं पुनस्तदिदंशब्दवाच्यं यत्कामेनावृतमित्युच्यते । आवृतं ज्ञानमेते
न ज्ञानिनो नित्यवैरिणा कामरूपेण कौंतेय दुष्पूरेणानलेन च ३९ आवृतमेतेन कामेन ज्ञानं ज्ञानिनो नित्यवैरिणा ७

आव्रियतेऽविद्ययेति
न ८ [illegible]

म
प्रकाशकेनेति ॥ सामान्यतो निर्दिष्टं विशेषतो निर्देष्टुमाकांक्षापूर्वकमनंतरश्लोकमवतारयति किं पुनरिति कामस्य ज्ञानं प्रत्यावरण
सिध्यर्थं ज्ञानिनो नित्यवैरिणेत्यादिविशेषणं प्रतीकमादाय व्याकरोति आवृतमित्यादिना ७ ॥ ॥ ॥

राम
८१

ज्ञानिनंप्रतिनिर्वैरित्वेपिनित्यवैरित्वंकामस्यकथमित्याशंक्याह॥ ज्ञानीहीति॥ अनर्थप्राप्तिसमयेरागात्कामप्रत्ययप्रसंगावस्थांपूर्वमेवेत्युच्यते
अतःशब्देनकाममहिम्निरेवपरामृश्यतेनित्यमेवेसंततावस्थाकार्यावस्थाचकामस्यकथ्यते। ननुसर्वस्यापिकामात्मतानप्रशस्तेतिकामो
नित्यवैरीभवतितत्कुतोज्ञानिविशेषणमित्याशंक्याह॥ नत्विति अज्ञस्यनासौनित्यवैरीत्येतदुपपादयति॥ सहीति कार्यप्राप्तिमवस्था

ज्ञानीहिजानात्यनेनाहमनर्थेप्रयुक्तइति पूर्वमेवअतोदुःखीचभवतिनित्यमेवअनेनासौज्ञानिनोनित्यवैरीनतुमूर्खस्यसहि
कामंतृष्णाकालेमित्रमिवपश्यंस्तत्कार्येदुःखेप्राप्तेजानातितृष्णयाहंदुःखित्वमापादितइतिन पूर्वमेवातोज्ञानिनएवनित्यवै
३५ री किंरूपेण कामरूपेणकामइच्छैवरूपमस्येतिकामरूपस्तेनदुःष्पूरेणदुःखेनपूरणमस्येतिदुःष्पूरस्तेना। नलेननास्यालंप
र्याप्तिर्विद्यतइत्यनलस्तेन ९

पूर्वमित्युक्त्वाअज्ञंप्रतिवैरित्वेसत्यपिकामस्यनित्यवैरित्वाभावेफलितमाह अतइति स्वरूपतोनित्यवैरित्वाविशेषेपिज्ञान्यज्ञाना
भ्यामवांतरभेदसिद्धिरित्यर्थः आकांक्षाद्वाराएवप्रकृतंवैरिणामेवस्फोरयति।किंरूपेणेत्यादिना ३९

कामस्य निराश्रयस्य कार्यकरत्वाभावं मत्वा प्रश्नपूर्वकं आश्रयं दर्शयति ॥ किमधिष्ठानः पुनरिति ॥ कामस्य नित्यवैरित्वेन परिजि
हीर्षितस्य किमस्याधिष्ठानं ज्ञायते तत्राह । ज्ञाने हीति ॥ इंद्रियाणीत्यादिनाकामाधिष्ठानत्वं प्रकटयति । एतैरिति ॥ नचैताभिरिति वक्तव्ये कथ
मेभिरित्युच्यते तत्राह । इंद्रियाणीभिरिति ४० तेषां कामाश्रयत्वे सिद्धे साश्रयस्यतस्य परिहर्तव्यत्वमाह ॥ यत इति । तस्मादिंद्रियादीना

किमधिष्ठानः पुनः कामो ज्ञानस्यावरणात्वेन वैरी सर्वस्येत्यपेक्षायामाह ज्ञाते हि शत्रोरधिष्ठाने सुखेन हि शत्रुर्निबर्हणं कर्तुं
शक्यत इति । इंद्रियाणि मनो बुद्धिरस्याधिष्ठानमुच्यते एतैर्विमोहयत्येष ज्ञानमावृत्य देहिनं ४० इंद्रियाणि मनो बुद्धि
श्चास्य कामस्याधिष्ठानमाश्रय उच्यते ॥ एतैरिंद्रियादिभिराश्रयैर्विमोहयति विविधं मोहयति एष कामोऽविवेकिं कृत्वा ज्ञानमावृ
त्याच्छाद्य देहिनं ४ यत एवं ॥ तस्मात्त्वमिंद्रियाण्यादौ नियम्य भरतर्षभ ॥ पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनं ४१
तस्मात्त्वमिंद्रियाण्यादौ सर्वं नियम्य वशीकृत्य हे भरतर्षभ पाप्मानं कामं पापाचारं पापिनं कामं प्रजहिहि परित्यज हि यस्मा
त् एनं महत्तं वैरिणं ज्ञानविज्ञाननाशनं ॥

माश्रयत्वादिति यावत् ॥ सर्वकामनिरोधप्रागवस्थायामित्यर्थः । तेषु नियमितेषु मनोबुद्ध्योर्नियमः सिध्यति तत्प्रवृत्तेरितरप्रवृत्तिप्र
तिरेकेणाफलत्वादिति भावः पापमलतया कामस्य नष्टद्वाच्यत्वमुन्नेयं । कामस्य परित्याज्यत्वे वैरित्वं हेतुस्तमेव हेतुत्वं साधयति ॥ ज्ञाने
ति ४

एम
८२

ज्ञानविज्ञानशब्दयोरर्थभेदमावेदयति ॥ ज्ञानमित्यादिना ४१ सर्वोक्तमनर्थकामस्यागस्य दुष्करत्वं मत्वा नोदशोऽप्यस्ये सक्तोऽमले
वस्यहीकर्तुमशक्य सर्वकंस्तोकांतरमवतारयति ॥ इंद्रियाणीत्यादिना । पंचेति ज्ञानेंद्रियवत्कर्मेंद्रियाण्यपि रागादीनि गृह्यंते किमपे
क्षयानेषां परत्वं तत्राह । देहमिति ॥ तथापि केन प्रकारेण परत्वेनेत्यत आह [illegible]क्ष्मेति ॥ आदिना येन करणत्वादिमत्यंते इंद्रियापेक्षया

ज्ञानेशास्त्रतः आचार्यतश्चात्मादीनामवबोधो विज्ञानं विशेषतस्तदनुभवस्तयोर्ज्ञानविज्ञानयोः श्रेयःप्राप्तिहेत्वोर्नाशं
नं [illegible] त्वं नाशने आत्मनः प्रजहि परित्यजेत्यर्थः ० इंद्रियाण्यादौ नियम्य कामं शत्रुं प्रजहीहीत्युक्तं तत्र किमाश्र
यः कामं प्रजह्यादित्युच्यते ॥ इंद्रियाणि पराण्याहुरिंद्रियेभ्यः परं मनः ॥ मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः ४२
इंद्रियाणि श्रोत्रादीनि पंच देहं स्थूलं बाह्यं परिच्छिन्नं चापेक्ष्य सौक्ष्म्यांतःस्थत्वव्यापित्वाद्यपेक्षया पराणि प्रकृष्टाण्या
हुः पंडिताः तथेंद्रियेभ्यः परं मनः संकल्पविकल्पात्मकं । तथा मनसस्तु परा बुद्धिर्निश्चयात्मिका तथा यः सर्वदृश्येभ्यो बुद्ध्या
तेभ्योऽभ्यंतरो यं देहिनमिंद्रियादिभिराश्रयैर्युक्तः कामो ज्ञानावरणद्वारेण मोहयतीत्युक्तं बुद्धेः परतस्तु सः स तु बुद्धेर्द्रष्टाप
र आत्मा ४ आत्मानं देहेंद्रियसंघातानामधिष्ठातारमात्मानं बुध्यात्ममधारय ॥ ॥ ॥ च

तत्स्थत्वादिना मनः सः स्वरूपोद्धि सर्वकं परत्वं कथयति ॥ तथेति ॥ मनसि दर्शितं न्यायं बुद्धावतिदिशति ॥ तथा मनसस्त्विति ॥ यो बु
द्धेरित्यादि व्याचष्टे ॥ तयोरित्यादिना आत्मनोपयोक्तृविशेषणीमाप्र रत्नमाशंक्याह यदेहिनमिति ४२ ॥ ॥ ॥

गी॰ भा॰ टी॰
३ पा

इंद्रियादिसमाधानस्यैवकारणात्मज्ञानात्कामजयो भवतीत्युपसंहरति। एवमित्यादिना॥ संस्तंभनं मनो मनःसमाधानेनेहेतुरिति स च प्र
त्ति॥ संस्तभ्येति॥ महांतं शत्रुमेव विशिनष्टि॥ कामरूपमिति॥ तस्य दुरासदत्वे हेतुमाह॥ दुर्विज्ञेयेति॥ अनेको विशेषस्ताहशो
महाशनत्वादिस्तदनेनोपायभूता कर्मनिष्ठा प्राधान्येनोक्ता। उपेयानुष्ठाननिष्ठा गुणत्वेनेति विवेक्तव्यं ४३ ॐ तत्सदिति श्रीम

ततः किं

"एवं बुद्धेः परं बुद्ध्वा संस्तभ्यात्मानमात्मना जहि शत्रुं महाबाहो कामरूपं दुरासदं ४३ एवं बुद्धेः परं आत्मानं बुद्ध्वा ज्ञात्वा
संस्तभ्य सम्यक्स्तंभनं कृत्वा आत्मानं स्वेनैवात्मना मनसा सम्यक् समाधायेत्यर्थः जह्येनं शत्रुं हे महाबाहो कामरूपं
दुरासदं दुःखेनासदः आसादनं प्राप्तिर्यस्य तं दुरासदं दुर्विज्ञेयानेकविशेषमित्यर्थः इति श्रीमत्परमहंसपरि
व्राजकाचार्यश्रीमत्शंकरभगवत्कृतौ गीताभाष्ये तृतीयोध्यायः समाप्तः॥ ॥ ॥

परमहंसपरिव्राजकाचार्यश्रीमच्छुद्धानंदस्वामिपादशिष्यश्रीमदानंदज्ञानविरचिते श्रीमद्भगवद्गीताभाष्यव्याख्याने तृतीयोध्यायः
३ ॐ तत्सद्ब्रह्मार्पणमस्तु ७ ॥ ॥ ॥ ॥

राम
८३

म

॥श्री॥ पूर्वाभ्यामध्यायाभ्यां निष्ठाद्वयात्मनो योगस्यांगीकृतत्वाद्देहार्थस्य च समाप्तत्वाद्वक्तव्यावशेषाभावादुक्तयोगस्य
घृत्रिमत्त्वाशंकां निवर्तयन्वंशकथनपूर्विकां स्तुतिं भगवानुक्तवानित्याह॥ भगवानिति॥ तदेवद्वचनेनैतानुवादद्वारे
राप्रस्तौति॥ योगमिति॥ उक्तमेव योगं विभज्यानुवदति॥ ज्ञाने इति॥ संन्यासेनेति कर्तव्यतया सहितस्य ज्ञानात्मनो यो
गस्य कर्माख्यो योगो हेतुरतश्चोपायोपेयभूतं निष्ठाद्वयं प्रतिष्ठापितमित्यर्थः उक्तौ योगद्वये समाराममुपन्यस्यति॥ यस्मिन्निति

नि
अं ४॥ श्रीभगवानुवाच॥ योगं योगो ध्यायद्वयेनोक्तो ज्ञाननिष्ठालक्षणः संसंन्यासः कर्मयोगोपायोपश्नि
न्वेहार्थः परिसमाप्तः प्रवृत्तिलक्षणो निवृत्तिलक्षणश्च गीतासु च सर्वास्वयमेव योगो विवक्षितो भगवता। अ
तः परिसमाप्तं वेदार्थमन्वानस्तं वंशकथनेन स्तौति भगवा[illegible]न्॥ इमं विवस्वते योगं प्रोक्तवानहमव्ययं॥ वि
वस्वान्मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत्॥१॥ इममध्यायद्वयेनोक्तं योगं॥ छ॥
ये

अथवा ज्ञानयोगस्य कर्मयोगोपायत्वमेवस्य सूचयति॥ यस्मिन्निति॥ प्रवृत्त्यालक्ष्यनेनाप्यते कर्मयोगो निवृत्त्याचलक्ष्यतेज्ञा
नयोग इति विभागः पूर्वपि पूर्वस्मिन्नध्यायद्वये पथोक्तं निष्ठाद्वयं व्याख्यातेनयापि वक्ष्यमाणाध्यायेषु वक्तव्यांतरम
स्तीत्याशंक्याह॥ गीतास्वेति॥ कथं तर्हि समनंतराध्यायस्य प्रवृत्तिरत आह॥ अत इति॥ वंशकथनेन संप्रदा
योपन्यासः संप्रदायो यहेशास्त्रप्रवृत्तिमाशंकां निरस्यायोगास्तत्तेनोपपर्यवस्यति॥ गुरुशिष्यपरंपरोपन्यासमेवानुक्र
मति॥ इममिति॥ अस्य संनिहितविषयं दर्शयति॥ अध्यायेति॥ योगं ज्ञाननिष्ठालक्षणं कर्मयोगोपायलभ्यमि

भ० गी० ॥ ४ ॥ टी० ॥ ॥

स्वयमकृतार्थानां प्रयोजनव्याणां परार्थप्रवृत्त्यसंभवाद्भगवतस्तथाविधप्रवृत्तिरर्थेनाकृतार्थेनाकल्पनीयेत्याह विवस्वत इति ॥ अव्ययवेदमूलत्वादव्ययफलत्वं योगस्य गमयितव्यं किमिति भगवताकृतार्थेनापि योगप्रवचनं कृतमित्यत आह जगदिति ॥ कथं यथोक्तेन योगेन क्षत्रियाणां बलाधानं तदाह ॥ तेनेति ॥ युक्ताः क्षत्रिया इति शेषः ॥ ब्रह्मशब्देन ब्राह्मणत्वजातिरुच्यते यद्यपि योगप्रवचनेन क्षत्रं रक्षितं तेन च ब्राह्मणत्वं तथापि कथं रक्षणीयं जगदशेषं र

विवस्वते आदित्याय सर्गादौ प्रोक्तवानहं जगत्परिपालयितॄणां क्षत्रियाणां बलाधानाय तेन योगबलेन युक्तास्ते समर्था भवन्ति ब्रह्म परिरक्षितुं ब्रह्मक्षत्रे परिपालिते जगत्परिपालयितुमलं अव्ययं अव्ययफलत्वात् न ह्यस्य सम्यग्दर्शननिष्ठालक्षणस्य मोक्षाख्यं फलं व्येति ॥ स च विवस्वान्मनवे प्राह मनुरिक्ष्वाकवे स्वपुत्रायादिराजायाब्रवीत् ॥ १ ॥

क्षितमित्याशंक्याह ॥ ब्रह्मेति ॥ नाम्यां हि कर्मफलमनंतं जगदनुष्ठानद्वारा रक्षितुं शक्यमित्यर्थः ॥ योगस्याव्ययफलत्वे हेत्वंतरमाह ॥ अव्ययफलत्वादिति ननु कर्मफलवद्योगफलस्यापि साध्यत्वेन क्षयिष्णुत्वमनुमीयते नेत्याह नहीति ॥ अपुनरावृत्तिश्रुतिप्रतिहतमनुमानं न प्रमाणी भवतीति भावः ॥ भगवता विवस्वते प्रोक्तो योगस्तेनैव पर्यवस्यतीत्याशंक्याह ॥ स चेति ॥ स्वपुत्रायेत्युभयत्र संबध्यते ॥ आदिराजायेति ॥ इक्ष्वाकोः सूर्यवंशप्रवर्तकत्वेनैव शिष्यमु

श्री॥टीका

यथोक्ते योगे परंपरागतेवि ॰ शिष्टजनसंमतिमुदाहरति ॥ एवमिति ॥ तस्य कथं संप्रति वक्तव्यं तदाह ॥ सकालेनेति ॥ पूर्वार्द्धं व्याकरोति
एवमित्यादिना । ऐश्वर्यसंपत्तिमत्त्वं राजत्वं तेषामेव सूक्ष्मार्थनिरीक्षणक्षमत्वमृषित्वं ॥ इहेति भगवतोऽर्जुनेन सह संव्यवहारकालो गृह्य
ते । परंतपेति संबोधनं विजभते ॥ आत्मन इति ॥ २ ॥ किमिति वर्तमाने कालेऽप्रवृत्तो योगः संप्रदायरहितोऽभूदित्याशंक्याधिकार्यभावा

एवं परंपराप्राप्तमिमं राजर्षयो विदुः सकालेनेह महता योगो नष्टः परंतप ॥ २ ॥ एवं क्षत्रियपरंपरया प्राप्तमिमं राजर्षयो राजानश्च
ते ऋषयश्च राजर्षयो विदुः परमं योगं स योगः कालेन इह महता दीर्घेण नष्टो विछिन्नसंप्रदायः संप्रवृत्तः हे परंतप आत्मनो विप
क्षभूताः परे उच्यंते तान् शोषयते ज्ञानभक्तिभिर्भानुरिव तापयतीति परंतपः शत्रुतापन इत्यर्थः ॥ दुर्वलानजितेंद्रियान्प्राप्य नष्टं
योगमुपलभ्य लोके चापुरुषार्थसंबंधिनं ॥ स एवायं मया तेऽद्य योगः प्रोक्तः पुरातनः । भक्तोऽसि मे सखा चेति रहस्यं ह्येतदुत्तमं ॥
३ ॥ स एवायं मया ते तुभ्यं अद्य इदानीं योगः प्रोक्तः पुरातनः ॥ छ ॥

~~[illegible]~~ दित्याह दुर्बलानिति ॥ तदेव हि दौर्बल्यं प्रकृतोपयोगित्वेन व्याकरोति ॥ अजितेंद्रियानिति ॥ य
द्यपि कामक्रोधादिप्रधानान्पुरुषान्प्रतिलभ्य कामक्रोधादिभिरभिभूयमानो योगो नष्टो विछिंनसंप्रदायः संजातस्तथापि योगरहितेषु
पुरुषार्थो लोके लभ्यते चेत्तत्र मनेन योगोपदेशेनेत्याशंक्य यथोक्तयोगाभावे रपम पुरुषार्थाप्राप्तेर्मैवमित्याह लोकं चेति ॥ पूर्वो
योगो ~~[illegible]~~ विछिन्नसंप्रदायोऽधुनातनो योगो मदर्थमुच्यत इति भगवतेत्याशंक्याह ॥ स एवेति ॥ छ ॥ श्रीराम ॥ ७ ॥

रवि

गी०टी०

८५

कोऽस्मादन्यस्मैव स्मै कस्मैचित्पुरातनो योगो नोक्तो भगवतेत्याशंक्याह॥ भक्तोसीति॥ उक्तमधिकारिणं प्रति योगस्य च वक्तव्यत्वे
हेतुमाह॥ रहस्यं हीति॥ अनादिर्वेदमूलश्चायं योगः पुरातनत्वं॥ भक्तिश्चाराधकत्वं प्रीतिः तयोपलक्षितो निजस्वरूपमपेक्ष्य भक्तो
विवक्षितः समानवयाः स्निग्धः सहायश्च सखेत्युच्यते॥ तदिति॥ कथं यो मे विशिष्यते तत्राह॥ ज्ञानमिति॥३॥ भगवति लोक
स्यानीश्वरत्वशंकां निवर्त्तयितुं चोद्यमुद्भावयति॥ भगवतेति॥ परिहारार्थं भगवतो मनुष्यवदवस्थितस्यानीश्वरत्वमुपेत्य

भक्तोसि मे सखा चासीति रहस्यं हि इति यस्मादेतदुत्तमं योगो ज्ञानमित्यर्थः॥३॥ भगवता विप्रतिषिद्धमुक्तमिति मा भूत्केषां
चित्बुद्धिरिति परिहारार्थं चोद्यमिव कुर्वन्नर्जुन उवाच॥ अपरं भवतो जन्म परं जन्म विवस्वतः॥ कथमेतद्विजानीयां त्व
मादौ प्रोक्तवानिति॥४॥ अपरमर्वाग्वसुदेवगृहे भवतो जन्म परं पूर्वं सर्गादौ जन्मोत्पत्तिर्विवस्वत आदित्यस्य तत्कथमेतद्विजा
नीयामविरुद्धार्थतया त्वमेवादौ प्रोक्तवानिमं योगमस्मै एवमिदानीमहं प्रोक्तवानसीति यो वासुदेवेऽनीश्वराऽ
सर्वज्ञाशंका मूर्खाणां तां परिहरन्॥ श्रीभगवानुवाच॥ यदर्थो ह्यर्जुनस्य प्रश्नः ८२।

तस्यानीश्वरत्वमुपेत्य तद्वचने शंकितविप्रतिषेधस्येति शेषः॥ भगवतो निजं रूपमुपेत्य नेदं चोद्यं किंतु लीलाविग्रहं गृही
त्वेति वक्तुं चोद्यमिवेत्युक्तं॥ एतच्छब्दार्थमेव स्फुटयति॥ यस्त्वमिति॥४॥ भगवतस्तज्ज्ञानो मनुष्यत्वशंकां वारयितुं प्रतिवचनम
वतारयति॥ यो वासुदेव इति॥ अन्यथा प्रश्ने कथमाशंकान्तरं परिहर्तुं भगवद्वचनमित्याशंक्य प्रश्नप्रतिवचनयोरेकार्थ
त्वमाह॥ यदर्थो हीति॥ यस्य शंकितस्य विरोधस्य परिहारार्थस्तस्य प्रश्नस्तमेव परिहारं वक्तुं भगवद्वचनमित्यर्थः॥५॥

८५
अ०४
२

अतीतानेकजन्मवत्वंममेवनासाधारणांकिंतुसर्वप्राणिसाधारणमित्याह॥तवचेति॥तानिप्रमाणाभावान्नप्रतिभांती
त्याशंक्याहतानीति॥ईश्वरस्यानावृतज्ञानत्वादित्यर्थः॥किमितितिर्हितानिममनप्रतीयंतेतत्राहनावृतज्ञानत्वादित्याह॥न॥
त्वमिति॥पराभिभवहेतुत्वेनत्वयिपरिभवार्थोपहतत्वात्तवज्ञानावरणंविक्षेपमित्याह॥परंतपेति अर्जुनस्यभगवतासह॥तीता
नेकजन्मवत्वेतुल्येविज्ञानवैषम्येहेतुमाह॥धर्मेति आदिशब्देनरागलोभादयोगृह्यंते॥ईश्वरस्यातीतानागतवर्तमानस
र्वार्थविषयज्ञानवत्वेहेतुमाह॥अहमिति॥५॥ईश्वरस्यकारणाभावाज्जन्मैवनघटतेमतीतानेकजन्मवत्वंतुदूरोत्सारितमिति॥ बाप

बहूनिमेव्यतीतानिजन्मानितवचार्जुन॥तान्यहंवेदसर्वाणिनत्वंवेत्थपरंतप॥५॥बहूनिमेव्यतीतानिअति
क्रांतानिजन्मानितवचहेअर्जुन॥तान्यहंवेदजानेसर्वाणिनत्वंवेत्थत्वंनजानीषेपरंतपधर्माधर्मादिप्रतिबंध
कज्ञानशक्तित्वात्॥अहंपुनर्नित्यशुद्धबुद्धमुक्तसत्स्वभावत्वादनावरणज्ञानशक्तिरितिवेदाहं॥छ॥कथंतर्हि
तवनित्येश्वरस्यधर्माधर्माभावेजन्मेत्युच्यते॥अजोऽपिसन्नव्ययात्माभूतानामीश्वरोपिसन्॥प्रकृतिंस्वा
मधिष्ठायसंभवाम्यात्ममायया॥छ॥

शंकते॥कथमितिवक्ष्यतोजन्माभावेपिमायावशाज्जन्मसंभवतीत्युत्तरमाह॥उच्यतइति॥पारमार्थिकजन्मायोगेका
रणापर्वाइनेनानन्यप्रावृत्तिभासिकजन्मसंभवेकारणमाहप्रकृतिमिति॥प्रकृतिंशुद्धसत्त्वस्वरूपविषयतांप्रसादेषुमा समापयेत्पुष्टं

भा०टी

गी०

१

वस्तुतोजन्माभावेकारणानुवादभावंविवृणोति।।अजोपीत्यादिना।।प्रातिभासिकजन्मसंभवेकारणकथनपरमुत्तरार्धंविभजते।।प्रकृतिमित्यादिना।।प्रकृतिशब्दस्यस्वरूपशब्दपर्यायत्वंवारयति।।मायामिति।।तस्याःस्वातंत्र्येणनिराकृत्यभगवदधीनत्वमाह।।स्वमेति।।तस्याश्चाधिकरणद्वारेणानवच्छिन्नत्वंसूचयति।।वैष्णवीमिति।।मायाशब्दस्यापिप्रज्ञानामसुपाठाद्विज्ञानशक्तिविषयत्वमाशंक्याह।त्रिगुणात्मिकामिति।।तस्याःकार्यलिंगकमनुमानंसूचयति।।यस्याइति।।जगत्तोमायावशवर्तित्वमेवसू

६

अजोपिजन्मरहितोऽपिसन्तथाऽव्ययात्माऽक्षीणज्ञानशक्तिस्वभावोऽपिसन्तथाभूतानांब्रह्मादिस्तंबपर्यंतानां ईश्वरईशनशीलोऽपिसन्प्रकृतिंममवैष्णवीमायांत्रिगुणात्मिकांयस्यावशेसर्वंजगद्वर्ततेययामोहितंसत्स्वमात्मानंवासुदेवंनजानातितांप्रकृतिंस्वांअधिष्ठायवशीकृत्यसंभवामिदेहवानिवजातइवचआत्ममाययाआत्मनोमायया।।नपरमार्थतोलोकवत्।।छ।।श्रीरामचंद्रायनमः।।श्रीरामः।।छ।। ।।छ।। ० ० छ।।

चयति।।ययेति।।यथालोकेकश्चिज्जातोदेहवानालक्ष्यतेएवमहमपिमाययामामधिष्ठित्यतयास्ववशयासंभवामिजन्मव्यवहारमनुभवामीतिनमायामयमीश्वरस्यजन्मेत्याह।।तांप्रकृतिमित्यादिना।।संभवामीत्युक्तमेवविभजतेदेहवानिवेति।।अस्मदादेरिवतवापिपारमार्थिकत्वाभिमानोजन्मादिविषयेस्यादित्याशंक्यप्रागुक्तस्वरूपपरिज्ञानेनघस्यादीश्वरस्वमेवेमित्याह।।नपरमार्थतइतिआवृतज्ञानवतोलोकस्यजन्मादिविषयेपरमार्थत्वाभिमानःसंभवतीत्याह।

[illegible]

६६
अ०५४
३

मेश्वरस्य मायानिबंधनं जन्मोक्तं तस्य प्रश्नपूर्वकं कालं कथयति॥ यदेत्यादिना॥ चातुर्वर्ण्ये चातुराश्रम्ये च यथावदनुष्ठीयमानेनास्ति धर्महानिरिति मन्वानो विशिनष्टि॥ वर्णानामिति॥ वर्णैराश्रमैस्तदाचारैश्च लक्ष्यते ज्ञाप्यते धर्मस्तस्येति यावत्॥ धर्महानौ समस्तपुरुषार्थभंगो भवतीत्यभिप्रेत्याह॥ प्राणिनामिति॥ न च यथोक्तस्य धर्मस्य हानिं सोढुं शक्नो भगवानित्याह॥ भारतेति॥ न केवलं प्राणिनो धर्महानिरेव भगवतो मायाविग्रहस्य परिग्रहे हेतुरपि तु तेषामधर्मप्रवृत्तिरपीत्याह॥ अभ्युत्थानमिति॥ यदा भवेदिति पूर्वेणास्य संबंधः॥

तच्च जन्म कदा किमर्थं चेत्युच्यते॥ यदा यदा हि धर्मस्य ग्लानिर्भवति भारत॥ अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहं॥ ७॥ यदा यदा हि धर्मस्य ग्लानिर्वर्णाश्रमादिलक्षणस्य प्राणिनामभ्युदयनिःश्रेयससाधनस्य भवति भारत अभ्युत्थानं समुद्भवोऽधर्मस्य तदात्मानं सृजाम्यहं मायया॥ किमर्थं परित्राणाय साधूनां विनाशाय च दुःकृतां धर्मसंस्थापनार्थाय संभवामि युगे युगे॥ ८॥ परित्राणाय परिरक्षणाय साधूनां सन्मार्गस्थानां विनाशाय च दुष्कृतां पापकारिणां॥ किं च धर्मसंस्थापनार्थाय धर्मस्य सम्यक्स्थापनं तदर्थं संभवामि प्रकटे युगे प्रतियुगं॥ ८॥ श्रीरामः॥ ८॥:

यथोक्ते काले कृतकृत्यस्य भगवतो मायाकृते जन्मनि प्रश्नपूर्वकं प्रयोजनमाह॥ किमर्थमित्यादिना॥ यथा साधूनां रक्षणमसाधूनां निग्रहश्च भगवदवतारफलं तथा फलांतरमपि तस्यास्तीत्याह॥ किं चेति॥ धर्मे हि स्थ~~[illegible]~~ पितेन जगदेव स्थापितं भवति॥ अथ चान्यथाभिन्नमर्यादं जगदसंग[illegible]तमापद्यतेत्यर्थः॥ ८॥ श्रीरामाय नमः॥ श्रीराम:

गी० ८०

मायामयमीश्वरस्य जन्म न वास्तवं तस्यैव च जगत्परिपालनं कर्म नान्यस्येति जानतः॥ श्रीपो वाग्निंदर्शीपञ्चपद्धेपृथक्
पंसूचयति॥ तद्दिव्याहिना॥ यद्योतंमायामयंकल्पितमित्यर्थः। वेदनस्य यथावत्त्वं वेधस्य जन्मादेरूपानतित्वंगित्वं
यद्विनुनर्भगवतो वास्तवं जन्म साधुजनपरिपालनादि चान्यस्यैव कर्म क्षत्रियस्येति विवक्ष्येनन्तरानन्त्वापरिहानवप्रयुक्तो

ततः॥छ॥ जन्मकर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः॥ त्यक्त्वा देहं पुनर्जन्म नैति मामेति सो ऽर्जुन॥ ९ जन्म मायारू
पं कर्म च साधूनां परित्राणादि मे मम दिव्यमप्राकृतमैश्वरमेवं यथोक्तं यो वेत्ति तत्त्वतस्तत्त्वेन यथावत् स त्यक्त्वा देह
इमं पुनर्जन्म पुनरुत्पत्तिं नैति न प्राप्नोति मामेवागच्छति समुच्यते ऽर्जुन॥ छ॥ नैष मोक्षमार्ग इदानीं प्रवृ
त्तः किं तर्हि पूर्वमपि वीतरागभयक्रोधा मन्मया मामुपाश्रिताः॥ बहवो ज्ञानतपसा पूता मद्भावमागताः॥
॥१०॥ वीतरागभयक्रोधा रागश्च भयं च क्रोधश्च रागभयक्रोधा वीता विगता येभ्यस्ते वीतरागभयक्रोधाः॥
मन्मया ब्रह्मविद ईश्वराभेददर्शिनः॥ मामेव च परमेश्वरमुपाश्रिताः॥ छ॥ ॥छ॥ ॥ ॥ ॥

जन्मादिसंसारोहुर्वोरः स्यादिति भावः॥ संप्रवृत्तिप्रस्तावान्मोक्षमार्गस्य न तन्नसेनाप्यवस्थितत्वमाशंक्य परिहरति॥ नैष
इति॥ मन्मयत्वस्य मद्भावागमने नापौनरुक्त्यं दर्शयति॥ ब्रह्मविद इति॥ आत्मनोभिमतेन मित्राभिन्नत्वेनिवाभ्रमत्सरो
वेदनं व्याचष्टे यति॥ ईश्वरेति॥ अभेददर्शनेन समुच्चितकर्मानुष्ठानं प्रस्तावयति॥ मामेवेति॥ ८५ ॥ श्रीरामचंद्र॥ ॥

८७
अ०च०४
४

तदुपायं श्रयत्नमेव विशदयति॥केवलेति॥मामुपाश्रिताइति केवलज्ञाननिष्ठस्यमुक्ता ज्ञानतपसापूताइतिकिमर्थं
पुनरुच्यतेइत्याह॥इतरेति॥१०॥ईश्वरः सर्वेभ्यो मोक्षं प्रयच्छति चेत्प्रागुक्तविशेषणावैयर्थ्यापत्तिः केभ्यश्चिद्देव
मोक्षं प्रयच्छेत्तर्हि तस्य रागादिमत्त्वादनीश्वरत्वापत्तिरिति शंकते॥नवतर्हीति॥ये मुमुक्षवस्तेभ्यो मोक्षमीश्वरो ज्ञान
संपादनद्वारा प्रयच्छति फलांतरार्थिभ्यस्तु तत्तदुपायनिष्ठापादनेन तत्तदेव ददातीति नास्य रागद्वेषावितिपरिहर

केवलज्ञाननिष्ठानुस्यर्थः बहवोऽनेके ज्ञानतपसा ज्ञानमेव परमात्मविषयं तपस्तेन ज्ञानतपसा पूताः परां शुद्धिं
गताः सन्तो मद्भावमीश्वरभावं मोक्षमागताः॥ममनुप्राश्रिताइत्यारतपोनिरपेक्षा ज्ञाननिष्ठा इत्यस्य लिंगं ज्ञा
नतपसेतिविशेषणं॥नवतर्हि राग[द्वे]षौ स्तो येन केभ्यश्चिदेवात्मभावं प्रयच्छसि न सर्वेभ्य इत्युच्या
ते॥ छ॥ ये यथा मां प्रपद्यंते तांस्तथैव भजाम्यहं॥मम वर्त्मानुवर्तंते मनुष्याः पार्थ सर्वशः॥११॥
ये यथा येन प्रकारेण येन प्रयोजनेन फलार्थितया मां प्रपद्यंते तांस्तथैव तत्फलदानेन भजाम्यनुगृ
ह्णाम्यहं। नत्वेषां मोक्षं प्रयच्छनर्थित्वात् नह्येकस्य मुमुक्षुत्वं फलार्थित्वं च युगपत्संभवति॥ः छः॥ श्रीगणेशाः

ति॥उच्यत इति॥मुमुक्षूणामीश्वरानुसारित्वेऽपि फलांतरार्थिनां कुतस्तदनुसारित्वमित्याशंक्य फलमत उपपत्तेरिति
न्यायेन तत्तत्फलस्येश्वरायत्तत्वात्तदनुवर्तनमावश्यकमित्याह॥ममेति॥भगवद्भजनभाजिनां सर्वेषामेवत्वमे
करूपं किमिति नानुगृह्णत इत्याह॥तेषामिति॥अभ्युदयनिःश्रेयसार्थित्वं प्रार्थनावैचित्र्यादेकस्यैव किं न स्यादित्या

शंक्यापर्यायेणतदनुपपत्तिंसाधयति॥नहीति॥

१० भ० ७ री

मुमुक्षूणां फलार्थिनां च विभागे स्थिते सति अनुग्रहविभागं फलितमाह ॥ अत इति फलप्रदानेनानुग्रहात् ममेति संबं-
ध. नित्यनैमित्तिककर्मानुष्ठायिनामेव फलार्थित्वाभावे सति च मुमुक्षुत्वे कथं तेष्वनुग्रहः स्यादिति तत्राह ॥ ये यथो मं-
ति ॥ ज्ञानप्रदानेन भगवान् मोक्षांतरस्य संबंधः ॥ संति च केचित्सत्त्वसर्वकर्मारोपेण ज्ञानिनो मोक्षमेवापेक्षमाणास्तेष्वनुग्रह-
प्रकारं प्रकटयति ॥ ये त्वा निरहति ॥ केचित्तु हार्त्ती संगो ज्ञानादि साधनांतर रहिता भगवंतमेवार्तिमपहंतुमनुवर्तते तेषु भगवतो

मीर

अतो ये फलार्थिनस्तान् फलप्रदानेन यथो मत्कारिणः स्वफलार्थिनो मुमुक्षवश्च तान् ज्ञानप्रदानेन ये ज्ञानिनः
संन्यासिनो मुमुक्षवस्तान् मोक्षप्रदानेन तथा तेषां मार्तिहरणेन सर्वपि तथा मोपर्घते [illegible] तांस्तथैव भ-
जामीत्यर्थः ॥ न पुनः रागद्वेषनिमित्तं मोहनिमित्तं वा कंचिद्भजामि सर्वथापि सर्वावस्थासु मम परमेश्वरस्य व-
र्त्मार्गमनुवर्तंते ये मनुष्याः फलार्थितया यस्मिन्कर्मणि अधिकृता ये प्रवर्तंते मनुष्याः उच्यंते ॥ पार्थ सर्वशः
सर्वप्रकारैः ॥ छ ॥

ऽनुग्रहविशेषं दर्शयति ॥ तथेति ॥ पूर्वार्द्धव्याख्यानमुपसंहरति ॥ तस्मेवमिति ॥ भगवतोऽनुग्रहे निमित्तांतरं निवारयति
॥ न पुनरिति ॥ फलार्थित्वे मुमुक्षुत्वे च जंतूनां भगवदनुसरणमावश्यकमित्युत्तरार्द्धं विभजते सर्वथापीति ॥ सर्वावस्थासु के-
वलेन तेनात्मनापरस्यैवेश्वरस्यावस्थानं मार्गो ज्ञानकर्मलक्षणः मनुष्यग्रहणादितरेषामीश्वरमार्गानुवर्तित्वं प्र-
सिद्धस्याहिंसार्थं व्याह ॥ फलार्थिभिः सर्वप्रकारैर्मम मार्गमनुवर्तंत इति पूर्वेणा संबंधः ॥ ११ ॥ श्रीरामचंद्रार्पणम- ॥ छ ॥

२ट
न
२
प
मोक्षेनाइ८ नेट
२ट
अं० च ४
५

अत्र व्याख्यातां ज्ञानकर्मानुरोधेन भगवता नैष्ठुर्यमह विधानमतस्परागद्वेषौ यदि न भगवतस्तर्हि तस्य रागाद्यभावादेव सर्वेषु प्रा
णिष्वनुग्रहेच्छा तुल्या प्राप्ता न च तस्यां सत्यामेव फलस्यायत्तः संपादने सामर्थ्यं न तु भगवतो महतो मोक्षाख्यस्य फलस्य प्रदाने
शक्तिरिति युक्तं स्वप्रतिहतज्ञानेच्छाक्रियाशक्तिमतस्तव सर्वफलानुफलप्रदानसामर्थ्यात् तथा च ययोः कानुग्रहेच्छायां सत्यांच
यिच प्रयोजकसामर्थ्यं वर्तते सर्वफलार्हे भ्युदयादिसुखाः मोक्षमेवापेक्षमाणाः ज्ञाने प्रवृत्ता मे वृ किमिति न प्रतिपद्येरन्निति चे
त्तयन्ति॥ यदीति॥ मोक्षापेक्षाभावाना पायाम्बज्ञानाहपि वैमुख्यान्नगवत्साम्यभावे हेतुमभिदधानस्तमाधत्ते

परमेश्वरस्य रागादिदोषाभावात् सर्वप्राणिष्वनुजिघृक्षायां तुल्यायां सर्वफलप्रदानसमर्थे च त्वयि स
ति वासुदेवः सर्वमिति ज्ञानेनैव मुमुक्षवः संतः कस्मात् त्वामेव सर्वे न प्रतिपद्यंत इति स्वरागात्तत्र कारणं॥ कांक्षं
तः कर्मणां सिद्धिं यजंत इह देवताः॥ क्षिप्रं हि मानुषे लोके सिद्धिर्भवति कर्मजा॥ १२ कांक्षंत अभीप्संतः कर्म
णां सिद्धिं फलनिष्पत्तिं प्रार्थयंतो यजंत इहास्मिन् लोके देवता इन्द्राद्याः॥ अथ योन्यां देवतामुपास्तेऽन्योऽसा
वन्योऽहमस्मीति न स वेद यथा पशुरेवं स देवानामिति श्रुतेः॥ छ॥ः छ॥

॥ प्रविशन्ति॥ कर्मफलसिद्धिमिच्छतां किमिति मनुष्यलोके देवतायजनामित्यमेन चाह॥ क्षिप्रं हीति॥ काम्यफलसंपत्त्यर्थिनां
पशुपश्यविभागदर्शिनां न दर्शनेकारणमात्मज्ञानमित्यत्र बृहदारण्यकश्रुतिमुदाहरन्ति॥ अथेति॥ अविद्याप्रक
रणोपक्रमार्थमथेत्युक्तमुपास्योपासनभेददर्शनमित्यत्र घकारणमात्माज्ञानं जन्वेति दर्शयति॥ नेति॥ यथास्मदादीनां हवि
र्वहनादिना पशुरुपकरोत्येवमज्ञो देवादीनां यागादिभिरुपकरोतीत्याह॥ यथेति॥ छ॥ श्रीरामनारायणाय नमः श्रीगणेशायः

गी०भा०टी०
८९

किमितितेफलकांक्षिणोभिन्नदेवतायाजिनोज्ञानमार्गंनापेक्षंतेतेनतत्रोत्तरार्द्धमुत्तरश्लोकेनयोजयति॥तेषामित्यादिना॥यस्मा
घ्रयोक्तानामधिकारिणांकर्मप्रयुक्तंफलंलोकविशेषेद्रुतमितिसिध्यतितस्मात्तेषांमोक्षमार्गादस्तिवैमुख्यमितिसंधिः॥मानु
षलोकविशेषणंकिमर्थमित्याशंक्याह॥मनुष्यलोकेहीति॥लोकांतरेषुतर्हि।कर्मफलसिद्धिर्नास्तीत्याशंक्यक्षिप्रंविशेष
णस्यतात्पर्यमाह॥क्षिप्रमिति॥क्वचित्कर्मफलसिद्धिरविलंबेनभवतिअन्यत्रतुविलंबेनेतिविभागेकोहेतुरित्याशंक्यसा

तेषांहिभिन्नदेवतायाजिनांफलाकांक्षिणांक्षिप्रंशीघ्रंहियस्मात्मानुषेलोकेमनुष्यलोकेहिशास्त्राधिका
रःक्षिप्रंहिमानुषेलोकइतिविशेषणादन्येष्वपिकर्मफलसिद्धिंदर्शयतिभगवान्मानुषेलोकेवर्णाश्रमा
दिकर्माणीतिविशेषःतेषांचवर्णाश्रमाद्यधिकारिणांकर्मफलसिद्धिःक्षिप्रंभवतिकर्मजाकर्मभ्योजातामा
नुषएवलोकेवर्णाश्रमादिकर्माधिकारोनान्येषुलोकेष्वितिनियमःकिंनिमित्तइतिअथवावर्णाश्रमादिप्रवि
भागोयेषांतेमनुष्याममवर्त्मानुवर्तंतेसर्वशइत्युक्तंकस्मात्पुनःकारणान्ननियमेनतवैववर्त्मानुवर्तंतेना
न्यस्येत्युच्यते॥१२॥चातुर्वर्ण्यंमयासृष्टंगुणकर्मविभागशः

मयीभावाभावाविसाह॥मानुषइति॥मनुष्यलोकेकर्मफलसिद्धेरतिशीघ्रत्वात्तदभिमुखानांज्ञानमार्गवैमुख्यंप्रापिक
मित्युक्तमुपसंहरति तेषामिति॥१२॥मनुष्यलोकेचातुर्वर्ण्यंचातुराश्रम्यमित्यनेनद्वारेणकर्माधिकारनियमकारणंपृच्छति॥
मानुषएवेतिआदिशब्देनावस्थाविशेषाविवक्षितेप्रकारांतरेणाहेनानुवादपूर्वकंचोद्यमुत्थापयति।अथवेत्या
दिना।प्रश्नद्वयंपरिहरतिचातुरिति॥१२॥

८९
अ०४
६

नर्हि तव कर्तृत्वभोक्तृत्वसंभवात्संसारहादितुल्यत्वेनानीश्वरत्वमित्याशंक्याह॥ तस्येति॥ ईश्वरस्य विषमां सृष्टिं विदधान
स्य सृष्टिवैषम्यनिर्वाहकं कथयति॥ गुणेति॥ गुणविभागेन कर्मविभागस्तेन चातुर्वर्ण्यस्य सृष्टिभेदो परिशिष्टांसं स्पष्टयति॥
म ३ तत्रेत्यादिना॥ प्रश्नद्वैप्रतिविधानं प्रकृतमुपसंहरति॥ तच्चेदमिति॥ मनुष्यलोकेपरं वर्णाश्रमादिप्रवृत्तकेकर्मणामधिकारस्तत्रैव वर्णा
देरीश्वरेणास्पष्टत्वान्नान्यलोकान्तरेषु तत्र वर्णाद्यभावादीश्वरमेव चतुर्वर्णाश्रमादि विभागभागिनोधिकारिणो नुवर्ततीति

तस्य कर्तारमपि मां विद्ध्यकर्तारमव्ययं॥ १३॥ चातुर्वर्ण्यं चत्वार एव वर्णाश्चातुर्वर्ण्यं मयेश्वरेण सृष्टमुत्पादितं
गुणकर्मविभागशः गुणविभागशः कर्मविभागशश्च गुणाः सत्वरजस्तमांसि तत्र सात्विकस्य सत्वप्रधानस्य
ब्राह्मणस्य शमो दम इत्यादीनि कर्माणि सत्वोपसर्जनस्य रजःप्रधानस्य क्षत्रियस्य शौर्यतेजःप्रभृतीनि
कर्माणि तमउपसर्जनस्य रजःप्रधानस्य वैश्यस्य कृष्यादीनि कर्माणि रजउपसर्जनस्य तमःप्रधानस्य
शूद्रस्य शुश्रूषैव कर्म इत्येवं गुणकर्मविभागशश्चातुर्वर्ण्यं मया सृष्टमित्यर्थः॥ तच्चेदं चातुर्वर्ण्यं नान्येषु लोकेषु
अतो मानुषे लोके इति विशेषणं हंत तर्हि चातुर्वर्ण्यस्य सर्गादेः कर्मणः कर्तृत्वात्तत्फलेन युज्यसे अतो न त्वं
नित्यमुक्तो नित्येश्वरश्चेति॥ ७॥

नैव वर्णादेस्तद्व्यापारस्य च सत्वात्तत्कर्तृत्वेन तस्य फलत्वादित्यर्थः॥ तस्येत्यादि द्वितीयभागापोद्यं चोद्यमनूद्य प्रति
॥ हंतेति॥ यदि चातुर्वर्ण्यादिकर्तृत्वादीश्वरस्य प्राप्तो नियमो नित्यमुक्तत्वादि तर्हि तद्विषयस्य स्याद्वस्तुनिष्ठव्यापारस्य
च धर्मादिनिर्वर्तकत्वात्तत्फलस्य कर्तृगामित्वात्तत्कर्तृत्वभोक्तृत्वयोस्तत्वपि प्र[illegible]संगान्नित्यमुक्तत्वादि तेन स्यादि

भाष्यं॥ ४॥ श्रीराम॥

अ

मायया कर्तृत्वं परमार्थतस्त्वकर्तृत्वमित्यभ्युपगमाच्चिरसुखकलाहि सिंध्यतीसुतरामाह ॥ उच्यत इति ॥ मायाप्रभ[illegible]सा हि संव्यवहारे
राचानुवेरापीहेस्तत्वकर्मणाव्ययस्यापि कर्ताहं तथापि तथाविधधर्माणां परमार्थतोऽकर्तारं विद्धीति योजना ॥ अथ कर्तृत्वाहेवा
भोक्तृत्वसिद्धिरित्याह अतएवेति ॥ १३ ॥ ईश्वरस्य कर्तृत्वभोक्तृत्वयोर्वस्तुतोऽभावे कर्मतत्फलसंबंधवैधुर्ये स्यादिति फलतीत्यसात्व ॥
येषांलिपंति ॥ कर्मतत्फलसंस्पर्शशून्यं मामीश्वरं पश्यतो हर्शनानुरूपं फलं दर्शयति ॥ इतिमामिति ॥ नानिकर्माणीति येष

उच्यते । यद्यपि मायासंव्यवहारेण तस्य कर्मणः कर्तारमपि संतं मां परमार्थतो विद्ध्यकर्तारमत एवाव्ययमसंसा-
रिणं च मां विद्धि । येषां तु कर्मणां कर्तारं मां मन्यसे परमार्थतस्तेषामकर्तैवाहं ॥ यतः ॥ न मां कर्माणि लिंपंति न मे कर्म-
फले स्पृहा ॥ इति मां योऽभिजानाति कर्मभिर्न स बध्यते ॥ १४ ॥ न मां तानि कर्माणि लिंपंति देहाद्यारंभकत्वे-
नाहंकाराभावात् ॥ न च तेषां कर्मणां फलेषु मे स्पृहा तत्र ममायेषां तु संसारिणामहं कर्तेत्यभिमानः कर्मसु स्पृहा
तत्फलेषु च तान्नकर्माणि लिंपंतीति युक्तं तदभावान्न मां कर्माणि लिंपंतीत्येवं योऽन्योपि मामात्मत्वेनाभिजा-
नाति

कर्मणामहंकर्तेत्यभिमानस्तानीतियावत् ॥ देहेंद्रियाद्यारंभकत्वेन तेषां कर्मणामीश्वरे संस्पर्शाभावे तस्य तत्कारण-
वस्तुतामहंकाराभावं हेतुं करोति ॥ अहंकाराभावादिति ॥ कर्मफलतृष्णाभावाच्चेश्वरं कर्माणि न लिंपंतीत्याह ॥
पं न चेति ॥ उक्तमेव प्रपंचयति ॥ येषां त्विति ॥ तदभावात्कर्मस्वहं कर्तेत्यभिमानस्य तत्फलेषु स्पृहायाश्चाभावादित्यर्थः ॥
ईश्वरस्य कर्मभिर्बंधाभावेपि क्षेत्रज्ञस्य किमायातमित्याशंक्योनराईंद्याचष्टे ॥ इत्येवमिति ॥ छ ॥ श्रीकृष्णापनमः

अभिज्ञानप्रकारमभिनयति ॥ नाहमिति ॥ ज्ञानफलं कथयति ॥ स कर्मभिरिति ॥ कर्माबंधं विदुषो विशदयति ॥ तस्या
पीति ॥१४॥ तत्र कर्मतत्फलसंबंधाभावेन यास्तानवत्त्वात्तेहसंबंधे ममापि किं कर्मरोत्साशंवपकर्मणीतिकर्तृत्वाभिमानतत्फलस्पृ
हां चाकृत्वा मुमुक्षुवत्तया कर्म कर्तव्यमेवेत्याह ॥ नाहमित्यादिना शुवमिति नाहं कर्तेत्येवमादि परामृश्यते तेन पूर्वैर्मुमु
क्षुभिरनुष्ठितत्वेन हेतुनेत्यर्थः कर्मैवेत्येवकारार्थमाहमत्यादिना त्वंशब्दस्यक्तिपापहेतेन संबंधः ॥ तस्मादिति सुगमं

मी

॥१४॥

नाहं कर्त्ता न मे कर्मफलस्पृहेति ॥ स कर्मभिर्नैव बध्यते तस्यापि न कर्माणि देहारंभकाणि भवंतीत्यर्थः ॥ नाहं क
र्त्ता न मे कर्मफले स्पृहेति ॥ ४८ ॥ एवं ज्ञात्वा कृतं कर्म पूर्वैरपि मुमुक्षुभिः ॥ कुरु कर्मैव तस्मात्त्वं पूर्वैः पूर्वतरं कृतं ॥
॥१५॥ एवं ज्ञात्वा कृतं कर्म पूर्वैरप्यतिक्रांतैरपि मुमुक्षुभिः ॥ कुरु तेन कर्मैव [illegible] त्वं न तूष्णीमासनं नापि संन्या
सः कर्तव्यः तस्मात्त्वं पूर्वैरप्यनुष्ठितत्वात्पघनत्वविनिहतात्मशुद्ध्यर्थं तत्त्वविच्चे[illegible] लोकसंग्रहार्थं पूर्वैर्जनकादि
भिः पूर्वतरं कृतं नाधुनातनैः कृतं नि[illegible]र्वर्तितं ॥ छ ॥

मेवसुकुरूपति ॥ पूर्वैरिति ॥ यदुक्तं किं मम कर्मणेति तत्र त्वमज्ञो वा तत्त्वविद्वा यद्यज्ञस्तर्हि चित्तशुद्ध्यर्थं कुरु कर्मैवेत्याह यदी
ति ॥ द्वितीयं प्रत्याह ॥ तत्त्वविच्चेदिति ॥ कुरु कर्मेति संबंधः पूर्वैर्महैराचरितमित्येतावत्किमिति विवेकवतामपि न तत्कर्तव्यमि
त्याशंक्याह ॥ कजनकादिभिरिति ॥ तेन हैव साधकमैव कृतवंतो न तर्हि हानिमप्रमाणाशिकत्वादनुष्ठेयमित्या

ता२

शंक्याह ॥ पूर्वतरमिति १५ ॥

मे

कर्मविशेषणमाक्षिपति॥ तत्रेति॥ मनुष्यलोकः सप्तम्यर्थः॥ कर्मणि महतो वैषम्यस्य विद्यमानत्वात्स्वपूर्वैरनुष्ठितत्वेन पूर्वतरत्वे
नचविशेषितत्वेन।स्मिन्नप्रतिस्त्वसुकरेतियुक्तं विशेषणमितिपरिहरति॥ उच्यत इति॥ कर्मणिदेहादिचेष्टारूपे लोकप्रसिद्धे ना
स्तिवैषम्यमितिशंकते॥ कथमिति॥ विद्यावतामपिकर्मादिविषयेव्यामोहोपपत्तेः सुतरामेवातत्ववतद्विषयेव्यामोहः संभ

तत्रकर्मैवकर्तव्यंचेद्वचनाद्वाकरोम्यहं किं विशेषितेन पूर्वैः पूर्वतरंकृतमित्युच्यते॥ यस्मान्महद्वैषम्यं
कर्मणिकथं। किंकर्मकिमकर्मेतिकवयोप्यत्रमोहिताः॥ तत्तेकर्मप्रवक्ष्यामियज्ज्ञात्वामोक्ष्यसेऽशुभात्॥
१६॥ किंकर्मकिंवाकर्मेतिकवयोमेधाविनोप्यत्रास्मिन्कर्मादिविषयेमोहितामोहंगताः। अतस्तेतु
भ्यमहंकर्मअकर्मचप्रवक्ष्यामियत्ज्ञात्वाविदित्वाकर्मादिमोक्ष्यसेऽशुभात्संसारात्॥ नचैवंत्वया
मंतव्यंक[illegible]र्मनामदेहादिचेष्टालोकप्रसिद्धमकर्मनामतदक्रियापा[illegible]तूष्णीमासनं किंतत्रबोद्धव्यमिति।

भावापोह्यार्थमाप्रवाक्यापेक्षणादस्तिकर्मणिवैषम्यमित्युत्तरमाह॥ किंकर्मेति॥ तत्तेकर्मसत्याकारानुबंधेनापि
पदंछेदेनव्यंकर्मादिप्रवचनस्यप्रयोजनमाह॥ यज्ज्ञात्वेति॥ तत्कर्माकर्मचेतिसंबंधः। अतोमेधाविनामपिपथ्योक्तेविष
येव्यामोहस्यसंभवादित्यर्थः॥ कर्मणोकर्मणश्चप्रसिद्धत्वात्तद्विषयेनकिंचिद्बोद्धव्यमितिचोद्यमनूद्य॥ध॥

तु१

तत्र हेत्वाकांक्षापूर्वकमनंतरश्लोकमवतारयति॥कस्माद्धि॥त्रिष्वपि कर्माकर्मविकर्मसु बोद्धव्यमस्तीति यस्मादध्या
हारस्तस्मान्मदीयं प्रवचनमर्थवदिति योजना॥बोद्धव्यसद्भावे हेतुमाह॥यस्मादिति॥त्रितयं प्रकृत्य अन्यतमस्यग्र
प३ हणत्ववचनमयुक्तमित्याशंक्यान्यतमग्रहणस्योपलक्षणार्थत्वमुपेत्य विवक्षितमर्थमाह॥कर्मादीनामिति॥१७॥उ

बोद्धव्यं
बोद्धव्यं

कस्मात्॥कर्मणो ह्यपि बोद्धव्यं च विकर्मणः॥अकर्मणश्च बोद्धव्यं गहना कर्मणो गतिः॥१७॥कर्मणः शास्त्र
विहितस्यापि यस्मादस्ति बोधव्यं चास्त्येव विकर्मणः प्रतिषिद्धस्य तथा अकर्मणश्च तूष्णींभावस्य बोद्ध
व्यमस्तीति त्रिष्वपि अध्याहारः कर्तव्यो यस्मात् गहना विषमा दुर्विज्ञाना कर्मण इत्युपलक्षणार्थं कर्मादी
नां कर्माकर्मविकर्मणां गतिर्याथात्म्यं तत्त्वमित्यर्थः॥छ॥ किं पुनस्तत्त्वं कर्मादेर्यद्बोद्धव्यं वक्ष्यामीति प्रति
ज्ञातमुच्यते॥छ॥कर्मण्यकर्म यः पश्येदकर्मणि च कर्म यः॥स बुद्धिमान्मनुष्येषु स युक्तः कृत्स्नकर्मकृत्॥
१८॥कर्मणि कर्म क्रियत इति व्यापारमात्रे तस्मिन्कर्मण्यकर्म कर्माभावं यः पश्येदकर्मणि च कर्माभावे च कर्म
कर्तृतंत्रत्वात्प्रवृत्तिनिवृत्त्योः

तरश्लोकमाकांक्षापूर्वकमुपादत्ते॥किं पुनरिति॥प्रथमपादस्याक्षरोक्तमर्थं कथयति॥कर्मणीत्यादिना॥द्विती
यपादस्यापि शाब्दताडितमर्थं निर्दिशति॥अकर्मणि चेति॥कर्माभावे यः कर्म पश्यतीति संबंधः प्रवृत्तेरिव कर्मता
न्निवृत्तेस्त्वभावत्वात्तत्र कर्मदर्शनमनुचितमित्याशंक्य द्वयोरपि कारकाधीनत्वेनाविशेषमभिप्रेत्याह॥कर्तृतंत्रत्वे

ह्रिति॥प्रवृत्ताविव निवृत्तावपि कर्मदर्शनमविरुद्ध
मिति शेषः॥छ॥:

भा०टी
६२

ननुनिवृत्तेर्वस्वाधीनत्वात्कारकनिर्बंधनत्वाभावात्तत्रकर्मदर्शनंनकुज्यतेतत्राह॥वस्त्विति॥क्रियाकारकफलव्यवहार
स्यसर्वस्याविधावस्थायामेवप्रवृत्तत्वाद्वस्तुतःसंस्पर्शशून्यत्वात्स्वत्वाहंकृतिनिवृत्तावपियःकर्मपश्यतिसमनुष्येषुबुद्धिमा
न्नितिसंबंधः॥कर्मण्यकर्माकर्मणिचकर्मयःपश्यतोबुद्धिमत्त्वंफलतःसमस्तकर्मकृत्त्वंचकथमित्याशंक्याह॥इतिस्तूय
तइति॥श्लोकस्यापाततोदर्शितेतात्पर्यार्थेपरिज्ञानात्मिथोविरोधंशंकते॥नचेति॥कथमिदंविरुद्धमित्याशंक्याक त
र्मणीति॥विषयसप्तमीवास्यादधिकरणसप्तमीवेतिविकल्प्याद्येन्याकारंज्ञानमन्यावलंबनमितिस्पष्टोविरोधःस्यादि

वस्तप्राप्यैवहिसर्वएवक्रियाकारकादिव्यवहारोऽविद्याभूमावेवयःकर्मपश्येत्पश्यतिसबुद्धिमान्मनुष्ये
षुसयुक्तोयोगीचकृत्स्नकर्मकृत्समस्तकर्मकृच्चसइतिस्तूयतेकर्माकर्मणोरितरेतरदर्शी॥ननुकिमिदंवि
रुद्धमुच्यतेकर्मण्यकर्मयःपश्येदकर्मणिचकर्मेतिनहिकर्माकर्मस्यादकर्मवाकर्मतत्रकथंविरुद्धं
पश्येद्द्रष्टानन्वकर्मैवपरमार्थतःसत्कर्मवदवभासतेमूढदृष्टेर्लोकस्य॥ ट

त्याह॥नहीति॥अन्यस्यान्यात्मत्वायोगात्कर्माकर्मणोरभेदासंभवादकर्माकारंकर्मालंबनंज्ञानमप्रामाणिकमित्यर्थः॥
त्रे द्वितीयंदूषयति॥नेति॥कर्मण्यधिकरणेनतोविरुद्धमकर्म... कथमाधेयंद्रष्टुमीष्टेनहिकर्माकर्मणोर्मिथोविरुद्ध ६३६.२.२.२
योराधाराधेयभावोभवतीत्यर्थः॥विषयेसप्तमीमुपेत्यसिद्धांतीपरिहरति॥नन्वकर्मैवेति॥लोकस्यमूढ अं०च४
दृष्टेर्विवेकवर्जितस्यपरमार्थतोब्रह्माकर्माक्रियमेवसन्मूढंसाधकर्मसहितंक्रियावदिवप्रतिभातीत्यक्षरार्थः १

८

परस्पराध्यासस[illegible]मभ्युपेत्योक्तं॥ तथेति॥ यथा स्वस्वकर्मब्रह्मकर्मवदुपलभ्यते तथा कर्मसक्रियमेकत्वेन निष्क्रिये ब्रह्मण्यधि
ष्ठाने संसृष्टं तद्वद्भाति सक्षरूपोऽज्ञानात्कर्माकर्मणोरितरेतराध्यासे सिद्धे सम्यग्दर्शनसिद्ध्यर्थं भगवतो वचनमुचितमित्या
ह॥ तत्त्वेति॥ यथापरिहृतरजतेनेति प्रतिपन्नं तद्धिहानौ शुक्तिशकलं पश्येति भ्रमसिद्धरजतरूपविषयानुवादेन तदधिष्ठा
नं शुक्तिमात्रमुपदिश्यते तथा भ्रमसिद्धकर्माद्याभासविषयानुवादेन तदधिष्ठानं कूटस्थं ब्रह्म भगवताप्युपदिश्यते त
या चैव भगवद्वचनमविरुद्धमित्याह॥ अन्यतेति॥ इतश्चाध्यारोपितकर्माद्यनुवादेन पूर्वं तदधिष्ठानस्य कर्मादिरहितस्य नि

तथा कर्मैवाकर्मवत् तत्र यथाभूतदर्शनार्थमाह भगवान् कर्मण्यकर्म यः पश्येदित्याद्यतो न विरुद्धं बु।
द्धिमत्त्वाद्युपपत्तेर्ज्ञातव्यमिति च यथाभूतदर्शनमुच्यते॥ न च विपरीतज्ञानादशुभान्मोक्षणं स्यात्॥

विशेषस्य ब्रह्मणो भगवता बोध्यमानत्वान्न तत्र विरोधाशंकावकाशोऽस्तीत्याह॥ बुद्धिमत्त्वादीति॥ कूटस्थब्रह्मणोऽन्यस्य सर्वस्य
मायामात्रत्वात्तदन्यज्ञानाद्बुद्धिमत्त्वयुक्तत्वसर्वकर्मकृत्त्वानामनुपपत्तेः अत्र च स बुद्धिमानित्यादिना बुद्धिमत्त्वादि निर्दिष्टमात्मब्रह्मज्ञाना
देवानुपपत्तेः सर्वविशेषरहितं ब्रह्मज्ञानमेव विवक्षितमित्यर्थः॥ बोध्यस्यास्य सम्यग्दर्शनेन प्रसिद्धत्वात्कर्माकर्मविकर्मणामस्व
रूपं बोद्धव्यमस्तीति वचनात्सम्यग्ज्ञानोपदेशस्य विवक्षितत्वादपि कूटस्थं ब्रह्मात्राभिप्रेतमित्याह॥ बोद्धव्यमिति चेति॥ कर्म
वचनपर्यालोचनायामपि कूटस्थं ब्रह्मात्राभिप्रेतं प्रतिभातीत्याह॥ न चेति॥ १८॥
९

भा०टी
३

प

सम्यग्ज्ञानाधीनं फलम[illegible]वनस्कृतमित्याशंक्याह ॥ यत्ज्ञात्वेति ॥ अध्यारोपापवादार्थं भगवद्वचनमविरुद्धमित्युपपादितमुपसंहरति ॥ तस्मादिति ॥ तद्विपर्ययेत्यत्र तच्छब्देन प्राणिनो गृह्यंते ॥ विषयसमीपपरिग्रहेण परिहारमभिधायाधिकरणसमीपपक्षे दर्शितं दूषणमनंगीकारेण परिहरति ॥ नचेति ॥ व्यवहारभूमिरेवोच्यते ॥ योग्यत्वे सत्यनुपलंभादित्यर्थः ॥ अकर्माधिकरणं कर्मेति न संभवतीत्यत्र हेत्वंतरमाह ॥ अभावत्वादिति ॥ नहि तुच्छस्याधिकरणत्वं क्वचिद्दृष्टमिष्टं वेत्यर्थः ॥ निरूप्यमा

यत्ज्ञात्वा मोक्ष्यसेऽशुभादिति चोक्तं ॥ तस्मात्कर्माकर्मणी विपर्ययेण गृहीते प्राणिभिस्तद्विपर्ययग्रहण
निवृत्त्यर्थं भगवतो वचनं कर्मण्यकर्म य इत्यादि ॥ न चात्र कर्माधिकरणमकर्मास्ति कुंडे बदराणीव नाप्यकर्माधि
करणं कर्मास्ति कर्माभावत्वादकर्मणः ॥ अतो विपरीतगृहीते एव कर्माकर्मणी लौकिकैर्यथा मृगतृष्णिकायामुदकं
शुक्तिकायां वा रजतं ॥ ननु कर्म कर्मैव सर्वेषां न क्वचिद्व्यभिचरति ॥ तन्न ॥ नौस्थस्य नावि गच्छंत्यां तटस्थेष्वगतिषु न
गेषु प्रतिकूलगतिदर्शनात् ॥ ७ ॥

२

णोः कर्माकर्मणोरधिकरणाधिकर्तव्यभावासंभवे कल्पितमाह ॥ अत इति ॥ शास्त्रपरिचयविरहिणामध्यारोपमुपाहरति ॥ यथेति ॥ कर्माकर्मणोरारोपितत्वमक्षममाणः शंकते ॥ न क्वचिदिति ॥ कर्म कर्मैव सत्राकर्म चाकर्मैवेति द्रष्टव्यं ॥ विमतं सत्यमव्यभिचारित्वाद्ब्रह्मवदित्यर्थः ॥ तत्र कर्मत्वतोनाव्युभिचारिकर्मता नौस्थस्य तटस्थवृक्षगमनवदित्यव्यभिचारित्वं कर्मणापसिद्धं परिहरति ॥ तन्नेति ॥ ७ ॥ राममराः ॥ ७ ॥

२३
अ०४
१०

ऽकर्म च चलतो नावं व्यभिचारिकर्माभावत्वाद् दूरप्रदेशे चैव च मे चारिषु गच्छत्स्वेव चक्षुषा सन्निधानविधुरेषु दृश्यमानगम
भावद्दृश्याहाहृदरत्ति॥ हरदत्ताहेव विशेषतः सन्निकर्षविरहितेषु तेषु स्वरूपेण चक्षुः सन्निकृष्टेषु चक्षुषा गसभावदर्शना
द्विमियोजनागजिरहितेषु तरुषु गतिदर्शनवन्मल्लेजेनुरसरापविक्रियेकर्मदर्शनं सक्रिये च देहतर्पं चेगतिमन्तु चैवाद्दिषु
गस[illegible]भावदर्शनवत्कर्मणो भावस्य विपरीतस्य दर्शनं येन हेतुना संभवति तेन तस्य विपरीतदर्शनस्य निरसनाय
भगवद्वचनमिति दार्ष्टान्तिकं निगमयति। स्वमोस्याहिना॥ ननु कर्मतदभावयोरारोपितत्वादविक्रियस्य ब्रह्मणोस्या

दूरे च चक्षुषोऽसन्निकृष्टेषु गच्छत्सु गसभावदर्शनात्॥ एवमिहाप्यकर्मणि। अहं करोमीति कर्मदर्शनं कर्मणि
चाकर्मदर्शनं विपरीतदर्शनं येन तन्निराकरणार्थमुच्यते॥ कर्मण्यप कर्म य दृस्यादि॥ तदेतदुक्तं भवति वचनमप्य
नो सक्तदृश्यं तद्विपरीतदर्शनभावितत्वात्पाप्नोमुह्यमानो लोकः प्रकृतमपास्य तन्नवं विस्मृत्य विस्मरणे मिथ्याप्रसंगमव
तार्यवतार्य चोदयतीति पुनः पुनरुत्तरमाह भगवान् दुर्विज्ञेयत्वं चालक्ष्य वस्तुनः॥ छ॥ श्रीराम॥ छ॥ ०

नमात्राभिप्रेतं चेदव्यक्तोयमचिन्त्योयमविकार्योयं न जायते म्रियते वेत्यादिना प्रोक्तत्वं प्राप्तं तन्नैव ब्रह्मात्मनो निर्विकार
त्वस्योक्तत्वादिति चाह॥ तदेतदाह॥ तदेतदात्मनि शङ्कितं सक्रियत्वमसकृदुक्तं प्रतिवचनमपि निर्विकारात्मवस्तुप्र
श्नस्यास्य तद्विपरीतदर्शनं मिथ्याज्ञानं तेन भावितत्वात् संस्कारप्रचयवत्त्वेन तत्तीति प्रायेण मोहमापद्यमानो लोकः श्रु
तमपि तत्त्वं विस्मृत्य पुनः पुनरर्थकं चित्प्रसंगमापद्य सक्रियत्वमेवात्मनः शोदयतीति पुनः पुनस्तत्त्वप्रज्ञानमुत्तरं भगवानभिध

नैव तत्त्वस्य दुर्विज्ञेयत्वात्पुनः पुनः प्रतिपादनेन तमनि
राकरणार्थं तदुपपद्यते तेन यथा च नास्ति पुनरुक्तिरित्यर्थः॥

६२

मसंकृ

असङ्गउक्षपति वचनमेवानुवदति॥ अव्यक्तोपमितिः॥ कर्माभावउक्तरनिसंबंधः॥ उत्पन्नज्ञापनेति त्रिपवेयाविप श्रिद्धिहिंसा
दिष्वनुतोषकृतस्मनावसंगत्वाहिंसापे नन्वप्रसिद्धत्वमस्तीत्याह॥ भ्रान्तीति॥ न केवलमुक्तः कर्माभावः किंतु सर्वकर्मणा
मनःप्राप्तस्यैवान्दोपस्यमाणाश्चेत्याह॥ वक्ष्यमाणाश्चेति॥ नन्वकर्मणो हेयादिरिनिर्वचनप्रसेन चैव विध्यालूट स्वद्यस्वभावस्या
त्मनोऽसंगत्वात् व्यापाररूपस्य कर्मणोऽप्रसिद्धत्वात्तस्मिन्नकर्मणि विपरीतस्य कर्मणो दर्शनं सिद्ध्यत्यतोऽपमाचिसीऽपन

अव्यक्तोऽयमविकार्योऽयं न जायते म्रियते वेत्यादिनात्मनि कर्माभावः श्रुतिस्मृतिन्यायप्रसिद्ध उक्तो वक्ष्यमाणश्च
अतस्मिन्नात्मनि कर्माभावेऽकर्मणि कर्मविपरीतदर्शनमसंतं निरूढं पुनः किं कर्म किमकर्मेति कवयोऽप्यत्र मोहिताः॥ दे
हाद्याश्रयं कर्मात्मन्यध्यारोप्याहं कर्ता ममैतत्कर्म मया अस्य कर्मणः फलं भोक्तव्यमिति च तथाहं तूष्णीं भवामि येना
हं निरायासोऽकर्मा सुखी स्यामिति कार्यकरणव्यापारोपरमं तत्कृतं च सुखित्वमात्मन्यध्यारोप्य न करोमि
किंचित्तूष्णीं सुखमासे इत्यभिमन्यते लोकः॥ छ॥ श्रीरामजी॥

पा

ध्यतीत्याशंक्याह॥ तस्मिन्निति॥ कर्मैव विपरीतं तस्य दर्शनमिति यावत् अहंकर्तेत्यात्मसमानाधिकरणस्य व्यापारस्या
नुभवात्कर्मभ्रमः स्वाविद्यात्मन्यसंतारूढोऽस्तीत्यर्थः आत्मनि कर्मविभ्रमोऽस्तीत्यत्र हेतुमाह॥ पततीति॥ आत्मनो निरंश
यत्वेऽपि तत्र स्ति तस्मिन्यथोक्तो विभ्रमः संभवेदित्याशंक्याह॥ देहेति॥ तदा नोमात्मन्यकर्मभ्रममुदाहरति॥ तद्येत्

५२

५५

यथा मूढैः स्वाभाविकमरूपत्वे रूप[illegible]त्वमारोपितं तदभावोऽप्यारोप्याभावत्वादारोपपक्षपाती। तथा [illegible]त्मनोऽपि स्वाभाविकमक्रियत्वं
सक्रियत्वं पुनरध्यस्तं तदभावत्वात्कर्माभावोऽप्यध्यस्त एवेति मन्वानः सन्नुपसंहरति॥ तत्रेदमिति॥ आत्मनि कर्मादि विभ्रमे लौकिके
सिद्धे सतीदं कर्मेत्यादिवाक्येन तत्परिहारो नागवानुक्त्वा निःसार्थः॥ संप्रत्युक्तेऽर्थे श्लोकाक्षरसमन्वयं दर्शयितुं कर्मणीत्यादिवा
चिरव्याख्यामुखे सिद्धां करोति॥ अत्र चेति॥ व्यवहारभूमौ कार्यकरणाधिकरणां कर्मसेनैव रूपेणाव्यवस्थिते सदात्मन्य[illegible] विक्रिये

तदेवं लोकस्य विपरीतदर्शनापनयनायाह भगवान् कर्मण्य[illegible]कर्म यः पश्येदित्यादि॥ अत्र च कर्म अकर्मैव सत्कार्यकरणाश्रयं
कर्मरहिते तु विक्रिये आत्मनि सर्वैरध्यस्तं यतः पंडितोऽप्यहं करोमीति मन्यते[illegible] आत्मसमवेतत्तया सर्वलोकप्रसिद्धे क
र्मणि नदीकूलस्थेष्विव वृक्षेषु गतिः प्रातिलोम्येनाकर्म कर्माभावं यथाभूतं गत्यभावमिव वृक्षेषु यः पश्येत॥ः○॥

त

कार्यकरणारोपक्षारोसंरारोवैं गारोपितमिति च हेतुमाह॥ यत इति॥ अविवेकिनां तु कर्तृत्वाभिमानः सुतरामिति वक्तुमपि शब्दः॥ आ
त्मनि कर्मरहिते कर्मारोपे दृष्टांतमाह॥ नदीति॥ एवमात्मनि कर्मारोपमुपपाद्य प्रथमपादं व्याचष्टे॥ आत्मन्यारोपवशाद्दात्मनि
सत्वेन कार्मणि सर्वलोकप्रसिद्धे कर्मोभावं यः पश्येत्स बुद्धिमानिति संबंधः॥ अकर्मदर्शनस्यय याभूतोंस सम्यक्त्वं तत्र दृष्टांतमाहः॥ः

ति

भ° ३

गत्यभावमिवेति॥ छ श्रीरामचं[illegible]द्रा। ○ ○
यापनमः॥

२५ द्वितीयं पादं व्याकरोति॥ अकर्मणि चेति॥ अध्यारोपमभिनयति॥ तूष्णीमिति॥ आकर्मणि कर्मदर्शने फलं किमाह॥ अहं
कारेति॥ पूर्वार्द्धेनोक्तमनूद्य उत्तरार्द्धं विभजते॥ य एवमिति॥ आत्मनि कार्यकरणसंघातसमारोपद्वारेण व्यापारमात्रैक
र्मणि शुक्तिकायामिव रजतमारोपितं विषयीनद[illegible] भावमकर्म वस्तुतो योऽसङ्गताभाववदनुभवति अकर्मणि व संघात आ
पारोपरमे तद्द्वारास्वात्मन्यहं तूष्णीमासे सुखमित्यारोपिते गोचरे कर्म अहंकाररहितं कं यस्त्वकर्म मन्यते स रूपतः भाव

पा१ अकर्मणि च कार्यकरणव्यापारोपरमे कर्मवदात्मन्यध्यारोपिते तूष्णीमकुर्वन् सुखमास इत्यहंकाराभिसंधिहेतु
त्वात् [illegible] तस्मिन्नकर्मणि च कर्म यः पश्येद्य एवं कर्माकर्मविभागज्ञः [illegible] स बुद्धिमान् पंडितो मनुष्येषु सः
युक्तो योगी च कृत्स्नकर्मकृच्च सोऽशुभान्मोक्षितः कृतकृत्यो भवतीत्यर्थः। अयं श्लोकोऽन्यथा व्याख्यातः कैश्चित्
तत्र४ थं नित्यानां किल कर्मणामीश्वरार्थेऽनुष्ठीयमानानां तत्फलाभावादकर्माणि तान्युच्यन्ते गौण्या वृत्त्या तेषां चाक
रणमकर्म

विभागविहीनं शुक्तिमात्रवदात्ममात्रं कर्मतदभावविभागशून्यं कूटस्थं परमार्थतोऽवगच्छन् बुद्धिमानित्यादि
स्कनियोग्यतां गच्छतीति॥ एवं स्वाभिप्रायेण श्लोकं व्याख्याय वृत्तिकारव्याख्यानमुत्थापयति॥ अयमि
ति॥ अन्यथाव्याख्यानमेव प्रश्नद्वारा प्रकटयति॥ कथमित्यादिना॥ ईश्वरार्थेऽनुष्ठाने फलाभाववचनं व्याहतमि
तिमत्वाह॥ किलेति॥ नित्यानामकर्मत्वमत्र सिद्धमित्यैक्यफलराहित्यगुणयोगात्तेष्वकर्मत्वव्यवहारः सिध्यती

त्याह॥ गौण्येति॥ नित्यानामकरणमुख्ये
त्वे चाकर्मशब्दवाच्यमित्याह॥ तेषां चेति॥ छ॥

ख ५
श्लो ७
ना ८
२५
अ० ४
१२

तत्रकर्मशब्दस्यप्रत्यवायाख्यफलहेतुत्वगुणयोगाद्गौणएवेत्यभिप्रेत्याह ॥ नत्वेति ॥ पातनिकामेवंकृत्वाश्लोकाक्षराणिव्याचष्टेनत्वेत्यादिना ॥ अकर्मणिचेत्यादिव्याकरोति ॥ तथेतिसबुद्धिमानित्यादिपूर्ववत् ॥ परकीयंव्याख्यानंदूषयति ॥ नैतदिति ॥ नैतदिति ॥ नित्यंकर्माकर्मनित्याकरणंकर्मेतिज्ञानाद्दुरितनिवृत्त्यनुपपत्तेर्भगवद्वचनंप्रतिकारमतेबाधितंस्यादित्यर्थः ॥ धर्मेणपापमपनुदतीतिश्रुतेर्नित्यानुष्ठानाद्दुरितनिवृत्तिप्रसिद्धेस्तदनुष्ठानस्यफलान्तराभावात्तदकर्मेतिज्ञात्वानित्यानुष्ठानेक्रियमाणेकथंनशुभक्षयोने

तत्रप्रत्यवायफलत्वात्कर्मोच्यतेगौणोयेवह्यत्यातस्मात्तत्रनित्येकर्मणियःपश्येत्कर्मयःपश्येन्नफलाभावाद्यथाधेनुरपिगौरगौरुच्यतेक्षीराख्यंफलंनप्रयच्छन्ती ॥ तितद्वत्यानित्याकरणोत्थकर्मणिअकर्मयःपश्येत्तन्नकदापिप्रत्यवायफलंप्रयच्छतीति ॥ नैतत्फलंव्याख्यानमेवंज्ञानादशुभान्मोक्षानुपपत्तेर्यज्ज्ञात्वामोक्ष्यसेऽशुभादितिभगवतोक्तंबाध्येत ॥ कथंनित्यानामनुष्ठानादशुभान्नस्यात्तन्नाममोक्षणं ॥ ननुतेषांफलाभाववचनात् ॥

तिशंकते ॥ कथमिति ॥ क्षेत्रज्ञस्येश्वरस्य । नाद्धिशुद्धिःपरमामनेतिस्मरणात्कर्मणांसंतिकाशुभक्षयाभावेप्यंगीकृत्यपरिहरति ॥ नित्यानामितिनित्यानुष्ठानादशुभक्षयेपिनास्मिन्प्रकरणेतद्विवक्षितं ॥ यज्ज्ञात्वामोक्ष्यसेऽशुभादितिज्ञानादशुभक्षयस्यप्रतिज्ञातत्वान्नचतज्ज्ञानंफलाभावविषयमेवेतिव्याप्तमित्याह ॥ नत्विति ॥ अशुभस्यफलाभावादज्ञानकार्य

त्वाभावान्नफलाभाववचनानामाशयःसिध्यतीत्यर्थः

किंचातीन्द्रियोर्थः शास्त्रान्निश्चीयते न च नित्यकर्मणां फलाभावज्ञानादशुभनिवृत्तिरित्यत्र प्रमाणमस्तीत्याह नहीति नित्याकरणं कर्मेति
ज्ञानमपि नैमित्ताशुभनिवृत्तिफलत्वेन चोदितमस्तीत्याह ॥ नित्यकर्मेति ॥ भगवद्वचनमेवात्र प्रमाणमित्याशंक्याह नचेति ॥ स्वाधारत्वमेव
यद्याहेत्यादि भगवद्वचनं ननु नित्यानां फलाभावज्ञानत्वे तिविशेषविषयमित्यर्थः ॥ शुभाशुभयोर्मोक्षणासंभवप्रदर्शनेन कर्मणोपकर्मज्ञा
ननिराकरणान्यायेनाऽकर्मणि कर्मदर्शनं निराकरोतीति गृहीतेनेति ॥ नामादिषु ब्रह्मदृष्टिवदकर्मरूप विफलाध्यकर्मदृष्टिविधानान्ना

नहि नित्यानां फलाभावज्ञानमशुभमुक्तिफलत्वेन चोदितं नित्यकर्मज्ञानं यावान्न च भगवतैवेहोक्तं यतो नाकर्मणि कर्मदर्शनं
प्रसक्तं नस्यकर्मणि अकर्मेति दर्शनं कर्तव्यमत येह चोद्यते नित्यस्य तु कर्तव्यतामात्रं । न चाकरणान्नित्यस्य प्रत्यवायो भवती
ति विज्ञानान्न किंचित्फलं स्यात् ॥ ४९ श्रीरामार्पनः ॥ श्रीरामः ॥

शुभमोक्षणानुपपत्तिरित्याशंक्याह ॥ नहीति ॥ अत्र हि श्लोके नित्यस्य कर्तव्यतामात्रं परमते विवक्षितमतश्चाकर्मणि कर्मदर्शने विधीय
ते फलायेति कल्पनायाः परस्यापि सिद्धान्तविरुद्धेत्याह ॥ नित्यस्य त्विति ॥ परमतेपि नित्यस्य कर्तव्यतामात्रमत्र श्लोकेन विवक्षितं किंतु नित्या
नुष्ठाने प्रवृत्तिसिद्ध्यर्थं नित्याकरणात्प्रत्यवायो भवतीति ज्ञानमपि कर्तव्यत्वेनात्र विवक्षितमेवेत्याशंक्याह ॥ नचेति ॥ नत्वाक्यमिति र
स्य विज्ञानस्य फलं निपोषादेवन दुपपत्तेर्न । विफलान्तरमनुपलं भादृतो ऽफलत्वादकरणात्प्रत्यवायो भवतीति ज्ञानं नात्र कर्तव्यत्वेन विवक्षितमित्यर्थः ॥

किंचाकरणे कर्मेष्टे विधायकशास्त्रस्यालंबनत्वेन प्रधानत्वाद्धेयत्वं च कथं तच्चेतुच्छत्वादेतनुपपन्नमित्याह नाभीति॥ अकरणस्य
स्यासतो नामादिवद्दृश्यत्वेन दर्शनासंभवेपि सामानाधिकरण्येन दंजनमिति वद्दर्शनं भविष्यतीत्याशंक्याह॥ नापिकर्मे
ति आदिशब्देन सर्वालंकर्षो हि गच्छते फलवत्त्वं स्वातंत्र्यं वा सम्यग्ज्ञानस्य फलं तस्य मिथ्याज्ञानस्याऽनुपलब्धेरित्यर्थः॥ स्वप्नेमिथ्याज्ञान
मपि फलवदुपलब्धमित्याशंक्य मिथ्याज्ञानस्याशुभाविरोधित्वान्न तस्मात्निवृत्तिरित्याह॥ मिथ्याज्ञानमेवेति॥ अशुभाद्वेबाधु

ट्व नव

नापि नित्याकरणं ज्ञेयत्वेन बोधितं॥ नापि कर्मा[illegible]कर्मेति मिथ्यादृष्टिना[illegible]ऽशुभान्मोक्षणं बुद्धिमत्त्वादिफलं तत्राहं स्त्र कर्मस
स्यादिवत्फलमुपपद्यते स्कन्निर्वा॥ मिथ्याज्ञानमेव हि साक्षादशुभस्वरूपं कुतोन्यस्मादशुभान्मोक्षणं न हि तमस्तमसो निवर्त
कं भवतीति ननु कर्मण्यकर्मदर्शनमकर्मणि च कर्मदर्शनं तच्च मिथ्याज्ञानं किं तर्हि गौणं फलभावाभावाभ्यां भावनिमित्तं। न कर्मा
कर्मविज्ञानादपि गौणस्य फलस्याश्रवणात्॥ १८॥ यस्ये

ट्व

मा निवृत्तौ हर्षांतमाहेति॥ अविवेकपूर्वकमिदं रजतमिति सदसतोः सामानाधिकरण्यान्मिथ्याज्ञानत्वं कर्माकर्मणोस्तु विवे
केन भासतोः सामानाधिकरण्याधीनं ज्ञानं सिंहदेवदत्तयोरिव गौणं न मिथ्याज्ञानमिति शंकते॥ नन्विति॥ कर्माकर्मेति दर्शने
नेफलाभावो गुणाः अकर्मकर्मेति दर्शने तु फलाभावो गुणास्तन्निमित्तमिदं ज्ञानं गौणं मिथ्यात्वांह॥ फलेति॥ पर्यवसितज्ञानस्य गौणत्वे
लेपि प्रामाणिकस्य फलाभावात्तत्र तद्धेयतैवेति॥ नेत्याहिनाः

७२

प २१०

२८

कर्माकर्मेत्याहिगौराणाविज्ञानोपन्यासव्याजेननित्यकर्मणःकर्तव्यतयाविवक्षितत्वाद्धौराणांज्ञानस्याफलत्वमहूषत्वामित्याशंक्याह॥नापी
ति॥ज्ञानादस्युभमोक्षणास्यपूर्तस्यहानिरस्पूर्तस्यनित्यानुष्ठानस्यांकेत्यनेनस्वनेनव्यापारगोगौरवेनकश्चिद्विशेषःशेषिध्यतीत्यर्थः
इत्येवमेवप्रपंचयति॥स्वशब्देनेति॥नरकपातःस्यादतोविधेरंगानुष्ठेयानित्यानीतिशेषः॥यथोक्तेवाचकशब्दस्वरूपोगादेवानुष्ठि
तार्थसिद्धिसंभवेभगवतोव्याजेनवचनवत्वनमनुचितमित्याह॥तत्रैति॥प्रकृतेश्लोकेधर्मितमतंव्याख्यानेनपरमार्थस्यैवभगवतोविप्र

नापिस्मृतत्वान्यस्मृतपरिकल्पनायांकस्यस्मृद्विशेषोलभ्यतेस्वशब्देनापिप्रकृत्यवक्तुंनित्यकर्मणोकार्यत्वंनास्ति
अकरणात्वतेषांनिरकपातःस्यादिति॥तत्रव्याख्यानेनपरवाग्मोहरूपेणाकर्मणपकर्मयःपश्येदित्यारभ्देनाकिंतत्रै
वंव्याख्यानेनभगवतोवाक्यंलोकव्यामोहार्थमितिव्यक्तंकल्पितंस्यात्॥नचैतद्युक्तंरूपेणाधाक्येनरक्षणीयं
वस्तु॥नापिशब्दांतरेणपुनःपुनरुच्यमानंसुबोधंस्यादित्येवंवक्तुंयुक्तं॥ छ ॥ श्रीरामनारायणायनमः॥

त्वंमकत्वमापादितमित्याशंक्यव्याख्यानसुपपन्नमित्यामित्यभिफलितमाह॥तत्रैवमिति॥नित्यानुष्ठानसिध्यर्थंतत्ररूपमपिभगव
तोवचनमुचितमित्याशंक्यमाणशब्देनापीत्यादिव्याख्यानुपपत्तिपाद्यापितदनुष्ठानबोधनसंभवान्नैवमित्याह॥नचैतदिति॥वस्तु
मध्येनार्थनित्यकर्मानुष्ठानमुच्यते॥यथात्मप्रतिपादनंस्फुवोधत्वसिध्यर्थंपौनःपुन्येनक्रियतेतथानित्यानामपिकर्मणा
मनुष्ठानंकर्मणाकर्मेत्यादिशब्दांतरेणोच्यमानंसुवोधंस्यादितिमतगवतःशब्दांतरेणुक्तमित्याशंक्यतस्यानित्यानुष्ठानयाचक

त्वाभावान्नैवमित्याह॥नर्पीति॥ श्रीराः

श्रा

२८

अ०च४

१४

किंचपूर्वमेवनित्यानुष्ठानस्यस्वरूपपरिष्कृतत्वाच्चास्यसुबोधत्वार्थ्यंशब्दांतरमपेक्षितमित्याहिह॥कर्मणेत्यापेवेति॥कर्माकर्मादि
विज्ञानव्याजेननित्यकर्मानुष्ठानकर्तव्यतायांतात्पर्यमित्येतन्निराकृत्यकर्माकर्मादिदर्शनंगौणमितिपक्षेहेत्वंतरमाह॥स
र्वंनुचेति॥लोकेवेदेचयत्प्रशस्तंदेवतादितत्त्वंपश्चकर्तव्यमनुष्ठानार्हमग्निहोत्रादितदेवबोद्धव्यमिष्यतेतेननिष्फलंकाकदंतादि चं ३
कर्म कर्मणोऽपकर्मणश्चकर्मदर्शनंगौणत्वादेवअप्रशस्तमकर्तव्यंचनतत्त्वतोबोद्धव्यमितिवचनमर्हतीत्यर्थः॥किंचकर्मादेर्मीपा
मात्वलाद्गौणमपितद्विषयंज्ञानंमिथ्याज्ञानमितिनतस्यबोधव्यत्वसिद्धिरित्याह॥नचेति॥मिथ्याज्ञानस्यबोद्धव्यत्वाभावेपित

> कर्मण्येवाधिकारस्तेइत्यत्रवस्तुतत्त्वतउक्तोयेनपुनर्वक्तव्योभवति॥सर्वंचचप्रशस्तंबोद्धव्यंचकर्तव्यमेवानिष्प्रयो ~~कर्मेषु~~
> जनंबोद्धव्यमित्युच्यते॥नचमिथ्याज्ञानंबोद्धव्यंभवतितत्स्वरूपस्यास्थानिर्वाच्यत्वाभासंनापिनित्यानामकरणादभा तंचे २
> वाख्यस्यवायभावोत्पत्तिरिति॥[illegible]नासतोविद्यतेभावइतिकथमसतःसज्जाये[illegible]पेतेतिच असतः
> सज्जन्मप्रतिषेधात् असतःसदुत्पत्तिंब्रुवता असदेवसद्भवेदित्युक्तंस्यादितिचापन्नं॥सर्वप्रमाणावि
> रोधात्॥

द्विषयस्यबोद्धव्यतासिद्धेरित्याशंक्यवस्त्वाभासत्वान्मैवमित्याह॥तत्स्वरूपस्थापितंचेति॥यस्तुनरकरणस्यप्रत्यवाय
हेतुत्वंस्वकरणेगौरणापाद्वत्याकर्मभावव्यप्रयोगेनिमित्तमितितत्दूषयति॥नापीति॥अकरणात्प्रत्यवायोभवतीत्यत्रश्रु
तिस्मृतिविरोधमभिधाययुक्तिविरोधमभिदधाति असतइति असतःसद्रूपेणभवनमभवनंचनिःस्वरूपत्वादनु
पपन्नंनिरस्तसमस्ततत्त्वस्याकिंचित्त्वाभ्युपगमेसर्वप्रमाणानामप्रामाण्यप्रसंगादित्याहतच्चेति॥१६॥ ❀ ☼

०टी०

पि तु नित्यानां फलराहित्ये सत्त्वात् कर्मेश्वरार्पणेन निमित्तमिति तत्त्विरस्यति॥ नचेति॥ न केवलं विधुद्देशी स्वफलाभावान्नित्यानां वि-
ध्यनुपपत्तिरपि तु धात्वर्थस्य क्लेशात्मकत्वात्तत्कृतफलाभावे नैव विधिरवकाशमापाद्यते इत्याह॥ दुःखेति॥ दुःखरूपस्या-
पि धात्वर्थस्य बंधकत्वेन कापि स्वातंत्र्येण विषयो विधिः स्यादिति चेन्नेत्याह॥ दुःखस्य चेति॥ स्वर्गो हि फलाभावेपि नित्यानामकरणे निमि-
त्तनिरासार्थं दुःखरूपाणामपि स्यादनुष्ठेयत्वमित्याशंक्याह॥ तत्करणे चेति॥ फलान्तराभावेपि मोक्षसाधनत्वान्मुमुक्षुणा-

घा२

न च निष्फलं विदध्यात् कर्मशास्त्रं दुःखस्वरूपत्वात्॥ दुःखस्य च बुद्धिपूर्वकं कर्तुमकार्यत्वानु[illegible]पपत्तेः॥ तत्करणे च नरकपाता-
भ्युपगमे अनर्थायैवो भयथापि करणेऽकरणे च शास्त्रं निःष्फलं कल्पितं स्यात्॥ स्वाभ्युपगमविरोधश्च नित्यानां [illegible]लं कर्मे-
त्यभ्युपगम्य मोक्षफलायेति ब्रुवतः॥ तस्माद्यथाव्याख्यात एवार्थः कर्मण्यकर्म य इत्यादेः॥ तथा च व्याख्यातोऽस्माभिः श्लो-
कः॥ तदेतत्कर्मादावकर्मादिदर्शनं स्तूयते॥ छ॥ यस्य सर्वे समारंभाः कामसंकल्प~~[illegible]~~
वर्जिताः ज्ञानाग्निदग्धकर्माणं तमाहुः पंडितं बुधाः॥ १९॥ यस्य यथोक्तदर्शिनः सर्वे यावंतः समारंभाः सर्वाणि कर्मा-
णि समारभ्यंत इति समारंभाः कामसंकल्पवर्जिताः कामैस्तत्कारणैश्च संकल्पैर्वर्जिताः॥ छ॥ : ॐ ॐ॥

लांतराभावेपि मोक्षसाधनत्वान्मुमुक्षुणा नित्यानि कर्माण्यनुष्ठेयानीत्याशंक्याह॥ स्वाभ्युपगमेति॥ इति का व्याख्या व्याख्याना सं-
भवे फलितमुपसंहरति॥ तस्मादिति॥ कोसौ यथाव्याख्यातोऽर्थः श्लोकस्येत्याशंक्याह॥ तथा चेति॥ ~~[illegible]~~ तं पूर्वोक्तं श्लो-
कमुत्तरश्लोकं प्रस्तौति॥ तदेतदिति॥ यथोक्तदर्शित्वं पूर्वोक्तं सम्यग्दर्शनसंपन्नत्वं समारंभशब्दस्य कर्मस्था-विषयत्वं न रूढ्यावि-
श्री

तथा चेति २

नु व्युत्पत्त्येत्याह समारभ्यंत इति॥:

गी० अ०४
७५

धा

वं

कामसंकल्पवर्जितत्वे कथं कर्मणामनुष्ठानमित्याशंक्याह ॥ मुधैवेति ॥ उद्देशफलाभावे तेषामनुष्ठानं यादृच्छिकं स्या
दित्याशंक्य प्रवृत्तेन निवृत्तेन चात्र कर्मानुष्ठानमिति विकल्प्य क्रमेण निरस्यति ॥ प्रवृत्तेनेत्यादिना ॥ रागद्वेषादि विभ
॥ जते ॥ कर्मादाविति ॥ यथोक्तज्ञानं योग्यमेव दहति नायोग्यमिति विवक्षितत्वान्नास्मिन्नग्निपदं ॥ यथोक्तविज्ञान
विरहिणामपि वैशेषिकादीनां पंडितत्वप्रसिद्धिमाशंक्य तेषां पंडिताभासत्वं विवक्षित्वा विशिनष्टि परमार्थत इ
ति ॥ १९ ॥ विवेकात्पूर्वं कर्मणि प्रवृत्तावपि सति विवेकेन वचनप्रवृत्तिरित्याशंक्यांगीकरोति यस्त्विति ॥ विवेकात्पूर्वम

गी०

मुधैव चेष्टामात्रा अनुष्ठीयंते प्रवृत्तेन चेत् लोकसंग्रहार्थं निवृत्तेन चेज्जीवनमात्रार्थं ज्ञानाग्निदग्धकर्माणं
कर्मादावकर्मादिदर्शनं ज्ञानं तदेवाग्निस्तेन ज्ञानाग्निना दग्धानि शुभाशुभलक्षणानि कर्माणि यस्य तमाहुः
परमार्थतः पंडितं बुधा ब्रह्मविदः ॥ यस्त्वकर्मादिदर्शी सोऽकर्मादिदर्शनादेव निष्कर्मा संन्यासी जी
वनमात्रार्थचेष्टः सन् कर्मणि न प्रवर्तते यद्यपि प्राग्विवेकतः प्रवृत्तः यस्तु प्रारब्धकर्मा सन् उत्तरकालमुत्पन्नात्मस
म्यग्दर्शनः स्यात् स कर्मणि प्रयोजनमपश्यन् ससाधनं कर्म परित्यजत्येव स कुतश्चिन्निमित्तात् कर्म
परित्यागासंभवे सति कर्मणि तत्फले च संगरहिततया।

६

भिनिवेशेन प्रवृत्तस्य तस्य विवेकानंतरमभिनिवेशाभावात्प्रवृत्त्यसंभवेपि जीवनमात्रमुद्दिश्य प्रवृत्त्याभासः संभवतीत्यर्थः
सत्यपि विवेके तत्साक्षात्कारानुदयात्कर्मणि प्रवृत्तस्य कथं तत्त्यागः स्यादित्याशंक्याह ॥ यस्तु प्रारब्धेति ॥ त्यक्त्वेत्या
दिसमनंतरश्लोकमवतारयितुं भूमिकां कृत्वा तदवतरणप्रकारं दर्शयति ॥ स कुतश्चिदिति ॥ लोकसंग्रहादिनिमित्तं
विवक्षितकर्मपरित्यागासंभवे सति तस्मिन्नभिप्रवृत्तोपि
नैव करोति किंचिदिति संबंधः

भा॰टी॰
६६

कर्मणि प्रवृत्तो न करोतीति कर्मणि कथमुच्यते तत्राह ॥ स्वप्रयोजनाभावादिति ॥ कथं तर्हि कर्मणि प्रवर्तते तत्राह ॥ लोकेति
॥ प्रवृत्तिनैरर्थक्यक्रियाकारित्वाभावं पृच्छति हि शिष्ट्या विशेषादिति न्यायेनाऽऽवर्तयति ॥ पूर्ववदिति ॥ कथं तर्हि विवेकिना
मविवेकिनो च विशेषः स्यादित्याशंक्य कर्मेहासंगाभ्यामित्याह ॥ कर्मणीति ॥ उक्तेऽर्थे समनन्तरश्लोकमवतारयति ॥ मं॰११
ज्ञानाग्नीति ॥ एतमेवार्थं दर्शयितुमिमं श्लोकमाहेति योजना ॥ प्रयोजनं ज्ञाने कूटस्थात्मदर्शनेनैव स्वरूपभूतं सुखं

स्वप्रयोजनाभावाल्लोकसंग्रहार्थं पूर्ववत्कर्मणि प्रवृत्तोऽपि नैव किंचित्करोति ज्ञानाग्निदग्धकर्मत्वात्स हीपंक
मकर्मैव संपद्यत इत्येतमर्थं दर्शयितुमाह ॥ त्यक्त्वा कर्मफलासंगं नित्यतृप्तो निराश्रयः कर्मण्यभि
प्रवृत्तोऽपि नैव किंचित्करोति सः ॥२०॥ त्यक्त्वेति ॥ कर्मस्वभिमानं फलासंगं च परित्यज्य ज्ञानेन नित्यतृप्तो निरा
कांक्षो विषयेष्वित्यर्थः निराश्रय आश्रयरहित आश्रयो नाम यदाश्रित्य पुरुषार्थं सिसाधयि
षति दृष्टादृष्टेष्टफलसाधनाश्रयरहित इत्यर्थः ॥ तेनैवंभूतेन स्वप्रयोजनाभावात्ससाधनं कर्म स
त्यक्तव्यमेवेति प्राप्ते ततो निर्गमासंभवात् ॥

साक्षादनुभूय कर्मणि तत्फले च संगमपास्य विषयेषु निरपेक्षो वर्तितुं तिष्ठते यद्वा नित्याह ॥ त्यक्त्वेत्यादिना ॥ दृष्टसा
धनसापेक्षस्य कुतो निरपेक्षत्वमित्याशंक्य पूर्वं विशिनष्टि ॥ निराश्रय इति ॥ यदाश्रित्येति ॥ दृष्टेन फलसाधनमुच्य
ते ॥ ~~धनसापेक्षस्य कुतो निरपेक्षत्वमित्याशंक्य पूर्वं विशिनष्टि~~ ॥ नीश्रराश्रू आश्रयरहित इत्यस्यार्थं स्पष्टयति ॥
तेन ज्ञानवता प्रदर्शयेरैवंभूतेन त्यक्त्वा कर्मफलासंगमित्यस्य हि नाविशेषितेनेत्यर्थः ॥ ततः ससाधनात्कर्मणः सकाशा

५३

[illegible]

६३
अ॰ ४ श्लो॰
२
दृष्टादृष्टेति २

निर्गमासंभवेहेतुमाह॥ लोकेत्यादिना॥ पूर्ववज्ज्ञानोदयात्प्रागवस्थायामिवेत्यर्थः अभिप्रवृत्तोपिलोकदृष्ट्येतिशेषः
नैवकरोतिकिंचिदितिस्वदृष्ट्येतिद्रष्टव्यं॥२०॥ तस्यापिविक्षेपकेकर्मणिव्युत्थानात्मानुसंधानस्यस्थितेर्देकैवस्यहेतुत्वेन
तदभावेसुतरांतस्यनहेतुत्वसिद्धिरित्यभिप्रेत्याह॥ यःपुनरिति॥ पूर्वोक्तविपरीतत्वंलोकसंग्रहादिनिरपेक्षत्वंतद्दे
ववैपरीत्यंस्फोरयति॥ प्रागेवेति॥ ससाधनसर्वकर्मसंन्यासेशरीरस्थितिरपिकथमित्याशंक्याह॥ शारीरेति॥ तर्हि

लोकसंग्रहचिकीर्षयाशिष्टविगर्हणापरिजिहीर्षयावापूर्ववत्कर्मण्यभिप्रवृत्तोऽपिनिःक्रियात्मदर्शनसं
पन्नत्वान्नैवकिंचित्करोतिसः॥ यःपुनःपूर्वोक्तविपरीतःप्रागेवकार्यारंभात्ब्रह्मणिसर्वांतरेप्रत्यगात्मनिनिः
क्रियेसंजातात्मदर्शनःसदृष्टादृष्टेष्टविषयाशीर्विवर्जिततयादृष्टादृष्टार्थेकर्मणिप्रयोजनमपश्यन्
ससाधनंकर्मसंन्यस्यशरीरयात्रामात्रचेष्टोयतिर्ज्ञाननिष्ठोमुच्यतइत्येतमर्थंदर्शयितुमाह॥ छ॥
निराशीर्यतचित्तात्मात्यक्तसर्वपरिग्रहः शारीरंकेवलंकर्मकुर्वन्नाप्नोतिकिल्बिषं॥२१॥ निराशीर्निर्गताआ
शिषोयस्मात्सनिराशीः यतचित्तात्माचित्तंअंतःकरणंआत्माबाह्यःकार्यकरणसंघातस्तावुभावपि
पत्तौसंयतौयेनसयतचित्तात्मात्यक्तसर्वपरिग्रहःत्यक्तःसर्वःपरिग्रहोयेनसत्यक्तसर्वपरिग्रहः॥ छ॥

तथाविधस्यचेष्टानिविषयचेतसांसर्पतोनचबहिर्मुखस्यकुतोमुक्तिरित्याशंक्ययथोपदिष्टचेष्टामात्रमनाहरतामै
वमित्याह॥ ज्ञाननिष्ठइति॥ दर्शयितुमिमंश्लोकमाहेतिपूर्ववत् आशिषःप्रार्थनाभेदास्तृष्णाविशेषाः आशि
षांविडषोनिर्गतत्वेहेतुमाह॥ यतेति॥ चित्तवदात्मनःसंयमनंकथमित्याशंक्याह॥ आत्माबाह्यइति॥ द्वयोः
संयमनेस्तस्यार्थसिद्धमर्थमाह॥ त्यक्तेति॥

मृतेन

भा०टी
१९००

सर्वपरिग्रहपरित्यागे देहेहस्थितिरपि दुःस्थास्यादित्याशंक्याह ॥ शारीरमिति ॥ मात्रशब्देन पौनह्सारनर्थकं के-
वलपदस्याभिप्रायमाशंक्याह ॥ तत्रापीति ॥ शारीरं केवलमित्यादौ शारीरपदार्थं स्फुटीकर्तुमुभयथा संभावनया विकल्पयति ॥
शारीरमिति ॥ शारीरनिर्वर्त्यं शारीरमित्यस्मिन्पक्षे ॥ किं दूषणं शरीरस्थितिमात्रप्रयोजनं शारीरमित्यस्मिन्वा प-
क्षे किं फलमिति पूर्ववादी पृच्छति ॥ किं चात इति ॥ शारीरनिर्वर्त्यं शारीरमित्यस्मिन्पक्षे सिद्धान्ती दूषणमाह ॥ उ

शारीरं शरीरस्थितिमात्रप्रयोजनं केवलं तत्राप्यभिमानवर्जितं कर्म कुर्वन्नाप्नोति किल्बिषं अनिष्टरूपं पा-
पं धर्मं च धर्मोपि मुमुक्षोरनिष्टरूपत्वात्किल्बिषमेव बंधापादकत्वात् किं च ॥ शारीरं केवलं कर्मेत्यत्र
किं शरीरनिर्वर्त्यं शारीरं कर्माभिप्रेतमाहोस्वित् शरीरस्थितिमात्रप्रयोजनं शारीरं कर्मेति किं चा-
तो यदि शरीरनिर्वर्त्यं शारीरं कर्म यदि वा शरीरस्थितिमात्रप्रयोजनं शारीरमित्युच्यते ॥ यदा शरीरनि-
र्वर्त्यं कर्म शारीरमभिप्रेतं स्यात्तदा दृष्टादृष्टप्रयोजनं कर्म प्रतिषिद्धं शरीरेण कुर्वन्नाप्नोति किल्बिष-
मिति ब्रुवतो विरुद्धाभिधानं प्रसज्येत शास्त्रीयं च कर्म दृष्टादृष्टप्रयोजनं शरीरेण कुर्वन्नाप्नोति किल्बिष-
~~स्येतान~~ मित्यपि ब्रुवतोऽप्राप्तप्रतिषेधप्रसंगः ॥ ६ ॥ मपि १०+

च्यत इति ॥ शरीरेणायन्निर्वर्त्यं किं प्रतिषिद्धं विहितं वा प्रथमे विरोधः स्यादित्याह ॥ यदेति ॥ प्रतिषिद्धाचरणे
पि नानिष्टप्राप्तिरित्युक्तौ प्रतिषेधशास्त्रविरोधः स्यादित्यर्थः ॥ द्वितीये विहितकरणे सत्यनिष्टप्राप्त्यभा-
वात्प्राप्तप्रतिषेधः स्यादित्याह ॥ शास्त्रीयं चेति ॥ दृष्टप्रयोजनं कारीर्यादिकं कर्म अदृष्टप्रयोजनं स्वर्गसा-
साधनं ज्योतिष्टोमादिकं कर्मेति विभागः

शरीरनिर्वर्त्यं कर्म शारीरमभिमतमिति पक्षे दूषणांतरमाह ॥ शारीरमिति ॥ वाचा मनसा वा कर्मणोनुष्ठाने संन्यासिनो भवत्येव किल्बिषप्राप्तिरित्याशंक्याह ॥ तत्रापीति ॥ वाङ्मनसाभ्यां विहितानुष्ठाने वा प्रतिषिद्धकरणे वा किल्बिषप्राप्तिः संन्यासिनः स्यादिति विकल्प्याद्ये जपध्यानविधिविरोधः स्यादित्यफलत्वाद्द्वितीयं दूषयति ॥ प्रतिषिद्धेति शरीरनिर्वर्त्यं कर्म शारीरमितिप-

शारीरं कर्म कुर्वन्निति विशेषणात् केवलशब्दप्रयोगाच्च वाङ्मनसनिर्वर्त्यं कर्म विधिप्रतिषेधविषयं धर्माधर्मशब्दवाच्यं कुर्वन आप्नोति किल्बिषमित्युक्तं स्यात्तत्रापि वाङ्मनसाभ्यां विहितानुष्ठानपक्षे किल्बिषप्राप्तिवचनं विरुद्धमापद्येत प्रतिषिद्धसेवापक्षेपि भूतार्थानुवादमात्रमनर्थकं स्याद्यदा तु शरीरस्थितिमात्रप्रयोजनं शारीरं कर्माभिप्रेतं भवेत्तदा दृष्टादृष्टप्रयोजनं कर्म विधिप्रतिषेधगम्यं शरीरवाङ्मनोनिर्वर्त्यमन्यदकुर्वंस्तैरेव शरीरादिभिः शरीरस्थितिमात्रप्रयोजनं केवलशब्दप्रयोगादहं करोमीत्यभिमानवर्जितः शरीरादिचेष्टामात्रं लोकदृष्ट्या कुर्वन्नाप्नोति किल्बिषमेवंभूतस्य पापशब्दवाच्यकिल्बिषप्राप्त्यसंभवात्किल्बिषं संसारं नाप्नोति ज्ञानाग्निदग्धसर्वकर्मत्वादप्रतिबंधेन मुच्यत एवेति पूर्वोक्तसम्यग्दर्शनफलानुवाद एवैषः

क्षमेवं प्रतिक्षिप्य द्वितीयपक्षे लाभं दर्शयति ॥ यदा त्विति ॥ अन्यद्देहस्थितिप्रयोजनात्कर्मणः सकाशादिति शेषः तत्रापि विदुषः स्वदृष्ट्या न प्रवृत्तिरिति सूचयति ॥ लोकेति ॥ विद्वानुक्तया रीत्या वर्तमानो नाप्नोति किल्बिषमित्यत्र विवक्षितमर्थमाह ॥ एवंभूतस्येति ॥ विधिनिषेधगम्यं कर्म देहस्थितिहेतुव्यतिरिक्तमकुर्वत इत्यर्थः ॥ छ ॥ श्रीरामचंद्राय नमः

शारीरं केवलं कर्म कुर्वन्नाप्नोति किल्बिषमित्यस्योक्तेन प्रकारेणापरिग्रहे शारीरं केवलमिति विशेषणाद्वयं निर्दोषं सिध्य
तीति फलितमाह ॥ एवमिति ॥ २१ ॥ पूर्वश्लोकेन संगतिं दर्शयन्नुत्तरश्लोकमुत्थापयति ॥ सकेति ॥ अन्नादेरित्यादिशब्देन पी
ठकाष्ठादेर्नादिग्रहणं ॥ याचनादिनेत्यादिपदेन सेवास्तुत्याद्युपादीयते ॥ भिक्षाटनार्थमुद्योगात्प्राक्काले केनापि
योग्येन निवेदितं भैक्षमयाचितं ॥ अभिशस्तेषु पतितेषु च वर्जयित्वा संकल्पमंतरेण पंचभ्यः सप्तभ्यो वा गृहेभ्यः समानी

एवं शारीरं केवलं कर्म तस्यार्थस्य परिग्रहे निरवद्यं भवति ॥ त्यक्तसर्वपरिग्रहस्य यतेरन्नादेः शरीरस्थिति
हेतोः परिग्रहस्याभावात् याचनादिना शरीरस्थितौ कर्तव्यतायां प्राप्तायामयाचितमसंक्लृप्तमुपपन्नं यदृ
च्छयेत्यादिना वचनेनानुज्ञातं ॥ यतः शरीरस्थितिहेतोरन्नादेः प्राप्तिद्वारमाविष्कुर्वन्नाह ॥ छ ॥ यदृच्छाला
भसंतुष्टो द्वंद्वातीतो विमत्सरः ॥ समः सिद्धावसिद्धौ च कृत्वापि न निबध्यते ॥ २२ ॥ यदृच्छालाभसंतुष्टो
॥ अप्रार्थितोपनतो लाभो यदृच्छालाभस्तेन संतुष्टः संजातालंप्रत्ययो द्वंद्वातीतो द्वंद्वैः शीतोष्णादिभि
र्हन्यमानोऽपि अविषण्णचित्तो द्वंद्वातीत उच्यते ॥ विमत्सरो विगतमत्सरो निर्वैरबुद्धिः ॥ समः तुल्यो यदृच्छपाला
त   भस्य सिद्धावसिद्धौ च ।

तं भैक्षमसंक्लृप्तं सिद्धमन्नं भक्तजनैः स्वसमीपमुपनीतमुपपन्नं यदृच्छपा स्वकीयप्रयत्नव्यतिरेकेणो ॥ जिपावनं ॥ आदिशब्दे
न माधुकरमसंक्लृप्तं प्राक्प्रणीतमयाचितं तात्कालिकं चोपपन्नं भैक्षं पंचविधं स्मृतमित्यादि गृह्यते ॥ आविष्कुर्वन्नि
दं वाक्यमाहेति योजनीयं ॥ परोत्कर्षामर्षपूर्विका स्वस्योत्कर्षवांछा विगता यस्मादिति व्युत्पत्तिमाश्रित्य विव
क्षितमर्थमाह निर्वैर इति ॥

संक्षेपतो दर्शितमर्थं विशदयति ॥ एवंभूत इति ॥ तथापि प्रवृत्तस्य मतेर्भिक्षाटनादौ कर्तृत्वं प्रतिभाति तदभावे भिक्षाटनाद्यभावेन जीवनाभावप्रसंगादित्याशंक्याह ॥ लोकेति ॥ लौकिकै रविवेकिभिः सह व्यवहारस्य स्नानाचमनभोजनादिलक्षणस्य विदुष्यपि सामान्येन दर्शनात्तदनुसारेण लौकिकै रध्यारोपितकर्तृत्वादिधर्मा नापि लोकदृष्ट्या भिक्षाटनादौ कर्तृत्वमनुभवतीत्यर्थः ॥ कथं तर्हि तस्याकर्तृत्वं तत्राह ॥ स्वानुभवेनेति ॥ यदृच्छेत्यादिपादत्रयं व्याख्याय श्लोकस्यापि समादिचतुर्थपा

यत एवंभूतो यतिरतोऽसौ शरीरस्थितिहेतोः लाभालाभयोः समो हर्षविषादवर्जितः कर्मादावकर्मादिदर्शी यथाभूतात्मदर्शननिष्ठः शरीरस्थितिमात्रप्रयोजने भिक्षाटनादौ कर्मणि शारीरादौ निर्वर्त्यमाने नैव किंचित्करोम्यहं गुणा गुणेषु वर्तन्त इत्येवं सदा परिसंचक्षाणः आत्मनः कर्तृत्वाभावं पश्यन्नैव किंचित् [illegible]क्षाटनादिकं कर्म करोतीति लोकव्यवहारसामान्यदर्शनेन तु लौकिकैरारोपितकर्तृत्वो भिक्षाटनादौ कर्मणि कर्ता भवति स स्वानुभवेन तु शास्त्रप्रमाणजनितेनाकर्तैव स एवं पराध्यारोपितकर्तृत्वं शरीरस्थितिमात्रप्रयोजनं भिक्षाटनादिकं कर्म कृत्वापि न निबध्यते ॥ बंधहेतोः कर्मणः सहेतुकस्य ज्ञानाग्निना दग्धत्वादित्युक्तानुवाद एवैषः ॥ २२ ॥ श्रीगणेशाय

दं व्याचष्टे ॥ सम एवमिति ॥ भिक्षाटनादिना प्रातिभासिकेन कर्मणा विदुषो बंधाभावेऽपि कर्मान्तरेण निबद्धत्वं भविष्यतीत्याशंक्याह ॥ बंधेति ॥ ज्ञानाग्निदग्धत्वादित्येवं शारीरं केवलमित्यादावुक्तस्यायमनुवाद इति योजना यथोक्तस्य कर्मणो मुक्तत्वा स

हविरोधाभ्युपगमस्थनार्थोपिशब्दः ॥ छ ॥

गी०भा०टी०

गतसंगस्येत्यादिश्लोकस्याव्यवहितेन संबंधं वक्तुं वृत्तं कीर्तयति ॥ त्यक्त्वेति ॥ अनेन श्लोकेन नैव किंचित्करोतीति सदसत्त्वं कर्मा
भावः प्रदर्शितस्तत्र तीति संबंधः कस्य कर्माभावप्रदर्शनमित्याशंकायामाह ॥ यः प्रारब्धेति ॥ प्रारब्धकर्मा सन्योऽवतिष्ठते तस्य
कर्माभावः प्रदर्शितस्तत्र द्विरोधः स्यादित्याशंक्यावस्थाविशेषेण तत्प्रदर्शनान्नैवमित्याह ॥ यदेति ॥ भनन्नुष्ठानवतः क्रिया
कारकफलाभावदर्शिनः कर्मपरित्यागप्रौव्यात्कर्माभाववचनमप्राप्तप्रतिषेधः स्यादित्याशंक्याह ॥ आत्मन इति ॥

त्यक्त्वा कर्मफलासंगं इत्यनेन श्लोकेन यः प्रारब्धकर्मा सन् यत्नान्निष्क्रियब्रह्मात्मदर्शनसंपन्नः स्यात्तस्या एवं
त्मनः कर्तृकर्मप्रयोजनाभावदर्शिनः कर्मपरित्यागे प्राप्ते कुतश्चिन्निमित्तात्तदसंभवे सति पूर्ववत्तस्मि
न्कर्मण्यभिप्रवृत्तस्यापि नैव किंचित्करोति स इति कर्माभावः यस्यैवं कर्माभावो दर्शितः तस्यैव ॥ गतस
गस्य मुक्तस्य ज्ञानावस्थितचेतसः ॥ यज्ञायाचरतः कर्म समग्रं प्रविलीयते ॥ २३ ॥ गतसंगस्य सर्वतो नि
वृत्तासक्तेर्मुक्तस्य निवृत्तधर्माधर्मादिबंधनस्य ज्ञानावस्थितचेतसो ज्ञानमेवावस्थितं चेतो यस्य सोयं ज्ञानावस्थि
तचेताः तस्य यज्ञाय यज्ञनिर्वृत्त्यर्थमाचरतो निर्वर्तयतः ॥ छ ॥

नी२

लोकसंग्रहादिनिमित्तं प्रागेवोक्तं अविद्यावस्थायां पूर्ववदित्युक्ता एवंवृत्तमनूद्योत्तरश्लोकमवतारयति ॥ यस्योक्ते
यथोक्तस्यापि विद्यावतो मुक्तस्य भगवत्प्रीत्यर्थं कर्मोपलंभात्तदवधारे संभाव्यते इत्याशंक्याह ॥ यज्ञायेति ॥ धर्मा
धर्मादीत्यादिशब्देन रागद्वेषादिसंग्रहः ॥ तस्य बंधनत्वं कारणत्वादुत्पत्त्यापातनाव्यं यज्ञनिर्वृत्त्यर्थं यज्ञस्याच्छितस्य

भगवतो विष्णोर्नारायणस्य प्रीतिसंपत्त्यर्थमिति
पाठांतरं: छ:

नी२

गद्गीत:३

१०२

अ०४

१२

ज्ञानमेववांछतो ज्ञानस्यप्रतिबंधकंकर्मपरिशंकितंपरिहरन्तिकर्मेति॥समग्रेणोसंगीक्तस्यव्याचष्टे॥सहेलादिना॥२३॥
नाभुक्तंक्षीयतेकर्मेतिस्मृतिमाश्रित्यशंकते॥कस्मादिति॥समस्तस्यक्रियाकारकफलात्मकस्यद्वैतस्यैवब्रह्ममा
त्रत्वेनबाधितत्वादि॥ब्रह्मविदोब्रह्ममात्रस्यकर्मप्रविलीयतेसर्वमितिपक्तेमीत्याह द्विव्यागइति॥ब्रह्मैवविद्दोब्रह्मैव
सर्वंक्रियाकारकफलजातंद्वैतमित्यस्यहेतुत्वेनानंतरश्लोकमवतारयति॥यतइति॥अर्पणशब्दस्यकरणविषयत्वंद
शयमन्नर्पणंब्रह्मेतिसामान्याधिकरण्यस्यबाधपरिभेनेति॥यज्ञंतांसाग्नुतिरितिवद्बाधापानिरसामर्नोधिकर

कर्मसमग्रंसहाग्रेणफलेनवर्त्ततइतिसमग्रंकर्मेतत्सर्वंसमग्रंप्रविलीयतेविनश्यतीत्यर्थः॥छ॥कस्मात्पुनःकार
णात्क्रियमाणंकर्मस्वकार्यारंभमकुर्वत्समग्रंप्रविलीयतेइत्युच्यते॥यतः ब्रह्मार्पणंब्रह्महविर्ब्रह्माग्नौब्र
ह्मणाहुतंब्रह्मैवतेनगंतव्यंब्रह्मकर्मसमाधिना॥२४॥ब्रह्मार्पणंयेनकरणेनब्रह्मविद्धविरग्नावर्प
यतितद्ब्रह्मैवेतिपश्यतीततस्यात्मव्यतिरेकेणाभावंपश्यति॥यथाशुक्तिकायांरजताभावंपश्यतितद्वत्
तदुच्यतेब्रह्मैवार्पणमिति॥यथायत्रजतंतत्रशुक्तिकैवेति॥ब्रह्मअर्पणमित्यसमस्तंपदंयदर्पणबुध्या
गृह्यतेलोकेतदस्यब्रह्मविदोब्रह्मैवेत्यर्थः॥ब्रह्महविरितिविबुध्यागृह्यमाणंतद्ब्रह्मैवास्य॥:छ॥श्रीगणेशाय

णमित्याह॥नस्येतितत्रहर्षणमाह॥यथेति॥उक्तेर्थेपदद्वयमवतारयति॥तद्यर्थइति॥उक्तमेवार्थंस्पष्टयति
॥यथापदिति॥समासशंकांव्यावर्तयति॥ब्रह्मेति॥पदद्वयपक्षेविवक्षितमर्थंकथयति॥पदद्वयेणेति॥ब्रह्मह
विरितिपदद्वयमवतार्यव्याचष्टेब्रह्मेत्यादिना॥यदर्पणबुध्यागृह्यतेतद्ब्रह्मविदोब्रह्मैवेतिपक्षोक्तंनयेहापीत्या

हतयेति॥अस्येतिपर्ये[illegible]ब्रह्मबोधमधिकरोति॥

तथा४

गी०टी
१०२

पूर्ववद्द्वंद्वसमासमाशंक्य व्यावर्तयन्पूर्हांतरमवतार्य व्याकरोति ॥ तथेति प्रागुक्तसमासवदिति व्यतिरेकः तत्र विवक्षि
तमर्थमाह ॥ अग्निरपीति ॥ ब्रह्मण्येति पदस्याभिमतमर्थमाह ॥ ब्रह्मणेति ॥ कर्त्रीह पतोरिति संबंधः कर्त्ता ब्रह्मणः
सकाशादव्यतिरिक्तो नासौ स्वेन रूपेणाभिप्रेत इत्याह ॥ ब्रह्मैवेति ॥ हुतमित्यस्य विवक्षितमर्थमाह ॥ यत्तेनेति ॥ ब्रह्मै
वतेनेत्यादि भागं विभजते ॥ ब्रह्मैवेत्यादिना ॥ ब्रह्मकर्मसमाधिनेति व्याकरोति ॥ ब्र[illegible]ह्मेति ॥ कर्मस्वेवं येयं ब्रह्मणि

तथा ब्रह्माग्नाविति समस्तं पदमग्निरपि ब्रह्मैव यत्र हूयते ब्रह्मणा कर्त्रा ब्रह्मैव कर्त्रेत्यर्थः ॥ यत्तेन हुतं हवनक्रियापि ब्र
ह्मैव ॥ यत्तेन गंतव्यं फलं तदपि ब्रह्मैव ब्रह्मकर्मसमाधिना ब्रह्मैव कर्म ॥ ब्रह्मकर्मणि समाधिर्यस्य स ब्रह्मकर्मसमा
धिस्तेन ब्रह्मकर्मसमाधिना ॥ ब्रह्मैव गंतव्यं ॥ एवं लोकसंग्रहं चिकीर्षुणापि क्रियमाणं कर्मतत्त्वपरमार्थतो
ऽकर्म ब्रह्मबुद्ध्यु[illegible]पमर्दितत्वात् । निवृत्तकर्मणोऽपि सर्वकर्मसंन्यासिनः सम्यग्दर्शिनः स्तुत्यर्थं यज्ञत्व
संपादनं ज्ञानस्य सुतरामुपपद्यते ॥ यदर्पणाद्यधिपतेः प्रसिद्धं तदस्याध्यात्मं ब्रह्मैव परमार्थदर्शिन इति ॥ ॥

ब्रह्मणोऽग्नेः पयसाप्याप्यासा ब्रह्मप्रतिपत्तव्यं एवं ब्रह्मार्पणमंत्रस्याक्षरार्थमुक्त्वा तात्पर्यार्थमाह ॥ एवमिति ॥ निवृत्त
कर्मणः संन्यासिनं प्रतिकथमस्य मंत्रस्य प्रवृत्तिरित्याशंक्याह । निवृत्तेति ॥ यथा(व)द्यज्ञानुष्ठानासमर्थस्याऽत्मस ११२
संकल्पात्मको यज्ञो हुतस्तथा ज्ञानस्य यज्ञत्वसंपादनं स्तुत्यर्थं सुतरामुपपद्यते तेन स्तुतिलाभात्कास्य नापाःस्वार्थी अ०च४
॰॰॰ ॰॰॰ ॰॰॰ ॰॰॰ नवाद्यसर्थः ॥ ज्ञानस्य यज्ञत्वसंपादनमभिनयति ॥ परर्पणादीति ॥ छ ॥ श्रीगणेशाय नमः ॥ २०

केनप्रमाणेनात्र यत्नलसं पादनमवगतमित्याशंक्यार्पणादीनां विशेषणतो ब्रह्मत्वाभिधानानुपपत्तेश्चाह ॥ अन्यथेति
ज्ञानस्य पक्षत्वे संपादिते फलितमाह ॥ तस्मादिति ॥ आत्मैवेदं सर्वमित्यात्मातिरेकेण सर्वस्यावस्तुत्वं प्रतिपद्यमानस्य
कर्माभावे हेतुत्वेनतरमाह ॥ कारकेति ॥ कारकबुद्धेस्तद्वाभिमानस्याभावेऽपि किमिति कर्म न स्यादित्याशंक्याह ॥ नहीति
॥ उक्तमेवान्वयव्यतिरेकाभ्यां दृढयति ॥ सर्वमेवेति ॥ इदं त्वाद्येसाहित्नाद्येन समर्पितो देवताविशेषः सप्रज्ञानकारकमा
दिश्रव्दात्तद्व्याहिकरणं कारकं तद्विषयबुद्धिमत्कर्तास्मीत्यभिमानपूर्वकं भोक्ष्ये फलमस्येति फलाभिसंधिमच्चक

अन्यथा सर्वस्य ब्रह्मत्वे सति अर्पणादीनामेव विशेषतो ब्रह्मत्वाभिधानमनर्थकं स्यात्तस्माद्ब्रह्मैवेदं सर्वमिति वि
ज्ञानात्ततः कर्माभावः कारकबुद्ध्यभावो वाच्यः ॥ नहि कारकबुद्धिरहितं यज्ञाख्यं कर्म दृष्टं सर्वमेवाग्निहोत्रादिकं व
र्मशब्दसमर्पितदेवताविशेषसंप्रदानादिकारकबुद्धिमत्कर्त्रभिमानफलाभिसंधिमच्च दृष्टं ॥ नोपम
र्दितक्रियाकारकफलभेदबुद्धिमत्कर्तृत्वाभिमानफलाभिसंधिरहितं च ॥ इदं तु ब्रह्मविदुपमर्दितकारकक्रिया
फलभेदबुद्धिकर्मातोऽकर्मैव ॥ छ ॥

र्मदृष्टमिति योजना ॥ अन्वयमुक्त्वा व्यतिरेकमाह ॥ नेत्यादिना ॥ उपमर्दिता क्रियादिभेददर्शनविषया बुद्धिर्यस्य तत्क
र्म तथा कर्तास्मीत्यभिमानपूर्वको भोक्ष्ये फलमस्येतिरूपोऽभिसंधिस्तेन रहितं च कर्म न दृष्टमित्यन्वयः ॥ तथापि ब्रह्मवि
हैं दोभासमानकर्माभावे किमायातमित्याशंक्याह ॥ दृष्टमिति ॥ यदिदं ब्रह्मविदो दृश्यमानं कर्म तदहमस्मीति ब्रह्मै
त्वबुद्ध्या निराकृतकारकादिभेदविषयबुद्धिमतः कृतमकर्मैव न भवतीति तत्त्वज्ञाने सति व्यापकं कारकादिव्यावर्तमानं

व्याप्यं कर्मापि व्यावर्तयतीति तत्त्वविदः शरीरादिचेष्टाक
र्माभासः कर्मव्यापकाहितत्वात्सुषुप्तचेष्टावदित्यर्थः ॥ ॥

न

०टी० च

०४

ज्ञानवतो दृश्यमानं कर्माकर्मैवेत्यत्र भगवदुक्तसंमतिमाह ॥ तथा चेति ॥ ब्रह्मविदो दृष्टं कर्म नाशनीलक्षणेपि तत्करणानुपमर्दास्तु नर्भे
विष्यतीत्याशीलोक्तिं व्याख्याह ॥ तथा च दर्शयत्विति ॥ अविद्यानिवृत्तिविद्वानपि कर्मणि प्रवर्त्तमानो दृश्यते तथा तस्य कर्माकर्मै
वेत्यत्र दृष्टान्तमाह ॥ दृष्टा चेति ॥ विद्वत्कर्मापि कर्मत्वावि[illegible]शेषादितरकर्मवत्फलारंभकमित्याशंकानफत्तेत्याह ॥ तत्त्वेति
॥ इदं कर्मैवं कर्तव्यमस्य च फलं भोक्तव्यमिति मतिस्तत्पूर्वकारंभस्तत्त्यक्त्वा [illegible] ॥ च कर्मणि तेषामवांतरभेदसंग्रहा
र्थमादिपदं ॥ हर्षेति कमाह ॥ तथेति ॥ सप्तम्या विद्वत्करणपराम्रष्टुष्योः सामानाधिकरण्यं ॥ उक्तेर्थे प्रवेशाक्यमनुकूलय ष

तथा च दर्शितं कर्मण्यकर्म यः पश्येदिति कर्मण्यभिप्रवृत्तोपि नैव किंचित्करोति सः गुणा गुणेषु वर्तन्ते नैव किंचित्क
रोमीति युक्तो मन्येत तत्त्वविदित्यादिभिस्तथा च दर्शयंस्तत्रतत्र क्रियाकारकफलभेदबुद्धिमपमर्दं करोति दृष्टा च काम्या ष्ठ
ग्निहोत्रादौ कामोपमर्दे[illegible]म्याग्निहोत्रादिहानिस्तथा मतिपूर्वकामतिपूर्वकत्वादीनां कर्मणां कार्यविशेषस्यारंभ
की कत्वं दृष्टं तथेहापि ब्रह्मबुद्ध्युपमर्दितार्पणादिकारकक्रियाफलभेदबुद्धेर्बाह्यचेष्टामात्रेण कर्मापि विदुषोऽ
कर्म संपद्यते ॥ अत उक्तं समग्रं प्रविलीयत इति ॥ अत्र केचिदाहुः यद्ब्रह्म तदर्पणादीनि ब्रह्मैव किलार्पणादिना
पंचविधेन कारकात्मनावस्थितं सत्तदेव कर्म करोति ॥

त्ति ॥ अत इति ॥ ब्रह्मार्पणमित्यस्य व्याख्यानमनुक्त्वा स्वपरव्याख्यानमनुवदति ॥ अत्रेति ॥ प्रसिद्धोद्देशेनाप्रसिद्धविधानस्य
न्याय्यत्वादप्रसिद्धोद्देशेन प्रसिद्धविधानं कथमित्याशंक्याह ॥ ब्रह्मैवेति ॥ किलेत्यस्मिन्व्याख्याने सिद्धान्तिनो संमति १०४
पत्तिं सूचयति ॥ कर्मकरणसंप्रदानाधिकरणरूपेण पंचविधेन ब्रह्मैवावस्थितं कर्म करोतीसंगीकारानहसि अ०च४
द्धभावात्तदनुवादेनार्पणादिषु अविरुद्धं ब्रह्मदृष्टिविधिरित्यर्थः ॥ २४ ॥ ०२१

दृष्टिविधिपक्षे सिद्धांताद्विशेषं दर्शयति॥ नचेति॥ अर्पणादिषु कर्तव्या ब्रह्मबुद्धिं दृष्टांताभ्यां स्पष्टयति॥ यथेत्यादिना॥ द
ष्टिविधाने विधेयदृष्टेर्मानसक्रियात्वेन सम्यग्ज्ञानत्वाभावात्स्वकरणाभंगः स्यादित्यभिप्रेत्य परिहरति॥ सत्यमेवमिति॥ विधित्सि
तदृष्टिस्तुतिपरमेव प्रकरणं न ज्ञानस्तुतिपरमित्याशंकायां प्रकरणपर्यालोचनया ज्ञानस्तुतिरेवात्र प्रतिभातीति प्रतिपा
दयति॥ अत्र त्विति॥ किंच ब्रह्मार्पणमंत्रस्यापि सम्यग्ज्ञानस्तुतौ सामर्थ्यं प्रतिभातीत्याह॥ अत्र चेति॥ न॰ [illegible] त्वर्पणादिषु ब्रह्म

न तत्र नार्पणादिबुद्धिर्निवर्त्यते किंत्वर्पणादिषु ब्रह्मबुद्धिराधीयते॥ यथा प्रतिमादौ विष्ण्वादिबुद्धिर्यथा च नामादौ ब्रह्म
बुद्धिरेवं सत्यमेवमपि स्याद्यदि ज्ञानयज्ञस्तुत्यर्थं प्रकरणं न स्यादत्र तु सम्यग्दर्शनं ज्ञानयज्ञशब्दितमनेकान्यज्ञशब्दिता
न्क्रियाविशेषानुपन्यस्य श्रेयान्द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञ इति ज्ञानं स्तौति॥ अत्र च समर्थमिदं वचनं ब्रह्मा
सर्वस्य र्पणमित्यादि ज्ञानस्य यज्ञत्वसंपादने॥ अन्यथा सर्वस्य ब्रह्मत्वेऽर्पणादीनामेव विशेषतो ब्रह्मत्वाभिधानमनर्थकं
स्यात्॥ ये त्वर्पणादिषु प्रतिमायां विष्णुदृष्टिरिव ब्रह्मदृष्टिः क्षिप्यते इत्याहुः नामादिष्विव चेति ब्रुवतां न तेषां ब्रह्मविद्यो व
क्तेह विवक्षितार्पणादिविषयत्वात् ज्ञानस्य नीचदृष्टिसंपादनेन ज्ञानेन मोक्षफलं प्राप्यते ब्रह्मैव तेन गंतव्यमि

ति चोच्यते

दृष्टिं कुर्वतामपि ब्रह्मविद्यैवाविवक्षितेति पक्षभेदासिद्धिरिति चेन्नाह॥ येत्विति॥ यथा ब्रह्मदृष्ट्या नामादिकमुपास्यं त
थार्पणादिषु ब्रह्मदृष्टिकरणे सत्यर्पणादिकमेव प्राधान्येन ज्ञेयमिति ब्रह्मविद्या यथोक्तेन वाक्येन विवक्षिता न स्यादि व२
त्यर्थः॥ किंच ब्रह्मैव तेन गंतव्यमिति ब्रह्मप्राप्तिफलाभिधानादपि दृष्टिविधानमश्लिष्टमित्याह॥ न चेति॥ न चार्पणाद्यालं
बनाद्ब्रह्मप्राप्तिरिति अप्रतीकालंबनान्नयतीति न्यायविरोधादिति भावः॥ ७॥ श्रीरामचंद्राय नमः श्रीरामः रामः

दृष्टिविधानेऽपि नियोगवशादेव स्वर्गवदृष्टो मोक्षो भविष्यतीत्याशंक्याह ॥ विरुद्धं चेति ॥ ज्ञानादेव कैवल्यमुक्त्वा योगान्तरा
पवादिनाऽस्मिन्सा विरुद्धं मोक्षस्याविद्यानिवृत्तिलक्षणस्य दृष्टत्वं नै[illegible]योगि स्ववचनमित्यर्थः ॥ दृष्टिविनियोगान्मोक्षो भव
तीत्येतत्प्रकरणविरुद्धं चेत्याह ॥ प्रकृतेति ॥ न दैवपूर्वपक्षयुक्ति ॥ सम्यग्दर्शनं चेति ॥ अन्ते च सम्यग्दर्शनं प्रकृतमिति संबन्धः
॥ तत्र हेतुः ॥ सम्यगिति ॥ सम्यग्ज्ञानेनोपक्रम्य तेनैवोपसंहारेऽपि मध्ये किंचिदन्यदुक्तमिति प्रकरणस्याऽतद्विषयत्वमाशंक्याह ।

विरुद्धं च सम्यक्दर्शनमंतरेणामोक्षफलं प्राप्यत इति प्रकृतविरोधश्च । सम्यग्दर्शनं च प्रकृतं ॥ कर्मण्यकर्म यः पश्येदि
त्यन्ते च सम्यग्दर्शनस्यैवोपसंहारात् ॥ श्रेयान्द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञः परंतपेति ॥ ल[illegible]ध्वा परां शांतिमित्यादि
ना सम्यक्दर्शनस्य स्तुतिमेव कुर्वन्नुपक्षीणोऽध्यायस्तत्राकस्मादर्पणं ब्रह्म हविरन्यप्रकरणे प्रतिमायामिव वि
ष्णुदृष्टिरुच्यत इति अनुपपन्नं ॥ तस्माद्यथाव्याख्यातार्थ एवायं श्लोकः ॥ तत्राधुना सम्यग्दर्शनस्य यज्ञत्वं संपाद्य
तत्स्तुत्यर्थमन्येऽपि यज्ञा उपक्षिप्यंते दैवमेवेत्यादिना ॥ दैवमेवापरे यज्ञं योगिनः पर्युपासते ॥ ब्रह्माग्नावपरे यज्ञं य ना
ज्ञेनैवोपजुह्वति ॥ २५ ॥ छ ॥

श्रेयानिति प्रकरणे सम्यग्ज्ञानविषये सत्यनुपपन्नो दर्शनविधिरिति फलितमाह ॥ तत्रेति ॥ [illegible]ब्रह्मार्पणमंत्रे परकीयव्याख्याना
संभवे स्वकीयव्याख्यानं व्यवस्थितमित्युपसंहरति ॥ तस्मादिति ॥ २४ ॥ दैवेति ॥ सर्वस्य श्रेयस्साधनस्य ज्ञानस्य यज्ञत्वं सं
पाद्य पूर्वश्लोके स्थिते सत्यधुना तस्यैव ज्ञानस्य स्तुत्यर्थं यज्ञान[illegible]र निर्दिश्यायमुत्तरग्रंथप्रवृत्तिरित्याह ॥ तत्रेति ॥ सर्वस्य श्रे
यस्साधनस्य मुख्यगौणवृत्तिभ्यां यज्ञत्वं दर्शयन्नादौ यत्तदृषमा दर्शयति ॥ दैवमेवेत्यादिना ॥ ध ॥ श्रीगणेशाय नमः

व

दैवमेवेतिप्रतीकमादाय हैयंपदंव्याचष्टे ॥ देवादीति ॥ सम्पन्ना नारब्धं पदं विभजते ॥ ब्रह्माग्नाविति ॥ तत्र ब्रह्मशब्दार्थं स्फुसवबंधेनस्व
रूपयति ॥ सत्यमिति ॥ यद्दृश्यंजडमनृतं तद्विपरीतमपरिच्छिन्नं ब्रह्म तस्य परमानंदत्वेन परमपुरुषार्थत्वमाह ॥ विज्ञानमिति ॥ तस्य ज्ञानाधिकर
णत्वेनज्ञानत्वमौपचारिकमित्याशंक्याह ॥ य[illegible]त्साक्षादिति ॥ जीवब्रह्मविभागे कथमपरिच्छिन्नत्वमित्याशंक्य विशिनष्टि ॥ पअ
त्मेति ॥ तस्यैवात्मत्वं सर्वस्माद्देहादेर्व्यावृत्तं ताद्दांतरत्वेन साधयति ॥ सर्वांतरमिति ॥ विधिमुखं सर्वमनिवोपनिषद्वाक्यं ब्रह्मविष

दैवमेवदेवारज्यंतेयेनयज्ञेनासौ दैवोपहृतमेवापरेयज्ञंयोगिनःकर्मिणःपर्युपासतेकुर्वंतोसर्थः ॥ ब्रह्माग्नौ सत्यं
प ज्ञानमनंतंब्रह्म विज्ञानमानंदंब्रह्म साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वांतरस्तादृग्वचनोक्तमशनायादिसर्वसंसा
रधर्मविवर्जितं नेति नेतीति निरस्ताशेषविशेषं ब्रह्मशब्देनोच्यते ॥ ब्रह्मचतदग्निश्च सहोमाधिकरणत्व
विवक्षया ब्रह्माग्निस्तस्मिन्ब्रह्माग्नावपरेऽन्ये ब्रह्मविदो यज्ञं पज्ञशब्द आत्मा ॥ आत्मनामसु यज्ञशब्दस्य पाठात्तमात्मा
नं यज्ञं परमार्थतः परमेव ब्रह्म संतं बुध्याद्युपाधिसंयुक्तमध्यस्तसर्वोपाधिधर्मकं ॥ छ ॥ श्रीगणेशायानामहः फरम

यमादिशब्दार्थं निषेधमुखं ब्रह्मविषयमुपनिषद्वाक्यं अशेषमेवार्थतीनिवध्नाति ॥ अशनायेति ॥ ब्रह्मण्यग्निशब्द
प्रयोगे निमित्तमाह ॥ होमेति ॥ बुध्यारूढं तु यासर्वस्य दाहकत्वाद्विलयस्य वा हेतुत्वा[illegible]दिति ॥ यज्ञं पदशब्दस्यात्मनिलंप
दार्थप्रयोगे हेतुमाह ॥ आत्मनामस्विति ॥ ६ आधाराधेयभावेनवास्तवमभेदं ब्रह्मात्मनोर्व्यावर्णयति ॥ परमार्थ इति ॥ क त
थं तर्हि होमो नहि तस्यैव तत्र होमः संभवतीत्याशंक्याह ॥ बुध्यादीति ॥ उपाधिसंयोगफलं कथयति ॥ अध्यस्तेति ॥ ०

ऽमी उपाध्यायव्यासद्वारानद्गुर्मो व्यासे प्रायमर्थं निर्दिशति॥ आहतीति॥ इत्थंभूतलक्षणो तृतीयामेव व्याकरोति॥ उक्ते
॥ति॥ अशनायादिसर्वसंसारधर्मवर्जितेन निर्विशेषेण शुद्धरूपेणेति यावत्॥ आत्मनो ब्रह्मणो होममेव प्रक
टयति सोपाधिकस्येति॥ अपर इत्यस्यार्थं स्फोरयति॥ ब्रह्मेति॥ २५॥ अस्य ज्ञानयज्ञस्य दैवयज्ञादिषु पत्तेषु ब्रह्म
णीगामित्याग्नौ केरूपक्षिप्यमाणालिदर्शयति॥ सोयमिति॥ उपक्षेपप्रयोजनमाह॥ श्रेयानिति॥ संपत्तियज्ञद्वयमुप

आहुतिरूपं यज्ञेनैवात्मनैवोक्तलक्षणेन तु उपजुह्वति प्रक्षिपन्ति॥ सोपाधिकस्यात्मनो निरुपाधिकेन प
रब्रह्मस्वरूपेणैव यद्दर्शनं तस्मिन् होमस्तं कुर्वन्ति॥ ब्रह्मात्मैकत्वदर्शननिष्ठाः संन्यासिन इत्यर्थः॥ सोऽयं सम्यग्द
र्शनलक्षणो यज्ञो दैवयज्ञादिषु यज्ञेषूपक्षिप्यते॥ ब्रह्मार्पणमित्यादिश्लोकैः श्रेयान्द्रव्यमयात्तज्ञा
नयज्ञः परंतपेत्यादिना स्तुत्यर्थं॥ श्रोत्रादीनीन्द्रियाण्यन्ये संयमाग्निषु जुह्वति॥ शब्दादीन्विषयानन्य
इंद्रियाग्निषु जुह्वति॥ २६॥ श्रोत्रादीनीन्द्रियाण्यन्ये योगिनः संयमाग्निषु प्रतीन्द्रियं संयमो भिद्यत
इति बहुवचनं संयमा एव अग्नयः संयमाग्नयः तेषु जुह्वति इंद्रियसंयमनमेव कुर्वन्तीत्यर्थः॥ शब्दादीन्वि
षयानन्ये इंद्रियाग्निषु इंद्रियाण्येवाग्नयस्तेष्विंद्रियाग्निषु जुह्वति॥ छ॥ श्रीगणेशायनमः॥ म॥ भगी ३

न्यस्यति॥ श्रोत्रादीनीति॥ बाह्यानां करणानां मनसि संयमस्यैकत्वात्कथं संयमाग्निष्विति बहुवचनमित्याशंक्य १०६
माह॥ प्रतीन्द्रियमिति॥ संयमानां प्रत्याहाराधिकरणत्वेन व्यवस्थितानां मनोरूपाणां होमाधारत्वादग्नित्वमु ओं० च४
पदिशति॥ संयमाग्नीति॥ विषयेभ्योंतर्बाह्यानीन्द्रियाणि प्रत्याहरतीति संयमयज्ञं संक्षिप्य दर्शयति॥ इंद्रियेति॥ २३

श्रोत्रादींद्रियाग्निषुशब्दादिविषयहोमस्यनंतरमिंद्रियैस्तत्तद्विषयोपभोगलक्षणस्य सर्वसाधारणत्वमाशंक्यप्रतिषि
द्धान्वर्जयित्वारागद्वेषादिरहितो यदृच्छाप्राप्तान्विषयानुपभुंजते तैरिंद्रियैरिति विवक्षितंहोमं विशदयति।। श्रोत्रादि

श्रोत्रादिभिरविरुद्धविषयग्रहणं होमं मन्यंते।।ध।। किंच।। सर्वाणींद्रियकर्माणि प्राणकर्माणि चापरे।। आ
त्मसंयमयोगाग्नौ जुह्वति ज्ञानदीपिते।।२७।। सर्वाणींद्रियकर्माणि इंद्रियाणां कर्माणि ज्ञानेंद्रियकर्माणि
न घ्राणप्राणकर्माणि प्राणो वायुराध्यात्मिकस्तत्कर्माणि प्राकुंचनप्रसारणादीनि तानि चापरे आत्मसंयम
योगाग्नौ आत्मनि संयमः आत्मसंयमः स एव योगो ग्निस्तस्मिन्नात्मसंयमयोगाग्नौ जुह्वति प्रक्षिपंति ज्ञा
नदीपिते ज्ञानेन स्नेहेनेव प्रदीपिते विवेकविज्ञानेनोज्वलभावमापादिते प्रविलापयंतीत्यर्थः किंच।। द्रव्ययज्ञा
स्तपोयज्ञा योगयज्ञास्तथापरे। स्वाध्यायज्ञानयज्ञाश्च यतयः संशितव्रताः।।२८।। ध।। श्रीरामगीतोभा:

मिरिति।।२६।। यज्ञांतरं कथयति।। किंचेति।। इंद्रियाणांकर्माणि श्रवणवचनादानादीनि आत्मनिसंयमो धारणाध्यान
समाधिलक्षणः सर्वमपि व्यापारं विरुध्यात्मनि चित्तसमाधानं कुर्वंतीत्याह।। विवेकेति।।२७।। यज्ञपदं सर्वत्रापरि
ये इत्यपकर्षति।। ध।।:

०पा०टी
मनि
२१

तत्रद्रव्ययज्ञासुरुषानुपादायविभजते॥तीर्थेष्विति॥तपस्विनोयज्ञबुध्यातपोनुतिष्ठंतोनियमवंतइत्यर्थः प्रत्याहारादिसा
द्विशष्टेनैयमासनध्यानधारणासमाधयोगहंतेयथाविधिप्राप्तस्वयविचयारिणोबाधगविधिनैर्मतिक्रम्येतियाव

तीर्थेषुद्रव्यविनियोगंयज्ञबुध्याकुर्वंतियेतेद्रव्ययज्ञास्तपोयज्ञायेनतपस्विनस्तेतपोगंयज्ञाःप्राणायामप्र
त्याहारादिलक्षणोयोगोयज्ञोयेषांतेयोगयज्ञास्तथापरेस्वाध्याययज्ञानयज्ञाश्चस्वाध्यायोपयथाविधिऋगा
घभ्यासोयेषांतेस्वाध्याययज्ञाःज्ञानयज्ञाःज्ञानंशास्त्रार्थपरिज्ञानंयज्ञोयेषांतेज्ञानयज्ञाश्चयतयोयतनशी
लाःसंशितव्रताःसम्यक्शितानितनूकृतानितीक्ष्णीकृतानिव्रतानियेषांतेसंशितव्रताःकिंच॥अपानेजुह्वति
प्राणंप्राणेऽपानंतथापरे॥प्राणापानगतीरुध्वाप्राणायामपरायणाः॥२९॥अपानेपानवृत्तौजुह्वतिप्र
क्षिपंतिप्राणंप्राणवृत्तिंपूरकाख्यंप्राणायामंकुर्वंतीत्यर्थः प्राणेऽपानंतथाऽपरेजुह्वतिरेचकाख्यंप्राणाया
मंकुर्वंतीत्येतत्॥प्राणापानगतीरुध्वामुखनासिकाभ्यांवायोर्निर्गमनंप्राणस्यगतिःतद्विपर्ययेणाधोगम
नमपानस्यतेप्राणापानगतीयत्नेरुध्वानिरुध्यप्राणायामपरायणाःप्राणायामतत्पराःकुंभकाख्यंप्रा
णायामंकुर्वंतीत्यर्थः त्त

णाव्रतानांतीक्ष्णीकरणमपिहत्वं॥२८॥प्राणायामाख्यंयज्ञमुदाहरति॥किंचेति॥प्राणायामपरायणाःसंतोरेचकं
पूरकंचकृत्वाकुंभकंकुर्वंतीत्याह॥प्राणेति॥२९॥श्रीरामचंद्रापनमः॥श्रीगणायनयनमः॥छ॥रामगति॥तो

१०८
अ०च४
१०४

प्राणापानयोर्गती रुद्ध्वा सप्रश्वासौ निरुध्य किं कुर्वंतीत्यपेक्षायामाह॥ किंचेति॥ प्राणापानगतिनिरोधरूपं कुंभकं कृत्वा पुनः
पुनर्वायुजयं कुर्वंतीत्यर्थः॥ आहारस्य परिमितत्वं हितत्वमेध्यत्वोपलक्षणार्थं॥ प्राणानां प्राणेषु होममेव विभजते
॥परस्येति जितेषु वायुभेदेषु जितानां तेषां होमप्रकारं प्रकटयति॥ तेनत्रेति॥ प्रकृतान्यज्ञानुपसंहरति॥ सर्वेपीति

किंच॥ अपरे नियताहाराः प्राणान्प्राणेषु जुह्वति॥ सर्वेप्येते यज्ञविदो यज्ञक्षपितकल्मषाः॥३०॥ अपरे निय
ताहाराः नियतः परिमित आहारो येषां ते नियताहाराः संतः प्राणान् वायुभेदान्प्राणभेदेष्वेव जुह्वति॥ यस्य यस्य
वायोर्जयः क्रियते तस्मिन्नितरान्वायुभेदान्तस्मिन्तस्मिन्जुह्वति ते तत्र प्रविष्टा इव भवंति॥ सर्वेप्येते यज्ञविदो
यज्ञक्षपितकल्मषाः यज्ञैर्यथोक्तैः क्षपितो नाशितः कल्मषो येषां ते यज्ञक्षपितकल्मषाः॥३०॥ एवं यथोक्ता
न्यज्ञान्निर्वर्त्य॥ यज्ञशिष्टामृतभुजो यांति ब्रह्म सनातनं॥ नायं लोकोस्त्ययज्ञस्य कुतोन्यः कुरुसत्तम॥
॥३१॥ यज्ञशिष्टामृतभुजो यज्ञानां शिष्टं यज्ञशिष्टं यज्ञशिष्टं च तदमृतं च यज्ञशिष्टामृतं तद्भुंजते इति यज्ञशि
ष्टामृतभुजः यथोक्तान्यज्ञान्कृत्वा तच्छिष्टेन कालेन यथाविधिप्रचोदितमन्नममृताख्यं भुंजत इति येन यज्ञ
शिष्टामृतभुजो यांति गच्छंति ब्रह्म सनातनं चिरंतनं मुमुक्षवश्चेत्कालातिक्रमापेक्षयेति सामर्थ्याद्गम्यते॥

॥३०॥ यथोक्तयज्ञनिर्वर्तनानंतरं क्षीणकल्मषे किं स्यादित्याशंक्याह॥ एवमिति॥ यथोक्तानां यज्ञानां मध्ये केन
चिदपि यज्ञेनाविशेषितस्य पुरुषस्य प्रत्यवायं दर्शयति नायमिति॥ कथं यथोक्तयज्ञान्कृत्वापि नाम विशिष्टेन कालेन वि
हितान्नभुजां ब्रह्मप्राप्तिरित्याशंक्य मुमुक्षुत्वे सतीति चेत्॥ बुद्धिद्वारेत्याह॥ मुमुक्षवश्चेदिति॥ तत्र किं मिन्नीं साक्षादे

वमोक्षो विवक्षितस्तथा च गतिश्रुतिविरोधः स्यादित्या
शंक्य गतिनिर्देशसामर्थ्यात्क्रममुक्तिरत्राभिप्रेतेत्याह॥
कालादीतिः॥

म२

८१

०गी०टी

१०८

१३

तृतीयं पारंपर्यमाचष्टे॥नायमिति॥विवक्षितं तत्कैमुतिकन्यायमाह॥कुतोऽन्य इति साधारणलोकाभावे पुनरसाधारणलोकप्रा
प्तिर्दूरनिरस्तेत्यर्थः॥यथोक्तं बुद्धिसमाधानं कुरु कुलप्रधानस्यार्जुनस्यानायाससलभ्यमिति वक्तुं कुरुसत्तमेत्युक्तं॥श्रु
उक्तानां यज्ञानां वेदमूलत्वेनोपेक्षानिबंधनत्वं निरस्यति॥एवमिति॥आत्मव्यापारसाध्यत्वमुक्तकर्मणामायात्वप
दूषयति॥कर्मजानिति॥आत्मनो निर्व्यापारत्वज्ञानफलमाह॥एवमिति॥कथं यथोक्तानां यज्ञानां वेदस्य मुखे

नायं लोकस्सर्वप्राणिसाधारणोऽस्ति यथोक्तानां यज्ञानामेकोऽपि यज्ञो यस्य नास्ति सोऽयज्ञस्तस्य
कुतोऽन्यो विशिष्टसाधनसाध्यः कुरुसत्तम॥छ॥एवं बहुविधा यज्ञा वितता ब्रह्मणो मुखे॥कर्मजा
न्विद्धि तान्सर्वानेवं ज्ञात्वा विमोक्ष्यसे॥३२॥एवं यथोक्ता बहुविधा बहुप्रकारा यज्ञा वितताः विस्तीर्णा
ब्रह्मणो वेदस्य मुखे द्वारे वेदद्वारेणावगम्यमाना ब्रह्मणो मुखे वितता उच्यंते॥तद्यथा वाचि हि प्राणं
जुहुमः इत्यादयः॥कर्मजान्कायिकवाचिकमानसिककर्मोद्भवान्विद्धि तान्सर्वाननात्मजान्नि
र्व्यापारो ह्यात्मा अत एवं ज्ञात्वा विमोक्ष्यसेऽशुभात्॥छ॥ ❁ ❁ ❁ ❁ ❁ ❁ ❁ श्रीरामजीसीः

ना३

विस्तीर्णा इत्यस्यार्थं व्याह॥वेदद्वारेणेति॥तेनावगम्यमानत्वमेवोदाहरति॥तद्यथेति॥एतद्ध स्म वै तत्पूर्वे विद्वांस
आहुरित्युपक्रम्याध्ययनाद्याक्षिप्य हेलाकांक्षापमुक्तं॥वाचि हीति॥ज्ञानशक्तिमद्विषयेति॥प्राणशक्तिमद्रूपहा
रोऽत्र विवक्षितः॥प्राणो वा वाचं यो ह्येव प्रभवः स एवाप्यय इति वाक्यमादिशब्दार्थः॥ज्ञानशक्तिमतां क्रियाश
क्तिमतां चान्योन्यासक्तिफलयत्नातद्भावेनाध्ययनादिसिद्धिरित्यर्थः॥कर्मणामात्मव्यापारजन्यताभावे हेतुमा
हा॥निर्व्यापारो हीति॥तस्य च निर्व्यापारत्वं फल
वत्वात्ज्ञातव्यमित्याह॥अत इति॥छ॥ ❁ ❁

५

अं०व४

२५

एवं ज्ञानमेव ज्ञापयन्नुक्तं व्यनक्ति ॥ [illegible]नेत्यादिना ॥ ३१ ॥ कर्मयोगे ऽनेकधाभिहिते सर्वस्य श्रेयःसाधनस्य कर्मोत्समकत्वप्र
तिपत्तौ केवलं ज्ञानमनाद्रियमाणमर्जुनमालक्ष्य वृत्तानुवादपूर्वकमुत्तरश्लोकस्य तात्पर्यमाह ॥ ब्रह्मेत्यादिना ॥ सिद्धेति सि
द्धं पुरुषार्थं भजं यु रुषापेक्षितलक्षणां प्रयोजनं येषां यज्ञानां तैरनंतरोपदिष्टैरिति यावत् प्रश्नपूर्वकं स्तौति प्रकारं प्रकट
यति ॥ कथमित्यादिना ॥ ज्ञानयज्ञस्य द्रव्ययज्ञात्प्रशस्यतरत्वे हेतुमाह ॥ सर्वमिति ॥ द्रव्यसाधनसाध्यादिरूपलक्षणां ॥

नमद्ध्यापाराए[illegible]तेनिर्व्यापारोहमुदासीन इत्येवं ज्ञात्वा [illegible] अस्मात् सम्यग्दर्शनान्मोक्ष्यसे संसारबंधादित्यर्थः ब्रह्मर्प सा
णमित्यादिश्लोकेन सम्यग्दर्शनस्य यज्ञत्वं संपादितं ॥ यज्ञाश्च अनेकविधा उपदिष्टास्तैः सिद्धपुरुषा [redacted] श्रे ४
थं प्रयोजनं तैर्ज्ञानं स्तूयते ॥ ३२ ॥ कथं यान् [illegible] द्रव्यमयाद्यज्ञात् ज्ञानयज्ञः परंतप ॥
सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते ॥ ३३ ॥ श्रेयानुद्रव्यमयात् यज्ञात् द्रव्यसाधनसाध्यात् यज्ञात् ज्ञान र्वंकर्मस ५
यज्ञः हे परंत[illegible]प द्रव्यमयो हि यज्ञः फलस्यारंभको न ज्ञानयज्ञः फलारंभकोऽतः श्रेयान् प्रशस्यतरः ॥ यतः [illegible] स
मस्तमखिलं [illegible] कर्म वेदोक्तं हे पार्थ ज्ञाने मोक्षसाधने परिसमाप्यते ऽन्तर्भवतीत्यर्थः ॥ ३३ ॥

साध्यापादेरपि तितोपि ज्ञानयज्ञस्य श्रेयस्त्वात् विशेषाद्द्रव्यमयाद्धि यज्ञेभ्यो ज्ञानयज्ञस्य प्रशस्यतरत्वं प्रपंचयति ॥ द्रव्यमयो हीति ॥
फलस्याभ्युदयस्येत्यर्थः ॥ न फलारंभको न कस्यचित्फलस्योत्पादकः किंतु नित्यसिद्धस्य मोक्षस्याभिव्यंजक इत्यर्थः ॥ तस्य
प्रशस्यतरत्वे हेत्वंतरमाह ॥ यत इति ॥ समस्तं कर्माग्निहोत्रादिकमुच्यते ॥ अखिलमविद्यमानं खिलं शेषो यस्येसनत्यंम
हत्तरमिति यावत् ॥ ३३ ॥

सर्वमखिलमितिपदद्वयोपादानंअसंकोचार्थंसर्वंकर्मज्ञानेनांतर्भवतीत्यत्रछांदोग्यश्रुतिंप्रमाणयति॥यथेति॥चतुरायकेहि
द्यूतेकश्चिदयश्चतुरंकःसकृतशब्देनोच्यतेतस्मैविजितायकृतायतदर्थंत्राधरेयास्तस्मात्तदधस्तात्त्र्यादिविन्यस्त्रिद्व्येकांकास्त्रेता
द्वापरकलिनामानःसंयंत्यायाःसंगच्छंतिचतुरंकेखल्वायेत्रिद्व्येकांकायानामंतर्भावोभवतिमहासंख्यायामवांतरसंख्यांतर्भावा
वश्यंभावादेवमेनंविद्यावंतंपुरुषंसर्वंतत्साभिमुख्येनसमेतिसंगच्छतेकिंतत्सर्वंयदविद्वत्पुरुषेष्वंतर्भवतीत्याह॥यत्किंचिदिति
प्रजाःसर्वाःयत्किंमपिसाधुकर्मकुर्वंतितत्सर्वमित्यर्थः।एवमभिसमेतीत्युक्तंतमेवविद्यावंतंपुरुषंविशिनष्टि॥यस्तदिति॥किंतदित्यु

यथाकृतायविजितायाधरेयाःसंयंत्येवमेनंसर्वंतदभिसमेतियत्किंचित्प्रजाःसाधुकुर्वंतियस्तद्वेदयत्सवेदइतिश्रुतेः॥त
त देतद्विशिष्टंज्ञानंतर्हिकेनप्रकारेणप्राप्यतइत्युच्यते॥तद्विद्धिप्रणिपातेनपरिप्रश्नेनसेवया।उपदेक्ष्यंतितेज्ञानंज्ञा
निनस्तत्त्वदर्शिनः॥३४॥तद्विद्धिजानीहि॥येनविधिनाप्राप्यतइति॥छ॥श्रीरामजीसाहाइ॥ छ॥ :छ॥

[illegible]केनदेवविशाड्पति॥यत्सइति॥सरैक्वोयत्तत्त्वंवेदतत्त्वंयोऽन्योऽपिजानातितमेनंसर्वंसाधुकर्माभिसमेतीतियोजना॥३३॥य
द्येवंप्रशस्यतरंईदृक्ज्ञानंतर्हिकेनोपायेनतत्प्राप्तिरितिपृच्छति॥तदेतदिति॥ज्ञानप्राप्त्युपायासत्त्वमुपायमुपदिशति॥उच्यत
इति॥तद्विद्धिज्ञानंगुरुभ्योविद्धिगुरवश्चप्रणिपातादिभिरुपायैराववर्जितचेतसोवक्ष्यंतीत्याह॥तद्विद्धीत्यादिना॥उपदेशं[illegible]त्वमुप
देशकालेपरोक्षज्ञानमात्रेणानभ्यर्थनीयाह॥उपदेक्ष्यंतीति॥तदितिप्रेप्सितंज्ञानसाधनेऽनुष्ठितेयेनविधिनेतिविशेषदर्श
नात्॥यद्वायेनाचार्यावर्जनप्रकारेणात्रोपदेशवशाद्वेक्षितंज्ञानंलभ्यतेतथातत्त्वज्ञानमाचार्येभ्योलभस्वेत्यर्थः॥छ॥॥

नदेवस्फुरयति ॥ आचापार्यानिति ॥ एवमाहितेनेत्याहितशब्देन शमाहयोऽत्यंतं एवमाहितेन विद्धीति पदयोः संबंधः ॥ उत्तरार्द्धं व्याचष्टे ॥ वै
प्रश्रयेणेति ॥ प्रश्रयो भक्तिश्रद्धासर्वको निरतिशयाद्यवनतिविशेषः यथोक्तविशेषणं पूर्वोक्तेन प्रकारेण प्रशस्ततममित्य
३५ र्थः विशेषणास्य पौनरुक्त्यं परिहार्यमर्थभेदं कथयति ॥ ज्ञानवंतोऽपीति ॥ ज्ञानिन इत्युक्ते पुनस्तत्त्वदर्शिन इति ब्रुवतो भग
वतोऽभिप्रायमाह ॥ ये सम्यगिति ॥ बहुवचनं चैतदाचार्यविषयं बहुभ्यः श्रोतव्यं बहुधा वेति सामान्याभ्यनुज्ञानार्थं न

आचार्यानभिगम्य प्रणिपातेन प्रकर्षेण नीचैः पतनं प्रणिपातो दीर्घनमस्कारस्तेन कथं बंधः कथं मोक्षः का वि
ह द्या का चाविद्येति परिप्रश्नेन ॥ सेवया गुरुशुश्रूषयेत्येवमादिना प्रश्रयेण आवर्जिता आचार्या उपदेक्ष्यंति कथ
यिष्यंति ते ज्ञानं यथोक्तविशेषणं ज्ञानिनो ज्ञानवंतोऽपि केचिद्यथावत्तत्त्वदर्शनशीलाश्च न भवंति अ
तो विशिनष्टि तत्त्वदर्शिन इति ॥ ये सम्यग्दर्शिनस्तैरुपदिष्टं ज्ञानं कार्यक्षमं भवति नेतरदिति भगवतो मतं ॥
छ ॥ तथा च सतीदमपि समर्थं वचनं ॥ यज्ज्ञात्वा न पुनर्मोहमेवं यास्यसि पांडव । येन भूतान्यशेषेण द्रक्ष्य
स्यात्मन्यथो मयि ॥३५॥

त्वात्मज्ञानमधिकृत्याचार्यबहुत्वं विवक्षितं ॥ तस्य तत्त्वसाक्षात्कारवद्वारैं चार्यमात्रोपदेशादेवोदयसंभवाद्विशिष्टैराचार्यैरुप
दिष्टे ज्ञाने कार्यक्षमे सति समनंतरवचनमपि योग्यविषयमर्थवद्भवतीत्याह ॥ तथा चेति ॥ अतस्तस्मिन्विशिष्टज्ञाने
ह त्वदीयमोहापोहेनो निष्ठावताभवताभवितव्यमिति शेषः ॥ तत्र निष्ठाप्रतिष्ठायै तदेव ज्ञानं पुनर्विशिनष्टि ॥ येनेति ॥ छ ॥:॥:

त्वा वेसफलं तज्ज्ञाने तज्ज्ञानोयोगादित्याशंक्य प्रार्थत्वमधिपूर्वस्य गमेरंगीकृतस्य व्याकरोति ॥ अधिगम्येति ॥ इत्याचार्योपदे
ल्पे ज्ञाने फल वृत्तिप्रतिष्ठावता भवितव्यमित्याह ॥ किं चेति ॥ जीवेश्वरयोरुभयत्र भूतानां प्रतीतिस्तु स्वप्रतीति निर्देशो भेदवादानु
तिः स्यादित्याशंक्याह ॥ क्षेत्रज्ञेति ॥ मूलप्रमाणाभावे कथं तर्ह्येकत्वदर्शनं स्यादित्याशंक्याह ॥ सर्वेति ॥ ३५ ॥ ज्ञानस्य प्रका
रान्तरेण प्रशंसां प्रस्तौति ॥ किंचेति ॥ पापकारिभ्यः सर्वेभ्यः सकाशादतिशयेन पापकारित्वमेकस्मिन्नसंभावितमपि ज्ञानमाहा

यज्ज्ञात्वा ज्ञानैरुपदिष्टमधिगम्य प्राप्य पुनर्भूयो मोहमेवं यथेदानीं मोहं गतोसि पुनरेवं न यास्यसि हे पांडव किं
च येन ज्ञानेन भूतान्यशेषेण ब्रह्मादीनि स्तंबपर्यंतानि द्रक्ष्यसि साक्षादात्मनि प्रत्यगात्मनि मत्संस्थानीमानि भूतानीति
इतिश्चथोपि मयि वासुदेवे परमेश्वरे च इमानीति क्षेत्रज्ञेश्वरैकत्वं सर्वोपनिषत्प्रसिद्धं द्रक्ष्यसीत्यर्थः ॥ किं चे
तस्य ज्ञानस्य माहात्म्यं ॥ अपि चेदसि पापेभ्यः सर्वेभ्यः पापकृत्तमः ॥ सर्वं ज्ञानप्लवेनैव वृजिनं संतरिष्यसि ॥ ३६ ॥
अपि चेदसि पापेभ्यः पापकृद्भ्यः सर्वेभ्योऽप्यतिशयेन पापकृत् पापकृत्तमः यद्यसि भवसि सर्वं ज्ञानप्लवेनैव ज्ञा
नमेव प्लवं कृत्वा वृजिनं वृजिनार्णवं पापं संतरिष्यसि ॥ धर्मोपीह मुमुक्षोः पापमुच्यते ॥ तज्ज्ञानं कथं नाशयतीत्या
पमि[illegible]ति दृष्टांत उच्यते ।

त्य संसिध्यर्थमंगीकृत्य ब्रवीति ॥ अपि चेदिति ॥ ब्रह्मात्मैक्यज्ञानस्य सर्वपापनिवर्तकत्वे माहात्म्यमिदानीं प्रकटयति ॥ सर्वमि ११०
ति ॥ अधर्मे निवृत्तेपि धर्मप्रतिबंधात् ज्ञानवतोपि मोक्षः संभवतीत्याशंक्याह ॥ धर्मोपीति ॥ इहेत्यध्यात्मशास्त्रे गृह्यते ॥ ३८ ॥ ज्ञाने अ०च४
सत्यपि धर्माधर्मयोरुपसंभात्कुतस्तयोस्ततो निवृत्तिरित्याशंक्य ज्ञानस्य धर्माधर्मनिवर्तकत्वे दृष्टांतेन दर्शयितुमनंतरश्लो १७
कमवतारयति ॥ त्वामिति ॥ श्रीरामचंद्राय नमः ॥ श्रीगणेशाय नमः १ श्रीकृष्णाय नमः ॥

ना

पोग्यायोग्यविभागेन निवर्त्तकत्वानिवर्त्तकत्वविभागमुदाहरति ॥ यथेति ॥ दृष्टांतानुरूपं दार्ष्टांतिकमाचष्टे ॥ ज्ञानाग्निरिति ॥ यो
ग्यविषयेपि दाहकत्वमस्येत्यभिसंधायेस्स येति विवक्षितत्वादिनशिषि ॥ सम्यगिति ॥ दार्ष्टांतिकं व्याचष्टे ॥ ज्ञानमेवेति ॥ ननु ज्ञानं
साक्षादेव कर्मदाहकं किमिति नोच्यते निर्बीजीकरोति कर्मेति किमिति व्याख्यायते इत्याशंक्याह ॥ नहीति ॥ ज्ञानस्य स्वरूपमेव प्रा
वृताज्ञापाकरणे सामर्थ्यमस्य लोके दृष्टत्वाद् विरिंचिप्रयुक्तात्मज्ञानमपि तज्ज्ञानं निवर्त्तयत् तज्जन्यकर्तृत्वभ्रमं कर्मबीजभूतं निव
र्तयति तन्निवृत्तौ च कर्मणि न स्थानं पारयंति न तु साक्षात्कर्माणि निवर्तकं ज्ञानं स्वज्ञानस्येव निवर्तकमिति विभासेस्तद् निश्चितो पु

ते२

यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन ॥ ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा ॥ ३७ ॥ यथैधांसि काष्ठा
नि समिद्धः सम्यगिद्धो दीप्तोऽग्निर्भस्मसाद्भस्मीभावं कुरुतेऽर्जुन ॥ ज्ञानमेवाग्निर्ज्ञानाग्निः सर्वकर्माणि भस्मसा
त्कुरुते तथा निर्बीजीकरोतीत्यर्थः ॥ न हि साक्षादेव ज्ञानाग्निः कर्माणीन्धनवत् भस्मीकर्तुं शक्नोति ॥ तस्मात्सम्य
ग्दर्शनं सर्वकर्मणां निर्बीजत्वकारणमित्यभिप्रायः ॥ सामर्थ्यात् येन कर्मणा शरीरमारब्धं तत्प्रवृत्तफलत्वादुपभोगेनैव
क्षीयते ॥ध॥

[redacted] नरपि कर्मोद्भवसंभवादित्यर्थः ॥ ज्ञानस्य साक्षात्कर्मनिवर्तकत्वाभावे फलितमाह तस्मादिति ॥ सम्यग्ज्ञानं मूल
भूताज्ञाननिवर्तनेन कर्मनिवर्तकमिष्टं चेत् प्रारब्धफलस्यापि कर्मणो निवृत्तिप्रसंगात् ज्ञानोदयसमकालमेव शरीरपातः स्या
दित्याशंक्याह ॥ सामर्थ्यादिति ॥ ज्ञानोदयसमसमयमेव देहापोहे तत्त्वदर्शिभिरुपदिष्टं ज्ञानं फलवदिति भगवदभि
प्रायस्य बाधितत्वप्रसंगात् आचार्यलाभान्यथानुपपत्त्या प्रवृत्तफलकर्मसंपादकमज्ञानलेशं न नाशयति ज्ञानमित्यर्थः ॥ क

री७

थ्यं तर्हि प्रारब्धकर्मफलं नश्यतीत्याशंक्याह ॥ येनेति ॥
॥ध॥

८४ मी२

मर२

भा०टी
१

क३

ता हिं कथं ज्ञानाग्निः सर्वकर्माणि भस्मसात्करोतीत्युक्ते तत्राह ॥ अत्तरति ॥ ज्ञानादारब्धफलानां कर्मणां निवृत्त्यनुपपत्तेरना
रब्धफलानि यानि कर्माणि प[illegible]र्वं ज्ञानोदयादस्मिन्नेव जन्मनि कृतानि ज्ञानेन च सह वर्तमानानि प्राचीनेषु जन्मस्वर्जितानि
तानि सर्वाणि ज्ञानं कारणानिवर्तत्वेन निवर्तयतीत्यर्थः ॥ ३७ ॥ ननु[illegible]न्येनैव परमपरिशुद्धिकारणे[illegible]केन चिद्भवितव्यमेवाति न३
नापरमपुरुषार्थसिद्धेरात्मज्ञानेनेत्याशंक्याह ॥ यत[illegible]रति ॥ पूर्वोक्तेन प्रकारेण ज्ञानमाहात्म्यं यतः सिद्धमतस्तेन ज्ञानेन तु

अतो यान्यप्रवृत्तफलानि ज्ञानोत्पत्तेः प्राक्कृतानि ज्ञानसह[illegible]भावीनि च अतीतानेकजन्मकृतानि च तानि[illegible]न्येव स
र्वाणि भस्मसात्कुरुते ॥ छ ॥ यत एवमतः ॥ न[illegible]हि ज्ञानेन सदृशं पवित्रमिह विद्यते ॥ तत्स्वयं योगसंसिद्धः कालेनात्म
नि विंदति ॥ ३८ ॥ न हि ज्ञानेन सदृशं तुल्यं पवित्रं पावनं शुद्धिकरमि[illegible]ह विद्यते ॥ ~~[illegible]~~
तत्ज्ञा[illegible]नं स्वयमेव योगसंसिद्धो योगेन कर्मयोगेन समाधियोगेन च संसिद्धः । संस्कृतो योग्यतामापन्नः
सन्मुमुक्षुः कालेन महता आत्मनि विंदति लभत इत्यर्थः ॥ छ ॥ येनैकांतेन ज्ञानप्राप्तिर्भवति स उ[illegible]पाय
उपदिश्यते ॥ श्रद्धावाँल्लभते ज्ञानं तत्परः संयतेंद्रियः ॥ ज्ञानं लब्ध्वा परां शांतिमचिरेणाधिगच्छति ॥ ३९ ॥

ल्यं परिशुद्धिकरं परमपुरुषार्थोपयिकमिह व्यव[illegible]हारभूमौ नास्तीत्यर्थः ॥ तत्सुनरात्मविषयं ज्ञानं सर्वेषां किमिति[illegible]
रिति नोत्पद्यते तत्राह ॥ तत्स्वयमिति ॥ महता कालेन यथोक्तसाधनेन योग्यतामापन्न[illegible]स्तदधिकृतः स्वयं तदात्म
नि ज्ञानं विंदतीति प्रयोजनात् सर्वेषां स्यादिति ज्ञानानुदयो योग्यतावैधुर्यादिति भावः ॥ ३८ ॥ कर्मयोगेन समाधियो
गेन च संपन्नस्य ज्ञानोत्पत्तावंतरंगसाधनमुपदिशति ॥ येनेति ॥ ज्ञानलाभे प्रयोजनमाह ॥ ज्ञानमिति ॥ छ ॥ श्री

शिवाय नमः ॥ ७

११२
अ०च४
३८

नकेवलंश्रद्धालुत्वमेवसहायंज्ञानलाभेहेतुरपितुतात्पर्यमपीत्याह॥श्रद्धालुत्वेपीति॥मंदप्रस्थानत्वेनतात्पर्यविधुरत्वेनं
नचतस्योपदिष्टमपिज्ञानमुत्पत्तुमीष्टेतेनतात्पर्यमपितत्कारणंभवतीत्याह॥तत्परआहेति॥अभियुक्तोनिष्ठावान्उपासना
दावित्यादिशब्देनश्रवणादिगृह्यते॥नकेवलंश्रद्धातात्पर्येचेसुभयमेवज्ञानकारणंकिंतुसंयतेंद्रियत्वमपितदभावेश्रद्धादेरकिंचि
त्करत्वादित्याशयेनाह॥श्रद्धावानिति॥उक्तसाधनानांज्ञानेनसहैकांतिकत्वमाह॥यएवंभूतमिति॥तद्विद्धिप्रणिपातेनेत्याद्युक्तप्र

अनु२

श्रद्धावान्श्रद्धालुर्लभतेज्ञानंश्रद्धालुत्वेपिहिभवतिकश्चिन्मंदप्रत्नोमंदप्रयत्नोऽतआहतत्परोगुरूपासनादा
वभियुक्तोज्ञानलब्ध्युपायेश्रद्धावांस्तत्परोपिकश्चिदजितेंद्रियःस्यादतस्ततआह॥संयतेंद्रियःसंयतानिवि
षयेभ्योनिवर्तितानियस्येंद्रियाणिससंयतेंद्रियोगीयएवंभूतःश्रद्धावांस्तत्परःसंयतेंद्रियश्चासाववश्यं
ज्ञानंलभतेप्रणिपातादिस्तुवाह्योऽनैकांतिकोऽपिभवतिमायावित्वादिसंभवादनेनतुनतथाश्रद्धावत्वादा
विसैकांतिकोज्ञानलब्ध्युपायः॥३९॥

णेवप्रणिपातादेर्ज्ञानहेतोरुक्तत्वात्किमितीहानीहेहेत्वंतरमुच्यतेतत्राह॥प्रणिपातादिस्त्विति॥तद्धिबहिरंगंइदंपुनरं
तरंगंनचतेनज्ञानेनप्रीतिनोपुमीमनस्यन्यथाफलंवाबहिरन्यथाफलंवाचबहिरन्यथापदर्शनादात्मनोमायाविलस्यसं
भवाद्विप्रलंभकत्वादेरपिसंभावनोपनीतत्वादित्यर्थः॥मायाविवादेःश्रद्धावत्तात्पर्यादावपिसंभवादनैकांतिक
त्वमविशिष्टमित्याशंक्याह॥नत्विति॥नहिमायपाविप्रलंभेनवाश्रद्धातात्पर्यसंयमाःनियोग्यतोनिष्पत्तुमर्हं

तीसर्वः॥४॥ श्रीराम॥॥

पो

र्दी
०५१

उत्तरार्द्धं प्रश्नपूर्वकमवतार्य व्याकरोति ॥ किंपुनरित्यादिना सम्यग्ज्ञानादभ्यासाधनपेक्षान्मोक्षो भवतीत्यत्र प्रमाणमाह ॥ सम्यग्दर्शि ९
नाहिति ॥ याख्यशब्देन तमेव विशिनष्टि ज्ञानादेव तु कैवल्यमित्यादि विवक्षितं न्यायस्तत्त्वज्ञानोत्थाननिवृत्तेरज्ञानादेः प्रसिद्धत्वा
त्तज्ज्ञानादपि निरपेक्षाद्ज्ञानेनाज्ञानकार्यप्रक्षयलक्षणो मोक्षः स्यादित्येवंलक्षणः ॥ ३९ ॥ उत्तरश्लोकस्य पातनिकां करोति
॥ अज्ञेति ॥ यथोक्तसाधनानुपदेशमपेक्ष्याचिरेण ब्रह्मसाक्षात्करोति साक्षात्कृतब्रह्मा त्वचिरेणैव मोक्षं प्राप्नोतीत्येषो

किंपुनर्ज्ञानलाभात् स्यादित्युच्यते ॥ ज्ञानं लब्ध्वा परां मोक्षाख्यां शांतिमुपरतिं अचिरेण क्षिप्रमेवाधिगच्छति ॥
सम्यग्दर्शनात् क्षिप्रमेव मोक्षो भवतीति सर्वशास्त्रन्यायप्रसिद्धः सुनिश्चितोऽर्थः ॥ अत्र संशयो न कर्तव्यः पा
पिष्ठो हि संशयः कथमित्युच्यते ॥ अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति ॥ नायं लोकोस्ति न परो न सुखं संश
यात्मनः ॥ ४० ॥ अज्ञश्चानात्मज्ञः अश्रद्दधानश्च संशयात्मा च विनश्यति ॥ अज्ञाश्रद्दधानौ यद्यपि विनश्यतो न त
था यथा संशयात्मा संशयात्मा तु पापिष्ठः सर्वेषां ॥ छ ॥ श्रीरामनारायणाय नमः ॥ ॥ छ ॥ ॥ ॥ ० ॥ ० ॥

र्थः सम्यापरामृश्यते संशयस्य कर्तव्यत्वे हेतुमाह ॥ पापिष्ठो हीति ॥ उक्तं हेतुं प्रश्नपूर्वकमुत्तरश्लोकेन साधयति ॥ क ११२
थमित्यादिना ॥ अज्ञाश्रद्दधानाभ्यां संशयचित्तस्य विशेषमादर्शयति ॥ नायमिति ॥ द्वितीयभागं विभजनो अ० च ४
र्थं भूमिकां करोति ॥ अज्ञेति ॥ छ ॥ ० ० ० ० ० ० ० ० ० ० श्रीरामचंद्राय नमः ॥ ० ॥ ११

अज्ञादीनां मध्ये संशयात्मनो यत्नापिष्टसंतत्व अन्वद्वाराप्रकटयति॥कथमिति॥लोकद्वयस्यातस्य सुखस्य संशये चाभावे हेतु
माह॥तत्रापीति॥संशयचित्तस्य सर्वत्र संशयप्रवृत्ते दुर्निवारत्वादित्यर्थः॥संशयस्यानर्थमूलत्वे हि स्थिते फलितमा
ह॥तस्मादिति॥४०॥यद्यपि संशयः सर्वानर्थहेतुत्वात्त्याज्यो भवेत्तथापि निवर्तकाभावे तत्करणमस्वाधीनमि न
न तिशंकते॥कस्मादिति॥श्रुतियुक्तिप्रयुक्तमेव यथार्थज्ञानं तन्निवर्तकमित्युत्तरमाह॥ज्ञानेति॥संशयरहितस्यापि कर्माणप

कथं नायं लोकः साधारणोप्यस्ति यानपरोलोको न सुखं तत्रापि संशयोपपत्तेः संशयात्मनः संशयचित्तस्य
तस्मात्संशयो न कर्तव्यः॥कस्मात्॥योगसंन्यस्तकर्माणं ज्ञानसंछिन्नसंशयं॥ आत्मवंतं न कर्माणि निब
ध्नंति धनंजय॥४१॥योगसंन्यस्तकर्माणं परमार्थदर्शनलक्षणेन योगेन संन्यस्तानि कर्माणि येन परमार्थ
दर्शिना धर्माधर्माख्यानि तं योगसंन्यस्तकर्माणं॥॥४१॥श्रीः

न वै धर्मबंधहेतवो भवंतीत्याशंक्याह॥योगेति॥विषयपरवशस्य पुंसो योगायोगात्कुतो योगसंन्यस्तकर्मत्वमित्याशं
क्याह॥आत्मवंतमिति॥परमार्थदर्शनतः संशयोच्छिन्नो न हि घेहकज्ञानमाहात्म्यादेव कर्मणि चनि हताषप्रमत्त
स्य प्रातिभासिकानि कर्माणि बंधहेतवो न भवंतीत्याह॥नकर्माणीति॥कर्मयोगादेव कर्मसंन्यासस्यानुपपत्तिमा
शंक्याद्यपादेव विभजते॥परमार्थेति॥तत्र वैध संन्यासपक्षे परोक्षफलं संन्यासपक्षे त्वपरोक्षमिति विवेकः॥४१॥

यथोक्तज्ञानेनसंन्यस्तकर्मिंत्वमेवसातिसंशयेनसिध्यतिसंशयवतस्त[illegible]इहयोगादितिशंकते॥कथमिति॥द्वितीययार्द्धंव्याकु
र्वन्परिहरति॥आहेसाद्दिनापाठक्रमादर्थक्रमस्यबलीयस्त्वारादौद्वितीयंयार्द्धंव्याख्याप[illegible]पश्चादाद्यपार्द्धंव्याचष्टे॥कृतेसा
ह॥एवमिति॥सर्वमिद[illegible]मात्मैवेतोविषयपरवशस्यनहिध्यतीसभिसंधाया[illegible]त्मावंतंव्याकरोति॥अप्रमत्तमिति॥नका
र्माणि॥स्पादिकालेतिव्याचष्टे॥गुणा[illegible]चेष्टेति॥अविद्यादीनाहिप्रशब्देनेष्टंमिधंचस्पृहते॥४१॥तस्मादिनाहिसमनंतर

कथंयोगसंन्यस्तकर्मेत्याहज्ञानेनात्मेश्वरैक्यदर्शनलक्षणेनसं[illegible]छिन्नःसंशयोयस्यतज्ज्ञानसंछिन्नसंश
यः यः एवंयोगसंन्यस्तकर्माणंतंआत्मवंतंअप्रमत्तंगुणाचेष्टानुरूपेणादृष्टानिकर्माणिननिबध्नंतिअनिष्टादि
रूपंफलंनारभंते॥हेधनंजय॥४१॥यस्मात्कर्मयोगानुष्ठानादशुद्धिक्षय[illegible]हेतुकज्ञानसंछिन्नसंशयोननिबध्य
तेकर्मभिर्ज्ञानाग्निदग्धकर्मत्वादेव॥यस्मात्त्वज्ञाःकर्मानुष्ठानविषयेसंशयवान्विनश्यति॥तस्मादज्ञानसं
भूतंहृत्स्थंज्ञानासिनात्मनः॥छित्वेनंसंशयंयोगमातिष्ठोत्तिष्ठभारत॥४२॥छ॥

क

न२

श्लोकगतनत्स्वरापेक्षितमर्थमाह॥यस्मादितिसतांकर्मणामस्महादिषुफलारं[illegible]भकत्वोपलंभाद्विदुष्यापितेषांतन्दाव्यमनप
बाधमित्याशंक्याह॥ज्ञानाग्नीति॥ननुसंहिज्ञानस्यापितात्त्व[illegible]निर्बंधात्मकार्मयो[illegible]गानुष्ठानंनापितत्तद्धेतुकंज्ञानंतत्त्वापि
संशयावताराहित्याशंक्याह॥यस्माच्चेति॥४१॥श्रीगणेशायनमः॥॥

११२
अ०च४
३०

ष्योकाश्चसैंराशिाव्याचष्टे ॥ तस्माद्धिंसादिना पापिष्यमिति संशयस्य सर्वानर्थमूलत्वेन साक्षात्संसूच्यते ॥ विवेकाभ्यहृष्
स्तत्वाहृपितस्य हेयत्वमविवेकस्यानर्थकारत्वप्रसिद्धेरित्याह ॥ अविवेकादिति ॥ न चास्य चैतन्यवदात्मनिष्पच्छत्वाहत्ता
ज्यत्वशंकितव्याभिसाह ॥ हृदीति ॥ शोकमोहाभ्यामभिभूतस्य पुंसोऽपि मननस्थिप्रादुर्भवतः संशयस्य प्रबलप्रवृत्तिं च घकाभा
वेनैव प्रध्वंसः सिध्यतीति संशयाह ॥ ज्ञानासिनेति ॥ स्वाश्रयस्य संशयस्य स्वाश्रयरोपवज्ज्ञानेन समुच्छेदसंभवालिमि

तस्मात्पापिष्ठमज्ञानसंभूतं अज्ञानादविवेकाज्जातं हृत्स्थं हृदि बुद्धौ स्थितं ज्ञानासि ना शोकमोहा
दिदोषहरं सम्यग्दर्शनं ज्ञानं तदेवासिः तेन ज्ञानासिना आत्मनः स्वस्य आत्मविषयत्वात्संशय
स्य नहि परस्य संशयः परेणाच्छेत्तुं शक्योऽतः आत्मविषयोऽपि स्वस्यैव भवति ज्ञानासिना ॥ ४२ ॥ श्रीरामः

त्मिस्वस्येति विशेषणाभिसाशंक्याह ॥ आत्मविषयत्वादिति ॥ स्थाणुर्वाहि विषयः संशयस्तद्विषयेऽज्ञानेनहेवद्
तनिष्ठेन तन्निरासो व्यावर्तितेप्रकृते त्वात्मविषयस्तदाश्रयश्च संशयस्तथाविधेन ज्ञानेनापनीयते तेन विशेषणमर्थव
दित्यर्थः ॥ तदेव प्रपंचयति ॥ नहीति ॥ आत्माश्रयत्वस्य प्रकृते संशये सिद्धत्वेन विवक्षितत्वात्तद्विषयस्य तद्विषयेरोध

तस्यतेनविवृतिर्विवक्षितेत्युपसंहरति ॥ अत इति ॥:

गी०टी०
९

२

संशयसमुच्छित्तेनेनरकर्तव्यमुपदिशति॥ छित्वैनमिति॥ अग्निहोत्रादिकं कर्म भवद्राज्ञपराक्रमे णाकरिष्यामि युद्धात्पुनरुप
रिरंसौ वेत्याशंक्याह॥ उत्तिष्ठेति॥ भरतान्वये महति क्षत्रियवंशे प्रसूतस्य समुपस्थितसमरे तु विमुखत्वमनुचितमिति
मत्वा नः सन्नाह॥ भारतेति॥ तदनेन योगस्य प्रकृत्विमलं भगवतो नीश्वरत्वं च निराकृतं सकर्माराधककर्मोद्दिरदर्शनादात्मनः

छित्त्वैनं संशयं स्वविनाशहेतुभूतं योगं सम्यग्दर्शनोपायं कर्मानुष्ठानमातिष्ठ कुरु इत्यर्थः॥ उत्तिष्ठ
चयुद्धायेदानीं भारतेति॥४२॥ इति श्रीभगवद्गीताभाष्ये श्रीशंकरभगवत्पादकृतौ चतुर्थोध्या
यः समाप्तः संपूर्णम्॥४॥ श्रीरामः ॐ ॐ राममम रा:

सम्यग्ज्ञानात्तच्छरीरापातादेर्वहिरंगादंतरंगाच्च साधनाद्धेतुभूतादशेषानर्थनिवृत्त्या ब्रह्मभावमभिदधता संसा
अ४ दुत्कृष्टे तस्मिन्नसंशयानस्याधिकारो राद्धोऽशेषदोषवर्त्तते संशयोपहिता उत्तमस्य ज्ञाननिष्ठाऽपरस्य कर्मनिष्ठेति स्था
पितं॥४२॥ हरिः ॐ तत्सदिति श्रीपरमहंसपरिव्राजकाचार्य श्रीमच्छुद्धानंदपूज्यपादशिष्य श्रीमदानंदज्ञान

गिरिविरचितायां श्रीमद्भगवद्गीताभाष्यटीकायां चतुर्थोध्यायः॥४॥ ॐ

६
११४
अ०च४
३१

ॐ॥ पूर्वोत्तराध्याययोः संबंधमभिधानो वृत्तानुवादपूर्वकमर्जुनस्य प्रश्नस्याभिप्रायं दर्शयितुं प्रक्रमते॥ कर्मणीत्यादिना
इत्यारभ्य कर्मण्यकर्मदर्शनमुक्त्वा तत्प्रशंसाप्रसारितेत्याह॥ स कृत्स्नकृदिति॥ ज्ञानवंतं सर्वाणि कर्माणि लोकसंग्रहार्थं कुर्वंतं ज्ञान
लक्षणाग्निनादग्धसर्वकर्माणं कर्मण्युक्तफलसंबंधप्रबंधविधुरं विवेकवंतो वदंतीति ज्ञानवंतो ज्ञानफलभूतं संन्यासं विवक्षन्विविदिषोः सा
धनरूपमपि संन्यासं भगवान्विवक्षितवानित्याह॥ ज्ञानाग्नीति॥ निराशीरित्यारभ्य शरीरस्थितिमात्रकरणं कर्म शरीरस्थितावपि संगरहितः
२ संन्याचरेद्धर्माधर्मफलभागी न भवतीत्यपि पूर्वोत्तराभ्यामर्द्धाभ्यां द्विविधं संन्यासं सूचितवानित्याह॥ शारीरमिति॥ यदृच्छेत्यादावपि संन्या सः
सूचितस्तद्धर्मकलापोपदेशादित्याह॥ यदृच्छेति॥ ज्ञानस्य यज्ञत्वसंपादनपूर्वकं प्रशंसावचनादपि कर्मसंन्यासो दर्शितो ज्ञाननिष्ठस्येत्याह॥

हरिः ॐ॥ कर्मण्यकर्म यः पश्येदित्यारभ्य स युक्तः कृत्स्नकर्मकृत्॥ ज्ञानाग्निदग्धकर्माणं शारीरं केवलं कर्म कुर्वन्यद
च्छालाभसंतुष्टो ब्रह्मार्पणं ब्रह्म हविः कर्मजान्विद्धि तान्सर्वान्॥ सर्वं कर्माखिलं पार्थ ज्ञानाग्निः सर्वकर्माणि॥०॥

ब्रह्मार्पणमिति॥ ज्ञानयज्ञस्य स्तुत्यर्थं कल्पितानां सर्वकर्मणां नानाविधानां यज्ञानामनुष्ठानेषां देहादिव्यापारजन्यत्ववचनेनात्मनो निर्व्या
पारत्वविज्ञानफलाभिलापादपि यथोक्तमात्मानं विविदिषोः सर्वकर्मसंन्यासेऽधिकारो ध्वनित इत्याह॥ कर्मजानिति॥ समस्त
स्यैव विशेषवर्जितस्य कर्मणो ज्ञाने पर्यवसानाभिधानाच्च जिज्ञासोः सर्वकर्मसंन्यासः सूचित इत्याह॥ सर्वमिति॥ तद्विद्धीत्यादि
ना ज्ञानप्राप्त्युपायप्रणिपातादिप्रदर्शनात् तेन ज्ञानेना संन्यासोऽतिशयमाहात्म्यवता सर्वकर्मणां निवृत्तिरेवेति व
दता च ज्ञानार्थिनः संन्यासेऽधिकारो दर्शितो भगवतेत्याह॥ ज्ञानाग्निरिति॥०॥ श्रीकृष्णाय नमः॥ श्रीरामाय नमः॥ श्री॥

ज्ञानेनसमुच्छिन्नसंशयं तस्मादेवज्ञानात्कर्माणि संन्यस्य व्यवस्थितमप्रमत्तं वशीकृतकार्यकरणं प्रातिभासिकानि कर्माणि न नि
बध्नंतीत्यपि द्विविधः संन्यासो भगवतोक्त इत्याह ॥ योगेति ॥ कर्मणीत्यारभ्य योगसंन्यस्तकर्माणमित्यंतैरुदाहृतैर्वचनैरुक्तं संन्या
समुपसंहरति इत्थं तैरिति ॥ तर्हि कर्मसंन्यासस्यैव जिज्ञासुना ज्ञानवता चादरणीयत्वात्कर्मानुष्ठानमनादेयमापन्नमित्याशंक्योक्त
मर्थांतरमनुवदति ॥ छित्वैनमिति ॥ कर्मतत्त्यागयोरुक्तयोरेकेनैव पुरुषेणानुष्ठेयत्वासंभवाद्दृष्टविरोधोस्तीत्याशंक्य युगप
द्वा क्रमेण वानुष्ठानमिति विकल्प्याद्यं दूषयति ॥ उभयोश्चेति ॥ द्वितीयं प्रत्याह ॥ कारणभेदेनेति ॥ उक्तयोर्द्वयोरेकेन पुरुषे

॥ योगसंन्यस्तकर्माणमित्यंतैर्वचनैः सर्वकर्मणां संन्यासं अवोचरन्भगवान् छित्वैनं संशयं योगमातिष्ठेत्यंतेन व॥·
चनेन योगं च कर्मानुष्ठानलक्षणं अनुतिष्ठेत्युक्तवान् तयोः उभयोश्च कर्मानुष्ठानकर्मसंन्यासयोः स्थितिगतिवत्
परस्परविरोधादेकेन सह कर्तुमशक्यत्वात्कालभेदेन चानुष्ठानविधानाभावादर्थादेतनयोरन्यतरकर्तव्यताप्राप्तौ
सत्यां पक्षशास्यतरमेतयोः कर्मानुष्ठानकर्मसंन्यासयोस्तत्कर्तव्यं नेतरदित्येवं मन्यमानः प्रशस्यतरबुभुत्सयार्जु
॥ नउवाच संकर्मणांकृष्णेत्यादि ॥
न्यासं ४

णानुष्ठेयत्वासंभवे कथं कर्तव्यत्वसिद्धिरित्याशंक्याह ॥ अर्थादिति ॥ द्वयोरुक्तयोरेकेन क्रमाक्रमाभ्यामनुष्ठानानुपपत्तेरित्यर्थः ॥
अन्यतरस्य कर्तव्यत्वे कतरस्येति कुतो निर्णयो द्वयोः सन्निध्यविशेषादित्याशंक्याह ॥ यत्त[illegible]शस्यतरमिति ॥०॥·
भगवता कर्मणां संन्यासो योगश्चोक्तो न च तयोः समुच्चित्यानुष्ठानेतेनान्यतरस्य श्रेष्ठस्यानुष्ठेयत्वेन बुभु
त्सया प्रश्नोपपत्तिरित्युपसंहरति ॥ एवमिति ॥ ॥ ॥ श्रीरामायनमः श्रीकृष्णायनमः ॥ ०॥ श्री॥

नायं प्रष्टुरभिप्रायः कर्मसंन्यासकर्मयोगयोर्भिन्नपुरुषानुष्ठेयत्वस्योक्तत्वादेकस्मिन्पुरुषे प्राप्त्यभावादिति शंकते॥ नन्वि
ति॥ चोद्यमंगीकृत्य परिहरति॥ सत्यमेवमिति। कीदृशस्तर्हि प्रष्टुरभिप्रायो येन प्रश्नप्रवृत्तिरिति पृच्छति। कथमिति॥ एकस्मिन्पुरुषे
कर्मतत्त्यागयोरस्ति प्राप्तिरिति प्रष्टुरभिप्रायं प्रतिनिर्देष्टुं प्रारभते॥ पूर्वोदाहृतैरिति॥ यथा स्वर्गकामो यजेतेति स्वर्गकामोद्देशेन या
गो विधीयते न तु तस्यैवाधिकारो नान्यस्येत्यपि प्रतिपाद्यते वाक्यभेदप्रसंगात्तथाऽनात्मवित्कर्तृसंन्यासे पक्षे प्राप्तेऽनूद्यते न तु
त्वात्मवित्कर्तृकत्वमेव संन्यासस्य नियम्यति वैराग्यमात्रेणाज्ञस्यापि संन्यासविधिदर्शनात्तस्मात्कर्मतत्त्यागयोरविद्वत्कर्तृको

॥ कत्वमस्ती॥

ननु चात्मविदो ज्ञानयोगेन निष्ठां प्रतिपिपादयिष्यन् पूर्वोदाहृतैर्वचनैर्भगवान् सर्वकर्मसंन्यासमवोचत्तत्र न तेनात्मज्ञ र्भ
स्यानश्च कर्मानुष्ठानकर्मसंन्यासयोर्भिन्नपुरुषविषयत्वात् अन्यतरस्य प्रशस्यतरत्वबुभुत्सया प्रश्नोऽनुपपन्नः सत्यमेवं
त्वदभिप्रायेण प्रश्नो नोपपद्यते। प्रष्टुः स्वाभिप्रायेण पुनः प्रश्नो युज्यत एवेति वदामः कथं पूर्वोदाहृतैर्वचनैर्भगवताकर्मसं
न्यासस्य कर्तव्यतया विहितत्वात् प्राधान्यं पंनतरेण च कर्तारं तस्य कर्तृत्वासंभवादनात्मविदपि कर्तृपक्षे प्राप्तोऽनूद्य

॥ तएव॥

तिमन्वानस्यार्जुनस्य प्रश्नः संभवतीति भावः॥ भवतु संन्यासस्य कर्तव्यत्वविवक्षा तथापि कथं प्रशस्यतरबुभुत्सया प्रश्नप्रवृत्तिरित्याशंक्या
ह॥ प्राधान्यमिति॥ तथापि कथमेकस्मिन्पुरुषे तयोरप्राप्तावुक्ताभिप्रायेण प्रश्नवचनं प्रकल्प्यते तत्राह॥ अनात्मविदपीति॥ आत्मवि
[illegible]सामर्थ्यात्कर्मत्यागध्रौव्य[illegible]च्चदितरस्यापि सति वैराग्ये तत्त्यागस्यावश्यकत्वात्तथाहि॥ अनात्मविदपि कर्तासौ प्राप्तोऽ
नूद्यते तथा च कर्मयोगतत्त्यागयोरेकस्मिन्नविदुषि प्राप्तेर्व्यक्तत्वादुक्ताभिप्रायेण प्रश्नप्रवृत्तिरविरुद्धेत्यर्थः॥ श्री रामः

त

संन्यासस्यात्मवित्कर्तृकत्वमेवात्र विवक्षितं किं न स्यादित्याशंक्य कर्मेतरपर्युदासः संन्यासविधिश्रुतेरर्थभेदे वाक्यभेदप्रसंग॥ त्वमित्याह॥ न पुनरिति॥ इतिशब्दो वाक्यभेदप्रसंगहेतुद्योतनार्थः॥ ततः किमित्याशंक्य फलितमाह॥ एवमिति॥ कर्मानुष्ठानकर्मसंन्यासयोरविद्वत्कर्तृकत्वमस्तीत्येवं मन्वानस्यार्जुनस्य प्रशस्यतरविविदिषया प्रश्नो नानुपपन्न इति संबंधः॥ तयोः समुच्चित्यानुष्ठानसंभवे कथं प्रशस्यतरविविदिषेत्याशंक्याह॥ पूर्वोक्तेनेति॥ उभयोः श्रेयस्त्वादावुक्तप्रकारेण कर्मतत्त्याग

न पुनरात्मवित्कर्तृकत्वमेव संन्यासस्य विवक्षितमित्येवं मन्वानस्यार्जुनस्य कर्मानुष्ठानकर्मसंन्यासयोरविद्वत्पुरुषकर्तृकत्वमप्यस्तीति पूर्वोक्तेन प्रकारेण तयोः परस्परविरोधात्॥ अन्यतरस्य कर्तव्यत्वे प्राप्ते प्रशस्यतरं यत्कर्तव्यं नेतरदिति प्रशस्यतरविविदिषया प्रश्नो नानुपपन्नः। प्रतिवचनवाक्यार्थनिरूपणेनापि प्रष्टुरभिप्राय एवमेवेति गम्यते॥ कथं॥ संन्यासकर्मयोगौ निःश्रेयसकरौ तयोस्तु कर्मसंन्यासात्कर्मयोगो विशिष्यत इति प्रतिवचनं॥

योर्मिथो विरोधान्न समुच्चित्यानुष्ठानं सावकाशमित्यर्थः॥ भवतु तर्हि यस्य कस्यचिदन्यतरस्यानुष्ठेयमिति कुतो यथोक्ताभिप्रायेण प्रश्नप्रवृत्तिरित्याशंक्याह॥ अन्यतरस्येति॥ उभयप्राप्तौ समुच्चयानुपपत्तावन्यतरपरिग्रहे विशेषस्यान्वेष्यत्वादुक्ताभिप्रायेण प्रश्नोपपत्तिरित्यर्थः॥ एतत्त्वाविद्वत्कर्तृकयोः संन्यासकर्मयोगयोः कतरं श्रेयानिति प्रष्टुरभिप्रायो भातीत्याह॥ प्रतिवचनेति॥ किं तत्प्रतिवचनं कथं वा तन्निरूपणमिति पृच्छति॥ कथमिति॥ तत्र प्रतिवचनं दर्शयति।

॥ संन्यासेति॥

तन्निरूपणं कथयति ॥ एतदिति ॥ तदुभयमिति निःश्रेयसकरत्वं कर्मयोगस्य श्रेष्ठत्वं चेत्यर्थः गुणदोषविभागविवेकार्थं पृच्छति ॥
किंचेति ॥ अतोस्मिन्नाद्ये पक्षे किं दूषणं अस्मिन्वा द्वितीयपक्षे किं फलमिति प्रश्नार्थः तत्र सिद्धांती प्रथमपक्षे दोषमादर्शयति ॥ अत्रेत्यादि
ना ॥ तदेवानुपपन्नत्वं व्यतिरेकद्वारा विवृणोति ॥ यदित्यादिना ॥ निः ॥ श्रेयसकरत्वोक्तिरित्यत्र पारंपर्येणेति द्रष्टव्यं ॥

एतन्निरूप्यं किमनेनात्मवित्कर्तृकयोः संन्यासकर्मयोगयोर्निःश्रेयसकरत्वं प्रयोजनमुक्त्वा तयोरेव कुतश्चिद्विशेषा
त्कर्मसंन्यासात्कर्मयोगस्य विशिष्टत्वमुच्यते ॥ आहोस्विदनात्मवित्कर्तृकयोः संन्यासकर्मयोगयोस्तदुभयमुच्यत
इति किं चातः यद्यात्मवित्कर्तृकयोः संन्यासकर्मयोगयोस्तु निःश्रेयसकरत्वं तयोस्तु कर्मसंन्यासात्कर्मयोगस्य वि
शिष्टत्वमुच्येत ॥ यदि वाऽनात्मवित्कर्तृकयोः संन्यासकर्मयोगयोस्तदुभयमुच्यत इति ॥ अत्रोच्यते ॥ आत्मवित्कर्तृकयोः सं ॥
न्यासकर्मयोगयोरसंभवात्तयोर्निःश्रेयसकरत्ववचनं तदीपाच्च कर्मसंन्यासात्कर्मयोगस्य विशिष्टत्वाभिधानमित्ये
तदुभयमनुपपन्नं यद्यात्मविदः कर्मसंन्यासस्तत्प्रतिकूलश्च कर्मानुष्ठानलक्षणः कर्मयोगः संभवेतां ॥ तदा तयोर्निःश्रेयसक
रत्वोक्तिः कर्मयोगस्य च कर्मसंन्यासाद्विशिष्टत्वाभिधानमित्येतदुभयमुपपद्येत ॥ आत्मविदस्तु संन्यासकर्मयोगयोरसंभवात्त
योर्निःश्रेयसकरत्वाभिधानं कर्मसंन्यासाच्च कर्मयोगो विशिष्टतर इति वानुपपन्नं ॥ अत्राह किमात्मविदः संन्यासकर्मयोगयोः
विशिष्टत्वाभिधानमिति प्रतियोगिनोऽसहायत्वादस्य च शुद्धिद्वारा ज्ञानार्थत्वादित्यर्थः ॥ आत्मज्ञस्य कर्मसंन्यासकर्मयोगयोरसंभवे
दर्शिते चोदयति ॥ अत्राहेति ॥ चोदयिता निर्द्धारणार्थं विमृशति ॥ किमित्यादिना ॥ श्रीरामायनमः श्रीकृष्णायनमः ॥ श्रीराम ॥

उभयोरप्यसंभव आहोस्विदन्यतरस्य

गी॰ टी॰

अन्यतरासंभवेपिसंदेहात्सश्रोवतरतीत्याह॥यद्याचेति॥यस्यकस्यचिदन्यतरस्यासंभवोभविष्यतीत्याशंक्यकारणमंतरेण॥
संभवोभवन्नतिप्रसंगीस्यादितिमन्वानःसन्नाह॥असंभवेति॥आत्मविदःसकारणंकर्मयोगासंभवंसिद्धांतीदर्शयति॥अत्रेति॥
संग्रहवाक्यंविवरणत्वात्मवित्त्वंविवरणोति॥जन्मादीति॥तस्ययदुक्तंनिरस्तमिथ्याज्ञानत्वंतदिदानींव्यनक्ति॥सम्यगिति वि
पर्ययज्ञानमूलस्येत्यादिनोक्तंप्रपंचयति॥निष्क्रियेति॥यथोक्तंसंन्यासमुत्क्रान्ततोविपरीतस्यकर्मयोगस्याभावःप्रति॥

सं

यद्याचान्यतरस्याभवस्तदापिकिंकर्मसंन्यासस्यउतकर्मयोगस्येत्यसंभवकारणंचवक्तव्यमितिअत्रोच्यतेआत्मविदोनिरस्त
मिथ्याज्ञानत्वाद्विपर्ययज्ञानमूलस्यकर्मयोगस्यासंभवःस्यात्॥जन्मादिसर्वविक्रियारहितत्वेननिःक्रियमात्मानमा
त्मत्वेनयोवेत्तितस्यात्मविदःसम्यग्दर्शनेनापास्तमिथ्याज्ञानस्यनिःक्रियात्मस्वरूपावस्थानलक्षणंसर्वकर्मसंन्या॥
समुत्क्रान्तद्विपरीतस्यमिथ्याज्ञानमूलकर्तृकत्वाभिमानपुरःसरस्यसक्रियात्मस्वरूपावस्थानरूपस्यकर्मयोगस्य
हशास्त्रेतत्रतत्रात्मस्वरूपैणप्रदेशेषुसम्यग्ज्ञानमिथ्याज्ञानतत्कार्यविरोधादभावःप्रतिपाद्यते॥यस्मात्तस्मादात्म

निरू५१

विदोनिरस्तमिथ्याज्ञानस्यविपर्ययज्ञानमूलःकर्मयोगोनसंभवतीतियुक्तमुक्तंस्यात्॥५॥श्रीरामश्रीरामश्रीरामः॥

त ४

पाद्यतइतिसंबंधः॥वैपरीत्यंस्फोरयन्कर्मयोगमेवविशिनष्टिमिथ्याज्ञानेनेति॥मिथ्याचतदज्ञानंचेत्यनाद्यनिर्वाच्यमज्ञानंतन्मूलो
हंकर्तेत्यात्मनिकर्तृत्वाभिमानस्तज्जन्यस्येतियावत्॥यथोक्तंसंन्यासमुत्क्रान्तयथोक्तकर्मयोगस्याभावप्रतिपादनेहेतुमाह॥
सम्यग्ज्ञानेनेति॥कुत्रतदभावप्रतिपादनंतदाह॥इहेति॥उक्तंहेतुंकृत्वात्मज्ञस्यकर्मयोगासंभवंफलितमाह॥यस्मादिति॥

अ॰५
११७

इहशास्त्रेनचतत्रेत्याशङ्कामेवव्यक्तीकर्तुंपृच्छति ॥ केषुकेष्विति ॥ तानेवप्रदेशान्दर्शयति ॥ अत्रोच्यतइति ॥ आत्मस्वरूपनिरूपणप्रदेशेषुसंन्यासप्रतिपादनादात्मविदःसंन्यासोविवक्षितश्चेत्तर्हिकर्मयोगोपितस्यकस्मान्नभवतिप्रकरणाविशेषादितिशंकते ॥ ननुचेति ॥ आत्मविद्याप्रकरणेकर्मयोगप्रतिपादनमुदाहरति ॥ तद्यथेति ॥ प्रकरणादात्मविदोपिकर्मयोगस्यसंभवेफलितमाह ॥ अतश्चेति ॥ आत्मज्ञानोपायत्वेनापिप्रकरणपाठसिद्धौज्ञानादूर्ध्वंन्यायविरुद्धंकर्मकर्तव्यमितिवक्तुमशक्यमिति

केषुकेषुपुनरात्मस्वरूपनिरूपणप्रदेशेषुआत्मविदःकर्माभावःप्रतिपाद्यतइतिअत्रोच्यते ॥ अविनाशितुतद्विद्धीतिप्रकृत्य ॥ यएनंवेत्तिहंतारं ॥ वेदाविनाशिनंनित्यमित्यादौतत्रतत्रात्मविदःकर्माभावउच्यते ॥ ननुचकर्मयोगोप्यात्मस्वरूपनिरूपणप्रदेशेषुतत्रतत्रप्रतिपाद्यतएव ॥ तद्यथातस्माद्युध्यस्वभारत स्वधर्ममपिचावेक्ष्यकर्मण्येवाधिकारस्तेइत्यादौतस्मात्कथमात्मविदःकर्मयोगस्यासंभवःस्यादिति ॥ अत्रोच्यते ॥ सम्यक्ज्ञानमिथ्याज्ञानतत्कार्यविरोधात् ॥ ज्ञानयोगेनसांख्यानामित्यनेनसांख्यानामात्मतत्वविदांअनात्मवित्कर्तृककर्मयोगनिष्ठातोनिःक्रियात्मस्वरूपावस्थानलक्षणायाःज्ञानयोगेननिष्ठायाःपृथक्करणात् ॥ कृतकृत्यत्वेनात्मविदःप्रयोजनांतराभावात् ॥ तस्यकार्यंनविद्यतइतिकर्तव्यांतराभाववचनाच्च ॥ ५ ॥ ॥ ५ ॥ श्री ॥

कं

परिहरति ॥ अत्रोच्यतइति ॥ सम्यग्ज्ञानमिथ्याज्ञानयोस्तत्कार्ययोश्चभ्रमनिवर्तिभ्रमसम्भवयोर्मिथोविरोधात्कर्तृत्वादिभ्रमसत्वेकर्मसम्भवाज्ज्ञानादूर्ध्वंनसंभवतीत्यर्थः ॥ आत्मज्ञस्यकर्मयोगासंभवेहेत्वंतरमाह ॥ ज्ञानयोगेनेति ॥ इतश्चात्मविदोज्ञानादूर्ध्वंकर्मयोगोनयुक्तिमानित्याह ॥ कृतकृत्यत्वेनेति ॥ ज्ञानवतोनास्तिकर्मेत्यत्रकारणांतरमाह ॥ तस्येति ॥ ५ ॥

तर्हि ज्ञानवता कर्मयोगस्य हेयत्ववज्जिज्ञासुनापि तस्य त्याज्यत्वं ज्ञानप्राप्त्यात्तस्यापि पुरुषार्थसिद्धेरित्याशंक्य जिज्ञासोरस्ति कर्मयो
संभवेत्याह॥ नकर्मणामिति॥ स्वरूपोपकार्यंगमंतरेणांगिस्वरूपानिष्पत्तेर्ज्ञानार्थिना कर्मयोगस्य शुद्ध्यादिद्वारा ज्ञानहेतो
[illegible]दयतत्वमित्यर्थः॥ तर्हि ज्ञानवतापि ज्ञानफलोपकारित्वेन कर्मयोगो मृग्यतामित्याशंक्याह॥ योगारूढस्येति॥ उत्पन्नसम्यग्ज्ञा
नस्य कर्माभावे शरीरस्थितिहेतोरपि कर्मणोऽसंभवात्तस्य शरीरस्थितिस्तदस्थितौ च कुतो जीवन्मुक्तिस्तदभावे च

न कर्मणामनारंभात्॥ संन्यासस्तु महाबाहो दुःखमाप्तुमयोगतः इत्यादिना चात्मज्ञानांगत्वेन कर्मयोगस्य विधानात्॥
योगारूढस्य तस्यैव शमः कारणमुच्यत इत्यनेन चोत्पन्नसम्यग्दर्शनस्य कर्मयोगाभाववचनात्॥ शारीरं
केवलं कर्म कुर्वन्निति च शारीरस्थितिकारणातिरिक्तस्य कर्मणो वारणात्॥ नैव किंचित्करोमीति युक्तो मन्ये
ततत्वविदित्यनेन च शारीरस्थितिमात्रप्रयुक्तेष्वपि दर्शनश्रवणादिकर्मस्वात्मयाथात्म्यविदः करोमीति प्रत्य
यस्य समाहितचेतस्तया सदाऽकर्तव्यत्वोपदेशात्॥ ५॥ ॥ ॥ ॥ ५॥

कस्योपदेष्टृत्वमुपदेशाभावे च कुतो ज्ञानोदयः स्यादित्याशंक्याह॥ शारीरमिति॥ विदुषोऽपि शारीरस्थितिरास्थिता चेत्तन्मात्रप्रयुक्तेषु दर्श
नश्रवणादिषु कर्तृत्वाभिमानोऽपि तस्य स्यादित्याशंक्याह॥ नैवेति॥ तत्त्वविदित्यनेन च समाहितचेतस्तयाकरोमीति प्रत्ययस्य
सदैवाकर्तव्यत्वोपदेशादिति संबंधः॥ यत्तु विदुषः शारीरस्थितिनिमित्तकर्माभ्यनुज्ञानेन तस्मिन्कर्तृत्वाभिमानोऽपि स्यादिति तत्राह॥ × अ० ११८॥

ते॥ आत्मयाथात्म्यविदस्तेष्वपि नाहं करोमीति प्रत्ययस्य
वा किंचित्करोमीत्यादौ चाकर्तव्यत्वोपदेशान्न कर्तृत्वाभिमानसंभा
वनेत्यर्थः॥

यथोक्तोपदेशानुसंधानाभावेविदुषोपिकरोमीतिस्वाभाविकप्रत्ययद्वाराकर्मयोगःस्यादित्याशंक्याह ।। आत्मनत्वेनिपद्युपिविद्वान्यथोक्तमुपदेशंकदाचिन्नानुसंधत्तेतथापितत्वविद्याविरोधान्मिथ्याज्ञानंतन्निमित्तंकर्मवातस्यसंभावयितुमशक्यमित्यर्थंआत्मवित्कर्तृकयोःसंन्यासकर्मयोगयोरँगानयोर्निःश्रेयसकरत्वमन्यतरस्यचविशिष्टत्वमित्येतदयुक्तमितिसिद्धत्वाद्द्वितीयंपक्षमंगीकरोति ।। यस्मादित्यादिना ।। तदीयाच्चकर्मसंन्यासात्कर्मयोगस्यविशिष्टत्वाभिधानमितिसंबंधः ।। ननुकर्मयोगेनशुद्धबुद्धेःसंन्यासोजायमानस्तस्मादुत्कृष्यतेकथंतस्मात्कर्मयोगस्योत्कृष्टत्ववाचोयुक्तिर्युक्तेतितत्राह । पूर्वोक्तेति ।। वैल

आत्मतत्त्वविदःसम्यग्दर्शनविरुद्धोमिथ्याज्ञानहेतुकःकर्मयोगःस्वप्नेपिनसंभावयितुंशक्यतेयस्मात्तस्मादनात्मवित्कर्तृकयोरेवसंन्यासकर्मयोगयोर्निःश्रेयसकरत्ववचनंतदीयाच्चकर्मसंन्यासात्पूर्वोक्तात्मवित्कर्तृकसर्वकर्मसंन्यासविलक्षणात्सत्येवकर्तृत्वविज्ञानेकर्मैकदेशविषयाद्यमनियमादिसहितत्वेनचदुरनुष्ठेयात् ।। ।।श्रीरामायनमः ।।

क्षण्यमेवस्पष्टयति ।। सत्येवेति ।। स्वाश्रमविहितश्रवणादौकर्तृत्वविज्ञानेसत्येवपूर्वाश्रमोपात्तकर्मैकदेशविषयसंन्यासात्कर्मयोगस्यश्रेयस्त्ववचनंनैतादृशंब्राह्मणस्यास्तिवित्तमित्यादिस्मृतिविरुद्धमित्याशंक्याह ।। यमनियमादीति ।। आनृशंस्यंक्षमासत्यमहिंसादमआर्जवंप्रीतिःप्रसादोमाधुर्यमक्रोधश्चयमादश । दानमिज्यातपोध्यानंस्वाध्यायोपस्थनिग्रहौ । व्रतोपवासौमौनंचस्नानंचनियमादशेत्युक्ते र्थं

।। यमनियमैरन्यैश्चाश्रमधर्मैर्विशिष्टत्वेनानुष्ठातुमशक्यताउक्तसंन्यासात्कर्मयोगस्यविशिष्टत्वोक्तिर्युक्तेत्यर्थः ।।

नहि कश्चिदिति न्यायेन कर्मयोगस्येतरापेक्षया सुकरत्वाच्च तस्य विशिष्टत्ववचनं श्रेष्ठमित्याह ॥ सुकरत्वेन चेति ॥ प्रतिवचनस्यार्थालोचनतः सिद्धमर्थमुपसंहरति ॥ इत्येवमिति ॥ संन्यासकर्मयोगयोरुक्तयोर्मिथो विरुद्धयोः समुच्चित्यानुष्ठानुमशक्ययोरन्यतरस्य कर्तव्यत्वे प्रशस्यतरस्य तद्भावात्तद्भावस्य चानिर्धारितत्वात्तन्निर्दिधारयिषया मप्रश्नः स्यादिति प्रश्नवाक्यार्थपर्यालोचनया प्रष्टुरभिप्रायो यथा पूर्वमुपदिष्टस्तथा प्रतिवचनार्थनिरूपणेनापि तस्य निश्चितत्वात्प्रश्नोपपत्तिः

सुकरत्वेन च कर्मयोगस्य विशिष्टत्वाभिधानमित्येवं प्रतिवचनवाक्यार्थनिरूपणेनापि प्रष्टुरभिप्रायो निश्चीयत इति स्थितं ज्यायसी चेत्कर्मणस्तरत्वज्ञानकर्मणोः सहासंभवे यच्छ्रेय एतयोस्तन्मे ब्रूहीत्येवं पृष्टोऽर्जुनेन भगवान् ज्ञानयोगेन सांख्यानां निष्ठा कर्मयोगेन योगिनां निष्ठा प्रोक्तेति निर्णयं चकार न च संन्यसनादेव केवलात्सिद्धिं समधिगच्छतीति वचनात् ज्ञानसहितस्य तस्य सिद्धिसाधनत्वमिष्टं कर्मयोगस्य च विधानात् ॥

सिद्धेत्यर्थः ननु तृतीये यथोक्तप्रश्नस्य भगवता निर्णीतत्वान्नात्र प्रतिवचनयोः सावकाशत्वमित्याशंक्य विस्तरेणोक्तमेव संबंधं पुनः संक्षेपतो दर्शयति ॥ ज्यायसी चेदिति ॥ सांख्ययोगयोर्भिन्नपुरुषानुष्ठेयत्वेन निर्णीतत्वाच्च पुनः प्रश्नयोग्यत्वमित्यर्थः ॥ इतोऽपि तयोर्न प्रश्नविषयत्वमित्याह ॥ न चेति ॥ एवकारविशेषणात् ज्ञानसहितसंन्यासस्य सिद्धिसाधनत्वं भगवतोऽभिमतं ॥ छित्त्वैनं संशयं योगमातिष्ठेति च कर्मयोगस्य विधानात्तस्यापि सिद्धिसाधनत्वमिष्टं ततश्च निर्णीतत्वान्न प्रश्नस्तद्विषयः सिध्यतीत्यर्थः ॥

प्रश्न

केनाभिप्रायेण तर्हि प्रश्नः स्यादित्याशंक्य ज्ञानरहितस्य संन्यासात्कर्मयोगस्य प्रशस्यतरत्वबुभुत्सयेत्याह। ज्ञानरहित इति। प्रष्टु
रभिप्रायमेवं प्रदर्श्य प्रश्नोपपत्तिमुक्त्वा प्रश्नमुत्थापयति। संन्यासमिति। तर्हि द्वयं त्वयानुष्ठेयमित्याशंक्य तदशक्तेरुक्तत्वात्प्र
शस्यतरस्यानुष्ठानार्थं तदिदमिति निश्चितं वक्तव्यमित्याह। यच्छ्रेय इति॥ काम्यानां प्रतिषिद्धानां च कर्मणां परित्यागो मयोच्यते
रो न सर्वेषामित्याशंक्य कर्मण्यकर्मेत्यादौ विषदर्शनान्नैवमित्याह॥ शास्त्रीयाणामिति॥ अस्तु तर्हि। शास्त्रीयाशास्त्रीययोरशे

ज्ञानरहितः संन्यासः श्रेयान्किं वा कर्मयोगः श्रेयानित्येतयोर्विशेषबुभुत्सया॥ अर्जुन उवाच॥ संन्यासं कर्मणां
कृष्ण पुनर्योगं च शंससि॥ यच्छ्रेय एतयोरेकं तन्मे ब्रूहि सुनिश्चितं॥१॥ संन्यासं परित्यागं कर्मणां शास्त्रीयाणा
मनुष्ठानविशेषाणां शंससि प्रशंससि कथयसि इत्येतत् पुनर्योगं च तेषामेवानुष्ठानमवश्यं कर्तव्यत्वं शंससि।
अतो मे कतरत् श्रेय इति संशयः॥ किं कर्मानुष्ठानं श्रेयः किं वा त[illegible]ध्यानमिति प्रशस्यतरं चानुष्ठेयमतश्च यच्छ्रेयः प्रशस्यतरमे
तयोः कर्मसंन्यासकर्मानुष्ठानयोर्यदनुष्ठानाच्छ्रेयोऽवाप्तिर्मम स्यादिति मन्यसे तदेकमन्यतरं ब्रूहि॥१॥ श्रीरामः

षयोरपि कर्मणोस्त्यागो नेत्याह॥ पुनरिति॥ तर्हि कर्मत्यागस्तद्योगश्चेत्युभयमादर्तव्यमित्याशंक्य विरोधान्नैवमित्यभिप्रेत्याह॥
भन इति॥ द्वयोरेकेनानुष्ठानायोगस्योक्तत्वात्कर्मव्यवस्थोक्तेश्च संशयो जायते तेनमेव संशयं विशदयसि॥ किं कर्मेति॥ प्रशस्यतर
भ्यत्साकिमर्थमित्याशंक्याह॥ प्रशस्यतरं चेति। तस्यैवानुष्ठेयत्वे प्रश्नस्य सावकाशत्वमाह। अतश्चेति। तदेव प्रशस्यतरं विशिनष्टि[illegible]
ष्ठानादिति॥ तदेकमन्यतरमेव ब्रूहीति संबंधः॥
रे

उभयोरुक्तत्वे सति किमित्येकं वक्तुमिति निपृच्छ्यनेनत्राह ।। सहेति ।। कर्मत्यागयोर्मिथो विरोधादित्यर्थः ।। १ ।। अत्रमेदमुख्याप्य प्रतिवचन
मन्यत्रपृतिस्याभिप्रायमिति ।। निर्णयायनद्वारे ऽपरस्परसंशयनिवृत्त्यर्थमित्यर्थः ।। एवं प्रश्ने प्रवचने कर्मयोगस्य सौकार्यमभिप्रेत्य प्रश
स्त्वमभिधित्सुर्भगवान्प्रतिवचनं किमुक्तवानित्याशंक्याह ।। संन्यासइति ।। उभयोरपि तुल्यत्वशंकां वारयति ।। तयोस्त्विति ।।
ननु तर्हि ज्ञानस्यैव मोक्षोपायत्वं विवक्ष्यनेनत्राह ।। ज्ञानोत्पत्तीति ।। तर्हि द्वयोरपि प्रशस्यत्वमप्रशस्यत्वं वा तुल्यमित्याशंक्याह ।।
उभाविति ।। ज्ञानसहायस्य कर्मसंन्यासस्य कर्मयोगापेक्षया विशिष्टत्वविवक्षया विशिनष्टि ।। केवलादिति ।। २ ।। कर्म हि बंधका

सहैकपुरुषानुष्ठेयत्वासंभवान्मे ब्रूहि सुनिश्चितं अभिप्रेतं न वेति ।। स्वाभिप्रायमाचक्षाणो निर्णयाय ।। श्रीभगवानुवाच
संन्यासः कर्मयोगश्च निःश्रेयसकरावुभौ ।। तयोस्तु कर्मसंन्यासात्कर्मयोगो विशिष्यते ।। २ ।। संन्यासः कर्मणां परित्यागः
कर्मयोगश्च तेषामनुष्ठानं ताबुभावपि निःश्रेयसकरौ मोक्षं कुर्वाते ।। ज्ञानोत्पत्तिहेतुत्वेन ।। उभौ यद्यपि निःश्रेयसक
रौ तयोस्तु निःश्रेयसहेत्वोः कर्मसंन्यासात् केवलात्कर्मयोगो विशिष्यते इति कर्मयोगं स्तौति ।। कस्मादित्याह ।। ज्ञेयः ।।
।। स नित्यसंन्यासी यो न द्वेष्टि न कांक्षति ।। निर्द्वंद्वो हि महाबाहो सुखं बंधात्प्रमुच्यते ।। ३ ।।

रणं प्रसिद्धं तत्कथं निःश्रेयसकरं स्यादिति शंकते ।। कस्मादिति ।। अकर्त्रात्मविज्ञानात्प्रागपि सर्वदासौ संन्यासी ज्ञेयो यो रागद्वेषौ क
चिदपि न करोतीत्याह ।। इत्याहेति ।। यथाननुष्ठीयमानानि कर्माणि संन्यासिनं न निबध्नंति कृतानि च वैराग्येंद्रियसंयमा
दि निवर्त्यंते तथैवानभिसंधितफलानि नित्यनैमित्तिकानि योगिनमपि न निबध्नंति निवर्त्यंति च संचितं दुरितमित्यभि
।। प्रेत्याह ।। निर्द्वंद्वो हीति ।। ५ ।। ० ।। ५ ।।

कर्मयोगिनोनित्यसंन्यासित्वज्ञानमन्यथाज्ञानंतुमिथ्याज्ञानमित्याशंक्याह ।। एवंविधइति ।। कर्मणोपिरागद्वेषाभावेनसं-
न्यासित्वंज्ञातुमुचितमित्यर्थः रागद्वेषरहितस्यानायासेनबंधप्रध्वंससिद्धेश्चयुक्तंतस्यसंन्यासित्वमित्याह ।। निर्द्वंद्वइति ।। ३ ।। यदुक्तंसंन्या-
योगयोर्निःश्रेयसकरत्वंतदाक्षिपति ।। संन्यासेति ।। तत्रोत्तरत्वेनोत्तरश्लोकमवतारयति ।। इतिप्राप्तइति ।। विवेकवंतस्त-
दंगीत्याकांक्षायामाह ।। एकमिति ।। संख्यामात्मसमीक्षामर्हतीतिसांख्यंसंन्यासोयोगस्तुकर्मयोगस्तावुभावपिपृथग् ।।

ज्ञेयोज्ञातव्यः सकर्मयोगोनित्यसंन्यासीति ।। योनद्वेष्टिकिंचित्नकांक्षति । दुखसुखेतत्साधनेचैवंविधोयः कर्मणिचप्र-
वर्तमानोऽपिसनित्यसंन्यासीतिज्ञातव्यइत्यर्थः ।। निर्द्वंद्वोद्वंद्वविवर्जितोहियस्मात् महाबाहोसुखंअनायासेनबंधात्प्र-
मुच्यते ।। संन्यासकर्मयोगयोर्भिन्नपुरुषानुष्ठेययोर्विरुद्धयोःफलेपिविरोधोयुक्तोनपुनरुभयोर्निःश्रेयसकरण-
त्वमेवेतिप्राप्तेइदमुच्यते ।। ४ ।। सांख्ययोगौपृथग्बालाः प्रवदंतिनपंडिताः ।। एकमप्यास्थितः सम्यगुभयोर्विंदतेफलं ।। ४ ।।
सांख्ययोगौपृथक्विरुद्धभिन्नफलौबालाः प्रवदंतिनपंडिताः ।। पंडितास्तुज्ञानिनः ।। एकंफलमविरुद्धमिच्छंति । कथंए-
कमपिसांख्ययोगयोः सम्यगास्थितः सम्यगनुष्ठितवानित्यर्थः उभयोर्विंदतेफलं उभयोस्तदेवहिनिःश्रेयसंफलमतो
।। नफलेविरोधः ।

र्थमाह ।। विरुद्धेति ।। शास्त्रार्थविवेकशून्यत्वंबालत्वं उत्तरार्धमवतारयितुंभूमिकांकरोति ।। पंडितास्त्विति ।। ज्ञानिनोयोगिनश्चेतिशेषः
द्वयोर्विरुद्धफलत्वमेवप्रश्नपूर्वकंप्रकटयति ।। कथमित्यादिना ।। एकंसाधनमनुष्ठितवतोद्वयोरपिफलंभवतीतिविरुद्धमित्या-
शंक्याह ।। उभयोरिति ।। सांख्ययोगयोः संन्यासकर्मानुष्ठानयोस्तत्त्वज्ञानद्वारानिःश्रेयसफलत्वान्नविरुद्धफलत्वशंके-
।।त्यर्थः ।। ४ ।।

गी०टी० सांख्ययोगयोरेकफलत्ववचनं प्रकरणाननुगुणं इति शंकते ॥ नन्विति ॥ अप्रकृतत्वमसिद्धमिति परिहरति ॥ नैष दोष इति ॥ संन्यासं क
मित्यादिना संन्यासं कर्मयोगं चांगीकृत्य प्रश्ने संन्यासः कर्मयोगश्चेत्यादिना तथैव प्रतिवचने च कथं सांख्ययोगयोरेकफलत्व
॥ कृतं न भवतीत्युच्यते तत्राह ॥ यद्यपीति ॥ तदपरित्यागेनेत्यत्र ॥ प्रतिवचनमपि तदनुरूपमेव भगवता निरूपितमिति विशेषानु
पत्तिरित्याशंक्याह ॥ भगवांस्त्विति ॥ तदपरित्यागेनेत्यत्र तत्पदेन प्रष्टा प्रतिनिर्दिष्टौ कर्मसंन्यासकर्मयोगावुच्येते ॥ सांख्ययो
॥ विति शब्दांतरवाच्ययोरेव संन्यासकर्मयोगयोरत्यागेन स्वाभिप्रेतं च विशेषं संयोज्य भगवानत्र प्रतिवचनं ददावि

ननु संन्यासं कर्मयोगशब्देन प्रस्तुत्य सांख्ययोगयोः फलैकत्वं कथमिहाप्रकृतं ब्रवीति ॥ नैष दोषः यद्यप्यर्जुनेन
संन्यासं कर्मयोगं च केवलमभिप्रेत्य प्रश्नः कृतो भगवांस्तु तदपरित्यागेनैव स्वाभिप्रेतं च विशेषं योज्य श
ब्दांतरवाच्यतया प्रतिवचनं ददौ सांख्ययोगाविति तावेव संन्यासकर्मयोगौ ज्ञानतदुपायसमबुद्धित्वादि ॥
संयुक्तौ सांख्ययोगशब्दवाच्याविति भगवतो मतमतो नाप्रकृतप्रक्रियेति ॥४॥ एकस्यापि सम्यगनुष्ठाना
॥ त्कथमुभयोः फलं विंदत इत्युच्यते ॥५॥

तियोजनापदुक्तं स्वाभिप्रेतं च विशेषं संयोज्येति तदेव व्यक्तीकरोति ॥ तावेवेति ॥ समबुद्धित्वादीत्यादीशब्देन ज्ञानोपाय
भूतः शमादिराद्रियते ॥ प्रकृतयोरेव च संन्यासकर्मयोगयोरुपादाने फलितमाह ॥ अत इति ॥ सांख्ययोगावि
त्यादिश्लोकव्याख्यानसमाप्तिरितिशब्दार्थः ॥४॥ प्रश्नपूर्वकं श्लोकांतरमवतारयति ॥ एकस्यापीति ॥५ अ० ध्याम
१२१॥

केचिदेवनयोरेकफलत्वं पश्यंतीत्याशंक्य तेषामेव सम्यग्दर्शित्वं नेतरेषामित्याह ॥ एकमिति ॥ तिष्ठत्यस्मिन्नच्यवते परं न द्वितिष्युसत्तिमा
श्रित्याह । मोक्षाख्यमिति ॥ योगशब्दार्थमाह ॥ ज्ञानप्राप्तिरिति ॥ ये हि जिज्ञासवः सर्वाणि कर्माणि भगवत्प्रीत्यर्थत्वेन तु तेषां फला॰
भिलाषमकृत्वा ज्ञानप्राप्तौ बुद्धिद्वारेणोपायत्वेनानुतिष्ठंति तेऽत्र योगा विवक्ष्यंते ॥ अप्रस्ययस्य मत्वर्थत्वे गृहीत्वोक्तेः ॥ योगि
न इति ॥ सर्वोपि द्वैतप्रपंचो न वस्तु भ्रांतो मायाविलासत्वादात्मा त्वविक्रियोऽद्वितीयो वस्तु सन्निति प्रयोजकं ज्ञानं परमात्मज्ञानं तत्पू
र्वकसंन्यासद्वारेण कर्मिभिरपि तदेव स्थानं प्राप्यमित्येकफलत्वं संन्यासकर्मयोगयोरविरुद्धमित्याह ॥ तैरपीति ॥ फलैकत्वे =
फलितमाह ॥ अतइति ॥ ५ ॥ यदि यथोक्तज्ञानपूर्वकसंन्यासद्वारा कर्मिणामपि श्रेयोवाप्तिरिष्टा तर्हि संन्यासस्यैव श्रेयस्त्वं प्राप्तमिति

यत्सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते ॥ एकं सांख्यं च योगं च यः पश्यति स पश्यति ॥ ५ ॥ यत्सांख्यैर्ज्ञाननिष्ठैः संन्यासिभिः प्राप्य
ते स्थानं मोक्षाख्यं तद्योगैरपि ज्ञानप्राप्त्युपायत्वेनेश्वरे समर्प्य कर्माण्यात्मनः फलमनभिसंधायानुतिष्ठंति ये ते योगिनस्तैरपि प
रमार्थज्ञानसंन्यासप्राप्तिद्वारेण गम्यत इत्यभिप्रायः ॥ अत एकं सांख्यं च योगं च यः पश्यति स पश्यति ॥ फलैकत्वात्सम्यक्पश्य
तीत्यर्थः ॥ एवं तर्हि कर्मयोगात्संन्यास एव विशिष्यते कथं तर्हीदमुक्तं तयोस्तु कर्मसंन्यासात्कर्मयोगो विशिष्यत इति ॥ शृणु
तत्र कारणं ॥ त्वया पृष्टं केवलं कर्मसंन्यासं कर्मयोगं चाभिप्रेत्य तयोरन्यतरः कः श्रेयान् ॥ श्रीराम श्रीराम श्रीराम ॥ ०॥

चोदयति ॥ एवं तर्हीति संन्यासस्य श्रेष्ठत्वे कर्मयोगस्य प्रशस्तत्ववचनमनुचितमित्याह ॥ कथं तर्हीति ॥ पूर्वोक्तमेवाभिप्रायं स्मार
यन्परिहरति ॥ शृण्विति ॥ कर्मयोगस्य विशिष्टत्ववचनं तत्रेति परामृष्टं तदेव कारणं कथयति ॥ त्वयेत्यादिना ॥ केवलं वि-
नासहितमितियावत् ॥ तयोरन्यतरः ॥ कः श्रेयानितीति शब्दोध्याहर्तव्यः ॥ तृतीयं प्रश्नमनुसृत्य तदनुगुणं प्रतिव
गानमनपेक्ष्य तद्रहितत्वात्केवलादेव संन्यासाद्योगस्य विशिष्टत्वं मयोक्तमित्याह ॥ तदनुरूपमिति ॥ ज्ञानापेक्षः संन्यासस्तु

गी०टी०
॥
३५॥

रशाःस्याशंक्याह॥ ज्ञानेति॥ तर्हि कर्मयोगे कथं योगशब्दः संन्यासशब्दो वा प्रयुज्यते तत्राह॥ यस्त्विति॥ तादर्थ्यात्परमार्थज्ञानशेषत्वा०
ति॥ दत्॥ नदेवुतादर्थ्यं प्रश्नपूर्वकं प्रसाधयति॥ कथमित्यादिना॥ कर्मानुष्ठानाभावे बुद्धिशुद्ध्यभावात्परमार्थसंन्यासस्य सम्यग्ज्ञाना
नप्राप्तिरिति रेकमुपन्यस्य अन्वयमुपन्यस्यति अन्वयमुपन्यस्यंति॥ योगेति॥ पारमार्थिकः सम्यग्ज्ञानात्मकः सामग्र्यभावे का
र्थमिरयुक्तेति मत्वाह॥ दुःखमिति योगयुक्तत्वं व्याचष्टे॥ वैदिकेनेति॥ ईश्वरस्वरूपस्य सविशेषस्येति शेषः ब्रह्मेति॥ व्या

तदैनुरूपं प्रतिवचनं मयोक्तं कर्मसंन्यासात्कर्मयोगो विशिष्यत इति ज्ञानमनपेक्ष्य ज्ञानसव्यपेक्षस्तु संन्यासः सांख्यमि
ति ममाभिप्रेतः॥ परमार्थयोगश्च स एव॥५॥ यस्तु कर्मयोगो वैदिकः स तादर्थ्यात् योगः संन्यास इति चोपचर्यते॥
कथं तादर्थ्यमित्युच्यते॥ संन्यासस्तु महाबाहो दुःखमाप्तुमयोगतः॥ योगयुक्तो मुनिर्ब्रह्म नचिरेणाधि॥
गच्छति॥६॥ संन्यासस्तु पारमार्थिको दुःखमाप्तुमयोगतः॥ योगेन विना योगयुक्तो वैदिकेन कर्मयोगेन॥
ईश्वरसमर्पितरूपेण फलनिरपेक्षेण युक्तो मननादीश्वरस्वरूपस्य मुनिर्ब्रह्म परमात्मज्ञानलक्षणत्वात् प्रकृतः
॥५॥ संन्यासो ब्रह्मोच्यते॥ न्यास इति ब्रह्म ब्रह्मा हि पर इति श्रुतेः॥

व्याख्येयं पदमुपादाय व्याचष्टे॥ प्रकृत इति॥ तत्र ब्रह्मशब्दप्रयोगे हेतुमाह॥ परमात्मेति॥ लक्षणशब्दो गमकविषयः संन्यासे ब्रह्म
शब्दप्रयोगे तैत्तिरीयकश्रुतिं प्रमाणयति॥ न्यास इति॥ कथं संन्यासे हिरण्यगर्भवाची ब्रह्मशब्दः प्रयुज्यते द्वयोरपि पर
॥ त्वाविशेषादित्याह॥ ब्रह्माहीति॥

अ० १३२॥
राम०

यं ब्रह्मशब्दस्य संन्यासविषयत्वे फलितं वाक्यार्थमाह ॥ ब्रह्मेत्यादिना ॥ नद्याः स्रोतांसीव निम्नप्रवणानि कर्मभिरन्तरां परिपक्वकषायस्य करणानि सर्वतो व्यावृत्तानि निरस्ताशेषविशेषकूटस्थप्रत्यगात्मान्वेषणप्रवणानि भवंतीति कर्मयोगस्य परमार्थसंन्यासप्राप्त्युपायत्वे फलितमाह ॥ अनतरेति ॥६॥ ननु पारिव्राज्यं परिगृह्य श्रवणादिसाधनमसकृदनुतिष्ठतो लब्धसम्यग्बोधस्यापि यथापूर्वं कर्माण्युपलभ्यंते तानि च बंधहेतवो भविष्यंतीत्याशंक्य श्लोकांतरमवतारयति ॥ यदा पुनरिति ॥ सम्यग्दर्शनप्राप्त्युपायत्वेन यदा पुनरेष पुरुषो योगयुक्तत्वादिविशेषणः सम्यग्दर्शी संपद्यते तदा प्रातिभासिकीं वृत्तिमनुसृत्य कुर्वन्नपि न लिप्यत इति योजना योगे

ब्रह्म परमार्थसंन्यासं परमात्मज्ञाननिष्ठालक्षणं नचिरेण क्षिप्रमेवाधिगच्छति प्राप्नोत्यतो मयोक्तं सैर्वं कर्मयोगो विशिष्यत इति ॥६॥ यदा पुनरयं सम्यग्दर्शनप्राप्त्युपायत्वेन ॥ योगयुक्तो विशुद्धात्मा विजितात्मा जितेंद्रियः ॥ सर्वभूतात्मभूतात्मा कुर्वन्नपि न लिप्यते ॥७॥ योगेन युक्तो योगयुक्तो विशुद्धात्मा विशुद्धसत्वो विजितात्मा विजितदेहो जितेंद्रियश्च सर्वभूतात्मभूतात्मा सर्वेषां भूतानां ब्रह्मादीनां स्तंबपर्यंतानां भूतानामात्मभूत आत्मा प्रत्यक्चेतनो यस्य स सर्वभूतात्मभूतात्मा सम्यग्दर्शीत्यर्थः स तत्रैवं वर्तमानोपि लोकसंग्रहाय कुर्वन्नपि न लिप्यते योगेन युक्तो न कर्मभिर्बध्यत इत्यर्थः ॥७॥

न नित्यनैमित्तिककर्मानुष्ठानेनेति यावत् ॥ आदौ नित्याद्यनुष्ठानवतो रजस्तमोमलाभ्यामकलुषितं सत्वं सिध्यतीत्याह ॥ विशुद्धेति ॥ दिशुद्धौ कार्यकरणसंघातस्यापि स्वाधीनत्वं भवतीत्याह ॥ विजितेति ॥ तस्य यथोक्तविशेषणवतो जायते सम्यग्दर्शित्वमित्याह सर्वभूतेति ॥ सम्यग्दर्शिनस्तर्हि कर्मानुष्ठानं कुतस्तदनुष्ठाने वा कुतो बंधविश्लेषसिद्धिरित्याशंक्याह ॥ स तत्रेति ॥ सम्यग्दर्शी
॥ नं सन्नित्यर्थः ॥७॥

०टी०॥

इयंगीकृत्यतैरस्यविदुषोबंधोनास्तीत्युक्तं॥इदानींवस्तुतस्तस्यकर्मलेपोवनसंतीत्याह॥नचेति॥लोकदृष्ट्याविदुषोपिकर्मा
णीत्याशंक्यस्वदृष्ट्यातदभावमभिप्रेत्याह॥नैवेति॥सार्द्धमनंतरश्लोकमाकांक्षापूर्वकमुत्थापयति॥कुदेत्या
ना॥चक्षुरादिज्ञानेंद्रियैर्वागादिकर्मेंद्रियैःप्राणादिवायुभेदैरंतःकरणचतुष्टयेनचतत्तच्चेष्टानिर्वर्तनावस्थायांतत्त
र्थेषुसर्वप्रवृत्तिरिंद्रियादीनामेवेत्यनुसंदधानोनैवकिंचित्करोमीतिविद्वान्प्रतिपद्येतेत्यर्थः॥यथोक्तस्यविदुषोवि०

नचासौपरमार्थतःकरोतीत्यतः॥नैवकिंचित्करोमीतियुक्तोमन्येत॰तत्त्ववित्नैवकिंचित्करोमीति॥युक्तःसमा
हितःसन्मन्येतचिंतयेत्तत्त्वविदात्मनोयाथात्म्यंतत्त्वंवेत्तीतितत्त्ववित्परमार्थदर्शीत्यर्थः॥क दाकथंवातत्त्वमव
धारयन्मन्येतेत्युच्यते॥पश्यन्शृण्वन्स्पृशन्जिघ्रन्नश्नन्गच्छन्स्वपन्श्वसन्॥८॥प्रलपन्विसृजन्गृह्णन्नु
न्मिषन्निमिषन्नपि॥इंद्रियाणींद्रियार्थेषुवर्तंतइतिधारयन्॥९॥मन्येतेतिपूर्वेणसंबंधः॥यस्यैवंतत्त्वविदःसर्वका
र्यकरणचेष्टासुकर्मस्वकर्मैवपश्यतःसम्यग्दर्शिनस्तस्यसर्वकर्मसंन्यासएवाधिकारःकर्मणोऽभावदर्शनात्॥
नहिमृगतृष्णिकायामुदकबुद्ध्यापानायप्रवृत्तउदकाभावज्ञानेऽपितत्रैवपानप्रयोजनायप्रवर्तते॥यस्तुपुनर
॥तत्त्ववित्प्रवर्तनस्यकर्मयोगे॥
ध्यभावेपिविद्यासामर्थ्यात्प्रतिपत्तिकर्मभूतंकर्मसंन्यासंफलात्मकमभिलषति॥तस्येति॥अज्ञस्येवविदुषोपिकर्मसुप्रवृत्तिसंभवात्॰
कुतःसंन्यासेधिकारःस्यादित्याशंक्याह॥नहीति॥५॥तर्हिचिद्वानिवाऽविद्वानपिकर्मणिनप्रवर्तेतपापोपहतिसंभवादित्याशंक्याह॥
पस्त्विति॥यथाभृत्यःस्वाम्यर्थंकर्माणिकरोतिनफलमपेक्षतेतथैवयोविद्वान्मोक्षेपिसंगंत्यक्त्वाभगवदर्थमेवसर्वाणिकर्माणि
करोतिनसकर्मणाबध्यतेनहिपद्मपत्रमंभसाबध्यतेतद्वदित्यर्थः॥५॥ ॥ ॥ ॥ ॥॰

अ०॥राम॥
१२३॥

।श्रि

अविदुषस्तर्हिषस्तर्हि कृतेन कर्मणा किं स्यादित्याशंक्याह ॥ केवलैरिति ॥ १० ॥ अतस्येश्वरार्पणबुध्यानुष्ठितं कर्म बुद्धिशुद्धिफलमत्रैव हेतुमाह ॥ यस्मा
दिति ॥ केवलशब्दस्य प्रत्येकं संबंधे प्रयोजनमाह ॥ सर्वव्यापारेष्विति ॥ कर्मणश्चित्तशुद्धिफलत्वे तादर्थ्येन कर्मानुष्ठानमेवनव कर्तव्यमिति ॥ ११ ॥
यस्मादित्यस्यापेक्षितं वदन्फलितमाह ॥ तस्मादिति ॥ १० ॥ अथ संगं त्यक्त्वा कर्मानुष्ठानं ॥ त्वया कर्तव्यमित्याह ॥ यस्माच्चेति ॥ युक्तः सन्फलं त्य

ब्रह्मण्याधाय कर्माणि संगं त्यक्त्वा करोति यः ॥ लिप्यते न स पापेन पद्मपत्रमिवांभसा ॥ १० ॥ ब्रह्मणि ईश्वरे आधाय निक्षिप्य तदर्थं
करोमीति भृत्यस इव स्वाम्यर्थं सर्वाणि कर्माणि मोक्षेपि फले संगं त्यक्त्वा संगं करोति यः सर्वकर्माणि लिप्यते न स पापेन संबध्यते पद्मपत्रमि
वांभसा उदकेन ॥ केवलं सत्त्वशुद्धिमात्रफलमेव स्यात् ॥ यस्मात् ॥ कायेन मनसा बुध्या केवलैरिंद्रियैरपि योगिनः कर्म कुर्वंति संगं
त्यक्त्वात्मशुद्धये ॥ ११ ॥ कायेन देहेन मनसा बुध्या च केवलैर्ममत्ववर्जितैरीश्वरायैव करोमि न मम फलायेति ममत्वबुद्धिशू
न्यैरिंद्रियैरपि केवलशब्दः कायादिभिरपि प्रत्येकं संबध्यते ॥ सर्वव्यापारेषु ममतावर्जिता ये योगिनः कर्मिणः कर्म कुर्वं
ति संगं त्यक्त्वा फलविषयमात्मशुद्धये सत्त्वशुद्धये इत्यर्थः ॥ ११ ॥ तस्मात्तवैव तवाधिकार इति कुरु कर्मैव यस्माच्च ॥ युक्तः कर्मफलं
त्यक्त्वा शांतिमाप्नोति नैष्ठिकीं ॥ अयुक्तः कामकारेण फले सक्तो निबध्यते ॥ १२ ॥ युक्त ईश्वराय कर्माणि न मम फलाये
त्येवं समाहितः सन् कर्मफलं त्यक्त्वा परित्यज्य शांतिं मोक्षाख्यामाप्नोति नैष्ठिकीं निष्ठायां भवां सत्वशुद्धिज्ञानप्राप्ति

॥ सर्वकर्मसंन्यासज्ञाननिष्ठाः क्रमेणेति वाक्यशेषः ॥

भ

२

त्वा कर्म कुर्वन्मोक्षाख्यां शांतिं यस्मादाप्नोति तस्माच्च त्वया संगं त्यक्त्वा कर्म कुर्वन्मोक्षाख्यां शांतिं यस्मादाप्नोति तस्मात्त्वं यसंगं
ना कर्म कर्तव्यमिति नियोजनाविपक्षे दोषमाह ॥ अयुक्त इति ॥ युक्ते तं व्याकरोति ॥ ईश्वरायेति ॥ फलं परित्यज्य कर्म कुर्व
ोषं नैष्ठिकीं शांतिरित्येतदेव विशदयति ॥ सत्वेति द्वितीयमर्द्धं विभजते ॥ यस्त्विति ॥ असमाधाने दोषादर्जुनस्य नियोगं
य ॥ अतस्त्वमिति ॥ १२ ॥ तर्हि फले सक्तिं त्यक्त्वा सर्वैरपि कर्म कर्तव्यमिति कर्मसंन्यासस्य निरवकाशत्वमित्याशंक्याविदुषः

टी०॥ सन्न्यासाद्विदुषो विशेषं दर्शयति॥ यस्त्विति॥ सर्वकर्मपरित्यागे प्राप्तं तन्मरणं व्यावर्तयति आस्त इति॥ इति त्वभमाभोपि शरीरतापेनाध्या०
॥ [illegible]दिना तप्यमानस्तिष्ठतीति चेन्नेत्याह॥ सुखमिति॥ कार्यकरणसंघातपारवश्यं पर्युदस्यति॥ वशीति॥ आसनस्यापेक्षितमधिकर
[illegible]र्दिशति॥ नवेति॥ देहसंबंधाभिमानाभासत्वमाह॥ देहीति॥ मनसा सर्वकर्मसंन्यासेपि लोकसंग्रहार्थं बहिः सर्वकर्मकर्तृत्वमि

यस्तु पुनरयुक्तोऽसमाहितः कामकारेण करणं कारः कामस्य कारः कामकारस्तेन कामकारेण कामप्रेरिततयेत्यर्थः मम फलायेदमहं करो
मि कर्मेत्येवं फले सक्तो निबध्यते॥ अतस्त्वं युक्तो भवेत्यर्थः॥ यस्तु परमार्थदर्शी सः॥ सर्वकर्माणि मनसा संन्यस्यास्ते सुखं वशी॥ नवद्वा
रे पुरे देही नैव कुर्वन्न कारयन्॥१३॥ सर्वाणि कर्माणि सर्वकर्माणि संन्यस्य परित्यज्य नित्यं नैमित्तिकं काम्यं प्रतिषिद्धं च सर्वा
णि कर्माणि तानि मनसा विवेकबुद्ध्या कर्मादावकर्मदर्शनेन संन्यस्य परित्यज्येत्यर्थः॥ आस्ते तिष्ठति सुखं त्यक्तवाङ्मनःका
यचेष्टो निरायासः प्रसन्नचित्तः आत्मनोऽन्यत्र निवृत्तबाह्यसर्वप्रयोजन इति सुखमास्त इत्युच्यते। वशी जितेन्द्रिय इत्यर्थः॥ क्वास्त इत्याह।
॥ नवद्वारे सप्तशीर्षण्यान्यात्मन उपलब्धिद्वाराणि॥

ति प्राप्तं प्रत्याह॥ नैवेति॥ तान्येव च सर्वाणि कर्माणि परित्याज्यानि विशिनष्टि॥ नित्यमिति॥ तेषां परित्यागे हेतुमाह॥ तानीति॥ यदुक्तं सुखमास्त-
इति तदुपपादयति॥ सत्केति जितेन्द्रियत्वं कायवशीकारस्याप्युपलक्षणं॥ द्वे श्रोत्रे द्वे चक्षुषी द्वे नासिके वागेकेति सप्तशीर्षण्यानि शिरोगतानि श
द्वाध उपलब्धिद्वाराणि॥ तथापि कथं नवद्वारत्वं अधोगताभ्यां पायूपस्थाभ्यां सहेत्याह॥ अवागिति॥ शारीरस्य पुरसाम्यं स्वामिना पौरैश्चाधिष्ठितत्वे
न दर्शयति॥ आत्मेत्यादिना॥ यद्यपि देहे जीवनत्वाद्देहसंबंधाभिमानाभासवान्॥ वतिष्ठते। तथापि प्रवासी च परगेहे न पूजापरिभवादिभिरप्र भ०५
हृष्यन्नविषीदन्व्यामोहादिरहितस्तिष्ठतीति मत्वाह॥ नस्मिन्निति॥ विशेषणमाक्षिपति॥ किमिति तदनुपपत्ति॥ श्रीरामाय- १२४॥

मा२

प मेवोँयादयति ॥ सर्वोहीति ॥ सर्वसाधारणे देहावस्थाने सन्यस्य देहे तिष्ठति विद्वानिति विशेषणमकिंचित्करमिति फलितमाह ॥ नवेति ॥ विशेषणफ
लं दर्शयन्नुत्तरमाह ॥ उच्यत इति ॥ किमविवेकिनं प्रति विशेषणानर्थक्यं चोद्यते किं वा विवेकिनं प्रतीति विकल्प्याद्यमंगीकरोति ॥ यस्त्विति ॥

अर्वाक्छिद्रे मूत्रपुरीषविसर्गार्थे एतैस्तैर्द्वारैर्नवद्वारं पुर मुच्यते शरीरं पुरमिव पुरं ॥ पुरं आत्मैकस्वामिकं तदर्थप्रयोजनैश्चेंद्रियमनोबुद्धि
धा२ विषयैरनेकफलविज्ञानस्योँदकैः पौरैरिवाधिष्ठितं ॥ तस्मिन्नवद्वारे पुरे देही सर्वकर्मसंन्यस्यास्ते ॥ किं विशेषणेन सर्वो हि
देही संन्यासी असंन्यासी वा देहएवास्ते तत्रानर्थकं विशेषणमित्युच्यते यस्त्वज्ञो देही देहेंद्रियसंघातमात्रात्मदर्शी स
र्वो गेहे भूमावासने वाऽऽसइति मन्यते ॥ नहि देहमात्रात्मदर्शिनो गेह इव देहे आस इति प्रत्ययः संभवति ॥ देहादि
संघातव्यतिरिक्तात्मदर्शिनस्तु देह आस इति प्रत्यय उपपद्यते ॥ १३ ॥ ० श्रीरामा श्रीरामा श्रीरामा ॥

अज्ञत्वदेहित्वे हेतुसत्वदेवदेहित्वं स्फुटयति ॥ देहेति ॥ संघातात्मत्वदर्शिनोपि देहे स्थितिप्रतिभासः स्यादिति चेन्नेत्याह ॥ नहीति ॥ द्वितीयं
दर्शयति ॥ देहादीति ॥ गृहादिषु देहस्यावस्थाने नात्मावस्थानभ्रमव्यावृत्त्यर्थं देहे विद्वानास्त इति ॥ विशेषणमुपपद्यते ॥ विवेकवतो
ऽवस्थानप्रतिभाससंभवादित्यर्थः ॥ ननु विवेकिनो देहेऽवस्थानप्रतिभानेपि वाऽज्ञनो देहव्यापारात्मनां कर्मणां तस्मिन्नसंगा

न्तूस्यागेनकृतस्तस्यदेहेऽवस्थानमुच्यतेतत्राह॥परकर्मणांचेति॥ननुविवेकिनोदिगाद्यनवच्छिन्नबाह्याभ्यंतराविक्रियब्रह्मात्मतांमन्यमानस्य
हेऽवस्थानमास्थातुंशक्यतेतत्राह॥उत्पन्नेति॥तत्रहेतुमाह॥प्रारब्धेति॥यद्धिप्रारब्धफलंधर्माधर्मात्मकंकर्मतस्योपभुक्तस्यशे
षादनुपभुक्ताद्देहादिसंस्कारोनुवर्ततेनतदनुवृत्त्याचतत्रैवदेहेविशेषविज्ञानंदेहेऽवस्थानविषयमुपपद्यतेअतोविवेकवतःसंन्या
सिनोदेहेऽवस्थानव्यपदेशःसंभवतीत्यर्थः॥अविद्धत्वस्यापेक्षयाविशेषणसंभवेपिविद्धत्वस्यापेक्षयाविशेषणमर्थवदि

परकर्मणांचपरस्मिन्नात्मन्यविद्ययाऽध्यारोपितानांविद्ययाविवेकज्ञानेनमनसासंन्यासउपपद्यते उत्पन्नविवेकज्ञानस्यसर्वकर्मसंन्यासि
नोपिगेहइवदेहएवनवद्वारेपुरेआसनं॥प्रारब्धफलकर्मसंस्कारशेषानुवृत्त्या॥देहएवविशेषज्ञानोत्पत्तेर्देहएवास्तइत्युक्ते
वविशेषणफलं॥विद्वदविद्वत्त्वस्यभेदापेक्षत्वात्॥यद्यपिकार्यकरणकर्माणिअविद्ययात्मन्यध्यारोपितानितानि
संन्यस्येत्यात्मनंसमवायितुकर्तृत्वंकारयितृत्वंचस्यादित्याशंक्याह॥नैवकुर्वन्नस्वयंनचकार्यकरणानिकारयन्नक्रिया
॥ सुप्रवर्तयन्॥

द
त्युपसंहरति॥देहएवेति॥देहस्यावस्थानविशेषयोविद्वत्त्वस्ययस्तद्विषयश्चाविद्वत्त्वस्ययस्तयोरेवंभेदेविद्वत्त्वस्यापेक्षत्वा
दुपपन्नंविशेषणमिति॥उक्तमेवहेतुंविशदयति॥विद्वानिति॥आरोपितकर्तृत्वाद्यभावेपिस्वगतकर्तृत्वादिदुर्वारमित्या
शंक्योक्तमनूद्यदूषयति॥यद्यपीत्यादिना॥क्रियासुप्रवर्तयन्नास्तइतिपूर्वेणसंबंधःपूर्वस्यापिशंकितुरमेवसंबंधः॥१३॥ •

कर्तृत्वं कारयितृत्वं चात्मनो नेत्यत्र विचारयति ॥ किमिति ॥ यत्कर्तृत्वं कारयितृत्वं च तत्किं देहिनः स्वात्मसमवायि सदेवसंन्यासान्न भवती
त्युच्यते यथा गच्छतो देवदत्तस्य स्वगतैव गतिस्तत्स्थिसाँगान्न भवति ॥ अथवा स्वारस्येन कर्तृत्वं कारयितृत्वं चात्मनो नास्तीति वि
वेक्तव्यमाद्ये सक्रियत्वं द्वितीये कूटस्थत्वमित्यर्थः द्वितीयं पक्षमाश्रित्योत्तरमाह ॥ अत्रेति ॥ उक्तेर्थे वाक्योपक्रममनुकूलयति
उक्तंहीति ॥ तत्रैव वाक्यशेषमपि संपादयति ॥ शरीरस्थोपीति ॥ स्मृत्युक्तेर्थे श्रुतिमपि दर्शयति ॥ ध्यायतीवेति ॥ उपाधि

किं तत्कर्तृत्वं च कारयितृत्वं च देहिनः स्वात्मसमवायि सत् संन्यासान्न संभवति ॥ यथा गच्छतो गतिः गमनव्यापारपरित्यागेन स्यात् तद्वत् ॥
किंवा स्वतएवात्मनो नास्तीति अत्र उच्यते ॥ नास्त्यात्मनि स्वतः कर्तृत्वं कारयितृत्वं वा उक्तं स्यादिकार्येयमुच्यते ॥ शरीरस्थोपि न करोति नलि
प्यत इति ध्यायतीव लेलायतीवेति च श्रुतेः ॥ न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः ॥ न कर्मफलसंयोगं स्वभावस्तु प्रवर्तते ॥१४॥
न कर्तृत्वं ॥ स्वतः कुर्वन्तीति नापि कर्माणि रथघटप्रासादादीनि ईप्सिततमानि लोकस्य सृजति उत्पादयति प्रभुरात्मा ॥ ५ ॥ ५ ॥ ४

गतैव सर्वा विक्रिया नात्मनि स्वतोस्तीत्यर्थः ॥ १३ ॥ आत्मनो यदुक्तं कारयितृत्वं नास्तीति तत्प्रपंचयति ॥ नेत्यादिना ॥ यद्यपि लोकस्य क
र्तृत्वं न सृजतीति नास्ति कारयितृत्वं तथापि रथशकटादीनि कुर्वन्भवति कर्तेत्याशंक्याह ॥ न कर्माणीति ॥ तथापि भोजयितृत्वेन वि
क्रियावत्त्वं दुष्परिहरमित्याशंक्याह ॥ न कर्मेति ॥ कस्य तर्हि प्रवर्तकत्वं तदाह ॥ स्वभावस्त्विति ॥ कुर्वन्ति कर्तृत्वं लोकस्य न सृ
त्मेति संबंधः ॥ रथादीनां कर्मत्वं साधयति ॥ ईप्सितेति ॥ आत्मनो देहादिस्वामित्वेन प्रभुत्वं रथादिकृतवतो लोकस्य रथादिफले

यमपिनसृजत्यात्मेत्यात्मनो भोजयितृत्वं प्रत्याचष्टे ।। नापीति ।। चतुर्थपादं शंकोत्तरत्वेनावतारयति ।। यदीत्यादिना ।। स्वभाववादस्तु हींसा
व्याकरोति अविद्यालक्षणेति ।। प्रकृतेर्विद्याभावत्वं स्पुदसिंतु मायेत्युक्तं साचत्त्वमेव वक्ष्यते तेन प्रधानविलक्षणेत्याह ।। दैवीहीति ।। १४ ।।
कर्तृत्वभोक्तृत्वैश्वर्याणमात्मनो विद्याकृतानीत्युक्तं ।। इदानीमीश्वरे संन्यस्तसमस्तव्यापारस्य तदेकशरणस्य दुरितं सुकृतं वा तदनुग्रहार्थं

नापिरथादिकृतवनस्तत्फलेन संयोगं न कर्मफलेसंयोगं ।। यदि किंचिदपि स्वतो न करोति न कारयति च देही कस्तर्हि कुर्वन्
कारयंश्च प्रवर्त्तत इत्युच्यते ।। स्वभावस्तु स्वो भावोऽविद्यालक्षणा प्रकृतिर्माया प्रवर्तते दैवीहीति ।। परमार्थतस्तु ।। नाद
त्ते कस्यचित्पापं नचैव सुकृतं विभुः ।। अज्ञानेनावृतं ज्ञानं तेन मुह्यंति जंतवः ।। १५ ।। नादत्तेन गृह्णाति भक्तस्यापि कस्यचित्पापं
नचैवादत्ते सुकृतं विभुर्भक्तैः प्रयुक्तं किमर्थं तर्हि भक्तैः [illegible] पूजादिलक्षणं पागदानहोमादि च सुकृतं प्रयुज्यत इ
त्याह ।। अज्ञानेनावृतं विवेकज्ञानं तेन मुह्यंति करोमि कारयामि भोक्ष्ये भोजयामीत्येवं मोहं गच्छंति अविवेकिनः सं
।। सारिणो जंतवः ।।

भगवानादत्ते मदेकशरणो मत्प्रीत्यर्थं कर्म कुर्वाणो दुःकृताद्यनुमोदनेनानुग्राह्यो मयेति प्रत्ययभात्कादित्याशंक्याह सोपि परमार्थतो नास्यास्ति अविक्रि
यत्वादित्याह ।। परमार्थतस्त्विति ।। कथं तर्हि भक्तानामनुग्राह्यत्वमीश्वरस्यानुग्रहीतृत्वमिति प्रसिद्धिस्तत्राह ।। अज्ञानेनेति ।। पूर्वार्द्धग
तान्यक्षराणि व्याख्यायाकांक्षापूर्वकमुत्तरार्द्धमवतार्य व्याचष्टे ।। किमर्थमित्यादिना ।। १५ ।। ५ ।। ।। ५ ।। ५ ।। ५ ।।

वक्ष्यमाणा २

ज० ५ राम ।।
१२६ ।।

तर्हि सर्वेषामनाद्यज्ञानावृतत्वाद्व्यामोहापोहाभावात्कुतः संसारनिवृत्तिरित्यत आह॥ ज्ञानेनेति॥ सर्वमिति पूर्णत्वमुच्यते। ज्ञेयस्यैव वस्तुनस्तत्परत्वमिति विशेषणं तद्व्याचष्टे॥ परमार्थतत्त्वमिति॥१६॥ विदुषां विविदिषूणां चांतरंगाणि विद्यापरिपाकसाधनान्युपदिदिक्षुरुत्तरश्लोकस्यापेक्षितं पूरयति॥ यत्सुरमिति॥ तस्मिन्परमात्मनि तत्त्वे परस्मिन्ब्रह्मणि बाह्यं विषयमपोह्य गता प्रवृत्ता श्रवणमनननिदिध्यासनैरसकृदनुष्ठितैर्बुद्धिः साक्षात्कारलक्षणा येषां ते तथेति॥ प्रथमविशेषणं विभजते॥ तस्मि

ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः॥ तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परं॥१६॥ ज्ञानेन तु येनाज्ञानेनावृता मुह्यंति जंतवः तदज्ञानं येषां जंतूनां विवेकज्ञानेनात्मविषयेण नाशितमात्मनो भवति॥ तेषां जंतूनामादित्यवत् यथादित्यः समस्तं रूपजातमवभासयति तद्वत्॥ ज्ञानं ज्ञेयं वस्तु सर्वं प्रकाशयति तत्परं परमार्थतत्त्वं॥७॥ तत्परं ज्ञानप्रकाशितं॥०

च

७ परमार्थतत्त्वं

तद्बुद्धयस्तदात्मान ~~[illegible] तदेव परं ब्रह्म आत्मा येषां ते तदा~~ स्तन्निष्ठास्तत्परायणाः॥ गच्छंत्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः॥१७॥ तस्मिन् गता बुद्धिर्येषां ते तद्बुद्धयः॥ तदात्मानः तदेव परं ब्रह्म आत्मा येषां ते तदात्मानः॥ तन्निष्ठास्तस्मिन् निष्ठा अभिनिवेशस्तात्पर्यं सर्वाणि कर्माणि संन्यस्य ब्रह्मण्येवावस्थानं येषां ते तन्निष्ठाः

न्निति॥ तर्हि बोद्धा जीवो बोद्धव्यं ब्रह्मेति जीवब्रह्मभेदाभ्युपगमो नेत्याह॥ तदात्मान इति॥ कल्पितं बोद्धृबोद्धव्यत्वं वस्तुनस्तु न भेदोऽस्तीत्यंगीकृतमाचष्टे॥ तदेवेति॥ ननु देहादावात्माभिमानमपनीय ब्रह्मण्येवाहमस्मीत्यवस्थानं तदनुष्ठीयमानकर्मप्रतिबंधान्न सिध्यतीत्याशंक्य विशेषणांतरमादत्ते॥ तन्निष्ठा इति॥ तत्र निष्ठाशब्दार्थं दर्शयन्विवक्षितमर्थमाह॥ निष्ठेत्यादिना॥ तथात्रापि पुरुषार्थांतरोपेक्षा

से

२०८॥ प्रतिबंधात्कथं यथोक्ते ब्रह्मण्यवस्थानं संदेहं पारयतीत्यत आह॥ तत्परायणाश्चेति॥ यथोक्तानामधिकारिणां परमपुरुषार्थस्योक्तब्रह्मज्ञानातिरेका ना
॥ ने१ तासक्तिरिति तात्पर्यार्थमाह॥ केवलेति ननु यथोक्तविशेषणवता वर्तमानदेहपाते पि देहांतरपरिग्रहनया कुतो यथोक्ते ब्रह्मण्यव
॥२ मास्थातुं शक्यमित्यत आह॥ ईति॥ सति संसारकारणे दुरितादौ संसारस्य दुर्वारत्वाच्चापुनरावृत्तिसिद्धिरित्याशंक्याह॥ ज्ञानेनेति॥

तत्परायणाश्च तदेव परमयनं परा गतिर्येषां भवतीति तत्परायणाः केवलआत्मरतय इत्यर्थः॥ ते गच्छंत्येवंविधा अपुनरावृत्तिं पुनर्देहसंबंधं न गच्छ
न्तीत्यर्थः॥ ज्ञाननिर्धूतकल्मषाः यथोक्तेन ज्ञानेन निर्धूतो नाशितः कल्मषः पापादिसंसारकारणदोषो येषां ते ज्ञाननिर्धूतक
ल्मषाः यतय इत्यर्थः॥ येषां ज्ञानेन नाशितमात्मनोऽज्ञानं ते पंडिताः कथं तत्त्वं पश्यंतीत्युच्यते॥ विद्याविनयसंपन्ने ब्राह्मणे
गवि हस्तिनि॥ शुनि चैव श्वपाके च पंडिताः समदर्शिनः॥१८॥ विद्याविनयसंपन्ने विद्या च विनयश्च विद्याविनयौ विद्या
विनय५ आत्मबोधः वेदार्थविज्ञानं वा विनयश्चोपशमः ताभ्यां विद्याविनयाभ्यां संपन्नो विद्वान् विनीतश्च यो ब्राह्मणस्तस्मिन् ब्रा
ह्मणे गवि हस्तिनि शुनि चैव श्वपाके च पंडिताः समदर्शिनो विद्याविनयसंपन्ने उत्तमसंस्कारवति ब्राह्मणे सात्त्विके मध्यमा
॥५॥ ० ० ० ॥० यां च राजस्यां गवि संस्काररहितायामत्यंतमेव केवलतामसे हस्त्यादौ च॥५॥ श्रीराम॥

येषां ज्ञानेन ना
शितमात्मनोऽ
ज्ञानं ४

उक्तविशेषणसंपत्त्या दर्शितफलस्य ज्ञानस्थितमात्मसमांतरेष्वसंभावितमिति मन्वानो विशिनष्टि॥ यत इति॥ यदपुनरावृत्तिसाध
नं तत्त्वज्ञानं तदेव प्रश्नद्वारेण विवृणोति॥ येषामित्यादि॥ विद्या वेदार्थविज्ञानमित्यंगीकृत्य विनयं व्याचष्टे॥ विनय इति॥ उपशमो
निरहंकारत्वमनौद्धत्यं॥ पदार्थविवेकमुक्त्वा वाक्यार्थं दर्शयति॥ विद्वानिति॥ गवीत्याद्युपवाक्यार्थं कथयति॥ विदेति॥ हस्त्यादौ
पंडिताः समदर्शिन इत्युत्तरत्र संबंधः॥ ननु तत्र प्राणिप्रभेदेषु ननु गुणैस्तत्तन्निमित्तसंस्कारैश्च सेपष्टत्वसंभवात्त्व ब्राह्मणः समत्वमित्याशं
॥क्याह॥

अ०५ साम
१२८७॥

सत्वादीति तज्जैश्चेसत्रतच्छब्देन सत्वमेव गृह्यते ॥ सात्विकसंस्कारैरिव राजससंस्कारैरपि सर्वथैवासंस्पृष्टं ब्रह्मेत्याह ॥ तथेति ॥ राजसैरिव तामसै
रपि संस्कारैर्ब्रह्मास्पृष्टं तमेवास्पृष्टमित्याह ॥ तथा तामसैरिति ॥ ब्रह्मणोऽद्वितीयत्वं कूटस्थत्वमसंगत्वं चोक्तेर्थे हेतुरिति मत्वा समशब्दार्थमाह ॥
सममिति ॥ समदर्शित्वमेव पांडित्यं नद्याचष्टे ॥ ब्रह्मेति ॥ १८ ॥ सात्विकेषु [illegible]जसेषु तामसेषु च सत्वेषु समत्वदर्शनमनुचितमिति शंकते ॥
नन्विति ॥ सर्वत्र समदर्शिनस्तच्छब्देन परामृश्यन्तेषां दोषवत्वाद भोज्या[illegible]मित्यत्र प्रमाणमाह समासमाभ्यामिति ॥ समानामध्ययनादिभिः

सत्वादिगुणैस्तज्जैश्च संस्कारैस्तथा रजसा राजसैश्च संस्कारैस्तथा तमसा तामसैः संस्कारैरसं तमेवासंस्पृष्टं सममेकमविक्रि
यं ब्रह्म द्रष्टुं शीलं येषां ते पंडिताः समदर्शिनः ॥ ९ ॥ नन्वभोज्यान्नास्ते दोषवंतः समासमाभ्यां विषमसमे पूजातः इति स्मृतेः ॥

॥ न ते दोषवंतः ॥ कथं ॥

समानधर्मकाणां वस्त्रालंकारादिपूजया विषमे प्रतिपत्तिविशेषोक्तिर्यामाणे सति असमानानां चासमानधर्मणां कस्यचिदेकवेदत्वमपरस्य
द्विवेदत्वमित्यादि पश्चात् धर्मवतो प्रागुक्तया पूजया समे प्रतिपत्तिविशेषे पूजयितापुरुषविशेषं ज्ञात्वा प्रतिपत्तिमकुर्वन् धनाद्धर्माच्च
[illegible]ते ने न सात्विके राजसतामसयोश्च समबुद्धिं कुर्वन् प्रत्यवैतीत्यर्थः उत्तरत्वेनोत्तरश्लोकमवतारयति नेनेति ॥ स्वल्पावष्टंभेन
न सत्वेषु समत्वदर्शिनां दोषवत्वमुक्तं कथं नास्तीति प्रतिज्ञामात्रेणासिध्यतीति शंकते ॥ कथमिति ॥ ९ ॥ ॥ श्रीरामा ॥

र्गतिमग्नेवदिष्यन्निर्दोषत्वंसमत्वंदर्शिनांविशदयति ॥ इहैवेति ॥ सर्वेषांचेतनानांसाम्येप्रवणमनसांब्रह्मलोकगमनमंतरेणास्मि
देहेपरित्यक्तजन्मनामशेषदोषराहित्येहेतुमाह ॥ निर्दोषंहीति ॥ वर्तमानोदेहःससम्यापरिगृह्यते ॥ तानेवसमदर्शिनोविशिनष्टि
षामिति ॥ ननुब्रह्मणोनिर्दोषत्वमसिद्धं दोषवत्सुश्वपाकादिषुतद्दोषैर्दोषवत्त्वसंभवान्नत्याह ॥ यद्यपीति ॥ तस्मात्तन्निर्दो
षंतस्मात्तस्मिन्ब्रह्मणिस्थितैर्निर्दोषैः सर्गोजितइतिसंबंधः ॥ ब्रह्मणोगुणभूयस्त्वादत्मीयांयान्दोषोपिस्यादित्याशंक्याह ॥

इहैवतैर्जितःसर्गोयेषांसाम्येस्थितंमनः ॥ निर्दोषंहिसमंब्रह्मतस्माद्ब्रह्मणितेस्थिताः ॥१९॥ इहैवजीवद्भिरेवतैःसम
दर्शिभिःपंडितैःजितोवशीकृतःसर्गोजन्मयेषांसाम्येस्थितंमनःसर्वभूतेषुब्रह्मणिसमभावेस्थितंनिश्चलीभूतं
मनोऽन्तःकरणंनिर्दोषं ॥ यद्यपिदोषवत्सुश्वपाकादिषुमूढैस्तद्दोषैर्दोषवदिवविभाव्यते । तथापितद्दोषैरस्पृष्ट
मितिनिर्दोषंदोषवर्जितंहियस्मान्नापिस्वगुणभेदभिन्नंनिर्गुणत्वाच्चैतन्यस्य । वक्ष्यतिचभगवानिच्छादीनांक्षेत्रध
र्मत्वमनादित्वान्निर्गुणत्वादितिच ॥ नाप्यंत्याविशेषाआत्मनोभेदकाःसंति ॥ प्रतिशरीरंतेषांसत्वेप्रमाणानुपपत्तेः ॥

नि

नापीति ॥ चेतनस्यस्वगुणविशेषविशिष्टत्वमनिष्टंनिर्गुणत्वश्रवणादित्ययुक्तंइच्छादीनांपरिशेषादात्मधर्मवत्त्वस्यकैश्चिन्निश्चितत्वादित्याशंक्याह ॥
वक्ष्यतिचेति ॥ आत्मनोनिर्गुणत्वेवाक्यशेषंप्रमाणयति ॥ अनादित्वादिति ॥ चकारोवक्ष्यतीत्यनेनसंबंधार्थः ॥ गुणदोषवशादात्मनोभेदाभावे
पिभेदोऽन्त्यविशेषेभ्योभवतीतिप्रसंगादाशंक्यदूषयति ॥ नापीति ॥ प्रतिशरीरमात्मभेदसिद्धौतद्धेतुत्वेननतेषांसत्वंनेषांसत्वेप्र
तिशरीरमात्मभेदसिद्धिरितिपरस्पराश्रयत्वमित्यभिप्रेत्यहेतुमाह ॥ प्रतिशरीरमिति ॥ ५० ॥ श्रीरामचंद्रायनमः ॥ श्रीरामः ॥ १०

अ० ५ राम ॥
१२८ ॥

आत्मभेदकाभावे फलितमाह॥ अत इति॥ समत्वमेव व्याकरोति॥ एकं चेति॥ ब्रह्मणो निर्विशेषत्वेनैकत्वाज्जीवानां च भेदकाभावेनैकत्व
स्योक्तत्वादेकलक्षणत्वादेकत्वं जीवब्रह्मणोरेष्टव्यमित्याह॥ तस्मादिति॥ जीवब्रह्मणोरेकत्वे जीवानां ब्रह्मवन्निर्दोषत्वं सिध्यतीत्याह॥
तस्मान्नेति॥ तच्छब्दार्थमेव स्फोरयति॥ देहादीति॥ यदि सर्वसत्वेषु समत्वदर्शनमदुष्टमिष्टं तर्हि कथं गौतमस्य सूत्रं इत्याशंक्याह॥ देहा
दिसंघातेति॥ सूत्रस्य यथोक्ताभिमानवद्विषयत्वे गमकमाह॥ पूजेति॥ यदि च चतुर्वेदानामेव सतां पूजया वैषम्यं यदि चातुर्वेदानां ष
डंगविदां ब्रह्मविदां च पूजया साम्यं तदा तेषामुक्तपूजाविषयाणां केषांचिन्मनोविकारसंभवे कर्ता प्रत्येवेतीत्यविद्वद्विषयत्वं सूत्रस्य

अतः समं ब्रह्मैकं च तस्माद्ब्रह्मण्येव ते स्थिता इति तस्मान्न दोषगंधमात्रमपि तान्स्पृशति॥ देहादिसंघातात्मदर्शनाभावात्॥ देहादि
संघातात्मदर्शनाभिमानवद्विषयं तु तत्सूत्रं॥ समासमाभ्यां विषमसमे पूजात इति पूजाविषयत्वेन~~विशेषत्वे~~न विशेषणाद्दृश्य
ते हि ब्रह्मवित् षडंगवित् चतुर्वेदविदिति पूजा[illegible]नादौ गुणविशेषसंबंधकारणं ब्रह्म तु सर्वगुणदोषसंबंधवर्जितमित्यतो
ब्रह्मणि ते स्थिता इति युक्तं॥ कर्मविषयं च समासमाभ्यामित्यादि॥ इदं तु सर्वकर्मसंन्यासिविषयं प्रस्तुतं॥ १९॥ ०॥

प्रतिभातीत्यर्थः॥ तत्रैवानुभवमनुकूलत्वेनोदाहरति॥ दृश्यते हीति॥ देहादिसंघाताभिमानवतां गुणदोषसंबंधसंभवात्तद्विषयं सूत्रमित्यु
[illegible]मिदानीं ब्रह्मात्मदर्शनाभिमानवतां गुणदोषासंबंधान्न तद्विषयं सूत्रमित्यभिप्रेत्याह॥ ब्रह्मत्विति॥ इतश्च नेदं सूत्रं ब्रह्मविद्विषयमित्याह॥
[illegible]ति॥ तत्रैव पूजापरिभवसंभवादित्यर्थः ननु यत्र समत्वदर्शनं तत्रैवेदं सूत्रं न तु कर्मण्यकर्मणि वेति विभागोस्ति नेत्याह॥ इदं त्विति॥
न तत्वदर्शनस्य संन्यासिविषयत्वेन प्रस्तुतत्वे हेतुमाह॥ सर्वकर्माणीति॥ अध्यायपरिसमाप्तेः सर्वकर्माणीत्यारभ्य तत्र तत्र सर्वक

टी०१। ब्रं सासान्निधानात्तद्विषयमिदं समत्वदर्शनं गम्यते तेन च निरहंकारे निरवकाशं सत्त्वमित्यर्थः ॥१९॥ नन्विष्टानिष्टप्राप्तिभ्यां हर्षविषादौ
दानपि कुर्वन्निर्दोषे ब्रह्मणि कथं स्थितिं लभतेरत्याशंक्याकांक्षितं पूरयन्नुत्तरश्लोकमुत्थापयति ॥ यस्मादिति ॥ आत्मज्ञाननिष्ठा
म्यो गे विदुषो हर्षविषादनिमित्ताभावान्नतावुचितावित्याह ॥ स्थिरबुद्धिरिति ॥ ननु हर्षविषादनिमित्तत्वं प्रियाप्रिययोः सिद्धमिति
कथं तत्प्राप्त्या हर्षोद्वेगौ न कर्तव्यावित्ति नियुज्यते तत्राह ॥ देहेति ॥ विदुषोपि प्रियाप्रियप्राप्तिसामर्थ्यादेव हर्षविषादौ दुर्वारावित्याशंक्याह ॥

सर्वकर्माणि मनसेत्यारभ्याध्यायपरिसमाप्तेः यस्मान्निर्दोषं समं ब्रह्मोक्तं तस्मात् ॥ न प्रहृष्येत्प्रियं प्राप्य नोद्विजेत्प्राप्य चाप्रियं ॥
स्थिरबुद्धिरसंमूढो ब्रह्मविद्ब्रह्मणि स्थितः ॥२०॥ न प्रहृष्येत्प्रहर्षं न कुर्यात् प्रियं इष्टं प्राप्य नोद्विजेत्प्राप्य चाप्रियं अनिष्टं ल
ब्ध्वा। देहमात्रात्मदर्शिनो हि प्रियाप्रियप्राप्ती हर्षविषादौ कुर्वाते न केवलात्मदर्शिनस्तस्याप्रियाप्रियप्राप्त्यसंभवात् ॥
किंच सर्वभूतेष्वेकः समो निर्दोष आत्मेति स्थिराविचिकित्सा बुद्धिर्यस्य स स्थिरबुद्धिरसंमूढः संमोहवर्जितश्च स्या
॥ यथोक्तब्रह्मवित् ब्रह्मणि स्थितोऽकर्मकृत् सर्वकर्मसंन्यासीत्यर्थः ॥२०॥

न केवलेति ॥ अद्वितीयात्मदर्शनशीलस्य व्यतिरिक्तप्रियाप्रियप्राप्त्ययोगात्तन्निमित्तौ हर्षविषादावित्यर्थः ॥ इतोपि विदुषो हर्षविषा
दावसंभावितावित्याह ॥ किंचेति ॥ निर्दोषे ब्रह्मणि शागुरूक्तेर्दृढप्रतिपत्तिः संमोहे न हर्षादिहेतुना रहितो यथोक्ते सर्वदोषरहिते ब्रह्मण्यह
मस्मीति विद्यावानशेषदोषशून्ये तस्मिन्नेव ब्रह्मणि स्थितस्तदनुरोधात्कर्माण्यपमर्ष्यमाणो नैव हर्षविषादभागी भवितुमलमित्य
र्थः ॥२०॥

अ०५राम
१२९॥

शब्दादिविषयप्रीतिप्रतिबंधान्नकस्यचिदपि~~ब्रह्मण्येचिदपि~~ब्रह्मणिस्थितिःसिध्येदित्याशंक्याह ॥ किंचेति ॥ नकेवलत्वंपूर्वोक्तरीत्याब्रह्म
णिस्थितोहर्षविषादरहितःकिंतुविधांतरेणापीत्यर्थः ॥ यावद्बाह्यविषयेषुतृष्णारूपमावरणांनिवर्त्ततेतावत्तावदात्मस्वरूपंसुख
मभिव्यक्तंभवतीत्याह ॥ बाह्येति ॥ नकेवलमसावात्माशमवशादेवस्फुरत्वंविंदतेकिंतुब्रह्मसमाधिनासमाहितांतःकरणःसुख
मनंतंप्राप्नोतीत्याह ॥ सब्रह्मेति ॥ तत्रपूर्वार्द्धंव्याचष्टे ॥ बाह्येष्वेति ॥ समाधानाधीनसम्यग्ज्ञानद्वारानिरतिशयसुखप्राप्ति

किंचब्रह्मणिस्थितिः ॥ बाह्यस्पर्शेष्वसक्तात्माविंदत्यात्मनियत्सुखं ॥ सब्रह्मयोगयुक्तात्मासुखमक्षयमश्नुते ॥२१॥ बाह्येस्पर्शेष्विबाह्याश्च
तेस्पर्शाश्चबाह्यस्पर्शाःस्पृश्यंतइतिस्पर्शाःशब्दादयोविषयास्तेषुबाह्यस्पर्शेषुअसक्तआत्माअंतःकरणंयस्यसोऽयमसक्तात्माविष के
येषुप्रीतिवर्जितःसविंदतिलभतेआत्मनियत्सुखंतद्विंदतीत्यन्वयःसब्रह्मयोगयुक्तात्माब्रह्मणियोगःसमाधिर्ब्रह्मयोगस्तेन
ब्रह्मयोगेनयुक्तःसमाहितस्तस्मिन्व्यापृतःआत्माऽंतःकरणंयस्यब्रह्मयोगयुक्तात्मासुखमक्षयमश्नुतेव्याप्नोति ॥ तस्माद्बा स
ह्यविषयप्रीतेःक्षणिकायाइंद्रियाणिनिवर्तयेदात्मन्यक्षयसुखार्थीत्यर्थः ॥ रतश्चनिवर्तयेत् ॥ येहिसंस्पर्शजाभोगादुःखयो
॥ नयएवते ॥

तदर्धंव्याख्यानेनकथयति ॥ ब्रह्मणीत्यादिना ॥ शब्दादिविषयविमुखस्यानंतसुखप्राप्तिसंभवा ॥ तदर्थिनाप्रयत्नेनविषयवैमुख्यं
कर्तव्यमितिशिष्यशिक्षार्थमाह ॥ तस्मादिति ॥२१॥ तत्रैवहेत्वंतरपरत्वेनोत्तरश्लोकमवतारयति ॥ रतश्चेति ॥ विषयेभ्यः ॥
स-काधादिंद्रियाणीतिशेषः ॥ वैराग्यार्थमेववैषयिकानिसुखानिदूषयति ॥ येहीति ॥ ॥ छ ॥ श्रीरामायनमः ॥ हरी ॥

टी०।। विषयेंद्रियसंप्रयोगसंप्रसूतेषु भोगेषु जंतूनामभिरुचिदर्शनात्कुतस्तेषां दुःखयोनित्वमित्याशंक्याविवेकिनां ते ह्यासंगोपि न विवे-
किनामित्याह।। आद्यंतवंत इति।। यस्मादाधिव्याधिजरामरणादिसहितेभ्यः समागमनादिक्लेशरूपभागिभ्यश्च विषयेंद्रियसंबंधे-
अ० भ्यो भोगाः सुखत्वेनानुभवा जायंते तेनस्मात्ते दुःखहेतवो भवंतीति नियोजना।। अविद्याकार्यत्वात् दुःखानां कुतो भोगजन्यत्वमित्याशंक्य
भोगानामविद्याप्रयुक्तत्वात्तन्निबंधनत्वं दुःखानां युक्तमित्यभिप्रेत्याह।। अविद्येति।। भोगानां दुःखयोनित्वे मानमनुभवमुपन्यस्यति।।

ते आद्यंतवंतः कौंतेय न तेषु रमते बुधः।।२२।। ये हि यस्मात् संस्पर्शजाना विषयेंद्रियसंस्पर्शेभ्यो जाता भोगा भुक्तयो दुःखयोन
य एव ते अविद्याकृतत्वात् दृश्यंते ह्याध्यात्मिकादीनि दुःखानि तन्निमित्तान्येव।। यथेहलोके तथा परलोकेपीति गम्यते।। एव
शब्दाच्च संसारे सुखस्य गंधमात्रमप्यस्तीति बुध्वा विषयमृगतृष्णिकाया इंद्रियाणि निवर्तयेत्। न केवलं दुःखयोनय आ
द्यंतवंतश्च आदिर्विषयेंद्रियसंयोगो भोगानामंतश्च तद्वियोग एवात आद्यंतवंतोऽनो नित्याः मध्यक्षणभावित्वादित्यर्थः।।
कौंतेय।।

दृश्यंते हीति।। ऐहिकानां भोगानां दुःखनिमित्तत्वेपि नामुष्मिकाणां तथात्वमनुभवाभावादित्याशंक्यावधारणसामर्थ्यसिद्धमर्थमाह।।ए
यथेति।। पूर्वार्द्धस्याक्षरार्थमुक्त्वा तात्पर्यार्थमाह।। नेत्यादिना।। इतश्च विषयेभ्यः सकाशादिंद्रियाणि निवर्तयितव्यानीत्याह।।
न केवलमिति।। आद्यंतवत्वे मध्यक्षणावर्तित्वेन क्षणभंगुरत्वादुपेक्षणीयत्वं भोगानां सिध्यति।। आस्तिहि तेषां क्षणभंगुर- अ०५ रामः।।
त्वं क्षणिकविषयाकारमनोवृत्तिव्यंग्यत्वादिति मन्वानः सन्नाह।।१।। अत इति।। बुद्धिपूर्वकारिणां विवेकवतां भोगेषूपेक्षोपलब्धेश्च तेषा १३०।।

माभासत्वं प्रतिभातीत्याह ॥ नत्वेवेति ॥ प्रतीकोपादानमिदं पुनर्व्याख्यानमिति न पुनरुक्तिः ॥ ननु केषांचिद्भोगेष्वभिरुचिरुपलभ्यते तत्राह ॥
असंतेति ॥२२॥ उत्तरश्लोकस्य तात्पर्यमाह ॥ अयं चेति ॥ श्रेयोमार्गप्रतिपक्षत्वं कष्टतमत्वे हेतुस्तत्रैव हेत्वंतरमाह ॥ सर्वेति ॥ प्रयत्नाधिक्य
स्य कर्तव्यत्वे हेतुं सूचयति ॥ दुर्निवार इति ॥ प्रसिद्धं हि कामक्रोधोद्भवस्य वेगस्य दुर्निवारत्वं येन मातरमपि चाधिरोहति पितरमपि हंति तमव
श्यं परिहर्तव्यं दर्शयति ॥ शक्नोतीति ॥ यथोक्तं वेगं बहिरनर्थरूपेण परिणामात्प्रागेव देहांतस्थेन तत्स्यक्तं यः ॥ सोढुं क्षमते तं स्तौति ॥

उ

न तेषु भोगेषु रमते बुधो विवेक्यवगतपरमार्थतत्त्वोऽत्यंतमूढानामेव नि हि विषयेषु रतिर्दृश्यते यथा पश्वप्रभृतीनां ॥ अयं च श्रेयो
मार्गप्रतिपक्षी कष्टतमो दोषः सर्वानर्थप्राप्तिहेतुर्दुर्निवारश्चेति तत्परिहारे यत्नाधिक्यं कर्तव्यमित्याह भगवान् ॥ शक्नोती
हैव यः सोढुं प्राक्शरीरविमोक्षणात् ॥ कामक्रोधोद्भवं वेगं स युक्तः स सुखी नरः ॥१३॥ शक्नोत्युत्सहते इहैव जीवन्नेव यः सो
ढुं प्रसहितुं प्राक्पूर्वं शरीरविमोक्षणात् ॥ आमरणात् ॥ मरणसीमाकरणं जीवतोऽवश्यंभावी हि कामक्रोधोद्भवो वेगोऽनं
॥५॥ ॥ ॥ ॥ ॥ तनिमित्तवान् हि स इति यावन्मरणं तावन्न विश्रंभणीय इत्यर्थः ॥ कामः ॥ श्रीरामाजयरामा ॥

नद

युक्त इति ॥ मरणसीमाकरणस्य तात्पर्यमाह ॥ मरणेति ॥ प्रसिद्धो हि शब्दस्तत्र हेतुमाह ॥ अनंतेति ॥ व्याध्युपहतानां वृद्धानां च कामादिवेगो न भ
तीत्याशंक्याह ॥ इति यावदिति ॥ कामक्रोधोद्भवं वेगं व्याख्यातुमादौ कामं मनोविकारविशेषत्वेन व्याचष्टे ॥ काम इति ॥ कथमस्य मनोविका
शेषत्वं तदाह ॥ इंद्रियेति ॥ कामो गर्धस्तृष्णेत्येते पर्यायाः सतः शब्दाः मनोविकारविशेषपर्यवस्यंतीत्यर्थः ॥ क्रोधश्च मनोविकारविशेष

टी०॥

इत्याह॥ क्रोधस्त्विति॥ तमेव क्रोधं स्फुटयति। आत्मन इति॥ एवं कामक्रोधौ व्याख्याय तयोरुत्कटत्वावस्थात्मनो वेगस्य तन्नाभ्या
नतिमुपन्यस्यति॥ ताविति॥ यथोक्तवेगावगमोपायमुपदिशति॥ रोमांचनेत्यादिना॥ उभयविधं वेगं यो जीवन्नेव सोढुं शक्नो
ति तेनं पुरुषधौरेयत्वेन स्तौति॥ तमित्यादिना॥ १२॥ ज्ञानस्यात्यंतमंतरंगं आत्ममात्रनिरतत्वं दर्शयन्प्रकृतं ब्रह्मविदमेव विशिनष्टि॥

मू०

इंद्रियगोचरे प्राप्त इष्टे विषये श्रूयमाणे स्मर्यमाणे वानुभूते सुखहेतौ या गृद्धिस्तृष्णा स कामः॥ क्रोधस्त्वात्मनः प्रतिकूले
षु दुःखहेतुं दृश्यमानेषु श्रूयमाणेषु स्मर्यमाणेषु वा यो द्वेषः स क्रोधस्तौ कामक्रोधौ उद्भवौ यस्य वेगस्य स कामक्रोधोद्भवो
वेगः रोमांचहृष्टनेत्रवदनत्वादिलिंगोंतःकरणप्रक्षोभहेतुर्यः कामोद्भवो वेगो गात्रप्रकंपप्रस्वेदसंदष्टोष्ठपुटरक्तनेत्रत्वादि
लिंगः क्रोधोद्भवो वेगः तं कामक्रोधोद्भवं वेगं यः प्रसहते सोढुं शक्नोति स युक्तो योगी सुखी चेह लोके नरः॥ ५॥
कथंभूतश्च ब्रह्मणि स्थितो ब्रह्म प्राप्नोतीत्याह भगवान् योऽन्तःसुखोऽन्तरारामस्तथांतर्ज्योतिरेव यः॥ स योगी ब्रह्मनिर्वा
॥ णं ब्रह्मभूतोधिगच्छति॥ २४॥

कथंभूतश्चेति॥ यथांतरेव सुखं न बाह्यैर्विषयैस्तथांतरेव ज्योतिर्न श्रोत्रादिभिरतो विषयांतरविज्ञानरहित इत्याह॥ तथेति॥
यथोक्तविशेषणः समाधिमाञ्जीवन्नेव मुक्तिमधिगच्छतीत्याह॥ स योगीति॥ आत्मन्यंतःसुखमिति बाह्यविशेषनि
रपेक्षत्वं विवक्षितं अंतरारामत्वं च स्त्र्यादिविषयापेक्षामंतरेण क्रीडाप्रयुक्तफलभावमभिमननमिंद्रियादिजन्यप्रकाशशून्यत्वमा
॥ त्मज्योतिष्ट्वमिष्टं॥ ५॥

अ० ५॥ राम
२३१॥

यथोक्तविशेषणसंपन्नः समाहितश्च जीवन्नेव ब्रह्मभावं प्राप्तो ब्रह्मणि परिपूर्णे निर्वृतिं सर्वानर्थनिवृत्त्युपलक्षितां स्थितिमनतिशयानंदाविर्भावलक्षणां प्राप्नोतीत्याह ॥ यः ईदृश इति ॥ २४ ॥ मुक्तिहेतोर्ज्ञानस्य साधनांतरमाह ॥ किंचेति ॥ यज्ञादिनित्यकर्मानुष्ठानात्पापादिलक्षणः कल्मषः क्षीयते तेन ततश्च श्रवणाद्यावृत्तेः सम्यग्दर्शनं जायते ततो मुक्तिरप्रयत्नेन भवतीत्याह ॥ लभंत इति ॥

यः अंतःसुखः अंतरात्मनि सुखं यस्य सोंऽतःसुखः तथांतरे एवात्मन्यारामः आक्रीडा यस्य सोंऽतरारामः तथांतरात्मैव ज्योतिः प्रकाशो यस्य सोंऽतर्ज्योतिरेव य ईदृशः स योगी ब्रह्मनिर्वाणं ब्रह्मणि निर्वृतिं मोक्षमिह जीवन्नेव ब्रह्मभूतः सन्नधिगच्छति प्राप्नोति ॥ किंच ॥ लभंते ब्रह्मनिर्वाणमृषयः क्षीणकल्मषाः ॥ छिन्नद्वैधा यतात्मानः सर्वभूतहिते रताः ॥ २५ ॥ लभंते ब्रह्मनिर्वाणं मोक्षं ऋषयः सम्यग्दर्शिनः संन्यासिनः क्षीणकल्मषाः क्षीणपापादिदोषाः छिन्नद्वैधाः छिन्नसंशयाः यतात्मानः संयतेंद्रियाः सर्वभूतहिते रताः सर्वेषां भूतानां हिते आनुकूल्ये रताः अहिंसका इत्यर्थः ॥ किंच ॥

॥ कामक्रोधवियुक्तानां यतीनां यतचेतसां ॥ ध्व ॥

ज्ञानप्राप्त्युपायांतरं दर्शयति ॥ छिन्नेति ॥ श्रवणादिना संशयनिरसनं कार्यकरणनियमनं दयालुत्वेनाहिंसकत्वमित्येतदपि सम्यग्ज्ञानप्राप्तो कारणमित्यर्थः ॥ अक्षरव्याख्यानं स्पष्टत्वान्न व्याख्यायते ॥ २५ ॥ पूर्वं कामक्रोधयोर्वेगः सोढव्यो दर्शितः संप्रति तावेव सा[illegible]विस्याह ॥ किंचेति ॥ ननु दर्शितविशेषणवतां मृतानामेव मोक्षो न तु जीवतामिति चेन्नेत्याह ॥ अभित इति ॥ अस्मदादीनाम

॥ ८॥ प्रभुतकामादिप्रभावविधुराणां किंमिति मोक्षो न भवतीत्याशंक्य सम्यग्दर्शनवैशद्याभावादित्याह॥ विदितेति॥
उक्तेऽर्थे श्लोकाक्षराणामन्वयमाचष्टे॥ कामक्रोधेत्यादिना॥ २६॥ एवमनन्तरश्लोकत्रयस्य तात्पर्यमाह॥ सम्य
ग्दर्शनेति॥ ईश्वरार्पित॥

अभितो ब्रह्मनिर्वाणं वर्तते विदितात्मनां॥ २६॥ कामक्रोधवियुक्तानां कामश्च क्रोधश्च कामक्रोधौ ताभ्यां वियु
क्तानां यतीनां संन्यासिनां यतचेतसां संयतान्तःकरणानां अभितउभयतो जीवतां मृतानां च ब्रह्मनिर्वाणं मो
क्षो वर्तते विदितात्मनां॥ विदितो ज्ञातः आत्मा येषां ते विदितात्मानस्तेषां विदितात्मनां सम्यग्दर्शिनामित्यर्थः॥ स
म्यग्दर्शननिष्ठानां संन्यासिनां सद्यो मुक्तिरुक्ता कर्मयोगश्च ईश्वरार्पितसर्वभावेनेश्वरे ब्रह्मण्याधाय क्रियमाणः॥
सत्वशुद्धिज्ञानप्राप्तिसर्वकर्मसंन्यासक्रमेण मोक्षायेति भगवान् पदे पदे अब्रवीद्वक्ष्यति च॥ २६॥ अथेदानीं
ध्यानयोगं सम्यग्दर्शनस्यान्तरंगं विस्तरेण वक्ष्यामीति तस्य सूत्रस्थानीयान् श्लोकानुपदिशति स्म देवः॥ स्पर्शान्कृ
त्वा बहिर्बाह्यांश्चक्षुश्चैवान्तरे भ्रुवोः॥ प्राणापानौ समौ कृत्वा नासाभ्यन्तरचारिणौ॥ २७॥ स्पर्शान् शब्दादीन् कृत्वा बहिर्बाह्यान्
सर्वभावेनेति भगवति परस्मिन्नीश्वरे समर्पितः॥ सर्वेषां देहेन्द्रियमनसां भावः आपाँविशेषो न क्वचिदपि बहिस्तेषां व्यापारस्ते
नेत्यर्थः॥ कर्मयोगस्य तत्फलस्य चाभिधानानन्तरमित्यर्थशब्दार्थः॥ ५॥ ॥ ५॥ ॥ ५॥ ०

स्यत्तो वाह्यानां विषयाणां कुतो वहिष्करणमित्याशंक्याह ॥ श्रोत्रादीति ॥ तेषां वहिष्करणं कीदृशमित्याशंक्याह ॥ तानीति ॥ विषयाणां प्रावण्यं परित्यज्य चक्षुरपि भ्रुवोर्मध्ये विक्षेपपरिहारार्थं कृत्वा प्राणापानौ च नासाभ्यंतरचरणशीलौ समौ न्यूनाधिक्यवर्जितौ कुंभकेन निरुद्धौ कृत्वा करणानि सर्वाण्येवं संयम्य ॥२७॥ प्राणायामपरो भूत्वा किं कुर्यादित्यपेक्षायामाह ॥ यतेंद्रियेति ॥

श्रोत्रादिद्वारेणांतर्बुद्धौ प्रवेशिताः शब्दादयो विषयास्तानचिंतयतो बाह्यांवहिरेव कृता भवंति तानेवं वहिःकृत्वा चक्षुश्चैवांतरे भ्रुवोः कृत्वेत्यनुषज्यते ॥ तथा प्राणापानौ नासाभ्यंतरचारिणौ समौ कृत्वा ॥ यतेंद्रियमनोबुद्धिर्मुनिर्मोक्षपरायणः ॥ विगतेच्छाभयक्रोधो यः सदा मुक्त एव सः ॥२८॥ यतेंद्रियमनोबुद्धिं यतानि संयतानींद्रियाणि मनो बुद्धिश्च यस्य स यतेंद्रियमनोबुद्धिः मननान्मुनिः संन्यासी मोक्षपरायणः ॥ एवं देहसंस्थानो मोक्षपरायणो मोक्ष एव परमयनं परागतिर्यस्य सोऽयं मोक्षपरायणो मुनिर्भवेद्विगतेच्छाभयक्रोधः इच्छा च भयं च क्रोधश्च इच्छाभयक्रोधास्ते विगता यस्मात्स विगतेच्छाभयक्रोधो य एवं वर्तते सदा संन्यासी मुक्त एव सः न तस्य मोक्षोऽन्यः कर्तव्योऽस्ति ॥५॥ ॥ ॥ ५॥

इंद्रियादिसंयमं कृत्वा मोक्षमेवापेक्षमाणो मननशीलः स्यादित्यर्थः ॥ ज्ञानातिशयनिष्ठस्य सर्वदेच्छादिशून्यस्य संन्यासीनो मुक्तेरनायासिद्धत्वान्न तस्य किंचिदपि कर्तव्यमस्तीत्याह ॥ विगतेति ॥२८॥ पूर्वार्द्धाक्षराणि व्याकरोति ॥ यतेत्यादिना ॥ द्वितीयार्द्धाक्षरा ॥ णि व्याचष्टे ॥ विगतेत्यादिना ॥५॥

।।रिणोयथोक्तस्यकर्तव्याभावेज्ञानत्वमपिनास्तीत्याशंक्यपरिहरति।।एवमित्यादिना।।प्रसिद्धंभोक्तारंव्यवछिनत्ति।।सर्वलोकेति।।ततोसु
बंधविपर्ययावितिन्यायेनसर्वफलदातृत्वंदर्शयति।।सुहृदमिति।।उक्तेश्वरज्ञानेफलंकथयति।।ज्ञात्वेति।।यज्ञेषुतपःसुचद्विधाभोक्तृत्वंव्य
क्ति।।कर्तृरूपेणेति।।हिरण्यगर्भादिव्यवच्छेदार्थंविशिनष्टि।।महांतमितिस्वपरिकरोपकारिणंराजानंव्यावर्तयति।।प्रत्युपकारेति।।ईश्व
—रस्थांत्युदस्यतिसर्वभूतानामिति।।नहितत्रतत्रव्यवस्थितकर्मतत्फलसंसर्गित्वंस्यादित्याशंक्याह।।सर्वकर्मेति।।नचतत्स्वबुद्धितद्।।०

ॐएवंसमाहितचित्तेनकिंविज्ञेयमितिचोच्यते।।भोक्तारंयज्ञतपसांसर्वलोकमहेश्वरं।।सुहृदंसर्वभूतानांज्ञात्वामांशांतिमृच्छति।।२९।।
भोक्तारंयज्ञानांतपसांचकर्तृरूपेणदेवतारूपेणचयज्ञानांसर्वलोकमहेश्वरंसर्वेषांलोकानांमहांतमीश्वरंसर्वलोकमहेश्वरंसुहृदंसर्व
भूतानांसर्वप्राणिनांप्रत्युपकारनिरपेक्षतयोपकारिंसर्वभूतानांहृदयेशयंसर्वकर्मफलाध्यक्षंसर्वप्रत्ययसाक्षिणं।।मांनारायणंज्ञा
त्वाशांतिंसर्वसंसारोपरतिमृच्छतिप्राप्नोति।।इतिश्रीमद्भगवद्गीताभाष्येशंकरभगवत्कृतौपंचमोध्यायः।।समाप्तः।।०।।राम

णं

म

तिसंबंधोपिवस्तुतोस्तीत्याह।।सर्वप्रत्ययेति।।यथोक्तेश्वरपरिज्ञानेफलमभिदधाति।।मांनारायणमिति।।नदेवंकर्मयोगस्यामुख्य
संन्यासापेक्षयाप्रशस्तत्वेपिततोमुख्यसंन्यासस्याधिक्यात्तद्वतोबुद्धिशुद्ध्यादियुक्तस्यकामक्रोधोद्भवंवेगमिहैवसोढुंशक्त॰
स्यशमदमादिमतोयोगाधिकृतस्यत्वंपदार्थाभिज्ञस्यपरमात्मानंप्रत्यक्त्वेनजानतोमुक्तिरितिसिद्धं।।२९।।हरिॐतत्सदिति
श्रीमत्परमहंसपरिव्राजकाचार्यश्रीशुद्धानंदभगवत्पूज्यपादशिष्यश्रीमदानंदज्ञानविरचितेश्रीमद्गीताभाष्यव्याख्या
।।नेपंचमोध्यायःसमाप्तः।। ५।।श्रीरामार्पणमस्तु।।

श्रीगणेशाय नमः ॥ ध्यानयोगप्रस्तावानंतरं तद्योग्यताहेतुकर्मणः स्तुतिं भगवानुक्तवानित्याह ॥ भगवानिति ॥ पूर्वोत्तराध्याय
योः संगतिमभिदधानो वृत्तमनूद्य अध्यायांतरमवतारयति ॥ अतीतेति ॥ सम्यग्दर्शनप्रकरणे ध्यानयोगस्य प्रसंगाभावं प्र
स्फुदस्यति ॥ सम्यगिति ॥ संग्रहविवरणयोरानंतर्याद्ध्याययोर्युक्तं हेतुहेतुमत्त्वमिति भावः ॥ अध्यायसंबंधमभिधायानाश्रितः कर्मफलमित्यादिश्लोकद्वयतात्पर्यमाह ॥ तत्रेति ॥ कर्मयोगस्य संन्यासहेतोर्मर्यादां दर्शयितुं सांगं च योगं विवरितुमध्या

श्रीभगवानुवाच ॥ अतीतानंतराध्याये ध्यानयोगस्य सम्यग्दर्शनं प्रत्यंतरंगस्य सूत्रभूताः श्लोकाः स्पर्शान्कृत्वाब ॥
हिरित्यादयऽपदिष्टास्तेषां वृत्तिस्थानीयोऽयं षष्ठोध्याय आरभ्यते ॥ तत्र ध्यानयोगस्य बहिरंगं कर्मेति यावत् ध्यानयो
गारोहणसामर्थ्यं तावत् गृहस्थेनाधिकृतेन कर्तव्यमेव कर्मेत्यनस्तत्र स्तौति ॥ ननु किमर्थं ध्यानयोगारोहणसीमाक
रणं ॥ यावतानुष्ठेयमेव विहितं कर्म यावज्जीवं नारुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते इति विशेषणादारूढस्य च शमेनैव

संबंधाकरणात् ॥

ये प्रवृत्ते सतीति सप्तम्यर्थः संन्यासिना कर्तव्यं कर्मेत्यपि प्रतिभासं व्युदस्यति ॥ गृहस्थेनेति ॥ कर्तव्यस्य स्तुतियोग्यत्वमतः शब्दा
र्थः ॥ समुच्चयवादी सीमाकरणमाक्षिपति ॥ नन्विति ॥ यावज्जीवश्रुतिर्ध्यानारोहणसामर्थ्येऽसत्यपि कर्मानुष्ठानस्य दुर्वारत्वादिति ॥
हेतुमाह ॥ यावदिति ॥ भार्यावियोगादिप्रतिबंधाद्यावज्जीवश्रुतिचोदितकर्माननुष्ठानवत् वैराग्यप्रतिबंधादपि तदननुष्ठानसंभ-
[illegible] गवतो विशेषणं चचनाश्च न यावज्जीवं कर्मानुष्ठानप्रसक्तिरिति परिहरति ॥ नारुरुक्षोरि ति ॥ छ ॥ श्रीरामाय नमः ॥ छ ॥ ०

गी०टी०
।।

वार्थव्यतिरेकद्वाराद्वै विलेति।।आरुरुक्षोरित्यादिना।।आरोढुमिच्छतीत्यारुरुक्षुरित्यत्रारोहणेच्छाविशेषणं आरोहणं कृत
वानित्यारूढः इत्यत्र पुनरिच्छाविषयभूतमारोहणं विशेषणं एवं शमकर्मविषययोर्भेदेन विशेषणं मर्यादाकरणानंगीकरणे
विरुद्धमापद्येत।।तयोरेवं विभागकरणं च भागवतं सीमांऽगीकारेन युज्येतेत्यर्थः।।विशेषणविभागकरणयोरस्य तथासि
द्धिमाशंकते।।नचेति।।व्यवहारभूमिः सत्त्वमार्थः षष्ठीनिर्द्धारणे।।भगवत्त्वधिकारिणं त्रैविध्यं तथापि प्रकृते विशेषणा-

आरुरुक्षोरारूढस्य च शमः कर्म चोभयं कर्तव्यत्वेनाभिप्रेतं चेत्स्यात्।।आरुरुक्षोरारूढस्येति शमकर्मविषयभेदेन
विशेषणं विभागकरणं चानर्थकं स्यात्।।तत्राऽश्रमिणां कश्चिद्योगमारुरुक्षुर्भवत्यारूढश्च कश्चिदन्येनारुरुक्षवो
न चारूढास्तानपेक्ष्यारुरुक्षोरारूढस्येति विशेषणं विभागकरणं चोपपद्यत एवेति चेन्।।न तस्यैवेति वचनात्।।५।।

हो किमायातमित्याशंक्य तत्तीयापेक्षयानुपपत्तिरित्याह।।नानपेक्ष्येति आरुरुक्षोआरूढस्य च भेदेन तस्यैवेति प्रकृतपरामर्शानुप
पत्तिरिति निदूषयति।।न तस्येति।।यद्यनारुरुक्षुं पुरुषमपेक्ष्यारुरुक्षोरिति विशेषणं तस्य च कर्मारोहणकारणमनारूढं च पु
रुषमपेक्ष्यारूढस्येति विशेषणं तस्य च शमः संन्यासो योगफलप्राप्तौ कारणमिति विशेषणविभागकरणयोरुपपत्तिस्तदाऽ
रुरुक्षोरारूढस्य च भिन्नत्वात्प्रकृतपरामर्शिना तच्छब्दस्यानुपपत्तेर्न युक्तमित्थं विशेषणोपादानमित्यर्थः।।५।।०।।७

अ६।।राम
१३४।।

किंच योगमारुरुक्षोस्तदारोहणे कारणं कर्मैस्यात्तत्का पुनर्योगारूढस्येति योगशब्दस्य योगाख्यो योगं पूर्वमारुरुक्षुरासीनस्यैवापे
क्षितं योगमारूढस्यतत्स्वप्राप्तौ कर्मसंन्यासः शमशब्दवाच्यो हेतुत्वेन कर्तव्य इति वचनादारुरुक्षोरारूढस्य चाभिन्नत्वप्रत्य
भिज्ञानाच्च तयोर्भिन्नत्वं शंकितुं शक्यमित्याह॥ पुन[illegible]ति॥ यत्तु यावज्जीवश्रुतिविरोधादारोहणासीमाकरणं कर्मणोऽनुचि

पुनर्योगग्रहणाच्च योगारूढस्येति य आसीन् यं पूर्वं योगमारुरुक्षुस्तस्यैवारूढस्य शम एव कर्तव्यः कारणं योग
फलं प्रत्युच्यतेऽतस्तेन न यावज्जीवं कर्तव्यत्वप्राप्तिः कस्यचिदपि कर्मणो योगविभ्रष्टवचनाच्च गृहस्थस्य चेत्क
र्मिणो योगो विहितः षष्ठेध्यायेस योगविभ्रष्टोपि कर्मगतिं कर्मफलं प्राप्नोतीति तस्य नाशाशंकाऽनुपपन्ना स्यात्

तमितितन्नेत्याह॥ इत्यत इति॥ पूर्वोक्तरीत्या कर्मतत्त्यागयोर्विभागोपपत्तौक्तनेरस्य विषयत्वाद्योगमारूढस्य च मुमुक्षोर्जिज्ञास
मानस्य नित्यनैमित्तिककर्मस्वपि परित्यागसिद्धिरित्यर्थः॥ इतश्च यावज्जीवं कर्म कर्तव्यं न भवतीत्याह॥ योगेति॥ संन्यासि
योगभ्रष्टस्य विनाशशंकावचनाद्यावज्जीवं कर्म कर्तव्यं न प्रतिभातीत्यर्थः ननु योगभ्रष्टशब्देन गृहस्थस्यैवाभिधानात्तस्यै
वास्मिन्नध्याये योगविधानाद्योगारोहणायोग्यत्वे सत्यपि यावज्जीवं कर्म कर्तव्यमिति नेत्याह॥ गृहस्थस्येति॥ तेनापि
[illegible]णाकृतस्य कर्मणो मोक्षातिरिक्तफलानारंभकत्वाद्योगभ्रष्टोसौ छिन्नाभ्रमिव नश्यतीति शंका सावकाशेत्याशंक्याह॥

टी०॥

हीति ॥ अपौरुषत्वान्निर्दोषाद्वेदात्फलदायिनी कर्मणः स्वाभाविकी शक्तिरधिगता अस्त्र भावश्चस्य ततः सिद्धत्वाच्च कर्म
ल्लवैतत्वमतो मोक्षातिरिक्तस्यैव फलस्य कर्मारंभकमिति कर्मी योगभ्रष्टोपि कर्मगतिं गच्छतीति निरवकाशाशंकेत्यर्थः ॥ ननु
मुमुक्षुणा काम्यप्रतिषिद्धयोरकरणात्कृतयोश्च नित्यनैमित्तिकयोरफलत्वात्कथं तदीयस्य कर्मणो नियमेन फलारंभकत्वं न
चाह ॥ नित्यस्य चेति ॥ चकारेण नैमित्तिकं कर्मानुकृष्यते वेदप्रमाणकत्वेपि नित्यनैमित्तिकयोरफलत्वे दोषमाह ॥ अन्यथेति

अवश्यं हि कृतं कर्म काम्यं नित्यं वा मोक्षस्य नित्यत्वादनारभ्यत्वे सति स्वफलमारभत एव ॥ नित्यस्य च कर्मणो वे
दप्रमाणावबुद्धत्वात्फलेन भवितव्यमिति आवोचामाऽन्यथा वेदस्यानर्थक्यप्रसंगादिति ॥ न च कर्मणि सत्युभ
विभ्रष्टवचनमर्थवत् ॥ कर्मणो विभ्रंशकारणानुपपत्तेः ॥ कर्मकृतमीश्वरे संन्यस्येत्यतः कर्तरि कर्मफलं नारभत
इति चेत् ॥

रत्ते कर्मणोनुष्ठितस्य फलारंभकत्वध्रौव्याद्गृहस्थो योगभ्रष्टोपि कर्मगतिं गच्छतीति न तस्य नाशाशंकेति शेषः ॥ इतश्च गृहस्थो
योगभ्रष्टशब्दवाच्यो न भवतीत्याह ॥ न चेति ॥ ज्ञानं कर्म चेत्युभयं ततो विभ्रष्टोयं नश्यतीति वचनं गृहस्थकर्मणि स- १३५ ॥
तिनार्थवद्भवितुमलं तस्य कर्मनिष्ठस्य कर्मणो विभ्रंशहेत्वभावात् ॥ फलस्यावश्यकत्वादित्यर्थः ॥ कृतस्य कर्मणो
मुमुक्षुणा भगवति समर्पणात्कर्तरि फलाऽनारंभकत्वादस्ति भ्रंशकारणमिति शंकते ॥ कर्मेति ॥ ५ ॥ श्रीरामः ॥ ०॥ अ० ६

राजा॥ आराधनत्वबुद्ध्या धनधान्यादिसमर्पणस्याधिकफलहेतुत्वोपलंभादीश्वरे समर्पणं न भ्रंशकारणमिति दूषयति॥ नेत्यादिना॥ अधि
कफलहेतुत्वेपि मोक्षहेतुत्वमिथ्यत्वमिति शंकते॥ मोक्षायेति॥ न देवचोद्यं विवृणोति॥ स्वकर्मणामिति॥ सहकारिसामर्थ्येनस्य फ
लांतरं प्रत्युपायत्वासिद्धिरिति हेतुं सूचयति॥ योगेति॥ ध्यानसहितसंन्यासस्य मोक्षौपयिकत्वे कुतो योगभ्रष्टमधिकृत्य नाशशंके
त्यत आह॥ योगात्त्रेति॥ सहकार्यभावे सामग्र्यभावात्फलानुपपत्तेर्युक्ता नाशशंकेत्यर्थः॥ ध्यानसहितमीश्वरे कर्मसमर्पणं मो

नेश्वरे संन्यासस्याधिकतरफलहेतुत्वोपपत्तेर्मोक्षायैवेति चेन्न॥ स्वकर्मणां कृतानामीश्वरे न्यासो मोक्षायैव न फलां
तराय योगसहितो योगाच्च विभ्रष्ट इतिअनन्तत्वं प्रति नाशाशंकायुक्तैवेति चेन्नैकाकी यतचित्तात्मा निराशीरप
रिग्रहो ब्रह्मचारिव्रते स्थित इति कर्मसंन्यासविधानात् न चात्र ध्यानकाले स्त्रीसहायत्वाशंकायै नैकाकित्वं विधीयते॥

क्षायेत्यत्र प्रमाणाभावाद्गृहस्थो योगभ्रष्टशब्दवाच्यो न भवतीति॥ दूषयति॥ नेति गृहस्थस्य योगभ्रष्टवाच्यताभावे हेत्वंतरमाह॥
एकाकीति॥ न खल्वेतानि विशेषणानि गृहस्थसमवायीनि संभवंतीति तेन तस्य ध्यानयोगविध्यभावात्तं प्रति योगभ्रष्टवचनमु
चितमित्यर्थः॥ एकाकित्व नचनं गृहस्थस्यापि ध्यानकाले स्त्रीसहायत्वाभावाभिप्रायेण भविष्यतीत्याशंक्याग्निहोत्रादि न
।तस्य पत्नीसाध्यत्वाभावादाँप्रासनिषेधप्रसंगात्तत्रैवमित्याह॥ न चात्रेति॥ ५॥ श्रीराय नमः॥ श्रीहनुवंतायनमः॥

दीपि॰ ॥ ॥

ति रे [illegible] तरपर्यालोचनायामपि नायमेकाकीशब्दो रहःस्थपरो भवितुमर्हतीत्याह ॥ नचेति ॥ किंच रहःस्थस्यैवैकाकि ॥ त्वादिविव
क्षित्वाद्ध्याननयोगविधौ तं प्रत्युभयभ्रष्टप्रश्नो नोपपद्यत इत्याह ॥ उभौ इति ॥ न हि रहःस्थं प्रत्युभय यस्माज्ज्ञानात्कर्मणश्च विभ्रष्टत्वमुपेत्य ये २
प्रष्टुं युज्यते ॥ तस्य ज्ञानांशेऽपि कर्मणस्तदभावादनुष्ठीयमानकर्मांशेऽपि प्रागनुष्ठितकर्मवत्स्यात्फलप्रतिलंभादेः तोयपोत्प्र
श्नालोचनायां न रहःस्थं प्रति ध्यानविधानोपपत्तिरित्यर्थः ॥ ननु भगवता संन्यासस्य प्रतिषिद्धत्वाद्रहःस्थस्यैव योगविधानात्तस्यैव
योगभ्रष्टशब्दवाच्यत्वमिति शंकते ॥ अनाश्रित इत्यनेनेति ॥ भगवद्वाक्यं न प्रति षेधपरमिति परिहरति ॥ तथ्यानेति ॥ स्तुति

न च रहःस्थस्य च निराशीरपरिग्रहत्वादिवचनमनुकूलमिति ॥ उभयविभ्रष्टप्रश्नाऽनुपपत्तेश्च ॥ अनाश्रित इत्यनेन कर्मि
ण एव योगित्वं संन्यासित्वं चोक्तं ॥ प्रतिषिद्धं च निरग्नेरक्रियस्य च संन्यासित्वं योगित्वं चेति चेन्न ध्यानयोगं प्रति बहिरं
गस्य सतः कर्मणः फलाकांक्षासंन्यासस्तुतिपरत्वात् न केवलं निरग्निरक्रिय एव संन्यासी योगी च किं तर्हि कर्मणि ।
कर्मफलसंगं संन्यस्य कर्मयोगमनुतिष्ठन् सत्वशुद्ध्यर्थं संन्यासी च योगी च भवतीति स्तूयते ॥ न चैकेन वाक्येन कर्म
फलासंगसंन्यासस्तुतिश्चतुर्थाश्रमप्रतिषेधश्चोपपद्यते ॥ न च प्रसिद्धं निरग्नेरक्रियस्य च परमार्थसंन्यासिनः ॥

परत्वमेव स्फोरयति ॥ न केवलमिति ॥ सत्वशुद्ध्यर्थमनुतिष्ठन्निति संबंधः ॥ वाक्यस्योभयपरत्वमाशंक्य भेदप्रसंगान्नैवमित्याह ॥ अ॰ ६ ॥
न चेति ॥ इतोऽपि भगवतः संन्यासाश्रमप्रतिषेधोऽभिप्रेतो न भवतीत्याह ॥ न च प्रसिद्धमिति ॥ तस्य प्रसिद्धं संन्यासित्वं यो १३६ ॥ राम ॥
गित्वं चेति संबंधः ॥ ॥ ५ ॥ श्रीरामचंद्राय नमः ॥ ॥ ॥ ॥ ॥ ॥

त्रसिद्धत्वमेवव्याकरोति ॥ श्रुतीति ॥ इतोपि संन्यासाश्रमं भगवान्न प्रतिषेधतीत्याह ॥ स्ववचेनेति ॥ विरोधमेव साधयति ॥ सर्वक
र्माणीत्यादिना ॥ अनाश्रित इत्यादिवाक्यस्य यथाश्रुतार्थत्वानुपपत्तेः स्तुतिपरत्वमुपपादितमित्युपसंहरति ॥ तस्मादिति ॥ कर्म

श्रुतिस्मृतिपुराणेतिहासयोगशास्त्रेषु विहितं संन्यासित्वं योगित्वं च प्रतिषेधति भगवान् ॥ स्ववचनाविरोधाच्च सर्व
कर्माणि मनसा संन्यस्य नैव कुर्वन्न कारयन्नास्ते मौनी संतुष्टो येन केनचिदनिकेतः स्थिरमतिः ॥ विहाय कामान्यः
सर्वान्पुमांश्चरति निःस्पृहः सर्वारंभपरित्यागीति च तत्र तत्र भगवतोस्ववचनानि दर्शितानि तैर्विरुध्येत चतुर्थाश्रमि
८ल प्रतिषेधस्तस्मात् मुनेर्योगमारुरुक्षोः प्रतिपन्नगार्हस्थ्यस्याग्निहोत्रादि फलनिरपेक्षमनुष्ठीयमानं ध्यानयोगारोह
णसाधनत्वं संशुद्धिद्वारेण प्रतिपद्यत इति स संन्यासी च योगी चेति स्तूयते ॥ ॐ ॥ अनाश्रितः कर्मफलं कार्यं कर्म क
रोति यः ॥ स संन्यासी च योगी च न निरग्निर्न चाक्रियः ॥ १ ॥ अनाश्रितः न आश्रितोऽनाश्रितः किं कर्मफलं यत्तु कर्म
णः फलं यत्तदनाश्रितः कर्मफलतृष्णारहित इत्यर्थः ॥ यो हि कर्मफले तृष्णावान् स कर्मफलमाश्रितो भवति ॥ अयं तु
तद्विपरीतोतोनाश्रितः कर्मफलमेवंभूतः सन् कार्यं कर्तव्यं नित्यं काम्यविपरीतमग्निहोत्रादिकं करोति निर्वर्तयति यः कश्चित् ॥ ॥

फलसंन्यासित्वमत्र मुनिशब्दार्थः ॥ स्तुतिपरं वाक्यमक्षरयोजनार्थमुदाहरति ॥ अनाश्रित इति ॥ कर्मफलेभिलाषो ना
स्तीत्येतावता कथं तदनाश्रितत्ववाचोयुक्तिरित्याशंक्य व्यतिरेकमुखेन विशदयति ॥ यो हीति ॥ कार्यमित्यादिव्याक
[illegible] एवंभूतः सन्निति ॥ कथं कर्मिणः संन्यासित्वं योगित्वं च कर्मित्वविरोधादित्याशंक्याह ॥ य ईदृश इति ॥ स्तुतेरत्र विव

धी०॥ नि[illegible]सान्नानुपपत्तिः श्रोदनीयेतिमन्त्रानः सन्नाह ॥ इत्येवमिति ॥ न निरग्निरित्यादेरर्थमाह ॥ न केवलमिति ॥ अग्नयो गार्हपत्याहवनी

॥ ॥हार्यपचनप्रभृतयः ॥ नन्वनग्नित्वे सिद्धमक्रियत्वमग्निसाध्यत्वात्क्रियाणां तथा च न ॥ निरग्निरित्येनावतैवापेक्षितसिद्धे

यदृशः कर्मीसकर्मेतरेभ्यो विशेष्यत इत्येवमर्थमाह ॥ स संन्यासी च योगी चेति ॥ संन्यासः परित्यागः स यस्यास्ति स संन्या
सी योगी चेति योगश्चित्तसमाधानं स यस्यास्ति स योगी चेत्येवंगुणसंपन्नोऽयं मंतव्यः न केवलं निरग्निरक्रिय एव सं
न्यासी योगी चेति मंतव्यः ॥ निर्गता अग्नयः कर्मांगभूता यस्मात् स निरग्निरक्रियश्च ॥ अनग्निसाधना अप्यविद्यमानाः ॥ २
क्रियास्तपोदानादिकाः यस्यासावक्रियः ॥ ॐ ॥ ननु च निरग्नेरक्रियस्यैव श्रुतिस्मृतियोगशास्त्रेषु संन्यासित्वं योगित्वं च
प्रसिद्धं कथमिह साग्नेः सक्रियस्य च संन्यासित्वं योगित्वं चाप्रसिद्धमुच्यत इति ॥ नैष दोषः कयाचिद्गुणवृत्त्योभयस्य
संन्यासत्वात् संपिपादयिषितत्वात् ॥ कथं कर्मफलसंकल्पसंन्यासित्वं योगांगत्वेन च कर्मानुष्ठानात्कर्मफलसंकल्पस्य बाधितत्
॥ विक्षेपहेतोः परित्यागात् योगित्वं चेति गौणमुभयं ॥

र्न चाक्रिय इत्युक्त्यनर्थकं अर्थपुनरुक्तेरिति तत्राह ॥ अनग्नीति ॥ ३ ॥ उत्तरश्लोकस्य तात्पर्यं दर्शयितुं व्यावर्त्यमानां शंकां दर्शयति ॥ ननु चेति
प्रसिद्धिं परित्याज्या प्रसिद्धिरुपादीयमाना प्रसिद्धिविरुद्धेति चोद्यं दूषयति ॥ नैष दोष इति ॥ उभयस्य साग्नेः सक्रियेच संन्यासित्व आ०६
स्य योगित्वस्य चेत्यर्थः ॥ गुणवृत्त्योभयसंपादनं प्रश्नपूर्वकं प्रकटयति ॥ तत्कथमित्यादिना ॥ ॥ ॥ ॥ ॥ ॥ २३७॥

संभवति मुख्ये संन्यासित्वादौ किमिति गौणमुभयमभीष्टमित्याशंक्य मुख्यस्य कर्मिण्यसंभवाद्गौणमेव स्तौति सिद्धार्थं न दिष्टमित्यभि
प्रेत्याह।। नपुरिति।। चित्तव्याकुलत्वहेतुकाम्यनात्यागाच्चित्तसमाधानसिद्धेर्योगित्वं कर्मिणोऽपि फक्कं संन्यासित्वं तु तस्य विरुद्धमि
मिति शंकमानं प्रस्तुतेर्थे श्लोकमवतारयति।। एनमिति।। परमार्थसंन्यासं प्राहुरिति संबंधः।। इतीत्थं संन्यासस्य प्रामाणिका
भ्युपगतत्वादिति। निशब्दो योऽन्यः योगं फलत्संगापरित्यज्य समाहितचेतस्तयेति शेषः।। यदुक्तं संन्यासित्वं योगित्वं च गृहस्थस्य

न पुनर्मुख्यं संन्यासित्वं योगित्वं चाभिप्रेतमिति।। एतमर्थं दर्शयितुमाह।। यं संन्यासमिति प्राहुर्योगं तं विद्धि पांडव।। न ह्यसं
।।न्यस्तसंकल्पो योगी भवति कश्चन।। यं सर्वकर्मतत्फलपरित्यागलक्षणं परमार्थसंन्यासमिति प्राहुः श्रुतिस्मृतिविदो यो
गं कर्मानुष्ठानलक्षणं तं परमार्थसंन्यासं विद्धि जानीहि पांडव।। कर्मयोगस्य प्रवृत्तिलक्षणस्य तद्विपरीतेन निवृत्तिलक्ष
णेन परमार्थसंन्यासेन कीदृशं सामान्यमंगीकृत्य तद्भाव उच्यत इत्यपेक्षायामिदमुच्यते।। अस्ति परमार्थसंन्यासेन सादृ
श्यं कर्तृद्वारकं कर्मयोगस्य।। यो हि परमार्थसंन्यासी स त्यक्तसर्वकर्मसाधनतया सर्वकर्मतत्फलविषयं संकल्पं।। ०।।

प्यगौणमिति तदुत्तरार्द्धयोजनया प्रकटीकर्तुमुत्तरार्धमुत्थापयति।। कर्मयोगस्येति।। कर्मयोगस्य परमार्थसंन्यासेन कर्तृद्वा
कं साम्यमुक्तं व्यक्तीकरोति।। यो हीति।। त्यक्तानि सर्वाणि कर्माणि साधनानि च येन स तथोक्तस्तस्य भावस्तत्ता तया
र्वविषयं तत्फलविषयं च संकल्पं सजतीत्यर्थः।। ५।। संकल्पत्यागेन तत्कार्यकामत्यागस्तत्यागेन तज्जन्यप्रवृत्तित्याग

॰६ ॥ प्र[illegible]तीत्यभिसंधाय विशिनष्टि ॥ प्रवृत्तीति ॥ कर्मण्यपि यथोक्तसंकल्पसंन्यासित्वमस्तीत्याह ॥ अयमपीति ॥ तदपरित्यागे व्याकुल
॥ तया कर्मानुष्ठानस्यैव दुःशकत्वा॥दित्यर्थः उक्तमेव साम्यं व्यक्तीकुर्वन्व्यतिरेकं दर्शयनिरसेन ॥मिति ॥ फलसंकल्पापरित्यागे किमि
समग ॥ नवत्ताभावस्तत्राह ॥ फलेति ॥ व्यतिरेकमुखेनोक्तमर्थमन्वयमुखेनोपसंहरति तस्मादिति ॥ हिशब्दार्थस्य यस्मादित्युपक्रम्य तस्मा

प्रवृत्तिहेतुं कामकारणं संन्यस्यति ॥ अयमपि कर्मयोगी कर्म कुर्वाण एव फलविषयं संकल्पं संन्यस्यतीत्यनेनमर्थं दर्शयिष्य
न्नाह ॥ नहि यस्मादसंन्यस्तसंकल्पोऽसंन्यस्तोऽपरित्यक्तः फलविषयः संकल्पोऽभिसंधिर्येन सोऽसंन्यस्तसंकल्पः
कश्चन कश्चिदपि कर्मयोगी समाधानवान् न भवति न संभवतीत्यर्थः फलसंकल्पस्य चित्तविक्षेपहेतुत्वात् ॥ तस्मात्
योगी यः कश्चन कर्मी संन्यस्तफलसंकल्पो भवेत् ॥ स योगी समाधानवान् अविक्षिप्तचित्तो भवति ॥ चित्तविक्षेपहेतोः
फलसंकल्पस्य संन्यस्तत्वादित्यभिप्रायः ॥ एवं परमार्थसंन्यासकर्मयोगयोः कर्तृद्वारकं संन्याससामान्यमपेक्ष्य यं
संन्यासमिति प्राहुर्योगं तं विद्धि पांडवेति कर्मयोगस्य स्तुत्यर्थं संन्यासित्वमुक्तं ध्यानयोगस्य कत्वनिपरेक्षः कर्मयोगो बहिरं
गसाधनमिति तेन संन्यासत्वेन स्तुतत्वादधुना कर्मयोगस्य ध्यानयोगसाधनत्वं दर्शयति ॥ ॥ ॥ ॥ ॥ ॥ ॥ अ॰ ६

दित्यनेन संबंधः ॥ कर्मणां प्रतिपद्योक्तविधौ हेतुहेतुमद्भावमभिप्रेत्य द्वितीयविधौ हेतुमाह ॥ चित्तविक्षेपेति ॥ ॥ पूर्वश्लोके पूर्वोत्तरार्धाभ्यामुक्त १३८ ॥ राम ॥
मनुवदति ॥ एवमिति ॥ परमार्थसंन्यासस्य कर्मयोगांतर्भावे कर्मयोगस्यैव सदा कर्तव्यत्वमापद्येत तेनेतरस्यापि कर्तव्यत्वसिद्धेरित्याशंक्यो
॥ क्तानुवादपूर्वकमुत्तरश्लोकतात्पर्यमाह ॥ ध्यानयोगस्येति ॥

भाविस्यारुत्यामुनेर्योगमारोढुमिच्छोरिष्यमाणस्यं योगारोहणस्यं कर्महेतुश्चेदपेक्षितं योगमारूढस्यापि तत्फलप्राप्तौ तदेव कारणं
भविष्यति तस्य कारणत्वे क्लृप्तशक्तित्वादित्याशंक्याह ।। योगारूढस्येति ।। अनारूढस्येत्यस्यैवार्थस्य द्योतयति ध्यानेति मुनित्वं कर्मफ
लसंन्यासित्वेनोपचारि[illegible]कमित्याह ।। कर्मफलत्वेति ।। साधनं चित्तशुद्धिद्वारा ध्यानयोगप्राप्तौ द्वायां इति शेषः ।। तस्येति ज्ञप्तकल

२ ॐ ।। आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते ।। योगारूढस्य तस्यैव शमः कारणमुच्यते ।। ३ ।। आरुरुक्षोरारोढुमिच्छोरना
रूढस्य ध्यानयोगेऽवस्थातुमसमर्थस्येत्यर्थः ।। कस्यारुरुक्षोर्मुनेः कर्मफलसंन्यासिन इत्यर्थः ।। किं आरुरुक्षोर्योगं कर्म २
कारणं साधनमुच्यते ।। योगारूढस्य पुनस्तस्यैव शमउपशमः सर्वकर्मभ्यो निवृत्तिः ।। कारणं योगारूढत्वस्य साध
नमुच्यत इत्यर्थः यावत् यावत् कर्मभ्य उपरमते तावत् निरायासस्य विजितेंद्रियस्य चित्तं समाधीयते ।। तथा
।। सन्निसरिति स योगारूढो भवति ।।

स्य कर्मणो ग्रहणं एवकारो भिन्नक्रमः शमशब्देन संबध्यते कस्मात्स्य योगव्यवच्छेदेन शमो हेतुरिति त[illegible]ाह ।। योगारूढत्वस्ये
ति ।। सर्वव्यापारोपरमरूपोपशमस्य योगारूढत्वे कारणत्वं विवृणोति ।। यावद्यावदिति ।। सर्वकर्मनिरन्ता वायासाभावाद् हिं
तोकनैंद्रियग्रामस्य चित्तसमाधाने योगारूढत्वं सिध्यतीत्यर्थः ।। सर्वकर्मोपरमस्य पुरुषार्थसाधनत्वे पौराणिकीं सं

१०दी॰ प्रतिपा॰॥ तथा चेति॥ एकता सर्वेषु भूतेषु वस्तुनो द्वैताभावोपलक्षितत्वमिति प्रतीतिः समता तेष्वेवौपाधिकविशेषेऽपि स्वतो निर्विशेष
सत्यता तेषामेव हितवचनं शीलं स्वभावसंपत्तिः स्थितिः स्थैर्यं दंडनिधानमहिंसनं आर्जवमवक्रत्वं क्रियाभ्यः सर्वाभ्यः शकाशाद्गुण
॥ रेभ्यो व्युत्पेतदुक्तं सर्वं यथा यादृशमेतादृशं नाम्य ब्राह्मणस्याविघ्नं पुरुषार्थसाधनमस्ति तस्मादेतदेवास्य निरातिशयपुरुषार्थसाधनमित्यर्थः॥३॥
पाग ।त्तौ कारणकथनानंतरं प्राप्तिकालं दर्शयितुं श्लोकांतरमवतारयति॥ अथेति॥ समाधानावस्थायां देहत्युच्यते अत एवोक्तं समाधी ॥७

तथा चोक्तं॥ नैतादृशं ब्राह्मणस्यास्ति वित्तं यथैकता समता सत्यता च॥ शीलं स्थितिर्दंडनिधानमार्जवं ततस्ततश्चोपरमः क्रियाभ्य
इति॥३॥ अथेदानीं कदा योगारूढो भवतीत्युच्यते॥ यदा हि नेंद्रियार्थेषु न कर्मस्वनुषज्जते॥ सर्वसंकल्पसंन्यासी योगारूढस्तदोच्यते ४
यदा समाधीयमानचित्तो योगी हि इंद्रियार्थेषु इंद्रियाणामर्थाः शब्दादयस्तेष्विंद्रियार्थेषु कर्मसु च नित्यनैमित्तिककाम्यप्रतिषिद्धेषु
प्रयोजनाभावबुद्ध्या नानुषज्जते अनुषंगं कर्तव्यताबुद्धिं न करोतीत्यर्थः॥ सर्वसंकल्पसंन्यासी सर्वान्संकल्पानिहामुत्रार्थका
महेतून्संन्यसितुं शीलमस्येति स सर्वसंकल्पसंन्यासी॥ योगारूढः प्राप्तयोगः इत्येतत्तदा तस्मिन्काले उच्यते स सर्वसंकल्प
संन्यासी इति वचनात्॥ सर्वांश्च कामान्कामात्मकानि सर्वाणि च कर्माणि च संन्यसेदित्यर्थः॥ श्रीरामाय नमः॥ श्रीगुरु॥

यमानचित्तो योगीति शब्दादिषु कर्मसु चानुषंगस्य योगारोहण प्रतिबंधकत्वात्तदभावस्य तदुपायत्वं प्रसिद्धमिति द्योतयितुं हीत्युक्तं॥ सर्वेषा
मपि संकल्पानां योगारोहण प्रतिबंधकत्वमभिप्रेत्य सर्वसंकल्पसंन्यासीत्यत्र विवक्षित मर्थमाह॥ सर्वानिति॥ सर्वसंकल्पसंन्यासे अ॰ ०६
पि सर्वेषां कामानां कर्मणां च प्रतिबंधकत्वसंभवे कुतो योगप्राप्तिरित्याशंक्याह॥ सर्वानिति॥ श्चे॥ ॥ ॥७ १३१ ॥राम॥

सर्वसंकल्पपरित्यागे यथोक्तविषयानुष्ठानमयत्नसिद्धमिति मन्वानः सन्नाह ॥ संकल्पेति ॥ मूलोन्मूलने च तत्कार्यनिवृत्तिरयत्न
लभ्येति भावः ॥ तत्र प्रमाणमाह ॥ संकल्पमूलः खलु इति ॥ तच्चान्वयव्यतिरेकावभिप्रेत्योक्तमुपपादयति ॥ कामेति ॥ सर्वसंकल्पाभा
वे कामाभाववत्कर्माभावस्यासिद्धत्वेपि कर्मणां कामकार्यत्वात्तन्निवृत्तिप्रयुक्तामपि निवृत्तिमुपन्यस्यति ॥ सर्वकामेति ॥ यदुक्तं
कर्मणां कामकार्यत्वं तत्र श्रुतिस्मृती प्रमाणयति ॥ स यथेति ॥ स पुरुषः स्वरूपमजानन्नन्यत्फलकामो भवति न तत्साधनम

संकल्पमूलो हि सर्वे कामा ४ संकल्पमूलः कामो वै यज्ञाः संकल्पसंभवाः ॥ काम जानामि ते मूलं संकल्पात्किल जायसे ॥
न तु संकल्पयिष्यामि समूलो न भविष्यसि इत्यादिस्मृतेः ॥ सर्वकामपरित्यागे च सर्वकर्मसंन्यासः सिद्धो भवति स यथा का
मो भवति तत्क्रतुर्भवति यत्क्रतुर्भवति तत्कर्म कुरुते इत्यादिश्रुतिभ्यो यद्यद्धि कुरुते कर्म तत्तत्कामस्य चेष्टितमित्यादि
स्मृतिभ्यश्च ॥ न्यायाच्च न हि सर्वसंकल्पसंन्यासे कश्चित्स्पंदितुमपि शक्तस्तस्मात्सर्वसंकल्पसंन्यासीति वचनात् ॥
सर्वान्कामान्सर्वाणि च कर्माणि परित्याजयति भगवान् ॥ यदैवं योगारूढस्तदानेन आत्माऽत्मनोद्धृतो भवति संसारादनर्थव्रातात् ॥

नुष्ठेयतया बुद्धौ धारयतीति तत्क्रतुर्भवति यश्चानुष्ठेयतया गृह्णाति तदेव कर्म बहिरपि करोतीति कामाधीनं कर्मोक्तमिति श्रुत्यर्थः ॥ काम
जन्यं कर्मेत्यन्वयव्यतिरेकसिद्धमिति द्योतयितुं स्मृतौ हिशब्दः ॥ न्यायमेवं दर्शयति ॥ सर्वसंकल्पेति ॥ स्वापादावदर्शनादित्यर्थः ॥ नित्य
मेत्तिकं कर्मानुष्ठानं दूरतो निरस्तमिति वक्तुमपि शब्दः श्रुतिस्मृतिन्यायसिद्धमर्थमुपसंहरति ॥ तस्मादिति ॥ ४ ॥ यो
स्य किं स्यादित्याशंक्याह ॥ यदेवमिति ॥ योगारोहणस्य दृष्टादृष्टोपायैरवश्यकर्तव्यतायै मुक्तिहेतुत्वं तद्विपर्ययस्या

मतु नहेतुत्वं च दर्शयति ॥ अतइति ॥ तत्रहेतुमाह ॥ आत्मैव हीति ॥ उद्धरणापेक्षामात्मनः सूचयति ॥ संसारेति ॥ संसारादूर्ध्वं हरणं
दृशित्याशंक्याह ॥ योगारूढतामिति ॥ योगप्राप्तावनास्थातु न कर्तव्येत्याह ॥ नात्मानमिति ॥ योगप्राप्त्युपायश्रवणेनानुष्ठीयत्नेन तायो
गाभावे संसारपरिहारासंभवात्तस्मात् अधोनीतः स्यादित्यर्थः ॥ नन्वात्मानं संसारनिमग्नं तदीयो बंधुस्तस्मादुद्धरिष्यतीति नेत्याह ॥
आत्मैव हीति ॥ कुतोऽवधारणमन्यस्यापि प्रसिद्धस्य बंधोः संभवान्नत्राह ॥ नहीति ॥ अन्यो बंधुः सन्नपि संसारमुक्तये न भवति

अतः ॥ उद्धरेदात्मनात्मानं ~~नात्मानं~~ नात्मानमवसादयेत् ॥ आत्मैव ह्यात्मनो बंधुरात्मैव रिपुरात्मनः ॥ ५ ॥ उद्धरेत् संसा
रसागरे निमग्नमात्मानं आत्मना तत् उत् ऊर्द्धं हरेदुद्धरेत् योगारूढतामापादयेदित्यर्थः ॥ नात्मानमवसादयेत् नाधो नयेत्
नाधोगमयेत् आत्मैव हि यस्मादात्मनो बंधुर्न ह्यन्यः कश्चित् बंधुर्यः संसारमुक्तये भवति बंधुरपि तावत् [illegible] मोक्षं प्रति प्र
तिकूल एव स्नेहादिबंधनायतनत्वात् ॥ तस्मात् युक्तमवधारणमात्मैव ह्यात्मनो बंधुरिति ॥ आत्मैव रिपुः आत्मैवं
रि[illegible]ः शत्रुर्योऽन्योऽपकारी बाह्यः शत्रुः सोऽप्यात्मप्रयुक्त एवेति युक्तमेवावधारणं आत्मैव रिपुरात्मन इति ॥ ॐ आत्मैव
बंधुरात्मैव रिपुरात्मन इत्युक्तं तत्र किंलक्षण आत्मात्मनो बंधुः किंलक्षणो वात्मा आत्मनो रिपुरुच्यते ॥ ५ ॥ ॥ ५ ॥

त्वेन तदुपपादयति ॥ बंधुरपीति ॥ स्नेहादीत्यादिशब्दात्तदनुगुणवर्तिविषयत्वं गृह्यते ॥ आत्मातिरिक्तस्यापि शत्रोरपकारिणः सुप्रसिद्धत्वादवधारण
मनुचितमित्याशंक्याह ॥ योऽन्य इति ॥ ५ ॥ उक्तमनूद्य प्रश्नपूर्वकं श्लोकांतरमवतारयति ॥ आत्मैवेत्यादिना ॥ ५ ॥ श्रीरामः ॥ ०

एकस्यैवात्मनोमिथोविरुद्धंवंधुत्वंरिपुत्वंचतल्लक्षणभेदमंतरेणयुक्तमितिचोदितेवशीकृतसंघातस्यात्मानंप्रतिबंधुत्वमितरस्यशत्रुत्वमिति
विरोधंदर्शयति।।वंधुरित्यादिना।।वशीकृतसंघातस्यविक्षेपाभावादात्मनिसमाधानसंभवादुपपन्नमात्मानंप्रतिबंधुत्वमितिसाधयति।।
नस्येति।।अवशीकृतसंघातस्यपुनर्विक्षेपोपपत्तेरात्मनिसमाधानायोगादात्मानंप्रतिशत्रुभावेप्रसिद्धशत्रुवदात्मैवशत्रुत्वेनवर्ते
तेत्युतरार्द्धंव्याकरोति।।अनात्मनइति।।दृष्टांतंव्याचष्टे।।यथेति।।उक्तदृष्टांतवशादवशीकृतसंघातस्यस्वस्यहिताऽनाचरणादा

बंधुरात्मात्मनस्तस्ययेनात्मैवात्मनाजितः।।अनात्मनस्तुशत्रुत्वेवर्तेतात्मैवशत्रुवत्।।६।।बंधुरात्मात्मनस्तस्यतस्य
आत्मनःसआत्मावंधुर्येनात्मैवात्मनाजितःआत्माकार्यकरणसंघातोयेनवशीकृतोजितेंद्रियइत्यर्थःअनात्म
नअजितात्मनस्तुशत्रुत्वेशत्रुभावेवर्तेतआत्मैवशत्रुवत्।।यथाऽनात्माशत्रुरात्मनोपकारीतथात्मनोपकारेव
र्तेनइत्यर्थः॥जितात्मनःप्रशांतस्यपरमात्मासमाहितः।।शीतोष्णसुखदुःखेषुतथामानापमानयोः।।७।।जिता
त्मनःकार्यकरणसंघातआत्माजितोयेनसजितात्मातस्यजितात्मनःप्रशांतस्यउपशांतस्यपरमात्मासमाहितःसाक्षादात्मभावेन

वर्तेतइत्यर्थः॥

त्मानंप्रतिशत्रुरेवेतिदार्ष्टांतिकमाह।।तथेति।।६।।कथंसंयतकार्यकरणस्यबंधुरात्मेतितत्राह।।जितात्मनइतिजितकार्यकरणसं
घातस्यप्रकर्षेणोपरतबाह्याभ्यंतरकरणस्यपरमात्माविक्षेपेणपुनःपुनरनभिभूयमानोनिरंतरंचित्तेप्रथततसँरइत्यर्थः।।जितात्मानंसंन्यस्त
सर्वकर्माणमधिकारिणंप्रदर्श्ययोगंमानिदर्शयति।।शीतेति।।समःस्यादित्यध्याहारःपूर्वार्द्धंव्याचष्टे।।जितेत्यादिना।।नकेवलंतस्य
परमात्मासाक्षादात्मभावेनवर्ततेकिंतुशीतोष्णादिभिरपिनासौचाल्यतेनतत्तानादित्युत्तरार्द्धंविभजते।।किंचेति।।तेषुसमःस्यादिति

संवधः॥७॥

चित्तसमाधानमेवं विशिष्टफलं चेदिष्टं तर्हि कथंभूतः समाहितो व्यवह्रियतेऽतआह ॥ ज्ञानेति ॥ परोक्षाभ्यां ज्ञानविज्ञानाभ्यां संजातातृ परोक्षा१
त्स्तयोः विक्रियो हर्षविषादकामक्रोधादिरहितो योगी युक्तः समाहित इति व्यवहारभागी भवतीति पदत्रयव्याख्यानेन दर्शयति ॥
ज्ञानमित्यादिना ॥ स च योगी परमहंसपरिव्राजकः सर्वत्रोपेक्षाबुद्धिरनतिपक्षाय वैराग्यभागी भवतीति कथयति ॥ स योगीति ॥ ८ ॥

किंच ॥ शीतोष्णसुखदुःखेषु तथा माने अपमाने च मानापमानयोः पूजापरिभवयोः समः स्यात् ॥ ७ ॥ ज्ञानविज्ञानतृप्तात्मा कूट॥
स्थो विजितेन्द्रियः ॥ युक्त इत्युच्यते योगी समलोष्टाश्मकांचनः ॥ ८ ॥ ज्ञानविज्ञानतृप्तात्मा ज्ञानं शास्त्रोक्तपदार्थानां परिज्ञानं विज्ञा
नं तु शास्त्रतो ज्ञातानां तथैव स्वानुभवकरणं ॥ ताभ्यां ज्ञानविज्ञानाभ्यां तृप्तः संजातालंप्रत्ययः आत्मा मनो यस्य स ज्ञा
नविज्ञानतृप्तात्मा कूटस्थोऽप्रकंप्यो भवतीत्यर्थः विजितेन्द्रियश्च ॥ य ईदृशो युक्तः समाहित इति स उच्यते कथ्यते स
योगी समलोष्टाश्मकांचनः लोष्टाश्मकांचनानि समानि यस्य समलोष्टाश्मकांचनः ॥ ८ ॥ किंच सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबंधुषु
साधुष्वपि च पापेषु समबुद्धिर्विशिष्यते ॥ ९ ॥ सुहृदिति ॥ प्रत्युपकारं निरपेक्ष्योपकर्ता मित्रं स्नेहवान् अरिः शत्रुः उदासीनो न
कस्यचित् पक्षं भजते मध्यस्थो यो विरुद्धयोरुभयोर्हितैषी द्वेष्य आत्मनोऽप्रियो बंधुः संबंधी एतेषु साधुष्वपि च शास्त्रार्थानुव॥
॥ र्तिष्वपि च पापेषु प्रतिषिद्धकारिषु सर्वेष्वेतेषु समबुद्धिः ॥ ९ ॥

× सुहृदित्यादिश्लोकार्द्धमेकं पदं × ९

योगारूढस्य प्रशस्तत्वमभ्युपेत्य योगस्यांगांतरं दर्शयति ॥ किंचेति ॥ पदच्छेदः पदार्थोक्तिरिति व्याख्यानांगं संपादयति ॥ सुहृदित्या
दीति ॥ अरिर्नाम परोक्षमपकारकः प्रत्यक्षमप्रियो द्वेष्य इति विभागः समबुद्धिरिति व्याचष्टे ॥ कः किमिति ॥ प्रथमो हि प्रश्नो जाति
गोत्रादिविषयः द्वितीयो व्यापारविषयः उक्तप्रकारेण व्यापृतबुद्धित्वे सर्वोत्कर्षो वा सर्वपापविमोको वा सिध्यतीत्याह ॥

विशिष्यतइति ॥ पाठद्वयेपिसिद्धमर्थंसंगृह्यकथयति ॥ योगारूढानामिति ॥ ९ ॥ यथोक्तविशेषणवतोयोगारूढेष्वनमत्वेयोगानुष्ठानेप्र
यतितव्यमित्यंगाभिधानानंतरंप्रधानमभिदधाति ॥ अतएवमिति ॥ आदरनैरंतर्यदीर्घकालत्वविशेषणत्रयंयोगस्यसूचयति ॥ सतत
मिति ॥ तस्यैवयंचयोगस्यानुपन्यस्यति ॥ रहसीत्यादिना ॥ सर्वदैत्यादरदीर्घकालयोरुपलक्षणं ॥ प्रत्यगात्मानंव्यावर्तयति ॥ अंतःक

कः किंकर्मेत्यव्यापन्नबुद्धिरित्यर्थः ॥ विशिष्यते ॥ विमुच्यतइतिवापाठांतरं योगारूढानांसर्वेषामयमुत्तमइत्यर्थः ॥ अतएवबहुतम
फलप्राप्तये ॥ योगीयुंजीतसततमात्मानंरहसिस्थितः ॥ एकाकीयतचित्तात्मानिराशीरपरिग्रहः ॥ १० ॥ योगीध्यानीयुंजीतसमा
दध्यात् ॥ सततंसर्वदाआत्मानमंतःकरणंरहसिएकांतेगिरिगुहादौस्थितःसन्नेकाकीअसहायोरहसिस्थितःएकाकीचेति
विशेषणात् ॥ संन्यासंकृत्वेत्यर्थः ॥ यतचित्तात्माचित्तमंतःकरणमात्मादेहश्चसंयतौयस्यसयतचित्तात्मानिराशीवी
ततृष्णोऽपरिग्रहश्चपरिग्रहरहितः ॥ संन्यासित्वेऽपित्यक्तसर्वपरिग्रहःसन्युंजीतेत्यर्थः ॥ श्रीरामायनमः ॥ ५

रणमिति ॥ गिरिगुहादावित्यादिशब्देनयोगप्रतिबंधकदुर्जनादिविधुरोदेशोगृह्यते ॥ विशेषणद्वयतात्पर्यमाह ॥ रहसीति ॥ योगंयुंजा
नस्यसंन्यासिनोविशेषणांतराणिदर्शयति ॥ यतेति ॥ ननुसंन्यासित्वेकिमित्यपरिग्रहविशेषणमर्थपुनरुक्तेरित्याशंक्याह
कौपी[illegible]च्छादनेच्छादिपिसक्तिनिवृत्त्यर्थमित्याह ॥ संन्यासित्वेपीति ॥ १० ॥ योगांगानिचोपदिश्योत्तरसंदर्भस्यतात्पर्यमाह ॥ ०८ ॥
नेति ॥ योगस्वरूपकतिपयतदंगप्रदर्शनानंतर्यमथशब्दार्थः ॥ विहारादीनामित्यादिशब्देनयथोक्तासनादिगणावांतरभे

एतत्फलादिकं चेत्यादिशब्देन योगफलं सम्यग्ज्ञानं वें तत्फलं कैवल्यं ततो भ्रष्टस्याप्यंतिकाविनष्टत्वमित्यादि गृह्यते ॥ एवं स
धायनात्पर्ये दर्शिते किमासीनः शयानस्तिष्ठन्वा युंजीतेत्यपेक्षायामनंतरश्लोकतात्पर्यमाह ॥ तत्रेति ॥ निर्धारणे सप्त
मी प्रथमं योगानुष्ठानस्य प्रधानमासनं मासीनः संभवादितिन्यायादितिपावत्॥ विविक्तत्वं द्वेधा विभजते ॥ स्वभावत इति ॥

अथेदानीं योगं युंजन आसनाहारविहारादीनां योगसाधनत्वेन नियमो वक्तव्यः ॥ प्राप्तयोगस्य लक्षणं तत्फला
दिकं चेत्येतत् आरभ्यते तत्रासनमेव तावत्प्रथममुच्यते ॥ शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः ॥ नात्युच्छ्रि
तं नातिनीचं चैलाजिनकुशोत्तरं ॥११॥ शुचौ शुद्धे विविक्ते स्वभावतः संस्कारतो वा देशे स्थाने प्रतिष्ठाप्य स्थिरं
अचलं आत्मन आसनं नात्युच्छ्रितं नात्युच्चं ॥४॥

आसनस्यास्थैर्ये तत्रोपविश्य योगमनुतिष्ठतः समाधानायोगाद्योगासिद्धिरित्यभिसंधाय विशिनष्टि ॥ अचलमिति ॥ आस्यते
स्मिन्निति व्युत्पत्तिमनुसृत्याह ॥ आसनमिति ॥ आत्मन इति परकीयासनव्युदासार्थं पतनभयपरिहारार्थं नात्युच्छ्रितमित्युक्तं ॥४॥०

अ०६॥
१४२॥ राम

नाप्यतिनीचमिति ॥ न्तगात्रपाषाणादिसंश्लेषे वा तत्क्षोभाग्निमांद्यादिसंभावितदोषनिरासार्थं चैलं वस्त्रं अजिनं चर्मप
शूनां च तत्र च मृगस्य कुशाः दर्भास्ते चोत्तरे यस्मिन्नुपरि [illegible]दारभ्य न तथोक्तं प्रथमं चैलं ततोजिनं ततश्च कुशा इति प्रतिप
त्तिक्रमापातितं क्रममतिक्रम्यादौ कुशास्ततोजिनं ततश्चैलमिति क्रमं विवक्षित्वाह ॥ विपरीतोत्रेत्युक्तं ॥११॥ यथोक्तमा
सनं संपाद्य किं कर्तव्यमिति प्रश्नपूर्वकं कर्तव्यं निर्दिशति ॥ प्रतिष्ठाप्येति ॥ योगं युंजानस्येति कर्तव्यताकलापं प्रस्तौति ॥ क

नाप्यतिनीचं तच्च चैलाजिनकुशोत्तरं चैलं अजिनं कुशाश्चोत्तरे यस्मिन्नासने तदासनं चैलाजिनकुशोत्तरं पाठक्र
मात् विपरीतोऽत्र क्रमश्चैलादीनां ॥ प्रतिष्ठाप्येति ॥ तत्रैकाग्रं मनः कृत्वा यतचित्तेंद्रियक्रियः ॥ उपविश्यासने युंज्या
द्योगमात्मविशुद्धये ॥१२॥ तत्र तस्मिन्नासने उपविश्य योगं युंज्यात् ॥ कथं सर्वविषयेभ्य उपसंहृत्यैकाग्रं मनः कृत्वा
यतचित्तेंद्रियक्रियः ॥ चित्तं चेंद्रियाणि च चित्तेंद्रियाणि तेषां क्रियाः संयता यस्य स यतचित्तेंद्रियक्रियः ॥ स किमर्थं
योगं युंज्यात् इत्याहात्मविशुद्धये ॥ अंतःकरणस्य विशुद्ध्यर्थमित्येतत् ॥ बाह्यसाधनमासनमुक्तमधुना शरीरधारणं कथमित्यु च्यते

धमिति सर्वेभ्यो विषयेभ्यः सकाशात्प्रत्याहृत्य मनसो यदेकस्मिन्नेव ध्येये विषये समाधानं यच्च चित्तस्येंद्रियाणां च बाह्यक्रियाणां सम
मनं [illegible]रोधनं तदुभयं कृत्वा योगमनुतिष्ठेदित्याह ॥ सर्वेति ॥ आसने यथोक्ते स्थित्वा यथोक्तया रीत्या योगमनुष्ठानस्य प्रश्नपूर्व
कं फलमाह ॥ स किमर्थमित्यादिना ॥१२॥ उक्तमनूद्यानंतरश्लोकस्यापुनरुक्तमर्थमाह ॥ बाह्यमिति ॥ ५ ॥ श्रीरामयनमः ॥

दी०॥ मदृढत्वं कायः शरीरमध्यं अचलत्वमिति विशेषणमवतार्य तस्य तात्पर्यमाह ॥ सममिति ॥ कार्यकरणयोर्विषयपारवश्यरूपस्वत्वम
॥ चलत्वं स्थिरत्वं स्थैर्यं । किमितीवशब्दलोपो न कल्प्यते स्वनासिकाग्रसंप्रेक्षणमेव योगांगत्वेनात्र विधित्सितं किं न स्यादित्याशंक्याह ॥
न हीति ॥ तर्हि किमत्र विवक्षितमिति ॥ प्रश्नपूर्वकमाह ॥ किं तर्हीति ॥ दृष्टिसंनिपातो दृष्टेश्चक्षुषो रूपादिविषये प्रवृत्तिराहित्यं ॥ ०
कथमसावनायासेन सिध्यतीत्याह ॥ स्वेति ॥ समाधानस्य प्राधान्येनात्र विवक्षितत्वात् दृष्टेर्बहिर्विषयत्वे च तदंगप्रसंगात्तस्यावि

समं कायशिरोग्रीवं धारयन्नचलं स्थिरः संप्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलोकयन् ॥१३॥ समं कायशिरोग्रीवं कायश्च
शिरश्च ग्रीवा च कायशिरोग्रीवं तत्समं धारयन्नचलं च ॥ समं धारयतश्चलनं संभवत्यतो विशिंष्टि अचलमिति ॥ स्थिरः न
स्थिरो भूत्वेत्यर्थः ॥ संप्रेक्ष्य सम्यक् प्रेक्षणं दर्शनं कृत्वेवेतीवशब्दो लुप्तो द्रष्टव्यो न हि स्वनासिकाग्रसंप्रेक्षणमिह वि
वक्षितं ॥ किं तर्हि चक्षुषो दृष्टिसन्निपातः ॥ स च अंतःकरणसमाधानापेक्षो विवक्षितः स्वनासिकाग्रसंप्रेक्षणमे
व चेद्विवक्षितं मनस्तत्रैव समाधीयेत नात्मनि आत्मनि हि मनसः समाधानं वक्ष्यत्यात्मसंस्थं मनः कृत्वेति ॥ ०॥

षयेभ्यो व्यावृत्त्यांतरेव संनिपातो विवक्षितो भावतीत्यर्थः ॥ तथापि कथं स्वनासाग्रसंप्रेक्षणमत्रश्रुतमविवक्षितमित्याशंक्याह ॥ अ० ६॥
स्वनासिकेति ॥ तत्रैव मनः ॥ समाधाने का हानिरित्याशंक्य वाक्यशेषविरोधान्मैवमित्याह ॥ आत्मनि हीति ॥ ५॥ ५॥ १४३ ॥ राम

किंतर्हि संप्रेक्ष्येत्यादौ विवक्षितमित्याशंक्याह ॥ तस्मादिति ॥ दक्षिणोत्तरचक्षुषोर्यद्दृष्टिस्तऽस्या बाह्याद्विषयाद्वैमुख्येनांतरे
वसन्निपतनमत्रस्वकीयं नासिकाग्रं नासिकांतं संप्रेक्ष्येति विवक्षितमित्यर्थः ॥ तत्रैवांतर[illegible]मपि विशेषणमनुकूलमित्याह ॥
दिशश्चेति ॥ अनवलोकयन्न[illegible]तेस्तुतर[illegible]त्रसंबंधः ॥ अंतरांतरा दिशामवलोकनमपि योगप्रतिबंधकमिति तत्प्रतिषेधः ॥
१३ ॥ योगं फं ज्ञानस्य विशेषणांतराणि दर्शयति ॥ किंचेति ॥ अंतःकरणस्य प्रशांती रागद्वेषादिराहित्यं तस्याश्च प्रकर्षो रागा

तस्मादिवशब्दलोपेनाक्ष्णोर्दृष्टिसंनिपातनमेव संप्रेक्ष्ये सूच्यते ॥ स्वं दिशश्चानवलोकयन् दिशां चावलोकनमंतराऽकुर्वन्नि
त्यैतत् ॥ १३ ॥ किंच प्रशांतात्मा विगतभीर्ब्रह्मचारिव्रते स्थितः ॥ मनः संयम्य मच्चित्तो युक्त आसीत मत्परः ॥ १४ ॥ प्रशां
तात्मा प्रकर्षेण शांत आत्माऽन्तःकरणं यस्य सोऽयं प्रशांतात्मा विगतभीर्विगतभयो ब्रह्मचारिव्रते स्थितो ब्रह्मचारिणो
व्रतं ब्रह्मचर्यं गुरुशुश्रूषाभिक्षाभुक्त्यादि तस्मिन् स्थितस्तदनुष्ठाता भवेदित्यर्थः ॥ किंच मनः संयम्य मनसो वृ
त्तीरुपसंहृत्येत्येतत् ॥ मच्चित्तो मयि परमेश्वरे चित्तं यस्य सो मच्चित्तो युक्तः समाहितः सन्नासीतोपविशेत् ॥ मत्पर
॥ अहं परो यस्य सोऽयं मत्परः ॥ १५ ॥

दिहेतोरपि निवृत्तिः विगतभीः विगतभयत्वं सर्वकर्मपरित्यागे शास्त्रीयनिश्चयवशान्निःसंदिग्यबुद्धित्वं भिक्षाभुक्त्यादीत्यादिशब्देन
त्रिषवणस्नानशौचाचमनादि गृह्यते ॥ विशेषणांतरमाह ॥ किंचेति ॥ उपसंहृत्य योगनिष्ठो भवेदिति शेषः ॥ मनोवृत्त्युपसंहारे ३
न ध्यानमपि प्रसिद्धमेतस्य तद्व्यापाररूपत्वादित्याशंक्याह ॥ मच्चित्त इति ॥ विषयांतरविषयमनोवृत्त्युपसंहारेण त्वन्म्येव नान्त्रि
॥ न्नध्यानानुपपत्तिरित्यर्थः ॥ मच्चित्तत्वेनैव मत्परत्वस्य सिद्धत्वान्मत्पर इति पृथग्विशेषणमनर्थकमित्याशंक्याह ॥ भवतीति ॥

रणसुद्धिः योगस्यावांतरफलं ॥१४॥ संप्रति परमफलकथनपरत्वेनानंतरश्लोकमादत्ते ॥ अथेति ॥ योगस्वरूपं त
मासनादृयं स्वस्तिकं पद्मकं तनत्कर्तविशेषणमित्यस्यार्थस्य प्रथनानंतरमिति अथशब्दार्थः ॥ आत्मानं युंजन्निति
त्संबंधः ॥ आत्मशब्दो मनोविषयः ॥ यथोक्तो विधिरासनादिः ॥ उक्तविशेषणत्रय द्योतनार्थं सदेत्युक्तं ॥ योगी ध्यायी सं

गी ५

भवति कश्चिद्द्रांस्त्रीचित्तो न तु स्त्रियमेव परत्वेन गच्छति किं तर्हि राजानं महादेवं वा ॥ श्रयं तु मच्चित्तो मत्पर
श्च ॥ अथेदानीं योगफलमुच्यते ॥ युंजन्नेवं सदात्मानं योगी नियतमानसः ॥ शांतिं निर्वाणपरमां मत्संस्था
मधिगच्छति ॥१५॥ युंजन् समाधानं कुर्वन्नेवं यथोक्तेन विधानेन सदात्मानं योगी नियतमानसः ॥ नियतं सं
यतं मानसं मनो यस्य सोऽयं नियतमानसः स शांतिं उपरतिं निर्वाणपरमां निर्वाणं मोक्षस्तत्परमां निष्ठा यस्याः
शांतेः सा निर्वाणपरमा तां निर्वाणपरमां मत्संस्थां मदधीनां अधिगच्छति प्राप्नोति ॥ ५ ॥ श्रीरामाय नमः ॥

र
स्यासीतेत्यर्थः मनःसंयमस्य योगं प्रत्यसाधारणत्वं दर्शयति ॥ नियतेति ॥ शांतिशब्दितोपरतेः सर्वसंसारनिवृत्तिपर्यवसायि
त्वमत्र विशिनष्टि ॥ निर्वाणेति ॥ यथोक्तायां मुक्तौ ब्रह्मस्वरूपावस्थानादनर्थांतरत्वमाह मत्संस्थामिति ॥ मदधीनां
॥ मदात्मिकामित्यर्थः ॥१५॥

अ ॥ ६ ॥
१२४ ॥ राम

आहारादित्यादिशब्देन विहारो जागरितादि चोच्यते ॥ आत्मसंमितमन्नपरिमाणमष्टग्रासादि आहारनियमेशानयद्यश्रुतिं प्रमा
णयति ॥ यदुहवा इति ॥ तदन्नं भुज्यमानं यदुहवा इति प्रसिध्याश्रुत्यानूदितमेवेत्यनुष्ठानयोग्यतामापाद्यानुष्ठानद्वारेण भोक्ता
न३ र रक्षति न पुनस्तदन्नं तस्यानर्थाय भवतीत्यर्थः ॥ यत्तु नरात्मसंमितान्नूयोधिकं तं रं शगान्नमतिक्रम्य भुज्यते तेन ह्यात्मानं । हिनस्ति
भोक्तुरनर्थाय भवति यच्चाल्पं कनीयोत्मनरंशास्त्र निश्चयाभावादद्यते तदन्नमनुष्ठानयोग्यतादिद्वारा न रक्षितुं क्षमते

योगिन आहारादिनियमउच्यते ॥ नात्यश्नतस्तु योगोस्ति न चैकांतमनश्नतः ॥ न चाति स्वप्नशीलस्य जाग्रतो नैव चार्जुन ॥१६॥

न अत्यश्नतः आत्मसम्मितमन्नपरिमाणमतीत्य अश्नतः अत्यश्नतो न योगोस्ति न च एकांतमनश्नतो योगोस्ति यदुहवात्मसंमितमन्नं
तदवति तन्न हिनस्ति यद्भूयो हिनस्ति तद्यत्कनीयो न तदवतीति श्रुतेः तस्माद्योगी आत्मसम्मितादन्नादधिकं न्यूनं वा नाश्नीयात् ॥
अथवा योगिनो योगशास्त्रे परिपठितादन्नपरिमाणादतिमात्रमश्नतो योगो नास्तीत्युक्तं हि ॥ अर्द्धमशनस्य सव्यंजनस्य तृती
यमुदकस्य तु वायोः संचरणार्थं तु चतुर्थमवशेषयेदित्यादि परिमाणं तथा[illegible] न चाति स्वप्नशीलस्य योगो भवति नैव च अतिमात्रं
॥ जाग्रतो योगो भवति चार्जुन ॥

तस्मादत्यधिकमत्यल्पं चान्नं योगमारुरुक्षता त्याज्यमित्यर्थः श्रुतिसिद्धमन्नं निगमयति ॥ तस्मादिति ॥ नेत्यादेर्व्याख्यानांतरमाह ॥ अथवे
ति ॥ किं तदन्नपरिमाणं योगशास्त्रोक्तं यदधिकं न्यूनं वाऽभ्यवहरतो योगानुपपत्तिरित्याशंक्याह ॥ उक्तं हीति ॥ पूरयेदशनेनार्द्धं तृतीयमुदके
तु वायोः संचरणार्थं तु चतुर्थमवशेषयेदिति वाक्यमादिशब्दार्थः ॥ यथानात्यंतमश्नतोऽनश्नतश्च योगो न संभवति तथात्यंतं स्वपतो
॥ जाग्रतश्च योगः संभवतीत्याह ॥ तथेति ॥ ५ ॥ आहारनिद्रादिनियमविरहिणो योगव्यतिरेकमुक्त्वा तन्नियमवतो योगान्वयमन्वाचष्टे ॥

साद्दिना।।अन्नस्यनियतत्वमर्धमशनस्येत्यादिविहारस्यनियतत्वंयोजनान्नपरंगच्छेदित्यादिकर्मसुचेष्टानांनियतत्वंवाङ्नियमादिरा
यमतोदशघटिकापरिमितकालेजागरणंमध्यतःस्वपनंपुनरपिदशघटिकापरिमितेजागरणमिति।।स्वप्नावबोधयोर्नियतकाल
प्रयतमानस्ययोगिनोभवतोयोगस्यफलमाह।।दुःखहेति।।सर्वाण्याध्यात्मिकादिभेदभिन्नानीत्यर्थः।।यथोक्तयोगमंतरेणापि

कथंपुनर्योगोभवतीत्युच्यते।।५।।युक्ताहारविहारस्ययुक्तचेष्टस्यकर्मसु।।युक्तस्वप्नावबोधस्ययोगोभवतिदुःखहा।।१७।।
युक्ताहारविहारस्यआह्रियतइत्याहारोऽन्नंविहरणंविहारःपादक्रमस्तौनियतपरिमाणौयस्यतस्ययुक्तचेष्टस्य
तथायस्याचनियताचेष्टायस्यकर्मसुतथायुक्तस्वप्नावबोधस्ययुक्तौस्वप्नोनिद्राअवबोधोजागरणंतौनियतका
लौयस्यतस्ययुक्ताहारविहारस्ययुक्तचेष्टस्यकर्मसुयुक्तस्वप्नावबोधस्ययोगिनोयोगोभवतिदुःखहादुःखानि
सर्वाणिहंतीतिदुःखहासर्वसंसारदुःखक्षयकृद्योगोभवतीत्यर्थः।।१७।।अधुनाकदायुक्तोभवतीत्युच्यते।।यदाविनिय
तंचित्तमात्मन्येवावतिष्ठते।।निःस्पृहःसर्वकामेभ्योयुक्तइत्युच्यतेतदा।।१८।।यदाविनियतंविशेषेणनियतंचित्तंसंयतमेकाग्र

[illegible]

स्यापादेदुःखनिवृत्तिरस्तीतिविशिनष्टि।।सर्वेति।।विशुद्धविज्ञानद्वारेतिशेषः।।१७।।सफलस्यसांगस्ययोगस्योत्स्यनंतरं
यदाहीत्याद्युक्तकालानुवादेनयुक्तंलक्षयितुंअनंतरश्लोकप्रवृत्तिंदर्शयति।।अधुनेति।।विशेषेणसंयतत्वमेवसं
।।क्षिपति९एकाग्रतामिति।।

अ०६।।
१४५।।राम।।

आत्मन्येवेत्येवकारार्थं कथयन्ति ॥ हित्वेति ॥ केवलत्वमद्वितीयत्वं ॥ तस्यात्मस्थितिं विवृणोति ॥ स्वात्मनीति ॥ चित्तस्य हि कल्पितत्वात्तस्याऽऽत्मैव तत्वं तत्तु नरस्य नः सर्वतो वारितमधिष्ठाने निमग्नं तिष्ठतीति भावः ॥ तस्यामवस्थायां सर्वेभ्यो विषयेभ्यो व्यावर्तनलक्षणाफलको व्यवह्रियत इत्याह ॥ ।निस्पृह इति ॥१८॥ उपमा योगिनश्चित्तस्थैर्यस्योदाहरणमित्यर्थः ॥ उपमाशब्दस्य प्रदीपविषयत्वसिध्यर्थं करणव्युत्पत्तिं दर्शयति ॥ उपमीयत इति ॥

हित्वा बाह्यार्थचिंतामात्मन्येव केवलेऽवतिष्ठते स्वात्मनि स्थितिं लभत इत्यर्थः निस्पृहः सर्वकामेभ्यो निर्गताद्दृष्टादृष्टविषयेभ्यः स्पृहा यस्मा यस्य योगिनः स युक्तः समाहित इत्युच्यते तदा ॥५॥ योगिनः समाहितं चित्तं यत्तस्योपमोच्यते ॥५॥ यथा दीपो निवातस्थो नेंगते सोपमा स्मृता ॥ योगिनो यतचित्तस्य युंजतो योगमात्मनः ॥१९॥ यथा दीपः प्रदीपो निवातस्थो निवाते वातविवर्जिते देशे स्थितो नेंगते न चलति सा पउपमा उपमीयतेऽनयेत्युपमा योगकैः योगज्ञैश्चित्तप्रचारदर्शिभिः स्मृता । चिंतिता योगिनो यतचित्तस्य संयतांतःकरणस्य संयुंजतो योगमनुतिष्ठत आत्मनः समाधिमनुतिष्ठत इत्यर्थः ॥१९॥ एवं ॥ योगाभ्यासबलादेकाग्रीभूतं निवातप्रदीपकल्पं सत् ॥ यत्रोपरमते चित्तं निरुद्धं योगसेवया ॥ यत्र चैवात्मनात्मानं पश्यन्नात्मनि तुष्यति ॥

गिनो यथोक्तविशेषणवतश्चित्तस्थैर्यस्येति शेषः ॥१९॥ द्विविधः समाधिः संप्रज्ञातोऽसंप्रज्ञातश्च ध्येयैकाकारासत्ववृत्तिं भेदेन क [illegible]ायमानानां संप्रज्ञातः समाधिः ॥ कथमपि पृथगज्ञायमानानां सैव सत्ववृत्तिरसंप्रज्ञातः समाधिस्तत्र सामान्येन समाधि धि [illegible]मभिधायासंप्रज्ञातस्य समाधेरधुना लक्षणं विवक्षन्नाह ॥ एवमिति ॥ काले समाध्युपलक्षिते एवकारस्तुष्यतीत्यत्रै

०टी० ...नो॥ चकारस्य संबंधमाह॥ यस्मिंश्चेति॥ कालस्य पूर्ववत्कर्मकारकत्वेन निर्दिष्टमात्मानं तत्पदार्थत्वेन व्याचष्टे॥ परमिति॥ आ
ही ...नीसस्य त्वंपदार्थविषयत्वमाह॥ स्व एवेति॥ परमात्मानं प्रतीचो वरतः तद्भावेनापरोक्षीकुर्वन्नतुष्टिहेत्वभावात्तुष्यत्येवेत्यर्थः तस्मि
...ाले योगसिद्धिर्भवतीति शेषः॥२०॥ योगसिद्धिकालं प्रकारांतरेण प्रकटयति॥ किंचेति॥ बुद्धिशब्दः स्वानुभवविषयः॥ इंद्रियनिरपे
क्षस्यानुभवगम्यत्वोक्तेरतींद्रियमिति पुनरुक्तं इत्यपास्तं॥५॥

यत्र यस्मिन्काले उपरमते चित्तं उपरतिं गच्छति निरुद्धं सर्वतो निवारितप्रचारं योगसेवया योगानुष्ठानेन यत्र चैव
यस्मिंश्च काले आत्मना समाधिपरिशुद्धेनांतःकरणेन आत्मानं परं चैतन्यं ज्योतिःस्वरूपं पश्यन्नुपलभमा
नः स्व एवात्मनि तुष्यति तुष्टिं भजते॥ किंच॥ सुखमात्यंतिकं यत्तद्बुद्धिग्राह्यमतींद्रियं॥ वेत्ति यत्र न चैवायं
सं स्थितश्चलति तत्त्वतः॥२०॥ सुखमात्यंतिकं अंतमेव भवतीत्यात्यंतिकं अनंतमित्यर्थः यत्तद्बुद्धिग्राह्यं बु
द्ध्यैवेंद्रियनिरपेक्षतया गृह्यत इति बुद्धिग्राह्यमतींद्रियमिंद्रियगोचरातीतमविषयजनितमित्यर्थः वेत्ति
तदीदृशं सुखमनुभवति यत्र यस्मिन्काले न चैवायं विद्वानात्मस्वरूपे स्थितस्तस्मिन्नैव चलति तत्त्वतः तत्त्व
स्वरूपान्न प्रच्यवत इत्यर्थः॥ किंच॥

क्ष्याह॥ अविषयेति॥ पदच्छेदेन चेत्यादि॥ अपेक्षितपूरणमात्मस्वरूप इति॥ तस्मात्तत्त्वत इति संबंधः नैवेत्येवकारसं
बंधोक्तिः॥ श्चकारः ससम्पासंबंधनीयः॥ यत्रेति पूर्ववत्॥२१॥ प्रकारांतरेण प्रकृतं योगं विशिनष्टि॥ किंचेति॥५॥

यो

न

अ०६।
१४६॥

आत्मलाभान्न परं विद्यत इति स्मृत्या व्याचष्टे ॥ यमात्मलाभमिति ॥ लाभांतरं पुरुषार्थभूतं नं नतस्तस्मादात्मलाभादिति यावत् ॥ तं विद्यादि
त्युत्तरत्र संबंधः ॥ यस्मिन्नित्यवतारयति ॥ किंचेति ॥ अपरिपक्वयोगो यथा दृश्यते न दुःखेन प्रच्याव्यते नैवं विचाल्यते यस्मिन्स्थितो यो
गी तं योगं विद्यादिति पूर्ववत् ॥ २२ ॥ तं विद्यादि साध्यपेक्षितं पूरयन्नवतारयति ॥ तमेति ॥ तमित्यात्मावस्थाविशेषं परामृशति दुःखसंयोग
स्य वियोगो योगसंज्ञितो युज्यते स कथं योगसंज्ञितः ॥ स्यादित्याशंक्याह ॥ विपरीतेनेति ॥ इह हि योगावस्थासमुत्थानमखिलदुःख

यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः ॥ यस्मिन्स्थितो न दुःखेन गुरुणापि विचाल्यते ॥ २२ ॥ यं लब्ध्वा यमात्मलाभं
लब्ध्वा प्राप्य चापरमन्यल्लाभांतरं ततोऽधिकमस्तीति न मन्यते न चिंतयति ॥ किंच यस्मिन्नात्मतत्त्वे स्थितो दुःखेन शस्त्र
निपातादिलक्षणेन गुरुणा महतापि न विचाल्यते ॥ यत्रोपरमत इत्याद्यारभ्य यावद्भिर्विशिष्ट आत्मावस्थाविशेषो योग उक्तः
तं विद्याद्दुःखसंयोगवियोगं योगसंज्ञितं ॥ स निश्चयेन योक्तव्यो योगोऽनिर्विण्णचेतसा ॥ २३ ॥ तं विद्याद्विजानीयात् दुःखसंयोग [illegible] ८
वियोगं दुःखैः संयोगो दुःखसंयोगस्तेन वियोगो दुःखसंयोगवियोगस्तं दुःखसंयोगवियोगं योग इत्येवं संज्ञितं विपरीतलक्ष
णया न विद्याद्विजानीयादित्यर्थः योगफलमुपसंहृत्य पुनरन्वारंभेण योगस्य कर्तव्यतोच्यते निश्चयानिर्वेदयोः साधनत्वविधानार्थं ॥ ना

भेदैरिति दुःखसंयोगाभावो योगसंज्ञामर्हतीत्यर्थः ॥ उपसंहृते योगफले किमिति पुनर्योगस्य कर्तव्यत्वमुच्यते तत्राह ॥ योगफलमिति ॥
नारालंरेण योगस्य कर्तव्यत्वोपदेशारंभोऽत्रान्वारंभः योगं युंजानं तत्क्षणादुत्कां संसिद्धिमलभमानः संशयानो निवर्तेत
तन्निरस्यर्थं पुनः कर्तव्यत्वोपदेशोऽर्थवानिति मत्वाह ॥ निश्चयेति ॥ ५ ॥ तयोः साधनत्वविधानमेवाक्षरयोजनया साधयति ॥

...ध ॥ इह जन्मनि जन्मांतरे वा सेत्स्यतीत्यध्यवसायः योक्तव्यः कर्तव्यः ॥ २३ ॥ इत्थं च योगस्य कर्तव्यत्वमिति प्रतिज्ञा नीते ॥ किंचेति ॥
न क्रमेण कर्तव्यत्वमित्यपेक्षायामाह ॥ संकल्पेति ॥ संकल्पः शोभनाध्यासः सर्वान्त्यक्त्वा पुनरशेषत इति पुनरुक्तमित्याशंक्याह ॥
...र्लेपेनेति ॥ २४ ॥ यथा शेषो न भवति तथा सर्वेषां कामानां शोभनाध्यासाधीनानां त्यागस्य योगानुष्ठाने शेषत्वं बुद्धिविवेकयुक्ते
न मनसा करणसमुदायस्य सर्वतो नियमनमपि तत्र शेषत्वेन कर्तव्यमित्याह ॥ किंचेति ॥ कामत्यागद्वारेणेंद्रियाणि प्रत्या

स यथोक्तफलो योगो निश्चयेनाध्यवसायेन योक्तव्योऽनिर्विण्णचेतसा न निर्विण्णम् निर्विण्णं अखिन्नं किंतु चेतस्तेन
निर्वेदरहितेन चेतसा चित्तेनेत्यर्थः ॥ किंच ॥ संकल्पप्रभवान्कामांस्त्यक्त्वा सर्वानशेषतः ॥ मनसैवेंद्रियग्रामं विनिय
म्य समंततः ॥ २४ ॥ संकल्पप्रभवान् संकल्पः प्रभवो येषां कामानां ते संकल्पप्रभवाः कामास्तांस्त्यक्त्वा परित्यज्य
सर्वानशेषतो निर्लेपेन किंच मनसैव विवेकयुक्तेनेंद्रियग्राममिंद्रियसमुदायं विनियम्य नियमनं कृत्वा समंततः सम
तात् ॥ किंच ॥ शनैः शनैरुपरमेद्बुद्ध्या धृतिगृहीतया ॥ आत्मसंस्थं मनः कृत्वा न किंचिदपि चिंतयेत् ॥ २५ ॥ शनैः श
नैः न सहसोपरमेदुपरतिं कुर्यात् ॥ केन बुद्ध्या किंविशिष्टया धृतिगृहीतया धृत्या गृहीता धृतिगृहीता तया धैर्ययुक्तयेत्यर्थः ॥

हृत्य किं कुर्यादिति शंकितारं प्रत्याह ॥ शनैः शनैरिति ॥ सहसा विषयेभ्य उ. सकाशादुपरमे मनसो न स्वास्थ्यं संभवतीत्यभिप्रेत्याह ॥
न सहसेति ॥ तत्र साधनं धैर्ययुक्ता बुद्धिरित्याह ॥ केनेत्यादिना ॥ भूम्यादीरव्याकृतपर्यंताः प्रकृतीरुत्पूर्वत्र पूर्वत्र धा
रणां कृत्वोत्तरोत्तरक्रमेण प्रविलापयेदिति भावः ॥ अव्यक्तमात्मनि प्रविलाप्यात्ममात्रनिष्ठं मनो विधाय चिंतयितव्याभावा

दतिस्वस्थोभवेदित्याह ॥ आत्मेति ॥ तत्रसंस्थितिमेवमनसोविवृणोति ॥ आत्मैवेति ॥ योगविधिमुपक्रम्यकिमिदमुक्तमित्याशंक्याह ॥
एषइति ॥ यन्मनसोनैश्चल्यमितिशेषः ॥२५॥ ननुमनसःशब्दादिनिमित्तानुरोधेनरागद्वेषवशादत्यंतचंचलस्यास्थिरस्यतत्रतत्रस्वभावे
नप्रवर्तनस्यकुतोनैश्चल्यंनैश्चिंत्यंचेतितत्राह ॥ ततइति ॥ योगप्रारंभःसहस्पर्धः एवंशब्देनमनसैवेत्याद्युक्तप्रकारोगृह्यते ॥ स्वाभाविकोहे

आत्मसंस्थंआत्मनिसंस्थितिर्यस्यमनसस्तदात्मसंस्थमात्मैवसर्वंनततोन्यत्किंचिदस्तीतिएवमात्मसंस्थंमनःकृत्वानकिंचिदपि
चिंतयेत् । एषयोगस्यपरमोविधिः ॥ तत्रैवमात्मसंस्थंमनःकर्तुंप्रवृत्तोयोगी ॥ यतोयतोनिश्चरतिमनश्चंचलमस्थिरं ॥ ततस्
ततोनियम्यैतदात्मन्येववशंनयेत् ॥२६॥ यतोयतोयस्माद्यस्मान्निमित्ताच्छब्दादेर्निश्चरतिनिर्गच्छतिस्वभावदोषान्मन ॥
श्चंचलमत्यर्थंचलमतएवास्थिरंततस्ततस्मात्तस्माच्छब्दादेर्निमित्तान्नियम्यतत्तन्निमित्तंयाथात्म्यनिरूपणेनाभावीकृत्यवैराग्य
भावनयाचैतन्मनआत्मन्येववशंनयेत् ॥ आत्मवश्यतामापादयेत् ॥ एवंयोगाभ्यासबलात्योगिनआत्मन्येवप्रशाम्यतिमनः ॥

तोमिथ्याज्ञानाधीनोरागादिः ॥ प्र[illegible]र्मनसोनियमनंकथमित्याशंक्याह ॥ ततइति ॥ याथात्म्यनिरूपणंक्षयिष्णुत्वदुःखसंमिश्र
णालोचनंतेनतत्रतत्रवैराग्यभावनयातत्तदाभासीकृत्यततस्ततोनियम्यैतन्मनइतिसंबंधः ॥२६॥ मनसोवशीकरणो
पशमेकिंस्यादित्याशंक्याह ॥ एवमिति ॥ योगाभ्यासोविषयविवेकद्वारामनोनिग्रहारत्तिः ॥ प्रशांतंस्वात्मन्येवप्रलीन

यावत्॥ मनस्तद्वृत्त्योरभावे स्वरूपभूतसुखाविर्भावस्य स्वापादौ प्रसिद्धिं द्योतयितुं हिशब्दः॥ मोहादिक्लेशप्रवृत्तिर्बंधायोगिनि
ोक्तसुखप्राप्तिमाशंक्य मनोविलयमुपेत्य परिहरति॥ शांतेति॥ तस्यास्मदादिविलक्षणत्वमाह॥ ब्रह्मभूतमिति॥
अस्मदादेरपि स्वप्ने ब्रह्मभूतत्वेन तुल्यत्वं जीवन्मुक्तत्वमित्याशंक्याह॥ ब्रह्मैवेति॥ धर्माधर्मप्रतिबंधादयुक्ता यथोक्तसु
खप्राप्तिरि[illegible]त्याशंक्योक्तं॥ अकल्मषमिति॥ २७॥ उत्तमं सुखं योगिनो भवतीत्युक्तं तदेव स्फुटयति॥ युं

प्रशांतमनसं ह्येनं योगिनं सुखमुत्तमं॥ उपैति शांतरजसं ब्रह्मभूतमकल्मषं॥ २७॥ प्रशांतमनसं प्रकर्षेण शांतं मनो यस्य स प्रशांतमना
स्तं प्रशांतमनसं ह्येनं योगिनं सुखमुत्तमं निरतिशयमुपैत्युपगच्छति शांतरजसं प्रक्षीणमोहादिक्लेशरजसमित्यर्थः॥ ब्रह्मभूतं जीवन्मुक्तं
ब्रह्मैव सर्वमित्येवं निश्चयवंतं ब्रह्मभूतमकल्मषं धर्माधर्मादिवर्जितं॥ युंजन्नेवं सदात्मानं योगी विगतकल्मषः॥ सुखेन ब्रह्मसंस्पर्शमत्यं
तं सुखमश्नुते॥ २८॥ युंजन्नेवं यथोक्तेन क्रमेण योगी योगांतरायवर्जितः सदात्मानं विगतकल्मषो विगतपापः सुखेनानायासेन ब्र
ह्मसंस्पर्शं ब्रह्मणा परमेण संस्पर्शो यस्य तं ब्रह्मसंस्पर्शं सुखमसंतमुत्कृष्टं निरतिशयं सुखमश्नुते व्याप्नोति॥ इदानीं योगस्य फल
॥ लं ब्रह्मैकत्वदर्शनं सर्वसंसारविच्छेदकारणं तत्प्रदर्शयन्ने॥॥ ५॥

जन्निति॥ क्रमो यथोक्तो मनसैवेंद्रियग्राममित्यादिः॥ योगांतरायो रागद्वेषादिः॥ सदात्मानं युंजन्निति संबंधः॥ पापमुपलक्ष
णं पुण्यस्यापि संस्पर्शस्तादात्म्यैकरसं॥ उत्कर्षो विषयासंस्पर्शः॥ २८॥ योगमनुतिष्ठतो ब्रह्मभूतस्य सर्वानर्थनिवृत्तिनि
रतिशयसुखप्राप्तिलक्षणो द्विविधो मोक्षो हेतुनाक्तेन स्यादिति शंकमानं प्रत्याह॥ इदानीमिति॥ ५॥ श्रीरामायनमः॥

अ० ६॥
१४८॥ राम॥

समात्मानमीक्षत इति संबंधः ॥ सर्वभूतान्यपि तद्विशेषणत्वेन पश्यति चेन्न शुद्धवस्तुज्ञानमिति नाविद्यानिवृत्तिरित्याशंक्याह ॥ सर्वभूतानीति ॥
उक्ते दर्शने चित्तसमाधानमुपायं दर्शयति ॥ योगेति ॥ विषमेष्ब्रह्मादिषु तदनुरोधाद्विषममेव दर्शनमुपदर्शितदर्शनप्रतिबंधकं प्रसक्तदस्य ति॥
सर्वत्रेति ॥ २९ ॥ उक्तस्यैकत्वज्ञानस्य फलविकलत्वशंकां शिथिलयति ॥ एतस्येति ॥ तत्रैकत्वदर्शनमनुवदति ॥ यो मामिति ॥ तत्फलत्वमिहा
नीमुपपन्नस्येति ॥ तस्येति ॥ ज्ञानानुवादभागं विभजते ॥ य इति तत्फलत्वोक्तिभागं व्याचष्टे ॥ तस्यैवमिति ॥ अनेकत्वदर्शिनोपि ॥

सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि ॥ ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः ॥ २९ ॥ सर्वभूतस्थं सर्वेषु भूतेषु स्थितं
स्वमात्मानं सर्वभूतानि चात्मनि ब्रह्मादीनि स्तंबपर्यंतानि सर्वभूतान्यात्मन्येकतां गतानि ईक्षते पश्यति योगयुक्तात्मा समा
हितांतःकरणः सर्वत्र समदर्शनः सर्वेषु ब्रह्मादिस्थावरांतेषु विषमेषु सर्वभूतेषु समं निर्विशेषं ब्रह्मात्मैकत्वविषयं द
र्शनं यस्य स सर्वत्र समदर्शनः एतस्यात्मैकत्वदर्शनस्य फलमुच्यते ॥ यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति ॥ तस्याहं
न प्रणश्यामि स च मे न प्रणश्यति ॥ ३० ॥ यो मां पश्यति वासुदेवं सर्वस्यात्मानं सर्वत्र सर्वेषु भूतेषु सर्वं च ब्रह्मादिभूतजा
तं मयि सर्वात्मनि पश्यति ॥ तस्यैवमात्मैकत्वदर्शिनोऽहमीश्वरो न प्रणश्यामि न परोक्षतां गमिष्यामि स च मे न प्रणश्यति ॥
॥ स च विद्वान्मम वासुदेवस्य न प्रणश्यति न परोक्षो भवति ॥

[illegible]दो नित्यत्वान्न प्रणश्यतीत्याशंक्याह ॥ नेति ॥ अहं परमानंदो न नंक्ष्यति परोक्षीभवामीत्यर्थः ॥ स चेत्यादि व्याचष्टे ॥ विद्वानिति ॥ विद्वानि
[illegible]द्वानपीश्वरस्य न नश्यतीत्याशंक्योक्तं ॥ नेत्यादिना ॥ अविदुषः स्वरूपेण सतोपि व्यवहितत्वादविद्यया नष्टप्रायतेत्यर्थः ॥ श्रीरामः

[illegible] स्य विदुषः स्वपरस्परमपरोक्षत्वे हेतुमाह ॥ तस्य चेति ॥ आत्मैकत्वेपि कथं मिथोऽपरोक्षत्वं तत्राह ॥ स्वात्मेति ॥ ३० ॥ विद्वदीश्वरयोरे
[illegible]नुवादेन विद्याफलं विरणोति ॥ यस्माच्चेति ॥ तस्मादेकत्वदर्शनार्थं प्रयतितव्यमिति शेषः पूर्वार्द्धेनानूद्योत्तरार्द्धेन फलं विधिरि
ति मत्वाह ॥ इत्येनेदिति ॥ रागादिरहितस्य यमनियमादिसंस्कारवतः स्वैरवृत्तस्य संभवेपि तामंगीकृत्य ज्ञानं स्तौति ॥ सर्वथेति ॥ प्रति०
भासतोपि यथेच्छचेष्टांगीकारे कुतो ज्ञानवतो नित्यमुक्तत्वं प्रातीति कुदुराचारप्रतिबंधादित्याशंक्याह ॥ न मोक्षमिति ॥ ३१ ॥ स्वै

तस्य च मम चैकात्मत्वात्स्वात्मा हि नामात्मनः प्रकाशएव प्रियएव भवति यस्माच्चाहमेव सर्वात्मैकत्वदर्शी ॥ सर्वभूतस्थितं यो मां
भजत्येकत्वमास्थितः ॥ सर्वथा वर्तमानोपि स योगी मयि वर्तते ॥ ३१ ॥ रस्येनत्स्त्वं मे श्लोकार्थं सम्यग्दर्शनमनूद्य तत्फलं मो
क्षोभिधीयते ॥ सर्वथा सर्वप्रकारैर्वर्तमानोपि सम्यग्दर्शी योगी मयि वैष्णवे परमे पदे वर्तते नित्यमुक्त एव सः न मोक्षं प्रति
केनचित्कं प्रतिबध्यत इत्यर्थः किं चान्यत् ॥ आत्मौपम्येन सर्वत्र समं पश्यति योर्जुन ॥ सुखं वा यदि वा दुःखं स योगी परमो
मतः ॥ ३२ ॥ आत्मा स्वयमेवोपमा तद्भाव आत्मौपम्यं तेन आत्मौपम्येन सर्वत्र सर्वभूतेषु समं तुल्यं पश्यति योर्जुन ॥ स च किं
समं पश्यतीत्युच्यते ॥ यथा मम सुखमिष्टं तथा सर्वप्राणिनां सुखमनुकूलं ॥ ॥ ॥ ॥ ॥

राचारस्या प्रतिबंधकत्वकथनात्परपीडनं तस्य योगिनः सम्यग्दर्शनं प्रत्यप्रतिबंधकत्वप्रसक्तावुक्तं ॥ किंचेति ॥ अन्यदपि किंचिदुच्य
ते परमयोगिनो निर्देशद्वारा योगमाहात्म्यमित्यर्थः ॥ उपमैवौपम्यमात्मा च तदौपम्यं च तेन न सर्वभूतेषु यः समं पश्यतीत्युक्तेन देवस
मदर्शनं प्रत्यपूर्वकं विरणोति ॥ किमित्यादिना ॥

विकल्पार्थत्वं व्यावर्तयति ॥ वाशब्द इति ॥ उपदर्शितं समदर्शनफलत्वमभिलपति ॥ न कस्यचिदिति ॥ ३२ ॥ किमपेक्षया तस्य परमत्वं तत्राह ॥
सर्वेषामिति ॥ मनश्चंचलत्वेनास्थिरमित्युपश्रुत्य निर्विशेषे चित्तस्थैर्ये दुःशकमिति मन्वानस्तदुपायबुभुत्सया पृच्छतीति प्रश्नमुत्थापयति ॥
२३ एतस्येति ॥ तत्रास्य पापशुश्रुषुरिति संबंधः ॥ मनश्चंचलत्वेपि तन्निग्रहद्वारा योगस्थैर्यं संपाद्यतामित्याशंक्याह ॥ प्रसिद्धमिति ॥ ३२

वाशब्दश्चार्थे यदि वा यच्च दुःखं मम प्रतिकूलमनिष्टं यथा तथा सर्वप्राणिनां दुःखमनिष्टं प्रतिकूलमित्येवमात्मौपम्येन सुख
दुःखेऽनुकूलप्रतिकूले तुल्यतया सर्वभूतेषु समं पश्यति न कस्यचित्प्रतिकूलमाचरति ॥ अहिंसक इत्यर्थः ॥ य एवमहिंसकः
सम्यग्दर्शननिष्ठः स योगी परम उत्कृष्टो मतोऽभिमतः सर्वेषां योगिनां मेतस्य यथोक्तस्य समदर्शनलक्षणस्य योगस्य दुःसं
पाद्यतामालक्ष्य शुश्रुषुः ध्रुवं प्राप्त्युपायमर्जुन उवाच ॥ योयं योगस्त्वया प्रोक्तः साम्येन मधुसूदन ॥ एतस्याहं न पश्यामि
चंचलत्वात्स्थितिं स्थिरां ॥ ३३ ॥ योयं योगस्त्वया प्रोक्तः साम्येन समत्वेन मधुसूदन ॥ एतस्य योगस्याहं न पश्यामि नोपलभे
चंचलत्वान्मनसः किं स्थिरामचलां स्थितिं प्रसिद्धमेतत् ॥ चंचलं हि मनः कृष्ण प्रमाथि बलवद्दृढं ॥ तस्याहं निग्रहं मन्ये वायो
रिव सुदुष्करं ॥ ३४ ॥ चंचलं हि मनः कृष्ण कृष्ण इति कृषतेर्विलेखनार्थस्य रूपं भक्तजनपापादिदोषापकर्षणात्कृष्णः हि यस्मात्
मनः न केवलमत्यर्थं चंचलं प्रमाथि च प्रमथनशीलं प्रमथ्नाति शरीरमिंद्रियाणि च विक्षिपति परवशीकरोति दुर्निवारत्वात् ॥

[illegible]पदपतिनिष्पत्तिप्रकारं सूचयति ॥ कृष्णेति ॥ कथं कर्षकत्वमात्रकामस्य भगवतः संभवतु तः संभवतीत्याशंक्याह ॥ भक्तेति ॥ ऐहिकामुष्मिक
र्शनन परमाकर्षणशीलत्वाच्चेति द्रष्टव्यं प्रमथ्नातीति क्षोभयति तद्देवक्षोभकत्वं प्रकटयति ॥ विक्षिपतीति ॥ दुर्निवारत्वमभिप्रेताद्विषयादाकृषु

त्वें विशेषणांतरमाह ।। किंचेति अच्छेद्यत्वे विशेषणांतरमाह ।। किंच दृढमिति ।। तंतुनागो वरुणपाशशब्दितो जलोचारी पदार्थो स तं दृढतन्तुमशक्यत्वेन प्रसिद्धो विवक्षितः वायोरिवेत्युक्तं व्यनक्ति ।। यथेति ।। ३४ ।। प्रश्नमंगीकृत्य प्रतिवचनमुत्थापयति ।। भगवानिति ।। कुत्र संशयराहित्यं तत्राह ।। मनरति ।। कथं तर्हि मनोनिरोधो भवति तत्राह ।। किंत्विति ।। अभ्यासस्वरूपं सामान्येन निर्दिशति अभ्यासो नामेति ।। कस्यांचिच्चित्तभूमाविति अविशेषितो ध्येयो विषयो निर्दिश्यते समानप्रत्ययावृत्तिर्विजातीयप्रत्ययानंतरितेति शेषः ।। चित्तस्येति षष्ठी प्रत्ययस्य तद्विकारत्वद्योतनार्था वैराग्यस्वरूपं निरूपयति वैराग्यमिति तेषु वैतृष्ण्यं वैराग्यं नामेति संबंधः ।। तत्र हेतुं

किंच बलवत्वत्वेन केनचिन्नियंतुं शक्यं किंच दृढं तंतुनागबंधवदच्छेद्यं तस्यैवंभूतस्य मनसोऽहं निग्रहं निरोधं मन्ये वायोरिव ।। यथा वायोर्दुष्करो विनिग्रहस्तथा मनोपि दुष्करं मन्य इत्यभिप्रायः ।। श्रीभगवानुवाच ।। एवमेव यथा ब्रवीषि असंशयं महाबाहो मनो दुर्निग्रहं चलं ।। अभ्यासेन तु कौंतेय वैराग्येण च गृह्यते ।। ३५ ।। असंशयं नास्ति संशयो महाबाहो मनो दुर्निग्रहं चलमित्यत्र किंतु अभ्यासेन तु अभ्या[redacted]सो नाम [redacted] वितु [redacted] भूमौ कस्यांचित्समानप्रत्ययावृत्तिश्चित्तस्य वैराग्यं दृष्टादृष्टभोगेषु दोषदर्शनाभ्यासात् ।। विषयेषु वैतृ[redacted]यं तेन च वैराग्येण गृह्यते विक्षेपरूपः प्रचारश्चित्तस्यैवं तन्मनो गृह्यते निरुध्यत इत्यर्थः ।।

पु

सूचयति ।। दोषेति ।। विषयेषु तस्मा विषयेषु दोषदर्शनमभ्यस्यते तेन वैतृष्ण्यं जायते तेन गृह्यमानं निर्दिशति ।। विक्षेपेति ।। तस्मिन्गृहीते निरुद्धे मनोनिरोधकस्या किं स्यादित्यपेक्षायामाह ।। एवमिति ।। अभ्यासहेतुकवैराग्यद्वाराचित्तप्रचारनिरोधे निरुद्धवृत्तिकं मनो विषयविमुखमंतर्निष्ठं भवतीत्यर्थः ।। ३५ ।।

संयतात्मनो योगप्राप्तिः सुलभेत्युक्त्वा व्यतिरेकं दर्शयति ॥ यः पुनरिति ॥ व्यतिरेकोपन्यासपरं पूर्वार्द्धमनूद्य व्याकरोति ॥ असंयतेनेति ॥ पू
र्वोक्तान्वयव्याख्यानपरंउत्तरार्द्धं व्याचष्टे ॥ यस्त्वित्यादिना ॥ अंतःकरणस्य स्ववशत्वे सिद्धेपि वैराग्यादावास्थावता भवितव्यमित्याह ॥ य
तनेति ॥ उपायो वैराग्यादिपूर्वको मनोनिरोधः ॥३६॥ प्रश्नांतरमुत्थापयति तत्रेत्यादिना मनोनिरोधस्य दुःसाध्यत्वमाशंक्य परि
हृते सति प्रश्नः पुनरवकाशं प्रतिलभ्योवाचेति संबंधः ॥ लोकद्वयप्रापककर्मसंभवे कुतो योगिनो नाशाशंकेत्याशंक्याह ॥ योगाभ्या

यः पुनरसंयतात्मा तेन ॥ असंयतात्मना योगो दुःप्राप इति मे मतिः ॥ वश्यात्मना तु यतता शक्योवाप्तुमुपायतः ॥३६॥ असंयतात्मना अ
भ्यासवैराग्याभ्यां असंयत आत्मा अंतःकरणं यस्य सोऽयमसंयतात्मा तेनासंयतात्मना योगो दुःप्रापो दुःखसंप्राप्य इति मे मतिः ॥
यस्तु पुनर्वश्यात्मा अभ्यासवैराग्याभ्यां वश्यत्वमापादित आत्मा मनो यस्य सोयं वश्यात्मा तेन वश्यात्मना तु यतता भूयोपि प्रय
त्नं कुर्वता शक्योवाप्तुं योग उपायतो यथोक्तादुपायांतत्र योगाभ्यासांगीकरणेन परलोकेहलोकप्राप्तिनिमित्तानि कर्माणि सं
न्यस्तानि योगसिद्धिफलं च मोक्षसाधनं सम्यग्दर्शनमप्राप्तमिति योगी योगमार्गात्मरणकाले चलितचित्त इति तस्य ना
शमाशंक्य ॥ अर्जुन उवाच ॥ अयतिः श्रद्धयोपेतो योगाच्चलितमानसः ॥ अप्राप्य योगसंसिद्धिं कां गतिं कृष्ण गच्छति ॥३७॥

॥ अयतिरप्रयत्नवान् योगमार्गे ॥

ति ॥ तथापि योगानुष्ठानपरिप्रापितसम्यग्दर्शनसामर्थ्यान्मोक्षोपपत्तौ कुतस्तस्य नाशाशंकेति चेन्मैवमनेकांतरायवत्वाद्योगस्ये
न्मनि प्रायेणासंसिद्धेरित्यभिसंधायाह ॥ योगसिद्धीति ॥ अभ्युदयनिःश्रेयसयोर्हि भ्रंशो नाशः ॥ योगमार्गे तत्फलस्य सम्यग्द
र्शनस्यादर्शनादिति शेषः ॥ तर्हि ततो बहिर्मुखत्वमेवास्येति कं संवृत्तमित्याशंक्याह ॥ श्रद्धयेति ॥ तर्हि योगमार्गमाश्रयतेनेत्याह ॥ ०

नो॥ त्ति॥ मरणकाले व्याकुलेंद्रियस्य तानसाधनानुष्ठानावकाशाभावाद्फलं न न श्चलितमानसत्वमित्याह॥ अन्य इति॥ गम्यं नरति
गति पुरुषार्थः॥ सामान्यप्रश्नमंतर्भाव्य विशेषप्रश्नोद्व्येंष्टे॥३७॥ प्रश्नमेव विवृणोति॥ कच्चिदिति॥ प्रशस्तप्रश्नार्थत्वं कच्चिदित्यस्यां
ङ्कृतस्य व्याचष्टे॥ किमिति॥ उभयविभ्रष्टत्वं स्पष्टयति॥ कर्मेत्यादिना॥ वायुना छिन्नं विशकलितमभ्रं यथा नश्यति तद्वदि
त्याह॥ छिन्नेति॥ नाशशंकानिमित्तमाह॥ निराश्रय इति॥ कर्ममार्गरूपावष्टंभाभावेपि ज्ञानमार्गावष्टंभमलब्धस्य भविष्यतीत्या

श्रद्धयास्तिक्यबुद्ध्या चोपेतो योगादंतकाले च चलितं मानसं मनो यस्य स चलितमानसोऽभ्रष्टस्मृतिः सोऽप्राप्य योगसंसि
द्धिं योगफलं सम्यग्दर्शनं कां गतिं हे कृष्ण गच्छति॥ कच्चिन्नोभयविभ्रष्टः छिन्नाभ्रमिव नश्यति॥ अप्रतिष्ठो महाबाहो वि
मूढो ब्रह्मणः पथि॥३८॥ कच्चित्किं नोभयविभ्रष्टः कर्ममार्गाद्योगमार्गाच्च विभ्रष्टः सन् छिन्नाभ्रमिव नश्यति किं वा न न
श्यति॥ अप्रतिष्ठो निराश्रयो हे महाबाहो विमूढः सन् ब्रह्मणः पथि ब्रह्मप्राप्तिमार्गे॥ एतं मे संशयं कृष्ण छेत्तुमर्हस्यशेषतः॥
त्वदन्यः संशयस्यास्य छेत्ता न ह्युपपद्यते॥३९॥

शंक्याह॥ विमूढः सन्निति॥ न हि कर्मणि प्रतीयमाशंका फलाभिलाषं त्यक्त्वेश्वरे समर्प्यासमर्प्य वा कर्मानुतिष्ठतो निरुपचारेण
नध्वंसवच नासंभवात्सर्वकर्मसंन्यासिनस्तु विहितानां त्यागात्ज्ञानोपायाच्च विच्युतेरनर्थप्राप्तिशंकायुक्तेति भावः॥३८॥ ०
यथोपदर्शितसंशयापाकरणार्थमर्जुनो भगवंतं प्रेरयन्नाह॥ एतमिति॥ मत्तोन्यः कश्चिदृषिर्वा देवो वा त्वदीयं संशयं छेत्स्यतीत्याशंक्याह॥ त्वदन्य इति॥

अन्यस्य संशयच्छेत्तुरभावे फलितमाह ॥ एतदिति ॥ ३९ ॥ योगिनो नाशाशंकां परिहरन्नुत्तरमाह ॥ भगवानिति ॥ यदुक्तमुभयभ्रष्टो योगी न-
श्यतीति तत्राह ॥ पार्थेति ॥ तत्र हेतुमाह ॥ नहीति ॥ योगिनो मार्गद्वयाद्विभ्रष्टस्यैहिको नाशः शिष्टगर्हितत्वलक्षणो न भवति श्रद्धादेः सम्भा-
वानथापि कथमामुष्मिकनाशाऽस्यत्वमित्याशंक्य तद्रूपनिरूपणपूर्वकं तदभावं प्रतिजानीते ॥ नाशो नामेति ॥ तत्र हेतुभागं विभजते ॥

एतं मे म संशयं कृष्ण च्छेत्तुमपनेतुमर्हस्यशेषतः त्वत्तोऽन्य ऋषिर्देवो वा छेत्ता नाशयिता संशयस्यास्य न हि यस्मादुपपद्यते न संभवति
अतस्त्वमेव छेत्तुमर्हसीत्यर्थः ॥ श्रीभगवानुवाच ॥ पार्थ नैवेह नामुत्र विनाशस्तस्य विद्यते ॥ न हि कल्याणकृत्कश्चित् दुर्गतिं तात गच्छति ॥
॥४०॥ पार्थ नैवेह लोके नाऽमुत्र परस्मिन्वा लोके विनाशस्तस्य विद्यते नास्ति नाशो नाम पूर्वस्माद्धीनजन्मप्राप्तिः स योगभ्रष्टस्य-
नास्ति ॥ न हि यस्मात् कारणात् कल्याणकृत् शुभकृत् कश्चित् दुर्गतिं कुत्सितां गतिं हे तात तनोत्यात्मानं पुत्ररूपेणेति पिता तात उच्यते ॥ त ९
पित्रैव पुत्र इति पुत्रोऽपि तात उच्यते शिष्योऽपि पुत्रो यतः ॥ न गच्छति ॥४०॥ किंतु सो भवति ॥ प्राप्य पुण्यकृतां लोकानुषित्वा शाश्वतीः
समाः शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते ॥४१॥ योगमार्गप्रवृत्तः संन्यासी ॥ ॥ ॥ ॥ ॥

[illegible]णादिना ॥ उभयभ्रष्टस्यापि श्रद्धेन्द्रियसंयमादेः सात्त्विकत्वश्रवणादेश्च भावादुपपन्नं शुभकृत्त्वं ॥ तातेति कथं पुत्रस्थानीयः शिष्यः सैवोच्यते पितुरेव तनय
[illegible]रित्याशंक्याह ॥ तनोतीति ॥ तेन पुत्रस्थानीयस्य शिष्यस्य तातेति संबोधनमविरुद्धमित्यर्थः न गच्छति कुत्सितां गतिं कल्याणकारित्वादिति नाशाभावः ॥४०
[illegible]भ्रष्टस्य ताते लोकद्वयेपि नाशाभावे किं भवतीति पृच्छति किंत्विति ॥ तत्र श्लोकेनोत्तरमाह ॥ प्राप्येति ॥ ४१ ॥ श्रीरामाय नमः ॥ श्रीराम ॥

[illegible]त्रासीति विशिष्यतेनत्राह ।। सामर्थ्यादिति ।। कर्मलिप्यापनस्य कर्मिणो योगमार्गे प्रवृत्तस्यानुपपन्ने स्वस्य रचनावपिफलाभिलाषविकल्पस्य प्र
रसम्पत्तिर्न सर्वकर्मणस्तन्त्रं शाशांकानवकाशादित्यर्थः ।। समानां नित्यत्वं मानुषसमाविलक्षणत्वं वैराग्याभावविवक्षया विभ्रतिमतां गृहे ज
नेति विशिष्यते ।। ४१ ।। श्रद्धावैराग्यादिकर्मणाधिक्ये पक्षान्तरमाह ।। अथ वेति योगिनामिति कर्मिणां गृहे एं माभूदिति विशिनष्टि ।। धीम
तामिति ।। ब्रह्मविद्यावतां शुचिनां दरिद्राणां कुले जन्म दुर्लभादपि दुर्लभं प्रमादकारणाभावादित्याह ।। एतद्धीति ।। किमपेक्ष्यास्य जन्म

म

सामर्थ्यात्प्राप्यगत्वा पुण्यकृतामश्वमेधादियाजिनां लोकांस्तत्र च उषित्वा वासमनुभूय शाश्वतीर्नित्याः समाः संवत्सरांस्त
द्भोगक्षये शुचीनां यथोक्तकारिणां ।। श्रीमतां विभ्रतिमतां गेहे गृहे योगभ्रष्टोभिजायते ।। ४१ ।। अथवा योगिनामेव कुले भवति धी
मतां ।। एतद्धि दुर्लभतरं लोके जन्म यदीदृशं ।। ४२ ।। अथवा श्रीमतां कुलादन्यस्मिन्योगिनामेव दरिद्राणां कुले भवति जा
यते धीमतां बुद्धिमतां एतद्धि जन्म यद्दरिद्राणामेव योगिनां कुले भवतरं दुःखलभ्यतरं सर्वमपेक्ष्य लोके जन्म यदीदृशं यथोक्त
विशेषणे कुले ।। यस्मात् ।। तत्र तं बुद्धिसंयोगं लभते पौर्वदेहिकं ।। यतते च ततो भूयः संसिद्धौ कुरुनंदन ।। ४३ ।। तत्र योगि
नां कुले तं बुद्धिसंयोगं बुध्यासंयोगं लभते पौर्वदेहिकं ।। पूर्वस्मिन्देहे भवं पौर्वदेहिकं ।। ।। ।। ।। •

दुर्ल०

अ० ६ ।।
पी ५२ ।। राम

नो दुःखलभ्यत्वं तदाह ।। सर्वमिति ।। यद्यपि विभ्रतिमतामपि शुचीनां गृहे जन्म दुःखलभ्यं तथापि तदपेक्ष्येदं जन्म दुःखलभ्यतरं ईदृ
शं शुचीनां दरिद्राणां विद्यावतामिति ।। विशेषणोपेते कुले लोके जन्म तल्लभ्यमानामित्यर्थः ।। ४२ यदुक्तरं जन्मोक्तं तस्योत्तमत्वे हेत्वंतरमाह ।।
यस्मादिति ।। बुद्धेरात्मविषयये निशेषः ।। पूर्वस्मिन्देहे भवं तेन चानुष्ठितसाधनविशेषयुक्तामित्यर्थः ।। ।। ५ ।। ।। •

तर्हि यथोक्ते जन्मनि साधनानुष्ठानमंतरेणैव बुद्धिसंबंधः स्यादित्याशंक्याह ॥ यततेचेति ॥ प्रयत्नः श्रवणाद्यनुष्ठानविषयः ॥ ४३ ॥
यदि पूर्वः संस्कारोस्येच्छामुत्पाद्य प्रवर्तयति तथा चाप्रवृत्तिर्निष्प्रयास्यादित्याशंक्याह ॥ पूर्वेति ॥ स हि योगभ्रष्टः समनंतरजन्म-
कृतसंस्कारवशादुत्तरस्मिन्जन्मन्यनिच्छन्नपि योगं प्रत्येवाकृष्टो भवतीत्यर्थः ॥ तत्र कैमुतिकन्यायं सूचयति ॥ जिज्ञासुरिति ॥
पूर्वार्द्धं विभजते ॥ यः पूर्वेति ॥ तस्मान्नेष्टयातस्य प्रवृत्तिरिति शेषः ॥ योगभ्रष्टस्याधर्मादिप्रतिबंधेपि तर्हि पूर्वाभ्यासवशाद्बुद्धि
यततेच प्रयत्नं च करोतीति ततस्तस्मात्पूर्वकृतात्संस्काराद्भूयो बहुतरं संसिद्धौ संसिद्धिनिमित्तं हे कुरुनंदन कथं बुद्धिसंयोगमित्यु-
च्यते ॥ पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोपि सः ॥ जिज्ञासुरपि योगस्य शब्दब्रह्मातिवर्तते ॥ ४४ ॥ यः पूर्वजन्मनि कृतोऽभ्या-
सः स पूर्वाभ्यासस्तेनैव बलवता ह्रियते ॥ हि यस्मादवशोपि स योगभ्रष्टो न कृतं चेद्योगाभ्याससंजातसंस्काराद्बलवत्तर- अस्वतंत्रोपि
मधर्मादिलक्षणं कर्म तदा योगाभ्यासजनितेन संस्कारेण ह्रियतेऽधर्मश्चेद्बलवत्तरः कृतस्तेन योगजोपि संस्कारोभि-
भूयत एव तत्क्षयेतु योगजः संस्कारः स्वयमेव कार्यमारभते ॥ ॥ ५ ॥
संबंधः स्यादित्याशंक्याह ॥ नेत्यादिना यदि योगभ्रष्टेन योगाभ्यासजनितसंस्कारप्राबल्यात्प्रबलमधर्मप्रभेदरूपं कर्म न कृतं स्या-
तदे तेन संस्कारेण वशीकृतः सत्क्रियादिरहितोपि बुद्धिसंबंधभाग्भवतीत्यर्थः ॥ विपक्षे योगसंस्कारस्याधर्माभिभूतत्वा-
त्कार्यारंभकत्वमित्याह ॥ अधर्मश्चेति ॥ योगजसंस्कारस्याधर्माभिभूतस्य कार्यमकृत्वैवाभिभावकप्राबल्ये प्रण-
शादित्याशंक्याह ॥ तत्क्षये त्विति ॥ कालव्यवधानान्निवृत्तिशंकितत्वोक्तं ॥ नेति ॥ तत्र जन्मकृतादृष्टांत कृतस्य संस्कारस्य

गी० दी[illegible]ाः समधिगतत्वादिति भावः ॥ कैमुतिकन्यायोक्तिपरमुत्तरार्द्धं विभजते ॥ जिज्ञासुरपीत्यादिना ॥ अत्रापि संन्यासीति विशेषणं पूर्ववद्
म [illegible]मित्याह ॥ सामर्थ्यादिति ॥ नहि कर्मी कर्ममार्गे प्रवृत्तस्ततो भ्रष्ट इति शंकितुं शक्यतेऽतः संन्यासी पूर्वोक्तैर्विशेषणैर्विशिष्टो यो

न दीर्घकालमभ्यस्तस्यापि विनाशस्तस्यास्तीत्यर्थः ॥ अतो जिज्ञासुरपि योगस्य स्वरूपं ज्ञातुमिच्छन्नपि योगमार्गे प्रवृत्तः संन्या
सी योगभ्रष्टः सामर्थ्यात्सोऽपि शब्दब्रह्म वेदोक्तकर्मानुष्ठानफलमतिवर्त्तते अपाकरिष्यति किंतु तद्बुध्वा यो योगं तन्नि
ष्ठोऽभ्यासं कुर्वन् ॥ कुतश्च योगित्वं श्रेय इति ॥ प्रयत्नाद्यतमानस्तु योगी संशुद्धकिल्बिषः ॥ अनेकजन्मसंसिद्धस्त
तो याति परां गतिं ॥ ४५ ॥

योगभ्रष्टोऽभीष्टः सोऽपि वैदिकं कर्म तत्फलं चातिवर्तते किमुत योगं बुद्ध्वा तन्निष्ठः सदाभ्यासं कुर्वन्कर्म तत्फलं चातिवर्तत
इति वक्तव्यमिति योऽजना ॥ योगनिष्ठस्य कर्म तत्फलातिवर्तनं ततोऽधिकफलावाप्तिर्विवक्ष्यते ॥ ४४ ॥ योगनिष्ठत्वस्य श्रे
ष्ठत्वे हेत्वंतरं वक्तुमुत्तरश्लोकमवतारयति ॥ कुतश्चेति ॥ ४५ ॥

अ० ६ ॥
१५३ ॥ राम ॥

मृदुप्रयत्नोपिक्रमेणमोक्ष्यतेचेदधिकप्रयत्नस्य ।केवाहेतोरकिंचित्करत्वमित्याशंक्याह तंनरंप्रकटयति ॥ प्रयत्नादिति ॥ तत्र योगविषयप्रयत्नातिरेकेसतीत्यर्थः ॥ ततः संचितसंस्कारसमुदायादितियावत् ॥ समुत्पन्नसम्यग्दर्शनवशात्प्रकृष्टाग तिः संन्यासिनालभ्यतेनेनशीघ्रमुक्तिमिच्छन्नधिकप्रयत्नोभवेदल्पप्रयत्नश्चिरेणैवमुक्तिभागीत्यर्थः ॥ ४५ ॥ सम्यग्ज्ञा

विद्वान

प्रयत्नात् यतमानादधिकंप्रयतमानइत्यर्थः ॥ तत्रतुयोगीसंशुद्धकिल्बिषोविशुद्धकिल्बिषः संशुद्धपापअ नेकेषुजन्मसुकिंचित्किंचित्संस्कारजातमुपचित्यतेनोपचितेनानेकजन्मकृतेनसंसिद्धोऽनेकजन्मसंसिद्धस्ततो लब्धसम्यग्दर्शनः सन् यातिपरांप्रकृष्टांगतिं ॥ यस्मादेवंतस्मात् ॥ तपस्विभ्योधिकोयोगीज्ञानिभ्योपिमतोधिकः ॥ कर्मिभ्यश्चाधिकोयोगीतस्माद्योगीभवार्जुन ॥ ४६ ॥ तपस्विभ्योऽधिकोयोगीज्ञानिभ्योपिज्ञानमत्रशास्त्रपांडित्यंतद्वद्भ्योपिमतोधिकः कर्मिभ्योग्निहोत्रादिकर्मतद्वद्भ्योऽधिकोयोगीतस्माद्योगीभवार्जुन ॥ ०

तद्द्वारा मोक्षहेतुत्वंयोगस्योक्त्वमनन्तरयोगिनः सर्वाधिकत्वमाह ॥ यस्मादिति ॥ योगस्यसर्वस्मादुत्कर्षादवश्यकर्तव्यत्वाय गिनः सर्वाधिक्यंसाधयति ॥ तपस्विभ्यइति ॥ योगिनोज्ञानिनश्चपर्यायत्वात्कथंतस्यज्ञानिभ्योऽधिकत्वमित्याशंक्या ज्ञानमिति ॥ योगिनः सर्वाधिकत्वेफलितमाह ॥ तस्मादिति ॥ ४६ ॥ नन्वादित्योविराडात्मासूत्रंकारणमक्षरमित्येते

।।भूयांसोयोगिनोगम्यंतेतेषांकतमः श्रेयानिष्यतेतत्राह।।योगिनामिति।।योभगवंतंसगुणंनिर्गुणंवायथोक्तेनचेतसा
।सततनवरतमनुसंधत्तेसयुक्तानांमध्येतिशयेनयुक्तः श्रेयानीश्वरस्याभिप्रेतः नहितदीयोभिप्रायोन्यथाभवितुमर्हती
।।तदनेनाध्यायेनकर्मयोगस्यसंन्यासहेतोर्मर्यादांदर्शयतासांगंचयोगंविवृण्वतामनोनिग्रहोपायोपदेशेनयोगभ्र

ध्यानेक५

योगिनामपिसर्वेषांमद्गतेनांतरात्मना।।श्रद्धावान्भजतेयोमांसमेयुक्ततमोमतः।।४७।।इतियोगिनामपि
सर्वेषांरुद्रादित्यादिपराणांमद्गतेनमयिवासुदेवेसमाहितेनांतरात्मनाअंतःकरणेनश्रद्धावान्श्रद्दधानः
सन्भजतेसेवतेयोमांसमेममयुक्ततमोऽतिशयेनयुक्तोमनोऽभिप्रेतइति।।इतिश्रीभगवद्गीताभाष्ये
।।श्रीशंकरभगवत्पादकृतौषष्ठोध्यायःसपूर्णसमाप्तं।।

ष्टस्यात्यंतिकनाशाशंकांचशिथिलयतात्वंपदार्थाभिज्ञस्यज्ञाननिष्ठस्योत्त्यावाक्यार्थज्ञानान्मुक्तिरितिसाधितं।।४७।।हरिॐ।।
तत्सदितिश्रीमत्परमहंपरिव्राजकाचार्यश्रीमच्छुद्धानंदपूज्यपादशिष्यश्रीमदानंदज्ञानविरचितायांश्रीमद्भगवद्गीता
भाष्यटीकायांषष्ठोध्यायः।।संपूर्णसमाप्तं।।६।।श्रीरामायनमः।।श्रीकृष्णायनमः।।श्रीगुरुपादारविंदायनमः।।

अ०६।।
१५४।।राम।।

॥श्रीगणेशाय नमः॥ ॐ कर्मसंन्यासात्मकसाधनप्रधानं त्वंपदार्थप्रधानं च प्रथमषट्कं व्याख्याय मध्यमषट्के उपास्यनिष्ठं तत्प
दार्थनिष्ठं च व्याख्यातुमारभमाणः समनंतराध्यायमवतारयति॥ योगिनामिति॥ अतीताध्यायांते मद्गतेनांतरात्मना यो भजते
मामिति प्रश्नबीजं प्रदर्श्य कीदृशं भगवतस्तत्त्वं कथं वा तद्गतांतरात्मा स्यादित्यर्जुनस्य प्रश्नद्वये ज्ञाते स्वयमेव भगवानष्टमेत
दुक्तुमिच्छुरुक्तवानित्यर्थः॥ परमेश्वरस्य वक्ष्यमाणविशेषणेन तत्त्वं सकलजगदायतनत्वादिनानाविधविभूतिभागित्वं तत्र

॥ हरिः॥ ॐ योगिनामपि सर्वेषां मद्गतेनांतरात्मना॥ श्रद्धावान्भजते यो मां स मे युक्ततमो मत इति प्रश्नबीजमुपन्यस्य स्वय
मेवेदृशं मदीयं तत्त्वमेवं मद्गतांतरात्मा स्यादित्येतद्विवक्षुर्भगवानुवाच॥ मय्यासक्तमनाः पार्थ योगं युंजन्मदाश्रयः॥ असंशयं समग्रं
मां यथा ज्ञास्यसि तच्छृणु॥१॥ मयि वक्ष्यमाणविशेषणे परमेश्वरे आसक्तं मनो यस्य स मय्यासक्तमनाः पार्थ योगं युंजन्मनःसमाधा
नं कुर्वन्मदाश्रयोऽहमेव परमेश्वर आश्रयो यस्य स मदाश्रयः॥ यो हि पुरुषार्थेन केनचिदर्थी स तत्साधनं कर्माग्निहोत्रादि त॥
पोदानं वा किंचिदाश्रयं प्रतिपद्यते॥ अयं तु योगी मामेवाश्रयं प्रतिपद्यते॥ हित्वान्यत्साधनांतरं मय्येव चासक्तमना भवति॥

नद्दा॥क्तिर्मनसो विषयांतरपरिहारेणात्यंतनिष्ठत्वं मनसो भगवत्येवासक्तौ हेतुमाह॥ योगमिति॥ विषयांतरपरिहारे हि गोचरमात्मनोप्य
-॥भगवत्येव प्रतिष्ठितं भवतीत्यर्थः॥ तथापि स्यादाश्रमे पुरुषो मनः स्थापयति नान्यत्रेत्याशंक्याह॥ मदाश्रय इति॥ योगिनोऽप
ना॥ ज्ञाश्रयत्वेन तस्मिन्नेवासक्तमनस्त्वमुपन्यस्तं तदुपपादयति॥ यो हीति॥ ईश्वराख्याश्रयस्य प्रतिपत्तिमेव प्रकटयति॥ हित्वेति॥ ५

गी०
गरा०म

…योगिनस्त्वदाश्रयगतिपत्तामनसस्त्वय्येवासक्तिस्तथापिममकिमायानमित्याशंक्यद्वितीयार्द्धंव्याचष्टे।।यस्त्वमेवमिति।।एवंभूतो
…गोक्तध्याननिष्टपुरुषवदेवमय्यासक्तमनायस्त्वंसत्वंतथाविधःसन्नसंशयमविद्यमानःसंशयोत्रज्ञानेनयथास्यात्तथामांसमग्रं
ज्ञास्यसीतिसंबंधः।।समग्रमित्यस्यार्थमाह।।समस्तेति।।विभूतिर्नानाविधैश्वर्योपायसंपत्तिःबलंशरीरगतंसामर्थ्यं।शक्ति
र्मनोगतंप्रागल्भ्यं।ऐश्वर्यमीशितव्यविषयमीशनसामर्थ्यं।।आदिशब्देनज्ञानवीर्यादयोगृह्यंते।।असंशयमितिपदस्यक्रिया
विशेषणत्वंविशदयन्क्रियापदेनसंबंधंकथयति।।संशयमिति।।विनासंशयंभगवन्तत्त्वपरिज्ञानमेवस्फोरयति।।एवमेवेति।।

यस्त्वमेवंभूतःसन्असंशयंसमग्रंसमस्तविभूतिबलशक्त्यैश्वर्यादिगुणसंपन्नंमांयथायेनप्रकारेणज्ञास्यसिसंशयमंतरे
णैवमेवभगवानितितच्छृणुउच्यमानंमया।।तच्चमद्विषयं।।१।।ज्ञानंतेऽहंसविज्ञानमिदंवक्ष्याम्यशेषतः।।यज्ज्ञात्वाने दू
हभूयोन्यज्ज्ञातव्यमवशिष्यते।।२।।ज्ञानंतेतुभ्यमहंसविज्ञानंविज्ञानेनसहितंस्वानुभवसंयुक्तमिदंवक्ष्यामिकथयिष्या
।।म्यशेषतः।।१।।

भगवत्वेज्ञानवोकथंममज्ञानमुपदेक्ष्यति।।नहित्वामतेनतदुपदेष्टाकश्चिदस्तीत्याशंक्याह।।तच्छृण्विति।।ज्ञास्यसीत्युक्त्यापरोक्षज्ञा अ०७।।
नशंकायांनच्चित्तस्पर्धंलदुक्तिप्रकारमेवविवृणोति।।तच्चेति।।१।।इदमपरोक्षज्ञानंचैतन्यंतस्यसविज्ञानस्यप्रतितत्वंमेकिंस्या १५५।।
दित्याशंक्याह।।यज्ज्ञात्वेति।।इदमांचैतन्यस्यपरोक्षत्वंव्यावर्त्यते।।तदेवसविज्ञानमितिविशेषणेनस्फुटयन्ते।।अशेषतः।।
।।अनवशेषेण।।

नेहदेनफलोपन्यासेन श्रोतारं तच्छ्रवणप्रवणं करोति ॥ तज्ज्ञानमिति ॥ एकविज्ञानेन सर्वविज्ञानश्रुतिमाश्रित्योत्तरार्द्धेनास्यार्थमाह ॥ मत्तत्वेति ॥२॥ भगवत्तत्त्वज्ञानस्य विशिष्टफलत्वमुक्त्वा फलितमाह ॥ अनतरेति ॥ ज्ञानस्य दुर्लभत्वं प्रश्नपूर्वकं प्रकटयति ॥ कथमित्यादिना ॥ सहस्रशब्दस्य बहुवाचकत्वमुपेत्य व्याकरोति ॥ अनेकेष्विति ॥ सिद्धये सत्त्वशुद्धिद्वारा ज्ञानोत्पत्त्यर्थमित्यर्थः ॥ सिद्ध्यर्थं यतमानानां कथं सिद्धत्वमित्याशंक्याह ॥ सिद्धा एवेति ॥ सर्वेषामेव तेषां ज्ञानोदयात्तस्य सुलभत्वमित्याशंक्याह ॥

तत्ज्ञानं विवक्षितं स्तौति श्रोतुरभिमुखीकरणाय यत् ज्ञात्वा यत् ज्ञानं ज्ञात्वा न इह भूयः पुनरन्यज्ज्ञातव्यं पुरुषार्थसाधनमवशिष्यते नावशेषो भवतीति मत्तत्वज्ञोऽयं स सर्वज्ञो भवतीत्यर्थः ॥ अतो विशिष्टफलत्वात् दुर्लभं तत् ज्ञानं ॥ कथमित्युच्यते ॥ मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये ॥ यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः ॥३॥ मनुष्याणां मध्ये सहस्रेष्वनेकेषु कश्चिद्यतति प्रयत्नं करोति सिद्धये सिद्ध्यर्थं तेषां यततामपि सिद्धानां सिद्धा एव हि ते ये मोक्षाय यतंते तेषां कश्चिदेव मां वेत्ति तत्त्वतो यथावत् ॥ अतः श्रोतारं प्ररोचयित्वेनाभिमुखीकृत्याह ॥ भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च ॥ अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥४॥ भूमिरिति पृथ्वीतन्मात्रमुच्यते न स्थूलां भिन्ना प्रकृतिरष्टधेति वचनात् ॥

तेषामिति ॥३॥ ज्ञानार्थं प्रयत्नस्य तद्द्वारा ज्ञानलाभस्य तदुदयद्वारेण मुक्तेश्च दुर्लभत्वाभिधानस्य श्रोतृप्ररोचनं फलमिति मत्वाह ॥ श्रोतारं प्रति आत्मनः सर्वात्मकत्वेन परिपूर्णत्वमवतारयन्नादावपरां प्रकृतिमुपन्यस्यति ॥ आहेति ॥ भूमिशब्दस्य व्यवहारयोग्यस्थूलपृथिवीविषयत्वं व्यावर्तयति ॥ भूमिरिति ॥ तत्र हेतुमाह ॥ भिन्नेति ॥ प्रकृतिसमभिव्याहारात् गंधतन्मात्रं स्थूलपृथिवीप्रकृतिरन्तरविकारो भू

॥ भ ॥ [illegible] ॥

री०
गराम॰

ादिशब्दानामपि स्वस्वमन्तविषयत्वमाह॥ तथेति॥ तेषामपि प्रकृतिसमानाधिकरणत्वाविशेषात्तन्मात्राणां एवं एवं प
ई॥ उत्तरोत्तरविकाराणां न विशेषत्वसिद्धिरित्यर्थः मनःशब्दस्य संकल्पविकल्पात्मककरणविशषयत्वमाशंक्याह॥ मन इतीति
त्सः त्वहंकाराभावे संकल्पविकल्पयोरसंभवात्तदात्मकमनःसंभवतीत्यर्थः निश्चयलक्षणा बुद्धिरित्यभ्युपगमाद्बुद्धिशब्दस्य नि
ात्मककरणविषयत्वमाशंक्याह॥ बुद्धिरितीति॥ नहि हिरण्यगर्भसमष्टिबुद्धिमन्तरेण व्यष्टिबुद्धिः सिध्यतीत्यर्थः॥ अ
हंकारस्याभिमानविशेषात्मकत्वेनांतःकरणप्रभेदत्वं व्यावर्णयति॥ अहंकार इतीति॥ अविद्यासंयुक्तमिति अविद्यात्मकमि

तथाऽब्वादयोपि तन्मात्राणायेव उच्यंते आपोऽनलो वायुः खं मनो मन इति मनसः कारणमहंकारो गृह्यते॥ बुद्धिरित्यहंकार
कारणं महत्तत्वमहंकार इत्यविद्यासंयुक्तमव्यक्तं॥ यथा विषसंयुक्तमन्नं विषमित्युच्यते॥ एवमहंकारवासनावदव्य॥
क्तं महत्त्वकारणमहंकार इत्युच्यते॥ प्रवर्तकत्वादहंकारस्याहंकार एव हि सर्वस्य प्रवृत्तिबीजं दृष्टं लोके॥ इतीयं यथोक्ता प्रकृ
॥(~~तिर्मतं सुदंस्य तिं॥ मायेतिं~~॥५॥)) ॥ तिर्मे मम मैश्वरी माया॥३

त्यर्थः॥ कथं महत्कारणस्याहंकारशब्दत्वमित्याशंक्यो[illegible]क्तमर्थं दृष्टांतेन स्पष्टयति॥ यथेत्यादिना महत्कारणस्याहंकारशब्दत्वे हे
तुमाह॥ प्रवर्तकत्वादिति॥ तस्य प्रवर्तकत्वं प्रपंचयति॥ अहंकार एवेति॥ सत्येवाहंकारे ममकारो भवति तयोश्चाभावे सर्वा प्रवृत्तिरिँ प्रसि
द्धमित्यर्थः॥ उक्तां प्रकृतिमुपसंहरति॥ इतीयमिति॥ इयमित्यपरोक्षसाक्षिदृश्येति यावत्॥ ऐश्वरी तदाश्रयानंदैश्वर्योपाधिभू०
ता प्रक्रियते महदाद्याकारेणेति प्रकृतिस्त्रिगुणं जगदुपादानं प्रधानमिति मतं सुदस्येति॥ मायेति॥५॥ श्रीरामायनमः॥१

न
अ॥७॥
१५६॥

तस्यास्तत्तत्कार्याकारेणपरिणामयोग्यत्वंद्योतयति ।। शक्तिरिति ।। अष्टधेति अष्टभिः प्रकारैरितियावत् ।। ४ ।। अचेतनवर्गमेकी
कर्तुंप्रकृतेरष्टधापरिणाममभिधायविकारावच्छिन्नंकार्यंकृत्स्नंचेतनवर्गमेकीकर्तुंपुरुषस्यचैतन्यस्यअविद्याशक्तस्यवच्छि
प्र३ न्नस्यापिप्रकृतित्वंकथयितुंउक्तांप्रकृतिमनूद्यदर्शयति ।। अपरेति ।। निकृष्टत्वंस्पष्टयति ।। अनर्थकरीति ।। अनर्थकरत्वमेव
स्फोरयतिसंसारेति ।। कथंचिदप्यनन्यत्वस्यव्यावृत्त्यर्थस्तुशब्दः ।। अन्यामत्यंतविलक्षणामितियावत् ।। अन्यत्वमेवस्पष्टयति । वि शुद्धा

शक्तिरष्टधाभेदमागता ।। अपरेयमितस्त्वन्यांप्रकृतिंविद्धिमेपरां ।। जीवभूतांमहाबाहोययेदंधार्यतेजगत् ।। अपरानप
रानिकृष्टाअशुद्धाअनर्थकरीसंसारकरीस्वरूपबंधनात्मिकेयमितिरितोऽस्याःयथोक्तायास्तुअन्यांविशुद्धांप्रकृतिंममआ
त्मभूतांविद्धिमेपरांप्रकृष्टांजीवभूतांक्षेत्रज्ञलक्षणांप्राणधारणनिमित्तभूतांमहाबाहोययाप्रकृत्याइदंधार्यतेजग
दंतःप्रविष्टया ।। एतद्योनीनिभूतानिसर्वाणीत्युपधारयअहंकृत्स्नस्यजगतःप्रभवःप्रलयस्तथा ।। ६ ।। एतद्योनीनिए
तेपरापरेक्षेत्रक्षेत्रज्ञलक्षणेप्रकृतीयोनिर्येषांभूतानांतान्येतद्योनीनिभूतानिसर्वाणीत्येवमुपधारयंजानीहि ।। ५ ।।

मिति ।। प्रकृतीशादस्यात्रपुरुषस्यापार्थान्तरमाह ।। ममेति ।। प्रकृष्टत्वमेवभोक्तृत्वेनस्पष्टयति ।। जीवभूतामिति ।। प्रकृत्यंतरा
दस्याःप्रकृतेरवांतरविशेषमाह ।। ययेति ।। नहिजीवरहितंजगद्धारयितुंशक्यमित्याशयेनाह ।। अंतरिति ।। ५ ।। उक्तप्रकृतिद्वये
कार्यलिंगकमनुमानंप्रमाणयति ।। एतद्योनीनीति ।। प्रकृतिद्वयस्यजगत्कारणत्वेकथमीश्वरस्यतदुपगतमित्याशंक्याह ।। अहमिति ।।
।। तद्योनीनीत्युक्तेसमनंतरप्रकृतिजीवभूतप्रकृत्याविनद्धस्याव्यवधानात्प्रकृतिमाशंक्यव्याकरोति ।। एतेइति ।। सर्वाणिचेतनाचेतनानिज
निमंतीत्यर्थः ।।

॥राम॥
७॥

भूतकारणत्वेन प्रकृतिद्वयमंगीकृतं चेत्कथमहमित्याद्युक्तमित्याशंक्याह॥ यस्मादिति॥ मम प्रकृती परमेश्वरस्योपाधितया स्थिते इत्यर्थः॥ तर्हि प्रकृतिद्वयं कारणमीश्वरश्चेति जगतोनेकविधकारणांगीकरणं स्यादित्याशंक्याह॥ प्रकृतीति॥ अपरप्रकृतेरचेतनत्वात्परप्रकृतेश्चेतनत्वेपि किंचिज्ज्ञत्वादीश्वरस्यैव सर्वज्ञस्य सर्वकारणत्वं युक्तमित्याह॥ सर्वज्ञ इति॥ ६॥ यथा नात्परतोक्षरात्पुरुषवत्परमात्मनोपि परादन्यत्परं स्यादित्याशंक्य प्रकृतिद्वयद्वारा सर्वकारणत्वमीश्वरस्योक्तमुपजीव्य परिहरति॥ यस्मादिति॥ नान्य

यस्मान्मम प्रकृती योनिः कारणं सर्वभूतानामतोऽहं कृत्स्नस्य समस्तस्य जगतः प्रभव उत्पत्तिः प्रलयो विनाशस्तथा प्रकृतिद्वयद्वारेणाहं सर्वज्ञ ईश्वरो जगतः कारणमित्यर्थः॥ यस्मादेवं तस्मात्॥ मत्तः परतरं नान्यत्किंचिदस्ति धनंजय॥ मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव॥७॥ मत्तः परमेश्वरात्परमन्यत्कारणांतरं किंचिन्नास्ति न विद्यत इति अहमेव जगतः कारणमित्यर्थः॥ हे धनंजय यस्मादेवं तस्मान्मयि सर्वाणि भूतानि सर्वमिदं जगत्प्रोतमनुस्यूतमनुगतं ग्रथितमित्यर्थः दीर्घपटतंतुवत्
॥ सूत्रे च मणिगणा इव॥

दस्ति परमित्यत्र हेतुमाह॥ मयीति॥ परतरशब्दार्थमाह॥ अन्यदिति॥ स्वातंत्र्यव्यावृत्त्यर्थमंतरशब्दः॥ निषेधफलं कथयति॥ अहमेवेति॥ सर्वजगत्कारणत्वेन सिद्धमर्थं द्वितीयार्द्धव्याख्यानेन विशदयति॥ यस्मादित्यादिना दीर्घेषु तिर्यक्षु च पटघटितेषु तंतुषु पटस्यानुगतिरवगम्यते संदृब्धं मय्येवानुगतं जगदित्याह॥ दीर्घेति॥ यथा च मणयः सूत्रे अनुस्यूतास्तेनैव ध्रियंते तदभावे विकीर्यंते तथा मय्येवात्मभूते न सर्वे व्याप्तं ततो निकृष्टं विनष्टमेव स्यादिति श्लोकोक्तं दृष्टांतमाह॥ सूत्रे चेति॥ ॥ ॥ ॥ ॥०

॥
अ० ७॥
१५.७॥ राम॥

अवादीनां रसादिषु प्रोतत्वप्रतीतेस्तथाप्येवं सर्वं प्रोतमिति अयुक्तमिति मत्वा पृच्छति ॥ केनेति ॥ तत्रोत्तरमुत्तरग्रंथेन दर्शयति ॥ उच्य
तइति ॥ सारो मधुरो हेतुरिति यावत् रसोहमिति कथं तत्राह ॥ तस्मिन्निति ॥ अप्सु यो रसः सारस्तस्मिन्मयि मधुररसे कारणभूते व
प्रोता आप इति वदुत्तरेत्र सर्वत्र व्याख्यानं कर्तव्यमित्याह ॥ एवमिति ॥ उक्तमर्थं दृष्टांतं कृत्वा प्रभास्मीति मूलं व्याचष्टे ॥ यथेति ॥
चंद्रादित्ययोर्या प्रभा तद्भूते मयि तौ प्रोतावित्यर्थः तत्र वाक्यार्थं कथयति ॥ तस्मिन्निति ॥ प्रणवभूते परस्मिन्वेदानां प्रोतत्वव

केन केन धर्मेण विशिष्टे त्वयि सर्वं प्रोतमित्युच्यते ॥ रसोहमप्सु कौंतेय प्रभास्मि शशिसूर्ययोः ॥ प्रणवः सर्ववेदेषु शब्दः खे पौ
रुषं नृषु ॥ ८ ॥ रसोऽहमपां यः सारः सरसस्तस्मिन् रसभूते मयि आपः प्रोता इत्यर्थः ॥ एवं सर्वत्र यथाहमप्सु रस एवं प्र
भास्मि शशिसूर्ययोः प्रणवः ॐकारः सर्ववेदेषु तस्मिन् प्रणवभूते मयि सर्वे वेदाः प्रोताः ॥ तथा खे आकाशे शब्दः सारभू
तः ॥ तस्मिन् मयि खं प्रोतं तथा पौरुषं पुरुषस्य भावो यत्नः पुंबुद्धिर्नृषु तस्मिन् मयि पुरुषाः प्रोताः ॥ पुण्यो गंधः पृथिव्यां च
तेजश्चास्मि विभावसौ ॥ जीवनं सर्वभूतेषु तपश्चास्मि तपस्विषु ॥ ९ ॥ पुण्यः सुरभिर्गंधः पृथिव्यां चाहं तस्मिन्मयि गंधभू
॥ ते पृथिवी प्रोता ॥

दाकाशे यः सारभूतः शब्दस्तद्रूपे परमेश्वरे प्रोतमाकाशमित्याह ॥ तथेति ॥ पौरुषं नृष्विति भागं पूर्ववद्विभजते ॥ तथेत्यादिना पौरु
षत्वमेव विशदयति ॥ यत्न इति ॥ पुंस्त्वसामान्यात्मके परस्मिन्नीश्वरे प्रोतास्तद्विशेषास्तदुपादानत्वेन तत्स्वभावत्वादित्यर्थः
॥ ८ ॥ मयि सर्वमिदं प्रोतमित्यस्यैव परिपूरणार्थं प्रकारांतरमाह ॥ पुण्य इति ॥ पृथिव्यां पुण्यः शब्दितो यः सुरभिर्गंधः सोह
॥ मस्मीत्यत्र वाक्यार्थं कथयति ॥ तस्मिन्निति ॥

गी॰ यं पृथिव्यां गंधस्य पुण्यत्वं तत्राह ॥ पुण्यत्वमिति ॥ यत्तु पृथिव्यां गंधस्य स्वाभाविकं पुण्यत्वं दर्शितं तदबादिषु रसा
राम दिस्वाभाविकपुण्यत्वस्योपलक्षणार्थमित्याह ॥ पृथिव्यामिति ॥ प्रथमोत्पन्नाः पंचापि गुणाः पुण्या एव सिद्धादिभिरेव
भोग्यत्वादिति भावः । कथं तर्हि गंधादीनां ~~अ~~ पुण्यत्वप्रतिभानं तत्राह ॥ अपुण्यत्वं त्विति । तदेव स्पष्टयति । संसारिणामि
त ति ॥ गंधादयः स्वकार्यैर्भूतैः सहपरिणममानाः प्राणिनां पापादिवशादपुण्याः संपद्यंत इत्यर्थः । यच्चाग्नौ तेजस्तन्मूलेम पि

पुण्यत्वं गंधस्य स्वभावत एव पृथिव्यां दर्शितं अबादिषु रसादेः पुण्यत्वोपलक्षणार्थं अपुण्यत्वं तु गंधादीनां अविद्याधर्माद्यपेक्षं
संसारिणां भूतविशेषसंसर्गनिमित्तं भवति ॥ तेजो दीप्तिश्चास्मि विभावसौ वह्नौ तथा जीवनं सर्वभूतेषु येन अन्नरसेन जीवंति सर्वाणि
भूतानि तत् जीवनं । आयुरिति वा तस्मिंज्जीवने मयि सर्वभूतानि प्रोतानि तपश्चास्मि तपस्विषु तस्मिन्नूतपसि मयि तपस्वि
नः प्रोताः ॥ बीजं मां सर्वभूतानां विद्धि पार्थ सनातनं ॥ बुद्धिर्बुद्धिमतामस्मि तेजस्तेजस्विनामहं ॥ बीजं [redacted]
प्ररोहकारणं मां विद्धि सर्वभूतानां हे पा[redacted]र्थ सनातनं चिरंतनं ॥ ९ श्रीरामायनमः ॥ ९ ॥

प्रोतो निरवेत्याह ॥ तेज इति ॥ जीवनं भूते च मयि सर्वाणि भूतानि प्रोतानीत्याह ॥ तथेति ॥ जीवनशब्दार्थमाह ॥ येनेति अन्नरसेनाम
तारव्येनेत्यर्थः ॥ तपश्चास्मीत्यादेस्तात्पर्यमाह ॥ तस्मिन्निति ॥ चित्तैकाग्र्यमनाशकादि वा तपस्तद्वत्सु नीश्वरे प्रोतास्तपस्वि उ॰ ७ ॥
नो विशेषणाभावे विशिष्टस्य वस्तुनोऽभावादित्यर्थः ॥ ८ ॥ ननु सर्वाणि भूतानि स्वकारणे प्रोतानि कथं तेषां त्वयि प्रो १५८ ॥ राम ॥
तत्वं तत्राह ॥ बीजमिति ॥ बीजांतराद्यपेक्षयाऽनवस्थां निवारयति ॥ सनातनमिति ॥ ९ ॥ श्रीरामायनमः ॥ ॰

चैतन्यस्याभिव्यंजकंतत्वनिश्चयसामर्थ्यंबुद्धिस्तद्वतांयाबुद्धिस्तद्रूपेणापिसर्वेबुद्धिमंतः प्रोताभवंतीत्याह।।किंचेति।।प्राग ।।५।।
ल्भ्यवतांप्रागल्भ्यंतद्रूपेणापितद्वंतःप्रोताइत्याह।।तेजइति।।तद्धिप्रागल्भ्यंपरपराभिभवसामर्थ्यंपरैरधृष्यत्वं।।१०।।०
यश्चबलवतांबलंतद्रूपेणापितेषांप्रोतत्वमित्याह।।बलमिति।।कामक्रोधादिरर्वकस्यापिबलस्यानुमतिंवारयति।।नच्चे
किंचबुद्धिर्विवेकशक्तिरंतःकरणस्यबुद्धिमतांविवेकशक्तिमतांअस्मितेजः प्रागल्भ्यंतद्वतांतेजस्विनामहं।।५।।०
बलंबलवतांचाहंकामरागविवर्जितं।।धर्माविरुद्धोभूतेषुकामोस्मिभरतर्षभ।।११।।बलंसामर्थ्यमोजोबलवतामहंतच्च
बलंकामरागविवर्जितंकामश्चरागश्चकामरागौकामस्तृष्णाअसन्निकृष्टेषुविषयेषुरागोरंजनारूपःप्राप्तेषुविषयेषु
ताभ्यांकामरागाभ्यांविवर्जितंदेहादिधारणमात्रार्थंबलमहमस्मि।।नतुयत्संसारिणांतृष्णारागकारणंचेत्किं।।धर्मा
विरुद्धोधर्मेणशास्त्रार्थेनाविरुद्धोयःप्राणिषुभूतेषुकामोयथादेहधारणमात्रार्थोऽशनपानादिविषयःकामोऽस्मि
भरतर्षभ।।५।।किंच।।येचैवसात्विकाभावाराजसास्तामसाश्चये।।मत्तएवेतितान्विद्धिनत्वहंतेषुतेमयि।।१२।।येचैवसात्विकाः
सत्वभावाशमदमादयःर्वृत्ताः भावाःपदार्थाराजसारजोहर्षदर्पादयःनिर्वृत्ताश्चतामसास्तमःशोकमोहादयःनिर्वृत्ताश्च।।५
नि^

ग॰ ८

ते।।कामरागयोरेकार्थत्वमाशंक्यार्थभेदमाहयति।।कामस्तृष्णेत्यादिना।।विशेषणसामर्थ्यसिद्धमानर्स्यंदर्शयति।।नत्विति।।
त्रार्थाविरुद्धकामरूपेणापितथाविधकामवतांभूतानांप्रोतत्वंविवक्षितमाह।।किंचेति।।धर्माविरुद्धंकाममुदाहरति।।५
ति।।११।।चिदानंदयोरभिव्यंजकानांभावानांईश्वरात्मत्वाभिधानादन्येषामतदात्मत्वप्राप्तावुक्तं।।किंचेति।।श्रीरामन।।

गी० प्राणिनां त्रैविध्ये हेतुं दर्शयन्वाक्यार्थमाह।। येकेचिदिति।। न हि पितुरिव पुत्राधीनत्वं तत्तो जायमाना[illegible]धीनत्वं न वापि स्यादि
।। ।।क्रियावत्त्वदृष्यत्वप्रसक्तिरित्याशंक्याह।। यद्यपीति।। मम परमार्थत्वात्तेषां च कल्पितत्वान्न तद्गुणदोषौ मयि स्यातामित्यर्थः।।
तेषामपि नवैव स्वतंत्रतासंभवात्किमिति कल्पितत्वमित्याशंक्याह।। नेपुनरिति।। त्रिविधानां भावानां न स्वातंत्र्यमीश्वरकार्य
त्वेन तदधीनत्वात्तथा च कल्पितस्याधिष्ठानसत्ताप्रतीतिभ्यामेव तद्वत्वान्नमात्रत्वासिद्धिरित्यर्थः।। स तीश्वरस्य स्वातंत्र्योनित्य

येकेचित् प्राणिनां स्वकर्मवशाज्जायंते तान् मत्त एव जायमानान्नित्येवं विद्धि सर्वान् समस्तानेव यद्यपि ते मत्तो जायंते तथा
पि न त्वहं तेषु तदधीनस्तद्वशो यथा संसारिणस्ते पुनर्मयि मद्वशा मदधीनाः एवंभूतमपि परमेश्वरं नित्यशुद्धबुद्धमुक्तस्व
भावं सर्वभूतात्मानं निर्गुणं संसारदोषबीजप्रदाहाय मां नाभिजानाति जगदित्यनुक्रोशं दर्शयति भगवान्।। तच्च
८ भि किंनिमित्तं जगतोऽज्ञानमित्युच्यते।। त्रिभिर्गुणमयैर्भावैरेभिः सर्वमिदं जगत्।। मोहितं नाभिजानाति मामेभ्यः परमव्ययं
१३।। त्रिभिर्गुणमयैर्गुणविकारैः रागद्वेषमोहादिप्रकारैर्भावैः पदार्थैरेभिर्यथोक्तैः।। सर्वमिदं प्राणिजातं जगन्मोहित
मविवेकमापादितं सन्नाभिजानाति मामेभ्यो यथोक्तेभ्यो गुणेभ्यः परं व्यतिरिक्तं विलक्षणं चाव्ययं व्ययरहितं जन्मादिसर्वभा

॥ [illegible] ॥

शुद्धत्वादीश्वरस्य कुतो जगतस्तदात्मकस्य संसारित्वमित्याशंक्य तदज्ञानादित्या[illegible]ह।। एवंभूतमपीति।।१२।। यद्यप्येवं चोऽविक्रियश्चेत्तं क
स्मात्तमात्मभूतं स्वयंप्रकाशं सर्वो जनस्तथा न जानातीति मन्वानः शंकते।। तच्चेति।। श्लोकेनोत्तरमाह।। उच्यत इति।। ए[illegible]भ्यः परमित्य
प्रपंचत्वमुच्यते।। अव्ययमिति।। सर्वविक्रियाराहित्यं।।१३।। ।। ।। ।। ।। ।। ।। ।। ।।

अ० ७।।
१५९।। राम।।

यथोक्तानादिसिद्धमायापारवश्यपरिवर्जनायोगाज्जगतो न कदाचिदपि तत्त्वबोधसमुदयसंभावनेत्याशंकते॥ कथंपुनरिति॥ भगवदे
कशरणतया तत्त्वज्ञानद्वारेण मायातिक्रम० संभवतीति परिहरति॥ उच्यतइति॥ कथंदुरत्ययत्वेन तदत्ययः स्यादिति तत्राह॥ मामे
वेति॥ प्रधानस्येव स्वातंत्र्यं मायायाव्यक्तस्येति॥ देवस्येति॥ स्वातंत्र्यं मायायास्त्वनुपपन्नं हिशब्दद्योतितं हेतुं करोति॥ यस्मादि
ति॥ अनुभवसिद्धा सा नाकस्मादपलापमर्हतीत्याह॥ एषेति॥ जगतस्तत्त्वप्रतिपत्तिप्रतिबंधभूतैवं बंधुमत्त्वयाविधित्सितं दुर
त्ययत्वं विभजते॥ दुःखेनेति॥ मामेवेत्यादि व्याचष्टे॥ त्रिगुणाः सत्त्वादयः ममेति प्रागुक्तमेव मायायाः सं[illegible]॥ तत्रेति॥ ॰

कथंपुनर्दैवीमेतां त्रिगुणात्मिकां वैष्णवीं मायामतिक्रामंतीत्युच्यते॥ दैवीह्येषा गुणमयी मम माया दुरत्यया। मामेव ये प्रपद्यंते माया
मेतां तरंति ते॥१४॥ दैवी देवस्य ममेश्वरस्य विष्णोः स्वभावभूता हि यस्मादेषा यथोक्ता गुणमयी मम माया दुरत्यया दुःखेना
त्ययोऽतिक्रमणं यस्याः सा दुरत्यया॥ तत्रैवं सति सर्वधर्मान्परित्यज्य मामेव मायाविनं स्वात्मभूतं सर्वात्मना ये प्रपद्यंते ते माया
मेतां सर्वभूतमोहिनीं तरंति अतिक्रामंति संसारबंधनान्मुच्यंत इत्यर्थः॥ यदि तां प्रपन्ना मायामेतां तरंति कस्मात्तामेव सर्वे न

॰ [illegible]

तस्मिन्मायारूपे यथोक्तरीत्या दुरत्यये सतीति यावत्॥ मामेवेत्येवकारेण मायावेष्टकोदिनिवेशाभावो विवक्ष्यते॥ सर्वात्मनाकर्मानुष्ठा
नादिव्यग्रतामंतरेणेत्यर्थः॥ मायातिक्रमे मोहातिक्रमो भवतीति मत्वा विशिनष्टि॥ सर्वेति॥ मायातत्प्रयुक्तमोहयोरतिक्रमेऽपि॰
कथं पुरुषस्य पुरुषार्थत्वसिद्धिरित्याशंक्याह॥ संसारेति॥१४॥ भगवन्निष्ठायां मायातिक्रमे हेतुत्वे तदेकनिष्ठत्वमेव सर्वेषामु
चितमिति पृच्छति॥ यदीति॥१५॥

पा३

पापकारित्वेनाविवेकाभ्यस्तपापहिंसानृतादिरूपत्वान्दूपसांजंतनां न भोगवन्निष्ठत्वसिद्धिरित्याह॥ उच्यत इति॥ मौढ्यं पापका
रित्वे हेतुरत एव निःकर्षः संमुषितमिव तिरस्कृतं ज्ञानं स्वरूपचैतन्यं एषामिति तथा॥१५॥ केषांतर्हिनच्छिष्टनासुकरेलितत्राह॥ येपुन
रिति॥ ते भजंते भगवंतमिति शेषः॥ ये त्वां भजंते ते किं सर्वे मायां तरंति॥ मैवं प्रार्थनावैचित्र्यादित्याह॥ चतुर्विधा इति॥ आपन्न

उच्यते॥ न मां दुःकृतिनो मूढाः प्रपद्यंते नराधमाः॥ माययापहृतज्ञाना आसुरं भावमाश्रिताः॥१५॥ न मां परमेश्वरं दुः
कृतिनः पापकारिणो मूढाः प्रपद्यंते नराधमाः नराणामधमा निकृष्टास्ते च माययापहृतज्ञानाः संमुषितज्ञाना आसुरं
भावं हिंसाऽनृतादिलक्षणमाश्रिताः॥ ये पुनर्नरोत्तमाः पुण्यकर्माणः॥ चतुर्विधा भजंते मां जनाः सुकृतिनोऽर्जुन॥
आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ॥१६॥ चतुर्विधाः चतुःप्रकाराः भजंते सेवंते मां जनाः सुकृतिनः पुण्यकर्मा
णोऽर्जुन आर्तः आर्तिपरिगृहीतस्तस्करव्याघ्ररोगादिनाऽभिभूतः अभिभवं आपन्नो जिज्ञासुर्भगवत्तत्त्वं ज्ञातुमिच्छति
योऽर्थार्थी धनकामो ज्ञानी विष्णोस्तत्त्ववित् च भरतर्षभ॥ एतद्वैशिष्ट्यं॥ तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते॥ प्रि
योहि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः॥१७॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

स्तन्निवृत्तिमिच्छन्निति शेषः तत्त्वविदिति॥ शास्त्रज्ञानवानात्मतत्त्वसाक्षात्कारमात्रार्थी मुमुक्षुरित्यर्थः॥१६॥ चतुर्विधानां तेषां सु
कृतिनां भगवदभिमुखानां तुल्यत्वमाशंक्याह॥ तेषामिति॥ तस्य विशिष्यमाणत्वे हेतुमाह॥ प्रियो हीति॥ ५ ॥ ५॥

नित्ययुक्तत्वं भगवत्यात्मनि सदा समाहितचेतस्त्वं ॥ असारे संसारे भगवानेव सारः सोहमस्मीत्येकस्मिन्नद्वितीये स्वस्मादन्यं न मभिन्ने भगवति भक्तिः स्नेह विशेषोस्येत्येकभक्तिः तस्याधिक्ये हेतुं विवृणोति ॥ प्रियो हीत्यादिना ॥ भगवतो ज्ञानिनश्च परस्परं प्रेमास्पदत्वे प्रसिद्धिं प्रमाणयति ॥ प्रसिद्धं हीति ॥ आत्मनो ज्ञानिनं प्रति प्रियत्वेति भगवतो वासुदेव॰ स्य कथं तं प्रति प्रियत्वमित्याशंक्याह ॥ तस्मादिति ॥ अहं ज्ञानिनो निरुपाधिकं प्रेमास्पदं परमपुरुषार्थत्वेन आत्मत्वेन च गृहीतत्वादित्यर्थः ॥ ज्ञानिनोपि भगवन्तं प्रति प्रियत्वं प्रकाशयति ॥ स चेति ॥ १७ ॥ ज्ञानी चेदत्यर्थमीश्वरस्य प्रियो

तेषां चतुर्णां मध्ये ज्ञानी तत्त्ववित्त्वान्नित्ययुक्तो भवत्येकभक्तिश्चान्यस्य भजनीयस्यादर्शनादतः स एकभक्तिर्विशिष्यते ॥ विशेषमाधिक्यमापद्यते अतिरिच्यत इत्यर्थः ॥ प्रियो हि यस्मादहमात्मा ज्ञानिनोऽतस्तस्याहमत्यर्थं प्रियः प्रसिद्धं हि लोके आत्मा प्रियो भवतीति ॥ तस्मात् ॥ ज्ञानिन आत्मत्वात् वासुदेवः प्रियो भवतीत्यर्थः स च ज्ञानी मम वासुदेवस्यात्मैवेत्यतो ममात्यर्थं प्रियः ॥ न तर्ह्यार्तादयस्त्रयो वासुदेवस्य प्रियाः ॥ न ॥ किं तर्हि ॥ उदाराः सर्व एवैते ज्ञानी त्वात्मैव मे मतं ॥ आस्थितः स हि युक्तात्मा मामेवानुत्तमां गतिं ॥ १८ ॥ उदाराः उत्कृष्टाः सर्व एवैते त्रयोऽपि मम प्रिया एवेत्यर्थः

भवति तर्हि विशेषणसामर्थ्यादितरेषामप्रियत्वं प्राप्तमिति शंकते ॥ न तर्हीति ॥ तेषामपि भगवन्तं प्रत्यप्रियत्वमत्र न विवक्षितमित्याह ॥ नेति ॥ अत्यर्थमिति विशेषणस्य तर्हि किं प्रयोजनमिति पृच्छति ॥ किं तर्हीति ॥ सर्वेषां भगवदभिमुखत्वादुत्कर्षेऽपि ज्ञानीति तदतिरेकमंगीकृत्य विशेषणमित्याह ॥ उदारा इति ॥ किं तत्र [illegible]रामित्याशंक्येश्वरज्ञानमित्याह ॥ मे मतमिति ॥ ज्ञानी त्वात्मैवेत्यत्र हेतुमाह ॥ आस्थित इति सर्वशब्दस्य ज्ञानिव्यतिरिक्तविषयत्वमाह ॥ त्रयोपी

॥ टी॰ ॥ ७ ॥

टी० ज्ञानिव्यतिरिक्तानां भगवदभिमुख्येपि ज्ञानाभावापराधान्न भगवत्प्रीतिविषयत्वेत्साशंक्याह। नहीति कस्तर्हि ज्ञानवति विशेषस्तत्राह ॥ ज्ञानी त्विति ॥
।राम॥ मेव विशेषं प्रश्नपूर्वकं प्रकटयति ॥ तत्कस्मादित्यादिना ॥ सर्वमात्मानं पश्यतोऽपक्षपातित्वात्कथं यथोक्तो निश्चयः स्यादित्याशंक्यास्थितनरसेन व्या-
करोति ॥ आरोढुमिति ॥ आरोहहेतुं सूचयति ॥ स ज्ञानीति ॥ आरोढुं प्रवृत्तत्वमेव स्फुटयति ॥ मामेवेति ॥१८॥ उत्तरश्लोकस्य गतार्थत्वं परिहरति ॥ ज्ञानीति ॥ प ३
ज्ञानार्थः संस्कारो वा स गान तज्जन्मसु पुण्यकर्मानुष्ठानजनिता बुद्धिस्तदाश्रयाणां तद्वतामनंतानां जन्मनामिति यावत् ज्ञानवत्त्वं प्राप्तनेष्व०

नहि कश्चिन्मद्भक्तो मम वासुदेवस्याप्रियो भवतीति ॥ ज्ञानी त्वत्यर्थं प्रियो भवतीति विशेषः ॥ तत्कस्मादित्याह ॥ ज्ञानी त्वात्मैव नान्यो मत्त
इति मे मम मतं निश्चयः आस्थितः आरोढुं प्रवृत्तः स ज्ञानी हि यस्मादहमेव भगवान्वासुदेवो नान्योस्मीत्येवं युक्तात्मा समाहितचित्तः
१म सन्मामेव परं ब्रह्म गंतव्यमनुत्तमां गतिं गंतुं प्रवृत्त इत्यर्थः ॥ ज्ञानी पुनरपि स्तूयते ॥ बहूनां जन्मनामंते ज्ञानवान्मां प्रपद्यते ॥ वासुदेवः सर्व- गं १
मिति स महात्मा सुदुर्लभः ॥१९॥ बहूनां जन्मनां ज्ञानार्थसंस्कारार्जनाश्रयाणां अंते समाप्तौ ज्ञानवान् प्राप्तपरिपाकज्ञानो मां
वासुदेवं प्रत्यगात्मानं प्रत्यक्षतः प्रपद्यते ॥ कथं ॥ वासुदेवः सर्वमिति य एवं सर्वात्मानं प्रतिपद्यते ॥ स महात्मा न च तत्समोऽन्योस्त्यधिको प९
वा अतः सुदुर्लभः स मनुष्याणां सहस्रेष्विति ह्युक्तं ॥१९॥

पि जन्मसु दुःसंभावितमित्याह ॥ प्राप्तेति ॥ ज्ञानवतो भगवत्प्रतिपत्तिं प्रश्नद्वारा विवृणोति ॥ कथमिति ॥ यथोक्तज्ञानस्य तद्वतश्च दुर्लभत्वं सूचयति ॥ एव- प
मिति ॥ महत्सर्वोत्कृष्टमात्मशब्दितं चित्तमस्येति ॥ महात्मत्वे फलितं हेतुमाह ॥ अत इति ॥ तत्र वाक्योपक्रमानुकूल्यं कथयति ॥ अ० ७॥
॥ मनुष्याणामिति ॥१९॥ १६१॥राम॥

किमिति न हि सर्वेषां प्रत्यग्भूते भगवति यथोक्तज्ञानं नोदेतीत्याशंक्य न मामित्यत्रोक्तं हृदि निधाय ज्ञानानुदये हेत्वंतरमाह॥ आत्मैवेति
कामैर्नानाविधैरपहृतविवेकविज्ञानस्य देवतांतरनिष्ठत्वमेव प्रत्यग्भूतपरदेवताप्रतिपत्त्यभावे कारणमित्याह॥ कामैरिति॥
देवतांतरनिष्ठत्वे हेतुमाह॥ तं तमिति॥ प्रसिद्धो नियमो जपोपवासप्रदक्षिणानमस्कारादिः नियमविशेषाश्रयणे कारणमाह॥

आत्मैव सर्वो वासुदेवरूप एवमप्रतिपत्तौ कारणमुच्यते॥ कामैस्तैस्तैर्हृतज्ञानाः प्रपद्यंतेऽन्यदेवताः॥ तं तं नियममास्थाय प्रकृत्या
नियताः स्वया॥२०॥ कामैस्तैस्तैः पुत्रपशुस्वर्गादिविषयैः हृतज्ञानाः अपहृतविवेकविज्ञानाः प्रपद्यंते प्राप्नुवंत्यऽन्यदेवता वा
सुदेवादात्मनोऽन्या देवतास्तं तं नियमं तत्तद्देवताराधने प्रसिद्धो यो यो नियमस्तं तमास्थायाश्रित्य प्रकृत्या स्वभावेन जन्मां
तरार्जितसंस्कारविशेषेण नियता नियमिताः स्वया आत्मीयया॥ तेषां च कामिनां॥ यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति॥
तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहं॥२१॥ यो यः कामी यां यां देवतातनुं श्रद्धया संयुक्तो भक्तश्च सन्नर्चितुं पूजयितुमिच्छति तस्य
तस्य कामिनोऽचलां स्थिरां श्रद्धां तामेव विदधामि स्थिरां करोमि॥ यथैव पूर्वं प्रवृत्तः स्वभावतो॥ यो यां देवतातनुं अर्चितुमिच्छ
ति॥ स तया श्रद्धया युक्तस्तस्याराधनमीहते॥ लभते च ततः कामान्मयैव विहितान् हितान्॥ २२॥ श्रीरामचंद्रः समर्थः॥

प्रकृत्येति॥२०॥ तत्तद्देवताप्रसादात्कामिनामपि सर्वेश्वरे सर्वात्मके वासुदेवे क्रमेण भक्तिर्भविष्यतीत्याशंक्याह॥ तेषां चेति॥
स्वभावतो जन्मांतरीयसंस्कारवशादित्यर्थः॥२१॥ भगवद्विहितया स्थिरया श्रद्धया संस्काराधीनया देवताविशेषमारा
धयतोपि भगवदनुग्रहादेव फलप्राप्तिरित्याह॥ यो यामिति॥ २२॥ ॥ २२॥ ॥ २२॥

र् हतेनिर्दिर्तमप्रीत्यर्थः॥आराधितदेवताप्रसादात्फलप्राप्तौकिमीश्वरेणेत्याशंक्यतस्यसर्वज्ञस्यसर्वकर्मफलविभागाभिज्ञस्यदेवता
धिष्ठातृत्वात्तस्यैवफलदातृत्वमित्याह॥सर्वज्ञेनेति॥एकोबहुनांयोविदधातिकामानित्यादिश्रुतिमाश्रित्यहितानितिपदद्वयंव्या
चष्टे॥यस्मादिति॥हितानित्येकंपदमितिपक्षंप्रत्याह॥हितानिति॥मुख्यत्वसंभवेकिमित्यौपचारिकत्वमित्याशंक्याह॥नहीति॥
प्रेक्षापूर्वकारिणिकामानांहितत्वाभावेहेतुमाह॥यस्मादिति॥किंचयेकामिनस्तेनविवेकिनस्ततश्चाविवेकपूर्वकत्वात्कामामं
सतयामद्विहितयाश्रद्धयायुक्तःसंयुक्तःसन्तस्यादेवतायास्तन्वाआराधनमीहतेचेष्टतेलभतेचततस्तस्याआराधितादेवता
तन्वाःकामानीप्सितान्[illegible]मयैवपरमेश्वरेणसर्वज्ञेनकर्मफलविभागज्ञतयाविहितान्निर्मितांस्तान्हियस्मात्तेभ
गवताविहिताः॥कामास्तस्मात्ताननवश्यंलभंतइत्यर्थः॥हितानितिपदेहितत्वंकामानामुपचरितंकल्प्यंनहिकामाहिताः
कस्यचिद्यस्मादंतवत्साधनव्यापाराअविवेकिनःकामिनश्चते॥अतः॥अंतवत्तुफलंतेषांतद्भवत्यल्पमेधसां॥देवान्दे
वयजोयांतिमद्भक्तायांतिमामपि॥२३॥अंतवद्विनाशितुफलंतेषांतद्भवत्यल्पमेधसामल्पप्रज्ञानांदेवान्देवयजोयांति॥
देवान्यजंतीतिदेवयजःतेदेवान्यांतिगच्छंति॥मद्भक्तायांतिमामपि॥ ॥ ॥ ॥ ॥ ।
कुतोहितत्वाशंकेत्याह॥अविवेकिनइति॥कामानामनंतफलत्वेनहितत्वमाशंक्याह॥अतइति॥तेषामविवेकपूर्वकत्वमतःश
ब्दार्थः॥२२॥तुशब्दोवधारणार्थः॥कामफलस्यविनाशित्वेकिमिंकामनिष्ठत्वंजंतूनामित्याशंक्यप्रज्ञामांद्यादित्याह॥अल्पे॰ ति
ति॥किंतर्हिसाधनमनंतफलायेत्याशंक्यभगवद्भक्तिरित्याह॥मद्भक्ताइति॥ ॥ ॥ ॥रामरामरामरामरा म

अक्षरार्थमुक्त्वाश्लोकस्यतात्पर्यार्थमाह॥ एवमिति॥ देवताप्राप्तोभगवत्प्राप्तौचेतिशेषः मामेवेत्यादौदेवताविशेषंतुप्रप
द्यंतेऽनंतवत्फलत्वायेतिवक्तव्यं॥ उक्तेवैपरीत्येकारणमविवेकातिरिक्तंनास्तीत्यभिप्रेत्याह॥ अहोखल्विति॥ २३॥ भगवद्भज
नस्योत्तमफलत्वेपिप्राणिनांप्रायेणतन्निष्ठत्वाभावेप्रश्नपूर्वकंतन्निमित्तंनिवेदयति॥ किंनिमित्तमित्यादिनाऽप्रकाशांश
रीरग्रहणात्पूर्वमितिशेषः॥ इदानींलीलाविग्रहपरिग्रहावस्थायामित्यर्थः॥ प्रकाशस्यतर्हिकादाचित्कत्वंभगवतिप्राप्तं

एवंसामान्यायासेमामेवनप्रपद्यंतेऽनंतफलत्वायाहोखलुकष्टंवर्तत इति॥ अनुकोशंदर्शयतिभगवान्॥ किंनिमि
त्तंत्वामेवनप्रतिपद्यंतेइत्युच्यते॥ अव्यक्तंव्यक्तिमापन्नंमन्यंतेमामबुद्धयः॥ परंभावमजानंतोममाव्ययमनुत्तमं॥ २४॥
अव्यक्तमप्रकाशंइदानींव्यक्तिमापन्नंप्रकाशंगतंसंप्रतिमन्यंतेमांनित्यप्रसिद्धमीश्वरमपिसंतंअबुद्धयोऽविवेकिनःपरंभावं
परमात्मस्वरूपमजानंतोऽविवेकतोममाव्ययंव्ययरहितं॥ अनुत्तमंनिरतिशयंमदीयंभावमजानंतोमन्यंतइत्यर्थः॥ तदज्ञा
नंकिंनिमित्तमित्युच्यते॥ नाहंप्रकाशःसर्वस्ययोगमायासमावृतः॥ मूढोऽयंनाभिजानातिलोकोमामजमव्ययं॥ २५॥ ना
हंप्रकाशःसर्वस्यलोकस्यकेषांचिदेवमद्भक्तानांप्रकाशोऽहमित्यभिप्रायः॥ ५॥ ॥ ॥ ॥ ॥

नेपाह॥ नित्येति॥ कथंतर्हिभगवंतमागंतुकप्रकाशंमन्यंतेमामत्राबुद्धयइत्युत्तरंतद्विवृणोति॥ परमितिपरमनुत्तममितिविशेषणद्वयंसोपाधिक
नेरूपाधिकभावार्थमविवेकरूपमज्ञानंभवेगेन्निषिद्धाप्रतिबंधकमुक्तं॥ २४॥ तस्मिन्नपिनिमित्तंप्रश्नपूर्वकमनाद्यज्ञानमुपन्यस्यति॥ नरसानमित्ता
देना॥ त्रिभिर्गुणमयैरित्यनौपाधिकरूपस्याप्रतिपत्तौकारणमुक्तमत्रतुसोपाधिकस्यापीतिविशेषंगृहीत्वाव्याचष्टे॥ नाहमिति॥ नहिभग
मतिरनुपलब्धकेसाशंव्याह॥ केषांचिदिति॥ ५॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

लोकस्य न प्रकाशोहमित्यत्र हेतुमाह॥ योगेति॥ अनाद्यनिर्वाच्याज्ञानरूपत्वादेव मद्विषये लोकस्य मौढ्यं न तत्त्वमतीयस्वरू
त्वप
विकामाबात्म्यचिद्घनत्वराहित्यमित्याह॥ अत एवेति॥ माययाभगवानावृतश्चेत्तस्यापि लोकस्येव ज्ञानप्रतिबंधः स्यादित्याशंक्या
पयेति॥ नहीयं माया मायाविनो विज्ञानं प्रतिबध्नाति मायात्वाल्लौकिकमायावद्यथवानेश्वरो मायाप्रतिबद्धज्ञानो मायावित्वा
ल्लौकिकमायाविवदित्यर्थः॥२५॥ भगवतो मायाप्रतिबद्धज्ञानत्वाभावे सर्वज्ञत्वमप्रतिबंधसिद्धमित्याह॥ यत्तइति॥०

योगमायासमावृतः योगो गुणानां युक्तिर्घटनं सैव माया तया योगमायया समावृतः संछन्न इत्यर्थः अत एव मूढो लो
कोयं नाभिजानाति मामजमव्ययं॥ मया योगमायया समावृतं मां लोको नाभिजानाति नासौ योगमाया मदीया सती म
मैवेश्वरस्य मायाविनो ज्ञानं प्रतिबध्नाति यथान्यस्यापि मायाविनो मायातद्वत्॥ यत एवमतः वेदाहं समतीतानि वर्तमा
नानि चार्जुन॥ भविष्याणि च भूतानि मां तु वेद न कश्चन॥२६॥ अहं तु वेद जानामि समतीतानि समतिक्रांतानि भूतानि वर्त
मानानि चार्जुन॥ भविष्याणि च भूतानि वेदाहं मां तु वेद न कश्चन मद्भक्तं मच्छरणमेकं मुक्त्वा मत्तत्ववेदनाभावादेव न मां भजते॥७

लोकस्य मायाप्रतिबंधविज्ञानत्वादेव भगवदाभिमुख्यशून्यत्वमित्याह॥ मां त्विति॥ कालत्रयपरिच्छिन्नापरिच्छिन्नसमस्तवस्तुपरिज्ञाने प्रतिबंधो ने
श्वरस्यास्तीति द्योतनार्थस्तु शब्दो मां त्विति लोकस्य भगवत्तत्त्वविज्ञाने प्रतिबंधं द्योतयति॥ नहि तद्भक्तिर्विफलेत्याशंक्याह॥ मद्भक्तमिति॥ नहि
सर्वोपि तद्भक्तिद्वारा तां ज्ञास्यतीति नेत्याह॥ मत्तत्वेति॥ विवेकवतो मद्भजनं न तु विवेकरहितस्य सर्वस्यापीत्यर्थः॥२६॥ ॥श्रीरामनारायणायनमः

भगवत्तत्त्वज्ञानप्रतिबंधकं मल्लाज्ञानातिरिक्तं प्रश्नद्वारेणोदाहरति ॥ केनेत्यादिना ॥ पुनःशब्दात्प्रतिबंधकांतरविवक्षा गम्यते ॥ अपरोक्षमवां
तरप्रतिबंधकमिदमागृह्यते ॥ विशेष्यमाकांक्षापूर्वकं निक्षिपति ॥ केने[illegible]सपेक्षायांइति ॥ द्वंद्वशब्देन गृहीतयोरपीच्छाद्वेषयोर्ग्रहणं
द्वंद्वशब्दार्थोपलक्षणार्थमित्यभिप्रेत्याह ॥ तावेवेति ॥ तयोरपर्यायमेकत्रानुपपत्तिं गृहीत्वाविशिनष्टि ॥ यथाकालमिति ॥ न च नयोरन

केन पुनर्मत्तत्त्ववेदनप्रतिबंधेन प्रतिबद्धानि संति जायमानानि सर्वभूतानि मां न विदंतीत्यपेक्षायामिदमाह ॥ इच्छाद्वेषसमु
त्थेन द्वंद्वमोहेन भारत ॥ सर्वभूतानि संमोहं सर्गे यांति परंतप ॥ इच्छाद्वेषसमुत्थेन इच्छा च द्वेषश्च इच्छाद्वेषौ ताभ्यां समुत्तिष्ठती लेन
तीच्छाद्वेषसमुत्थस्तेन इच्छाद्वेषसमुत्थेन केनेति विशेषापेक्षायामिदमाह द्वंद्वमोहेनेति द्वंद्वनिमित्तो मोहो द्वंद्वमोह[illegible] तावेवे
च्छाद्वेषौ शीतोष्णवत्परस्परविरुद्धौ सुखदुःखतद्धेतुविषयौ ॥ यथाकालं सर्वभूतैः संबध्यमानौ द्वंद्वशब्देनाभिधीयेते तत्र यदे
च्छाद्वेषौ सुखदुःखतद्धेतुसंप्राप्त्या लब्धात्मकौ भ[illegible]वतः तदा तौ सर्वभूतानां प्रज्ञाया[illegible] स्ववशापादनद्वारेण परमार्थात्मत
त्त्वविषयज्ञानोत्पत्तिप्रतिबंधकारणं मोहं जनयतः ॥ नहीच्छाद्वेषदोषवशीकृतचित्तस्य भूतार्थविषयं ज्ञानमुत्पद्यते बहिरपि ॥ कि
,वक्तव्यं ताभ्यामाविष्टबुद्धेः संमूढस्य प्रत्यगात्मनि बहुप्रतिबंधे ज्ञानं नोत्पद्यत इति ॥२७॥ ॥ ॥ श्रीरामायनमः ॥ ॥ ॥ न
रणं किंचिदपि भूतं संसारमंडले संभवतीत्याह ॥ सर्वभूतैरिति ॥ तथापि कथं तयोर्मोहहेतुत्वमित्याशंक्याह ॥ तत्रेति ॥ तयोराश्रयः
देहो मूर्खः ॥ उत्क्रमेवार्थं कैमुतिकन्यायेन प्रपंचयति ॥ नहीति ॥ ॥ श्रीरामचंद्रायनमः ॥ श्रीगुरुमूर्तयेनमः ॥ ॥ ॥

र्व गानुवादपूर्वकमुत्तरभागेन फलितमाह ॥ अनइति ॥ प्रसंगात्मन्यहंकारादिप्रतिबंधप्रभावतो ज्ञानोत्पत्तेरसंभावितं शब्दार्थः ॥
युक्तमहिम्नास्वरूपशक्त्याचयुक्तस्यैव यथोक्तप्रतिबंधप्रतिविधानसामर्थ्यमिति निद्योतनार्थं भारतपरंतपेति संबोधनद्वयं ॥
ान प्रतिबंधे प्रकृतमवांतरंगमुपसंहरति ॥ मोहेति ॥ जायमानभूतानां मोहपरव शत्वे फलितमाह ॥ यत इति ॥ भगवत्तत्त्ववे-
ावेतत्त्रिदत्त्व वैधुर्यं फलतीत्याह ॥ अत्र वेरेति ॥ २७ ॥ यदि सर्वाणि भूतानि जन्म प्रतिपद्यमानानि संमूढानि संतिभगवत

उवतस्तेनेच्छाद्वेषसमुत्थेन द्वंद्वमोहेनेहे भारत न भूतान्यजसर्वभूतानि संमोहितानि संति ॥ संमोहं संमूढतां सर्गे जन्मन्युत्पत्ति-
कालइत्येतद्यांति ॥ खंलिहे परंतप ॥ मोहवशान्येव सर्वभूतानि जायमानानि जायंत इत्यभिप्रायः ॥ यत एवमतस्तेन द्वंद्वमोहे-
न प्रतिबद्धप्रज्ञानानि सर्वभूतानि संमोहितानि मामात्मभूतं न जानंति ॥ अत एवात्मभावेन न मां भजंते के पुनरनेन द्वंद्व-
मोहेन निर्मुक्ताः संतस्त्वां विदित्वा यथाशास्त्रमात्मभावेन भजंत इत्यपेक्षितमर्थं दर्शयितुमाहेत्युच्यते ॥ येषां त्वंतगतं पापं
जनानां पुण्यकर्मणां ॥ ते द्वंद्वमोहनिर्मुक्ता भजंते मां दृढव्रताः ॥ २८ ॥ ७ ॥

त्वपरिज्ञानं भूतान्यानि भगवद्भजनपराङ्मुखानि तर्हि शास्त्रानुरोधेन भगवद्भजनमुच्यमानमधिकार्यभावादनर्थकमापाद्यतइ-
तिशंकते ॥ केपुनरिति ॥ अनेकेषु जन्मसु कृतेन सुकृतेन वशादपाकृतदुरितानां द्वंद्वप्रमुक्तमोहविरहितानां ब्रह्मचर्यादिनियमव-
तां भगवद्भजनाधिकारित्वान्न शास्त्रविरोधोऽस्तीति परिहरति उच्यत इति ॥ ७ ॥ श्रीरामायणमाहः ॥ श्रीकृष्णाया-

श्री

अ० ७ ॥
१६४ ॥ राम ॥

तुशब्दोत्थमर्थमाह ॥ पुनरिति ॥ सुक्तेरर्थमात्रसिध्यर्थं समासप्रायमिदमुक्तं । भक्तनोपयोगं पुण्यस्य कर्मणो दर्शयितुं विशिनष्टि ॥
सत्वेति ॥ उभयविधशुद्धेर्द्वंद्वनिमित्तमोहनिवृत्तिफलत्वमाह ॥ ते द्वंद्वेति ॥ मोहनिवृत्तेर्भगवन्निष्ठापर्यंतत्वमाह ॥ भजंतेतेति ॥
तेषां नानापरिग्रहवतां भगवद्भजनप्रतिहतिमाशंक्याह ॥ दृढेति ॥ २९ ॥ यथोक्तानामधिकारिणां भगवद्भजनफलत्वं प्रश्नद्वा
राद्दर्शयति ॥ ते किमर्थमिति ॥ जरामरणादिलक्षणो यो बंधस्तद्विश्लेषार्थं भगवद्भजनमित्यर्थः ॥ संप्रति सगुणस्य सप्रपंचस्य
मध्यमानुसरणार्थं ध्येयत्वमाह ॥ मामाश्रित्येति ॥ जरादिसंसारनिवृत्त्यर्थं निर्गुणं निष्प्रपंचं मामुत्तमाधिकारिणो जानंती

येषां तु पुनरंतगतं समाप्तप्रायं क्षीणं पापं जनानां पुण्यकर्मणां पुण्यं कर्म येषां सत्वशुद्धिकारणं विद्यते ते पुण्यकर्माणः ॥
तेषां पुण्यकर्मणां ते द्वंद्वमोहनिर्मुक्ता यथोक्तेन द्वंद्वमोहेन निर्मुक्ताः भजंते मां परमात्मानं दृढव्रताः एवमेव परमार्थतत्वं
नान्यथेत्येवं सर्वपरित्यागव्रतेन निश्चितविज्ञाना दृढव्रता उच्यंते ॥ ते किमर्थं भजंते इत्युच्यते ॥ जरामरणमोक्षाय मामाश्रि
त्य यतंति ये ॥ ते ब्रह्म तद्विदुः कृत्स्नमध्यात्मं कर्म चाखिलं ॥ २९ ॥ जरामरणमोक्षाय जरामरणमोक्षार्थं मां परमेश्वरमाश्रित्य
मत्समाहितचित्ताः संतो यतंते प्रयतंते ये ते यद्ब्रह्म परं तद्विदुः कृत्स्नं समस्तमध्यात्मं प्रत्यगात्मविषयं वस्तु तद्विदुः कर्म चा

मामेव ये प्रपद्यंते इत्यादावित्याह ॥ जरेति मध्यमाधिकारिणं प्रत्याह ॥ मामिति ॥ परमेश्वराश्रयणं नाम विषयविमुखत्वेन भगव
देकनिष्ठत्वमित्याह ॥ मत्समाहितेति ॥ प्रयतनं भगवन्निष्ठासिध्यर्थं बहिरंगाणां यज्ञादीनामंतरंगाणां च श्रवणादी
नामनुष्ठानं प्रागुक्तं ॥ जगदुपादानं परं ब्रह्म कथं ब्रह्म विदुरित्यपेक्षायां समस्ताध्यात्मवस्तुत्वेन सकलकर्मत्वेन च तद्विदुरित्याह ॥ कृत्स्नमिति ॥

नके[illegible]लंममचत्तिष्ठतांसर्वाध्यात्मकं कर्मात्मकंब्रह्मवित्वमेवकिंत्वधिभूतादिसहितंतद्देत्वमपिसिध्यतीत्याह॥साधिभूतेति
ध्यात्मं कर्माधिभूतमधिदैवमधियज्ञश्चेतिपंचात्मकंतब्रह्मयेविदुस्तेषांयथोक्तज्ञानवतांसमाहितचेतसामापद्वस्थायाम
७। भगवत्तत्वज्ञानमप्रतिहतंतिष्ठतीत्याह॥प्रयाणेति॥अपिचेतिनिपाताभ्यांतस्यामवस्थायांकरणग्रामस्यव्यग्रतयाज्ञानासं
भवेपिमयिसमाहितचित्तानामुक्तज्ञानवतांभगवत्तत्वज्ञानमयत्नलभ्यमितिद्योत्यते॥तदनेनसप्तमेनोत्तमाधिकारिणंप्रतिज्ञे

साधिभूताधिदैवंमांसाधियज्ञंचयेविदुः॥प्रयाणकालेऽपिचमांतेविदुर्युक्तचेतसः॥३०॥इतिसाधिभूताधिदैवंमांअधिभूतं
चाधिदैवंचेति अधिभूताधिदैवंतेनसह अधिभूताधिदैवेनवर्ततइतिसाधिभूताधिदैवंमांयेविदुःसाधियज्ञंच
सहाधियज्ञेनसाधियज्ञंयेविदुःप्रयाणकालेमरणकालेऽपिचमांतेविदुःर्युक्तचेतसःसमाहितचित्ताइति॥०
इति॥श्रीभगवद्गीताभाष्येशांकरभगवत्पादकृतौसप्तमोध्यायः॥समाप्तमस्तु॥श्रीकृष्णार्पणमस्तु॥७॥०

यंनिरूपयतातदर्थमेवसर्वात्मकत्वादिकमुपदिशताप्रकृतिद्वयद्वारेणसर्वकारणत्वादिचवदतातत्पदवाच्यंतत्त्वं
चोपक्षिप्तं॥३०॥हरिःॐ तत्सदिति श्रीपरमहंसपरिव्राजकाचार्यश्रीमत्स्वल्पानंदपूज्यपादशिष्यश्रीमत्सदानंद
ज्ञानविरचितायांश्रीमद्भगवद्गीताभाष्यटीकायांसप्तमोध्यायःसमाप्तमस्तु॥श्रीकृष्णार्पणमस्तु॥७॥०

अ॥७॥
१९९पू॥राम

श्रीगणेशाय नमः ।। हरिः ॐ ।। सप्तमाध्यायांते येषां त्वंतगतं पापमित्यादिना येषां ब्रह्मादीनामनुसंधानमुक्तं यच्च प्रया
णकाले भगवतः स्मरणं दर्शितं तदिदं जिज्ञासमानः सन्पृच्छतीति प्रश्नसमुदायमवतारयति ।। ते ब्रह्मेति ।। प्रश्नबीजानि
तद्विषयभूतानि ब्रह्मादीनि वस्तूनीति यावत् ।। बुभुत्सितविषयप्रतीत्वंभाऽनंतरं तेषां प्रश्नद्वारा निर्णयार्थमित्याह ।। अ
तइति ।। यदुक्तं ते ब्रह्म तद्विदुरिति तत्सोपाधिकं निरुपाधिकं वा ब्रह्मशब्दस्योभयत्रापि संभवादिति मत्वाह ।। किं तदिति ।।
यच्चोक्तं कृत्स्नमध्यात्ममिति तत्रात्मानं देहमधिकृत्य तस्मिन्नधिष्ठाने तिष्ठतीत्यध्यात्मशब्देन श्रोत्रादिकरणग्रामो वा प्रत्य

ते ब्रह्म तद्विदुः कृत्स्नमित्यादिना भगवतार्जुनस्य प्रश्नबीजान्युपदिष्टानि ।। अतस्तत्प्रश्नार्थमर्जुन उवाच ।। किं तद्ब्रह्म
किमध्यात्मं किं कर्म पुरुषोत्तम ।। अधिभूतं च किं प्रोक्तमधिदैवं किमुच्यते ।। १ ।। श्रीकृष्णाय नमः ।। पुः
भूतं ब्रह्मैव वा विवक्षितमित्याह ।। किमध्यात्ममिति ।। विज्ञानं यज्ञं तनुते कर्माणि तनुतेपि चेति श्रुतौ कर्मणो द्वैविध्यनिर्धारणात्क
र्म चात्रविवक्षितमित्यत्र कीदृक्कर्म गृहीतमिति पृच्छति ।। किमिति ।। क्षराक्षराभ्यां कार्यकारणाभ्यामतीतस्य भगवतोन किंचिद्वेद्य
स्तीति सूचयति ।। पुरुषोत्तमेति ।। साधिभूताधिदैवमित्यत्राधिभूतशब्देन पृथिव्यादिषु भूतेषु वर्तमानं किंचिदेवमस्तुते
पासमस्तमेव कार्यमिति निर्दिधारयिषया पृच्छति ।। अधिभूतमिति ।। अधिदैवमिति च दैवतविषयमनुध्यानं वा दैवते
आदित्यमंडलादिषु वर्तमानं चैतन्यं वा विवक्षितमिति प्रश्नांतरं प्रस्तौति ।। अधिदैवमिति ।। ५ ।। ५ ।। १ ।।

गी०॥

साधियज्ञं चेत्सत्राधियज्ञशब्देन यज्ञमधिगतो वित्तानात्मा वा परदेवता वेति प्रश्नांतरं प्रकारोति अधियज्ञ इति ॥ स च कथं केन प्रकारेण
ब्रह्मत्वेन चिंतनीयः किं तादात्म्येन किं वात्यंताभेदेनेत्याह ॥ कथमिति ॥ सर्वथापि स किं अस्मिन्देहे वर्तते ततो वहिर्वा देहे चेत्स कोत्र बुद्ध्या
दिस्तद्व्यतिरिक्तो वेति जिज्ञासयात्रेति ॥ कोत्रेति ॥ अधियज्ञः कथं कोत्रेति न प्रश्नभेदः कः कथमिति तु प्रकारभेदविवक्षयेति द्रष्टव्यं
यत्तु समाहितचित्तानामुत्क्रमणकालेपि भगवदनुसंधानं सिध्यतीति तदयुक्तमुत्क्रमणदशायां करणग्रामवैयग्र्याच्चित्तसमाधा
नानुपपत्तेरित्यभिप्रेत्याह ॥ प्रयाणेति ॥ व्याख्यातस्य प्रश्नसप्तकस्य प्रतिवचनं भागवतमवतारयति ॥ एषामिति ॥ क्रमेणोक्तानां प्र
श्नानां क्रमेणैव प्रतिवचने प्रष्टुरभीष्टं प्रतिपत्तिसौकर्यं सिध्यतीति बुध्यमानो विशिष्टि ॥ यथाक्रममिति ॥ तत्र प्रश्नत्रयं निर्णेतुं भग

अधियज्ञः कथं कोत्र देहेस्मिन्मधुसूदन ॥ प्रयाणकाले च कथं ज्ञेयोऽसि नियतात्मभिः ॥२॥ एषां प्रश्नानां यथाक्रमं निर्णयाय ॥
श्रीभगवानुवाच ॥ अक्षरं ब्रह्म परमं स्वभावोऽध्यात्ममुच्यते ॥ भूतभावोद्भवकरो विसर्गः कर्मसंज्ञितः ॥३॥ अक्षरं न क्षरती
ति अक्षरं परमात्मा ॥ एतस्यैवाक्षरस्य प्रशासने गार्गि सूर्याचंद्रमसौ विधृतौ तिष्ठत इति श्रुतेः ॥ ॥ ८१ ॥ ॥ ८१ ॥ ०

वद्वचनमुदाहरति ॥ अक्षरमिति ॥ किं तद्ब्रह्मेति प्रश्नस्य प्रतिवचनमक्षरं ब्रह्म परममिति ॥ न चाक्षरशब्दस्य निरुपाधिके परस्मिन्नात्मन्यविना
शित्वव्याप्तिमत्वसंबंधात्प्रवृत्तिं व्युत्पादयति ॥ अक्षरमित्यादिना ॥ कथं पुनरक्षरशब्दस्य यथोक्ते परमात्मनि वृद्धप्रयोगमंतरेण
व्युत्पत्त्या प्रवृत्तिराश्रीयते व्युत्पत्तेरर्थांतरेपि संभवादित्याशंक्य द्यावापृथिव्यादिविषयनिरंकुशप्रशासनस्य परस्मादन्य
स्मिन्नसंभवात्तथाविधप्रशासनकर्तृत्वेन श्रुतमक्षरं ब्रह्मैवेत्याह ॥ एतस्येति ॥ ८१ ॥ श्रीरामायनमः ॥ ८१ ॥

अ० ८ ॥
१६६ ॥ राम ॥

स

रूढिर्योगमपहरतीतिन्यायादोंकारे वर्णेतु तामात्मन्यक्षरशब्दस्य रूढ्या प्रवृत्तिरास्वि वृत्तिरुचितेत्याशंक्याह ।। ओंकारस्येति श्रुतिवचनो
पक्रमे प्रक्रान्तमोंकाराख्यमक्षरमेवोत्तरत्र विशेषितं भविष्यतीत्याशंक्य परमविशेषणविरोधान्न तस्य प्रक्रमः संभवतीत्याह ।।
परममिति चेति ।। किमध्यात्ममिति प्रश्नस्योत्तरं स्वभावोध्यात्ममित्यादि तद्व्याचष्टे ।। तस्यैवेति ।। स्वकीयो भावः स्वभावः श्रोत्रा
दिकरणग्रामः स चात्मनि देहे हंप्रत्ययवेद्ये वर्तत इत्येवं प्रतिभासं व्यावर्त्य स्वभावपदं विगृह्णाति ।। स्वो भाव इति ।। एवं विभक्तरूप

ॐकारस्य चोमित्येकाक्षरं ब्रह्मेति परेण विशेषणात् । तद्ग्रहणं परममिति च निरतिशयेऽक्षरे ब्रह्मण्युपपन्नतरं विशेषणं ।।
तस्यैव परस्य ब्रह्मणः प्रतिदेहं प्रत्यगात्मभावः स्वभावः स्वो भावः स्वभावोऽध्यात्ममुच्यते ।। आत्मानं देहमधिकृत्य प्रत्यगात्म
तया प्रवृत्तं परमार्थब्रह्मावसानं वस्तु स्वभावोऽध्यात्ममुच्यते ।। अध्यात्मशब्देनाभिधीयते भूतभावोद्भवकरः भूतानां
भावो भूतभावस्तस्योद्भवो भूतभावोद्भवस्तं करोतीति ।। भूतभावोद्भवकरो भूतवस्तूत्पत्तिकरः विसर्गः ।। ३ ।। ०

ग्नहे स्वभावोध्यात्ममुच्यत इत्यस्यायमर्थो निष्पन्नो भवतीत्यनुवादपूर्वकं कथयति ।। स्वभाव इति ।। तस्यैव परस्येत्यादिनोक्तं न विस्मर्तव्यमिति विशिन
ष्टि ।। परमार्थेति ।। परमेव हि ब्रह्म देहादौ प्रविश्य प्रत्यगात्मभावमनुभवति ।। तस्य ब्रह्मान्तरे वानुप्रविशादिति श्रुतेरित्यर्थः ।। किंकर्मेति प्रश्नस्योत्तरमुपा
ते ।। भूते ।। भूतानां भावस्तेषामुद्भवः समुत्पत्तिस्तां करोतीति व्युत्पत्तिं सिद्धवत्कृत्य विधान्तरेणाप्युत्पादयति ।। भूतानामिति ।। भावं संभावो वस्तुभावो
।। ऽत एव भूतवस्तूत्पत्तिकर इति वक्ष्यति ।। ३ ।।

गी० ।।

वैदिकं कर्म चोक्तविशेषणं कर्मशब्दितमिति विसर्गशब्दार्थं दर्शयन्विशदयति ।। विसर्ग इत्यादिना ।। कथं पुनर्यथोक्तस्य यज्ञस्य सर्वेषु भूतेषु स्थि
स्थितिलयहेतुत्वेन तदुद्भवत्वमित्याशंक्याग्नौ प्रास्ताहुतिरित्यादिस्मृतिमनुसृत्याह ।। एतस्माद्धीति ।। १ ।। २ ।। ३ ।। संप्रति प्रश्नत्रयस्योत्तरमा ह ।।
अधिभूतमिति ।। अधिभूतं च किं प्रोक्तमित्यस्य प्रतिवचनमधिभूतं क्षरो भाव इति ।। तत्राधिभूतपदमन्त्रवाच्यमर्थं कथयति ।। अधिभूत धि
मित्यादिना ।। तस्य निर्देशमंतरेण निर्ज्ञातुमशक्यत्वात्प्रश्नद्वारा तन्निर्दिशति ।। कोसाविति ।। कार्यमात्रमत्र संग्रहीतमिति वक्तुमुक्तमेव

मामिनीदेवताविकारव्या।

विसर्गो विसर्जनं देवतोद्देशेन चरुपुरोडाशादेः स्वद्रव्यस्य वितरणं परित्यागः स एव विसर्गलक्षणो यज्ञः कर्मसंज्ञितः कर्मशब्दितः इत्ये
तस्माद्धि वीजभूताद्वृष्ट्यादिक्रमेण स्थावरजंगमानि भूतान्युद्भवंति ।। अधिभूतं क्षरो भावः पुरुषश्चाधिदैवतं ।। अधियज्ञोहमेवात्र देहे
देहभृतां वर ।। ४ ।। अधिभूतं प्राणिजातमधिकृत्य भवतीति कोसौ क्षरः क्षरतीति क्षरो विनाशी भावो यत्किंचिज्जनिमद्वस्त्वित्यर्थः ।। पुरुषः
पूर्णमनेन सर्वमिति पुरिशयनाद्वा पुरुषः आदित्यांतर्गतो हिरण्यगर्भः सर्वप्राणिकरणानामनुग्राहकः सोधिदैवतं अधियज्ञः सर्वयज्ञाभि

व्यनक्ति ।। यत्किंचिदिति अधिदैवं किमिति प्रश्नस्य पुरुषश्चेत्यादि प्रतिवचनं तत्र पुरुषशब्दमनन्यमुख्यमर्थं तस्योपन्यस्यति ।। पुरुष इति ।। तस्यैव संभावितमर्था अ० ८ ।।
२ न्तरमाह ।। पुरिशयनाद्वेति ।। वैराजं देहमासाद्यादित्यमंडलादिषु देवतेष्वंतरवस्थितो लिंगात्मा व्यष्टिकरणानुग्राहकोत्र पुरुषशब्दार्थः ।। स चाधिदै १९६ ।। राम ।।
वतमिति स्फुटयति ।। आदित्येति ।। अधियज्ञः कथमित्यादि प्रश्नं परिहरन्नधियज्ञशब्दार्थमाह ।। अधियज्ञ इति ।। ५ ।। ५ ।। रामाः

कथमुक्तायांदेवतायामधियज्ञशब्दः स्यादित्याशंक्य श्रुतिमनुसरन्नाह ॥ यज्ञोवैइति ॥ परैवदेवता अधियज्ञशब्देनोच्यते साच ब्रह्मणः सकाशादत्यंताभेदेन
प्रतिपत्तव्येत्याह ॥ सहिविष्णुरिति ॥ शास्त्रीयव्यवहारभूमिरत्रेत्येकाद्देहसामानाधिकरण्याद्यो ऽत्रेत्यस्यव्याख्यानमस्मिन्निति ॥ किमधियज्ञोवहिरंत
र्वादेहाद्भिन्नोर्देहोमात्रनूइत्याह ॥ देहेइति ॥ ननुयज्ञस्यदेहाधिकरणत्वाभावात्कथंतथाविधयज्ञाभिमानिदेवतात्वंभगवतोविवक्ष्यतेनेत्राह ॥ य
ज्ञोहीति ॥ एतेनतस्यबुध्यादिव्यतिरिक्तत्वमुक्तमवधेयं ॥ नहिपरदेवतादर्शिनीसा ॥ ऽधियज्ञशब्देनबुध्यादिष्वंतर्भावमनुभवितुं ॥ देहान्विभ्न [illegible] तीति म
देहभृतः सर्वेच प्राणिनस्तेषांवरः श्रेष्ठः युक्तंहिभगवतासाक्षादेवप्रतिक्षणंसंवादेसंविदधानस्यार्जुनस्यसर्वेभ्यः श्रैष्ठ्यं ॥ ४ ॥ यत्तुप्रयाणकालेचेत्यादिचो

यज्ञोवैविष्णुरितिश्रुतेः ॥ सहिविष्णुरहमेवचास्मिन्देहे योयज्ञस्तस्याहमधियज्ञोपयोगीहिदेहनिर्वर्त्यत्वेनदेहसमवायीतिदेहाधिकरणोभवति ॥ देह
ले भृतांवर ॥ अंतकालेचमामेवस्मरन्मुक्त्वाकलेवरं ॥ यः प्रयातिसमद्भावंयातिनास्त्यत्रसंशयः ॥ ५ ॥ अंतकालेचमरणकालेमामेवपरमेश्वरं
श्रीविष्णुंस्मरन्मुक्त्वापरित्यज्यकलेवरंशरीरंयः प्रयातिगच्छतिसमद्भावंश्रीवैष्णवंतत्वंयातिनास्त्यत्रसंशयः ॥ ॥ ॥ ॥

दितंतत्राह ॥ अंतकालेचेति ॥ मामेवेत्यवधारणेन अध्यात्मादिविशिष्टत्वेनस्मरणंव्यावर्त्यते ॥ विशिष्टस्मरणेहिचित्तविक्षेपात्प्रधानस्मरणम
पिस्यात्तच्चमरणकालेकार्यकरणपारवश्याद्भगवदनुस्मरणासिद्धिः सर्वदैवनैरंतर्येणादरधियाभगवतिसमर्पितचेतसस्तत्कालेपिकार्यकर
णजातमगणयतोभगवदनुसंधानसिद्धेः शरीरेतस्मिन्नममाभिमानाभावादितियावत् ॥ प्रयातीत्यत्रप्रकृतशरीरमपादानं ॥ ५ ॥ ०

तीत्यादि श्रुतिमाश्रित्याह ।। नास्तीति ।। २ ।। व्यासेध्यं संशयमेवाभिनयति ।। यातिवेति ।। ५ ।। अंतकाले भगवंतमनुध्यायें
गवत्प्राप्तिनियमवदन्यमपि तत्काले देवादिविशेषं ध्यायतो देहत्यजनस्तत्प्राप्तिरवश्यं भाविनीति दर्शयति ।। नेत्यादिना ।। कथं
ंतकाले परवशस्य नियतविषयास्मृतिर्भवितुमुत्सहते तत्राह ।। सदेति ।। देवादिविशेषस्तस्मिन्निति तत्सम्यगर्थः ।। भावो
वनो वासनास भावो भावितः ।। संपादितो येन पुंसा तथाविधः सन्यं यं स्मरति तं तमेव देहत्यागादूर्ध्वं गच्छतीति संबंधः ।।

नास्ति न विद्यतेऽत्रास्मिन्नर्थे संशयो यातिवा न वेति ।। ५ ।। न मद्विषय एवायं नियमः किंतर्हि ।। यंयंवापि स्मरन्भावं त्यजत्यंते कलेवरं ।।
तं तमेवेति कौंतेय सदा तद्भावभावितः ।। ६ ।। यंयंवापि यंयं भावं देवताविशेषं स्मरन् चिंतयन् त्यजति परित्यजति अंते अंतका
ले प्राणवियोगकाले कलेवरं तं तमेवैति स्मृतं भावमेवेति नान्यं कौंतेय ।। सदा सर्वदा तद्भावभावितस्तस्मिन्भावस्तद्भावः स भावि
तोऽभ्यस्तो येन स तद्भावभावितः सन् ।। यस्मादेवमंत्या भावनादेहांतरप्राप्तौ कारणं ।। तस्मात्सर्वेषु कालेषु मामनुस्मर यु
ध्य च ।। मय्यर्पितमनोबुद्धिर्मामेवैष्यस्यसंशयः ।। ७ ।। तस्मात्सर्वेषु कालेषु मामनुस्मर यथाशास्त्रं युध्य च युद्धं च स्वधर्मं कुरु ।।

ले

सततं भावनां प्रति नियतफलमात्रनिमित्तां स्वप्रत्ययहेतुरित्यंगीकृत्यानंतरश्लोकमवतारयति ।। यस्मादिति ।। विशेषणत्रयवतो भग
वदनुस्मरणस्य भगवत्प्राप्तिहेतुत्वं तस्मादित्युच्यते ।। सर्वेषु कालेषु श्रद्धादरनैरंतर्याभ्यां सहेति यावत् ।। भगवदनुस्मरणे विशेष
णत्रयसाहित्यं यथाशास्त्रमिति द्योत्यते ।। ५ ।।

।। ५ ।। ० ।। ०

अ० ८ ।।
१९८ ।। राम ।।

भगवदनुसंधानंकर्त्तव्यमुक्त्वातेनसहस्वधर्ममपिकुरुयुद्धमित्युपदिशताभगवतासमुच्चयोज्ञानकर्मणोरंगीकृतोभा
तीत्याशंक्याह मय्यर्पितमनोबुद्धिगोचरंक्रियाकारकफलजातंसकलमपिब्रह्मैवेतिभावयन्युध्यस्वेतिब्रुवताक्रियादिकलापस्य
ब्रह्मातिरिक्तस्याभावाभिलापान्नात्रसमुच्चयोविवक्षितइत्यर्थः।।उक्तरीत्यास्वधर्ममनुवर्त्तमानस्यप्रयोजनमाह।।मामेवे
ति।।उक्तसाधनवशात्फलप्राप्तौप्रतिबंधाभावंसूचयति।।असंशयइति।।७ततश्चपूर्वश्लोकोक्तार्थानुष्ठायीभगवंतमंतका

मयिदेवेऽर्पितेमनोबुद्धीयस्यतवसत्वंमय्यर्पितमनोबुद्धिःसन्मामेवयथास्मृतमेष्यस्युपागमिष्यसि।।असंशयोन
संशयोऽत्रविद्यते।।किंच।।अभ्यासयोगयुक्तेनचेतसानान्यगामिना।।परमंपुरुषंदिव्यंयातिपार्थानुचिंतयन्।।८।।अभ्या
प सयोगयुक्तेमयिचित्तसमर्पणविषयभूतेवासुदेवैकस्मिन्तुल्यप्रत्ययावृत्तिलक्षणोविलक्षणप्रत्ययानंतरितोभ्यासः।।
सचाभ्यासोयोगस्तेनयुक्ते।।नत्रैवत्र्यांव्यापृतंयोगिनश्चेतस्तेनचेतसा।।८।।

त्केप्राप्नोतीत्याह।।किंचेति।।अभ्यासंविभजतेनेमयीति।।नहिचित्तसमर्पणस्यविषयभूतंभगवतोऽर्थांतरंवस्तुसदस्तीतिमन्वानोवि॰
रोनहि।।चित्तेति।।अंतरालकालेपिविजातीयप्रत्ययेषुविच्छिद्यविच्छिद्यजायमानेष्वपिसजातीयप्रत्ययावृत्तिरयोगिनोपिस्यादित्या
रोत्याह।।विलक्षणेति।।अभ्यासाख्येनयोगेनयुक्तत्वंचेतसोविवृणोति।।त्रतत्रैवेति।।तृतीययापरामृष्टोभ्यासयोगःसप्तम्यापि
।।रामृश्यते।।ननुप्राकृतानांचेतसस्तथेत्याशंक्यविशिनष्टि।।योगिनइति।।८।। ।। ।। ।। ।। ८।।

० तत्र चेच्चेतो विषयांतरं परामृशेत्तर्हि परमपुरुषार्थप्राप्तिर्हेतुः स्यादित्याशंक्याह ॥ नान्यगामिनेति ॥ ग्रामादिकं विषयां
ाम॥ तरपारवश्यमभ्यनुज्ञातुं नात्यशीलमस्य यांते न तात्पर्याद्‌ परामृष्टार्थांतरेण परमपुरुषनिष्ठेनेत्यर्थः ॥ तदेव पुरुषस्य निरतिशयत्वं
मेव परामृष्टाखिलानर्थत्वमनतिशयानंदत्वं च स च प्रागेव व्याख्यातो नेह व्याख्यानमपेक्षते ॥ पश्चासावादित्य ईत्यादिश्रुतिम
नुसृत्याह ॥ दिवीति ॥ तत्र विशेषतोऽभिव्यक्तेरेवम्भवनं पूर्वोक्तेन चेतसा यथोक्तं पुरुषमनुचिंतयन्याति तमेवेति संबंधः ॥ अनुचिं
तयन्नित्यत्र अनुशब्दार्थं व्याचष्टे ॥ शास्त्रेति ॥ चिंतयन्निति व्याकरोति ॥ ध्यायन्निति ॥ ८ ॥ किंविशिष्टमिति पुरुषमनुचिंतय

नान्यगामिना नान्यत्र विषयांतरे गंतुं शीलमस्येति नान्यगामि तेन नान्यगामिना परमं निरतिशयं पुरुषं ॥ दिव्यं दिवि
सूर्यमंडले भवं दिव्यं याति गच्छति हे पार्थानुचिंतयन् ॥ शास्त्राचार्योपदेशमनुध्यायन्नित्येतत् ॥ किंविशिष्टं च पुरुषं
यातीत्युच्यते ॥ कविं पुराणमनुशासितारमणोरणीयांसमनुस्मरेद्यः ॥ सर्वस्य ध्यातारमचिंत्यरूपमादित्यवर्णं तमसः
परस्तात् ॥ ९ ॥ कविं क्रांतदर्शिनं सर्वज्ञं ॥ पुराणं चिरंतनं अनुशासितारं सर्वस्य जगतः ॥ प्रशासितारमणोरणी
यांसं अणोः सूक्ष्मादप्यणीयांसं सूक्ष्मतरमनुस्मरेत् अनुचिंतयेत् ॥ ५ ॥ ॥ ॥ ॥ ०

न्या न्निति संबंधः ॥ चकारात्तं[illegible]त्कयावानाभ्योत्क्रमतीति [illegible] सनुकृष्यनेनत्र ध्यानद्वारा प्राप्यस्य पुरुषस्य विशेषणं निदर्शयति ॥ अ० ८ ॥
उच्यत इति ॥ क्रांतदर्शित्वमतीतानागतदेशेषस्य वस्तुनो दर्शनशीलत्वं तेनानिष्यन्नार्थमाह ॥ सर्वज्ञमिति ॥ चिंतनमादिमतः
सर्वस्य कारणत्वादनादिमित्यर्थः ॥ सूक्ष्ममाकाशादि ततः ॥ सूक्ष्मतरं तदुपादानत्वादित्यर्थः ॥ योयथोक्तमनुचिंतये १६१ ॥ राम॥
त्स तमेवानुचिंतयन्यातीति पूर्वेणैव संबंध इति योजना ॥ ५ ॥ ॥ ५ ॥ श्रीरामाय नमः ॥ श्रीगुरुमुर्तिये नमः ॥ ५ ॥

ननुविशिष्टजात्यादिमतोयथोक्तमनुचिंतनंफलवद्भवतिनत्वस्मदादीनामित्याशंक्याह॥यःकश्चिदिति॥फलमतउपपत्तेरितिन्यायेनाह॥सर्वस्येति॥एतदप्रमेयंध्रुवमितिश्रुतिमाश्रित्याह॥अचिंत्यरूपमिति॥नहिपरस्यकिंचिदपिरूपंवस्तुतोस्तिअरूपवदेवहीतिन्यायात्कल्पितमपिनास्मदादिभिःशक्यतेचिंतयितुमित्याह॥नास्येति॥मृत्तकारणैर्देहानानन्तकार्याश्चपरस्तादुपरिष्टाद्व्यवस्थितंपरमार्थतोऽस्तानतत्कार्यस्पृष्टमित्याह॥तमस[illegible]इति॥९॥इतश्चभगवदनुस्मरणं

यःकश्चित्॥सर्वस्यसर्वकर्मफलजातस्यधातारंविधातारंविचित्रतयाप्राणिभ्योविभज्यदातारंअचिंत्यरूपंनास्यरूपंविद्यमानमपिकेनचित्चिंतयितुंशक्यतेइत्यचिंत्यरूपस्तंआदित्यवर्णमादित्यस्येवनित्यचैतन्यप्रकाशरूपोवर्णोयस्यतमादित्यवर्णं॥तमसःपरस्तात्अज्ञानलक्षणात्मोहांधकारात्परं।तमनुचिंतयन्यातीतिपूर्वेणैवसंबंधःकिंच॥९॥प्रयाणकालेमनसाऽचलेनभक्त्यायुक्तोयोगबलेनचैव॥भ्रुवोर्मध्येप्राणमावेश्यसम्यक्सतंपरंपुरुषमुपैतिदिव्यं॥१०॥प्रयाणकालेमरणकालेमनसाऽचलेन॥

सफलत्वादनुष्ठेयमित्याह॥किंचेति॥कदातदनुस्मरणेप्रयत्नातिरेकोर्थ्यतेतत्राह॥प्रयाणकालइति॥कथंतदनुस्मरणमित्युपकरणकलापमपेक्षमाणंप्रत्याह॥मनसेत्यादिना॥योऽनुस्मरेत्सकिमुपैतीतितत्राह॥सतमिति॥मरणकालेक्लेशबहुले भ्यासप्रसादासादितबुद्धिवैभवोभगवंतमनुस्मरन्यथास्मरन्तमेवदेहाभिमानविगमानंतरमुपगच्छती नुस्मरणसाधनंमनसैवानुद्रष्टव्यमितिश्रुत्युपदिष्टमाचष्टे।मनसेति।तस्यचेचलत्वात्तत्स्थैर्यमीश्वरेसिध्यतितत्कथंतेनतद॥नुस्मरणमित्याशंक्याह॥अचलेनेति॥

प्रयत्नेन प्रवर्तितं विषयविमुखं तस्मिन्नेवानुस्मरणयोग्ये पौनः पुन्येन प्रवृत्त्या निश्चलीकृतं तेन निश्चलेन चित्तेन तेनेनिश्चाच
प्रत्यनुस्मरणाधिकारित्वं विशिनष्टि ॥ भक्त्येति ॥ परमेश्वरे परेण प्रेम्णा सहितो विषयांतरविमुखोऽनुस्मर्तेत्यर्थः ॥ योगबल
स्फोरयति ॥ समाधिजेति ॥ योगः समाधिस्थितस्य विषयांतरेभ्यो वृत्तिनिरोधेन परस्मिन्नेव स्थापनं तस्य बलं संस्कारप्रचयो ध्येयैकाग्र
करणं तेन तत्रैव स्थैर्यमित्यर्थः ॥ चकारस्त्वचिनमन्वयमन्वाचेष्टे ॥ तेन चेति ॥ यत्तु कथं नाभोत्क्रामस्यातीति तत्राह ॥ पूर्वमिति ॥ चित्तं हि स्वभा
वतो विषयेषु व्यापृतं तेभ्यो विमुखीकृत्य हृदये पुंडरीकाकारे परमात्मस्थाने यत्नेन स्थापनीयं ॥ अथ यदिदमस्मिन्नित्यादिश्लोकेन तत्रु-

चलेन वर्जितेन भक्त्या युक्तो भजनं भक्तिस्तया युक्तो योगबलेन चैव योगस्य बलं योगबलं ॥ समाधिजसंस्कारजनितं स्वचित्तस्थै
र्यलक्षणं योगबलं तेन च युक्त इत्यर्थः ॥ पूर्वं हृदयपुंडरीके वशीकृत्य चित्तं तत ऊर्द्धगामिन्या नाड्या भूमिजयक्रमेण भ्रुवोर्मध्ये प्राण
॥ मावेश्य स्थापयित्वा सम्यगप्रमत्तः सन् ॥

चित्तं वशीकृत्य तदावर्तनं तरं कर्तव्यमुपदिशति ॥ तत इति ॥ इडापिंगले दक्षिणेतरे नाड्यौ हृदयान्निःसृते निरुध्य तस्मादेव हृदयादूर्ध्वग
मनशीलया सुषुम्नया नाड्या हार्दं प्राणमुन्नीय कंठावलंबितं स्तनसदृशं मांसखंडं प्राप्तेनाध्वना भ्रुवोर्मध्ये तमावेश्या
वेश्यां प्रमादवान् ब्रह्मरंध्रान्निःक्रम्य कविं पुराणमित्यादिविशेषणं परमपुरुषमुपगच्छतीत्यर्थः ॥ भूमिजयक्रमेणेत्यत्र भूम्या
॥ दीनां पंचानां भूतानां जयो वशीकरणं तस्य तस्य भूतस्य स्वाधीनचेष्टावैशिष्ट्यं तद्द्वारेणेत्येतदुच्यते ॥ ५ ॥ श्रीरामा ॥ ०

उ॥८॥
१७०॥ राम॥

सतमित्यादिव्याचष्टे॥ सएवमिति॥१०॥ येनकेनचिन्मंत्रादिनाध्यानकालेभगवदनुस्मरणेप्राप्तेसत्यभिधानंनियंतुम
नुस्मर्तव्यत्वेनप्रकृतंपरमपुरुषस्यत्रैविध्यरूढप्रसिध्याप्रामाणिकत्वमाह॥ पुनरपीति॥ उपायोवक्ष्यमाणःॐकारः अवि
षयेप्रतीचि ब्रह्मणिवेदार्थविदामपिकथंवचनमित्याशंक्याविषयत्वमस्त्येवेतिमत्वाश्रुतिमुदाहरति॥ तद्वाइति॥ न
यापितस्मिन्नविषयेसर्वविषयशून्येवचनमनुचितमित्याशंक्याह॥ सर्वेति॥ नकेवलंविद्वदनुभवसिद्धंयथोक्तंब्रह्म

सएवंविद्वान्योगीकविंपुराणमित्यादिलक्षणंतंपरंपुरुषमुपैतिप्रतिपद्यतेदिव्यंद्योतनात्मकं॥ पुनरपिवक्ष्यमाणेनोपा
येनप्रतिपित्सितस्यब्रह्मणोवेदविद्वचनादिविशेषणेनविशेष्यस्याभिधानंकरोतिभगवान्॥ यदक्षरंवेदविदोवदंति
विशंतियद्यतयोवीतरागाः यदिच्छंतोब्रह्मचर्यंचरंतितत्तेपदंसंग्रहेणप्रवक्ष्ये॥११॥ यदक्षरंनक्षरतीतिअक्षरंअ
विनाशिवेदविदोवेदार्थज्ञावदंति॥ तद्वाएतदक्षरंगार्गिब्राह्मणाअभिवदंतीतिश्रुतेः॥ सर्वविशेषनिवर्तकत्वेनाभि
वदंतिअस्थूलमनण्वित्यादि॥ किंच॥ विशंतिप्रविशंतिसम्यग्दर्शनप्राप्तौयद्यतयोयतनशीलाःसंन्यासिनोवीतरागा
विगतोरागोयेभ्यस्तेवीतरागाः यच्चाक्षरमिच्छंतोज्ञातुमितिवाक्यशेषः॥ ब्रह्मचर्यंगुरौचरंतितत्तेपदंतदक्षराख्यं
॥ पदनीयंतेतवसंग्रहेणसंग्रहःसंक्षेपः तेनसंक्षेपेणप्रवक्ष्येकथयिष्यामि॥

किंतुमुक्तोपसृप्यतयामुक्तानामपिप्रसिद्धमित्याह॥ किंचेति॥ केषांपुनःसंन्यासित्वंतदाह॥ वीतरागाइति॥ ज्ञानार्थंब्रह्मचर्य
विधानादपिब्रह्मज्ञेयत्वेनप्रसिद्धमित्याह॥ यच्चेति॥ कथंतर्हियथोक्तंब्रह्ममममस्तातुंशक्यमित्याकुलितचेतसमर्जुनंप्रत्याह॥
॥ तत्तेपदमिति॥११॥

ऽनोपायेनेत्युक्तं व्यक्तीकुर्वन्नोंकारद्वारा ब्रह्मोपासनं प्रश्नस्कंधमनुक्रामति ॥ स यो ह वा इति ॥ सत्यकामेनाभिध्यानफलं जिज्ञासु
॥ भ्रिन्निति पिप्पलादः संबोध्याभिमुखीक्रियते भिपानौ तु प्रसिद्धार्थमवद्योतयं तावदभिध्यानस्य फलवत्वेन कर्तव्यत्वमावेदयति ॥
मध्ये समाधिकृतो मनुष्यस्तस्य सिद्धमभिध्यानं यथा सिध्यति तथा सर्वं वे ।सारभ्य तमोंकारमाभिमुख्येन ध्यायीत तच्चा ।
नमा प्रायणादिति न्यायेन मरणांतमनुष्ठेयं स चैवमनुतिष्ठन्यत्कृतेनाभिध्यानेन लोकान्जेतव्यानां बहुत्वात्कतमं लोकं ज
यतीति प्रश्नं पृष्टवते सत्यकामाय पिप्पलादनामा किलार्यः प्रतिवचनं प्रावोचत तत्र प्रथममभिध्येयमोंकारं परापरब्रह्मत्वेनम

स यो ह वै तद्भगवन्मनुष्येषु प्रायणांतमोंकारमभिध्यायीत कतमं वाव स तेन लोकं जयतीति तस्मै स होवाच ॥ एतद्वै सत्यकाम परं
चापरं च ब्रह्म यदोंकार इत्युपक्रम्य ५ पुनरेतं त्रिमात्रेणोमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीतेत्यादिवचनेन ॥ अन्य
त्र धर्मादन्यत्राधर्मादिति ॥ चोपक्रम्य सर्वे वेदा यत्पदमामनंति ॥ तपांसि सर्वाणि च यद्वदंति ॥ ५ ॥ श्रीरामाय नमः ॥ •

ल२

हीकरोत्येतद्वा इति ॥ त्रिमात्रेणांकारोकारमकारात्मकेनेति यावत् ॥ सोभिध्यायीतमेव यथाभिध्यानं पुरुषमधिगच्छतीत्यादिव
चनेनोपासनमोंकारस्योक्तमित्यर्थः ॥ प्रश्नश्रुतिवत्कठवल्ली च तत्रैवार्थे प्रवृत्तेत्याह ॥ अन्यत्रेति ॥ अव्यवधानेनोपनिषत्सां व्यव
धानेन च कर्मश्रुतीनां परस्मिन्नात्मनि पर्यवसानं दर्शयति ॥ सर्वे इति ॥ तपसामपि सर्वेषां चित्तशुद्धिद्वारा तत्रैव पर्यवसानमित्याह ॥
॥ तपांसीति ॥ ५ ॥

त
ओं०८॥
१७१॥ राम॥

त

तस्यैवज्ञानार्थमस्यां ।। ब्रह्मचर्यंतत्रतत्रविहितमित्याह ।। यदिच्छंतइति ।। तस्यपदनीयस्यब्रह्मणः ।। संक्षेपेणकथनमोंकारद्वार
कमितिकथयति ।। ओमित्येतदिति ।। उदाहृतवचनानांतात्पर्यंदर्शयति ।। परस्येति ।। तस्यवाचकरूपेणवातस्यैवप्रतीकरूपेण
वाविवक्षितस्योंकारस्योपासनंयथोक्तैर्वचनैरुक्तमितिसंबंधः ।। नतुपरस्मिन्ब्रह्मणितत्वमस्यादिवाक्यादेवप्रतिपत्तिरधिकारि
णोभविष्यतीतिकिमित्युपासनमोंकारस्योपन्यस्यतेतत्राह ।। परेति ।। यद्यपिविशिष्टस्याधिकारिणोनैवोपासनमुपनिषद्भ्यो
ब्रह्मणिप्रतिपत्तिरुत्पद्यतेतथापिमंदानांमध्यमानांचहेतश्चितेषांतत्वेनोंकारोविवक्षितस्तस्योपासनंब्रह्मदृष्ट्याश्रुतिभिर

यदिच्छंतोब्रह्मचर्यंचरंतितत्तेपदंसंग्रहेणब्रवीम्योमित्येतन्नु इत्यादिभिश्चवचनैः परस्यब्रह्मणोवाचकरूपेणप्रतिमावत्
प्रतीकरूपेणचपरब्रह्मप्रतिपत्तिसाधनत्वेनमंदमध्यमबुद्धीनांविवक्षितस्योंकारस्योपासनंकालांतरमुक्तिफलमु
क्तंयतदेवेहापि ।। कविंपुराणमनुशासितारंयदक्षरंवेदविदोवदंतीतिचोपन्यस्तस्यपरस्यब्रह्मणःपूर्वोक्तरूपेणप्र
तिपत्त्युपायभूतस्योंकारस्यकालांतरमुक्तिफलमुपासनंयोगधारणासहितंवक्तव्यं ।। श्रीरामचंद्रायनमः ।। : ।।

यदिच्छइत्यर्थः तस्यक्रममुक्तिफलत्वादनुष्ठेयत्वंसूचयति ।। कालांतरेति ।। भवत्वेवंश्रुतीनांप्रवृत्तिस्तावताप्रकृतेकिमायातमि
तोक्याह ।। उक्तंयदिति ।। तदेवेहापिवक्तव्यमित्युत्तरेणसंबंधः ।। उपासनमेवोपास्योपन्यासद्वारास्फोरयति ।। कविमित्या
[illegible] ।। पूर्वोक्तरूपेणेत्यभिधानत्वेनप्रतीकत्वेन[illegible]चेत्यर्थः ।। श्रौतस्योपासनस्यानुष्ठीयमानस्यसोपस्काररत्वेसंगिरते ।।•
तिगच्छा ।। ।।

वि

॥ तर्हि कथमनन्यचेताः सततमित्यादि वक्ष्यमाणेन तत्राह ॥ प्रसक्तेति ॥ अथोंकारोपासनं प्रसक्तं तदनंतरं तत्फलत्वमप्रसक्तं तद्वारा चापुनरावृत्त्यादिकं च व्यकोटि[illegible]नि विशिष्टमित्यर्थः ॥ उक्तैर्थे समनंतरं ग्रंथमुत्थापयति ॥ इत्येवमर्थरति ॥ श्रोत्रादीनां कुत्र द्वारत्वं तत्राह ॥ उपलब्धिद्वि[illegible]णि ॥ तेषां संयमं विषयेषु प्रसृतानां दोषदर्शनद्वारा तेभ्यो वैमुख्यापादनं ॥ कोयं मनसो हृदयनिरोधस्तत्राह ॥ निष्प्रचारमिति ॥ मनसो विषयाकारां वृत्तिं निरुध्य हृदि वशीकृतस्य कार्यं दर्शयति ॥ तत्रेति ॥ उर्ध्वमित्यत्रापि हृदयादिति संबध्यते ॥ सर्वा प्रसक्तानुप्रसक्तं च किंचिदित्येवमर्थमुत्तरो ग्रंथ आरभ्यते ॥ सर्वद्वाराणि संयम्य मनो हृदि निरुध्य च ॥ मूर्ध्न्याधायात्मनः प्राणमास्थितो योगधारणां ॥१२॥ सर्वद्वाराणि सर्वाणि च तानि द्वाराणि च ॥ उपलब्धौ तानि सर्वाणि संयम्य संयमनं कृत्वा मनो हृदि हृदयपुंडरीके निरुध्य निरोधं च कृत्वा निःप्रचारमापाद्य तत्र वशीकृतेन मनसा हृदयादूर्ध्वगामिन्या नाड्योर्ध्वमारुह्य मूर्ध्न्याधायात्मनः प्राणमास्थितः प्रवृत्तो योगधारणां धारयितुं ॥ तत्रैव च धारयन् ॥ ओमित्येकाक्षरं ब्रह्म व्याहरन्मा ॥ मनुस्मरन् ॥ यः प्रयाति त्यजन्देहं स याति परमां गतिं ॥१३॥ ओमित्येकाक्षरं ब्रह्म ॥५॥

एवमुपलब्धिद्वाराणि श्रोत्रादीनि संनिरुध्य वायुमपि सर्वतो निगृह्य हृदयमानीय ततो निर्गतया सुषुम्नया कंठभ्रूमध्यललाटक्रमेण प्राणं मूर्ध्न्याधाय योगधारणामारूढो ब्रह्म व्याहरन् मां च तदर्थभूतमनुस्मरन्यः परमां गतिं यातीति संबंधः ॥११॥ यथोक्तयोगधारणार्थं प्रवृत्तो मूर्ध्नि प्राणमाधाय धारयन् किं कुर्यादित्याशंक्यानंतरश्लोकमवतारयति ॥ तत्रैवेति ॥ ५ ॥ श्रीरामचंद्राय नमः ॥ ०

एकं च तदक्षरं चेत्येकाक्षरमोमित्येवंरूपं तत्कृप ब्रह्मेति विशेष्यते न त्वाह ॥ ब्रह्मणइति ॥ यः प्रयातीति मरणमुत्क्रान्तस्त्यजन्देहमि
ति भ्रुवनापुनरुक्तिराश्रितास्यादित्याशंक्य विशेषणार्थं विवरणोति ॥ देहेति ॥ एवमोंकारमुच्चारयन्नर्थं चामिध्यायन्ध्यानति
ष्टः स यमानित्यर्थः ॥ परमामिति गति विशेषणं क्रममुक्तिविवक्षयाद्रष्टव्यं ॥ १३ ॥ ननु वायुनिरोधविधुराणांउदीरितयांरी

ब्रह्मणोऽभिधानभूतंओंकारं व्याहरन्नुच्चरंस्तदर्थभूतंमामीश्वरमनुस्मरन्ननुचिंतयन्यः प्रयातीति म्रियते स त्यजन्परित्य
जन्देहं शरीरं त्यजन्देहमिति प्रयाणविशेषणार्थं ॥ देहत्यागेन प्रयाणमात्मनो न स्वरूपनाशो नेत्यर्थः ॥ स एवं पतीं त्यजन्या
ति ॥ स याति परमां प्रकृष्टां गतिं ॥ किंच ॥ अनन्यचेताः सततं यो मां स्मरति नित्यशः तस्याहं सुलभः पार्थ नित्ययुक्तस्य योगि
नः ॥ १४ ॥ अनन्यचेताः न अन्यविषये चेतो यस्य सोऽयमनन्यचेता योगी सततं सर्वदा यो मां परमेश्वरं स्मरति नित्यशः सततं
मिति नैरंतर्यमुच्यते ॥ नित्यश इति दीर्घकालत्वमुच्यते ॥ न षण्मासं संवत्सरं वा किं तर्हि यावज्जीवं नैरंतर्येण यो मां नित्यशः ॥
स्मरतीत्यर्थः ॥ तस्य योगिनोऽहं सुलभः ॥ सुखेन लभ्यः पार्थ नित्ययुक्तस्य सदा समाहितचित्तस्य योगिनः ॥ यत एवमतोऽन
॥ ॥ न्यचेताः सततमयि सदा समाहितो भवेत् ॥ ५ ॥

तां चेच्छाप्रयुक्तोत्क्रमणासंभवाद्दुर्लभा परमा गतिरापनेदितित्राह ॥ किंचेति ॥ इंतश्च भगवदनुस्मरणे प्रयतितव्यमित्यर्थः ॥ सततं नि
त्यश इति विशेषणयोरपुनरुक्तमाह ॥ सततमित्यादिना ॥ उक्तमेवापौनरुक्त्यं व्यक्तीकरोति ॥ नेत्यादिना ॥ जिज्ञासुरिच्छया देहं त्य
जतीति ॥ न दिनरक्ते कर्मक्षये ऐ चेति विशेषं विवक्षन्नाह ॥ यत इति ॥ अनन्यचेतनसं समाहितचित्तं प्रतीश्वरस्य सौलभ्यमेवामित्युच्यते ॥१४॥

ंतोऽप्राप्तास्तत्त्वेवावर्तिष्यंते पुनरावर्तंते वा चंद्रलोकादिवेति संदेहात्स्यद्धत्ति॥ नवेति॥ नत्रोत्तरश्लोकेन निश्चयं दर्शयति॥ उच्य
ि।ने गऽस्वरोपगमनं न सामीप्यमात्रमिति व्याचष्टे॥ मद्भावमिति॥ पुनर्जन्मनोऽनिष्टत्वं प्रश्नद्वारा स्पष्टयति॥ किमित्यादिना॥
हात्मत्वं प्रकृष्टस्यैतत्वैशिष्ट्यं पन्नस्यंस्तस्मिन्नेवेश्वरे समुत्पन्नसम्यग्दर्शिनो भूत्वेति शेषः॥१५॥ भगवंतमुपगतानामपु

तवसौलभ्येन किंस्यादित्युच्यते॥ शृणु तन्मम सौलभ्येन यद्भवति॥ मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतं॥ ना
प्नुवंति महात्मानः संसिद्धिं परमां गताः॥१५॥ मामीश्वरमुपेत्य मद्भावमापद्य पुनर्जन्म पुनरुत्पत्तिं नाप्नुवंति॥ किंविशिष्टं
पुनर्जन्म न प्राप्नुवंति तद्विशेषणमाह॥ दुःखालयं दुःखानामाध्यात्मिकादीनामालयमाश्रयमालीयंते यस्मिन्दुः
खानि तत् दुःखालयं जन्म॥ न केवलं दुःखालयमशाश्वतं अनवस्थितस्वरूपं च नाप्नुवंतीदृशं पुनर्जन्म महात्मानो
यतयः संसिद्धिं मोक्षाख्यां परमां प्रकृष्टां गताः प्राप्ताः॥ येपुनर्मां न प्राप्नुवंति ते पुनरावर्तंते किं पुनरस्त्वतोऽन्यत्र प्राप्ताः

॥ पुनरावर्तंत इत्ति॥ ८॥

नरावर्तौ नतो विमुखानां अनुपजातसम्यग्धियां पुनरावृत्तिरर्थसिद्धेत्याह॥ येपुनरिति॥ अपाम सोममममृता अभूमेति श्रुतेः॥
स्वर्गादिगतानामपि समानैवानावृत्तिरिति शंकते॥ किंपुनरिति॥ ८॥ ॥ ॥ ॥ ॥ ०

अर्थवादश्चैतौ कर्मिणाममरत्वस्यापेक्षिकत्वं विवक्षित्वा परिहरति ।। उच्यत इति ।। एतेन भूरादिलोकचतुष्टयं प्रविष्टानां पुनरा
वर्तनावपि जनादिलोकत्रयं प्राप्तानामपुनरावृत्तिरिति विभागोक्तिरप्रामाणिकत्वादेव हेयेत्यवधेयं ।। नहि तद्देवेश्वरं प्राप्ताना
म पि पुनरावर्त्तिः शंक्येत नेत्याह ।। मामिति ।। यावत्संपातश्रुतिवदीश्वरप्राप्तानां निरवविद्यानां पुनरावृत्तिरप्रामाणिकी

उच्यते ।। आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन ।। मामुपेत्य तु कौंतेय पुनर्जन्म न विद्यते ।।१६।। आब्रह्मभवनाद्भवं
भ त्यस्मिन्भूतानीति भवनं ।। ब्रह्मणो भवनं ब्रह्मभवनं ब्रह्मणो लोक इत्यर्थः आब्रह्मभवनात् सह ब्रह्मभवनेन लोकाः सर्वे
पुनरावर्तिनः पुनरावर्तनस्वभावाः हे अर्जुन मामेकमुपेत्य तु हे कौंतेय पुनर्जन्म पुनरुत्पत्तिर्न विद्यते ।। ब्रह्मलोकस
हिता लोकाः कस्मात्पुनरावर्तिनः कालपरिच्छिन्नत्वात् ।। कथं ।। सहस्रयुगपर्यंतमहर्यद्ब्रह्मणो विदुः ।। रात्रिं युगसहस्रां
ति तां तेऽहोरात्रविदो जनाः ।।१७।। सहस्रयुगपर्यंतं सहस्राणि युगानि पर्यंतः पर्यवसानं यस्य तदहः सहस्रयुगपर्यंतं ब्रह्मणः
प्रजापतेर्विराजो विदुः रात्रिमपि युगसहस्रांतां महःपरिमाणामेव । के विदुरित्याह । तेऽहोरात्रविदः कालसंख्याविदो जना इत्यर्थः ।।

र्थः यस्य स्वाभाविकी वंशप्रयुक्ता च शुद्धिस्तस्यैव कार्थेषु धीरुदेतीति मत्वाह संबुद्धिंय ।।१६।। ब्रह्मलोकसहितानां लोकानां पुनरावर्त्तौ कौंतेय
तत्र प्रश्नद्वारा दर्शयति ।। ब्रह्मेति ।। उक्तमेव हेतुमाकांक्षापूर्वकमुत्तरश्लोकेन साधयति ।। कथमित्यादिना ।। यथोक्ताहोरात्रावयवमास
न संवत्सरावयवशतसंख्यापरवच्छिन्नत्वात्प्रजापतेस्तदंतर्वर्त्तिनामपि लोकानां यथायोग्यकालपरिच्छिन्नत्वेन पुनरावृत्तिरित्य
भिप्रेत्याचार्याः ।। सहस्रेत्यादिना ।।

अक्षरार्थमुक्त्वातात्पर्यमाह ॥ यत इति ॥१७॥ प्रजापतेरहर्यद्युगसहस्रपरिमितं या च तस्य रात्रिः सापि तथेति कालविदाम
भिप्रायमनुसृत्य ब्राह्मस्याहोरात्रस्य कालपरिमाणं दर्शयित्वा तत्रैव विभज्य कार्यं कथयति ॥ प्रजापतेरिति ॥ अव्यक्तमव्याकृ
[illegible]नि शंकां वारयति ॥ अव्यक्तमित्यादिना ॥ जाति प्रतियोगिभूता व्यक्तीर्व्यावर्तयति ॥ स्थावरेति ॥ असदुत्पत्तिप्रसक्तिं प्र
त्यादिशति ॥ अभिव्यज्यंत इति ॥ पूर्वोक्तमव्यं व्यक्तसंज्ञकं स्वापावस्थं ब्रह्म प्रजापतिशब्दितं तस्मिन्निति यावत् ॥ ॥१८॥०

यत एवं कालपरिच्छिन्नास्ततः पुनरावर्तिनो लोकाः प्रजापतेरहनि प्रभवंति रात्रौ च न दृश्यंते ॥ अव्यक्ताद्व्यक्तयः सर्वाः
प्रभवंत्यहरागमे ॥ रात्र्यागमे प्रलीयंते तत्रैवाव्यक्तसंज्ञके ॥१८॥ अव्यक्ताद् व्यक्तं प्रजापतेः स्वापावस्था तस्माद्व्यक्ता
त् व्यक्तयो व्यज्यंत इति व्यक्तयः स्थावरजंगमलक्षणाः सर्वाः प्रजाः प्रभवंति व्यक्तय[illegible] अभिव्यज्यंते ॥ अह्नः आगमो
ऽहरागमः तस्मिन्नहरागमे काले ब्रह्मणः प्रबोधे ॥ तथा रात्र्यागमे ब्रह्मणः स्वापकाले प्रलीयंते सर्वा व्यक्तयस्तत्रै
व पूर्वोक्तेऽव्यक्तसंज्ञके ॥ अकृताभ्यागमकृतविप्रणाशदोषपरिहारार्थं ॥५॥

ननु प्रबोधकाले ब्रह्मणो यो भूतग्रामो भूत्वा तस्यैव स्वापकाले विलीयते तस्मादन्यो भूत यो ब्रह्मणोऽहरागमे भूत्वा पुना रात्र्याग
मेऽपरवशो विनश्यति तदेवं प्रत्यवांतरकल्पं भूतग्रामविभागो भवेदित्याशंक्यानंतरश्लोकतात्पर्यमाह ॥ अकृतेति ॥ प्रतिकल्पं प्रा
णिनिकायस्याभिनवत्वे सत्यकृताभ्यागमादिदोषप्रसंगात्तत्परिहारार्थं भूतग्रामस्य प्रतिकल्पमैक्यमास्थेयमित्यर्थः ॥ ॥५॥

अ० ८॥
१७४॥ राम॥
२

ज्ञानस्य

यदि स्थावरजंगमलक्षणस्य प्राणिवर्गस्य प्रतिकल्पमन्यथात्वं तदेकस्य बंधमोक्षान्वयिनोऽभावात्कोंऽद्वयात्मनो बंधमोक्षार्थस्य शास्त्र-
स्य प्रवृत्तिरफलत्वप्रसंगः ।। नाऽऽनन्तत्साफल्यार्थमपि प्रतिकल्पं प्राणिवर्गस्य नवीनत्वानुपपत्तिरित्याह ।।। बंधेति ।। कथं पुनर्भूतसमुदायो
स्वतंत्रः सन्नवशो भूत्वा भूत्वा प्रविलीयेतेत्यत आह ।। अविद्यादीति ।। आदिशब्देनास्मितारागद्वेषाभिनिवेशा गृह्यंते ।। यथोक्तक्लेशपंचकं
मूलं प्रतिलभ्य धर्माधर्मात्मककर्मराशिरुद्भवति तद्वशादेवास्वतंत्रो भूतसमुदायो जन्मविनाशावनुभवतीत्यर्थः । प्राणिनिकायस्य ज-
न्मनाशाभ्यासोऽनर्थसिद्धमर्थमाह ।। रसनरति ।। संसारे विपरिवर्तमानानां प्राणिनामस्वातंत्र्यादवशानामेव जन्ममरणप्रबंधसंबंधा- म

बंधमोक्षशास्त्रप्रवृत्तिसाफल्यदर्शनार्थमविद्यादिक्लेशमूलकर्माशयवशादवशो भूतग्रामो भूत्वा भूत्वा प्रलीयत इति संसारे
मूल २ वैराग्यप्रदर्शनार्थं चेदमाह ॥ भूतग्रामः स एवायं भूत्वा प्रलीयते ॥ रात्र्यागमेऽवशः पार्थ प्रभवत्यहरागमे ॥ १९ ॥ भूतग्रामो भूतस-
मुदायः स्थावरजंगमलक्षणो यः पूर्वस्मिन्कल्पे आसीत्स एवायं नान्यो भूत्वाऽहरागमे प्रलीयते पुनः पुना रात्र्यागमेऽहः-
क्षयेऽवशोऽस्वतंत्र एव पार्थ प्रभवति जायतेऽहरागमे ॥ यदुपन्यस्तमक्षरं तस्य प्राप्त्युपायो निर्दिष्टः ओमित्येकाक्षरं व
॥ ब्रह्मेत्यादिना ॥ अथेदानीमक्षरस्यैव स्वरूपनिर्दिदिक्षया श्लोक आरभ्यते ॥

द्दुःखमनेन संसारेऽतोऽतिवैराग्यं तस्मिन्प्रदर्शनीयमेतदर्थं चेदं भूतानामहोरात्रमावृत्तिवचनमित्यर्थः ।। समनंतरवाक्यमिदमापारम्-
भ्यते ।। रात्र्यागमे प्रलयमनुभवतोऽहरागमे च प्रभवं प्रतिपद्यमानस्य प्राणिवर्गस्य तुल्यं पारवश्यमित्याशयवानाह ।। अहरिति ।। १९ रि
क्षरं ब्रह्मपरममित्युपक्रम्य तदनुपयुक्तं किमिदमन्यदुक्तमित्याशंक्य वृत्तमनूद्यानंतरग्रंथसंगतिमाह ।। यदुपन्यस्तमिति ।। २० ।।

गी०

र्द्दिदिक्षितेन तस्मिन् पूर्वोक्तयोगमार्गस्य कथमुपयोगः स्यादित्याशंक्य तत्प्राप्त्युपायत्वेनेत्याह ॥ अनेनेति ॥ गंतव्यमिति योग
स्य पुनक्तेति शेषः ॥ पूर्वोक्तादव्यक्तादिति संबंधः ॥ परशब्दस्य व्यतिरिक्तविषयत्वे तुशब्देन वैलक्षण्यमुक्त्वा पुनरन्यशब्दप्रयो
गात्पौनरुक्त्यमित्याशंक्याह ॥ व्यतिरिक्तत्व इति ॥ तुनाद्योतितं वैलक्षण्यमन्यशब्देन प्रकटितं यन्मिथो भिन्नेष्वपि भावभेदेषु सालक्ष
ण्यमालक्ष्यते तेन नश्वराव्यक्ताद्भिन्नत्वेपि ब्रह्मलक्षणस्तेन सादृश्यमाशंक्य नेनन्निरसार्थमन्यपदमित्यर्थः ॥ यद्वा परशब्दस्य प्रकृष्टवाचि

अनेन योगमार्गेणेदं गंतव्यमिति ॥ परस्तस्मात्तु भावोऽन्योऽव्यक्तोऽव्यक्तात्सनातनः ॥ यः स सर्वेषु भूतेषु नश्यत्सु न विनश्यति ॥२०॥
परो व्यतिरिक्तो भिन्नः कुतस्तस्मात् पूर्वोक्तात् ॥ तुशब्दोऽव्यक्ताक्षरस्य विवक्षितस्याव्यक्ताद्वैलक्षण्यविशेषणार्थः ॥ भावोऽक्षरा
ख्यं परं ब्रह्म ॥ व्यतिरिक्तत्वे सत्यपि सालक्षण्यप्रसंगोस्तीति तन्निरसार्थमाहान्य इति अन्यो विलक्षणः स चाव्यक्तोनेंद्रिय
गोचरः परस्तस्मादित्युक्तं ॥ कस्मात्पुनः परः पूर्वोक्तात् भूतग्रामबीजभूतादविद्यालक्षणादव्यक्तात्सनातनानाश्चिरंतनो यः स भावः
सर्वेषु भूतेषु ब्रह्मादिषु नश्यत्सु न विनश्यति ॥ अव्यक्तोऽक्षर इत्युक्तस्तमाहुः परमां गतिं ॥ यं प्राप्य न निवर्तंते तद्धाम परमं मम ॥२१॥
नो भावाविशेषणार्थत्वे पुनरुक्तिशंकैव नास्तीति द्रष्टव्यं ॥ अनादिभावे स्याक्षरस्याविनाशित्वमर्थसिद्धं समर्थयते ॥ यः स भाव इति ॥ सर्वेष्विति ॥ वि
नश्यद्विकारजातं पुरुषांतं ॥ विनश्यतिसत्सु विनाशहेत्वभावान्न विनष्टुमर्हतीत्यर्थः ॥२०॥ यथोक्तेऽव्यक्ते भावे श्रुतिसंमतिमाह ॥ अव्यक्त इति ॥
॥ तस्य परमगतित्वं साधयति ॥ यं प्राप्येति ॥५॥

म४

अ०८॥
१७५॥राम

योसावव्यक्तोभावोत्रदर्शितः सयेनाक्षरं पुरुषं वेदसत्यमित्यादिश्रुतावक्षरइत्युक्तस्तमक्षरं भावं परमां गतिं पुरुषान्न परं किंचित्सा
काष्ठासा परागतिरित्याद्याः श्रुतयो वदंतीत्याह ।। योसाविति ।। परमपुरुषस्य परमगतित्वमुक्तं व्यनक्ति यंभावमिति ।। तद्विष्णोः प
रमं पदमिति श्रुतिमत्र संवादयति ।। तद्धामेति ।। २१ ।। नत्वव्यक्तादतिरिक्तस्य तद्विलक्षणस्य परमपुरुषस्य प्राप्तौ कश्चिदसाधारणो
हेतुरेषितव्यो यस्मिन्प्रेक्षापूर्वकारी तत्प्रेप्सया प्रवर्तेनो निर्वर्णोनितत्राह ।। तल्लाभेति ।। परस्य पुरुषस्य सर्वकारणत्वं सर्वव्यापकत्वं

योसावव्यक्तोऽक्षरइत्युक्तस्तमेवाक्षरसंज्ञकमव्यक्तंभावमाहुः परमां प्रकृष्टां गतिं ।। यंभावंप्राप्य गत्वा न निवर्तंते संसाराय ।। तद्धाम
स्थानं परमं प्रकृष्टं मम विष्णोः परमं पदमित्यर्थः ।। तल्लाभोपाय उच्यते ।। पुरुषः स परः पार्थ भक्त्यालभ्यस्त्वनन्यया ।। यस्यांतःस्था
नि भूतानि येन सर्वमिदं ततं ।। २२ ।। पुरुषः पुरिशयनात् पूर्णत्वाद्वा स परः पार्थ परो निरतिशयो यस्मात् पुरुषान्न परं किंचित्
स भक्त्यालभ्यस्तु ज्ञानलक्षणया अनन्यया आत्मविषयया । यस्य पुरुषस्यांतःस्थानि मध्यस्थानि कार्यभूतानि भूतानि का
र्यं हि कारणस्यांतर्वर्ति भवति येन पुरुषेण सर्वमिदं जगत्ततं व्याप्तं आकाशेनेव घटादि तुशब्दोऽक्षरस्याविवक्षितस्याव्यक्तात् ।।

।। वैलक्षण्यविशेषणार्थः ।।

च विशेषणद्वयमुदाहरति ।। यस्येति ।। निरतिशयत्वं विशदयति ।। यस्मादिति ।। तुशब्दोऽवधारणार्थः भक्तिर्भजनं सेवा प्रदक्षिणा
स्तोप णानां व्यावर्तयति ।। ज्ञानेति ।। उक्ताया भक्तेर्विषयतो वैशिष्ट्यमाह ।। अनन्ययेति ।। कोसौ पुरुषो यद्विषया भक्तिस्तत्प्रा०
त्तेत्याशंक्योत्तरार्द्धं व्याचष्टे ।। यस्येति कथं भूतानामंतःस्थत्वं तत्राह ।। कार्यं हीति ।। सपर्यगादिति श्रुतिं मा श्रित्या
ह ।। येनेति ।। २२ ।। ५ ।। ०

।।

॥नायत्ता परमपुरुषप्राप्तिरुक्ता न च ज्ञानं मार्गमपेक्ष्य फलाय कल्पते विदुषो गत्युत्क्रान्ति निषेधश्रुतेस्तथा च मा
रस्तुक्केत्याशंक्य सगुणशरणानां तदुपदेशोर्थवानित्यभिप्रेत्याह॥ प्रकृतानामिति॥ वक्तव्यइति यत्र कालेइत्यादेः कथ्य
नं थः॥ स चेद्वक्तव्यस्तर्हि किमित्यध्यात्मादिभावेन स विशेषकालस्थापयतां फलं न येमूर्द्धन्यनाडीसंबंधे देवयाने पथ्य
पत्यायवक्तव्ये कालो निर्दिश्यते नेत्याह॥ विवक्षितेनेति॥ सोर्थो मार्गस्तद्विशेषत्वेन कालोक्तिरित्यर्थः॥ पित्र्ययाणमा

गी५

प्रकृतानां योगिनां प्रणवावेशितब्रह्मबुद्धीनां कालांतरमुक्तिभाजां ब्रह्मप्रतिपत्तये उत्तरो मार्गो वक्तव्य इति यत्र काल
इत्यादि विवक्षितार्थसमर्पणार्थमुच्यते॥ आवृत्तिमार्गोपन्यास उत्तरमार्गस्तुत्यर्थः यत्र काले त्वनावृत्तिमावृत्तिं चैव
योगिनः॥ प्रयाता यांति तं कालं वक्ष्यामि भरतर्षभ॥२३॥ यत्र काले प्रयाता इति व्यवहितेन संबंधः॥ यत्र यस्मिन्का
ले त्वनावृत्तिमपुनर्जन्म आवृत्तिं तद्विपरीतां एवं योगिन इति योगिनः कर्मिणश्चोच्यंते कर्मिणस्तु गुणतः कर्मयो
गेन योगिनामिति विशेषणात्ते तु विभज्यंते ते योगिनः॥२४॥ ॥ ॥ ॥ ॥०

तत्र चट

र्गोपन्यासस्तर्हि किमिति क्रियते नेत्याह॥ आवृत्तीति॥ मार्गांतरस्यावृत्तिफलत्वादस्यानावृत्तिफलत्वात्तदपेक्षया महीयान
यमिति स्तुतिर्विवक्षितेति भावः योगिन इति ध्यायिनां कर्मिणां च तत्तेनाभिधानमित्याह॥ योगिन इति॥ कथं कर्मिषु योग
शब्दो वर्ततामित्याशंक्यानुष्ठानगुणयोगादित्याह॥ कर्मिणस्त्विति॥ गुणतो योगिनसंबंधः तत्रैव वाक्योपक्रमस्यानुकूल्य
॥माह॥ कर्मयोगेनेति॥

उअ॰ ८॥
१७६॥

अवशिष्टान्यक्षराणि व्याचक्षाणो वाक्यार्थमाह ॥ यत्रेति ॥ योगिनो ध्यायिनोऽत्र विवक्षिताः ये आवृत्तावधिकृता योगिनः कर्मिण इति
न विभागः ॥ कालप्राधान्येन मार्गद्वयोपन्यासमुपक्रम्य तमेव प्रधानीकृत्य देवयानं पंथानमवतारयति ॥ तं कालमिति ॥ १३ ॥
यथोपक्रमं व्याख्याय यथाश्रुतं व्याख्याति ॥ अथवेति ॥ कथं तर्हि देवतानामिति नेत्रीणां ग्रहणे कालप्राधान्येन निर्देशः
स्तिष्यनेनत्राह ॥ भूयसेति मार्गद्वयेपि कालाभिमानिन्यो देवताः कालशब्देनोच्यंते कालाभिमानिनीनां भूयस्त्वात्का

यत्र काले प्रयाता मना योगिनोऽनावृत्तिं यांति । यत्र च काले प्रयाता आवृत्तिं यांति तं कालं वक्ष्यामि भरतर्षभ ॥ अग्नि-
र्ज्योतिरहः शुक्लः षण्मासा उत्तरायणं ॥ तत्र प्रयाता गच्छंति ब्रह्म ब्रह्मविदो जनाः ॥ २४ ॥ अग्निः कालाभिमानिनी
देवता । तथा ज्योतिर्देवतैव कालाभिमानिनी ॥ अथवाऽग्निर्ज्योतिषी यथाश्रुते एव देवते ॥ भूयसां एव तु निर्देशो
व यत्र काले तं कालमिति आम्रवनवत् तथाह देवता अहः अहरभिमानिनी शुक्लः शुक्लपक्षदेवता ॥ षण्मासा उत्तरा-
यणं ॥ तत्रापि देवतैव मार्गभूतेति स्थितोऽन्यत्राप्येवं न्यायस्तत्र तस्मिन् मार्गे प्रयाता गच्छंति ब्रह्म ब्रह्मविदः
दिलक्ष -देन सर्वासां देवतानामुपलक्ष्यत्वं विवक्षितं कालकथनमित्यर्थः ॥ यथाम्राणां भूयस्त्वाद्विद्यमानेष्वपि द्रुमान्तरेष्वा-
ष्टोपर्या म्रवनं निर्दिश्यते तद्वदित्युदाहरणमाह ॥ आम्रेति ॥ ननु मार्गचिह्नानां भोगभूमीनां वा तत्तद्देवरूपताया असंभवे किमिति
ग्रहणमित्याशंक्य आतिवाहिकास्तल्लिंगादिति न्यायेनोत्तरमाह ॥ इतिश्चितइति ॥ तेषामग्न्यादीनां समीपगामि इति सा-
॥ तत्रेति सप्तमी ॥ ब्रह्मकार्योपाधिकं परं वा ब्रह्म परं परयामुक्त्यालंबनमत एव क्रमेणेत्युक्तं ॥ २५ ॥ श्रीरामायनमः ॥

दी ॥
॥ राम

निर्गुणमप्रपंचं ब्रह्मास्मीति विद्यावतो व्यवच्छिनत्ति ॥ ब्रह्मोपासने ति ॥ ननु ब्रह्मशब्दस्य मुख्यार्थत्वार्थपरब्रह्मविदामेवेयं गतिरु
च्यते नेत्यादर्यधिकरणविरोधादित्याह ॥ नहीति ॥ २४ ॥ प्रकृतं देवयानं पंथानं स्तोतुं पितृयाणमुपन्यस्यति ॥ धूम इति ॥ अत्रापि
मार्गचिन्हानि भोगभूमीश्वय्यवच्छिद्या[illegible]तिवाहिकदेवताविषयत्वं धूमादिपदानां वि ॥ ५ ॥ रामायनमः ॥ ५

ब्रह्मोपासनपराणां ना ॥ क्रमेणेति वाक्यशेषः नहि सद्योमुक्तिभाजां सम्यग्दर्शननिष्ठानां गतिरागतिर्वा क्वचिदस्ति
न तस्य प्राणा उत्क्रामंतीति श्रुतेः ब्रह्मसंलीनप्राणा एव ते ब्रह्ममया ब्रह्मभूता एवेति ॥ धूमो रात्रिस्तथा कृष्णः
षण्मासा दक्षिणायनं ॥ तत्र चांद्रमसं ज्योतिर्योगी प्राप्य निवर्तते ॥ २५ ॥ धूमो रात्रिर्धूमाभिमानिनी राज्यभिमानि
नी च देवता ॥ यथा च कृष्णपक्षदेवता षण्मासा दक्षिणायनमिति सर्वदैवतैव ॥ तत्र चांद्रमसं चंद्रमसि भवं चां
द्रमसं ज्योतिः फलमिष्टादिकारी योगी कर्मी प्राप्य भुक्त्वा तत्क्षयान्निवर्तते ॥ ५ ॥ शुक्लकृष्णगती ह्येते
॥ जगतः शाश्वते मते ॥ एकया यात्यनावृत्तिमन्ययावर्तते पुनः ॥ २६ ॥

अ० ॥ ८ ॥
१७७ ॥ राम

भजते ॥ धूमेत्यादिना ॥ तत्रेति सप्तमी पूर्ववदेव सामीप्यार्था द्रष्टव्या दित्यादिशब्देन पूर्वदने ॥ ह्येते कृतात्ययेनुशयवानिति न्यायं सू
चयति ॥ तत्क्षयादिति आरोहावरोहयोरभ्यासवाचिना पुनःशब्देन संसारस्यानादित्वं सूच्यते ॥ ५ ॥ २५ ॥ ५ ॥ ०

रात्र्यादौ मृतानां ब्रह्मविदामब्रह्मप्राप्तिशंकानिरस्यर्थमभिमानिदेवताग्रहणाय मार्गयोर्नित्यत्वमाह ॥ शुक्लेति ॥ ज्ञानप्रकाशवत्वाद्विद्याप्राप्यत्वादर्चिरादिप्रकाशोपलक्षितत्वाच्च शुक्ला देवयानाख्या गतिस्तदभावात्ज्ञानप्रकाशवत्वाभावाद्धूमाद्यप्रकाशोपलक्षितत्वादविद्याप्राप्यत्वाच्च कृष्णा पितृयाणलक्षणा गतिस्तयोर्गत्योः श्रुतिस्मृतिप्रसिद्धयोर्हि शब्दः ॥ जगत इत्यस्य ज्ञानकर्माधिकृतविषयत्वेन संकोचे हेतुमाह ॥ न जगत इति ॥ अन्यथा ज्ञानकर्मोपदेशानर्थक्यं स्यादित्यर्थः ॥ तयोर्नित्यत्वे हेतुमाह ॥ संसारस्येति ॥ मार्गयोर्यावत्संसारभावित्वे फलितमाह ॥ तत्रेति ॥ क्रममुक्तिरनावृत्तिर्द्वयो भोक्तव्यकर्मक्षयशेषकर्मवशादित्यर्थः ॥

शुक्लकृष्णे शुक्ला च कृष्णा च शुक्लकृष्णे ॥ ज्ञानप्रकाशवत्वात् शुक्ला तदभावात् कृष्णा एते हि शुक्लकृष्णे हि गती जगत इत्यधिकृतानां ज्ञानकर्मणोर्जगतः सर्वस्यैवैते गती संभवतः शाश्वते नित्ये ॥ संसारस्य नित्यत्वात् मते ऽभिप्रेते ॥ तत्रैकया शुक्लयानावृत्तिमन्यया तया आवर्तते पुनर्भूयोपि ॥ नैते सृती पार्थ जानन् योगी मुह्यति कश्चन ॥ तस्मात्सर्वेषु कालेषु योगयुक्तो भवार्जुन ॥ २७ ॥ नैते यथोक्ते सृती मार्गौ पार्थ जानन् संसाराय एका ऽन्या मोक्षाय चेति ॥ योगी न मुह्यति कश्च ॥ न कश्चिदपि ॥ तस्मात्सर्वेषु योगयुक्तः समाहितो भवार्जुन ॥ ८ ॥

कालेषु

॥ २६ ॥ गतेरुपास्यत्वाय तद्विज्ञानं स्तौति ॥ नैते इति ॥ योगस्य मोहा[illegible]कत्वे फलितमाह ॥ तस्मादिति ॥ ज्ञानप्रकारमनुवदति ॥ संसारायेति ॥ मोक्षाय क्रममुक्त्यर्थमित्यर्थः ॥ योगी ध्याननिष्ठो गतिमपिध्यायन्नैव मुह्यति ॥ केवलं कर्मदक्षिणमार्गप्रापकं कर्तव्यत्वेन न प्रत्येतीत्यर्थः ॥ योगस्यापुनरावृत्तिफलत्वे नित्यकर्तव्यतां सिद्धमित्युपसंहरति ॥ तस्मादिति ॥ २७ ॥ ८ ॥ राम

योगस्थोति ।। छ शुचिव्रति ।। पवित्रपाणि प्राङ्मुखत्वादिसाहित्यमध्ययनस्य सम्यक्त्वं सांगोपांगोपेतत्वमनुष्ठानस्य सा
पसां शास्त्रोक्तानां सुतप्तत्वं मनोबुद्ध्याद्यैकाग्र्यपूर्वकत्वं दानस्य च सम्यक्त्वं देशकालपात्रानुगुणत्वं । इदं विदित्वेत्यत्रे
दंशब्दार्थमेव संक्षिपति ।। सप्तेति ।। यद्यपि किं तद्ब्रह्मेत्यादावधियज्ञः कथं कोत्रेत्यत्र प्रश्नद्वयं प्रतिभासानुसारेण केचिदुक्तं
तथापि प्रतिवचनालोचनायां द्वित्वप्रतीत्यभावात्प्रकारभेदविवक्षया च शब्दद्वयस्य प्रतिनीतत्वान्नसप्तेति विरुध्यते ।। न चे
दं वेदनमात्रपातिकं किं त्वनुष्ठानपर्यंतमित्याह ।। सम्यगिति ।। प्रकृतो ध्याननिष्ठो योगी तूच्यते ।। ऐश्वरं विष्णोः परमं पदं तदेव तिष्ठ ।।

शृणु योगस्य माहात्म्यं ।। वेदेषु यज्ञेषु तपःसु चैव दानेषु यत्पुण्यफलं प्रदिष्टं ।। अत्येति तत्सर्वमिदं विदित्वा योगी परं स्थान
मुपैति चाद्यं ।।२८।। वेदेषु सम्यगधीतेषु यज्ञेषु साद्गुण्येनानुष्ठितेषु ।। तपस्सु च सुतप्तेषु ।। च दानेषु तेषु सम्यग्दत्तेषु ।। यदेतेषु
पुण्यफलं पुण्यस्य फलं प्रदिष्टं शास्त्रेणात्येत्यतीत्य गच्छति तत्सर्वं फलजातमिदं विदित्वा ।। सप्तप्रश्ननिरूपणद्वारेणोक्तं ।। सम्य
गवधार्यानुष्ठाय योगी परं प्रकृष्टमैश्वरं स्थानमुपैति प्रतिपद्यते आद्यमादौ भवं कारणं ब्रह्मेत्यर्थः ।। इति श्रीमद्भगवद्गी
ताभाष्ये शंकरभगवत्पादकृतौ अष्टमोध्यायः ।। समाप्तः ।। श्रीकृष्णार्पणमस्तु ।। ।। ।। ।। ।। ।।०

तस्मिन्नशेषमिति स्थानं योगानुष्ठानादशेषफलातिशायिनं मोक्षलक्षणं फलं क्रमेण लब्धुं शक्यमिति भावः । तदनेन सप्तप्रश्नप्रति
वचनेन योगमार्गं प्रदर्शयतीति ध्येयत्वेन तत्पदार्थो व्याख्यातः ।।२८।। ॐ हरिः ॐ तत्सदिति श्रीपरमहंसपरिव्राजकाचार्यश्रीमच्छुद्धानं
दपूज्यपादशिष्यश्रीमदानंदज्ञानविरचितायां श्रीमद्भगवद्गीताभाष्यटीकायां अष्टमोध्यायः ।। समाप्तः ।। संपुर्णमस्तु ।। छ ।। ० ।।

श्रीगणेशायनमः ॥ गतेनागामिनोध्यायस्य आगतार्थे तं वक्तुं वृत्तं अनुस्मरति अष्टम इति नाडीं सुषुम्नाख्यां धारणाख्येनांगे
नयुक्तो योगो धारणायोगः सगुणः सर्वज्ञत्वसंयमनादिगुणास्तेन सहितं तत्स्वरूपं तत्फलो ब्रह्मर्थं मनं तत्र ध्यापारंभमात्रं स्मारं
तत्स्वं चेति अग्निरर्चिरादिनोपलक्षितेन क्रमवत्ता देवयानेन पथेति यावत् ज्ञानानंतरमेव यथोक्तफललाभाद्दलमनेनमा
र्गेणेत्याशंक्याह कालांतर इति अर्चिरादिमार्गेण ब्रह्मप्राप्तो मुक्तेर्मार्गोपयन्तत्वान्निःस्वप्राणा उत्क्रामंतीति निश्चिनोति विरेयथः स्या

ॐ श्रीकृष्णायनमः अष्टमे नाडीद्वारेण धारणायोगः सगुणउक्तस्तस्य च फलमर्चिरादिक्रमेण कालांतरे ब्रह्मप्रा
प्तिलक्षणमेवानावृत्तिरूपं निर्दिष्टं तत्रानेनैव प्रकारेण मोक्षप्राप्तिफलमधिगम्यते नान्यथेति तदाशंकां निवृ
त्सया श्रीभगवानुवाच इदं तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे ज्ञानं विज्ञानसहितं यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ॥१॥
इदं च सज्ञानं वक्ष्यमाणमुक्तं च सर्वेष्वध्यायेषु तत्तु गुह्यं ते निधीकृत्येदमित्याह तत्रादौ ज्ञानविशेषाणि धीरणार्थैः इ
इदमेव तु सम्यक्ज्ञानं साक्षात्मोक्षप्राप्तिसाधनं

...नान्यथेनशंकते तत्रेति वृत्तो योर्थः सम्यगर्थः उक्तशंकानिवृत्त्यर्थमनंतरमध्यायमुत्थापय
क... ...केति ॥ संप्रयुक्तत्वेनापरोक्षत्वाभावेपि सर्वोत्तरत्वं यथालोचनपाटवादिसन्निधानादिरेखाद्वेनव सज्ञानं गृहीतमित्याह तत्तु
ज्ञातारथानात्ज्ञानस्य वैशिष्ट्यावबोधनीत्याशयवदित्याह तुशब्द इति निपातार्थमेव स्फुटयति इदमेवेति ॥ ॥ ॥

तस्मिन्नर्थे सेवाहकत्वे मस्त्रतिस्य नेदृशो यति वासुदेव इति अद्वैतज्ञानवद् द्वैतज्ञानमपि केषांचिन्मोक्षहेतुरित्याशंक्याह नान्यदिति ८२

ज्ञा[illegible]मोक्षसाधनसमित्यत्र श्रुतिमुदाहरति अथेति अविद्याप्रकरणोपक्रमार्थोयमथशब्दः अन्योहं तावस्याभिन्नत्वेनेत्यर्थः विदुस्तत्व

१७० मि.. शेषः द्वैतस्फुटनिरूपत्वेन कल्पितत्वात् ज्ञानेनान्तुसपारहितानन्तुत्मत्वा मोक्षंतत्राभिहेतुरितिचकारार्थः अन्यथा गुरोर्गुरोर्वा विषय

वासुदेवः सर्वमिति आत्मैवेदं सर्वमेकमेवाद्वितीयमित्यादिश्रुतिस्मृतिभ्यो नान्यत् अथ येऽन्यथातो विदुरन्यराजानस्ते क्षय्य

लोका भवंतीत्यादिश्रुतिभिश्च ते तुभ्यं गुह्यतमं गोप्यतमं प्रवक्ष्यामि कथयिष्यामि अनसूयवे असूयारहिता

य किं तत् ज्ञानं किं विशिष्टं विज्ञानसहितं अनुभवयुक्तं यत् ज्ञानं ज्ञात्वा मोक्ष्यसेऽशुभात् संसारबंधनात् तच्च

राजविद्या राजगुह्यं पवित्रमिदमुत्तमं प्रत्यक्षावगमं धर्म्यं सुसुखं कर्तुमव्ययं २ राजविद्या विद्यानां राजा राजविद्या

दीप्त्यतिशयवत्त्वात् ७

रणं तद्धितायं ज्ञानाधिकृतायेत्यर्थः ज्ञानं ब्रह्मचैतन्यं तद्विषयं वाक्यप्रमाणजन्यं ज्ञानं तस्य तेनैव विशेषितत्वानुपपत्तिमाशंक्य व्या

क्षार करोति अनुभवेति विज्ञानमनुभवः साक्षात्कारस्तेन सहितमित्यर्थः उक्तज्ञानप्राप्तस्य किं स्यादित्याशंक्याह यज्ज्ञात्वेति १ एम

नहाभिमुच्यतिरूपे तज्ज्ञानं स्तौति नन्वेति ब्रह्मविद्यानां राजा श्रेष्ठस्तत्र हेतुमाह दीप्तीति ७ ७ ७

१७०

विद्याया

कुतोब्रह्मविद्यांतरेभ्योपीस्यनिवापवत्वेन राहृदीप्यते ह्रीति इरस्पते ह्निविद्दृदं तरेभ्यो लोके रजानिरेकोब्रह्मविद्यामिति भावः उ
त्कृष्टतमं श्रुद्धिकारणं ब्रह्मज्ञानमिसे॰ नदुपपादयति अनेकेति अत्रच श्रुतिस्मृतिप्रमाणापितत्येन शास्त्रैकगम्यमिदं
ज्ञानं किंतु प्रत्यक्षममेयमित्याह। किंचेति प्रत्यक्षमवगमो मानमस्मिन्निति तथापहृ वगम्यत इत्यवगमः फलं प्रत्यक्षो

दीप्यते ह्रीयमतिशयेन ब्रह्मविद्या सर्वविद्यानां राज्ञा तथा राजगुह्यं गुह्यानां राज्ञा पवित्रं पावनमिदमुत्तमं सर्वेषां
पावनानां शुद्धिकारणानामिदं ब्रह्मविज्ञानमुत्कृष्टतममनेकजन्मसहस्रसंचितमपि धर्माधर्मादि समूलं कर्मक्ष
णमात्राद्भस्मीकरोति अतः किं तस्य पावनत्वं वक्तव्यं किंच प्रत्यक्षावगमं प्रत्यक्षेण सुखादीरिवावगमो यस्य त
त्प्रत्यक्षावगमं अनेकगुणवतोपि धर्मविरुद्धत्वं दृष्टं न तथास्य ज्ञानेषु धर्मविरोधि किंतु धर्म्यं धर्मादनपेतमेवम
पि स्यात्तर्हि दुःसंपाद्यमित्यत आह। सुसुखं कर्तुं यथा रत्नविवेकविज्ञानं तत्रात्मीयायामानां कर्मणां सुखसंपाद्यानां
मल्पफलत्वं दुःकरणानां च महाफलत्वं दृष्टमितीदं तु सुखसंपाद्यत्वात् फलक्षयात्ययेनीति प्रासमन आह

अ२ अ[illegible]यंनास्य फलतः कर्मवतत्क्षयोस्तीत्यव्ययमतः अ
वगमोस्येति दृष्टफलत्वं ज्ञानस्योच्यते धर्म्यमित्ये॰ तद्याकरोति अनेकेति धर्मस्येवतस्य क्लेशसाध्यत्वमाशंक्याह एवमपीति
त्वविषयं विवेकज्ञानं संप्रदोगाद्युपदेशापेक्षादनापाते नदृष्टं तपेदं ब्रह्मज्ञानमित्याह अव्ययमिति विशेषणमाशंकाकारव्ये
करवणोति तत्रेसारिणा व्यक्ष्य॰ हृापभिः सप्तम्यर्थे ज्ञानस्याक्ष्यफलत्वे फालिनमाह अतइति २५

अश्र[illegible]ह्णानास्थेय धर्मेश्रद्धावतां तन्निष्ठानां परमपदप्राप्तिमुक्त्वा तन्नोविमुखानां संसारप्राप्तिमाह् येत्वनरिति आत्मज्ञानतत्फल
[illegible]नास्तिकानेव विशिनष्टि पापेति उत्कान्ता मां ममभागीणा भगवत्प्राप्तिसंभावनाभावाद प्राप्यमामिसप्रसक्तप्रतिषेधः स्यादित्या
शंक्याह् मामप्राप्यैवेति ३ एतत्त्रिभिर्हार्भ्यां ज्ञानाविनि ष्टामह्ही कृसहानेत्या ख्यानुमारभते मयेति सोपाधिकस्याससंभव

येत्वनः अश्रद्दधानाः पुरुषाधर्मस्यास्यपरंतप अप्राप्य मां निवर्तंते मृत्युसंसारवर्त्मनि ३ अश्रद्दधानाः श्रद्धा
विरहिताः आत्मेतानस्य धर्मस्यास्य स्वरूपे तत्फले च नास्तिकाः पापकारिणोऽसुराणामुपनिषदं तं देहमात्रात्मद
र्शनमेव प्रतिपन्ना अश्रुतपाः पुरुषाः परंतप अप्राप्य मां परमेश्वरं मत्प्राप्तौ नैवाशंकेति मत्प्राप्तिमार्गसाधनभेदभ न
क्तिमात्रमप्यप्राप्येत्यर्थः निवर्तंते निश्चयेनावर्तंते कुमत्सु संसारवर्त्मनि मृत्युयुतः संसारः मृत्युसंसारस्तस्य वर्त्म
स्त निनरकादिप्रपगाद्विमार्गे तस्मिन्नेवावर्तंते इत्यर्थः अतिरतान् स्तुत्वा मेन मममिनुखौ सत्याह् ४ मयाततमिदं सर्वं
जगदव्यक्तमूर्तिना मत्स्थानि सर्वभूतानि नचाहं तेष्ववस्थितः ४ मयामनयः परोभावस्तेन ततं व्याप्तं सर्वमिदं
जगत् अव्यक्तमूर्तिना अव्यक्तमूर्तिः स्वरूपेयस्य मम सोऽहमव्यक्तमूर्तिस्तेनाव्यक्तमूर्तिनाकरणागोचरस्वरूपेण
सर्वः तस्मिन्नमय्यव्यक्तमूर्तौ स्थितानि मत्स्थानि सर्वभूतानि ब्रह्मादीनि स्थावरांतानि २

मभिप्रेत्य विशिनष्टि ममेति अनवच्छिन्नस्य भगवद्रूपस्य निरुपाधिकत्वमेव साधयति करोतीति व्याप्यव्यापकत्वेन जगतो एम
भगवतश्च परिच्छेद्यमाशंक्याह् तस्मिन्निति २ ॥ ॥ ॥ २

तथापिभगवतोभूतानांचाधाराधेयत्वेनभेदःस्यादित्याशंक्याह नहीति निरात्मकस्यव्यवहारानर्हत्वेफलितमाह अतइति
ईश्वरस्यभूतात्मत्वेनभूतस्थितिःस्यादित्याशंक्याह नेषामिति तस्यतेषुस्थितिसद्भावेऽप्यवस्थापपत्ति मूर्तवदिति संश्ले
षाभावेपिकिमितिनाधेयत्वमतआह नहीति परमेश्वरस्यतेषुस्थितिसद्भावेपिभूतानांतत्रास्थितिराश्रितेतिकुतोऽसं

नहिनिरात्मकंकिंचिद्भूतंव्यवहारायावकल्पते अतोमत्स्थानिमयात्मनासात्मत्वेनस्थितान्यतोमय्यवस्थितानि
रुक्तंअहंतेषांभूतानामहमात्मेतिअतस्तेष्ववस्थितइतिमूढबुद्धीनामेवावभासते अतोब्रवीमिनचाहंतेषुभूते कु
ष्ववस्थितोमूर्तवत्संश्लेषाभावेनाकाशस्याप्यंतरतमोस्म्यहं नह्यसंसर्गिवस्तुक्वचिदाधेयभावेनावस्थितं
भवत्यसंसर्गित्वान्मम ४ नचमत्स्थानिभूतानिपश्यमेयोगमैश्वरं भूतभृन्नचभूतस्थोममात्मा १
भूतभावनः ५ नचमत्स्थानिभूतानिब्रह्मादीनिपश्यमेयोगमैश्वरं योगंयुक्तिंपश्यमेममैश्वरंईश्वरस्येदमै [illegible]
श्वरंयोगमात्मनोयाथात्म्यमित्यर्थः तथाचश्रुतिरसंसर्गित्वात् असंगतोर्हीयस्यसंगोनहिसज्जतइतिर
[illegible]तआह अतएवेति ४ नचेसत्रचरैर्कावधारणार्थैः भूतानामीश्वरंचैश्वर्यममन्यत्पश्यभूतभृत्संगोऽपिसन्भूतानि
[illegible]रिशन्निरिसत्रेहेतुमाह पश्येति ॥ आत्मनोऽसंगत्वस्वरूपमित्यत्रचप्रमाणमाह तथाचेति असंगश्चेश्वरस्तर्हिकथंमत्स्था
निभूतानीत्युक्तंकथंचनचमत्स्थानीतितनहिरुद्धमपरीतमित्याशंक्याह इदंचेति ॥ ॥ ॥

मे

भा

त[illegible]संबंधः स्यादिति नेत्याह नचेति यथोक्तेन न्यायेनासंगत्वेनेति यावत् असंगतया वस्तुतो भूतासंबंधेऽपि कल्पनया तत्र
[illegible]योर्मिथो विरोधो [illegible] भावः आत्मनः सकाशादात्मनोऽन्यत्वायोगे कुतः संबंधोऽस्तीत्याशंक्याह असाविति यथा लो-
कावस्कनत्वमज्ञानाद्भेदमारोप्य ममायमिति संबंधमनुभवति तेन तथैव हसंबंधयथ्ययपरेशाआत्मनितो भेदाभावादतो भेदसत्सेव लोके

नच भूतस्थो यथोक्तेन न्यायेन दर्शितत्वात् भूतस्थत्वानुपपत्तेः कथं पुनरुच्यते असौ ममात्मेति विभज्य देहादि
संघातं तस्मिन्नहंकारमध्यारोप्य लोकबुद्धिमनुसरन् व्यपदिशति ममात्मेति न पुन एतस्य आत्मान्य इति लोक-
वदेव अज्ञानवत् तथा भूतभावनो भूतानि भावयत्युत्पादयति वर्धयतीति वा भूतभावनः यथोक्तेन श्लोकद्वये
नोक्तमर्थं दृष्टांतेनोपपादयन्नाह यथाकाशस्थितो नित्यं वायुः सर्वत्रगो महान् तथा सर्वाणि भूतानि मत्स्थानी-
त्युपधारय ६ यथा लोके आकाशे स्थितः आकाशस्थितो नित्यं सदा वायुः सर्वत्र गच्छतीति सर्वत्रगः ५

सवेषेतुबुद्धिदर्शितामनुसरन्नगम्यानात्मनो देहादिसंघातं विभज्याहंकारं तस्मिन्नारोप्यासौ ममात्मेति भेदं व्यपदिशति न वास्तवं संघात-
स्य ममेति व्यपदेशान्ततो निष्कृष्टस्य स्वरूपस्यात्मशब्देन निर्देशान्न भूतस्थो सा विरोधः सर्वैर्निःसंगत्वांगीकारेऽपि वात्मा भूतानि भाव-
यतीत्याह नचेति सृष्टिस्थितिसंहाराणामसंगात्मोधारत्वं मयाततमिदमित्यादिश्लोकद्वयेनोक्तोऽर्थस्तं दृष्टांतेनोपपादयन्नर्शो [illegible]
तमाहेति योजना सृष्टेस्तु स्थितिसंहारकालो गम्यते ५
स

राम
३

आकाशादेर्महतो माधारत्वं कथमित्याशंक्याह महानिति यथा सर्वगमित्यस्य परिमाणतो महान्वायुराकाशे सदा तिष्ठति
तथाकाशादीनि महान्त्यपि सर्वाणि भूतान्याकाशकल्पे मय्यसंगे परस्मिन्नत्यन्तनिःसंश्लेषमन्तरेण स्थितानीत्यर्थः ६
आकाशे वाय्वादिस्थितिवदाकाशादीनि भूतानि स्थितिकाले परमेश्वरे स्थितानि चेत्तर्हि प्रलयकाले ततोऽन्यत्र तिष्ठेयुरि

महत्त्वपरिमाणतस्तथाकाशवत्सर्वगते मयि असंश्लेषेणैव स्थितानीत्येवमुपधारय जानीहि एवं वायुराकाश
इव मयि स्थितानि सर्वभूतानि स्थितिकाले तानि ६ सर्वभूतानि कौन्तेय प्रकृतिं यान्ति मामिकां कल्पक्षये पुन
स्तानि कल्पादौ विसृजाम्यहं ७ सर्वभूतानि कौन्तेय मम प्रकृतिं त्रिगुणात्मिकां अपरां निकृष्टां यान्ति मामिकां
मदीयां कल्पक्षये प्रलयकाले पुनर्भूयस्तानि भूतानि उत्पत्तिकाले कल्पादौ विसृजाम्युत्पादयाम्यहं सर्वेव'
देवमविद्यालक्षणं ॥ ८ ॥ प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः भूतग्राममिमं कृत्स्नमवशं प्रकृतेर्वशात् ८

पुनः।

बुपपुक्ताइत्याशंक्याह एवमिति ॥

त्याशंक्याह एवमिति॥ प्रकृतिशब्दस्य स्वभाववचनत्वं व्यावर्तयति त्रिगुणात्मिकामिति सा चापरेममिति प्रागेव सूचिते
त्याह अपरामिति तस्याश्चेश्वराधीनत्वेन आत्मीयत्वमाह मदीयामिति प्रलयकाले भूतानि मय्योक्तां प्रकृतिं यान्ति चे
त्पत्तिकाले विसृजेत्सेवा पुनस्तते ईश्वराधीनत्वं भूतत्त्वेशेर्न स्यादित्याशंक्याह पुनरिति ७ तर्हि कीदृशी प्रकृतिः स्वाधीनं स्रष्टा

८

[illegible]

ना

[illegible] प्रारित्यधोत्तनार्थे पुनः पुनरित्यंके भूतसमुदायस्याविद्यास्मितादिदोषपरवशत्वे हेतुमाह स्वभाववशादिति ८
[illegible]रिधा कृतभूतग्रामं स्वभावादविद्यादित्यं च विषमं विदधासि तर्हि तव विषमसृष्टिप्रयुक्तं धर्मी रिमत्वमिसवीचस्त्वाप

प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः प्रकृतितो जातं भूतग्रामं भूतसमुदायमिमं वर्तमानं कृत्स्नं समस्तमवशमस्व
तंत्रं अविद्यादिदोषैः परवशीकृतं प्रकृतेर्वशात् स्वभाववशात् तर्ह्येवं ते परमेश्वरस्य भूतग्रामं विषमं विसृजत
स्तन्निमित्ताभ्यां धर्माधर्माभ्यां संबंधः स्यादित्यत इदमाह भगवान् ९ न च मां तानि कर्माणि निबध्नंति धनंजय
उदासीनवदासीनमसक्तं तेषु कर्मसु ९ न च मामीश्वरं तानि भूतग्रामस्य विषमविसर्गनिमित्तानि कर्माणि
निबध्नंति धनंजय तत्र कर्मणामसंबंधे कारणमाह उदासीनवद्यथोदासीन उपेक्षकः कश्चित्तद्वदासीन न
मात्मनोऽविक्रियावत्तानमसक्तं फलसंगरहितमभिमानवर्जितमहं करोमीति तेषु कर्मस्वतोऽन्यस्यापि कर्तृ
त्वाभिमानाभावः फलासंगाभावश्चासंबंधकारणमन्यथा कर्मभिर्बध्यते मंदः कोशकारवदित्यभिप्रायः ९

त्तिरिति शंकते तर्हीति तत्रेति समस्या परमेश्वरेण गृह्यते ईश्वरस्य फलासंगाभावात्कर्तृत्वाभिमानाभावाच्च कर्मसंबंधयदीश्व
रस्यापि तदुभयाभावो धर्माद्यसंबंधे कारणमित्याह अतोऽन्यस्येति यदि कर्मसु कर्तृत्वाभिमानो याकस्यचित्फलासंगो वा स्या

तत्राह अन्यस्येति ९

ईश्वरस्य कर्तृत्वमौदासीन्यं च विरुद्धमिति शंकते तत्रेति पूर्वग्रंथः समस्तार्थः विरोधपरिहारार्थमुत्तरश्लोकमवतारयति तदिति तृतीयाद्यंतसमानाधिकरणमित्यभ्युपेत्य व्याचष्टे मयेत्यादिना प्रकृतिशब्दार्थमाह ममेति तस्यापि ज्ञानत्वं व्यावर्तयति त्रिगुणेति पराभिमतं प्रधानं व्युदस्यति अविद्येति साक्षित्वे प्रमाणमाह तथा चेति मूर्तित्रयात्मनाभेदं व्यावर्तयति एक इति अखंडज्ञानमप्रमाह देव इति आदित्यवतारस्थं प्रसादिशंति सर्वभूतेष्विति किमिति तर्हि सर्वैर्नोपलभ्यते तत्राह

दृ चरा

तत्र भूतग्राममिमं विसृजाम्युदासीनवदासीनमिति च विरुद्धमुच्यत इति तत्परिहारार्थमाह मयाध्यक्षेण प्रकृतिः सूयते सचराचरं हेतुनानेन कौंतेय जगद्विपरिवर्तते ॥ मया सर्वतो दृशिमात्रस्वरूपेणाविक्रियात्मनाध्यक्षेण मम मायात्रिगुणात्मिकाविद्यालक्षणा प्रकृतिः सूयते उत्पादयति सचराचरं जगत् तथा च मंत्रवर्णः एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतांतरात्मा कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्चेति

गूढ इति बुध्यादिवत्शरीरस्थित्वेऽप्यवछिन्नतेति सर्वव्यापीति तर्हि नभोवदनात्मत्वं नेत्याह सर्वभूतेति तर्हि तत्र तत्र कर्मतत्फलभोक्तृत्वं तत्राह कर्मेति सर्वाधिष्ठानत्वमाह सर्वेति सर्वभूतेषु सत्तास्फूर्तिप्रदत्वेन सन्निधिर्वासोच्यते न केवलं कर्मणामध्यक्षः अपितु तद्द्रष्टापीत्याह साक्षीति द्रष्टा न कर्तृत्वशंकां शमयति चेतेति अद्वितीयत्वं केवलत्वं धर्मादिराहित्यमाह निर्गुण इति किं बहुना निःशेषविशेषशून्य इति चकारार्थः ॥ ॥ ॥

उनु सीन स्याद्धीश्वरस्य साक्षित्वमात्रं निमित्तीकृत्य जगदेतत्सौनः पुन्येन सर्गसंहारावनुभवतीत्याह हेतुनेति कार्यत्वकारण
गी० त्वेऽपि साक्ष्यधीनाप्रवृत्तिरिति वक्तुं व्यक्ताव्यक्तात्मकमित्युक्तं सर्वावस्थास्वित्यनेन सृष्टिस्थितिसंहारावस्थाग्रहणं ते तथापि
जगतः सर्गादिभ्यो भिन्ना प्रवृत्तिः स्वाभाविकानेच्छापते साक्षी स्यादित्याशंक्याह ईक्षीति नहीक्षित्राख्यप्रत्वं विनाऽजडवर्गस्य काचित्प्रवृ
त्तिरिति हि श्रुत्यर्थः मामेव प्रकृतिमुद्दहरति अहमित्यादिना भोगस्य विषयोपलंभाभावे संभवान्न्यानादि धीविषयोपल

हेतुनानिमित्तेनानेनाध्यक्षत्वेन हे कौंतेय जगत्सचराचरं व्यक्ताव्यक्तात्मकं विपरिवर्तते सर्वावस्थासु दृशिकर्मत्वाप
त्तिनिमित्ता हि जगतः सर्वा प्रवृत्तिरहमिदं भोक्ष्ये पश्यामीदं शृणोमीदं सुखमनुभवामि दुःखमनुभवाम्येतदर्थमिदं
करिष्ये एतदर्थमिदं करिष्ये इदं ज्ञास्यामीत्याद्यवगतिनिष्ठावगत्यवसानैव योऽस्याध्यक्षः परमे व्योमन्नित्यादयश्च
मंत्रा एतमर्थं दर्शयंति ७

दृष्टिं दर्शयति पश्यामीति ॥ भोगफलमित्यानीकयति सुखमिति विहितप्रतिषिद्धाचरणनिमि
वि त्तं सुखं दुःखं चेत्याह नरर्थमिति नचैमर्थं दृष्टं कृत्वा विनाऽनुष्ठानमित्याह इदमिति इत्याद्याप्रवृत्तिरिति संबंधः साच प्रवृ
त्तिः सर्वा दृक्कर्मत्वप्रत्तिरिहस्येव विवृणोतीत्युक्तं निगमयति अवगतीति तन्निष्ठैव च प्रवृत्तेरवसानमित्याह अवगत्यवसानेति प
रस्याध्यक्षत्वमात्रेण जगच्चेष्टेत्यत्र प्रमाणमाह योऽस्येति अस्य जगतो योऽध्यक्षो निर्विकारः स परमे महतत्त्वे हार्दे व्योम्नि स्थितोऽ
विद्येय इत्यर्थः ॥

ए म
१८३

ईश्वरस्य साक्षित्वमात्रेणास्रष्टृत्वे स्थिते फलितमाह ननश्चेति किंनिमित्ता परस्येयं सृष्टिर्नेतावद्भोगार्थो परस्य परमार्थतो भोगान
भिसंबंधित्वात्तस्य सर्वसाक्षिभूतचैतन्यमात्रत्वाच्चान्यो भोक्ता चेतनांतराभावादीश्वरस्यैकत्वादचेतनस्याभोक्तृत्वान्नच
सृष्टिरपवर्गार्था तद्विरोधित्वात्त्रैवं प्रश्नोयानदनुरूपं प्रतिवचने काप्युक्तं परस्यमायानिर्बंधने सर्गे तस्यानवकाशत्वादित्य
र्थः परस्यात्मनो दुर्विज्ञेयत्वे श्रुतिमुदाहरति कोऽद्धेति तदभिज्ञवक्तापि संसारमंडले नास्तीत्याह क इहेति जगतः सृष्टिक

तत्रैकस्य देवस्य सर्वाध्यक्षभूतचैतन्यमात्रस्य परमार्थतः सर्वभोगानभिसंबंधिनोऽन्यस्य चेतनांतरस्या
भावे भोक्तुरन्यस्याभावात् किंनिमित्तेयं सृष्टिरित्यत्र प्रश्नप्रतिवचनेऽनुपपन्ने को अद्धा वेद क इह प्रावोचत् कुत
आजाता कुत इयं विसृष्टिः इत्यादिमंत्रवर्णेभ्यो दर्शितं च भगवताऽज्ञानेनावृतं ज्ञानं तेन मुह्यंति जंतव इति ७
एवं मां नित्यशुद्धबुद्धमुक्तसत्यस्वभावं सर्वज्ञं जंतूनामात्मानं अपि संतं ७ अवजानंति मां मूढा मानुषीं तनुमाश्रितं
परं भावमजानंतो मम भूतमहेश्वरं ११ अवजानंतीति अवज्ञां परिभवं कुर्वंति मां ७ ७ ७

दृश्येत परस्य हेयत्वमाशंक्य कूटस्थत्वात्ततो न सृष्टिर्जानिनेत्याह कुत इति नहीयं विविधा सृष्टिरन्यस्मादपि कस्माच्चिदुपपद्यते
अन्यस्य वक्तृतोऽभावादित्याह कुत इयमिति फलेयं तर्हि सृष्टिः साऽज्ञान्याज्ञानाधीनेत्याह दर्शितं चेति १० सर्वाध्य
क्षः सर्वेश्वरताधिवासो नित्यमुक्तश्चेत्त्वं तर्हि किमिति त्वामेवात्मत्वेन भेदेन वा सर्वे न भजंतेत्यत आह एवमिति ७

उ येस्तद्बुद्धित्वं भगवदवज्ञायां कारणमित्याह स्तोमूढा इति भगवतो मनुष्यदेहसंबंधात्तस्मिन्विपर्यासः संभवतीत्याह मा
नुषीमिति अस्मदादिवद्देहेनात्मत्वाभिमानेन भगवतोप्यावर्तयति मनुष्येति भगवंतमवजानतामविवेकमुक्त्वा हाने
र्हेतुमाह परमिति ईश्वरत्वेनानादरे किं भवतीत्यपेक्षायां तदवतारं मतिबध्नुरूपः शोच्याभवंतीत्याह तत्रैवेति भगवदवज्ञा
नादेव हेतोरवजानंतस्ते जनवो वराकाः शोच्यास्सर्वपुरुषार्थवाह्याः स्युरित्ति संबंधः तत्र हेतुं सूचयति तस्येति प्रकृतस्य भ

मूढाः अविवेकिनो मानुषीं मनुष्यदेहसंबंधिनीं तनुं देहमाश्रितं मनुष्यदेहेन व्यवहरंतमित्येतत् परं प्रकृष्टं भावं प
रमात्मतत्त्वमात्मैतं त्वमाकाशकल्पमाकाशादप्यंतरतमम जानंतो मम भूतमहेश्वरं सर्वभूतानां महांतमीश्वरं स्वात्मा
नं ततश्च तस्य ममावज्ञानभावनेन हताः वराकास्ते ११ मोघाशा मोघकर्माणो मोघज्ञाना विचेतसः राक्षसीमासुरीं
चैव प्रकृतिं मोहिनीं श्रिताः १२ मोघाशा वृथा आशा आशिषो येषां ते मोघाशास्तथा मोघकर्माणो यानि चाग्निहोत्रादी
नि तैरनुष्ठीयमानानि तानि च तेषां भगवत्परिभवात्स्वात्मभूतस्यावज्ञानात् मोघान्येव निःफलानि कर्माणि भवंतीति
।मोघकर्माणः।।

गवतोवज्ञानमनादरणं निंदनं वा तस्य भावनं पौनःपुन्यं तेन हतास्तज्जनितदुरितप्रभावात्सन्निपद्दैर्घ्य रस्य धेः ११
भगवंतमवजानतां प्रश्वर्दकं शोच्यत्वं विशदयति कथमिति भगवन्निंदापराणां नफलसिद्धिरपि प्रार्थनापेवतीत्याह मोघेति
ननु भगवंतं निंदंतोपि निसंनेमित्तिकं कर्मानुतिष्ठंति तदनुष्ठानाच्च तेषां प्रार्थनास्वार्थाभविष्यतीत्याह नघेति परिभवजनितात्क
रणाअवज्ञानमनादरणं

मो

कथं ७

घा

कुक्ष ३

ग न

१८४

तेषामपि शास्त्रार्थविज्ञानवतां तद्द्वाराप्रार्थनाधैवल्यमित्याशंक्याह तथा मोघेति तथापि मौलिकविवेकवशात्तत्प्रार्थनासा
फल्यमित्याशंक्याह विचेतस इति नकेवलमुक्तविशेषणवत्वमेव तेषां किंतु वर्तमानदेहपातानंतरं तत्तदिति क्रूरयोनिप्राप्ति
श्चनिश्चितेत्याह किंचेति मोहकरीमिति प्रकृतिद्वयेपि तुल्यंविशेषणं छिंधि भिंधि पिब खादेति प्राणिहिंसाद्रूपो रक्षसां

तथा मोघज्ञाना निःफलविज्ञानाः ज्ञानमपि तेषां निःफलमेव स्यात विचेतसो विगतविवेकाश्च ते भवंतीत्यभिप्रायः
किंच ते भवंति॥ राक्षसीं रक्षसां प्रकृतिं स्वभावमासुरीं असुराणां च प्रकृतिं मोहिनीं मोहकरीं श्रिताः आश्रिताः छिंधि
भिंधि पिब खाद परस्वमपहरेत्येवंशीलाः क्रूरकर्माणो भवंतीत्यर्थः असुर्यानाम ते लोका इति श्रुतेः॥ इधानाः
भगवद्भक्तिलक्षणे मोक्षमार्गे प्रवृत्ताः १ महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः भजंत्यनन्यमनसो ज्ञात्वा
भूतादिमव्ययं १३ महात्मानस्त्वक्षुद्रचित्ताः मामीश्वरं पार्थ दैवीं देवानां प्रकृतिं शमदमदयाश्रद्धादिलक्षणामा
श्रिताः संतो भजंति सेवंते अनन्यमनसो अनन्यचित्ताः १

स्वभावः असुराणां स्वभावस्तु नरे हिनज्जुहुयिपास्वमपहरेत्यादिरूपः मोहो मिथ्याज्ञानं उक्तमेव स्फुरयति छिंधीति १२ के
वलं भगवंतं भजंते तत्राह येतुमन इति महात्मस्वरूशेपहारिभिः योगिन आत्मा सत्त्वमयामिति श्रुतिमा इत्याह अधानेति
न्ये कावंधारणे प्रकृतिं विशिनष्टि॥ भमेति॥ अनन्यस्मिन्प्रसंभ्रते परात्मिन्नेव मनो येषां इति श्रुत्यस्या व्याकरोति अनन्यचित्ता

येषुनः ४१

१

दि

मि

६

भा
२५

ज्ञातसेवानुपपत्तेः ज्ञानस्योपपत्तिभ्यामात्रैर्ज्ञात्वा नतः सेवेते तत्राह ज्ञात्वेति अव्ययमविनाशिनं भजनप्रकारं इति कथमिति तत
प्रकारमाह सततमिति सर्वदेति श्रवणावस्थायामुच्यते कीर्तनं विंवेदांतश्रवणं प्रणवजपश्च यतंतब्रह्मचर्यादि । नमस्यंतो मां प्रति
चेतसा प्रह्वीभवंतो भक्त्या परेण प्रेम्णा नित्ययुक्ताः सततं संयुक्ताः १४ उपासनप्रकारभेदंप्रतिपित्सया पृच्छति तेकेनेति तत्प्रकारभे ८३

ज्ञात्वा भूतादिं भूतानां वियदादीनां प्राणिनां वा आदिं कारणमव्ययं कथं सततं कीर्तयंतो मां यतंतश्च दृढव्रताः नमस्यं
तश्च मां भक्त्या नित्ययुक्ता उपासते १४ सततं सर्वदा भगवंतं ब्रह्मस्वरूपं मां कीर्तयंतो यतंते नश्चेंद्रियोपसंहारशमदम
५ तं दयाऽहिंसादिधर्मेषु प्रयतंतश्च दृढव्रताः दृढं स्थिरमचलं व्रतं येषां ते दृढव्रताः नमस्यंतश्च मां हृदयेशयमात्मानं ने चं६
भक्त्या नित्ययुक्ताः संतः उपासते सेवंते ७ ते केन केन प्रकारेणोपासत इत्युच्यते ज्ञानयज्ञेन चाप्यन्ये यजंतो मामुपास
ते एकत्वेन पृथक्त्वेन बहुधा विश्वतोमुखं १५ ज्ञानयज्ञेन ज्ञानमेव भगवत्तत्त्वविषयं यज्ञस्तेन ज्ञानयज्ञेन यजंतः
पूजयंतो मामीश्वरं चाप्यन्ये अन्यामुपासनां परित्यज्य उपासते तच्च ज्ञानमेकत्वेन एकमेव परं ब्रह्मेति परमार्थद
र्शनेन यज्ञेन उपासते ८

देदीरणां येऽश्लोकमवतारयंति उद्यतरश्मिरुच्यते इत्यंते परमेश्वरेणेनेति प्रकृतेज्ञानेपतत्राद्धः एम
ईश्वरं चेति चकारेण च धारणेऽयतां तर ध्यानसागमविशालसूचितं दर्शयति अन्यामिति अन्ये ब्रह्मनिष्ठा इति यावत् त्वन १८१
पतमेव विभजते तत्त्वेति ।५

गीभा
[illegible]

उत्तमाधिकारिणामुपासनमुक्त्वा मध्यमानामधमानां चाधिकारिणामुपासनप्रकारमाह केचिच्चेति तेषामेव प्रकारान्तरेणोपासनमुदीरयति केचिदिति बहुप्रकारेणाग्न्यादित्यादिरूपेणेति यावत् १५ भगवदेकविषयमुपासनमेतर्हि न सिध्यतीति चे

केचिच्च पृथक्त्वेन आदित्यचन्द्रादिभेदेन स एव भगवान् विष्णुरवस्थित इत्युपासते केचिद्बहुधावस्थितः स एव भगवान् सर्वतोमुखो विश्वरूप इति तं विश्वरूपं सर्वतोमुखं बहुप्रकारेणोपासते १५ यदि बहुभिः प्रकारैरुपासते कथं त्वामेवोपासते इत्यत आह अहं क्रतुरहं यज्ञः स्वधाहमहमौषधं मन्त्रोऽहमहमेवाज्यमहमग्निरहं हुतं १६ अहं क्रतुः श्रौतः कर्मभेदः अहमेव अहं यज्ञः स्मार्तः किं च स्वधा अन्नमहं पितृभ्यो यद्दीयते तत् अहमौषधं सर्वप्राणिभिर्यदद्यते तदेवौषधशब्दवाच्यमन्नं वा स्वधेति साधारणमन्नमौषधमिति व्याख्याप्रपन्नामार्यभेदः यजं मन्त्रोऽहं येन पितृभ्यो देवताभ्यश्च हविर्दीयते अहमेवाज्यं हविश्चाहमग्निर्यस्मिन् हूयते सोऽग्निरहं हुतं हवनकर्म च

[illegible] इति प्रकारभेदमारोप्य ध्यायन्तोऽपि भगवन्तमेव ध्यायन्तीति तस्य सर्वात्मकत्वादित्याह अत आहेति क्रतुयज्ञशब्दयोः पौनरुक्त्यं [illegible] व्याचष्टे श्रौत इति ॥ क्रियाकारकफलजातं भगवद्व्यतिरिक्तं नास्तीति समुदायार्थः ॥

२

गी०टी०
१८६

[illegible] भगवतः सर्वात्मकत्वमनुमंतव्यमित्याह ॥ किंचेति पवित्रं शुध्यतेऽनेनेति शुद्धसपरिशुद्धिकारणं शोधकं कर्मेत्याह पा
[illegible]मिति वेदितव्ये ब्रह्मणि वेदसाधनमोंकारस्तत्र प्रमाणाम्नाय ऋगादि चकारादथर्वांगिरसोऽपि गृह्यंते १७ भगवतः सर्वात्मत्वे हेत्वंत
रमाह किंचेति गम्यत इति गतिः प्रतिलयपर्यंतं कर्मफलं गतिरित्याह कर्मेति योऽसौ धर्मफलस्यैव प्रदाता कार्यकारणप्रपंचस्याधि

किंच पितामेहमस्य जगतो माता धाता पितामहः वेद्यं पवित्रमोंकार ऋक्सामयजुरेव च १७ पिता जनयिताहमस्य जगतो
माता जनयित्री धाता कर्मफलस्य प्राणिभ्यो विधाता पितामहः पितुः पिता वेद्यं वेदितव्यं पवित्रं पावनमोंकारश्च ऋक्सामय
जुरेव च किंच गतिर्भर्ता प्रभुः साक्षी निवासः शरणं सुहृत् प्रभवः प्रलयः स्थानं निधानं बीजमव्ययं १८ गतिः कर्म
फलं भर्ता पोष्टा प्रभुः स्वामी साक्षी प्राणिनां कृताकृतस्य निवासो यस्मिन्प्राणिनो निवसंति शरणं आर्तानां मत्प्रपन्ना
नामार्तिहरः सुहृत्प्रत्युपकारानपेक्षः सन्नुपकारी प्रभवः उत्पत्तिर्जगतः प्रलयः प्रलीयतेऽस्मिन्निति तथा स्थानं तिष्ठत्यस
स्मिन्निति निधानं निक्षेपः कालांतरोपभोग्यं प्राणिनां बीजं प्ररोहकारणं प्ररोहधर्मिणां अव्ययं यावत्संसारभावित्वादव्य
यं न ह्यबीजं किंचित्प्ररोहतीति

ष्ठानमित्याह निवास इति शीर्यते दुःखमस्मिन्निति वसंति मामित्याह शरणमिति प्रभवस्य
स्माज्जगदिति वसंति मारामोक्षु वसंतीति निकरणास्यरूपमव्ययत्वमित्याशंक्याह यावदिति कारणांतरेणापि कार्यं कदाचि
दुरेष्यतीति किं कारणेनेत्याशंक्याह नहीति ॥ ॥ ॥ ॥

५
राम
१८६

माभूत्तर्हिसंसारदशायामेव॰कदाचित्क्वापीसत्तिरित्याशंक्याह नित्यंचेति कारणात्मकेनांशेनांगीकृतसत्तरसंतमस्त्विभ्रम
त्वंसर्वकालत्रयनास्तीतिसिद्धवत्कृत्यविशिनष्टि बीजेति॥१८ इतश्चसर्वात्मत्वेनभगवतोविवक्षितत्वंइत्याह किंचेति आ
दित्याज्जायतेवृष्टिरितिस्मृतिमवष्टभ्याचष्टेकैश्चिदिति वर्षोत्सर्गनिग्रहावेकस्यैकस्मिन्कालेविरुद्धावित्याशंक्याह अष्ट
भिरिति ऋतुभेदेनवर्षस्यनिग्रहोत्सर्गावेकत्वेकाचविरुद्धावित्यर्थः यस्यकारणस्यसंबंधित्वेनयत्कार्यमभिव्यज्यतेतदिहस

नित्यंचप्ररोहदर्शनाद्बीजसंततिर्नव्येतीतिगम्यते किंच २ तपाम्यहमहंवर्षंनिगृह्णाम्युत्सृजामिच अमृतं
चैवमृत्युश्चसदसच्चाहमर्जुन १९ तपाम्यहमादित्योभूत्वाहंवर्षंकैश्चिद्रश्मिभिरुल्बणैरुत्सृजाम्युत्सृँपुनर्निगृह्णा ज्य
मिकैश्चिद्रश्मिभिरष्टभिर्मासैःपुनरुत्सृजामिप्रावृष्यमृतंचैवदेवानांमृत्युश्चमर्त्यानां सत्तँयत्संबंधित यस्य
यँविद्यमानं तद्विपरीतमसँवाहमर्जुन नपुनरत्यंतमेवासद्भगवान्स्वयंकार्यकारणेवासदसती २
चै

दित्युच्यतेकारणसंबंधेनानभिव्यक्तंनामरूपमसदितिव्यवह्रियतेतेनेनाह सदिति भन्यथार्थंनिरस्यति नपुनरिति भगव
तोसतासत्वेकार्यकारणात्मनानिराधिष्ठानानतिष्ठेदित्यर्थः तर्हियँथाभूतंकार्यस्यसत्वंकारणस्यचासत्वमाक्षेपाभिसा
ख्यवानुवादेननिषेधति कार्येति नहिकार्यस्यसंततिकंसत्वंवाचारंभणश्रुतेर्नापितरस्यासंततिकमसत्वंकुतस्कस्त्वात्मिसारि
श्रुतेरित्यर्थः १२

भा॰टी॰
८७

उक्तेनोनयैतेर्मार्गत्रयस्मिध्यानाभिनिविष्टबुद्धीनां किं फलमित्याशंक्य सद्यो वा क्रमेण वा मुक्तिरित्याह ये रति भगवद्भक्तानाम
पि निष्कामानामेव मुक्तिरिति दर्शयितुं सकामानां पुंसां संसारमवतारयति ये पुनरिति त्रिस्रो विद्या अधीयंते वा विदंतीति

ये स्ववोत्के निवृत्तिमकारैरेकत्वपृथक्त्वादिविज्ञानेन येतैर्मां यज्ञैर्यजंत उपासते ज्ञानविदः ते यथाविज्ञानं मामेव प्राप्नुवं
ति ये तु नराः कामकामाः त्रैविद्या मां सोमपाः पूतपापा यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयंते ते पुण्यमासाद्य सुरेंद्रलो
कमश्नंति दिव्यान् दिवि देवभोगान् २० त्रैविद्या याज्ञिकाः ऋग्यजुःसामविदः मां मां वस्वादिदेवरूपिणं सोम
ती पाः सोमं पिबंतीति सोमपाः तेनैव सोमपानेन पूतपापाः धुतकिल्बिषाः यज्ञैरग्निष्टोमादिभिरिष्ट्वा पूजयित्वा
स्वर्गतिं स्वर्गमनं स्वर्गतिं स्वरेव गतिर्वा तां स्वर्गतिं प्रार्थयंते ते च पुण्यं पुण्यफलमासाद्य संप्राप्य सुरेंद्रलोकं श ल
तक्रतोः स्थानं अश्नंति भुंजंते दिव्यान् दिवि भवान् अप्राकृतान् देवभोगान् देवानां भोगा देवभोगास्तान् देवभोगा
न् २०

वा ते त्रैविद्या वेदत्रयविदस्तत्स्थकर्मेति वस्वादीत्यादिशब्देन सवनत्रययोग्यानां आदित्यरुद्रवसवो गृह्यंते। धुतकिल्बिषा निरस्तपा
पा इति यावत् ७ २०

तर्हि स्वर्गप्राप्तिरपि भगवत्प्राप्तित्वस्येत्याशंक्याह तेतमिति पुण्ये स्वर्गप्राप्तिहेतावितियावत् प्रसिद्ध्यर्थो हि शब्दः त्रयाणां ह्वौत्राहीनो वेदत्रयविहितानां धर्माणां समाहारस्त्रिधर्मं तदेव त्रैधर्म्यं तदनुप्रपन्ना अस्तदनुगता इति यावत् कामकामानां गमनागमनहूरा कामितफलप्राप्तिश्चेदिष्टमेव वेष्टितमित्याशंक्याह गतेति २१ फलमनभिसंधाय त्वामेवाराधयतोऽस

ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्ये लोकं विशंति एवं त्रयीधर्म्म मनुप्रपन्ना गतागतं कामकामा लभंते २१
ते तं भुक्त्वा स्वर्गलोकं विशालं विस्तीर्णं क्षीणे पुण्ये मर्त्ये लोकं इमं विशंति आविशंतीति एवं यथोक्तेन हि प्रकारेण त्रयीधर्म्यं केवलं वैदिकं कर्म तदनुप्रपन्ना गतागतं गतं चागतं च गतागतं गमनागमनं कामकामाः कामान् कामयंत इति कामकामा लभंते गतागतमेव न तु स्वातंत्र्यं क्वचित् लभंत इत्यर्थः ये तु निष्कामाः सम्यग्दर्शिनः ७ अनन्याश्चिंतयंतो मां ये जनाः पर्युपासते तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहं २२ अनन्याः अपृथग्भूताः परं देवं नारायणमात्मत्वेन गताः संतश्चिंतयंतो मां ये जनाः॥

म्यग्दृशो न निष्ठानामसंततनिष्कामानां कथं योगक्षेमौ स्यातामित्याशंक्याह॥
ये तु नरा इति तेषां योगक्षेमं वहामीत्युत्तरत्र संबंधः येभ्यो मो नाविद्यन्त इति प्रसक्तिमाश्रित्याह अपृथगिति कार्ये स्वेव कारणे॥ नाहं त्वं यावत् तेनयति परमिति अहमेव वासुदेवः सर्वात्मा न मत्तोऽन्यत्किंचिदस्तीति ज्ञात्वा तमेव प्रसंचक्षाणा ध्यायंत इत्याह॥ चिंत

ग॰भा॰
१९८

प

अकृन्यस्य वस्तुमुख्यानधिकारिणो निर्दिशति संन्यासिन इति पर्युपासते परितः सर्वतोऽनवच्छिन्नतयाँ ईपंतीसर्वेः नित्याभियुक्तानां नित्यमनवरतमादरेण ध्याने ध्याप्रवृत्तानामित्याह सततेति योगश्च क्षेमश्च योगक्षेमं तत्राप्रनहत्वमप्रेमाहू योग इति । किमिति परमार्थदर्शिनां योगक्षेमं वहसीत्याशंक्याह ज्ञानी त्विति इत्यतस्तेषां योगक्षेमं वहामीति संबंधः सम्यग्दर्शननिष्ठानामेव योगक्षेमं वहामि हि भगवानिति विशेषणममृष्यमाणः शंकते नन्विति अन्येषामपि भक्तानां

संन्यासिनः पर्युपासते तेषां परमार्थदर्शिनां नित्याभियुक्तानां सततनाभियुक्तानां योगिनां योगक्षेमं योगोऽप्राप्तस्य प्रापणं क्षेमस्तद्रक्षणं तदुभयं वहामि प्रापयाम्यहं ज्ञानी त्वात्मैव मे मतं स च मम प्रियो यस्मात्तस्मात्ते ममात्मभूताः प्रियाश्चेति । ननु अन्येषामपि भक्तानां योगक्षेमं वहत्येव भगवान् सत्यं वहत्येव । किंत्वयं विशेषोऽन्ये ये भक्तास्ते स्वात्मार्थं स्वयमपि योगक्षेममीहंते । अनन्यदर्शिनस्तु नात्मार्थं योगक्षेममीहंते नहि ते जीविते मरणे वात्मनो गृद्धिं कुर्वंति केवलमेव भगवच्छरणास्ते । अतो भगवानेव तेषां योगक्षेमं वहतीति ॥ २२ ॥ ॥

भगवान्योगक्षेमं वहतीत्येतदंगीकरोति सत्यमिति । तर्हि भक्तेषु ज्ञानिषु च विशेषो नास्तीति पृच्छति किंत्विति तत्र विशेषम निलापविरहेणेति अन्य इत्यादिना योगक्षेममुद्दिश्य प्रयत्नमीहंते चेष्टां कुर्वंतीति यावत् आत्मविदां स्वार्थं योगक्षेममुद्दिश्य चेष्टाभावं स्पष्टयति । नहीति निरपेक्षाकामनानामित्येतत्तत्त्वविदां तर्हि सर्वत्रानास्थेत्याशंक्याह केवलमिति तेषांतरे

एम
१९८

करणत्वे फलितमाहू नरति इतिशब्दो विशेषशब्देनंतंव
ऽते

ननु देवतात्मनापरस्यैवात्मनः स्थितेः अभ्युपगमाद्देवतांतरशरणानामपि भगवच्छरणत्वाविशेषे तद्देवनिष्ठत्वे अकिंचित्कर
८ त्वमिति मन्वानः शंकते नन्विति तदंगीकृत्य परिहरति येप्यन्य इत्यादिना देवतांतरयाजिनां भगवद्याजिभ्यो विशेषमाह अ
विधीति तद्व्याकरोति अविधिरिति १३ ननु यस्मादिंद्रादिदेवतानां सर्वकर्मेव तद्वत्काम्याजिनो भवंतीति कथमविधिपूर्व

न नत्वा अपि देवतास्त्वमेव चेत् इत्याशंक्य मामेव भजंते तस्मेवं येप्यन्यदेवताभक्ता यजंते श्रद्धयान्विताः तेपि मामेव
कौंतेय यजंत्यविधिपूर्वकं १२ येप्यन्यदेवताभक्ताः अमात्तु देवताभक्ताः अन्यदेवताभक्ताः संतो यजंते पूजयंति श्रद्धयान्विताः
श्रद्धयान्विताः आस्तिक्यबुद्ध्यान्विताः अनुगतास्तेपि मामेव कौंतेय यजंतीति अविधिपूर्वकं अविधिरज्ञानं ४
भोक्ता च प्रभुरेव च न तु मामभिजानंति तत्त्वेनातश्च्यवंति ते २४ अहं हि सर्वयज्ञानां श्रौतानां स्मार्तानां च सर्वे
षां यज्ञानां देवतात्मत्वेन भोक्ता च प्रभुरेव च मत्स्वामिको हि यज्ञो यज्ञपतोहमेवात्रेति तथोक्तं ५
३ ४ तत्सर्वकं अज्ञानपूर्वकं यजंत इत्यर्थः । कस्मात्ते अविधिपूर्वकं यजंते इत्युच्यते । यस्मात् । अहं हि

का ३

[illegible]

कं तेषां यजनमिति शंकते कस्मादिति देवतांतरयाजिनां यजनमविधिपूर्वकमित्यत्र हेतुत्वपर्यवसन्नं श्लोकमुत्थापयति उ
च्यत इति सर्वेषां द्विविधानां यज्ञानां यज्वादिदेवतात्वेनाहमेव भोक्ता स्वेनांतर्यामिरूपेण प्रभुश्चाहमेवेत्यभिसंधिमंतरिति ॥
हि शब्दः प्रभुरेव चेत्युक्तं विवृणोति मत्स्वामिको हीति तत्र श्रुतिर्व्यापकतेवाच्यमप्रमाणपदमिति अविधिपूर्वकमिति ७

पू तू

१९९ नन्वपि देवतांतरयाजिनां यजनमविधिपूर्वकमिति कुतः सिद्धं तत्राह तथेति ममैव यज्ञेषु भोक्तृत्वे प्रभुत्वे च सतीति यावत् तथा
न तु तत्त्वतो भोक्तृत्वेन प्रभुत्वेन च मां यथावद्यतो न जानंत्यतो भोक्तृत्वादिना ममाज्ञानात् अन्यदेवतार्पितकर्मणां च्यवंते
कर्मफलादित्याह अतश्च्यवंतीति २४ यद्यन्यदेवताभक्ता भगवत्तत्त्वाज्ञानात्कर्मफलाच्च्यवंते तर्हि तेषां देवतायजनमकिंचित्कर

तथा न तु मामभिजानंति तत्त्वेन यथावदतश्चाविधिपूर्वकं दृष्ट्वा [illegible] यागफलात् च्यवंति प्रच्यवंते येप्यन्यदेव
ताभक्तिमत्त्वेनाविधिपूर्वकं यजंते तेषामपि यागफलमवश्यंभावि कथं यांति देवव्रता देवान् पितॄन्यांति पितृव्रताः
भूतानि यांति भूतेज्या यांति मद्याजिनोपि मां २५ यांति गच्छंति देवव्रता देवेषु व्रतं नियमो भक्तिश्च येषां ते देवव्रता दे
वान् यांति पितॄन् अग्निष्वात्तादीन् यांति पितृव्रताः श्राद्धादिक्रियापराः पितृभक्ताः भूतानि विनायकमातृगणाच
तुर्भगिन्यादीनि यांति भूतेज्या भूतानां पूजका यांति मद्याजिनो मद्यजनशीला वैष्णवा मामेव

मित्याशंक्याह येपीति देवतांतरयाजिनामनावृत्तिफलाभावेपि तत्तद्देवतायागानुरूपफलप्राप्तिध्रौव्यान्न तदकिंचित्क रम
रमित्याशयः देवतांतरयाजिनामावश्यकं तत्तत्फलमात्रं कासर्वकमुदाहरति कथमित्यादिना नियमो वस्तूपहारश्रद् १९९
धाप्रह्वीभावादिसर्वः देवतांतराराधनस्यांतवत्फलत्वमुक्त्वा भगवदाराधनस्यानंतफलत्वमाह यांतीति ॥ ॥

रि ता

भगवदाराधनस्यानंतफलत्वे देवतांतराराधनं मुक्त्वा भगवदाराधनमेव युक्तमायाम साम्यात्फलातिरेकाद्वेत्याशंक्याह
समानेपीति अज्ञानाधीनत्वेन देवतांतराराधनवतो फलतो न तु नंतादर्शयति येनेति २५ अनंतफलत्वाद्भगवदाराध
नमेव कर्तव्यमित्युक्तं सुकरत्वाच्चेत्येतदाह नकेवलमिति भगवदाराधनस्य सुकरत्वमेव अभ्रसर्वकं मपं च यति कम

समानेप्यायासे मामेव न भजंते अज्ञानात्तु ते नते अल्पफलभाजो भवंतीत्यर्थः नकेवलत्वे मईमदृत्तानामनाहृतिल
क्षणमनंतफलं सुखाराधनस्याह कथं पत्रंपुष्पंफलंतोयं यो मे भक्त्या प्रयच्छति तदहं भक्त्युपहृतमश्नामि प्रयता
त्मनः २६ पत्रंपुष्पंफलंतोयं सुकरं कं यो मे भक्त्या प्रयच्छति तदहं भक्त्या यत्नारि उपहृतं भक्तिस्वैकं प्रापि
तं भक्त्युपहृतं अश्नामि गृह्णामि प्रयतात्मनः शुद्धदेः यतनः एव मनः २६ यत्करोषि यदश्नासि यज्जुहोषि ददा कु ४
सि यत् यत्तपस्यसि कौंतेय तत्कुरुष्व मदर्पणं २७ यत्करोषि यदाचासि शास्त्रीयं कर्म स्वतः प्राप्तं यदश्ना
सि यज्जुहोषि हवनं निर्वर्तयसि श्रौते स्मार्ते वा यद्ददासि प्रयच्छसि ब्राह्मणेभ्यो हिरण्यान्नादि यत्तपस्यसि ९६
यश्चरसि कौंतेय तत्कुरुष्व मदर्पणं मयि प्रा
पितारि ना यद्धिरण्यारिकं भक्तिस्वैकं मदर्पणमर्पितं तेनाप्युद्देशेनाल्पस्वीमामाराधय
यद्वीतस्त्वहमवधारयामीत्याह यत्कृमिसारिका २८ तदाराधनस्य सुकरत्वेन देवाचरणकमित्याह यत इति स्वतः शास्त्राहृतेभ्रा
हंगमनाशेत्तिपावत यदश्नासि यत्किंचिद्भोगं भुंक्षे हवनस्य स्वकृतस्य स्वयारपति श्रौतागमिति यत्समर्पणं तत्सर्वं मत्संसमर्पयेत्यर्थः

गी॰भा॰ किमतोभवतितत्राह एवमिति भगवदर्पणबुद्ध्यासर्वकर्मकुर्वतोजीवन्मुक्तस्यप्रारब्धकर्मावसानेविदेहकैवल्यमा
१९ [illegible]मित्याह शुभेत्यादिना भगवदर्पणप्रकारान्मुक्तिः संन्यासयोगश्चेतिसाधनद्वयंकोशायतना[illegible]ति तोपायमिति ३

एवंकुर्वन्सन्यद्भवतितच्छृणु शुभाशुभफलैरेवंमोक्ष्यसेकर्म[illegible]बंधनैः संन्यासयोगयुक्तात्माविमुक्तोमा
मुपैष्यसि २८ शुभाशुभफलैः शुभाशुभेइष्टानिष्टेफलेयेषांतानिशुभाशुभफलानिकर्माणितैः शुभा
शुभफलैःकर्मबंधनैःतान्येवबंधनानितैः कर्मबंधनैरेवंमत्समर्पणंकुर्वन्मोक्ष्यसेसोऽयंसंन्यासयोगो
नामसंन्यासश्चासौमत्समर्पणंतथाकर्मत्वाद्योगश्चासौइतितेनसंन्यासयोगेनयुक्तः आत्मांतःक
रणंयस्यतव। सत्वंसंन्यासयोगयुक्तात्मासन्विमुक्तोबंधनैर्जीवन्नेवपतितेचास्मिंशरीरेमामुपैष्यसि आ
गमिष्यसि ॥ रागद्वेषवांस्तर्हिभगवान्यतोभक्तानेवानुगृह्णातिनेतरान्नितितन्न समोऽहंसर्वभूतेषुनमेद्वे
ष्योऽस्तिनप्रियः॥ येभजंतितुमांभक्त्यामयितेतेषुचाप्यहं २९ समस्तुल्योऽहंसर्वभूतेषुनमेद्वेष्योऽस्तिनप्रियो
ऽग्निवद्दूरस्थानांयथाग्निःशीतंनापनयति समीपमुपसर्पतामपनयति तथाहंभक्ताननुगृह्णामिनेतरान्॥
परिहरति तत्प्रपंचयति यथेति ७

२९ भगवतोरागद्वेषवत्त्वेनानीश्वरत्वमाशंक्यपरिहरति रागेत्यादिनातर्हिभगवद्भजनमकिंचित्करमित्याशंक्याह अपि

भक्तानभक्तांश्चानुगृह्णतोननुगृह्णतश्च भगवतो नकथं रागादिमत्वमित्याशंक्याह ये भजंतीति येत्विह वर्णाश्रमादिधर्मैर्मांभ
जंतितेतेनैव भजनेनार्चितस्वमाहात्म्येनपरिशुद्धबुद्धयो मयिमत्समीपेवर्तंतेऽहमपि अग्नियोग्यचिंताभवंति। तुशब्दोस्य ते
विशेषस्य द्योतनार्थः तेषु च समीपेस्थमस्मदहमपि स्वभावतो वर्तमानस्तदनुग्रहपरो भवामि यथाग्न्यापकमपि

ये भजंति तु मामीश्वरं भक्त्या मयि ते स्वभावत एव न मम रागनिमित्तं मयि वर्तंते तेषु चाप्यहं स्वभावत एव व
र्ते नेतरेषु न एतावता तेषु द्वेषो मम शृणु मद्भक्तेर्माहात्म्यं अपि चेत्सुदुराचारो भजते मामनन्यभाक् साधुरे
व स मंतव्यः सम्यग्व्यवसितो हि सः ३० अपि चेत् यद्यपि सुदुराचारः सुष्ठु दुराचारोऽतीव कुत्सिताचा दु
रोऽपि भजते मामनन्यभाक् अनन्यभक्तिः सन् साधुरेव सम्यग्वृत्त एव स मंतव्यो ज्ञातव्यो सम्यक् यथावत्
व्यवसितो हि यस्मात्साधुनिश्चयः

सा विचंते जः स्वछेईर्पणारोप्रति फल नितथापरमेष्ठिऽऽः वर्जे नीपतपाभ
२ क्तिनिरस्तसमस्तकल्मुषसत्वेषुषुरूपेषु संनिधत्तेदैवीं प्रकृतिमाश्रिता मां भजंतीसुकृत्वादित्यर्थः २७ प्रकृतोभगव
द्भक्तिस्तुतमापीप्रसामापितत्राधिकारोस्तीति सूचयति भणिवति सम्यग्वृत्त एव भगवद्भक्तो ज्ञातव्यः तत्र हेतुमाह स

ति पिमेवमपेक्षयति उत्सृज्येपि भगवंतेभजमानस्य कथंदुराचारतापरित्यक्ता भवतीत्याशंक्याह क्षिप्रमिति सतिदु
राचारेकथंधर्मचित्तत्वंतत्राह शश्वदिति उपशमोदुराचारउपरमः किमितित्वदुक्तस्यदुराचारउपरतिरुच्यतेदुराचा

स उत्सृज्य च बाह्यां दुराचारतां अंतः सम्यग्व्यवसायसामर्थ्यात्‌ क्षिप्रं भवति धर्मात्मा शश्वच्छांतिं निगच्
छति कौंतेय प्रतिजानीहि न मे भक्तः प्रणश्यति ३१ क्षिप्रं शीघ्रं भवति धर्मात्मा धर्मे चित्त एव शश्वन्नित्यं
शांतिं चोपशमं निगच्छति प्राप्नोति शृणु परमार्थं कौंतेय प्रतिजानीहि निश्चितां प्रतिज्ञां कुरु न मे भक्तः
मम भक्तो मय्यर्पितांतरात्मा मद्भक्तो न प्रणश्यतीति ७ ७ ७

रोहंतपा किमिति असौ न नश्यतीत्याशंक्याह अपिचेति ७ ७ ७

इतश्च भगवद्भक्तिर्विधातव्येत्याह किं चेति न मे भक्तः प्रणश्यतीत्यत्र हेतुमाव्यक्षयोत्तो भक्त्यधिकारे जातिनियमो ना
स्तीत्याह मांहीति ३२ यदि पापयोनिः पापाचारश्चेत्तदुत्पापरां गतिं गच्छति न हि किमुत जातिनिमित्तेन संसारि
णां किंवा सद्भक्तेनेत्याशंक्याह किं पुनरिति उत्तमजातिमतां ब्राह्मणादीनामनिशयेन परमगतिर्येतो लभ्यते ॥ तो भगव

किंच मांहीति पार्थ व्यपाश्रित्य ये पि स्युः पापयोनयः स्त्रियो वैश्यास्तथा शूद्रास्तेपि यान्ति परां गतिं ३२ मांहि
यस्मात् पार्थ व्यपाश्रित्य मामाश्रयत्वेन गृहीत्वा येपि स्युर्भवेयुः पापयोनयः पापा योनिर्येषां ते पापयो
नयः पापजन्मानः के त इत्याह स्त्रियो वैश्यास्तथा शूद्रास्तेपि यान्ति गच्छन्ति परां प्रकृष्टां गतिं किं पुनर्ब्राह्मणाः
पुण्या भक्ता राजर्षयस्तथा अनित्यमसुखं लोकमिमं प्राप्य भजस्व मां ३३ किं पुनर्ब्राह्मणाः पुण्याः पुण्ययो
नयो भक्ता राजर्षयस्तथा राजानश्च ते ऋषयश्च राजर्षयः यत एवमतोऽनित्यं क्षणभंगुरे असुखं च सुखवर्जि
तमिमं लोकं मनुष्यलोकं प्राप्य पुरुषार्थसाधनं दुर्लभं च मनुष्यत्वं लब्ध्वा भजस्व सेवस्व मां कथं ॥

उ... तैरेकांतेन विधातव्यमित्याह यत इति मनुष्यदेहातिरिक्तेषु पश्वादिदेहेषु भगवद्भजनयोग्यताभावात्प्राप्ते मनुष्यत्वे
...जनेन मयत्वेतव्यमित्याह दुर्लभमिति ३२ भगवद्भक्तेरिदं स्वभावं श्रुति कथमिति ॥

ए

गी॰भा॰
१९

ऽपरसेवायामिति कर्तव्यतां दर्शयति मन्मानाइति एवं भगवंतं भजमानस्य मम किं स्यादित्याशंक्याह मामेवेति समा
धाय भगवत्सेवेति शेषः एवमात्मानमभिसेतत् हि वृणोति॥ अहंहीति अहमेव परमपदं नत्वेति मत्स एव तत्त्वथाभूतः स
मामेवात्मानमेष्यसीति संबंधः तदेवं मध्यमानां ध्येयं निरूप्य नवमेनाध्यायेनात्मानं ध्यानाभिधानमुखेन निजेन परम

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः ३४ मन्मना मय्येव मनो य
स्य तथाविधस्त्वं मन्मना भव तथा मद्भक्तो भव मद्याजी मद्यजनशीलो भव मामेव च नमस्कुरु मामेवंभूतमीश्वर
मेष्यसि आगमिष्यसि युक्त्वा एवं समाधाय चित्तमेवमात्मानं मां अहं हि सर्वेषां भूतानामात्मा च परा गतिः
परमपदं तं मामेवंभूतमेष्यसीत्यतीतेन पदेन संबंधः मत्परायणः सन्नित्यर्थः ९ इति श्रीमद्भगवद्गीताभा
ष्ये शंकरभगवत्पादकृतौ नवमोऽध्यायः

६१

ऽर्थिके नरूपेण प्रसक्तेन तेनात्मने परमेश्वरस्य परमात्मत्वमभिलषितं मत्तः सोपाधिकं तस्य रूपं अन्निरुपाधिकं च तत्स्वरूपं तत्स्वं
व्याख्याते ३० हरिः ॐ तत्सदिति श्रीपरमहंसपरिव्राजकाचार्यमधुरानंदस्वपादशिष्यस्य श्रीमद्दानेरतानंदविरचितायां
श्रीमद्भगवद्गीताभाष्यटीकायां नवमोऽध्यायः॥ समाप्तः ९ ९ ९

एव
१९२

॥श्रीगणेशायनमः॥ ॥अध्यायद्वयेसिद्धमर्थंसंक्षेपतोऽनुभाषते॥सप्तमइति॥तत्त्वंसोपाधिकंनिरुपाधिकंचविभूत
यःसविशेषनिर्विशेषरूपप्रतिपत्त्युपयोगिन्यनुत्तराध्यायस्यअध्यायद्वयेनसंबंधंवदन्नध्यायांतरमवतारयति॥अथ
ति॥वक्तव्याःसविशेषध्यानेनिर्विशेषप्रतिपत्तौचविशेषत्वेनेतिशेषः॥ननुसविशेषंनिर्विशेषंचभगवतोरूपंप्रागेवतत्र
तत्रोक्तंतत्किमितिपुनरुच्यतेतत्राह॥उक्तमपीति॥यद्यपितत्रतत्रतत्त्वमुक्तंतथापिपुनर्वक्तव्यंदुर्विज्ञेयत्वादितियतोमन्य

हरिःॐ॥ ॥सप्तमेध्यायेभगवतस्तत्त्वंविभूतयश्चप्रकाशितानवमेचाप्यथेदानींयेषुयेषुभावेषुचिंत्योभगवांस्ते॥
भावावक्तव्यास्तत्त्वंचभगवतोवक्तव्यं।उक्तमपिदुर्विज्ञेयत्वादित्यतःश्रीभगवानुवाच॥ ॥भूयएवमहाबाहोशृणु
मेपरमंवचः॥यत्तेहंप्रीयमाणायवक्ष्यामिहितकाम्यया॥१॥भूयएवभूयःपुनःमहाबाहोशृणुमेमदीयंपरमंप्रकृ
ष्टंनिरतिशयवस्तुनःप्रकाशकंवचोवाक्यंयत्परमंतेतुभ्यंप्रीयमाणायमद्वचनात्प्रीयसेत्वमतीवामृतमिवपिबंस्ततो
वक्ष्यामिहितकाम्ययाहितेच्छया॥किमर्थमहंवक्ष्यामीत्यतआह॥नमेविदुःसुरगणाःप्रभवंनमहर्षयः॥अहमादिर्हिदेवा
नांमहर्षीणांचसर्वशः॥२॥छ॥छ

तेऽतइतियोजना॥प्रकृष्टत्वंवचसःस्पष्टयति॥निरतिशयेति॥तदेववचोविशि
नष्टि॥यत्परममिति॥सकृदुक्तेरर्थसिद्धेरसकृदुक्तिरनर्थिकेत्याशंक्याह॥प्रीयमाणायेति॥ततोवक्ष्यामितुभ्यमितिपूर्वे
ंधः॥हितंदुर्विज्ञेयंतत्त्वज्ञानं॥१॥कश्चिदन्योपिपरमंवचोमह्यंवक्ष्यतितेनचममतत्त्वज्ञानंभविष्यतिअतोभगवद्
किंचित्करमितिशंकित्वापरिहरति॥किमर्थमित्यादिना॥छ॥श्रीसीतारामाभ्यांनमः॥छ॥श्रीगोपाल[illegible]॥छ॥छ

इंद्रादयो भृग्वादयश्च भगवत्प्रभवं न विदुरिति सप्रश्नपूर्वकं हेतुमाह ॥ कस्मादिति ॥ निमित्तत्वेनोपादानत्वेन च यतो देवादीनां भगवानेव हेतुरतस्तद्विकारास्तेन तस्य प्रभवं विदुरित्यर्थः ॥ इतश्च कश्चिदेव भगवत्प्रभावं वेत्तीत्याह ॥ किंचेति ॥ कोऽसौ प्रभावो भगवतो यं बहवो न विदुरित्यपेक्षायां पारमार्थिकप्रभावं तद्धीफलं च कथयति ॥ यो मामिति ॥ पदद्वया

न मे विदुर्जानंति सुरगणाः किं ते न विदुर्मम प्रभवं प्रभावं प्रभुशक्त्यतिशयं ॥ अथवा प्रभवं प्रभवनमुत्पत्तिं नापि महर्षयो भृग्वादयो विदुः कस्मात्ते न विदुरित्युच्यते ॥ अहमादिः कारणं हि यस्माद्देवानां महर्षीणां च सर्वशः सर्वप्रकारैः ॥ किंच ॥ यो मामजमनादिं च वेत्ति लोकमहेश्वरं ॥ असंमूढः स मर्त्येषु सर्वपापैः प्रमुच्यते ॥३॥ यो मामजमनादिं च ॥ यस्मादहमादिर्हि देवानां महर्षीणां च न च ममान्य आदिर्विद्यते अतोऽहमजोऽनादिश्च ॥ अनादित्वमजत्वे हेतुस्तं मामजमनादिं च यो वेत्ति विजानाति लोकमहेश्वरं लोकानां महांतमीश्वरं तुरीयमज्ञानतत्कार्यवर्जितं असंमूढः संमोहवर्जितः स मर्त्येषु मनुष्येषु सर्वपापैः सर्वैः पापैः मतिपूर्वामतिपूर्वकृतैः प्रमुच्यते प्रमोक्ष्यते ॥ इतश्चाहं महेश्वरो लोकानां ॥ बुद्धिर्ज्ञानमसंमोहः क्षमा सत्यं दमः शमः ॥ सुखं दुःखं भवोऽभावो भयं चाभयमेव च ॥४॥ ॥ बुद्धिरंतःकरणस्य सूक्ष्माद्यर्थावबोधनसाम

पौनरुक्त्यमाह ॥ अनादित्वमिति ॥३॥ भगवतो लोकमहेश्वरत्वे हेत्वंतरमाह ॥ इतश्चेति ॥ मुमुक्षुभिराराध्यत्वसिद्धये बंधमोक्षसाधनं पुरस्कृत्याशेषजगत्स्रष्टृसन्निधानात्तल्लक्षणं सोपाधिकं भगवत्प्रभावमभिधत्ते ॥ बुद्धिरिति ॥ सूक्ष्मादीत्यादिशब्देन सूक्ष्मतरः सूक्ष्मतमश्चार्थो गृह्यते ॥छ॥ श्रीराम ॥छ॥

उक्तं सामर्थ्यं बुद्धिरियस्मिन्नर्थे प्रसिद्धं प्रमाणयति ।। तद्वंतमिति ।। आत्मादीति तद्बोधवंतं हि ज्ञानिनं वदंति ।। अंतः
करणस्योपशमो विषयेभ्यो व्यावृत्तिरिति शेषः ।। ४ ।। यथाशक्तीति ।। पात्रे श्रद्धया स्वशक्तिमनतिक्रम्यार्थानां देशा

तद्वंतं बुद्धिमानिति हि वदंति ।। ज्ञानमात्मादिपदार्थानामवबोधः ।। असंमोहः प्रत्युत्पन्नेषु बोद्धव्येषु विवे
कपूर्विका बुद्धिप्रवृत्तिः ।। क्षमा आक्रुष्टस्य ताडितस्य वाऽविकृतचित्तता । सत्यं यथादृष्टस्य यथाश्रुतस्य
चात्मानुभवस्य परबुद्धिसंक्रांतये तथैवोच्चार्यमाणा वाक् सत्यमुच्यते । दमो बाह्येंद्रियोपशमः शमोंतःक
रणस्य । सुखमाल्हादः दुःखं संतापो भवउद्भवोऽभावस्तद्विपर्ययः । भयं च त्रासोऽभयमेव च तद्विपरीतं ।।
अहिंसा समता तुष्टिस्तपो दानं यशोऽयशः ।। भवंति भावा भूतानां मत्त एव पृथग्विधाः ।। ५ ।। अहिंसाऽपी
डा प्राणिनां । समता समचित्तता । तुष्टिः संतोषः पर्याप्तबुद्धिर्लाभेषु । तप इंद्रियसंयमपूर्वकं शरीरपीडनं
दानं यथाशक्ति संविभागः । यशो धर्मनिमित्ता कीर्तिः । अयशस्तु अधर्मनिमित्ताऽकीर्तिः । भवंति भावा
यथोक्ता बुद्ध्यादयो भूतानां प्राणिनां मत्त एवेश्वरात् पृथग्विधा नानाविधाः स्वकर्मानुरूपेण ।। किंच ।। छ
महर्षयः सप्त पूर्वे चत्वारो मनवस्तथा ।। मद्भावा मानसा जाता येषां लोक इमाः प्रजाः ।। ६ ।। छ ।। ।। श्री

कालानुरूप्येन प्रतिपादनमित्यर्थः ।। उक्तानां बुद्ध्यादीनां साश्रयाणामीश्वराद् उत्पत्तिं प्रतिजानीते ।। भवंतीति ।। नानाविधत्वे हे
तुमाह ।। स्वकर्मेति ।। कथंचिदपि तेषामात्मातिरेकेणाभावान्मत्त एवेत्युक्तं ।। ५ ।। न केवलं भगवतः सर्वप्रकृतित्वमेव किंतु सर्वज्ञत्व.

।। सर्वेश्वरत्वरूपमधिष्ठातृत्वमपीत्याह ।। किंचेति ।।

[illegible]भृग्वादयोवसिष्ठांताःसर्वज्ञाविद्यासंप्रदायप्रवर्त्तकाः।।तथेतिमनूनामपिपूर्वत्वेनाद्यत्वमनुलक्ष्यते।।केतेमनवस्त
[illegible]।।मनवएवीइतीति।।प्रसिद्धाःपुराणेषुप्रजानांपालकाःस्वयमीश्वराश्चेतिशेषः।।महर्षीणांमनूनांचतुल्यंविशेषणमि
त्याह।।तेचेति।।मयिसर्वज्ञेसर्वेश्वरेगताभावनायेषांतेतथा।भावनाफलमाह।।वैष्णवेनेति।।वैष्णव्याशक्त्याऽधिष्ठितत्वेन
ज्ञानैश्वर्यवंतइत्यर्थः।।तेषांजन्मनोवैशिष्ट्यमाचष्टे।।मानसाइति।।मन्वादीनेवविशिनष्टि।।येषामिति।।विद्ययाजन्मनाचसंत

महर्षयःसप्तभृग्वादयःपूर्वेऽतीतकालसंबंधिनश्चत्वारोमनवस्तथासावर्णाइतिप्रसिद्धास्तेचमद्भावामद्गत
भावनांवैष्णवेनसामर्थ्येनोपेतामानसामनसैवोत्पादितामयाजाताउत्पन्नाः।येषांमनूनांमहर्षीणांचसृष्टि
लोकेइमाःस्थावरजंगमलक्षणाःप्रजाः।।छ।। एतांविभूतिंयोगंचममयोवेत्तितत्त्वतः।।सोऽविकंपेनयो
गेनयुज्यतेनात्रसंशयः।।७।। एतांयथोक्तांविभूतिंविस्तारंयोगंचयुक्तिंचात्मनोघटनं।अथवायोगै
श्वर्यसामर्थ्यंसर्वज्ञत्वंचयोगजंयोगउच्यते।मममदीयंयोवेत्तितत्त्वतस्तत्त्वेन।।छ।। ।।छ।। ।।छ।।

तिभूतानामन्वादीनामस्मिंल्लोकेसर्वाःप्रजाइत्यर्थः।।६।।सोपाधिकंप्रभावंभगवतोदर्शयित्वातज्ज्ञानफलमाह।।एतामिति
बुध्याद्युपादानत्वेनविविधाभूतिर्भवनंवैभवंसर्वात्मकत्वंतदाह।।विस्तारमिति।।ईश्वरस्यतत्तदर्थसंपादनसामर्थ्यंयो
गस्तदाह।।आत्मनइति।।योगस्तत्फलमैश्वर्यंसर्वज्ञत्वंसर्वेश्वरत्वंचयदीयंशक्तिज्ञानलेशमाश्रित्यमन्वाद्योभृग्वादय
श्चेशातेजानतेचतदाह।अथवेति।यथातोविभूतियोगौतथानिरंकुशत्वेनेति।।छ।। ।।छ।। ।।छ।। ।।छ।।

वेदनस्य निरंकुशत्वं दर्शयति ॥ यथावदिति ॥ सोपाधिकज्ञानं निरुपाधिकज्ञानेद्वारमित्याह ॥ सोविकंपेनेति ॥ उक्तेर्थे प्र
तिबंधाभावमाह ॥ नास्मिन्निति ॥ ७ ॥ कथं तावक विभूत्यैश्वर्यज्ञानमुक्तयोगस्य हेतुरिति मत्वा पृच्छति । कीदृशेनेति ॥
उक्तज्ञानमाहात्म्यात्प्रतिष्ठिता भगवन्निष्ठा सिध्यतीत्याह ॥ उच्यत इति ॥ प्रभवत्यस्मादिति प्रभवः सर्वप्रकृतिः । स
र्वात्मेत्याह ॥ उत्पत्तिरिति ॥ सर्वज्ञात्सर्वेश्वरान्मत्तो निमित्तात्सर्गस्थितिनाशादि भवति । मयाचांतर्यामिणा प्रेर्यमाणं

यथावद्वेत्ति सोऽविकंपेनाऽप्रचलितेन योगेन सम्यग्दर्शनस्थैर्यलक्षणेन युज्यते संबध्यते नात्र सं
शयः । नास्मिन्नर्थे संशयोस्ति ॥ छ ॥ कीदृशेनाविकंपेन योगेन युज्यत इत्युच्यते ॥ ॥ अहं सर्वस्य प्र
भवो मत्तः सर्वं प्रवर्त्तते ॥ इति मत्वा भजंते मां बुधा भावसमन्विताः ॥ ८ ॥ अहं परं ब्रह्म वासुदेवाख्यं स
र्वस्य जगतः प्रभव उत्पत्तिर्मत्त एव स्थितिनाशक्रियाफलोपभोगलक्षणं विक्रियारूपं सर्वं जगत्प्रवर्त्त
त इत्येवं मत्वा भजंते सेवंते मां बुधा अवगतपरमार्थतत्वार्थाः भावसमन्विताः भावो भावना परमार्थत
त्वाभिनिवेशः । तेन समन्विताः संयुक्ता इत्यर्थः ॥ छ ॥ छ ॥

सर्वं यथास्वमर्यादामनतिक्रम्य चेष्टते तदाह
प्रभव इति ॥ इत्थं मम सर्वात्मत्वं सर्वप्रकृतित्वं सर्वेश्वरत्वं सर्वज्ञत्वं च महिमानं ज्ञात्वा मय्येव निष्ठावंतो भवंतीत्याह ॥ इ
त्यमिति ॥ संसारासारताज्ञानवतो भगवद्भजनेऽधिकारं द्योतयति ॥ अवगतेति ॥ परमार्थतत्वे पूर्वोक्तरीत्या ज्ञाते
प्रमादरावभिनिवेशाख्यो भवतस्तेन संयुक्तत्वं च भगवद्भजने भवति हेतुरित्याह ॥ भावेति ॥ छ ॥ ८ ॥ छ ॥ छ ॥ छ ॥

नन्वेवं तर्ह्युक्तमेव भगवद्भजनं साधनं साधनांतरं चास्तीत्याह ।। किंचेति ।। ईश्वरात्प्रतीचः प्रागुक्तादन्यत्र चित्तप्रचाररहितं भगवद्भजनोपायमाह । मयीति ।। चक्षुरादीनां भगवत्प्राप्तिस्तदगोचरत्वात्तस्येत्याशंक्याह । मय्युपसंहृतेति ।। भगवदतिरेकेण जीवनेऽप्यनादरस्तदपि मय्येवार्पितं भक्तानामित्याह ।। अथवेति ।। आचार्येभ्यः श्रुत्वा वादकथया परस्परं भगवंतं ब्रह्मचारिणो बोधयंतितदपि भगवद्भजनसाधनमित्याह ।। बोधयंत इति ।। आगमोपपत्ति

किंच मच्चित्ता मद्गतप्राणा बोधयंतः परस्परं । कथयंतश्च मां नित्यं तुष्यंति च रमंति च ।।९।। मच्चित्ता मयि परमेश्वरे चित्तं येषां ते मच्चित्ताः मद्गतप्राणाः मयि गताः प्राप्ताश्चक्षुरादयः प्राणा येषां ते मद्गतप्राणाः मयि उपसंहृतकरणा इत्यर्थः ।। अथवा मद्गतप्राणा मद्गतजीवना इत्येतद्बोधयंतोऽवगमयंतः परस्परमन्योन्यं कथयंतो ज्ञानबलवीर्यादिधर्मैर्विशिष्टं मां तुष्यंति च परितोषमुपयांति । रमंति च रतिं प्राप्नुवंति ।। प्रियसंगत्येव ।। ये यथोक्तप्रकारैर्भजंते मां भक्ताः संतः प्रीतिपूर्वकं ।। तेषां सततयुक्तानां भजतां प्रीतिपूर्वकं । ददामि बुद्धियोगं तं येन मामुपयांति ते ।।१०।। तेषां सततयुक्तानां नित्याभियुक्तानां निवृत्तसर्वबाह्यैषणानां भजतां सेवमानानां ।।

भ्यां भगवंतमेव विशिष्टधर्माणं शिष्येभ्यो गुरवो ह्युपदिशंति तदपि भगवद्भजनमेवेत्याह ।। कथयंत इति ।। भक्तानां तुष्टिरती स्वरसतः स्यातामित्याह ।। तुष्यंतीति ।। मनोरथपूर्त्या रतिप्राप्तौ कामुकसंमतमुदाहरणमाह ।। प्रियेति ।। यदुक्तं सा विकल्पेनेत्यादि तदर्थं भूमिकां कृत्वा तद्दिहानीमुदाहरति ।। ये यथोक्तेति ।। नित्याभियुक्तानामनवरतं भगवत्यैकाग्र्यसंपन्नानामित्यर्थः ।।छ।। ।।छ।। ।।छ।। ।।छ।। ३९५

पुत्रादिलोकत्रयहेतुत्वर्थित्वेन वा गर्भदासत्वेन वा प्रसह्य जीवनोपायसिद्धये वा भजनमिति शंकित्वा दूषयति।। किमित्यादिना
प्रागुक्तां ज्ञानाख्यां भक्तिं स्नेहेन कुर्वतामित्यर्थः।। तेभ्योऽहं तत्त्वज्ञानं प्रयच्छामीत्याह।। ददामीति।। उक्तबुद्धिसंबंधस्य
फलमाह।। येनेति।। ध्यानजन्यप्रकर्षकाष्ठांगतांतःकरणपरिणामे निरस्ताशेषविशेषभगवद्रूपप्राप्तिहेतौ बुद्धियोगे
प्रश्नपूर्वकमुक्तानधिकारिणो दर्शयति।। केत इति।। १०।। भगवत्प्राप्तेर्बुद्धिसाध्यत्वे सत्यनित्यत्वापत्ते स्वं भक्तेभ्यो बुद्धियोगं

।।छ।। किमर्थित्वादिनाकारणेनेत्याह।। प्रीतिपूर्वकं प्रीतिःस्नेहस्तत्पूर्वकं मां भजतामित्यर्थः।। ददामि प्रयच्छामि
बुद्धियोगं बुद्धिः सम्यग्दर्शनं मत्तत्वविषयं तेन योगो बुद्धियोगस्तं बुद्धियोगं।। येन बुद्धियोगेन सम्यग्दर्शनलक्ष
णेन मां परमेश्वरमात्मभूतमात्मत्वेनोपयांति प्रतिपद्यंते। के ते ये मच्चित्तत्वादिप्रकारैर्मां भजंते ते। किमर्थं कस्य वा त्व
त्प्राप्तिप्रतिबंधहेतोर्नाशकं बुद्धियोगं तेषां त्वद्भक्तानां ददासीत्यपेक्षायामाह।। तेषामेवानुकंपार्थमहमज्ञानजं तमः
नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता।।११।। तेषामेव कथं नु नाम श्रेयः स्यादित्यनुकंपार्थं दयाहेतोरहमज्ञा
नजमविवेकतो जातं मिथ्याप्रत्ययलक्षणं मोहांधकारं तमो नाशयामि।।छ।।छ।।

प्र· ५· प्र·

द्दासीत्ययुक्तमिति शंकते।। कि
मर्थमिति।। तेषां बुद्धियोगं किमर्थं ददासीति संबंधः।। भगवत्प्राप्तिप्रतिबंधकनाशको बुद्धियोगस्तेन नास्ति तत्प्राप्तेरनि।।
मित्याशंक्याह।। कस्य वेति।। भक्तानां तत्प्राप्तिप्रतिबंधकं विविच्य दर्शयति।। इत्यपेक्षायामिति।। अविवेकोऽनाद्य
ज्ञानं ततो जातं मिथ्याज्ञानं तदुभयमेकीकृत्य तमो विवक्ष्यते न च तन्नाशकत्वं जडस्य कस्यचित्तदंतर्भूतस्य युक्तं ते नाहं नाशया
।। मीत्युक्तं।।छ

॥०॥
१९५

[illegible] एतन्मस्य जडबुद्धिवृत्तेरिवाज्ञानाद्यनाशकत्वमाशंक्य विशिनष्टि ॥ आत्मेति ॥ तस्याशयस्तन्निष्ठो वृत्तिविशेषो
[illegible]स्य बुद्धिवृत्त्यभिव्यक्तश्चिदात्मा सहायसामर्थ्यादज्ञानादिनिवृत्तिहेतुरित्यर्थः ॥ बुद्धीद्धबोधस्यात्र अज्ञानादिनि
वर्तकत्वमुक्ता बोधेद्धबुद्धेस्तन्निवर्तकत्वमिति पक्षांतरमाह ॥ ज्ञानेति ॥ देहाद्यव्यक्तांतानात्मवर्गातिरिक्तवस्तुगोचरत्व
माह ॥ विवेकेति ॥ भगवत्सिद्धाविहितया भक्त्या तस्य प्रसादोनुग्रहः स एव स्नेहस्तेन सेचनद्वाराऽस्योत्पत्तिमाह ॥ भक्ती
ति ॥ मय्येव भावनायामभिनिवेशो वातस्तेन प्रेरितोऽयं जायते ॥ न हि वातप्रेरणमंतरेण दीपस्योत्पत्तिरित्याह ॥ म

टी॰अ॰
१०

आत्मभावस्थः आत्मनो भावोंऽतःकरणाशयस्तस्मिन्नेव स्थितः सन् ज्ञानदीपेन विवेकप्रत्ययरूपेण भक्ति
प्रसादस्नेहाभिषिक्तेन मद्भावनाभिनिवेशवातेरितेन ब्रह्मचर्यादिसाधनसंस्कारवत्प्रज्ञावर्तिना ॥ विरक्तां
तःकरणाधारेण विषयव्यावृत्तरागद्वेषाऽकलुषितचित्तनिवातापवरकस्थेन ॥ नित्यप्रवृत्तचित्तैकाग्र्यध्या
नजनितसम्यग्दर्शनभास्वता ज्ञानदीपेनेत्यर्थः ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥

द्भावनेति ॥ ब्रह्मचर्यमष्टांगमादिशब्देन शमादिग्रहस्तेन हेतुनाऽऽहितसंस्कारवतीया प्रज्ञा तथाविधवर्तिनिष्ठश्चायं
न हि वर्त्यतिरेकेण दीपो निर्वर्त्यते तदाह ॥ ब्रह्मचर्येति ॥ न चाधारादृते दीपस्योत्पत्तिरदृष्टत्वादित्याह ॥ विरक्तेति ॥ यद्विष
येभ्यो व्यावृत्तं चित्तं रागाद्यकलुषितं तदेव निवातमपवरकं तत्स्थितत्वमस्य दर्शयति ॥ विषयेति ॥ भास्वतेति विशेषणं वि
शदयति ॥ नित्येति ॥ सदातनं चित्तैकाग्र्यं तत्पूर्वकं ध्यानं तेन जनितं सम्यग्दर्शनं फलं तदेव भास्वत्ता तत्पर्यंतेनेत्यर्थः ॥ ते
नाज्ञाने सकार्ये निवृत्ते भगवद्भावः स्वयमेव प्रकाशी भवतीति महाव्याख्यातमेव पदमनुवदति ॥ ज्ञानेति ॥ छ ॥ छ ॥ छ १९६

×सोपाधिकं× निरस्ताशेषविशेषं निरुपाधिकं च सर्वात्मत्वादि भगवतो रूपं तद्धीफलं च श्रुत्वा निरुपाधिकरूपस्य प्राकृतबुध्यनवगा
ह्यत्वोक्तिपूर्वकं मंदानुग्रहार्थं सर्वदा सर्वबुद्धिग्राह्यं सोपाधिकं रूपं विस्तरेण श्रोतुमिच्छन् पृच्छतीत्याह ॥ यथोक्तामिति
परं ब्रह्म भवानिति लक्ष्यनिर्देशात्तस्य लक्षणार्थं परं धामेत्यादि विशेषणत्रयं धामशब्दस्य स्थानवाचित्वं व्यावर्तयन्
व्याचष्टे ॥ तेज इति ॥ तस्य चैतन्यस्य परत्वं जन्मादिराहित्येन कौटस्थ्यं प्रकृष्टं पावनमसंतशुद्धत्वमुच्यते । यदेवं लक्षणं

यथोक्तां भगवतो विभूतिं योगं च श्रुत्वा । अर्जुन उवाच ॥ परं ब्रह्म परं धाम पवित्रं परमं भवान् । पुरुषं शाश्वतं
दिव्यमादिदेवमजं विभुं ॥१२॥ परमं ब्रह्म अक्षरं निरंजनं परं धामं परं तेजः पवित्रं पावनं परमं प्रकृष्टं भवान् पुरु
षं शाश्वतं नित्यं दिव्यं दिविभवं । आदिदेवं सर्वदेवानामादौ भवं देवं अजं विभुं विभवनशीलं ॥ पद्य ॥ ईदृशं ॥ आ
हुस्त्वामृषयः सर्वे देवर्षिर्नारदस्तथा ॥ असितो देवलो व्यासः स्वयं चैव ब्रवीषि मे ॥१३॥ आहुः कथयंति ॥
त्वामृषयो वसिष्ठादयः सर्वे देवर्षिर्नारदस्तथा ॥ असितो देवलोप्येवमेवाह । व्यासश्च स्वयं चैव त्वं चापि ब्रवीषि

गी॰ मू॰

परं ब्रह्म तद्भवानेव नान्य इत्यर्थः । कुतस्त्वमेवमज्ञासीरित्याशंक्याप्तवाक्यादित्याह ॥ पुरुषमिति ॥ दिवि परमे व्योम्नि भवती
दिव्यस्त्वं सर्वप्रपंचातीतं दीव्यति द्योतत इति देवः स चादिः सर्वमूलत्वादत एवाजस्त्वं सर्वगतमाहुरिति संबंधः ॥१२॥
विशेषणं त्वामृषयः सर्वे यस्मादाहुस्तस्मात्तद्वचनात्तवोक्तं ब्रह्मत्वं फलमित्याह ॥ ईदृशमिति ॥ ऋषिग्रहणेन गृहीता
नारदादीनां विशिष्टत्वात्पृथग्ग्रहणं असितो देवलस्य पिता किमन्यैस्त्वं स्वयमेवात्मानमुक्तरूपं मह्यमुक्तवानित्याह ॥ स्व

गी॰ टी॰

ऋषिभिस्त्वया चोक्तत्वादुक्तं सर्वं सत्यमेवेति मममनीषेत्याह ॥ सर्वमिति ॥ किं तदित्याशंक्यात्मरूपमित्याह ॥ यन्मामिति ॥ देवादिभिः सर्वैरुच्यमानतया त्वद्रूपे विशिष्टवस्तुग्रहणमनर्थकमित्याशंक्याह ॥ नहीति ॥ प्रभवो नाम स्वप्रभावो निरुपाधिकस्वभावः ॥ यद्यद्देवादीनामपि दुर्विज्ञेयं तत्त्वरूपं तदा का कथा मनुष्याणामित्यर्थः ॥१४॥ कश्चिद्देवमहता कष्टेनानेकजन्मसंसिद्धो जानाति त्वदनुगृहीतस्त्वद्रूपमित्यभिप्रेत्याह ॥ यत इति ॥ स्वयमेवोपदेशमंतरेणेत्यर्थः ॥ आत्मनात्म

सर्वमेतदृतं मन्ये यन्मां वदसि केशव ॥ न हि ते भगवन्व्यक्तिं विदुर्देवा न दानवाः ॥१४॥ सर्वमेतद्यथोक्तं । ऋषिभिस्त्वया च तदृतं सत्यमेव मन्ये । यन्मां प्रति वदसि भाषसे हे केशव न हि ते तव भगवन् व्यक्तिं प्रभवं विदुः देवा न दानवाः । यतस्त्वं देवादीनामादिरतः ॥ स्वयमेवात्मनात्मानं वेत्थ त्वं पुरुषोत्तम ॥ भूतभावन भूतेश देवदेव जगत्पते ॥१५॥ स्वयमेवात्मनात्मानं वेत्थ जानासि त्वं । निरतिशयज्ञानैश्वर्यबलादिशक्तिमंतमीश्वरं पुरुषोत्तम भूतानि भावयतीति भूतभावनो हे भूतभावन हे भूतेश भूतानामीश हे देवदेव हे जगत्पते ॥छ॥छ॥

स्वत्वेनाविषयतयेतियावत् ॥ आत्मानं निरुपाधिकं रूपं न च तव सोपाधिकमपि रूपमन्यस्य गोचरे तिष्ठतीत्याह ॥ निरतिशयेति ॥ पुरुषश्चासावुत्तमश्चेति ॥ क्षराक्षरातीतपूर्णचैतन्यरूपत्वं संबोधनेन बोध्यते ॥ सर्वप्रकृतित्वं सर्वकर्तृत्वं च कथयति ॥ भूतानीति ॥ सर्वेश्वरत्वमाह ॥ भूतानामिति ॥ उक्तं ते सोपाधिकं रूपं देवादीनामाराध्यत्वमधिगच्छतीत्याह ॥ देवेति ॥ जगतः सर्वस्य स्वामित्वेन पालयितृत्वमाह ॥ जगदिति ॥१५॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥

×स्तो॰ यस्मादस्मद्दृशामगोचरस्तवात्मा जिज्ञासितश्च तस्मात्त्वयैव तद्रूपं वक्तव्यमित्याह॥ वक्तुमिति॥ दिव्यत्वमप्राकृतत्वं॥ संप्रत्यन्वयमन्वाचष्टे॥
आत्मन इति॥ वक्तव्या विभूतीर्विशिनष्टि॥ याभिरिति॥ यद्वारा लोकान्स्वरपिता वर्तसे ता विभूतीरशेषेण वक्तुमर्हसीत्यर्थः॥१६॥ किम
र्थं विभूतीः श्रोतुमिच्छसि इत्याशंक्य ध्यानसौकर्यप्रकारप्रश्नेन फलं कथयति॥ कथमिति॥ योगो नामैश्वर्यं तदस्यास्तीति योगी

वक्तुमर्हस्यशेषेण दिव्या ह्यात्मविभूतयः॥ याभिर्विभूतिभिर्लोकानिमांस्त्वं व्याप्य तिष्ठसि॥१६॥ वक्तुं कथयितुं अर्हसि अशेषे
ण दिव्या ह्यात्मविभूतयः॥ आत्मनो विभूतय आत्मविभूतयो यास्ताः वक्तुमर्हसि याभिर्विभूतिभिरात्मनो माहात्म्यविस्तरैरि
मान् लोकान् त्वं व्याप्य तिष्ठसि॥५॥ कथं विद्यामहं योगिंस्त्वां सदा परिचिंतयन्॥ केषु केषु च भावेषु चिंत्योसि भगवन्मया॥१७॥
कथं विद्यां विजानीयां अहं हे योगिन्॥ तां सदा परिचिंतयन् केषु केषु च भावेषु वस्तुषु चिंत्योऽसि ध्येयोसि भगवन्मया॥ विस्तरे
णात्मनो योगं विभूतिं च जनार्दन॥ भूयः कथय तृप्तिर्हि शृण्वतो नास्ति मेऽमृतं॥१८॥ विस्तरेणात्मनो योगं योगैश्वर्यंश
॥ किं विशेषं विभूतिं विस्तारं ध्येयपदार्थानां हे जनार्दन॥ अर्दतेर्गतिकर्मणो रूपं॥५॥५॥श्री॥

च १

हे योगिन् अहं स्थूलविष्टमतिस्त्वां केन प्रकारेण संततमनुसंदधानो विशुद्धबुद्धिर्भूत्वा निरुपाधिकं त्वां विजानीयामिति प्रश्नः प्रश्नांतरं प्रस्तौ
ति॥ केषु केष्विति॥ चेतनाचेतनभेदादुपाधिबहुत्वाच्च बहुवचनं॥१७॥ प्रकृतं प्रश्नमुपसंहरति॥ विस्तरेणेति॥ ५॥ ५॥ ५॥

गी॰भा॰टी॰
३७

अर्द्दतेर्गतिकर्मणो जनार्द्दनेति रूपं तद्व्युत्पादयति ॥ असुराणामिति ॥ प्रकारांतरेण शब्दार्थं व्युत्पादयति ॥ अभ्युदयेति ॥ ननु पूर्वमेव सप्तमे नवमे
ऽध्याये विभूतिरैश्वर्यं चेश्वरस्य दर्शितं ॥ तत्किमिति श्रोतुमिष्यते तत्राह ॥ भूय इति ॥१८॥ अमृतममृतं प्राप्य इव सर्वः ॥ प्रस्तारं विश्रंभयितुं भ
गवानुक्तवानित्याह ॥ भगवानिति ॥ हंत ते स्वनुमतिं ॥ व्यावर्त्य जिज्ञासावधिर्नं कालं दर्शयति ॥ इदानीमिति ॥ दिविभवत्वमप्राकृतत्वम
स्मरणगोचरत्वं ॥ वाक्यान्वयं घोतयति ॥ यावतामिति ॥ सर्वविभूतीनां वक्तव्यत्वप्रसक्तावुक्ते ॥ यत्रेति ॥ किमित्यनवशेषतो विभूतयो नोच्यंते

असुराणां देवप्रतिपक्षजनानां प्राणवियोगनरकादिगमयितृत्वात् ॥ जनार्दन ॥ अभ्युदयनिःश्रेयसपुरुषार्थप्रयोजनं सर्वै
र्जनैर्याच्यमानत्वाद्वा ॥ भूयः पूर्वमुक्तमपि कथय ॥ तृप्तिः परितोषो हि यस्मान्नास्ति मे शृण्वतः त्वन्मुखनिःसृतं वाक्यामृ
तं ॥ श्रीभगवानुवाच ॥ हंत ते कथयिष्यामि दिव्या ह्यात्मविभूतयः ॥ प्राधान्यतः कुरुश्रेष्ठ नास्त्यंतो विस्तरस्य मे ॥१९॥ हंतेर
दानीं ॥ ते तव दिविभवा हि दिव्या आत्मविभूतयः आत्मनो मम विभूतयो यास्ताः कथयिष्यामीत्येतन्न ॥ प्राधान्यत इति यत्र प्रधा
नाया या विभूतिस्तासां प्रधानां प्राधान्यतः कथयिष्याम्यहं हे कुरुश्रेष्ठ अशेषतस्तु वर्षशतेनापि न शक्या वक्तुं यतो ना
॥ स्त्यंतो विस्तरस्य मे मम विभूतीनामित्यर्थः ॥ तत्र प्रथमममे वनावत्त् शृणु ॥२०॥

अ॰ १०॥
१९८॥ रामः॥

अशेषतस्त्विति ॥ तत्र हेतुः ॥ यत इति ॥१९॥ विभूतिप्रदर्शने प्रसक्ते सत्याप्तावेव पारमार्थिकं परमेश्वरं रूपं श्रोतुं अर्जुनस्य मनःसमाधानमर्थ
यते ॥ तत्रेति ॥ सोपाधिकमपि कात्म्यनिकं परस्परूपं पश्चाद्वक्ष्यमाणं श्रोतुं चित्तसमाधानं कर्तव्यमेवेत्याह ॥ तावदिति ॥२०॥ श्रीरामः ॥२०॥

आशेरतेअस्मिंन्नविद्याकर्मपूर्वप्रज्ञारत्याशयोहृदयंसर्वेषांभूतानांहृदयंतःस्थितोयः प्रत्यगात्मा सोहमेवेतिवाक्यार्थमाह॥ सर्वेषामिति॥
यस्तुमंदोमध्यमोवापरमात्मानमात्मत्वेनध्यातुंनाशक्तंतंप्रत्याह॥ तदशक्तेनेति॥ वक्ष्यमाणादित्यादिषु परस्यन ध्येयत्वमन्यदेवकारणं
किंचित्त्वन तत्रध्येयमित्याशंक्याह॥ यस्मादिति॥ सर्वकारणत्वेनसर्वज्ञत्वेनसर्वेश्वरत्वेनचपरस्यध्येयत्वमत्रेएवंनत्वस्यस्पक

अहमात्मागुडाकेशसर्वभूताशयस्थितः॥ अहमादिश्चमध्यंचभूतानामंतएवच॥२०॥ अहमात्मा प्रत्यगात्मा। गुडाकेश गुडाका निद्रा
तस्याईशोगुडाकेशोजितनिद्रस्त्वमर्थः॥ घनकेशइतिवा॥ सर्वेषांभूतानामाशयेंतर्हृदि स्थितो नित्यंध्येयस्तदशक्तेनेतरेषुभावेषुचिंत्यो
हंचिंतयितुंशक्योहं॥ यस्मादहमेवादिर्भूतानांकारणंतथाचमध्यंचस्थितिरंतःप्रलयश्चएं~~नंचस्थितिरंतःप्रलयश्चं~~॥ एवंचध्येयोहं॥
आदित्यानामहंविष्णुर्ज्योतिषांरविरंशुमान्॥ मरीचिर्मरुतामस्मिनक्षत्राणामहंशशी॥२१॥ आदित्यानांद्वादशादित्यानांविष्णुर्नामादित्यो
ऽहंज्योतिषांरविः प्रकाशयितॄणांअंशुमान्रश्मिवान्॥ मरीचिर्नाममरुतांमरुद्देवताभेदानामस्मिनक्षत्राणामहंशशीचंद्रमाः॥ वे
दानांसामवेदोस्मिदेवानामस्मिवासवः॥ इंद्रियाणांमनश्चास्मिभूतानामस्मिचेतना॥२२॥ श्रीरामचंद्रायनमः॥५॥५॥

प्यचित्कारणस्यादित्यादिषुध्येयत्वेनेत्यर्थः॥२०॥ उक्तध्यानाशक्तेभ्यो व्यस्तांविभूतियोगंउपदिशति॥ एवंचेति॥ नतत्रतत्रप्रधानत्वेनपरस्प
पत्वमेवंशास्त्रार्थमेवदर्शयति॥ आदित्यानामित्यादिना॥ ५॥ श्रीरामकृष्णायवासुदेवायनमोनमः॥ श्रीजगन्नाथायनमः॥ ५

गी॰भा॰टी॰
१९९॥

कृत्स्नं च ब्राह्मणसमुदायानाम् ऋगादीनां मध्ये सामवेदोऽस्मीति ध्यानांतरमुदाहरति॥ वेदानामिति॥ संघाते जीवाधिष्ठिते यावलंचत्वं सर्वत्र व्यापि-
नी चैतन्याभिव्यंजिके विशेषः॥२३॥ पुरोहितेषु बृहस्पतेर्मुख्यत्वे हेतुमाह॥ स हीति॥२४॥ एकमित्योंकारस्य ब्रह्मप्रतीकत्वेन ~~तंदर्शिंभांत~~
त्वेनं तदभिधानत्वेन च प्राधान्यमुच्यते॥ जपयज्ञस्य यज्ञांतरेभ्यो हिंसादिराहित्येन प्राधान्यमुपेत्याह॥ यज्ञानामिति॥ शिख-

वेदानां मध्ये सामवेदोऽस्मि देवानां रुद्रादित्यादीनां वासव इंद्रोऽस्मि॥ इंद्रियाणामेकादशानां मनश्चास्मि भूतानामस्मि चेतना कार्यकरणसंघा-
ते अभिव्यक्ता बुद्धेर्वृत्तिश्चेतना॥ रुद्राणां शंकरश्चास्मि वित्तेशो यक्षरक्षसां॥ वसूनां पावकश्चास्मि मेरुः शिखरिणामहं॥२३॥ रुद्राणा-
मेकादशानां शंकरश्चास्मि॥ वित्तेशः कुबेरो यक्षरक्षसां यक्षाणां रक्षसां च॥ वसूनामष्टानां पावकश्चास्मि अग्निः मेरुः शिखरि-
णामहं शिखरवतां॥ पुरोधसां च मुख्यं मां विद्धि पार्थ बृहस्पतिं॥ सेनानीनामहं स्कंदः सरसामस्मि सागरः॥२४॥ पुरोधसां रा-
जपुंजं पुरोहितानां मुख्यं प्रधानं मां विद्धि हे पार्थ बृहस्पतिं॥ स हि इंद्रस्येति मुख्यः स्यात्पुरोधाः॥ सेनानीनां सेनापतीनां अहं स्कं-
दो देवसेनापतिः॥ सरसां यानि देवखातानि सरांसि तेषां मध्ये सागरोऽस्मि भवामि॥ महर्षीणां भृगुरहं गिरामस्म्येकमक्षरं॥
यज्ञानां जपयज्ञोऽस्मि स्थावराणां हिमालयः॥२५॥ महर्षीणां भृगुरहं गिरां वाचां पदलक्षणानां एकमक्षरमोंकारोऽस्मि यज्ञानां ज-
॥ पयज्ञोऽस्मि स्थावराणां स्थितिमतां हिमालयः॥ ५॥

अ॰१०॥
१९९॥ रामः॥

खवतां उच्छ्रितानां पर्वतानां मध्ये मेरुरहमित्युक्तेपि स्थितिशीलानां तेषामेव हिमवान्पर्वतराजोऽस्मीसर्थभेदं गृहीत्वाह॥ स्थितिमतामिति॥२५॥
२१

सर्ववृक्षाणामित्यत्र सर्वशब्देन वनस्पतयोपि गृह्यंते ॥२६॥ प्रजनयतीति सुतस्तिमाभिसाह ॥ प्रजनश्चिह्नेति ॥२८॥ सर्पानागाश्च जातिभेदाद्विवंते ॥२९

अश्वत्थः सर्ववृक्षाणां देवर्षीणां च नारदः ॥ गंधर्वाणां चित्ररथः सिद्धानां कपिलो मुनिः ॥२६॥ अश्वत्थः सर्ववृक्षाणां देवर्षीणां च नार
दः देवा एव संत ऋषित्वं प्राप्ता मंत्रदर्शित्वात्ते देवर्षयस्तेषां नारदोऽस्मि ॥ गंधर्वाणां हाहाहूहूप्रभृतीनां चित्ररथो नाम गंधर्वोऽ
स्मि ॥ सिद्धानां जन्मनैव धर्मज्ञानवैराग्यैश्वर्यातिशयं प्राप्तानां कपिलो मुनिँ उच्चैश्रवसमश्वाँ विद्धि माममृतोद्भवं ॥ ऐराव
तं गजेंद्राणां नराणां च नराधिपं ॥२७॥ उच्चैःश्रवसमश्वानां उच्चैःश्रवा नामाश्वस्तं मां विद्धि जानीहि अमृतोद्भवं । ऐरावत
मिरावत्सा अस्त्यं गजेंद्राणां हस्तीश्वराणां तं मां विद्धीत्यनुवर्तते नराणां च मनुष्याणां नराधिपं राजानं विद्धि जानीहि ॥ आयुधा
नामहं वज्रं धेनूनामस्मि कामधुक् ॥ प्रजनश्चास्मि कंदर्पः सर्पाणामस्मि वासुकिः ॥२८॥ आयुधानामहं वज्रं दधीचेरस्थि
संभवं ॥ धेनूनां दोग्ध्रीणामस्मि कामधुक् वसिष्ठस्य सर्वकामानां दोग्ध्री सामान्या वा कामधुक् ॥ प्रजनः प्रजनयिता चास्मि
कंदर्पः कामः सर्पाणां सर्पभेदानामस्मि वासुकिः सर्पराजः ॥ अनंतश्चास्मि नागानां वरुणो यादसामहं । पितॄणामर्यमा चास्मि
यमः संयमतामहं ॥२९॥ अनंतो नाम चास्मि नागानां नागभेदानां नागराजः वरुणो यादसामहमब्देवतानां राजाहं । पितॄणा
मर्यमा नाम पितृराजश्चास्मि ॥ यमः संयमतां संयमनं कुर्वतामहं ॥ श्रीरामचंद्राय नमः ॥ श्रीगुरुमुनिभ्यो नमः ॥ ५४॥

प

ना

अहमात्मा दिश्यश्वसादादानुक्रमेणैव पुनरिहोच्यते तथा च पुनरुक्तिरित्याशंक्याह ॥ अनंतानामिति ॥ सर्पशब्देन सर्प्यं तद्दति सर्पाणि कार्याणि गृ
॥ ह्यंते ॥ ५५॥

गी॰भा॰टी॰
२००॥

अध्यात्मविद्येत्यात्मन्यंतःकरणपरिणतिरं विद्यानिवर्तिका गृहीना॥ प्रवदतांसंबंधीवादोवीतरागकथानतत्त्वनिर्ण

प्रल्हादश्चास्मिदैत्यानांकालःकलयतामहं॥म्रगाणांचम्रगेंद्रोऽहंवैनतेयश्चपक्षिणां॥३०॥प्रल्हादोनामचास्मिदैत्या
नांदितिवंश्यानां॥कालःकलयतांकलनंगणनंकुर्वतामहं॥म्रगाणांचम्रगेंद्रःसिंहोव्याघ्रोवाहं॥वैनतेयश्चगरुत्मा
न्विनतासुतःपाक्षिणांपतत्रिणां॥पवनःपवतामस्मिरामःशस्त्रभ्रतामहं॥झषाणांमकरश्चास्मिस्रोतसामस्मिजान्ह
वी॥३१॥पवनोवायुःपवतांपावयित्रृणांअस्मि।रामः।शस्त्रभ्रतांऽमहं।शस्त्राणांधारयित्रृणांदाशरथीरामोऽहं।झषाणांम
त्स्यादीनांमकरोनामजातिविशेषःस्रोतसांस्रवंतीनांअस्मिजान्हवीगंगा॥सर्गाणामादिरंतश्चमध्यंचैवाहमर्जुनंअध्यात्म
विद्या[illegible]विद्यानांवादःप्रवदतामहं॥३२॥सर्गाणांस्रष्टीनांआदिरंतश्चमध्यंचैवाहंउत्पत्तिस्थितिलयाअहमर्जुन।
भ्रतानांजीवाधिष्ठितानामहमेवादिरंतश्चेसाघक्रमुपक्रमे॥इहतुसर्वस्यैवसर्गमात्रस्येतिविशेषः।अध्यात्मविद्यावि
द्यानांमोक्षार्थत्वात्प्रधानाहमस्मिवादोऽर्थनिर्णयहेतुत्वात्प्रवदतांप्रधानमतःसोऽहमस्मि।प्रवक्तृद्वारेणवदनभेदाना
मेववादजल्पवितंडानामिहग्रहणंप्रवदतामिति॥छ॥श्रीरामकृष्णायनमः॥श्रीसच्चिदानंदायनमः॥छ॥

म

आ॰१०॥
२००रामः

पावसानायक्ताप्रवदतामितिलक्षणयाकथाभेदोपादानंतदानिर्धारणेषष्ठीसाह॥प्रव॰क्तृनि॥३०॥श्रीरामायनमः॥छ॥

सर्वहरशब्दस्यमुख्यमर्थांतरमाह॥अथवेति॥३३॥भाविकल्याणानामित्युक्तमेवस्पष्टयति॥उत्कर्षेति॥कीर्तिर्धार्मिकत्वनिमित्ताख्या
ति:॥श्रीर्लक्ष्मी:कांति:शोभावाग्वाणीसर्वस्यप्रकाशिकास्मृतिश्चिरानुभूतस्मरणशक्ति:मेधा ग्रंथधारणशक्ति:॥धृतिर्धै
र्यंक्षमामानावमानयोरविकृतचित्तता॥स्त्रीषुकीर्त्यादीनामुत्तमत्वमुपपादयति॥यासामिति॥श्रीरामचंद्रायनम:॥८५॥

अक्षराणामकारोस्मिद्वंद्व:सामासिकस्यच॥अहमेवाक्षय:कालोधाताहंविश्वतोमुख:॥३॥अक्षराणामकारोवर्णे
स्मिद्वंद्व:समासोऽस्मिसामासिकस्यचसमाससमूहस्य:किंच॥अहमेवाक्षयोऽक्षीण:काल:प्रसिद्ध:क्षणाद्या
ख्यअथवापरमेश्वर:कालस्यापिकालोस्मिधाताहंकर्मफलस्यविधाता॥सर्वस्यजगतोविश्वतोमुख:सर्वतोमुख:॥
मृत्यु:सर्वहरश्चाहमुद्भवश्चभविष्यतां॥कीर्ति:श्रीर्वाक्चनारीणांस्मृतिर्मेधाधृति:क्षमा॥३४॥मृत्युर्द्विविधोधनादि
हर:प्राणहरश्चसर्वहरउच्यतेसोऽहमित्यर्थ:अथवापर:ईश्वर:प्रलयेसर्वहरणात्सर्वहर:सोऽहमुद्भवश्चउत्क
र्षोऽभ्युदयस्तत्प्राप्ति:हेतुश्चाहं॥केषांभविष्यतांभाविकल्याणानामुत्कर्षप्राप्तियोग्यानामित्यर्थ:कीर्ति:श्रीर्वाक्च
नारीणांस्मृतिर्मेधाधृति:क्षमाइत्येताउत्तमा:स्त्रीणामहमस्मि॥यासामाभासमात्रसंबंधेनापिलोक:कृतार्थमात्मानंमन्य
ते॥बृहत्सामतथासाम्नां[illegible]गायत्रीछंदसामहं॥मासानांमार्गशीर्षोहमृतूनांकुसुमाकर:॥३५॥बृहत्सामतथासाम्नांप्र

धानमस्मिगायत्रीछंदसामहं॥

त

३४॥वेदानांसामवेदोस्मीत्युक्तंतत्रावांतरविशेषमाह॥बृहत्सामेति॥छंदसांमध्येगायत्रीनामयच्छंदस्तदहमित्युक्तं॥८६॥श्रीरामायनम:॥श्री

१०भा०टी०
०१॥

वृंहत्साम्न। व्यतिरेकेणस्वरूपाभावादित्याशंक्याह ॥ गायत्र्यादीति ॥ द्विजातेर्द्वितीयजन्मनि जननीत्वादित्यर्थः ॥ मार्गशीर्षो मृगशीर्षेणयु
क्तपौर्णमास्यस्मिन्निति मार्गशीर्षो मासः सोहं पक्वसस्याढ्यत्वादित्याह ॥ मासानामिति ॥ वसंतो रमणीयत्वादिति शेषः ॥३५॥ यत्तन्मुक्तं के

गायत्र्यादिछंदोविशिष्टानां ऋचां या गायत्री ऋक् तन्नामाहमित्यर्थः ॥ मासानां मार्गशीर्षोहमृतूनां कुसुमाकरो वसंतः ॥ द्यूतंछ
लयतामस्मि तेजस्तेजस्विनामहं ॥ जयोस्मि व्यवसायोस्मि सत्वं सत्ववतामहं ॥३६॥ द्यूतं अक्षदेवनादिलक्षणं छलयतां छ
लस्यकर्तृणां अस्मि। तेजस्तेजस्विनामहं ॥ जयोस्मि जेतृणां। व्यवसायोस्मि व्यवसायिनां ॥ सत्वं सत्ववतां सात्विकानामहं ॥ वृ
ष्णीनां वासुदेवोऽस्मि पांडवानां धनंजयः ॥ मुनीनामप्यहं व्यासः कवीनामुशना कविः ॥३७॥ वृष्णीनां वासुदेवोस्मि ॥
उभयमेवाहं त्वत्सखा वासुदेवः पांडवानां धनंजयस्त्वमेव ॥ मुनीनां मननशीलानां सर्वपदार्थज्ञानामप्यहं व्यासः ॥ कवीनां क्रां
तदर्शिनां उशना कविरस्मि ॥३७॥ श्रीरामचंद्राय नमः ॥ वासुदेवाय नमः ॥ सदासीवाय नमः ॥ नरहरिप्रसादाय नमः ॥

अ०१०॥
२०१॥ रामः॥

क्षणं सर्वस्वापहारकारणमन्यापदेशो ॥ न पराभिप्रेतं ॥ निघ्नतां स्वामिप्रेतेन वा संपादयतामित्याह ॥ छलस्येति ॥ तेजोऽप्रतिहताज्ञाउ
त्कर्षो विजयः ॥ व्यवसायः ॥ फलहेतुरुद्यमः ॥ धर्मज्ञानवैराग्यादि सत्वकार्यं सत्वं ॥३६॥ उशनाः शुक्रः कविशब्दोत्र यौगिको न रूढः
॥ पौनरुक्त्यात् ॥३७॥ श्रीरामाय नमः ॥

अदांतानुत्पथान्पथिप्रवर्तयतां दंडोऽहं उत्पथप्रवृत्तौ निग्रहहेतुरित्यर्थः ।। नीतिर्न्यायो धर्मस्य जयोपायस्य प्रकाशकः ।। मौनं वाचोयमत्वमुत्तमा
वाचतुर्थाश्रमप्रवृत्तिः ।। श्रवणादिद्वारापरिपक्वसमाधिजन्यं सम्यग्ज्ञानं ज्ञानं ।। ३८ ।। जाड्यमात्रप्रतिबिंबितं चैतन्यं बीजं किमितिस्थावरं

दंडो दमयतामस्मि नीतिरस्मि जिगीषतां ।। मौनं चैवास्मि गुह्यानां ज्ञानं ज्ञानवतामहं ।। ३८ ।। दंडो दमयतां दमयितॄणां अस्मि ।
अदांतानां दमनकारणं ।। नीतिरस्मि जिगीषतां जेतुमिच्छतां मौनं चैवास्मि गुह्यानां गोप्यानां ।। ज्ञानं ज्ञानवतामहं ।। यच्चापि
सर्वभूतानां बीजं तदहमर्जुन ।। न तदस्ति विना यत्स्यान्मया भूतं चराचरं ।। ३९ ।। यच्चापि सर्वभूतानां बीजं प्ररोहकारणं तदह
मर्जुन ।। प्रकरणोपसंहारार्थं विभूतिसंक्षेपमाह ।। न तदस्ति भूतं चराचरं चरमचरं वा मया विना यत्स्यात् भवेत् ।। मया
अपकृष्टं निरात्मकं शून्यं हि तत्स्यात् ।। अतो मदात्मकं सर्वमित्यर्थः ।। ५ ।। श्रीरामकृस्नायनमः ।। गुरमुर्तीयनमः ।।

जंगमं वा त्वदतिरेकेण न भवतीत्यत्राह ।। मयेति ।। तस्यापि स्वरूपेण सत्त्वमाशंक्योक्तं ।। शून्यं हीति ।। आत्मनोपकर्षादित्यर्थः ।। ०
मयैव सच्चिदानंदस्वरूपेण सर्वस्य सिद्धेरित्यतः ।। शब्दार्थः ।। ३९ ।। श्रीरामजयरामजयजयराम ।। श्रीकृस्नायनमः ।। ५ ।। ०

गी० भा० टी०
०२

दिव्यानांविभूतीनांपरिमितत्वशंकांवारयति॥नेत्यादिना॥तदेवोपपादयतिनहीति॥कथंतर्हिविभूतेर्विस्तरोदर्शितस्तत्राह॥एष
इति॥४०॥अनुक्ताअपिपरस्यविभूतीःसंगृहीतुंलक्षणमाह॥यद्यदिति॥वस्तुप्राणिजातं॥श्रीमत्समृद्धिमद्वाशोभावद्वा

नांतोऽस्तिममदिव्यानांविभूतीनांपरंतप॥एषतूद्देशतःप्रोक्तोविभूतेर्विस्तरोमया॥४०॥नांतोऽस्तिममदिव्यानांवि
भूतीनांविस्तराणांपरंतप॥नहीश्वरस्यसर्वात्मनोदिव्यानांविभूतीनांइयत्ताशक्यावक्तुंज्ञातुंवाकेनचित्॥एषतूद्देशत
एकदेशेनप्रोक्तोविभूतेर्विस्तरोमया॥४०॥यद्यद्विभूतिमत्सत्त्वंश्रीमदुर्जितमेववा॥तत्तदेवावगच्छत्वंममतेजोंऽशसंभवं भू ५
॥४१॥यत्यत्लोकेविभूतिमत्विभूतियुक्तंसत्त्वंवस्तुश्रीमदूर्जितमेववा॥श्रीर्लक्ष्मीस्तयासहितंश्रीमतदूर्जितमेव
वा॥उत्साहोपेतंवातत्तदेवावगच्छत्वंजानीहि॥ममेश्वरस्यतेजोंऽशसंभवंतेजसोंऽशएकदेशःसंभवोयस्यतत्तेजों
॥ऽशसंभवमित्यवगच्छत्वं॥४१॥

कांतिमद्वासप्राणंबलवदूर्जितंतदाह॥उत्साहेति॥संभवत्यस्मादितिसंभवस्तेजसश्चैतन्यस्येश्वरशक्तेर्वांशस्तेजोंशः॥
ससंभवोऽस्येतितेजोंशसंभवंतदाह॥तेजसइति॥४१॥श्रीरामकृष्णायनमः॥श्रीविश्वेश्वरायनमः॥४१॥४१॥

आ१०॥
२०२ रामः

सर्वेषांसुगमत्वायावयवशोविभूतिमुक्त्वा शक्त्यानुग्रहार्थंसाकल्येननामाह ॥ अथवेति ॥ पक्षांतरपरिग्रहार्थमथवेत्युक्तं ॥ बहुना विस्ती
र्णेनैतेनज्ञातेनसावशेषेणनवशात्कस्यनकिंचित्फलंस्यादित्याह ॥ बहुनेति ॥ नहिविस्तुनिष्फलासुज्ञातासुचसर्वज्ञायतनेकासांचिदेवविभूती

न

अथवाबहुनैतेनकिंज्ञातेनतवार्जुन ॥ विष्टभ्याहमिदंकृत्स्नमेकांशेनस्थितोजगत् ॥४२॥ इतिअथवाबहुनाएतेनैवमादिना
किंज्ञातेनेनतवार्जुनस्यात् ॥ सावशेषेण अशेषेनत्वमिमसुच्यमानमर्थंशृणु विष्टभ्यविशेषतःस्तंभनंकृत्वा ॥ इदंकृत्स्नंजगत्
एकांशेनैकावयवत्वेनएकपादेनसर्वभूतस्वरूपेणास्येनेनत् ॥४२॥

नामुक्तत्वादित्यर्थः ॥ नहिकेनोपदेशेनाल्पाक्षरेणसर्वोऽर्थोज्ञातुंशक्यनेनत्राह ॥ अशेषेनइति ॥ विशेषतःस्तंभनंविधारणंसर्वभूतस्वरूपेणस
र्वप्रपंचोपादानशक्त्युपाधिकेनैकेनपादेनकृत्स्नंजगद्विधृत्यस्थितोऽस्मीतिसंबंधः ॥ श्रीरामकृष्णायनमः ॥ श्रीगुरुसरस्वत्यैनमः ॥४२॥४०॥

गी०भा०टी०
२०३।।

तत्रैवस्फुरितं प्रमाणयति।। तथाचेति।। तदनेन भगवता नानाविधाविभूतीर्ध्येयत्वेन ज्ञेयत्वेनचोपदिश्य तं सर्वं प्रपंचात्मकं ध्येयरूपं दर्शि
त्वा त्रिपादस्यामृतं दिवीति प्रपंचातीतं निरुपाधिकं तत्त्वमुपदिशता पारिशेष्यात् सच्चिदानंदैकतानं सत्यं तत्पदलक्ष्यार्थो निर्धारि

तथाचमंत्रवर्णः पादोऽस्यविश्वाभूतानिंस्थितोजगदिति।।
इतिश्रीगीताभाष्येशंकरभगवत्पादकृतौदशमोध्यायः।।१०।।

आ१०
२०३।।रामः

तः।।४२।। हरिः ॐ तत्सदिति श्रीपरमहंसपरिव्राजकाचार्यश्रीमच्छुद्धानंदभगवत्पूज्यपादशिष्यश्रीमदानंदज्ञानविरचितायां श्रीमद्भ
गवद्गीताभाष्यटीकायां दशमोध्यायः समाप्तः।। ॐ तत्सत् ब्रह्मार्पणमस्तु।। श्रीरामकृष्णार्पणमस्तु।। ।। छ।। ।। छ।। श्री।।

॥श्रीगणेशाय नमः॥ ॐ नेननेनात्मनाभगवदनुसंधानार्थउक्ताविभूतीरनुवादति॥ भगवन्नइति॥ परस्य सोपाधिकं नि
रुपाधिकं च रूपं ध्येयत्वेन ज्ञेयत्वेन चोक्तमित्यर्थः॥ सोपाधिकमैश्वरं रूपमशेषजगदात्मकं विश्वरूपाख्यमधिकृत्या
ध्यायांतरमवतारयन्ननंतरप्रश्नोपयोगित्वेन वर्णनं कीर्तयति॥ नत्रचेति॥ यदेतदशेषप्रपंचात्मकमखिलस्यैन

ॐ हरिः ॐ॥ भगवतो विभूतय उक्तास्तत्र च विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगदिति भगवताभिहितं॥
श्रुत्वा यज्जगदात्मस्वरूपमाद्यमैश्वरं तत्साक्षात्कर्तुमिच्छन्नर्जुन उवाच॥ मदनुग्रहाय परमं गुह्यमध्यात्मसं
न ज्ञितं यत्त्वयोक्तं वचस्ते मोहोयं विगतो मम॥१॥ मदनुग्रहाय ममानुग्रहार्थं। परमं निरतिशयं गुह्यं गोप्यमध्यात्मसं
ज्ञितं आत्मानात्मविवेकविषयं निरतिशयं ज्ञानैश्वर्यशक्तिबलवीर्यतेजोभिः पैसं च वैश्वावरूपविषयं यत्त्व
योक्तं॥ वचो वाक्यं तेन वचसा मोहोयं विगतो मम अविवेकबुद्धिरपगता ममेत्यर्थः॥ श्रीरामाय नमः॥ ॥

स्य कारणं सर्वज्ञं सर्वैश्वर्यवद्रूपमुक्तं तदिदं श्रुत्वा तस्य साक्षात्कारं पियासिषुरादौ पप्रछवानित्याह॥ श्रुत्वेति॥ मयि करु
णानिमित्तीकृत्योपकारोऽनुग्रहस्तदर्थमिति वचसो विशेषणं निरतिशयत्वं परमपुरुषार्थसाधनत्वं अशोच्यानित्या
दित्वं पदार्थप्रधानं वाक्यं मोहः सोऽयमित्यात्मसाक्षिकत्वं दर्शयति॥ अविवेकबुद्धिरज्ञानविपर्यासात्मिका॥ १॥८॥
मोहइति

गी० भा० टी०

सप्तमादारभ्य नवमदशार्थनिर्णयार्थमपि भगवदुक्तं वचो मया श्रुतमित्याह ॥ किंचेति ॥ त्वत्तो भूतानामुत्पत्तिप्रलयौ त्वत्तः श्रुतावि
वं बध्यते ॥ महात्मनस्तव भावो माहात्म्यं पारमार्थिकं सोपाधिकं वा सर्वात्मत्वादिरूपं श्रुतमिति परिणम्यानुवर्तितं चो
॥ चितुमपि चेत्युक्तं ॥ २ ॥ त्वदुक्तेर्थे विश्वासाभावान्नन स्मिँ दिदृक्षा किंतु कृतार्थं बुभूषयेत्याह ॥ एवमेतदिति येन प्रकारे

किंच ॥ भवाप्ययौ हि भूतानां श्रुतौ विस्तरशो मया ॥ त्वत्तः कमलपत्राक्ष माहात्म्यमपि चाव्ययं ॥ २ ॥ भव उत्पत्तिरप्ययः प्रलयो भूता
नां तौ भवाप्ययौ श्रुतौ विस्तरशो न संक्षेपतो मया त्वत्तः ॥ त्वत्सकाशात् कमलपत्राक्ष मलस्य पत्रं कमलपत्रं तद्वदक्षिणी यस्य
नवसत्वं कमलपत्राक्षः हे कमलपत्राक्ष ॥ माहात्म्यं महात्मनो भावो माहात्म्यं ॥ अपि चाव्ययमक्षयं श्रुतमित्यनुवर्तते ॥ •
एवमेतद्यथात्थ त्वमात्मानं परमेश्वर ॥ द्रष्टुमिच्छामि ते रूपमैश्वरं पुरुषोत्तम ॥ ३ ॥ एवमेतत्त्वमात्थ यथा यथा येन प्रकारेण आत्म
कथयसि त्वमात्मानं परमेश्वर ॥ तथापि ॥ द्रष्टुमिच्छामि ते तव रूपं ज्ञानैश्वर्यशक्तिबल वीर्यतेजोभिः संपन्नमैश्वरं वैष्णवं

पुरुषोत्तम

क

ण सोपाधिकेन निरुपाधिकेन वेत्यर्थः ॥ यदि ममात्मतत्त्वं निश्चित्य मद्वाक्यं ते मानं तर्हि किमिति मदुक्तं दिदृक्षसे कृतार्थी बुभूषये॰
त्युक्तं मत्वाह ॥ तथापीति ॥ चतुर्भुजादिरूपानिवरत्यर्थमाह ॥ ऐश्वरमिति ॥ तद्व्याचष्टे ॥ ज्ञानेत्यादिना ॥ ३ ॥ छ ॥ श्रीरामः

अ० ११
२०४ ॥ रामः

द्रष्टुमयोग्ये कुतो दिदृक्षेत्याशंक्याह ॥ मन्यस इति ॥ प्रभवतिस्माद्धि स्थितिसंहारप्रवेशप्रशासनेष्विति प्रभुः ॥ लक्षणया
योगशब्दार्थमाह ॥ योगिन इति ॥ तत्त्वतो दिव्याचष्टे ॥ यस्मादिति ॥ ४ ॥ अर्जुनमिति भक्तं सखायं प्रार्थिनं प्रतिश्रवणेना षा

मन्यसे यदि तच्छक्यं मया द्रष्टुमिति प्रभो ॥ योगेश्वर ततो मे त्वं दर्शयात्मानमव्ययं ॥ मन्यसे चिंतयसि यदि मयार्जुनेन श
क्यं द्रष्टुमिति प्रभो स्वामिन् योगेश्वर योगिनो योगास्तेषामीश्वरो योगेश्वरः तस्य संबोधनं हे योगेश्वर यस्मादहम
तीवार्थी दिदृक्षुस्तस्मात् मदर्थे दर्शय त्वं आत्मानमव्ययं ॥ एवं [illegible] चोदितोऽर्जुनेन श्रीभगवानुवाच ॥ पश्य मे
पार्थ रूपाणि शतशोऽथ सहस्रशः ॥ नानाविधानि दिव्यानि नानावर्णाकृतीनि च ॥ ५ ॥ पश्य मे मम हे पार्थ रूपाणि श
तशोथसहस्रशः अनेकश इत्यर्थः तानि च नानाविधान्यनेकप्रकाराणि दिविभवानि दिव्यान्यप्राकृतानि नानावर्णाकृती
नि च ॥ नानाविलक्षणा नीलपीतादिप्रकारा वर्णास्तथा आकृत । यश्चावयवसंस्थानविशेषा येषां रूपाणां तानि रूपाणि
नानावर्णाकृतीनि च ॥ पश्यादित्यान्वसून्रुद्रानश्विनौ मरुतस्तथा ॥ बहून्यदृष्टपूर्वाणि पश्याश्चर्याणि भारत ॥ ६ ॥ पश्य
आदित्यान्द्वादश [illegible] वसूनष्टौ रुद्रानेकादश अश्विनौ द्वौ मरुतः सप्तसप्तगणोपेतान् तथा ॥ ५ ॥

[illegible] माह ॥ एवमिति ॥ ५ ॥ दिव्यानि रूपाणि पश्येत्युक्तं तान्येव लेशतोनुक्रामति ॥ पश्यादित्यानिति ॥ तान्मरुतस्तथा पश्येति ॥
॥ संबंधः ॥ ॥

ते॰भा॰टी॰
५ म

नानाविधानीत्युक्तं तदेव स्फुटयति ॥ बहूनीति ॥ अदृष्टपूर्वाणि पूर्वमदृष्टानि नानावर्णाकृतीनीत्युक्तं व्यनक्ति ॥ आश्चर्याणीति ॥६॥ न केवलमादित्यवस्वाद्येवमरूपं त्वया द्रष्टुं शक्यं किंतु समस्तं जगदपि मद्देहस्थं द्रष्टुमर्हसीत्याह ॥ नेत्यादिनां सप्तमीद्वयं मिथः संबध्यते समासांतर्गतापि सप्तमी तत्रैवान्विताय दिच्छसि तदिहैव पश्येति संबंधः ॥७॥ मन्यसे यदीत्युक्तं मनुरवति ॥ ०

बहून्यन्यान्यप्यदृष्टपूर्वाणि ॥ मनुष्यलोके त्वया त्वत्तोऽन्येर्वा न केनचित् पश्याश्चर्याणि पस्तुतानि भारत ॥ न केवलमेतावदेव ॥ इहैकस्थं जगत्कृत्स्नं पश्याद्य सचराचरं ॥ मम देहे गुडाकेश यच्चान्यद्द्रष्टुमिच्छसि ॥७॥ इह एकस्थमेकस्मिन् स्थितं जगत्कृत्स्नं समस्तं पश्याद्येदानीं सचराचरं सह चरेण अचरेण च वर्त्तत इति ॥ मम देहे गुडाकेश यच्चान्यत् जयपराजयादि यत् शंकसे। यद्वा जयेम यदि वा नो जयेयुरिति यद्वोचस्तदपि द्रष्टुं यदीच्छसि ॥ किंतु ॥ न तु मां शक्यसे द्रष्टुमनेनैव स्वचक्षुषा ॥ दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरं ॥८॥ ननु मां शक्यसे न मां विश्वरूपधरं द्रष्टुमनेनैव प्राकृतेनैव स्वचक्षुषा येन तु शक्यसे द्रष्टुं दिव्ये न तद्दिव्यं ददामि ते तुभ्यं चक्षुस्तेन पश्य मे मम योगमैश्वरं ईश्वरस्य ममैश्वरं योगशक्त्यतिशयमित्यर्थः ॥८॥

किंत्विति ॥ सप्रपंचमनुवदति नैमां स्वचक्षुषा न शक्तोऽपि द्रष्टुमित्याह ॥ नत्विति ॥ कथं तर्हि त्वां द्रष्टुं शक्नुयामित्याशंक्याह ॥ येनेति ॥ दिव्यस्य चक्षुषो वक्ष्यमाणयोगशक्त्यतिशयदर्शने विनियोगं दर्शयति ॥ नेनेति ॥८॥५॥ श्रीरामायनमः ॥ ८ ॥१०॥

अ॰ ११ ॥
२०५ ॥ राम ॥

इमं वृत्तांतं धृतराष्ट्राय संजयो निवेदितवानित्याह ॥ संजय इति ॥ मदीयं विश्वरूपाख्यं रूपं न प्राकृतेन चक्षुषा निरीक्षितुं क्षमं किंतु दि
व्येनेत्यादि यथोक्तप्रका[illegible]रं ॥ अनंतरं दिव्यचक्षुःप्रदानादित्तिशेषः ॥ हरत्यविद्यां सकार्यामिति हरिः । यदीश्वरस्य मायोपहि

संजय उवाच ॥ एवमुक्त्वा ततो राजन् महायोगेश्वरो हरिः ॥ दर्शयामास पार्थाय परमं रूपमैश्वरं ॥ ९ ॥ एवं यथोक्ते
न प्रकारेणोक्त्वा ततोऽनंतरं राजन् हे धृतराष्ट्र महायोगेश्वरो महांश्चासौ योगेश्वरश्च महायोगेश्वरो हरिर्नारायणो
दर्शयामास दर्शितवान् ॥ पार्थाय पृथासुताय परमं विश्वरूपमैश्वरं ॥ अनेकवक्त्रनयनमनेकाद्भुतदर्शनं ॥ अनेक
दिव्याभरणं दिव्यानेकोद्यतायुधं ॥ १० ॥ अनेकवक्त्रनयनं अनेकानि च वक्त्राणि नयनानि च यस्मिन् रूपे तदनेकव
क्त्रनयनं ॥ अनेकाद्भुतदर्शनं अनेकानि अद्भुतानि विस्मापकानि दर्शनानि यस्मिन् रूपे तदनेकाद्भुतदर्शनं रूपं ॥
तथानेकदिव्याभरणं अनेकानि दिव्यान्याभरणानि यस्मिन् रूपे तदनेकदिव्याभरणं ॥ तथा दिव्यानेकोद्यतायुधं
दिव्यानि अनेकानि अस्त्रादीनि उद्यतानि ॥ आयुधानि यस्मिन् तत् दिव्यानेकोद्यतायुधं दर्शयामासेत्तिपूर्वेण संबंधः

तच परमं उत्कृष्टं रूपं न दर्शयांबभूवेत्याह ॥ परममित्ति ॥ ९ ॥ तदेव रूपं विशिनष्टि ॥ अनेकेति ॥ दिव्यान्याभरणानि हार
रकेयूरादिभूषणानि उद्यतान्यायुधानि ॥ १० ॥ ९८ ॥ श्रीरामचंद्राय नमः ॥ श्रीगुरुमूर्त्तये नमः ॥ श्रीलक्ष्म्यायनमः

गी० भा० टी०
[illegible] ॥

उत्कर्षवंतं भगवंतं प्रकारांतरेणाविशिनष्टि ॥ किंचेति ॥ अध्याहारेपि पदसंघट्टनासंभवात् ॥११॥ ननु प्रकृतस्य भगवतो रूपस्य दी
प्तिरस्ति वा न वा न चेत्कोष्ठादिसाम्यं पद्यस्ति कीदृशी सेत्याशंक्याह ॥ या पुनरिति ॥ सा यदि स्यात्तदा तद्भासः सदृशी सेति योजना अत्र सं

किंच ॥ दिव्यमाल्यांबरधरं दिव्यगंधानुलेपनं ॥ सर्वाश्चर्यमयं देवमनंतं विश्वतोमुखं ॥११॥ दिव्यमाल्यांबरधरं
दिव्यानि माल्यानि पुष्पाणि अंबराणि वस्त्राणि च ध्रियंते येनेश्वरेण तं दिव्यमाल्यांबरधरं ॥ दिव्यगंधानुलेपनं ॥ दि
व्यो गंधोऽनुलेपनं यस्य तं दिव्यगंधानुलेपनं सर्वाश्चर्यमयं सर्वाश्चर्यप्रायं देवमनंतं नास्यांतोस्तीत्यनंतः तं वि
श्वतोमुखं सर्वतोमुखं सर्वभूतात्मत्वात् ईदृशं यामासार्जुनो ददर्शेति च वाध्याह्रियते ॥ या पुनर्भगवतो विश्वरूपस्य
भात्यं तस्या उपमोच्यते ॥ दिवि सूर्यसहस्रस्य भवेद्युगपदुत्थिता ॥ यदि भाः सदृशी सा स्याद्भासस्तस्य महात्मनः
॥१२॥ दिव्यंतरिक्षे ॥ तृतीयस्यां वा दिवि ॥ सूर्याणां सहस्रं सूर्यसहस्रं तस्य युगपदुत्थितस्य या युगपदुत्थिता भाः ग
सा यदि सदृशी स्यात्तस्य महात्मनो विश्वरूपस्य भासो यदि वा न स्यात्ततो विश्वरूपस्यैव भा अतिरिच्यत इत्यभिप्रा
॥ यः ॥

भा विना अभ्युपगमार्थो यदिशब्दः ॥ स्याच्छब्दो निश्चयार्थः ॥ सा कथंचित्सदृशी संभवति ननु भवत्येवेति विवक्षित्वाह ॥ यदिवे
गति ॥

आ० ११॥
२०६॥ राम॥

न केवलमुक्तं देवमर्जुनो दृष्टवान् किंतु तत्रैव विश्वरूपे सर्वं जगदेकस्मिन्नवस्थितं अनुभूतवानित्याह ॥ किं चेति ॥ तदा वि-
श्वरूपस्य भगवद्रूपस्य दर्शनदशायामित्यर्थः ॥१३॥ विश्वरूपधरस्य भगवतस्तस्मिन्नेकीभूतस्य जगतश्श्लोक्तविशेषणस्य

किंच ॥ तत्रैकस्थं जगत्कृत्स्नं प्रविभक्तमनेकधा ॥ अपश्यद्देवदेवस्य शरीरे पांडवस्तदा ॥१३॥ तच्च तस्मिन् विश्वरूपे एकस्मि-
क न्स्थितमेकस्थं जगत्कृत्स्नं प्रविभक्तमनेधा ॥ देवपितृमनुष्यादिभेदैरपश्यत् दृष्टवान् ॥ देवदेवस्य हरेः शरीरे पांडवो
ऽर्जुनस्तदा ॥ ततः स विस्मयाविष्टो हृष्टरोमा धनंजयः ॥ प्रणम्य शिरसा देवं कृतांजलिरभाषत ॥१४॥ ततस्तं द-
ष्ट्वा सा विस्मयाविष्टो विस्मयेनाविष्टो विस्मयाविष्टो हृष्टरोमा हृष्टानि रोमाणि यस्य सोयं हृष्टरोमा चाभवद्धनंजयः
प्रणम्य प्रकर्षेण नमनं कृत्वा प्रह्वीभूतः सन् शिरसा देवं विश्वरूपधरं कृतांजलिर्नमस्कारार्थं संपुटीकृतहस्तः
सन्नभाषत उक्तवान् ॥ कथं ॥ ५॥

दर्शनानंतरं किमकरोदित्यपेक्षायामाह ॥ तत इति ॥ आश्चर्यबुद्धिर्विस्मयः रोमणां हृष्टत्वं पुलकि ॥ नतत्वं प्रकर्षो भक्तिश्र-
द्धयोरतिशयः ॥१४॥ कथं भगवंतं प्रत्यर्जुनो भाषितवानिति पृच्छति ॥ कथमिति ॥ ५ ॥ श्रीरामायनमः ॥ श्रीकृष्णाः

१०भा०टी० तत्प्रश्नमपेक्षितं परमन्त्रवक्तारयति॥ पत्वयेति॥ भूतविशेषसंघे देवतानामंतर्भावेपि पृथक्करणमुत्कर्षात्॥ ब्रह्मणः सर्वदे
वतात्मकत्वेपि तेभ्यो भेदकथनं तदुत्पादकत्वादिति मत्वाह॥ किंचेति॥ ऋषीणामुरगाणांच किंचिद्वैषम्यात्पृथक्त्वं॥

यत्वयादर्शितं विश्वरूपं तदहं पश्यामीति स्वानुभवमाविष्कुर्वन् अर्जुन उवाच॥ पश्यामि देवांस्तव देव देहे सर्वांस्त
थाभूतविशेषसंघान्॥ ब्रह्माणमीशं कमलासनस्थमृषीश्च सर्वानुरगांश्च दिव्यान्॥१५॥ पश्यामि उपलभे हे देव
तव देहे देवान् सर्वान् तथा भूतविशेषसंघान् भूतानां विशेषाणां स्थावरजंगमानां नानासंस्थानविशिष्टानां संघाः
भूतविशेषसंघास्तान्॥ किंच॥ ब्रह्माणं चतुर्मुखमीशितारं प्रजानां॥ कमलासनस्थं पृथिवीपद्ममध्ये मेरुक
र्णिकासनस्थमित्यर्थः ऋषीश्च वसिष्ठादीन् सर्वान् उरगांश्च वासुकिप्रभृतीन्॥ दिव्यान् दिविभवान्॥ अ
नेकबाहूदरवक्त्रनेत्रं पश्यामि त्वां सर्वतोनंतरूपं॥ नांतं न मध्यं न पुनस्तवादिं पश्यामि विश्वेश्वर विश्वरूप॥१६॥
अनेकबाहूदरवक्त्रनेत्रं अनेके बाहव उदराणि वक्त्राणि नेत्राणि च यस्य न वस त्वमनेकबाहूदरवक्त्रनेत्रस्तं त्वामनेक ने
कबाहूदरवक्त्रनेत्रं पश्यामि त्वां त्वां सर्वतः सर्वत्र अनंतरूपं अनंतानि स्वरूपाण्यस्येत्यनंतरूपस्तमनंतरूपं॥७॥

आ० ११
२०७॥ राम॥

॥ दिव्यानिरस्तुमयेषां विशेषणं॥१५॥ यत्र भगवद्देहे सर्वमिदं दृष्टं तमेव विशिनष्टि॥ अनेकेति॥ ॥७॥ श्रीरामचंद्रायनमः ॥

आदिशब्देन मस्तकं सूच्यते नांतं न मध्यमित्यत्रापि पश्यामीत्यस्य प्रत्येकं संबंधं सूचयति ॥ नांतं पश्यामीति ॥१६॥ विश्वरूपत्वं तं भगवंतमेव प्रकारांतरेण प्रपंचयति ॥ किंचेति ॥ परिछिन्नत्वं व्यावर्तयति ॥ सर्वत इति ॥ दुर्निरीक्ष्यं पश्यामीत्यधिकारिभेदेनाविरुद्धं ॥ पुर

नांतं न अंतोऽवसानं न मध्यं मध्यं नाम द्वयोः कोटोरंतरं ॥ न पुनस्तवादिं तव देवस्य नांतं पश्यामि न मध्यं पश्यामि न पुनरादिं पश्यामि हे विश्वेश्वर हे विश्वरूप किंच ॥ किरीटिनं गदिनं चक्रिणं च तेजोराशिं सर्वतो दीप्तिमंतं ॥ पश्यामि त्वां दुर्निरीक्ष्यं समंताद्दीप्तानलार्कद्युतिमप्रमेयं ॥१७॥ किरीटिनं किरीटो नाम शिरोभूषणविशेषस्तद्यस्यास्तीति सः किरीटी तं किरीटिनं तथा गदिनं गदा विद्यते यस्येति गदी तं गदिनं चक्रिणं चक्रमस्यास्तीति चक्री तं चक्रिणं च तेजोराशिं तेजःपुंजं ॥ सर्वतो दीप्तिमंतं सर्वतो दीप्तिर्यस्यास्ति स सर्वतो दीप्तिमान् तं सर्वतो दीप्तिमंतं पश्यामि त्वां त्वां दुर्निरीक्ष्यं दुःखेन निरीक्ष्यो दुर्निरीक्ष्यस्तं समंतात् समंततः सर्वत्र दीप्तानलार्कद्युतिं अनलश्चार्कश्चानलार्कौ दीप्तौ च तावनलार्कौ चेति दीप्तानलार्कौ तयोः दीप्तानलार्कयोर्द्युतिरिव द्युतिस्तेजो यस्य तं वस त्वं दीप्तानलार्कद्युतिस्तं त्वां दीप्तानलार्कद्युतिं अप्रमेयं न प्रमेयमशक्यपरिच्छेदमित्येतत् ॥

॥पार्श्वतो वा पृष्ठतो वा नास्य दर्शनं किंतु सर्वत्रेत्याह ॥ समंतत इति ॥ दीप्तिमत्त्वं दृष्टांतेन स्पष्टयति दीप्तेति ॥१७॥ ७॥०

स प्रपंचे भगवद्रूपे प्रकृते प्रकरणविरुद्धमक्षरमित्यादि निरुपाधिकवचनमित्याशंक्याह ॥ अत एवेति ॥ योगशक्तिरैश्वर्यातिशयः ॥
न क्षरतीति निष्प्रपंचत्वमुच्यते परमपुरुषार्थत्वात्परमार्थत्वाच्चेज्ञातव्यत्वं यस्मिन्द्यौः पृथिवीत्यादौ प्रपंचायतनत्वेनस्यैव ततो निष्प्र-
पंचस्य ज्ञातव्यत्वश्रवणात्कुतो ब्रह्मणो ज्ञातव्यत्वं नत्राह ॥ त्वमस्येति ॥ निष्प्रपंचस्य ब्रह्मणो ज्ञेयत्वे हेत्वंतरमाह ॥ किंचेति ॥ ०॥

अत एव ते योगशक्तिदर्शनादनुमिनोमि ॥ त्वमक्षरं परमं वेदितव्यं त्वमस्य विश्वस्य परं निधानं ॥ त्वमव्ययः शाश्वतधर्मगो-
न प्तासनातनस्त्वं पुरुषो मतो मे ॥ १८ ॥ त्वमक्षरं न क्षरतीत्यक्षरं परमं ब्रह्म वेदितव्यं मुमुक्षुभिर्ज्ञातव्यं त्वमस्य विश्वस्य
समस्तस्य जगतः परं प्रकृष्टं निधानं निधीयतेऽस्मिन्निति निधानं पर आश्रय इत्यर्थः ॥ किंच त्वमव्ययो न व्येति न व्य-
यो विद्यत इत्यव्ययः ॥ शाश्वतधर्मगोप्ता यः शाश्वद्भवः स शाश्वतो नित्यो धर्मस्तस्य गोप्ता सनातनश्चिरंतनस्त्वं पु-
॥ रुषः परो मतोऽभिप्रेतो मे मम ॥ १८ ॥

अविनाशित्वान्नैव ज्ञातव्यता त्वदतिरिक्तस्य नाशित्वेन हेयत्वादित्यर्थः ॥ ज्ञानकर्मात्मनो धर्मस्य ॥ नित्यत्वं वेदप्रमाणकत्वं ॥ ध-
र्मसंस्थापनार्थाय संभवामीत्युक्तत्वान्नू गोप्ता रक्षिता ॥ १८ ॥ ५१ ॥ श्रीरामायनमः ॥ श्रीसदाशिवायनमः ॥ ०५१ ॥

भगवतोऽरूपस्य विश्वरूपाख्यं रूपमेव पुनर्विवृणोति ॥ किंचेति ॥ हुतमश्नातीति हुताशो वह्निः ॥१९॥ प्रकृतं भगवद्रूपस्य व्याप्तिं
व्यनक्ति ॥ द्यावापृथिव्योरिति ॥ तस्यैव भयंकरत्वमाचष्टे ॥ दृष्ट्वेति ॥२०॥ अमीत्यादि समनंतरग्रंथस्य तात्पर्यमाह ॥ अमु[illegible]ति ॥
किंच ॥ अनादिमध्यांतमनंतवीर्यमनंतबाहुं शशिसूर्यनेत्रं ॥ पश्यामि त्वां दीप्तहुताशवक्त्रं स्वतेजसा विश्वमिदं तपंतं ॥२॥
अनादिमध्यांतं आदिश्च मध्यं च अंतश्च न विद्यते यस्य सोऽयमनादिमध्यांतस्तं त्वां अनादिमध्यांतं ॥ अनंतवीर्यं न
तव वीर्यस्यांतोऽस्तीत्यनंतवीर्यस्तं ॥ अनंतवीर्यं ॥ अनंतबाहुं अनंता बाहवो यस्यन त्व स त्वमनंतबाहुस्तं त्वामनंतबाहुं ॥ शशि
सूर्यनेत्रं शशिसूर्यौ नेत्रे यस्यन व तं चंद्रादित्यनयनं पश्यामि त्वां दीप्तहुताशवक्त्रं दीप्तश्चासौ हुताशश्चेति दीप्तहुताशः ॥
स वक्त्रं यस्यन व स त्वं दीप्तहुताशवक्त्रस्तं स्वतेजसा विश्वमिदं समस्तं तपंतं संतापयंतं ॥ द्यावापृथिव्योरिदमंतरं हि व्या
प्तं त्वयैकेन दिशश्च सर्वाः ॥ दृष्ट्वाद्भुतं रूपमुग्रं तवेदं लोकत्रयं प्रव्यथितं महात्मन् ॥२०॥ द्यावापृथिव्योरिदमंतरं हि अंत
रिक्षं हि व्याप्तं त्वयैकेन विश्वरूपधरेण दिशश्च सर्वा व्याप्ताः दृष्ट्वा उपलभ्याद्भुतं विस्मापकं रूपमिदं तवोग्रं क्रूरं लोकत्रयं
लोकानां त्रयं लोकत्रयं ॥ प्रव्यथितं भीतं प्रचलितं वा हे महात्मन्नक्षुद्रप्रभाव किंच ॥ अथाधुना पुरा यद्वा जयेम यदि वा नो जये
युरित्यर्जुनस्य संशय आसीत्तं ॥ निर्णयाय पांडवानां जयमेकांतिकं दर्शयामीति प्रवृत्तो भगवांस्तं पश्यन्नाह ॥ ५ ॥ ० ॥

तं भगवंतं पांडवजयमेकांतिकं दर्शयंतं पश्यन्नर्जुनो ब्रवीदित्याह ॥ तं पश्यन्निति ॥ ५ ॥ श्री ॥ श्रीरामचंद्राय नमः ॥ ५ ॥

विश्वरूपस्यैव प्रपंचनार्थमनंतरग्रंथजातमिति दर्शयति ।। किंचेति ।। असुरसंघा इति पदं छित्वा भूभारभूता दुर्योधनादयस्त्वां विशं
तीत्यपि वक्तव्यं । उभयोरपि सेनयोरवस्थितेषु योद्धुकामेष्ववांतरविशेषमाह ।। तत्रेति ।। समरभूमौ समागतानां द्रष्टुकामानां नार

किंच ।। अमी हि त्वा सुरसंघा विशंति केचिद्भीताः प्रांजलयो गृणंति ।। स्वस्तीत्युक्त्वा महर्षिसिद्धसंघाः स्तुवंति त्वां स्तुतिभिः
पुष्कलाभिः ।।२१।। अमी हि युध्यमाना योधास्त्वां सुरसंघा ये ऽत्र भूभारावतारार्थमवतीर्णा वस्वादिदेवसंघा मनुष्यसंस्थाना
स्त्वां विशंति प्रविशंति प्रविशंतो दृश्यंते तेन त्र केचिद्भीताः प्रांजलयः संतो गृणंति स्तुवंति त्वामन्येपलायनेप्यशक्ताः संतो युद्धेप्र
त्युपस्थिते उत्पातादिनिमित्तान्युपलक्ष्य स्वस्त्यस्तु जगत इत्युक्त्वा महर्षिसिद्धसंघाः महर्षीणां च सिद्धानां च संघाः स्तुवंति त्वां
स्तुतिभिः पुष्कलाभिः संपूर्णाभिः ।। किंचान्यत् ।। रुद्रादित्या वसवो ये च साध्या विश्वेऽश्विनौ मरुतश्चोष्मपाश्च । गंधर्वयक्षासुर
सिद्धसंघा वीक्षंते त्वां विस्मिताश्चैव सर्वे ।।२२।। रुद्रादित्या वसवो ये च साध्या विश्वे । अश्विनौ विश्वेदेवा अश्विनौ च देवौ मरुतश्च
ऊष्मपाश्च पितरः गंधर्वयक्षाऽसुरसिद्धसंघाः गंधर्वा हाहाहूहूप्रभृतयो यक्षाः कुबेरप्रभृतयोऽसुराः विरोचनप्रभृतयः
सिद्धाः कपिलादयः ।। तेषां संघाः गंधर्वयक्षासुरसिद्धसंघाः वीक्षंते पश्यंति त्वां विस्मिताः विस्मयमापन्नाः संतस्त एव सर्वे ।।

आ०११ ।।
२०९ ।। राम ।।

द्रप्रभृतीनां विश्वविनाशमाशंकमानानां तं परिजिहीर्षतां स्तुतिपदेषु भगवद्विषयेषु प्रवृत्तिप्रकारं प्रदर्शयति ।। रूपमिति ।।
दृश्यमानं भगवद्रूपस्य विस्मयकरत्वे हेत्वंतरमाह ।। किंचेति ।। तत्रोक्ता रुद्रादयः सर्वे विस्मयापन्नास्त्वां पश्यंतीति संबंधः ।।०।।

लोकत्रयं प्रव्यथितमित्युक्तमुपसंहरति॥ यस्मादिति॥ ईदृशं यस्मात्ते रूपं तस्मात्तं दृष्ट्वेति योजना॥ भयेन लौकिकवदहमपि व्य॥

व२ यस्मात्॥ रूपं महत्ते बहुवक्त्रनेत्रं महाबाहो बहुबाहूरुपादं॥ बहूदरं बहुदंष्ट्राकरालं दृष्ट्वा लोकाः प्रव्यथितास्तथाहं॥२३॥ रूपं बाहू २
महदतिप्रमाणं ते तव बहुवक्त्रनेत्रं बहूनि वक्त्राणि मुखानि नेत्राणि चक्षूंषि च यस्मिन् तत्तत् रूपं बहुवक्त्रनेत्रं॥ हे महाबा
हो बहुबाहूरुपादं बहवो बाहव ऊरवः पादाश्च यस्मिन् रूपे तत् बहुबाहूरुपादं किंच॥ बहूदरं बहूनि उदराणि यस्मि
न्निति बहूदरं बहुदंष्ट्राकरालं बहुभिर्दंष्ट्राभिः करालं विकृतं तत् बहुदंष्ट्राकरालं। दृष्ट्वा रूपमीदृशं लोकाः लौकि
काः प्राणिनः प्रव्यथिताः प्रचलिताः भयेन तथाहमपि॥ तत्रैदं कारणं नभःस्पृशं दीप्तमनेकवर्णं व्यात्ताननं
दीप्तविशालनेत्रं॥ दृष्ट्वा हि त्वां प्रव्यथितान्तरात्मा धृतिं न विंदामि शमं च विष्णो॥२४॥ नभःस्पृशं द्युस्पृशमित्य
र्थः॥ दीप्तं प्रज्वलितं अनेकवर्णं अनेके वर्णा भयंकरा नानासंस्थानाः यस्मिन् त्वयि तं त्वामनेकव ॥ र्ण
र्णं व्यात्ताननं व्यात्तानि विवितांनि विवृतानि आननानि मुखानि यस्मिंस्त्वयि तं त्वां व्यात्ताननं दीप्तविशालनेत्रं दीप्ता
नि प्रज्वलितानि विशालानि विस्तीर्णानि नेत्राणि यस्मिन् त्वयि त्वां दीप्तविशालनेत्रं दृष्ट्वा हि त्वां प्रव्यथितान्त
रा३ रात्मा प्रव्यथितोंऽतरात्मा मनो यस्य मम सोहं प्रव्यथितान्तरात्मा सन् धृतिं न विंदामि धैर्यं न लभे शमं चो
पशमं मनस्तुष्टिं हे विष्णो व्यापनशील॥५॥

धितोऽव्यथां पीडां देहेंद्रियप्रचलनं प्राप्तोस्मीत्याह॥ तथेति॥२३॥ अर्जुनस्य विश्वरूपसंदर्शनेन व्यथितत्वे हेतुमाह॥ तत्रेति॥
॥२४॥

भा० टी० दृश्यमानेपि भगवद्देहे परितोषाभावे कारणांतरं प्रश्नपूर्वकमाह ॥ कस्मादिति ॥ दृष्ट्वैवेत्येवकारेण प्राप्तिर्व्यावर्त्यते ॥ २५
राम ॥ अस्माकं जयं परेषां पराजयं च दिदृक्षितं पश्यामीत्याह ॥ येभ्य इति ॥ तग्रहेतुत्वेन श्लोकमवतारयति ॥ यतत इति ॥ न केचु
कस्मात्तद्दंष्ट्राकरालानि च ते मुखानि दृष्ट्वैव कालानलसंनिभानि ॥ दिशो न जाने न लभे च शर्म प्रसीद देवेश जगन्नि
वास ॥ २५ ॥ दंष्ट्राकरालानि च दंष्ट्राभिः करालानि विकृतानि तेन तव मुखानि दृष्ट्वैवोपलभ्य कालानलसन्निभानि प्रलय
काले लोकानां दाहको ऽग्निः कालानलस्तत्संनिभानि कालानलसदृशानि मुखानि दृष्ट्वैवेत्येन तद्दिशः पूर्वापरविवेकेन
न जाने न जानामि दिग्मूढोहं जातोस्म्यतो न लभे च नोपलभे च शर्म सुखमतः प्रसीद प्रसन्नो भव हे देवेश जगन्नि
वास येभ्यो मम पराजयाशंका या प्रागासीत्सा चापगतायतः ॥ अमी च त्वां धृतराष्ट्रस्य पुत्राः सर्वे सहैवावनिपाल
संघैः ॥ भीष्मो द्रोणः सूतपुत्रस्तथासौ सहास्मदीयैरपि योधमुख्यैः ॥ २६ ॥ अमी च त्वां धृतराष्ट्रस्य पुत्रा दुर्योधन
प्रभृतयः ॥ त्वरमाणा विशंतीति व्यवहितेन संबंधः ॥ सर्वे सहैव सहिता अवनिपालसंघैः ० अवनिं पृथ्वीं पालयंती
त्यवनिपालास्तेषां संघैः ॥ किंच ॥ भीष्मो द्रोणः सूतपुत्रः कर्णस्तथासौ सहास्मदीयैरपि धृष्टद्युम्नप्रभृतिभि
र्योधमुख्यैः योधानां मुख्यैः प्रधानैः सह ॥ किंच ॥ ॥ ५ ॥

अ० ११ ॥

त्वं दुर्योधनादीनामेव पराजयः किंतु भीष्मादीनामपीत्याह ॥ किंचेति ॥ २६ ॥ भगवद्रूपस्योग्रत्वे हेत्वंतरमाह ॥ किंचेति ॥ ० २७ ॥ राम ॥

त्र विष्टानां मध्ये केचिदिति संबंधः ॥२७॥ उभयोरपि सेनयोरवस्थितानां राज्ञां भगवन्मुखप्रवेशनं निदर्शनेन विशदयति ॥ कथमि

वक्त्राणि ते त्वरमाणा विशंति दंष्ट्राकरालानि भयानकानि ॥ केचिद्विलग्ना दशनांतरेषु संदृश्यंते चूर्णितैरुत्तमांगैः ॥२७॥ वक्त्राणि मुखानि ते नवे त्वरमाणाः त्वरायुक्ताः संतो विशंति किं विशिष्टानि दंष्ट्राकरालानि भयानकानि भयंकराणि ॥ किंच केचित्तु मुखानि प्रविष्टानां मध्ये विलग्ना दशनांतरेषु दंतानामंतरेषु मांसमिव भक्षितं संऽदृश्यंते उपलभ्यंते ॥ चूर्णितैरुत्तमांगैश्चूर्णितैः शिरोभिः ॥ कथं प्रविशंति मुखानीत्याह ॥ यथा नदीनां बहवोंबुवेगाः समुद्रमेवाभिमुखा द्रवंति ॥ तथा तवामी नरलोकवीरा विशंति वक्त्राण्यभिविज्वलंति ॥२८॥ यथा नदीनां स्रवंतीनां बहवोऽनेके अंबुवेगाः अंबुवेगाः त्वराविशेषाः समुद्रमेवाभिमुखाः प्रतिमुखाः द्रवंति विशंति ॥ तथा तवामी भीष्मादयो नरलोकवीरा मनुष्यलोकशूरा विशंति वक्त्राण्यभि अभितः विज्वलंति प्रकाशमानानि ॥ ते किमर्थं प्रविशंति कथं वेत्याह ॥ यथा प्रदीप्तं ज्वलनं पतंगा विशंति नाशाय समृद्धवेगाः ॥ तथैव नाशाय विशंति लोकास्तवापि वक्त्राणि समृद्धवेगाः ॥२९॥ यथा प्रदीप्तं ज्वलनं ज्वलितमग्निं पतंगाः पक्षिणो विशंति ॥ नाशाय विनाशाय समृद्धवेगाः समृद्ध उद्भूतो वेगो गतिः येषां ते समृद्धवेगाः तथैव नाशाय विशंति लोकाः ॥ प्राणिनस्तवापि वक्त्राणि समृद्धवेगाः ॥ ७॥ ५॥

त्यादिना ॥२८॥ प्रवेशप्रयोजनं तत्प्रकारविशेषं चोदाहरणांतरेण स्फोरयति ते किमर्थमित्यादिना ॥२९॥ ८९॥ १

०टी०॥
११॥रामः॥

योद्धुकामानांराज्ञांभवैगेन्मुखप्रवेशप्रकारंप्रदर्श्यनस्यां॥दशायांभगवतस्तन्महसांचप्रवृत्तिप्रकारंगत्वाप्यपश्यति॥त्वंपु
रेति॥भगवत्प्रवृत्तिमेवंप्रत्याप्यनदीयभासांप्रवृत्तिंप्रकटयति॥किंचेति॥३०॥भगवद्रूपस्यार्जुनेनदृष्टपूर्वत्वात्त
स्यनतस्मिन्नजिज्ञासेत्याशंक्याह॥यनरुति॥उपदेशंशुश्रूषमाणेनउपदेशकर्तुःप्रह्वीभवनंकर्तव्यमितितिस्त्यचयति॥नमोस्त्वि

त्वंपुनः लेलिह्यसेग्रसमानःसमंतात्लोकान्समग्रान्वदनैर्ज्वलद्भिः॥तेजोभिरापूर्यजगत्समग्रंभासस्तवोग्राःप्रत
पंतिविष्णो॥३०॥लेलिह्यसेआस्वादयसिग्रसमानोऽन्तःप्रवेशयन्समंतात्समंततोलोकान्समग्रान्समस्ता
न्वदनैर्वक्त्रैर्ज्वलद्भिर्दीप्यमानैस्तेजोभिरापूर्यसंव्याप्यजगत्समग्रंसहाग्येणवर्ततइतिसमग्रमित्येतत्॥ =
किंचभासोदीप्तयस्तवोग्राःक्रूराःप्रतपंतिसंतापंकुर्वंतिहेविष्णोव्यापनशीलत्वं॥४॥यतएवमुग्रस्वभावोऽ
तः॥आख्याहिमेकोभवानुग्ररूपोनमोस्तुतेदेववरप्रसीद॥विज्ञातुमिच्छामिभवंतमाद्यंनहिप्रजानामितव
प्रवृत्तिं॥३१॥आख्याहिकथयमेमह्यंकोभवानेवमुग्ररूपःक्रूराकारोनमोस्तुतेतुभ्यंहेदेववरदेवानांप्रधानप्र
सीदप्रसादंकुरु॥विज्ञातुंविशेषेणज्ञातुंइच्छामिभवंतमाद्यंआद्योभवमाद्यंआदौभवं॥नहियस्मात्प्रजानामितव

प्रवृत्तिंतद्यांचेष्टां॥

व
अ०११॥
२११रामः॥

ति॥क्रौर्यत्यागमर्थयते॥प्रसादमिति॥त्वमेवमांजानीषेकिमर्थमित्थमिदानीमर्थयसेमदीयांचेष्टांदृष्ट्वातयैवप्रतिपद्यस्वेत्याशंक्या
ह॥नहीति॥३१॥

यः स्वयं यदर्थी चास्य प्रवृत्तिस्तत्सर्वं भगवानुक्तवानित्याह ॥ भगवानिति ॥ कालं क्रियाशक्तिसहितः परमेश्वरोस्मीति वर्तमान प्रवृद्धोपलक्षितत्वं कालस्य विवक्षितं ॥ लोकसंहारार्थं त्वत्प्रवर्तनावपि नास्मावर्थवती प्रतिपक्षाणां भीष्मादीनां न त्वावर्तितं विनापि संहर्तुमशक्यत्वादित्याशंक्याह ॥ ऋतेपीति ॥ ३२ ॥ न वौदासीन्येपि प्रतिकूलानीकस्थाः मत्प्रातिकूल्यादेव न भविष्यंतीत्येवं यस्मान्निश्चितं तस्मात्त्वदौदासीन्यमकिंचित्करमित्याह ॥ तस्मादिति ॥ उत्तिष्ठ युद्धायोत्सुकी भवेत्यर्थः ॥ ५ ॥

श्रीभगवानुवाच ॥ कालोऽस्मि लोकक्षयकृत्प्रवृद्धो लोकान्समाहर्तुमिह प्रवृत्तः ॥ ऋतेऽपि त्वां न भविष्यंति सर्वे येऽवस्थिताः प्रत्यनीकेषु योधाः ॥ ३२ ॥ कालोऽस्मीति लोकक्षयकृत् लोकानां क्षयं करोतीति लोकक्षयकृत् प्रवृद्धः प्रवृद्धिं गतो यदर्थं प्रवृत्तस्तत् शृणु लोकान्समाहर्तुं संहर्तुमिहास्मिन्काले प्रवृत्तः ऋतेऽपि विनापि त्वां त्वां न भविष्यंति भीष्मद्रोणकर्णप्रभृतयः ॥ सर्वे येभ्यस्तवाशंका ये चावस्थिताः प्रत्यनीकेषु अनीकमनीकं प्रति प्रत्यनीकं तेषु प्रत्यनीकेषु योधाः योद्धारः ॥ ५ ॥ यस्मादेवं ॥ तस्मात्त्वमुत्तिष्ठ यशो लभस्व जित्वा शत्रून्भुंक्ष्व राज्यं समृद्धं ॥ मयैवैते निहताः पूर्वमेव निमित्तमात्रं भव सव्यसाचिन् ॥ ३३ ॥ तस्मात्त्वमुत्तिष्ठ भीष्मप्रभृतयोऽतिरथा अजेया देवैरप्यर्जुनेन जिता इति यशो लभस्व केवलं पुण्यैस्तर्हि न तत्प्राप्यते ॥ जित्वा शत्रून् दुर्योधनप्रभृतीन्भुंक्ष्व राज्यं समृद्धं असपत्नमकं

॥ टकं समृद्धं ॥ ५ ॥

यशोलाभ नभिनयति ॥ भीष्मेति ॥ किं तेनापुमर्थेनेत्याशंक्याह ॥ पुण्यैरिति ॥ राज्यभोगे अपेक्षिते किमनपेक्षितेनेत्या ॥ शंक्याह ॥ जित्वेति ॥ ५ ॥

गी० टी० ॥
॥ राम

भीष्मादिष्वतिरथेषु कुतो जयाशंकेत्याशंक्याह ॥ मयेति ॥ तर्हि मम न मारणार्थं न मे प्रवृत्तिस्तत्राह ॥ निमित्तेति ॥ सव्यसाचिपदं
विभजते ॥ वामेनेति ॥ ३३ ॥ मयैवेत्यादिनोक्तं प्रपंचयति द्रोणं चेति ॥ किमिति मैकतिविदेवात्र द्रोणादयो [illegible] गण्यंते नु ॥
आह ॥ येष्विति ॥ द्रोणादिषु कुतः शंकेत्याशंक्य द्वयोः शंकानिमित्तमाह ॥ तत्रेत्यादिना ॥ जयद्रथोऽपि शंकानिमित्तमाह ॥ तथेति ॥

मयैवैते निहताः निश्चयेन हताः पूर्वमेव प्राणैर्वियोजिता निमित्तमात्रं भव हे सव्यसाचिन् ॥ वामेन हस्तेन शराणां क्षे-
पात् सव्यसाची उच्यतेऽर्जुन ॥ द्रोणं च भीष्मं च जयद्रथं च कर्णं तथान्यानपि योधवीरान् ॥ मया हतांस्त्वं जहि मा व्य-
थिष्ठा युध्यस्व जेतासि रणे सपत्नान् ॥ ३४ ॥ द्रोणं च येषु येष्वर्जुनस्याशंका तांस्तान् व्यपदिशति भगवान् मया हता-
निति ॥ तत्र द्रोणभीष्मयोस्तावत् प्रसिद्धमाशंकाकारणं द्रोणो धनुर्वेदाचार्यो दिव्यास्त्रसंपन्न आत्मनश्च विशेषतो
गुरुर्गरिष्ठः भीष्मः स्वच्छंदमृत्युर्दिव्यास्त्रसंपन्नश्च परशुरामेण द्वंद्वयुद्धमगमन् न च पराजितस्तथा जयद्रथो यस्य
पिता तपश्चरति मम पुत्रस्य शिरो भूमौ पातयिष्यति यस्तस्यापि शिरः पतिष्यतीति कर्णोऽपि वासवदत्तया शक्त्या त्वमोघ-
या संपन्नः सूर्यपुत्रः कानीनः ॥ ३४ ॥

दिव्यास्त्रसंपन्नत्वरत्तिसंबंधः ॥ तत्राशंकायां कारणांतरमाह ॥ यस्येति ॥ कर्णेऽपि न कारणं कथयति ॥ कर्णोऽपीति पूर्ववदेव संबंधः ॥
हेत्वंतरमाह ॥ वासवेति ॥ सा खल्वमोघा पुरुषमेकमत्तं न समर्थैषा न पित्रैव निवर्तने जन्मनापि तस्याशंकनीयत्वमाह ॥ सूर्ये-
ति ॥ कुंती हि कन्याहं वसच्छायां मंत्रप्रभावं ज्ञातुं आदित्यमाजुहाव तत्तत्स्थान एवाक्षच्छायामयमुद्भवत्तदाह ॥ कानीन इति ॥

आ० ११
२१२ ॥ राम ॥

एतदेवाभिप्रेत्यकर्णग्रहणमित्याह॥यतइतिउक्तेष्वन्येष्वपिचनत्वयाशंकितव्यमित्याह॥मयेति॥३४॥पराजयभियाक
रिष्यतिसंधिमितिबुद्ध्यासंजयोराज्ञेवृत्तांतमुक्तवानित्याह॥संजयइति॥पूर्वोक्तवचनंकालोस्मीत्यादिविश्वरूपदर्शनद

यतोऽतस्त्वन्नाम्नैवनिर्दिशोमयाहतांस्त्वंजहिनिमित्तमात्रेणमाव्यथिष्ठास्तेभ्योभयंमाकार्षीः॥युध्यस्व॥जेतासि
दुर्योधनप्रभृतीन्रणेयुद्धेसपत्नान्शत्रून्॥संजयउवाच॥एतच्छ्रुत्वावचनंकेशवस्यकृतांजलिर्वेपमानःकि
रीटी॥नमस्कृत्वाभूयएवाहकृष्णंसगद्गदंभीतःप्रणम्य॥३५॥एतच्छ्रुत्वावचनंकेशवस्यपूर्वोक्तंकृतांजलिःसन्॥
वेपमानःकंपमानःकिरीटीनमस्कृत्वाभूयएवपुनरेवाहोक्तवान्कृष्णंसगद्गदंसहगद्गदयावाचामंदशब्देनभयावि
ष्टस्यदुःखाभिघातात्स्नेहाविष्टस्यचहर्षोद्भवात्अश्रुपूर्णनेत्रत्वेसतिश्लेष्मणाकंठावरोधस्ततश्चवाचो
ऽपाटवंमंदशब्दत्वंयत्सगद्गदस्तेनसहवर्ततइतिसगद्गदंवचनमाहेतिवचनंक्रियाविशेषणमेतत्॥भीतभीतः
पुनःपुनर्भयाविष्टचेताःसन्॥प्रणम्यप्रह्वीभूत्वाआहेतिव्यवहितेनसंबंधः॥अत्रावसरेसंजयवचनंसाभि
प्रायं॥कथंद्रोणादिष्वर्जुनेननिहतेषुजयेषुचतुर्षुनिराश्रयोदुर्योधनोनिहतएवेतिमत्वाधृतराष्ट्रोजयंप्र
तिनिराशःसन्आत्मनःसंधिंकरिष्यतिततःशांतिरुभयेषांभविष्यतीतितदपिनाश्रौषीत्धृतराष्ट्रोभवित
व्यवशात्

रणयामर्जुनस्यभगवतासंवादवचनंकिमितिसंजयोराज्ञेप्रज्ञिजपदित्याशंक्यतदुक्तेस्तात्पर्यमाह॥अत्रेति॥तमेवाभि
प्रायंप्रश्नद्वाराविशदयति॥कथमित्यादिनाहिसंजयवचनंश्रुत्वाकिमितिराजासंधिंनकारयामासेतितत्राह॥तदपी
॥ति॥

ग, कीतय

✓ [illegible] हेतु

ग५

साभि

गी०भा०टी०
२ ॥

किंतर्ह्यर्जुनो भगवंतं प्रति सगद्गदं वचनमुक्तवानित्यत आह ॥ अर्जुन इति ॥ विषयविशेषणत्वमेव व्यनक्ति । युक्तमिति ॥ भगवतो हर्षादिविषयत्वं युक्तमित्यत्र हेतुमाह ॥ यत इति ॥ तव प्रकीर्त्या हर्षवदनुरागं च गच्छति जगदित्याह ॥ नद्येतिं न च्चे ।

अर्जुन उवाच ॥ स्थाने हृषीकेश तव प्रकीर्त्या जगत्प्रहृष्यत्यनुरज्यते च ॥ रक्षांसि भीतानि दिशो द्रवंति सर्वे नमस्यंति च सिद्धसंघाः ॥ २६ ॥ स्थाने युक्तं किं तव प्रकीर्त्या त्वन्माहात्म्यकीर्तनेन श्रुतेन हृषीकेश यत् जगत् प्रहृष्यति प्रहर्षमुपैति तत् स्थाने युक्तं इत्यर्थः ॥ अथवा विषयविशेषणं स्थान इति ॥ युक्तो हर्षादेर्विषयो भगवान् यत ईश्वरः सर्वात्मा सर्वभूतसुहृच्चेति ॥ तथा अनुरज्यते च अनुरागं चोपैति ॥ तच्च विषय इति व्याख्येयं ॥ किं च रक्षांसि भीतानि भयाविष्टानि दिशो द्रवंति गच्छंति पलायंते तच्च स्थाने विषये । सर्वे च नमस्यंति नमस्कुर्वंति च सिद्धसंघाः सिद्धानां कपिलादीनां समुदायाः तच्च स्थाने भगवतो हर्षादिविषयत्वे हेतुं दर्शयति ॥ कस्माच्च ते न नमेरन्महात्मन् गरीयसे ब्रह्मणोऽप्यादिकर्त्रे ॥ अनंत देवेश जगन्निवास त्वमक्षरं सदसत्तत्परं यत् ॥ ३७ ॥ कस्माच्च हेतोस्ते तुभ्यं न नमेरन् न नमस्कुर्युः हे महात्मन् गरीयसे ॥ ५२ ॥ ॥ ॥ ॥ ॥ ॥

नं त्यनुरागगर्भैर्नरक्षःसु जगदेकदेशभूतेषु प्रतिपक्षेषु कुतो जगतो भगवति हर्षानुरागाविति आशंक्याह ॥ किंचेति इतश्च जगतो भगवति हर्षादि युक्तमित्याह ॥ सर्वे इति ॥ ३६ ॥ उक्तेऽर्थे हेत्वर्थत्वेनोत्तरश्लोकमवतारयति ॥ भग

भा० ११
२१३ ॥

॥ श्रीराम ॥

महात्मत्वमक्षरं चेत्यनेन त्वं गुरुतरत्वान्नमस्कारादियोग्यत्वमाह॥ गुरुतरायेति॥ तत्रैव हेत्वंतरमाह॥ यत इति॥ महात्मत्वादि हेतून् नामु
क्त्वानंतत्वमाह॥ अनंत इति॥ तत्रैव हेत्वंतराणि सूचयति॥ हेऽनंतेति॥ हेऽनंतेति॥ अनवच्छिन्नत्वं सर्वदेवनियंतृत्वं सर्वजगदा
श्रयत्वं च तव नमस्कारादियोग्यत्वे कारणमित्यर्थः॥ तत्रैव हेत्वंतरमाह॥ त्वमिति॥ तत्र मानमाह॥ यदिति॥ कथमेकस्यैव

गुरुतराय यतो ब्रह्मणो हिरण्यगर्भस्यापि आदिकर्त्ता कारणमतस्तस्मै आदिकर्त्रे कथमेते न नमस्कुर्युरतो हर्षादी
नां नमस्कारस्यावस्थानं त्वं अर्हो विषय इत्यर्थः॥ हे अनंत देवेश जगन्निवास त्वमक्षरं तत्परं यद्वेदांतेषु श्रूयते॥ किं
तदक्षरं तु सदसत् सच्च विद्यमानं असच्च यत्र नास्तीति बुद्धिस्ते उपधानभूते सदसती यस्याक्षरस्य॥ यद्द्वारेण सदसदिति सु
पचर्यते न परमार्थतस्तत्सदसतः परं तत् यदक्षरं वेदविदो वदंति॥ त्वमेव नान्यदित्यभिप्रायः॥ पुनरपि स्तौति॥ त्वमा
दिदेवः पुरुषः पुराणस्त्वमस्य विश्वस्य परं निधानं॥ वेत्तासि वेद्यं च परं च धाम त्वया ततं विश्वमनंतरूप॥ ३८॥-
त्वमादिदेवो जगतः स्रष्टृत्वात् पुरुषः पुरिशयनात्॥ पुराणश्चिरंतनः॥ ५॥ श्रीरामाय नमः॥ ५॥ ॥५॥
रूपत्वं तदाह॥ तेइति॥ कथं सतो असतश्चाक्षरं प्रत्युपाधित्वं तदाह॥ यद्द्वारेति॥ तत्परं यदित्येतद्व्याचष्टे॥ परमार्थतस्त्विति॥ ३७
णा भगवतो नमस्कारादियोग्यत्वमुक्तं संप्रति जगत्स्रष्टृत्वादिनापि तद्योग्यत्वमस्तीति द्वारा दर्शयति॥ पुनरपीति॥
शो पुरुषो हिरण्यगर्भ इति पक्षं प्रत्याह॥ पुराण इति॥ स्रष्टृत्वं निमित्तत्वमेवेति तटस्थेश्वरवादिनस्तान्प्रत्युक्तं॥

म

रघु

...हा प्रलयाहा वित्यादि पदमवां नर प्रलयार्थं ॥ ईश्वरस्योभयथा कारणत्वं सर्वज्ञत्वेन साधयति ॥ किंचेति ॥ वेद्यवेदि
...ानुपपत्ति [illegible] माशंक्याह ॥ यद्येति ॥ मुक्त्यालंबनस्य ब्रह्मणोऽर्थांतरत्वं शंकित्वोक्तं परं चेति ॥ यत्परमं पदं न
...ते सेवंधः ॥ नस्य पदर्णत्वमाह ॥ त्वयेति ॥

॥ त्वमेवास्य विश्वस्य परं प्रलह्वं निधानं निधीयते यस्मिन् जगत्सर्वं महा
प्रलयादाविति ॥ किंच ॥ वेत्तासि त्वं विश्वस्यैव वेद्यजातस्य च वेद्यं वेदनार्हं त्वं चासि परं च धाम परमं पदं वैष्णवं ॥ त्वं
त्वया ततं व्याप्तं विश्वं समस्तम् अनंतरूप अनंतो न विद्यते नवरूपाणां किंच ॥ वायुर्यमोऽग्निर्वरुणः शशांकः प्रजापतिस्त्वं
प्रपितामहश्च ॥ नमो नमस्तेऽस्तु सहस्रकृत्वः पुनश्च भूयोऽपि नमो नमस्ते ॥ ३९ ॥ वायुस्त्वं यमश्चाग्निर्वरुणोऽपां
पतिः शशांकश्चंद्रमाः प्रजापतिस्त्वं कश्यपादिः प्रपितामहश्च पितामहस्यापि पिता प्रपितामहः ॥ पितामहो ब्रह्मा
ब्रह्मणोऽपि पितारस्त्वर्थः ॥ नमो नमस्ते तुभ्यमस्तु सहस्रकृत्वः पुनश्च भूयोऽपि नमो नमस्ते बहुशो नमस्कार क्रियाभ्या
॥ सावृत्तिगणनं कृत्वा सुचोच्यते ॥ ७ ॥

व्याप्यव्यापकत्वेन भेदं शंकित्वाकल्पितत्वात्तस्यमैव मिसाह ॥ अनंतेनेति ॥ ३८ ॥ नस्य सर्वात्मकत्वे हेतुं तरमाह ॥ किंचेति ॥ कश्यपा
दिरित्यादिशब्देन ~~भेदं संकित्वं~~ विराडादयो गृह्यंते ॥ पितामहो ब्रह्मा तस्य पितास्त्रत्रात्मांतर्यामीत्याह ॥ ब्रह्मणोपीति सर्वा देवता
स्त्वमेवेत्युक्तेफलितमाह ॥ नम इति ॥ सहस्रकृत्वइतिकृत्वसोर्विवक्षितमर्थमाह ॥ बहुशइति ॥ ७ ॥ श्रीरामचंद्रप्रसन्न ॥ ७ ॥ ०

आ० ११ ॥
२१४ ॥ राम ॥

पुनरुक्तितात्पर्यमाह ॥ पुनश्चेति ॥ श्रद्धाभक्त्योरतिशयात्कृतेपि नमस्कारे परितोषाभावो बुद्धेरात्मनो ऽत्र त्वं प्रत्ययराहित्यं तद्दर्शनार्थं पुनरुक्तिरित्यर्थः ॥३७॥ विधांतरेण भगवंतं स्तुत्वा नमस्कुर्वन्नभिमुखीकरोति ॥ तथेति ॥ यस्यां दिशि सन्निहितोसीति सा पूर्वादिदिगुच्यते तस्यां व्यवस्थितं सर्वं त्वमेव तस्मै तुभ्यं नमः पुरस्तादित्याह ॥ नमइति ॥ अथशब्दं समुच्चये पश्चादपि स्थितं सर्वं त्वमेव

पुनश्च सर्वतोपि इति श्रद्धाभक्त्यतिशयात्परितोषमात्मनो दर्शयति ॥ तथा नमः पुरस्तादथ पृष्ठतस्ते नमोस्तु ते सर्वत एव सर्व ॥ अनंतवीर्यामितविक्रमस्त्वं सर्वं समाप्नोषि ततोऽसि सर्वः ॥४०॥ नमः पुरस्तात् पूर्वस्यां दिशि तुभ्यं अथ पृष्ठतः पश्चादपि ते नमोस्तु ते सर्वत एव सर्वासु दिक्षु सर्वत्र स्थिताय हे सर्व अनंतवीर्यामितविक्रमो ऽनंतं वीर्यं यस्यामितो विक्रमो यस्य वीर्यं सामर्थ्यं विक्रमः पराक्रमो वीर्यवानपि कश्चित् शस्त्रादिविषये न पराक्रमते मंदपराक्रमो वा ॥ त्वं तु अनंतवीर्यश्चामितविक्रमश्चेत्यनंतवीर्यामितविक्रमः सर्वं समस्तं जगत् समाप्नोषि सम्यगेकेनात्मना व्याप्नोषि ॥ यतस्ततस्तस्मात् असि भवसि सर्वस्त्वया विना भूतं न किंचिदस्तीत्यर्थः ॥४०॥

तस्मै ते तुभ्यं नमोस्त्वित्याह ॥ अथेति ॥ किं बहुना यावत्यो दिशः [illegible] स्तत्र सर्वत्र यद्वर्तते तदशेषं त्वमेव तस्मै ते तुभ्यं प्रह्वीभावः स्यादित्याह ॥ नमोस्त्विति ॥ कृत्स्नं सर्वात्मत्वं सूचयति ॥ हे सर्वेति ॥ वीर्यविक्रमयोर्न पौनरुक्त्यमित्याह ॥ वीर्यमित्यादिना ॥ वीर्यवतो विक्र अनंतवी[illegible]चारादर्थपौनरुक्त्यमित्याशंक्याह ॥ वीर्यवानिति ॥ भगवति लोकतो विशेषमाह ॥ त्वं त्विति ॥ उक्तं सर्वात्मत्वं जगतः स्व[illegible]सर्वमिति ॥ सप्रपंचत्वं वारयति ॥ तयेति ॥४०॥ श्रीरामचंद्राय नमः ॥ श्रीगुरुमूर्तये नमः ॥ श्रीसर्वेश्वर ॥

त्मपराधंक्षामयति ।। यनइति ।। इदंशब्दार्थमाह ।। विश्वरूपमिति ।। नहिइदमित्यस्य महिमानमित्यस्य च सामानाधिकर
त्पयादित्याह ।। तवेति ।। पाठांतरसंभावनायां सामानाधिकरण्योपपत्तिमाह ।। तवेत्यादिना ।। यदुक्तवानस्मि तदहंक्षा
ना ऽहं त्वन्माहात्म्यापरिज्ञानादपराध्येतः ।। सखेति मत्वा प्रसदुक्तं हे कृष्ण हे यादव हे सखेति ।। अजानता महिमानं तवेदं म भंय
या प्रमादात्प्रणयेन वापि ।। ४१ ।। सखा समानवया इति मत्वा तांतां त्वा विपरीतबुद्ध्या प्रसभमभिभूय प्रसह्य यदुक्तं किं हे कृ
ष्ण हे यादव हे सखेति च ।। अजानता अज्ञानिनामत्त्वदेनं ।। किमजानतारत्याह ।। महिमानं माहात्म्यं तवेदमीश्वरस्य
विश्वरूपं तवेदं महिमानमजानतेति वैयधिकरण्येन संबंधः ।। तवेममिति पाठोयद्यस्ति तदा सामानाधिकरण्यमेव
मया प्रमादात् विक्षिप्तचित्ततया प्रणयेन वापि प्रणयो नाम स्नेहनिमित्तो विश्रंभस्तेनापि कारणेन यदुक्तवानस्मि ।। य
च्चावहासार्थमसत्कृतोऽसि विहारशय्यासनभोजनेषु ।। एकोऽथवाप्यच्युत तत्समक्षं तत्क्षामये त्वामहमप्रमेयं ।। ४२ ।।
यच्चावहासार्थं परिहासप्रयोजनार्थमसत्कृतोऽसि परिभूतोऽसि भवसि क्व विहारशय्यासनभोजनेषु ।। विहरणं विहारः ।।
पादव्यायामः शयनं शय्या आसनमास्थायिका भोजनमदनमित्येतेषु विहारशय्यासनभोजनेषु ।। एकः ।। ४२ ।। श्रीरामः

मयेत्वामिति संबंधः ।। ४१ ।। यदयुक्तमुक्तं न तत्क्षंतव्यमित्येव न किंतु यत्परिहासार्थं क्रीडादिषु त्वय्यपि तिरस्करणं तदपि सोढ
व्यमित्याह ।। यच्चेति ।। विहरणं क्रीडा व्यायामो वा शयनं तल्पादिकं ।। आस्थायिका सिंहासनादेरुपलक्षणमेतेषु विषय
।। मे देक्षिति यावत् ।।

अ० ११ ।।
२१५ ।। रा म ।।

एकशब्दो रहसि स्थितं एकाकिनं कथयतीत्याह ॥ परोक्षः सन्निति ॥ प्रत्यक्षं परोक्षं वा तदसत्करणं परिभवनं यथास्या
त्तथा यन्मया त्वमसत्कृतोसि तत्सर्वमिति योजनामंगीकृत्याह ॥ तच्छब्द इति ॥ क्षमाकारयितव्ये सत्तापरिमितत्वं हेतुमा
ह ॥ अप्रमेयमिति ॥ ४२ ॥ वाचनिकं मदीयमपराधजातं त्वया क्षन्तव्यमित्युक्तमिदानीं मदीयोपराधो न त्वया गृहीतव्यो गृ
हीतोपि सोढव्य इत्याह ॥ यत इति ॥ गुणाधिक्यात्पूजार्हत्वं ॥ धर्माधर्मात्मज्ञानसंप्रदायप्रवर्तकत्वेन शिक्षयितृत्वाद्गुरुत्वं ॥ ५४

परोक्षः सन्नसत्कृतोऽसि परिभूतोऽसि । अथवाऽपि हे अच्युत तत्समक्षं तच्छब्दः क्रियाविशेषणार्थः । प्रत्यक्षं वाऽसत्कृतो
सि ॥ तत्सर्वमपराधजातं क्षामये क्षमां कारये त्वामहमप्रमेयं ॥ यतस्त्वं पितासि लोकस्य चराचरस्य त्वमस्य पूज्यश्च गु
रुर्गरीयान् ॥ न त्वत्समोस्त्यभ्यधिकः कुतोऽन्यो लोकत्रयेप्यप्रतिमप्रभाव ॥ ४३ ॥ पितासि जनक पितासि लोकस्य प्राणि
जातस्य चराचरस्य स्थावरजंगमस्य । न केवलं त्वमस्य जगतः पिता पूज्यश्च पूजार्हो यतो गुरुर्गरीयान् गुरुतरः ॥ क
स्माद्गुरुतरस्त्वमित्याह न त्वत्समस्त्वत्तुल्योऽस्ति न हीश्वरद्वयं संभवति ॥ अनेकेश्वरत्वे व्यवहारानुपपत्तेः ॥ ४३ ॥ ०

अनेकत्वेपि सर्वात्मनां गुरुत्वाद्गरीयस्त्वं ॥ तदेव प्रश्नद्वारा साधयति ॥ कस्मादिति ॥ ईश्वरांतरं तु त्वत्समं भविष्यतीत्याशंक्याह ॥
जगतः स्व ईश्वरभेदे प्रत्येकं स्वातंत्र्यात्तदेकमत्यैहे त्वभावात् नानामतित्वे चैकस्य सिसृक्षायामन्यस्य संजिहीर्षासंभवा
गेयादयुक्तमीश्वरनानात्वमित्यर्थः ॥ ॥ ॥ ४३ ॥

अ०ी०
।।राम

अभ्यधिकाः सत्त्वं कैमुतिन्यायेन दर्शयति ।। तत्स्मरन्निति त्रयेहेतुमवतार्य व्याकरोति ।। अप्रतिमेत्यादिना ।। ४३ ।। निरतिशयप्रभावत्वं हे
न्तुः स्वप्रसादये प्रणामपूर्वकं त्वामित्याह ।। यतइति ।। प्रसादानंतरं भगवता कर्तव्यं प्रार्थयते ।। त्वं पुनरिति ।। प्रियइव प्रियाया

त्वत्समः एवतावदन्यो न संभवति । कुतएवान्योऽभ्यधिकः स्यात् लोकत्रयेपि सर्वस्मिन् अप्रतिम प्रतिमं प्रभाव प्रतिमीयते यया सा प्रति
मा न विद्यते प्रतिमा यस्य तव प्रभावस्य स त्वमप्रतिमप्रभावः हे अप्रतिमप्रभाव निरतिशयप्रभाव इत्यर्थः ।। यत एवं । तस्मात्प्रणम्य
प्रणिधाय कायं प्रसादये त्वामहमीशमीड्यं ।। पितेव पुत्रस्य सखेव सख्युः प्रियः प्रियायार्हसि देव सोढुं ।। ४४ ।। तस्मात्प्रणम्य
नमस्कृत्य प्रणिधाय प्रकर्षेण नीचैः कृत्वा कायं शरीरं प्रसादये प्रसादं कारये त्वामहमीशमीशितारमीड्यं स्तुत्यं । त्वं पुनः पु
त्रस्यापराधं पिता यथा क्षमते सर्वं सखा इव च सख्युरपराधं यथा वा प्रियः प्रियाया अपराधं क्षमते ।। एवमर्हसि
हे देव सोढुं प्रसहितुं क्षंतुं इत्यर्थः ।। अदृष्टपूर्वं हृषितोस्मि दृष्ट्वा भयेन च प्रव्यथितं मनो मे ।। तदेव मे दर्शय देवरू
पं प्रसीद देवेश जगन्निवास ।। ४५ ।। अदृष्टपूर्वं निकदाचिदपि दृष्टपूर्वमिदं विश्वरूपं तव मयास्मैर्वर्तितेहं दृष्ट्वा
हृषितोस्मि भयेन च प्रव्यथितं प्रचलितं मनो मे अतस्तदेव मे मम दर्शय देवरूपं ।। यन्मत्सुखं प्रसीद देवेश
जगन्निवास जगतां निवासो जगन्निवासो हे जगन्निवास ।। किंच ।। ५ ।। श्रीरामचंद्राय नमः ।। ५ ।। ०

म

इतीव करोतु षष्ठ्यंतो प्रियायार्हसीति प्रियायाः अर्हसि संधिः ।। क्षंतुं मदपराधजातमिति शेषः ।। ४४ ।। हेतुक्तिपूर्वकं विश्वरूपोपसं
हारं प्रार्थयते ।। अदृष्टेति ।। हृषितो हृष्टः स्फुट इति यावत् । भयेन तद्धेतुविकृतदर्शनेनेत्यर्थः ।। ४५ ।। श्रीरामनारायणवासुदेव ।। ०

अ०११।।
२१६।।
राम।।

तदेव दर्शयेत्युक्तं किंतदित्यपेक्षायामाह ॥ किरीटिनमिति ॥ चक्रंहस्तेयस्यतमिसुत्सलिंगृहीत्वाह ॥ चक्रेति ॥ मदीयेच्छाफलपर्यंताकर्तव्ये
त्याह ॥ यतनरत्ति ॥ चतुर्भुजत्वे कथं सहस्रबाहुत्वं तत्राह ॥ वर्तमानिकेनेति ॥ सति विश्वरूपे कथं सर्वरूपमात्वक्तं तत्राह ॥ ५ ॥ ५

किरीटिनं गदिनं चक्रहस्तमिच्छामि त्वां द्रष्टुमहं तथैव ॥ तेनैव रूपेण चतुर्भुजेन सहस्रबाहो भव विश्वमूर्ते ॥ ४६ ॥ किरीटिनं । किरी
टवंतं तथा गदिनं गदावंतं । चक्रहस्तमिच्छामि प्रार्थये त्वा त्वां द्रष्टुमहं तथैव पूर्ववदित्यर्थः ॥ यत एवं तस्मात्तेनैव रूपेण चतुर्भुजे
न वसुदेवपुत्ररूपेण सहस्रबाहो न वर्तमानिकेन विश्वरूपेण भव विश्वमूर्ते तूपसंहृत्य विश्वरूपं तथैव पूर्वरूपेण भवेत्यर्थः ॥
अर्जुनं भीतमुपलभ्य संहृत्य विश्वरूपं प्रियवचनेन आश्वासयन् ॥ श्रीभगवानुवाच ॥ मया प्रसन्नेन तवार्जुनेदं रूपं परं दर्शित
मात्मयोगात् ॥ तेजोमयं विश्वमनंतमाद्यं यन्मे त्वदन्येन न दृष्टपूर्वं ॥ ४७ ॥ मया प्रसन्नेन प्रसादो मे त्वय्यनुग्रहबुद्धिस्तद्वता प्र
सन्नेन मया तव हे अर्जुन इदं परं रूपं विश्वरूपं दर्शितमात्मयोगात् ॥ आत्मन ऐश्वर्यस्य सामर्थ्यात्तेजोमयं तेजःप्रायं विश्वं स
मस्तमनंतमंतरहितमादौ भवमाद्यं यद्रूपं मे मम त्वदन्येन त्वत्तोऽन्येन केनचिन्न दृष्टपूर्वं ॥ ५ ॥

उपसंहृत्येति ॥ ४६ ॥ अर्जुने
न स्थाने हृषीकेशेत्यादिनाउक्तस्य भगवतो वचनमवतारयति ॥ अर्जुनमिति ॥ भगवत्प्रसादैकोपायलभ्यं चेनद्दर्शनमित्या
शयेनाह ॥ मयेति ॥ ५ ॥

॰भा॰टी॰
१७ ।।

तत्त्वेनप्रकृतंदर्शनंपरामृश्यते वेदाध्ययनात्पृथग्यज्ञाध्ययनग्रहणं पुनरुक्तेरयुक्तमित्याशंक्याह ।। वेदेति ।। नचवेदाध्ययन
ग्रहणादेवयज्ञविज्ञानमपिगृहीतमध्ययनस्यार्थावबोधांतत्वादितिवाच्यं ।। तस्याक्षरग्रहणांततायावृद्धैः साधितत्वा

आत्मनोममरूपदर्शनेनकृतार्थएवंत्वंसंवृत्तइतिननस्तत्स्तौति ।। नवेदयज्ञाध्ययनैर्नदानैर्नचक्रियाभिर्नतपो
भिरुग्रैः ।। एवंरूपंशक्यअहंनृलोकेद्रष्टुंत्वदन्येनकुरुप्रवीर ।।४८।। नवेदयज्ञाध्ययनैश्चतुर्णामपिवेदानामध्य
यनैर्यज्ञाध्ययनैश्च ।। वेदाध्ययनैरेवयज्ञाध्ययनस्यसिद्धत्वात्पृथक्यज्ञाध्ययनग्रहणंयज्ञविज्ञानोपूरैः एवंरूपो
यथादर्शितंविश्वरूपंयस्यसोऽहमेवंरूपः शक्योनशक्यः अहंनृलोकेमनुष्यलोके × लक्षणार्थं । तथानदानैस्तुलापुरुषा
दिभिर्नचक्रियाभिरग्निहोत्रादिभिः श्रौतादिभिः नापितपोभिरुग्रैश्चांद्रायणादिभिरुग्रैर्घोरैः × द्रष्टुंत्वदन्येनत्वत्तोऽन्येन
।। कुरुप्रवीर ।।४८।।

अ॰ ११ ।।
२१७ ।। रामः ।।

दितिभावः ।। श्लोकपूरणार्थमसंहिताकरणं ।। त्वत्तोऽन्येनमदनुग्रहविहीनेनेतिशेषः ।।४८।। श्रीरामचंद्रायनमः ।।४८।। श्री

विश्वरूपदर्शनमेवं स्तुत्वा पश्चात्स्माद्दृश्यमानाद्विभेषि न हि तदुपसंहरामीत्याह ॥ मा ते व्यथेति ॥ बहुविधमनुभूतत्वमभिप्रेत्य तद्देवेत्युक्तं ॥ इदमिति प्रत्यक्षयोग त्वं ॥ ४९ ॥ तदिदं रूपं राज्ञे संजयो निवेदितवानित्याह ॥ संजय इति ॥ तथाभूतं वचनं मया प्रसन्नेने

मा ते व्यथा मा च विमूढभावो दृष्ट्वा रूपं घोरमीदृङ्ममेदं ॥ व्यपेतभीः प्रीतमनाः पुनस्त्वं तदेव मे रूपमिदं प्रपश्य ॥ ४९ ॥
मा ते व्यथा मा भूत् ते भयं मा च विमूढभावो विमूढचित्तता ॥ दृष्ट्वोपलभ्य रूपं घोरमीदृक् यथादर्शितं ममेदं व्यपेतभी
र्विगतभयः प्रीतमनाश्वसन् पुनर्भूयस्त्वं तदेव चतुर्भुजं शंखचक्रगदाधरं तवेष्टं रूपमिदं प्रपश्य ॥ संजय उवाच ॥
इत्यर्जुनं वासुदेवस्तथोक्त्वा स्वकं रूपं दर्शयामास भूयः ॥ आश्वासयामास च भीतमेनं भूत्वा पुनः सौम्यवपुर्महा
त्मा ॥ ५० ॥ इत्येवमर्जुनं वासुदेवस्तथाभूतं वचनमुक्त्वा ॥ स्वकं वसुदेवगृहे जातं रूपं दर्शयामास दर्शितवान् ॥
भूयः पुनराश्वासयामास च आश्वासितवां[illegible]श्च भीतमेनं भूत्वा पुनः सौम्यवपुः सन्नदेहो महात्मा ॥ ०
प्र २

सादिचतुर्भुजां किंतस्य रूपस्य परिचितपूर्वस्य प्रदर्शनेन प्रसन्नदेहत्वेन [illegible]चार्जुनं प्रत्याश्वासनं भगवतो युक्तमिति तत्र हेतुमाह ॥ महात्मेति ॥ ५० ॥

गी०
॥राम

अभ्यधिकासत्वंकैमुतिन्यायेनदर्शयति॥तत्समर्तितत्रहेतुमवतार्यव्याकरोति॥अप्रतिमेत्यादिना॥४३॥निरतिशयप्रभावत्वंहे
तुकृत्यप्रसादयेप्रणामपूर्वकंत्वामित्याह॥यतइति॥प्रसादानंतरंभगवताकर्त्तव्यंप्रार्थयते॥त्वंपुनरिति॥प्रियइवप्रियाया

त्वत्समएवतावदन्योनसंभवति॥कुतएवान्योऽभ्यधिकःस्यात्॥लोकत्रयेपिसर्वस्मिन्अप्रतिम~~प्रतिमं~~प्रभावप्रतिमीयतेयथासाप्रति
मा॥नविद्यतेप्रतिमायस्यतवप्रभावस्यसत्वमप्रतिमप्रभावःहेअप्रतिमप्रभावनिरतिशयप्रभावइत्यर्थः॥यतएवं॥तस्मात्प्रणम्य
प्रणिधायकायंप्रसादयेत्वामहमीशमीड्यं॥पितेवपुत्रस्यसखेवसख्युःप्रियःप्रियायार्हसिदेवसोढुं॥४४॥तस्मात्प्रणम्य
नमस्कृत्वाप्रणिधायप्रकर्षेणनीचैःकृत्वाकायंशरीरंप्रसादयेप्रसादंकारयेत्वामहमीशमीशितारमीड्यंस्तुत्यं॥त्वंपुनःपु
त्रस्यापराधंपितायथाक्षमतेसर्वंसखाइवचसख्युरपराधंयथावाप्रियःप्रियायाअपराधंक्षमते॥एवमर्हसि
हेदेवसोढुंप्रसहितुंक्षंतुंइत्यर्थः॥अदृष्टपूर्वंहृषितोस्मिदृष्ट्वाभयेनचप्रव्यथितंमनोमे॥तदेवमेवदर्शयदेवर
पंप्रसीददेवेशजगन्निवास॥४५॥अदृष्टपूर्वंनिकदाचिदपिदृष्टपूर्वमिदंविश्वरूपंतवमयास्यैवातिहृष्टंदृष्ट्वा
हृषितोस्मिभयेनचप्रव्यथितंप्रचलितंमनोमेअतस्तदेवमेममदर्शयदेवरूपं॥यन्मत्सुखंप्रसीददेवेश
जगन्निवासजगतांन्निवासोजगन्निवासोहेजगन्निवास॥किंच॥६॥श्रीरामचंद्रायनमः॥६॥०

इतीवकारोनुषज्यतेप्रियायार्हसीतिप्रियाहसऽसंधिः॥क्षंतुंमदपराधजातमितिशेषः॥४४॥हेतुक्तिपूर्वकंविश्वरूपोपसं
हारंप्रार्थयते॥अदृष्टेति॥हृषितोहृष्टस्तुष्टइतियावत्॥भयेनतद्धेतुविकृतदर्शनेनेत्यर्थः॥४५॥श्रीरामनारायनवासुदेव॥०

म

अ०११॥
२१६॥
राम॥

पे
न देवद्दर्श पेत्यक्तं किं तद्दिव्यैक्षो यामाह ॥ किरीटिनमिति ॥ चक्रंहस्तेयस्य तमिमुत्सत्तिं गृहीत्वाह ॥ चक्रेति ॥ मदीयेच्छा फलत्वपर्यंताकर्तव्ये
त्याह ॥ यन्नरत्नि ॥ चतुर्भुजत्वे कथं सहस्रबाहुत्वं तत्राह ॥ वर्तमानिकेनेति ॥ सति विश्वरूपे कथं पूर्वरूपप्राप्त्यक्तं तत्राह ॥ ५ ॥ ५

किरीटिनं गदिनं चक्रहस्तमिच्छामि त्वां द्रष्टुमहं तथैवा तेनैव रूपेण चतुर्भुजेन सहस्रबाहो भव विश्वमूर्ते ॥ ४६ ॥ किरीटिति ॥ किरी
टवंतं तथा गदिनं गदावंतं चक्रहस्तमिच्छामि प्रार्थये त्वां द्रष्टुमहं तथैव पूर्ववदित्यर्थः ॥ यत एवं तस्मात्तेनैव रूपेण चतुर्भुजे
न वसुदेवपुत्ररूपेण सहस्रबाहो वर्तमानिकेन विश्वरूपेण भव विश्वमूर्ते उपसंहृत्य विश्वरूपं तथैव पूर्वरूपेण भवेत्यर्थः ॥
अर्जुनं भीतमुपलभ्य संहृत्य विश्वरूपं प्रियवचनेन आश्वासयन् ॥ श्रीभगवानुवाच ॥ मया प्रसन्नेन तवार्जुनेदं रूपं परं दर्शित
मात्मयोगात् ॥ तेजोमयं विश्वमनंतमाद्यं यन्मे त्वदन्येन न दृष्टपूर्वं ॥ ४७ ॥ मया प्रसन्नेन प्रसादो मे त्वय्यनुग्रहबुद्धिस्तद्वता प्र
सन्नेन मया तव हे अर्जुन इदं परं रूपं विश्वरूपं दर्शितमात्मयोगात् ॥ आत्मन ऐश्वर्यस्य सामर्थ्यात्तेजोमयं तेजःप्रायं विश्वं स
मस्तमनंतमंतरहितमाद्यं भवमाद्यं यद्रूपं मे मम त्वदन्येन त्वत्तोऽन्येन केनचिन्न दृष्टपूर्वं ॥ ५ ॥

उपसंहृत्येति ॥ ४६ ॥ अर्जुने
नस्थाने हृषीकेशेत्यादिना उक्तस्य भगवतो वचनमवतारयन्ति ॥ अर्जुनमिति ॥ भगवत्प्रसादैकोपायलभ्यं चेन दर्शनमित्या
शयेनाह ॥ मयेति ॥ ५ ॥

नत्त्वेन प्रकृतं दर्शनं परामृश्यते वेदाध्ययनात्पृथग्यज्ञाध्ययनग्रहणं पुनरुक्तेरयुक्तमित्याशंक्याह ।। वेदेति ।। नच वेदाध्ययन
ग्रहणादेव यज्ञविज्ञानमपि गृहीतमध्ययनस्यार्थावबोधांतत्वादिति वाच्यं ।। तस्याक्षरग्रहणांततायावृद्धैः साधितत्वा

आत्मनो मम रूपदर्शनेन कृतार्थ एव त्वं संवृत्त इति न नस्तन् स्तौति ।। न वेदयज्ञाध्ययनैर्न दानैर्न च क्रियाभिर्न तपो
भिरुग्रैः ।। एवंरूपः शक्य अहं नृलोके द्रष्टुं त्वदन्येन कुरुप्रवीर ।।४८।। न वेदयज्ञाध्ययनैश्चतुर्णामपि वेदानामध्य
यनैर्यज्ञाध्ययनैश्च ।। वेदाध्ययनैरेव यज्ञाध्ययनस्य सिद्धत्वात् पृथक् यज्ञाध्ययनग्रहणं यज्ञविज्ञानोपरैः एवंरूपो
यथा दर्शितं विश्वरूपं यस्य सोऽहमेवंरूपः शक्यो न शक्यः अहं नृलोके मनुष्यलोके × लक्षणार्थं। तथा न दानैस्तुलापुरुषा
दिभिर्न च क्रियाभिरग्निहोत्रादिभिः श्रौतादिभिः नापि तपोभिरुग्रैश्चांद्रायणादिभिरुग्रैर्घोरैः × द्रष्टुं त्वदन्येन त्वत्तोऽन्येन
।। कुरुप्रवीर ।।५।।

दिति भावः ।। श्लोकपूरणार्थमसंहिताकरणं ।। त्वत्तोऽन्येन मदनुग्रहविहीनेनेति शेषः ।। ४८ ।। श्रीरामचंद्राय नमः ।। ५ ।। श्री

विश्वरूपदर्शनमेवं कृत्वा पश्यस्माद्दृश्यमानाद्बिभेषि नर्हि तदुपसंहरामीत्याह ॥ मा ते व्यथेति ॥ बहुविधमनुभूतत्वमभिप्रेत्य तदेवे-
स्तुत्कं ॥ इदमिति प्रत्यक्षयोगत्वं ॥ ४९ ॥ तदिदं वृत्तं राज्ञे स्तुतो निवेदितवानित्याह ॥ संजय इति ॥ तथाभूतं वचनं मया प्रसन्नेने

मा ते व्यथा मा च विमूढभावो दृष्ट्वा रूपं घोरमीदृङ्ममेदं ॥ व्यपेतभीः प्रीतमनाः पुनस्त्वं तदेव मे रूपमिदं प्रपश्य ॥ ४९ ॥
मा ते व्यथा मा भूत् ते भयं मा च विमूढभावो विमूढचित्तता ॥ दृष्ट्वोपलभ्य रूपं घोरमीदृक् यथा दर्शितं ममेदं व्यपेतभी-
र्विगतभयः प्रीतमनाश्च सन् पुनर्भूयस्त्वं तदेव चतुर्भुजं शंखचक्रगदाधरं तवेष्टं रूपमिदं प्रपश्य ॥ संजय उवाच ॥
रत्यर्जुनं वासुदेवस्तथोक्त्वा स्वकं रूपं दर्शयामास भूयः ॥ आश्वासयामास च भीतमेनं भूत्वा पुनः सौम्यवपुर्महा-
त्मा ॥ ५० ॥ इत्येवमर्जुनं वासुदेवस्तथाभूतं वचनमुक्त्वा ॥ स्वकं वसुदेवगृहे जातं रूपं दर्शयामास दर्शितवान् ॥
भूयः पुनराश्वासयामास च आश्वासितवां[redacted]श्च भीतमेनं भूत्वा पुनः सौम्यवपुः सन्नदेहो महात्मा ॥ ०
प्र २

त्यादि चतुर्भुजांकितस्य रूपस्य परिचितपूर्वस्य प्रदर्शनेन प्रसन्नदेहत्वेन चार्जुनं प्रत्याश्वासनं भगवतो युक्तमि-
सत्र हेतुमाह ॥ महात्मेति ॥ ५१ ॥

गी०भा०टी०
२१८ ।।

एवं भगवताश्वासितः सन्नर्जुनस्तं प्रत्युक्तवानित्याह ।। अर्जुन इति ।।५१।। उपास्यत्वाय विश्वरूपं स्तोतुं भगवदुक्तिमुत्थापयति ।।

अर्जुन उवाच ।। दृष्ट्वेदं मानुषं रूपं तव सौम्यं जनार्दन ।। इदानीमस्मि संवृत्तः सचेताः प्रकृतिं गतः ।।५१।। दृष्ट्वेदं मानुषं रूपं मत्सखं प्रसन्नं च तव सौम्यं जनार्दन इत्यर्दतेर्गतिकर्मणः असुराणां देवप्रतिपक्षभूतानां प्राणवियोजनाम् नरकादिगमयितृत्वाद्वा जनार्दन अभ्युदयनिःश्रेयसपुरुषार्थप्रयोजनं सर्वैः जनैर्याच्यत इति वा इदानीमधुनास्मि संवृत्तः संजातः किं सचेताः प्रसन्नचित्तः प्रकृतिं गतः स्वभावं गतश्चास्मि ।। श्रीभगवानुवाच ।। सुदुर्दर्शमिदं रूपं दृष्टवानसि यन्मम ।। देवा अप्यस्य रूपस्य नित्यं दर्शनकांक्षिणः ।।५२।। सुदुर्दर्शमिदं सुष्ठु दुःखेन दर्शनमस्येति सुदुर्दर्शमिदं रूपं दृष्टवानसि यन्मम ।। देवा अप्यस्य मम रूपस्य नित्यं सर्वदा दर्शनकांक्षिणः दर्शनेप्सवोऽपि न त्वमिव दृष्टवन्तो
।। न द्रक्ष्यंतीति चेत्यभिप्रायः ।। कस्मात् ।।

अ०११
२१८ ।। राम ।।

भगवानीति ।। तच्चनिस्त्रिकानामिदं रूपं द्रष्टुमशक्यमित्येतद्विशदयति ।। देवा इति ।।५२।। दर्शनोपायाभावात् दुर्दर्शत्वं इति शंकते ।। कस्मादिति ।।

वेदादिषूपायेषु सत्स्वपि भगवानुक्तरूपो न शक्यो द्रष्टुमित्याह ॥ नाहमिति ॥ नहि दर्शनायोग्यत्वाद्द्रष्टुमशक्यत्वमित्याशंक्याह ॥
द्रष्टवानिति ॥ ५३ ॥ केनोपायेन तर्हि द्रष्टुं शक्यो भगवानिति पृच्छति ॥ कथमिति ॥ शास्त्रीयस्यानद्वाराद्दर्शनं सफलं सिध्यतीत्याह ॥

नाहं वेदैर्न तपसा न दानेन न चेज्यया ॥ शक्य एवंविधो द्रष्टुं दृष्टवानसि मां यथा ॥ ५३ ॥ नाहं वेदैः ऋग्यजुःसामाथर्व-
वेदैश्चतुर्भिरपि न तपसोग्रेण चांद्रायणादिना न दानेन गोभूहिरण्यादिना न चेज्यया यज्ञेन पूजया वा शक्य एवं-
विधो यथादर्शितप्रकारो द्रष्टुं दृष्टवानसि मां यथा त्वं ॥ कथं पुनः शक्य इत्युच्यते ॥ भक्त्या त्वनन्यया शक्य अहमेवंवि-
धोऽर्जुन ॥ ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परंतप ॥ ५४ ॥ भक्त्या तु किंविशिष्टयेत्याह ॥ अनन्यया अपृथग्भूतया ॥ भगव-
तोऽन्यत्र पृथक् न कदाचिदपि या च भवति सा अनन्या भक्तिः सर्वैरपि करणैर्वासुदेवादन्यन्नोपलभ्यते यया तया भ-
क्त्या शक्योऽहमेवंविधो विश्वरूपप्रकारोऽर्जुन ज्ञातुं शास्त्रतो न केवलं ज्ञातुं शास्त्रतो द्रष्टुं च साक्षात्कर्तुं तत्त्वेन
तत्त्वतः प्रवेष्टुं च मोक्षं च गंतुं हे परंतप ॥ अधुना सर्वस्य गीताशास्त्रस्य सारभूतोऽर्थो निःश्रेयसार्थोऽनुष्ठेयत्वेन समुच्चि-
॥ त्योच्यते ॥ ५ ॥

उच्यत इति ॥ न भक्तिमात्रं तत्र हेतुरिति तु शब्दार्थं स्फुटयति ॥ किमित्यादिना ॥ अनन्यां भक्तिमेव व्यनक्ति ॥ सर्वैरिति ॥ ५४ ॥ भक्त्या
त्विति विशेषणादन्येषामहेतुत्वमाशंक्याह ॥ अधुनेति ॥ समुच्चित्य संक्षिप्य पुंजीकृत्येति यावत् ॥ ५ ॥ श्रीरामः ॥ ५ ॥

गी॰भा॰टी॰
२१९ राम

मा
मत्कर्मकृदित्युक्तेमत्परमत्वार्थिकमितिपुनरुक्तिमाशंक्याह॥मत्करोतीति॥भगवानेवपरमागतिरितिनिश्चयवतस्तत्रैवेति॥
एसिद्धमितीत्याह॥नथेति॥तत्रैवसर्वप्रकारैर्भजनंथनादित्तेहाह्लषत्वादित्याशंक्याह॥संगेति॥द्वेषपूर्वकमनिष्टाचरणंवैरं
अनपन्ना[illegible]षुतदभावेपिभवत्सेवापकारिषुइतिशंकित्वाह॥आत्मनइति॥एतच्चसर्वसंक्षिप्यअनुष्ठानार्थमुक्तमेवानुतिष्ठ

मत्कर्मकृन्मत्परमोमद्भक्तःसंगवर्जितः॥निर्वैरःसर्वभूतेषुयःसमामेतिपांडव॥५५॥मत्कर्मकृत्मदर्थं[illegible]मत्कर्म
तत्करोतीतिमत्कर्मकृत्॥मत्परमोऽहंपरम[illegible]परमागतिर्यस्यसोऽयंमत्परमस्तथामद्भक्तःमामेवसर्वप्रकारैःसर्वात्म
नासर्वोत्साहेनभजनरतिर्मद्भक्तःसंगवर्जितोधनपुत्रमित्रकलत्रबंधुभोगेषुसंगवर्जितःस्नेहप्रीतिवर्जितोनिर्वैरोनि
र्गतवैरःसर्वभूतेषुशत्रुभावरहितःआत्मनोऽत्यंतापकारप्रवृत्तेष्वपियईदृशोमद्भक्तःसमामेतिअहमेवतस्यपरा
गतिःनान्याकाचिद्भवतिअयंतवोपदेशःमयोपदिष्टोहेपांडवेति॥इतिश्रीभगवद्गीताभाष्येशंकरभगवत्पादकृतौ

॥ एकादशोध्यायः॥११॥

नोभगवत्त्वात्स्विरवश्यंभाविनीत्युपसंहरतीति॥अयमिति॥तदेवंभगवतोविश्वरूपस्यसर्वात्मनःसर्वज्ञस्यसर्वेश्वरस्यमत्कर्म
कृदित्यादिन्यायेनक्रममुक्तिफलमभिध्यानमभिवदतानतद्वाक्योर्थोव्यवस्थापितः॥५५॥ॐहरिःॐतत्सदितिश्रीपरम
हंसपरिव्राजकाचार्यश्रीमच्छुद्धानंदभगवत्पूज्यपादशिष्यश्रीमद्भगवदानंदज्ञानविरचितायांश्रीमद्भगवद्गीताभाष्यटीकायां

एकादशोध्यायसमाप्तः॥११॥

अ॰११ राम
२१९॥ ॥

श्रीगणेशायनमः॥ अशोच्यानित्यादिषु विभूत्यध्यायावसानेष्वध्यायेषु निरुपाधिकस्य ब्रह्मणो ज्ञेयत्वेनानुसंधानमुक्तमितिरनं॰ कीर्तयति॥ द्वितीयेति॥ अतिक्रांतेषु तत्तदध्यायेषु सोपाधिकस्यापि ब्रह्मणो ध्येयत्वेन प्रतिपादनंकृतमित्याह॥ सर्वेति॥ सर्वस्यापि प्रपंचस्य योगो घटना जन्मस्थितिभंगप्रवेशनियमनाख्या तत्तैश्वर्यसामर्थ्यं तेन सर्वत्र शेषप्रतिबंधविधुरया ज्ञानश॰क्त्या विशिष्टस्य सत्वा॥ घनोपहितस्य भगवतो ध्यानं तत्तत्प्रसंगमापाद्य मंदमध्यमयोरनुग्रहार्थमुक्तमित्यर्थः॥ एकादशेवर्त्तनमनुस्वति॥

द्वितीयप्रभृतिष्वध्यायेषु विभूत्यंतेषु परमात्मनो ब्रह्मणोऽक्षरस्य निरस्तसर्वविशेषणस्योपासनमुक्तं॥ सर्वयोगैश्वर्य सर्वज्ञानशक्तिमत्सत्वोपाधेरीश्वरस्य तवोपासनं समस्तं तत्र तत्रोक्तं विश्वरूपाध्याये चैश्वरमाद्यं समस्तजगदात्मरूपं विश्वरूपं त्वदीयं दर्शितमुपासनार्थमेव त्वया॥ तद्दर्शयित्वोक्तवानसि मत्कर्मकृत्तरस्या घ्नतोहमनयोरुभयोः पक्षयोर्विशिष्टतरबुभुत्सया त्वां पृच्छामीत्यर्जुन उवाच॥१॥ एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते॥ ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः॥१॥ एवमितीतानंतरश्लोकेनोक्तमर्थं परामृशति मत्कर्मकृदित्यादिना॥ एवं सततयुक्ता निरंतरं यैरा भगवत्कर्मादौ यथोक्तेऽर्थे समाहितचेतसः भक्ता इत्यर्थः॥

४ स

विश्वरूपेति॥ अध्यायांते भगवदुपदेशमनुस्वतित्वेति॥ यथाधिकारं तारतम्योपेतानि साधनानि निर्णेतुमध्यायांतरमवतारयन्त्या दौ प्रश्न[illegible]पपत्ति॥ अंतरमिति॥ सोपाधिकध्यानस्य निरुपाधिकज्ञानस्य चोक्तत्वादित्यर्थः॥ एवंशब्दार्थमुक्त्वा तमनूपसननन पुरुषा[illegible]गं विभजते॥ एवमिति॥१॥

गी०

येभक्ता [illegible] व्याचष्टे॥ अनन्येति॥ मंदमध्यमाधिकारिणः सगुणशरणानुक्त्वा निर्गुणनिष्ठानुत्तमाधिकारिणो निर्दिशति॥ ये त्विति॥ यथावि
शेषित[illegible]रूपं सर्वत्रगमचिंत्यं कूटस्थमित्यादिवक्ष्यमाणविशेषणविशिष्टमित्यर्थः॥ नक्षरत्यश्नुते वेत्यक्षरमव्यक्तमित्येन व्याचष्टे॥ निर
स्तेति॥ [illegible]गोचरत्वे व्यतिरेकद्वारा स्फोरयति॥ यत्रेति॥ यथाविशेषितमित्यक्षरस्य स्पष्टयति॥ शिष्टैश्चेति॥ पूर्वार्द्धगतक्रियापदस्यानुषं

येभक्ता अनन्यशरणाः संतस्त्वां यथादर्शितं विश्वरूपं पर्युपासते ध्यायंति॥ ये चान्येपि त्यक्तसर्वैषणाः संन्यस्तसर्वकर्माणो यथाविशे
षितं ब्रह्माक्षरं निरस्तसर्वोपाधित्वात् अव्यक्तमकरणगोचरं यद्धि लोके करणगोचरं तद्व्यक्तमुच्यते॥ अंजेर्धातोस्तत्कर्मक
त्वादिदं त्वक्षरं तद्विपरीतं॥ शिष्टैश्चोच्यमानैर्विशेषणैर्विशिष्टं। ये चापि पर्युपासते तेषामुभयेषां मध्ये के योगवित्तमाः केअ
तिशयेन योगविद इत्यर्थः॥ श्रीभगवानुवाच॥ ये त्वक्षरोपासकाः सम्यग्दर्शिनो निवृत्तैषणास्ते तावत्तिष्ठंतु तान्प्रति यद्वक्तव्यं तदु

पर्युपासते::

गं सूचयति॥ तदिति॥ सर्वैतावदेते योगं समाधिं विदंतीति योगविदः केतु नरातिशयेनैषां मध्ये योगवित्तमा योगिन इति पृच्छति॥ केऽतिशयेनेति॥
किमनयोर्योगयोः सुशक्यो योगो वा पृच्छ्यते किं वा साक्षान्मोक्षहेतुरिति विकल्प्य क्रमेणोत्तरं भगवानुक्तवानित्याह॥ भगवानिति॥ यदि
द्वितीयस्तथाविधयोगस्य वक्ष्यमाणत्वात्तत्र प्रष्टव्यत्वेत्याह॥ येक्षरेति॥

अ० १२॥
२२० ॥ राम॥

यथाघस्तत्राह ।। येत्विति ।। सर्वयोगेश्वराणां सर्वेषां योगमधितिष्ठतां योगिनामित्यर्थः विमुक्तास्त्यक्ता रागाद्याख्याः क्लेशा निमित्तभूतास्ति
मिरशब्दिताऽनाद्यज्ञानलक्षणाद्दृष्टिरविद्यामिथ्याधीर्यस्य तमिति विशिनष्टि ।। विमुक्तेति ।। नित्ययुक्तत्वं साधयति ।। अतीतेति ।। तत्रो
क्तो योऽर्थो मत्कर्मकृदित्यादिस्तस्मिन्निश्चयेनायनमायोगमनं तस्य नियमेनानुष्ठानं तेनेत्यर्थः ।। उपासते मयि स्मृतिं सदा कुर्वंतीत्यर्थः

येत्वितरे ।। मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते ।। श्रद्धया परयोपेतास्ते मे युक्ततमा मताः ।।१।। मयि विश्वरूपे परमेश्व
रे आवेश्य समाधाय मनो ये भक्ताः संतो मां सर्वयोगेश्वराणां अधीश्वरं सर्वज्ञं विमुक्तरागादिक्लेशतिमिरदृष्टिं नित्ययुक्ता
अतीतानंतराध्यायांतोक्तश्लोकार्थन्यायेन सततयुक्ताः संत उपासते श्रद्धया परया प्रकृष्टउपेता ये ते मे मम मता अभिप्रे॰
ता युक्ततमा इति नैरंतर्येण हि ते मच्चित्ततयाहोरात्राण्यतिवाहयंत्यतो युक्तं तान्प्रति युक्ततमा इति वक्तुं ।। किमितरे युक्त
तमा न भवंति न किंतु तान्प्रति यद्वक्तव्यं तच्छृणु ।। ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते ।। सर्वत्रगमचिंत्यं च कूटस्थमचलं
।। ध्रुवं ।।२।। ये त्वक्षरमनिर्देश्यं ।।

उक्तोपासकानां युक्ततमत्वं व्यनक्ति ।। नैरंतर्येणेति ।। तदेव स्फुटयति ।। अहोरात्रमिति ।। अन्हि च रात्रौ चाहोरात्रमतिशयेन मा
मेव [illegible] विषयांतरविमुखाश्चिंतयंतीत्यर्थः ।। वक्ष्यामस्तूपरिष्टादित्युक्तं प्रश्नपूर्वकं प्रकटयति ।। किमित्यादिना ।। पूर्वेभ्यः
।। फलतो विशेषार्थस्तु शरदः ।। श्रीरामचंद्राय नमः ।।

त्वमनिर्देश्यत्वे हेतुरित्याह ॥ अव्यक्तत्वादिति ॥ यतोऽव्यक्तमतोऽनिर्देश्यमिति योजना ॥ निरुपाधिकेऽक्षरे कथमुपासनेतिरप्यति ॥ उपासन
[illegible]त्वतोऽक्षरं ज्ञात्वा तदुपेत्यात्मत्वेनोपागम्योपासनेन तथैव वृत्तिष्ठंति प्र[illegible]चिरैकतानमक्षरमात्मानमेव सदा भावयंतीत्येतदिह विव
[illegible]टा ॥ यथेति ॥ अव्यक्तत्वमेवाचिंत्यत्वेऽपि हेतुरित्याह ॥ यद्धीति ॥ कूटशब्दस्योक्तार्थत्वं वृद्धप्रयोगतः साधयति ॥ कूटरूपकमिति ॥

अव्यक्तत्वादशब्दगोचरमिति न निर्देष्टुं शक्यतेऽतोऽनिर्देश्यं अव्यक्तं न केनापि प्रमाणेन व्यज्यत इत्यव्यक्तं पर्युपासते परिसमंतादुपासते ॥
उपासनं नाम यथाशास्त्रंउपास्यस्यार्थस्य विषयीकरणेन सामीप्यमुपगम्य तैलधारावत्समानप्रत्ययप्रवाहेण दीर्घकालं यदासनं त
दुपासनमाचक्षते ॥ अक्षरस्य विशेषणमाह ॥ सर्वत्रगं व्योमवद्व्यापि अव्यक्तत्वात् अचिंत्यं च यद्धिकरणगोचरं तन्मनसाऽपि चिंत्यं
तद्विपरीतत्वादचिंत्यं अक्षरं कूटस्थं दृश्यमानगुणमंतर्दोषं च वस्तु कूटरूपकं कौटसाक्ष्यमित्यादौ कूटशब्दः प्रसिद्धो लोके ॥ तथा चाविद्या
द्यनेकसंसारबीजमंतर्दोषं मायाऽव्याकृतादिशब्दवाच्यतया मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरं इति मंत्रवर्णान्मममाया दुरत्य
॥ येत्यादौ प्रसिद्धं यत्तत्कूटं तस्मिन्कूटे स्थितं कूटस्थं ॥

अ० १२ ॥
२२७ ॥ रामगु ॥

उमादिपदमनन्तार्थं ॥ प्रकृते किं तदित्यतं कूटशब्दितमित्याशंक्याह ॥ तथा चेति ॥ उक्तरीत्या कूटशब्दस्यानृतार्थत्वे सिद्धे यदनेकस्य संसा
रस्य बीजं निरूप्यमाणं नानाविधदोषोपेतं तद्देदं नर्व्याकृतं मायां तु प्रकृतिं विद्यान्मम माया दुरत्यये ॥ त्यादौ मायादिशब्दितत्तया प्र
सिद्धमविद्यादि तदिह कूटशब्दितमित्यर्थः ॥ ४ ॥

तत्रावस्थानं केनरूपेणेत्याकांक्षायामाह ॥ नदृष्यक्षतयेति ॥ कूटस्थशब्दस्य निष्क्रियत्वमर्थांतरमाह ॥ अथवेति ॥ एवमुपजी
व्यानंतरविशेषणद्वयप्रवृत्तिमाह ॥ अत एवेति ॥ ३ ॥ कथमक्षरमुपासते तदुपासनेवा किंस्यादित्यत आह ॥ संनियम्येति ॥ तुल्या
हर्षविषादरागद्वेषादिरहिता ॥ सम्यग्ज्ञानेनाज्ञानस्यापनीतत्वात्क्रमपरापेक्षयोरसंभवं विवक्षित्वाह ॥ नेयरति ॥ सर्वेभ्यो

नदृष्यक्षतया ॥ अथवा राशिरिवास्थितं कूटस्थमत एवाचलं ॥ यस्मादचलं तस्मात् ध्रुवं नित्यमित्यर्थः ॥ संनियम्येंद्रिय
ग्रामं सर्वत्र समबुद्धयः ॥ ते प्राप्नुवंति मामेव सर्वभूतहिते रताः ॥ ४ ॥ संनियम्य सम्यगुपहृत्य संहृत्य इंद्रियग्राममिंद्रिय
समुदायं ॥ सर्वत्र सर्वस्मिन्काले समबुद्धयः समा तुल्या बुद्धिर्येषां इष्टानिष्टप्राप्तौ ते समबुद्धयः ॥ ते य एवंविधाः प्रा
प्नुवंति मामेव सर्वभूतहिते रताः ॥ ननु तेषां वक्तव्यं किंचित् मां ते प्राप्नुवंतीति ॥ ज्ञानी त्वात्मैव मे मतमितिह्युक्तं ॥ न
हि भगवत्स्वरूपाणां सतां युक्ततमत्वमयुक्ततमत्वं वाच्यं ॥ किंतु ॥ क्लेशोधिकतरस्तेषामव्यक्तासक्तचेतसां ॥ अव्यक्ता
॥ हि गतिर्दुःखं देहवद्भिरवाप्यते ॥ ५ ॥ ४ ॥

क्लेशो। भ्यो हितेरता निरताः सर्वेभ्यो हितमेव चिंतयंतो द्वैतं नैवाचरंतीति ॥ ज्ञानवतां यथा ज्ञानं भगवत्प्राप्तेरर्थसिद्धत्वादनुवादमात्रमेतन
हा ॥ ननु तेषामिति ॥ ज्ञानिनो भगवत्प्राप्तिः सिद्धैवेत्यत्र प्रमाणमाह ॥ ज्ञानी त्विति ॥ ज्ञानवतां भगवत्प्राप्तौ तेन एवमुक्त
मेव उक्ताः ॥ कथं सगुणब्रह्मोपासकान्युक्ततमानुक्तवानसीत्याशंक्याह ॥ नहीति ॥ ४ ॥ सगुणोपासकेभ्य एव कथमित्याशं

अक्षरोपासनस्य दुष्करत्वादित्यभिप्रेत्याह ॥ क्लेश इति ॥ अधिकतरत्वेनेतरेभ्यो देहदर्शिभ्यः कामिभ्यः इति शेषः ॥ तेषां क्लेशस्याधिकतरत्वे हेतुं मत्वा विशिनष्टि ॥ देहेति ॥ अव्यक्तमसंतं सूक्ष्मं निर्विशेषमक्षरं तस्मिन्नासक्तमभिनिविष्टं चेतो येषां तेषामिति यावत् ॥ अक्षरोपासकानां क्लेशस्याधिकतरत्वे भगवानेव हेतुमाह ॥ अव्यक्तेति ॥ दुःखं दुःखेनातिकष्टेनेति यावत् ॥ अतो देहाभिमानत्यागा॰

क्लेशोऽधिकतरो यद्यपि मत्कर्मपराणामधिक एव क्लेशोऽधिकतरस्त्वक्षरात्मनां परमार्थदर्शिनां देहाभिमानपरित्यागनिमित्तः ॥ अव्यक्तासक्तचेतसामव्यक्ते आसक्तं चेतो येषां ते अव्यक्तासक्तचेतसः तेषां अव्यक्तासक्तचेतसां ॥ अव्यक्ता हि यस्मात् या गतिरक्षरात्मिका दुःखं सा देहवद्भिर्देहाभिमानवद्भिरवाप्यते अतः क्लेशोऽधिकतर इत्युक्तं ॥ अक्षरोपासकानां यद्वर्तनं तदुपरिष्टाद्वक्ष्यामः ॥ ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः ॥ अनन्येनैव योगेन मां ध्यायंत उपासते ॥॰ ये तु सर्वाणि कर्माणि मयीश्वरे संन्यस्य मत्पराः अहं परो येषां ते मत्पराः संतोऽन्येनैनैव अविद्यमानंन्यदालंबनं विश्वरूपं देवमात्मानं मुक्त्वा यस्य सोऽनन्यस्तेनानन्येनैव योगेन समाधिना मां ध्यायंतश्चिंतयंत उपासते ॥ ६ ॥ श्रीसाभः ॥

दित्यर्थः ॥ ५ ॥ ते कथं वर्तंते तत्राह ॥ अक्षरेति ॥ यद्यक्षरोपासकाः मामेव प्राप्नुवंतीति विशेषणेन किं सगुणोपासकास्त्वां नाप्नुवंतीति न तेषामपि क्रमेण मत्प्राप्तिरित्याह ॥ ये त्विति ॥ तुशब्दः शंकानिरासार्थः ॥ ६ ॥ ६ ॥॰

तेषां भगवद्ध्यायिनां किं फलमिति निशंकामनुभाष्य फलमाह ॥ तेषामित्यादिना ॥ समुद्धर्ता सम्यगूर्ध्वं नेता ॥ ज्ञानावष्टंभदानेनेत्यर्थः ॥
मृत्युरज्ञानं मरणाद्यनर्थहेतुत्वात्तेन कार्यंतयायुक्तः संसारः ॥७॥ भगवदुपासनां विशिष्टफलत्वेत्येवं यतः सिद्धमतो भगवद्विषयां

तेषां किं ॥ तेषामहं समुद्धर्ता मृत्युसंसारसागरात् ॥ भवामि न चिरात्पार्थ मय्यावेशितचेतसां ॥७॥ तेषां मदुपासनैकपराणा
महमीश्वरः समुद्धर्ता कुतः इत्याह मृत्युसंसारसागरात् ॥ मृत्युयुक्तः संसारो मृत्युसंसारः स एव सागर इव सागरो दुस्तर
त्वात् तस्मात् मृत्युसंसारसागरात् अहं तेषां समुद्धर्ता भवामि ॥ न चिरात् किं तर्हि क्षिप्रमेव हे पार्थ मय्यावेशितचेतसां
मयि विश्वरूपे आवेशितं प्रवेशितं समाहितं चेतो येषां ते मय्यावेशितचेतसस्तेषां ॥ यत एवं तस्मात् ॥ मय्येव मन आ
धत्स्व मयि बुद्धिं निवेशय ॥ निवसिष्यसि मय्येव अत ऊर्ध्वं न संशयः ॥८॥ मय्येव विश्वरूपे ईश्वरे मनः संकल्पविकल्पा
त्मकमाधत्स्व स्थापय ॥ मय्येवाध्यवसायं कुर्वतीं बुद्धिं चाधत्स्व निवेशय ॥ ततस्ते किं स्यादिति शृणु ॥ निवसिष्यसि नि
वत्स्यसि निश्चयेन महात्मना मयि निवासं करिष्यस्येवातः शरीरपातादूर्ध्वं न संशयः संशयोऽत्र न कर्तव्यः ॥८॥

[illegible] तेन त्वमित्याह ॥ यत इति ॥ असंहिताकरणं श्लोकपूरणार्थं ॥ मनोबुद्ध्योर्भगवत्येव स्थापने प्रश्नपूर्वकं फलमा
॥ह॥ तत इति ॥ भगवन्निष्ठस्य तस्मात्तौ प्रतिबंधाभावं सूचयति ॥ संशयो नेति ॥८॥ ॥

०भा० र्नन पूर्वकं भगवत्प्राप्त्युपायां तरमाह ॥ अथेत्यादिना ॥ एकमालंबनं स्थूलं प्रतिमादि ॥ समाधानं ततोऽभ्यंतरे विश्वरूपे०
२ ॥ देहेनाभिनिवेशादभ्यासाधीने योगेपि सामर्थ्याभावे पुनरुपायांतरमाह ॥ अभ्यासेपीति ॥ अभ्यासयोगेन विना०

नं समाधातुं न शक्नोषि मयि स्थिरं ॥ अभ्यासयोगेन ततो मामिच्छाप्तुं धनंजय ॥ ९ ॥ अथैवं यथाऽवोचाम तथा मयि
त्तसमाधातुं स्थापयितुं स्थिरमचलं न शक्नोषि चेत्ततः पश्चादभ्यासयोगेन चित्तस्यैकस्मिन्नालंबने सर्वतः समाहृत्य पु
नः पुनः स्थापनमभ्यासः तत्पूर्वको योगः समाधानलक्षणस्तेनाभ्यासयोगेन मां विश्वरूपमिच्छ प्रार्थयस्वाप्तुं हे०
धनंजय ॥ अभ्यासेप्यसमर्थोऽसि मत्कर्मपरमो भव ॥ मदर्थमपि कर्माणि कुर्वन् सिद्धिमवाप्स्यसि ॥ १० ॥ ग्रंत्सुं अ
भ्यासेप्यनंतरोक्ते। प्यसमर्थोऽस्यशक्तोसि ॥ मत्कर्मपरमो भव मदर्थं कर्म मत्कर्म तत्परमो मत्कर्मपरमो भव मत्कर्मप्र
धानस्सर्थः ॥ अभ्यासेन विना मदर्थमपि कर्माणि केवलं कुर्वन् सिद्धिं सत्वशुद्धिं योगज्ञानप्राप्तिद्वारेणावाप्स्यसि ॥ अथै
तदप्यशक्तौ। क्तोसि कर्तुं मद्योगमाश्रितः ॥ सर्वकर्मफलत्यागं ततः कुरु यतात्मवान् ॥ ११ ॥ अथ पुनरेतदपि यदुक्तं मत्क
॥ र्मपरत्वं तत्कर्तुमशक्तोसि ॥ ५ ॥

भगवदर्थं कर्माणि कुर्वाणस्य किं स्यादित्याशंक्याह ॥ अभ्यासेनेति ॥ सिद्धिं ब्रह्मभावं अपि रत्नव्यवधिस्त्वच नार्थः ॥ १० ॥ भगवत्कर्मप
रत्वमप्यशक्यमिति शंकते ॥ अथेति ॥ बहिर्विषयाकृष्टचेतनत्वादित्यर्थः ॥ ५ ॥ श्रीः श्रीः श्रीः ॥ हरिहरि हरि सिवसिव सिव ॥ ०॥

आ० १२
२२३ ॥ राम ॥

तर्हि भगवत्प्राप्त्युपायशेषत्वेन संयतचित्तो भूत्वा कर्मफलसंन्यासं कुर्वित्याह ।। मद्योगमिति ।। ११ ।। उत्तरश्लोकतात्पर्यमाह ।। श्रेयो हीति ।। ज्ञा
नं शब्दयुक्तिभ्यामात्मनिश्चयोऽभ्यासो ज्ञानार्थश्रवणाभ्यासो निश्चयपूर्वको ध्यानाभ्यासो वा तस्य विशिष्यमाणत्वे साक्षात्कारहेतुत्वं
हेतुः त्यागस्य विशिष्टत्वे हेतुमाह ।। एवमिति ।। प्रीणातु भगवानिति तस्मिन्कर्मसंन्यासपूर्वकमित्यर्थः ।। पूर्वविशेषणवतो नियत

मद्योगमाश्रितो मयि क्रियमाणानि कर्माणि संन्यस्य तत्करणं तेषामनुष्ठानं मद्योगस्तमाश्रितः सन् सर्वकर्मफलत्यागं सर्वे
षां कर्मणां फलसंन्यासं सर्वकर्मफलत्यागं ततोऽनंतरं कुरु यतात्मवान् संयतचित्तः सन्नित्यर्थः ।। इदानीं सर्वकर्मफलत्यागं स्तौ
ति ।। श्रेयो हि ज्ञानमभ्यासात्ज्ञानात्ध्यानं विशिष्यते ।। ध्यानात्कर्मफलत्यागस्त्यागाच्छांतिरनंतरं ।। १२ ।। श्रेयो हि प्रशस्यत
रं ज्ञानं कस्मादविवेकपूर्वकादभ्यासात्तस्मादपि ज्ञानात्ज्ञानपूर्वकं ध्यानं विशिष्यते ।। ज्ञानवतो ध्यानादपि कर्मफलत्यागो वि
शिष्यतर ति अनुषज्यते ।। एवं कर्मफलत्यागस्सर्वविशेषणवतः शांतिरुपशमः सहेतुकस्य संसारस्यानंतरमेव स्यान्नतु का
वतस्य· नपेक्षते अतस्य कर्मणि प्रवृत्तस्य पूर्वोपदिष्टोपायानुष्ठानाशक्तौ सर्वकर्मणां फलत्यागः श्रेयःसाधनमुपदिष्टो न प्र

= विमम[illegible]

सहृदय[illegible]पयोक्तत्यागादित्यर्थः ।। अनंतरमेवेत्युक्तं व्यनक्तीति ।। न तु कर्मफलत्यागस्य सद्यः शांतिकरत्वे स-
ग्रंथोक्तिस्मृतिप्रसिद्धिर्विरुध्येतेत्याह ।। अज्ञस्येति ।। ९ ।। श्रीरामचन्द्राय नमः ।। श्रीसदाशिवः ।।

गी॰भ॰टी॰
२२४॥

दीर्घकालेनादरनैरंतर्यानुष्ठिताद्ध्यानाद्वस्तुसाक्षात्कारद्वारा संसारदुःखोपशांतेस्तथाविधध्यानात्त्यागस्य विशिष्टत्वोक्तेस्त
दीयस्तुतिरत्रेष्टेत्याह॥ अतश्चेति॥ तत्र हेतुमाह॥ संपन्नेति॥ संपन्नानि प्राप्तानि साधनान्यक्षरोपासनादीनि तेषां मध्ये पूर्वपू
र्वस्यानु[illegible]शक्तावुत्तरोत्तरस्यानुष्ठेयत्वेनोपदेशात्त्यागे चोपदेशपर्यवसानादित्यर्थः॥ त्यागे विशिष्टत्ववचनस्य केन धर्मेण तत्प्रति
स्तुतित्वमिति पृच्छति॥ केनेति॥ उत्तरमाह॥ यदेति॥ अमृतत्वमुक्तमथ मर्त्योऽमृतो भवतीत्यादिनेति शेषः॥ कामप्रहाण

अतश्च श्रेयो हि ज्ञानमित्याद्युत्तरोत्तरविशिष्टत्वोपदेशेन सर्वकर्मफलत्यागः स्तूयते। संपन्नज्ञानसाधनानुष्ठानाशक्तौ तदनुष्ठेयत्वे
नश्रुतत्वात्॥ केन साधर्म्येण स्तुतित्वं यदा सर्वे प्रमुच्यन्त इति सर्वकामप्रहाणादमृतत्वमुक्तं तत्प्रसिद्धं कामाश्च सर्वे श्रौतस्मा
र्तसर्वकर्मणां फलानि॥ तत्त्यागेन च विदुषो ध्याननिष्ठस्यानंतरैव शांतिरिति सर्वकर्मत्यागसामान्यं अज्ञस्य कर्मफलत्यागस्या
॥ प्यस्तीति तत्सामान्यात् कर्मफलत्यागस्तुतिरियं॥१२॥

आ॰१२
२२४॥राम

स्यामृतत्वार्थत्वमथाकामयमान इत्यादावपि सिद्धमित्याह॥ तदिति॥ कामत्यागस्यामृतत्वहेतुत्वेऽपि कथं कर्मफलत्यागस्य तद्धेतुत्वमित्याशंक्याह॥
कामाश्चेति॥ कर्मफलत्यागादेव शांतिश्चेज्ज्ञाननिष्ठोपेक्षितेत्याशंक्याह॥ तत्त्यागे चेति॥ तथापि कथमज्ञस्य कर्मफलत्यागस्तुतिरित्याशंक्याह॥
रतिसर्वेति॥ विद्यावतस्त्यागादविद्वत्त्यागस्यापि त्यागत्वाविशेषाद्विशिष्टत्वोक्तिर्युक्तेति स्तुतिमुपसंहरति॥ तत्सामान्यादिति॥१२॥

किमर्थास्तुतिरित्याशंक्य त्यागे रुचिमुत्पाद्य प्रवर्त्तयितुमित्याह।। प्ररोचनार्थमिति।। त्यागस्तुतिं दृष्टांतेन स्पष्टयति।। यथेति।। फलत्यागः
श्रेयोहेतुश्चेत्कर्मत्यागादपि फलत्यागसिद्धेरलं कर्मानुष्ठानेनेत्याशंक्याह।। कर्मेति।। फलाभिलाषं त्यक्त्वा कर्मानुष्ठानस्यार्पितस्ये
श्वरे श्रेयोहेतुताया विवक्षितत्वान्नानुष्ठानानर्थक्यमित्यर्थः। संप्रत्यद्वेष्टेत्याद्यवतारयितुं वृत्तं कीर्तयति।। अत्रचेति।। न
योश्चेदात्यंतिकोऽभेदो न तर्हीश्वरे मनःसमाधानरूपो योगोत्यंताभेदे ध्यानध्येयत्वाभावान्न चात्यंताभेदे कर्मानुष्ठानं त

प्ररोचनार्थो यथाऽगस्त्येन ब्राह्मणेन समुद्रः पीत इति इदानींतना अपि ब्राह्मणा ब्राह्मणत्वसामान्यात् स्तूयंते एवं कर्मफलत्यागात् कर्मयोग
स्य श्रेयःसाधनत्वं अभिप्रेतं।। अत्र चात्मेश्वरभेदमाश्रित्य विश्वरूपे ईश्वरे चेतःसमाधानलक्षणो योग उक्तः ईश्वरार्थं कर्मानुष्ठानादि च।। अथै
तदप्यशक्तोऽसीत्युक्तानंकार्यसूचनान्नाभेददर्शिनोऽक्षरोपासकस्य कर्मयोग उपपद्यत इति दर्शयति।। तथा कर्मयोगिनोऽक्षरो
पासनानुपपत्तिं दर्शयति भगवान् ते प्राप्नुवंति मामेवेति।।१२।।

त्फलत्यागो वा परस्परं तद्योगादित्यर्थः।। भगवदुक्तिसामर्थ्यादपि कर्मयोगादिनाभेददृष्टिमनो भवतीत्याह।। अथेति।।
अक्षरोपासकस्य कर्मयोगायोगवत्कर्मयोगिनोऽक्षरोपासनानुपपत्तिरपि दर्शितेत्याह।। तथेति।। अक्षरोपासकाः
सम्यग्[illegible]ष्ठा यथाज्ञानं भगवंतमेव प्राप्नुवंति न तथा कर्मिणः साक्षान्नद्दामा अपि तेन तथा च कर्मिणो नाक्षरोपासन-
सिद्धिरित्यर्थः।।१२।।

ज्ञानवतो भग ।पासनं कर्मानुष्ठानं च नैकत्र युक्तमित्याह ॥ अक्षरेति ॥ नन्वक्षरोपासकवदन्येषामपीश्वरात्मत्वाविशेषात्कुत
विशेषणत्वं तत्राह ॥ यदिति ॥ कर्मयोगस्याक्षरोपास्तेश्च युगपदेकत्रायोगे हेत्वंतरमाह ॥ यस्माच्चेति चतुर कर्मैवेत्याह ॥ विनि
चाक्षरोपासको वा स्यादीश्वरमात्मानं वेत्ति ना सौ क्रियायां गुणत्वेन कर्तृत्वमनुभवति गुणत्वेश्वरत्वयोरेकत्र
प्रितोपि नाक्षरोपासनं कर्मानुष्ठानं चैकत्र युक्तमित्याह ॥ न चेति ॥ अक्षरोपास्तिकर्मयोगयोरेकत्रापर्यायप्रयोगे

अक्षरोपासकानां कैवल्यप्राप्तौ स्वातंत्र्यमुक्त्वा इतरेषां पारतंत्र्यमीश्वराधीनत्वां दर्शितवांस्तेषामहं समुद्धर्तेति यदि
ईश्वरस्य आत्मभूतानास्ते संमताअभेददर्शित्वात् अक्षररूपा एव त इति समुद्धरणकर्मवचनं तान्प्रत्यपेशलं स्यात् ॥
यस्माच्चार्जुनस्यासंतमेव हितैषी भगवांस्तस्य सम्यग्दर्शिनान्वितं कर्मयोगं भेददृष्टिमंतमेवोपदिशति ॥ नन्वा
त्मानमीश्वरं प्रमाणतो बुध्वा कस्यचिद्गुणभावं जिगमिषति कश्चित् विरोधात् ॥ तस्मादक्षरोपासकानां स
म्यग्दर्शननिष्टानां संन्यासिनां त्यक्तसर्वैषणानां अद्वेष्टा सर्वभूतानामित्यादिधर्मपूगं साक्षादमृतत्वकारणं व
क्ष्यामीति प्रवर्तते भगवान् ॥ अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च ॥ निर्ममो निरहंकारः समदुःखसुखः क्षमी ॥
१३॥ अद्वेष्टा सर्वभूतानां न द्वेष्टा आत्मनो दुःखहेतुमपि न कंचिद्द्वेष्टि ॥ ७॥

त्वमाह ॥ तस्मादिति ॥ १२ ॥ अज्ञानां कर्मिणां वक्ष्यमाणधर्मजातस्यासाकल्येनायोगादक्षरनिष्ठानामेवेदमुच्यते ३ विर
क्तांशस्य तु सर्वार्थत्वमिष्टमेवेत्यर्थः ॥ सर्वेषां भूतानां मध्ये यो दुःखहेतुस्तं विद्वानपि द्वेष्ट्येवेत्याशंक्याह ॥ आत्मन इति ॥

॥टीका॥

तत्रहेतुः॥सर्वात्मीति॥सर्वभूतानामित्युभयतःसंबध्यते॥ममप्रत्ययवर्जितोदेहेपीतिशेषः॥यतस्वाध्यायहेतुनाहंकारान्निर्गतत्वमाह॥
निर्गतेति॥१३॥अक्षरोपासकस्यज्ञानवतोविशेषणांतराण्याह॥संतुष्ट इति॥सततमितिस॥१४॥

सर्वाणिभूतान्यपिआत्मत्वेनहिपश्यति॥मैत्रःमित्रभावोमैत्रोमित्रतयावाऽवर्ततइतिमैत्रः॥करुणएवच॥करुणा
कृपालुःखितेषुदयावान्करुणःसर्वभूताभयप्रदःसंन्यासीत्यर्थः॥निर्ममोममेतिप्रत्ययवर्जितोनिरहंकारोनि
र्गताहंकारप्रत्ययःसमदुःखसुखेद्वेषरागयोरप्रवर्तकेयस्यससमदुःखसुखःक्षमीक्षमावानाक्रुष्टोभिहतो
वाऽविक्रियएवास्ते॥संतुष्टःसततंयोगीयतात्मादृढनिश्चयः॥मय्यर्पितमनोबुद्धिर्योमद्भक्तःसमेप्रियः॥१४॥संतु
ष्टःसततंयोगीसमाहितचित्तोयतात्मासंयतस्वभावःदृढनिश्चयोदृढःस्थिरोनिश्चयोऽध्यवसायोयस्यात्मतत्व
विषयेसदृढनिश्चयः॥मय्यर्पितमनोबुद्धिःसंकल्पविकल्पात्मकंमनोऽध्यवसायलक्षणाबुद्धिस्तेमय्येवार्पितेस्था
पितेस्यसंन्यासिनःसमय्यर्पितमनोबुद्धिःयईदृशोमद्भक्तःसमेप्रियः॥५॥श्रीरामायनमः॥श्रीगुरु।

नेनपौ[illegible]
नेकार्यकारणसंघातःस्वाभावशब्दार्थःस्थिरत्वंकुतार्किकादिनाऽनभिभवनीयत्वं॥मद्भक्तोमद्भजनपरोज्ञानवानित्या
॥वत्॥१४॥

व त्रियत्वे प्रमाणमाह॥ प्रियो हीति॥ किमर्थं न हि पुनरुच्यते नेत्याह॥ नहीहेति॥ उद्वेगाद्विराहित्यमपि ज्ञानवतो
मित्याह॥ यस्मादिति॥ न केवलमुद्वेगं प्रत्युपादानत्वमेव संन्यासिनोऽनुपपन्नं किंतु तत्कर्तृत्वमपीत्याह॥ तथेति॥

यो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रिय इति सप्तमेऽध्याये सूचितं॥ नहीह प्रपंच्यते॥ यस्मान्नोद्विजते लो
को लोकान्नोद्विजते च यः॥ हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः॥१५॥ यस्मात् संन्यासिनो नोद्विजते
उद्वेगं न गच्छति न संतप्यते न संक्षुभ्यते लोकस्तथा लोकान्नोद्विजते च यः हर्षामर्षभयोद्वेगैः हर्षश्च अ
मर्षश्च भयं च उद्वेगश्च तैः हर्षामर्षभयोद्वेगैः मुक्तो हर्षः प्रियलाभेऽन्तःकरणस्योत्कर्षो रोमांचना
श्रुपातादिलिंगः अमर्षोऽभिलषितप्रतिघातेऽसहिष्णुता भयं त्रासः॥ उद्वेग उद्विग्नता तैर्मुक्तो यः
॥ स च मे प्रियः॥५॥

असहिष्णुता परकीयप्रकर्षस्येति शेषः॥ त्रासस्तस्करादिदर्शनाधीनः उद्विग्नत्वं अचेतनाच्चेतनाधीनस्य लोकादिनिगनता
त्र॥

निरपेक्षत्वादिकमपि ज्ञानिनो विशेषणमाह॥ अनपेक्ष इति॥ आदिपदमपेक्षणीयसर्वसंग्रहार्थं प्रतिपत्तव्येषु गंतिंपंतव्ये-
षु प्रतिपत्तुं कर्तव्येषु कर्तुं चेत्यर्थः॥ परैस्ताडितस्यापि गतास्व्यथाभयमस्येति व्युत्पत्तिमाश्रित्याह॥ गतेति॥ न त्वक्षमीत्य

अनपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः॥ सर्वारंभपरित्यागी यो मद्भक्तः स मे प्रियः॥१६॥ अनपेक्षः देहेंद्रि-
यविषयसंबंधादिष्वपेक्षाविषयेष्वनपेक्षो निःस्पृहः॥ शुचिः बाह्येनाभ्यंतरेण च शौचेन संपन्नो दक्षः प्रत्युत्पन्ने-
षु कार्येषु सद्यो यथावत्प्रतिपत्तुं समर्थः॥ उदासीनो न कस्यचिन्मित्रादेः पक्षं भजते यः स उदासीनो यतिः॥
गतव्यथः॥ गतभय आधिशून्यः॥ सर्वारंभपरित्यागी आरभ्यंत इति आरंभा इहामुत्रार्थानि कर्माणि
सर्वारंभाः तान् परित्यक्तुं शीलमस्येति सर्वारंभपरित्यागी यो मद्भक्तः स मे प्रियः॥१६ किंच॥ योन
हृष्यति न द्वेष्टि न शोचति न कांक्षति॥ शुभाशुभपरित्यागी भक्तिमान्यः स मे प्रियः॥१७॥ यो न हृष्य-
ति इष्टप्राप्तौ न द्वेष्टि अनिष्टप्राप्तौ॥ न शोचति प्रियवियोगे न चाप्राप्तं कांक्षति॥१७॥ श्रीरामः॥

कृत त्वायामपि व्यथायामपकर्तर्यपि अनपकर्तर्वेक्षमित्वमित्युपगमात्॥१६॥ द्वेषहर्षादिराहित्यमपि ज्ञानिनो लक्षणमित्याह॥ किंचेति॥०

गीत्यनेन विहितकाम्यकर्मत्यागस्योक्तत्वाद्विहितादन्यत्रमासंकोचीति विशिनष्टि ।। शुभाशुभेति ।।१७।। वैषम्यबु
ग्निनो विशेषणमित्याह ।। समइति ।। अद्वेष्टेत्यादिनाद्वेषादिविशेषाभावउक्तः संप्रतिसर्वत्रैवाविकृतचित्तमु त्य

शुभाशुभेपुण्यापुण्येकर्मणीपरित्यक्तुंशीलमस्येतिशुभाशुभपरित्यागीभक्तिमान्यः समेप्रियः ।। किंच ।। समः शत्रौचमित्रे
चतथामानापमानयोः ।। शीतोष्णसुखदुःखेषुसमः संगविवर्जितः ।।१८।। समः शत्रौचमित्रेचतथामानापमानयोः ।। पु
जापरिभवयोः ।। शीतोष्णसुखदुःखेषुसमः सर्वत्रचसंगविवर्जितः ।। किंच ।। तुल्यनिंदास्तुतिर्मौनीसंतुष्टोयेनकेन
चित् ।। अनिकेतः स्थिरमतिर्भक्तिमान्मेप्रियोनरः ।।१९।। तुल्यनिंदास्तुतिर्निंदाचस्तुतिश्चयस्यनिंदास्तुतीतेतुल्येयस्यस
तुल्यनिंदास्तुतिः मौनीमौनवान्संयतवाक् ।। संतुष्टोयेनकेनचित्शरीरस्थितिहेतुमात्रेण ।।१९।। श्रीराम ।।

आ०१२ ।।
२२७ ।। राम ।। ।।

त्यनेसर्वत्रचेतनेस्त्रियादावचेतनेचंदनादावित्यर्थः ।।१८।। वाचंयमत्वादिविशेषणमपिज्ञाननिष्ठस्यास्तीत्याह ।।१९।। किंचेति ।।
।। निंदादोषसंकीर्तनं ।। स्तुतिर्गुणगणनं ।।१९।।

देहस्थितिमात्रफलेनान्नादिना ज्ञानिनः संतुष्टत्वे स्मृतिं प्रमाणयति॥ तथाचेति॥ नियतनिवासराहित्यमपि ज्ञानवतो विशेषणमित्याह॥ किंचेति॥
न कुड्यां नोदके संगो न चैले न त्रिपुष्करे॥ नागारे नासने नान्ने यस्य वै मोक्षवित्तु सः॥ इति स्मृतिमुक्तेर्थे प्रमाणयति॥ नेत्यादिना॥ पुनःपुनर्भक्ते

तथा चोक्तं। येन केनचिदाच्छन्नो येन केनचिदाशितः यत्र क्वचन शायी स्यात्तं देवा ब्राह्मणं विदुरिति॥ किंच॥ अनिकेतः निकेत आश्रयो नि
वासो नियतो न विद्यते यस्य सोऽनिकेतः नागाररत्यादिस्मृत्यंतरात् स्थिरा मतिः स्थिरा परमार्थवस्तुविषया मतिर्यस्य स स्थिरम
तिः॥ भक्तिमान्मे प्रियो नरः॥ अद्वेष्टा सर्वभूतानामित्यादिना अक्षरस्योपासकानां संन्यासिनां निरतसर्वैषणानां परमार्थज्ञान
निष्टानां धर्मजातमुपक्रांतमुपसंह्रियते॥ ये तु धर्म्यामृतमिदं यथोक्तं पर्युपासते॥ श्रद्दधाना मत्परमा भक्तास्तेतीव मे प्रियाः
॥२०॥ इति ये तु संन्यासिनो धर्म्यामृतं धर्म्यं च तदमृतं च धर्म्यामृतं अमृतत्वहेतुत्वादिदं यथोक्तं अद्वेष्टा सर्वभूतानामित्यादिना
पर्युपासते अनुतिष्ठंति श्रद्दधानाः श्रद्धायुक्ताः संतो मत्परमा यथोक्तोऽहमक्षरात्मा परमो निरतिशया गतिर्येषां ते मत्परमा
मद्भक्ताश्च॥ उत्तमां परमार्थज्ञानलक्षणां भक्तिमाश्रिताः तेऽतीव मे प्रियाः॥२०॥ श्रीरामाय नमः॥ श्रीगुरुस्तुर्त्रियः॥

वर्गमार्गस्य परमार्थज्ञानस्योपायत्वार्थं॥१९॥ अद्वेष्टेत्यादिधर्मजातं ज्ञानवतो लक्षणमुक्तं तदुपपादितमनुष्ठानोपसंहार
॥ श्लोकमवतारयति॥ अद्वेष्टेत्यादिना॥१३॥

स्य तात्पर्यमाह॥ प्रियो हीति॥ यद्यपि यथोक्तं धर्मजातं ज्ञानवतो लक्षणं तथापि जिज्ञासुना ज्ञानोपायत्वेन यत्नादनुष्ठेयमिति वा
संहरति। यस्मादिति॥ तदेवं सोपाधिकाभिध्यानपरिपाकान्निरुपाधिकमनुसंदधानस्याद्वेष्टा सर्वभूतानामित्यादिधर्मविशि
।धिकारिणः श्रवणाद्यावर्तनतः तत्त्वसाक्षात्कारसंभवात्ततो मुक्त्युपपत्तेस्तद्धेतुवाक्यार्थधी विषयान्वययोग्यस्तत्त

प्रियो हि ज्ञानिनोत्यर्थमिति यत् सूचितं तद्व्याख्यायेहोपसंहृतं भक्तास्तेऽतीव मे प्रिया इति॥ यस्माद्धर्म्यामृतमिदं यथोक्तमनुतिष्ठन्
भगवतः श्रीविष्णोः परमेश्वरस्याऽतीव मे प्रियो भवति॥ तस्मादिदं धर्म्यामृतं मुमुक्षुणा प्रयत्नतोऽनुष्ठेयं विष्णोः प्रि
यं धाम जिगमिषुणेति वाक्यार्थः॥२०॥ इति श्रीगीताभाष्ये शंकरभगवत्पादकृतौ द्वादशोऽध्यायः॥ समाप्तः॥१२॥१२॥ रः

हार्थोनुसंधेय इति सिद्धं॥२०॥ हरिः ॐ तत्सदिति श्रीपरमहंसपरिव्राजकाचार्यश्रीमच्छुद्धानंदभगवत्पूज्यपादशिष्यश्रीमदानंद
ज्ञानविरचितायां श्रीमद्भगवद्गीताभाष्यटीकायां द्वादशोध्यायः॥ सपुर्णमस्तु श्रीकृष्णार्पणमस्तु॥ ॥१२॥ श्रीराम॥ः

अ॰ १२॥
२२८॥ राम॥

श्रीगणेशायनमः॥ हरिः ॐ॥ प्रथममध्यमयोः षट्कयोस्तत्त्वंपदार्थावुक्तावंतिमषट्के वाक्यार्थनिष्ठः सम्यग्धीप्रधानोऽधुनारभ्यते तत्र
क्षेत्राध्यायमंतिमषट्कस्य भवति तारयिष्णुर्व्यवहितं वक्तुं कीर्तयति॥ सप्तमऽति॥ प्रकृतिद्वयस्य स्वचाज्ञत्वं वारयति॥ ईश्वरस्येति॥ भूमि
२ रित्यादिनोक्तास्तत्त्वादिरूपा प्रवृत्तिं परेत्यत्र हेतुमाह॥ संसारेति॥ इत्यनन्तरत्वं त्वय्यामित्यादिनोक्तां प्रकृतिमनुक्रामति॥ पराचेति॥ परत्वे
हेतुं सूचयति॥ ईश्वरात्मिकेति॥ किमर्थमीश्वरस्य प्रकृतिद्वयमित्याशंक्याकारणत्वार्थमित्याह॥ तत्रेति॥ व्यवहितेन संबंधमुक्त्वा
+ याभ्यामिति॥ वक्तमरूपवर्तिष्यमाणाध्यायार्थं प्रकारमाह॥ व्यवहितेन तं विवक्षुरव्यवहितमनुवदति॥ अतीतेति॥ निबोधेति संबंधः॥

हरिः ॐ॥ सप्तमेऽध्याये सूचिते द्वे प्रकृतीरीश्वरस्य त्रिगुणात्मिका अष्टधाभिन्नाऽपरा संसारहेतुत्वात्॥ परा चाऽन्या जीवभूता क्षेत्रज्ञलक्षणेश्वरा
त्मिकाभ्यां प्रकृतिभ्यामीश्वरो जगदुत्पत्तिस्थितिलयहेतुत्वं प्रतिपद्यते॥ तत्र क्षेत्रक्षेत्रज्ञलक्षणप्रकृतिद्वयनिरूपणद्वारेण तद्वत
ईश्वरस्य तत्त्वनिर्धारणार्थं क्षेत्राध्यायश्च आरभ्यते॥ अतीतानंतराध्याये च अद्वेष्टा सर्वभूतानामित्यादिना यावदध्यायपरिस
माप्तिस्तावत्तत्त्वज्ञानिनां संन्यासिनां निष्ठा॥ यथा ते वर्तन्ते इत्येतदुक्तं॥ केन पुनस्ते तत्त्वज्ञानेन युक्ताः यथोक्तधर्माचरणान्॥
॥ भगवतः प्रिया भवन्तीत्येवमर्थश्चायमध्याय आरभ्यते॥ १३॥

ष्टे॥ यथेति॥ वर्तन्ते धर्मज्ञानमनुतिष्ठंतीति तथा पूर्वोक्तेन प्रकारेण सर्वमुक्त [illegible] मितियोजना॥ अव्यवहितमेव [illegible] मनूद्यते
नेन यो [illegible] स्य [illegible] च यं सं [illegible] गिरते॥ केनेति॥ तत्त्वज्ञानोत्केरुक्तार्थेन समुच्चयार्थश्चकारः॥ १३॥ श्रीरामायनमः॥ श्रीकृष्णायनमः॥

१ जीवानांसुखदुःखादिभेदभाजांप्रतिक्षेत्रभिन्नानांचाक्षरेणैक्यं इत्याशंक्यसंसारस्यात्मधर्मत्वंनिराकृत्यसंघातनिष्ठत्वंवक्तुंसंघातोत्पत्तिप्रकार
माह ।। प्रकृतिश्चेति ।। भोगश्चापवर्गश्चार्थौययोरेवकर्तव्यतयेतियावत् । नचवर्णरँश्लोकेशरीरनिर्देशात्तस्योत्पत्तिर्वक्तव्या किमितिसंघातस्यो
[illegible]त्रा ।। सोयमिति ।। उक्तेर्थेभगवद्वचनमवतारयति ।। तदेतदिति ।। तत्रदृक्त्वेनसंघाताद्दृश्यात्स्वमात्मानंनिर्दिशति ।। इदमिति ।। उ
क्तंप्र[illegible] ।। विशिष्टंकिंचिदितिविशेषः ।। शरीरस्यात्मनोन्यत्वंक्षेत्रनामनिरुक्त्याब्रूते ।। क्षतेति ।। क्षयोनाशः ।। क्षरणमपक्षयः ।। यथाक्षेत्रेवी

प्रकृतिश्चत्रिगुणात्मिकासर्वकार्यकरणविषयाकारतयापरिणतापुरुषस्यभोगापवर्गार्थकर्तव्यतयादेहेंद्रियाद्याकारेणसंहन्यते ।। संयुक्तंदृश्यते ।।
सोऽयंसंघातरूपंशरीरंतदनेनभगवानुवाच ।। इदंशरीरंकौंतेयक्षेत्रमित्यभिधीयते ।। एतद्योवेत्तितंप्राहुःक्षेत्रज्ञइतितद्विदः ।। १ ।। इदमितिसर्वनाम्नोक्तंविशि
२ नष्टिशरीरमिति ।। हेकौंतेयक्षतत्राणात्क्षयात् ।। क्षरणात्क्षेत्रवद्वास्मिन्कर्मफलनिर्वृत्तेः ।। क्षेत्रमिती । तिशब्दः एवंशब्दपदार्थकः ।। क्षेत्रमित्येवमभि
धीयतेकथ्यते एतत्शरीरंक्षेत्रंयोवेत्तिविजानातिआपादतलमस्तकंज्ञानेनविषयीकरोति ।। स्वाभाविकेनऔपदेशिकेनवाज्ञानेनवेदनेनविषयी
।।० करोतिविभागशस्तंवेदितारंप्राहुःकथयंतिक्षेत्रज्ञइति ५२ ।। ५९ ।। ५३ ।। श्रीरामः ।।

जन्तुत्वंफलितवदित्याह ।। क्षेत्रपदादुपरिस्थितमितिपदंक्षेत्रशब्दविषयमन्यथावैयर्थ्यादित्याह ।। इतिशब्द इतिक्षेत्रमित्येवमनेनक्षेत्रशब्देनेत्यर्थः दृश्यंदेहमु
त्कान्ततोतिरिक्तंद्रष्टारमाह ।। एतदिति ।। स्वाभाविकंमनुष्योहमितिज्ञानं ।। औपदेशिकंदेहोनात्मादृश्यत्वादित्यादिविभागशः स्वतोतिरिक्तत्वेनेत्यर्थः

क्षेत्रवदिति २

अ॰ १३ ।।
२२९ ।। रामः ।।

दी क्षेत्रमित्यत्रेतिशब्दस्य क्षेत्रज्ञशब्दविषयत्वमाह ॥ इतिशब्द इति ॥ क्षेत्रज्ञ इत्येवं क्षेत्रज्ञशब्देनतं प्राहुरितिसंबंधः प्रवक्तॄन्प्रश्नपूर्वकमाह ॥ केनचि
द्इत्यादिना ॥१॥ दृश्यानां दुःखादीनां भेदकानां यावद्देहभाविनामनात्मधर्मत्वसिद्धये द्रष्टारं देहादन्यमुक्त्वा सांख्यानामिव तावन्मात्रेण
मुक्तिनिरस्तये तस्य सर्वदेहेष्वैक्योक्तिपूर्वकं स्वेन परमार्थेनाक्षरेणैक्यं वक्तुमनन्तरं प्रश्नद्वारा दर्शयति ॥ एवमित्यादिना ॥ यथोक्तलक्षणं दृश्या

इति शब्दः एवंशब्दपदार्थकः एवं पूर्ववत् क्षेत्रज्ञ इत्येवमाहुः ॥ केनचिद्रस्तौ क्षेत्रक्षेत्रज्ञौ ये वि[illegible]गरतां ॥ इति तेन चिद्रः एवं क्षेत्रक्षेत्र
ज्ञावुक्तौ किमेतावन्मात्रेण ज्ञानेन ज्ञातव्याविति नेत्युच्यते ॥२॥ क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत ॥ क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत्तज्ज्ञानं मतं मम ॥२॥
क्षेत्रज्ञं यथोक्तलक्षणं च अपि मां परमेश्वरमसंसारिणं विद्धि विजानीहि योसौ सर्वक्षेत्रेषु एकः क्षेत्रज्ञो ब्रह्मादिस्तंबपर्यंतानेकक्षेत्रोपाधि दी
स प्रविभक्तस्तं निरस्तसर्वोपाधिभेदं सदसदादिशब्दप्रत्ययागोचरं विद्धीत्यभिप्रायः ॥ हे भारत ॥ २ श्रीरामचंद्राय नमः ॥२॥

देहादिद्रष्टारमित्यर्थः ॥ चापीति निपातौ जीवस्याक्षरत्वज्ञानस्य देहादन्यत्वज्ञानेन समुच्चयार्थौ भिन्नक्रमौ न क्षेत्रज्ञं सांख्य
वदृश्यान्यमेव विद्धि किंतु मां चापि विद्धीति संबध्येते ॥ सर्वक्षेत्रेष्वेकः क्षेत्रज्ञः तं मामेव विद्धीति संबंधं सूचयति ॥ सर्वेति ॥ ०
नानाक्षेत्रोपाधिकभेदभाजस्तत्तद्बुद्धिगोचरस्य कथं तद्धि परिच्छिन्नब्रह्मत्वधीरित्याशंक्याह ॥ ब्रह्मादीति ॥२॥ ॥ श्रीरामा

र्नं

ी० [illegible] नते॥ यस्मादिति॥ तदेव विशिनष्टि॥ क्षेत्रेति॥ न च भेदविषयत्वात्सम्यग्ज्ञानं नदिति युक्तं॥ तस्य विवेकज्ञानस्य वाक्या
नध॥ रा मोक्षोपयिकत्वेन सम्यक्त्वसिद्धेरिति भावः॥ जीवेश्वरयोरेकत्वमुक्तमाक्षिपति॥ नन्विति॥ जीवेश्वरयोरेकत्वे
स्येश्वरे तस्य जीववांतर्भावः॥ नाद्यो जीवस्य परस्मादन्यस्याभावे संसारस्य निरालंबनत्वानुपपत्त्या परस्यैव तदाश्रयत्व
प्रसंगादित्यर्थः अनन्नन्योऽभिचाकशीतीति श्रुतेर्न तस्य संसारित्वेत्याशंक्य द्वितीयं दूषयति॥ ईश्वरेति॥ जीवेच्चे वि

न यस्मात्क्षेत्रक्षेत्रज्ञेश्वरयाथात्म्यव्यतिरेकेण ज्ञानगोचरमन्यदवशिष्टमस्ति। तस्मात्क्षेत्रक्षेत्रज्ञयोर्ज्ञेयभूतयोर्यत् ज्ञानं क्षेत्रक्षेत्रज्ञौ ये
नज्ञानेन विषयीक्रियेते तत् ज्ञानं सम्यग्ज्ञानमिति मे मतमभिप्रेतं रसभिप्रायोयं मम परमेश्वरस्य विष्णोः॥ ननु सर्वक्षेत्रेष्वेक एव
ईश्वरो नान्यस्तदतिरिक्तो भोक्ता तत ईश्वरस्य संसारित्वं प्राप्तं ईश्वरव्यतिरेकेण वा संसारिणोऽन्यस्याभावात्संसाराभावप्र
संगः तच्चोभयमनिष्टं बंधमोक्षतद्धेतुशास्त्रानर्थक्यप्रसंगात्। प्रत्यक्षादिप्रमाणविरोधाच्च॥ ८५॥ श्रीरामचंद्रायनमः॥

दीश्वरोंतर्भवति तदापि ततोन्यसंसार्यभावात्तस्य च संसारादिनिष्टेः संसारोजगत्स्संगच्छेदित्यर्थः प्रसंगद्वयस्येष्टत्वं निराचष्टे॥ तच्चेति॥ संसाराभावेन
योरन्यः पिप्पलं स्वाद्वत्तीत्यादिबंधशास्त्रस्य तद्धेतुकर्मविषयकर्मकांडस्य च आनर्थक्यमीश्वराभिन्नेच संसारे तद्भोक्तृत्वश्रुतेर्ज्ञानकांडस्य मोक्षतद्धे
तुज्ञानार्थस्यानर्थकम ततो न प्रसंगयोरिष्टत्वेत्यर्थः संसाराभावप्रसंगस्यानिष्टत्वे हेत्वंतरमाह॥ प्रत्यक्षादीति॥ ८५॥ श्रीरामः॥ ८५॥
त्व

आ०१३
२३०॥राम॥

२ वदि

तत्रप्रत्यक्षविरोधंप्रकटयति॥प्रत्यक्षेणेति॥आदिशब्दोपात्तमनुमानविरोधमाह॥जगदिति॥विमतंविचित्रहेतुकंविचित्रकार्यत्वात्प्रासादादिवदित्यर्थः॥प्रत्यक्षानुमानागमविरोधादयुक्तमैक्यमित्युपसंहरति॥सर्वमिति॥ऐक्येपि [illegible] संसारित्वमविद्यातोविद्यातोऽसंसारित्वमिति विभागात्रानुपपत्तिरित्युत्तरमाह॥नेत्यादिना॥तयोःस्वरूपतोविलक्षणार्थत्वेस्फुतिमाह॥दूरमिति॥ऽतेंहे

प

प्रत्यक्षेणतावत्सुखदुःखतद्धेतुलक्षणःसंसारउपलभ्यते॥जगद्वैचित्र्योपलब्धेश्चधर्माधर्मनिमित्तःसंसारोनुमीयते॥सर्वमेतदनुपपन्नमात्मेश्वरैकत्वे॥न॥ज्ञानाज्ञानयोरन्यत्वोपपत्तेः॥दूरमेते विपरीते विषूची अविद्या याच विद्येति ज्ञाता॥तथा तयोर्विद्याविद्ययोर्विषयोःफलभेदोपिविरुद्धोनिर्दिष्टःश्रेयश्चप्रेयश्चेति।विद्याविषयंश्रेयःप्रेयस्त्वविद्याकार्यमिति॥तथाचव्यासः द्वाविमावथपंथानौ।इत्यादि।इमौद्वावेवपंथानौइत्यादिच।इहचद्वेनिष्ठेउक्ते॥
अविद्याचसहकार्येणविद्ययाहातव्येतिश्रुतिस्मृतिन्यायेभ्योऽवगम्यते॥५१॥श्रीरामचंद्रायनमः॥

यः

५०

द्यायाश्चविद्येति॥दूरमेते विद्याविद्ये दूरं विपरीते अत्यंतं विरुद्धे इत्यर्थः॥विषूचीनानागती भिन्नफले इत्यर्थः॥स्वरूपतोविरोउत्फलतोपिसोस्तीत्याह॥तथेति॥फलभेदोक्तिमेवव्यनक्ति॥विद्येति॥तयोर्द्विधाविलक्षणत्वेवेदव्यासस्यापिसंमतिमाह॥तथेति॥उक्तेर्थेभगवतोपिसंमतिमुदाहरति॥इहचेति॥द्वयोरपिनिष्ठयोःफलमादेयत्वमितिशंकांवारयति॥अविद्यांचेति॥

नी०

अविद्यासकार्याहानव्येत्यत्र श्रुतीरुदाहरति॥ श्रुतयस्तावदिति॥ इहेति जीवदवस्थोच्यते॥ चेच्छब्दो विद्योदयदौर्लभ्यद्योती॥ अवेदीद्
तिविदितवानि~~तिनमा~~नित्यर्थः॥ अथ विद्यानंतरमेव सत्यमवितथं पुनरावृत्तिवर्जितं कैवल्यं स्यादित्याह॥ अथेति॥ अवि
श्रुतिमाह॥ नचेदिति॥ जन्ममरणादिरूपासंसृतिर्विनष्टिस्तस्यामहत्त्वं सम्यग्ज्ञानं विना निवर्त्तयितुमशक्यत्वं॥
श्रुत्यंतरमाह॥ तमेवमिति॥ परमात्मानं प्रत्यक्त्वेन यः साक्षात्कृतवान्स देहे जीवत्येव मुक्तो भवतीत्यर्थः॥ वि
॥ विनापि हेत्वंतरान्मुक्तिमाशंक्याह॥ नेति॥ भयहेतुमविद्यां निराकुर्वतीतज्जं भयमपि निरस्यतीति विद्येत्यत्र वाक्यांतरमाह॥

श्रुतयस्तावत्॥ इह चेदवेदीदथ सत्यमस्ति न चेदिहावेदीन्महती विनष्टिः॥ तमेवं विद्वानमृत इह भवति॥ नान्यः पंथा वि
द्यतेऽयनाय विद्वान्न बिभेति कुतश्चन॥ अविदुषस्त्वथतस्य भयं भवति॥ अविद्यायामंतरे वर्तमानाः॥ ब्रह्म वेद ब्रह्मैव भवति॥

विद्वानिति॥ अविद्याविषये वाक्यांतरमाह॥ अविदुष इति॥ प्रतीच्येकरसे स्वात्मन्यपि भेदमभिमन्यमानस्य भेददृष्ट्यनंतरमेव सं
सारध्रौव्यमित्यर्थः॥ तत्रैव श्रुत्यंतरमाह॥ अविद्यायामिति॥ तन्मध्ये तत्परवशतया स्थितास्तत्त्वमजानंतो देहाद्यभि
मानवंतो मूढाः संसरंतीत्यर्थः॥ विद्याविषये श्रुत्यंतरमाह॥ ब्रह्मेति॥ ५॥ श्रीरामाय नमः॥ ५॥ श्रीगुरु॥

आ०१२
२३१॥ रामाः

अविद्याविषये वाक्यांतरमाह ॥ अन्योसाविति ॥ भेददृष्टिमनूद्य तन्निदानमविद्येत्याह ॥ नेति ॥ सच मनुष्याणां पशुवद्देवादीनां भेष्य
त्वं प्राप्नोतीत्याह यथेति ॥ विद्याविषये वाक्यांतरमाह ॥ आत्मविदिति ॥ इदं सर्वं प्रत्यग्भूतं ब्रह्मैवेत्यर्थः ज्ञानादेव तु कैव
ल्यमित्यत्र श्रुत्यंतरमाह ॥ यदेति ॥ नखल्वाकाशं चर्मवन्मानवो वेष्टयितुमीष्टे न तथा परमात्मानं प्रत्यक्त्वेनाननुभूय न न
मुच्यत इत्यर्थः ॥ आदिशब्देन अनुक्ता विद्याविद्याफलभेदार्थाः श्रुतयो गृह्यंते ॥ तासां मंत्रत्वेन प्रामाण्यं सूचयति ॥

अन्योऽसावन्योहमस्मीति ॥ न स वेद यथा पशुरेवं स देवानामात्मविदः स इदं सर्वं भवति ॥ यदा चर्मवदित्याद्याः सह
स्रशः ॥ स्मृतयश्च ॥ अज्ञानेनावृतं ज्ञानं तेन मुह्यंति जंतवः ॥ इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः ॥ समं
पश्यन्हि सर्वत्रेत्याद्याः ॥ न्यायतश्च ॥ सर्पान्कुशाग्राणि तथोदपानं ज्ञात्वा मनुष्याः परिवर्जयंति ॥ अज्ञानतस्तत्र पतं
॥ ति केचिज्ज्ञाने फलं पश्य यथा विशिष्टं ॥ ५ ॥

मा

॥ ५९
[illegible]द्याति ॥ विद्याविद्याविषये स्मृतीरुदाहरति ॥ स्मृतयश्चेति ॥ तत्राविद्याविषयं वाक्यमाह ॥ अज्ञानेनेति ॥ विद्याविषयं वा
[illegible]मुदाहरति ॥ इहेत्यादिना ॥ विद्याफलमनर्थध्वस्तिरविद्याफलमनर्थाप्तिरित्येतदन्वयव्यतिरेकाख्यान्न्यायादपि सिध्यती
त्या[illegible]यतश्चेति ॥ तत्रैव पुराणसंमतिमाह ॥ सर्पानिति ॥ उदपानं कूपः यथात्मज्ञाने विशिष्टं फलं स्यात्तथा पश्येति योजना ॥ ५ ॥

न्यायतश्चेत्यन्वयव्यतिरेकाख्यन्यायमुक्तं विवृणोति । तथा चेति । तत्रादावन्वयमन्वाचष्टे ॥ देहादिष्विति ॥ ७ ॥ अनाद्यनिर्वाच्याविद्यावत्त
श्चिदात्मा देहादावनात्मन्यात्मबुद्धिमादधाति तद्युक्तो रागादिना प्रेर्यते तत्प्रयुक्तश्च कर्मानुतिष्ठति तेन कर्ता च यथाकर्म नूतनं देह
मादत्ते पुरातनं त्यजति इत्येवमविद्यावत्त्वे संसारित्वं सिद्धमित्यर्थः । व्यतिरेकमिदानीं दर्शयति देहादीति ॥ श्रुतियुक्तिभ्यामात्मभेदे ज्ञा
ते रागादिध्वंसस्ततः कर्मोपरमादशेषसंसारसिद्धिरित्यविद्याराहित्ये चैवं तद्व्याप्तिरित्यर्थः । उक्तान्वयादेरन्यथासिद्धिं शिथिलयति ॥

तथा च देहादिष्वात्मबुद्धिरविद्वान् रागद्वेषादियुक्तो धर्माधर्मानुष्ठानकृज्जायते म्रियते चेत्येवमवगम्यते देहादिव्यति
रिक्तात्मदर्शिनस्तु रागद्वेषादिप्रहाणापेक्षधर्माधर्मप्रवृत्त्युपशमान्मुच्यंत इति न केनचित् प्रत्याख्यातुं शक्यं न्यायतः ।
तत्रैवं सति क्षेत्रज्ञस्येश्वरस्यैव सतोऽविद्याकृतोपाधिभेदतः संसारित्वमिव भवति ॥ ८ ॥ श्रीरामचंद्राय नमः ॥ ८ ॥

इतिनेति ॥ उक्तमन्वयादिवादिना केनचिदपि न्यायतो न शक्यं प्रत्याख्यातुं तदन्यथासिद्धिसाधकाभावादित्यर्थः ॥ अन्वयादेरन
न्यथासिद्धत्वे चोद्यमपि प्राचीनं प्रतिनीतमित्याह ॥ तत्रेति ॥ ज्ञानाज्ञानयोरुक्तन्याये न स्वरूपभेदे कार्यभेदे च स्वारस्येन परा
परयोरैक्येऽपि बुद्ध्याद्युपाधिभेदादाविद्यकमात्मनः संसारित्वमाभासरूपं प्रातिभासिकं सिध्यतीत्यर्थः ॥ ८ ॥ ८ ॥ श्री

आत्मनो ब्रह्मत्वं । स्यत्तश्चेदहमित्यात्मभाने ब्रह्मत्वापि भायादित्याशंक्याह ॥ यथेति ॥ देहाद्यतिरिक्तत्वस्यात्मनो वैदिकपक्षे स्वतस्त्वेपित
स्मिन्नहमिति भासे वृत्तदतिरिक्तत्वं न भाति किंत्व विद्यातो देहाद्यात्मत्वमेव विपरीतं भासते तथात्मनो ब्रह्मत्वे स्वाभाविकेपि तस्मिन्ब्रह्म ५३
त्वं न भात्यविद्यातो ब्रह्मत्वमेव तस्य भातीत्यर्थः आत्मनो देहाद्यात्मत्वमाविवेकं भातीत्युक्तमनुभवेन स्पष्टयति ॥ सर्वेति ॥ आत्मन्यस्मि
न्नहंबुद्धिरविद्याकृतेत्यत्र दृष्टांतमाह ॥ यथेति ॥ पुरःस्थिते वस्तुनः स्थाणावविद्यया पुमानिति भ्रमयो जायते तथा देहादावनात्म॰ नि

यथा देहाद्यात्मत्वमात्मनः सर्वजंतूनां हि प्रसिद्धो देहादिष्वनात्मस्वात्मभावो निश्चितोऽविद्याकृतः ॥ यथा स्थाणौ पुरुष निश्चयो
न चैतावता पुरुषधर्मः स्थाणोर्भवति स्थाणुधर्मो वा पुरुषस्य तथा न चैतन्यं देहस्य देहधर्मो वा चेतनस्य सर्वं सुखदुःखमो ५५
हात्मकत्वादिरात्मनो न युक्तः ॥५॥८१॥

न्यात्मधीरविद्यातो निश्चितेत्यर्थः ॥ देहात्मनोरैक्यज्ञाने देहधर्मस्य जरादेरात्मनि आत्मधर्मस्य च चैतन्यस्य देहे विनिमयः स्यादि
त्याशंक्याह ॥ न चेति ॥ स्थाणौ पुरुषत्वं भ्रांत्या भातीत्येतावता पुरुषधर्मः शिरःपाण्यादिर्न स्थाणोर्भवति तद्धर्मो वा वक्रत्वादिर्न
पुंसो दृश्यते मिथ्याध्यस्तत्वात्तादात्म्याद्वस्तुनो धर्मव्यतिकरादिति दृष्टांतमुक्त्वा दार्ष्टांतिकमाह ॥ तथेति ॥ जरादेरनात्मधर्मत्वेपि
सुखादेरात्मधर्मत्वमिति केचित्तान्प्रत्याह ॥ सुखेति ॥ कामसंकल्पादि श्रुतेरनात्मधर्मज्ञानादित्वर्थः ॥८१॥ श्रीरामचंद्राय नमः ॥
त्व

किंचविमतोऽनात्मधर्मोविद्याकृतत्वाज्जरादिवत्तत्रचहेतुसिद्धिरतस्मिंस्तद्बुद्धिविषयत्वेनस्थाणुपुरुषत्ववदविद्यावत्त्वस्योक्तत्वादितिमत्वाह॥अ
[illegible]णोपुरुषत्ववदविद्यत्वंदेहादेरयुक्तंदृष्टांतदार्ष्टांतिकयोर्वैषम्यादितिशंकते॥नेति॥तदेवप्रपंचयति॥स्थाण्वित्यादिना॥ज्ञेयस्य
[illegible]दत्रचोभयोर्ज्ञेयत्वेव्यापकव्यावृत्त्याव्याप्याध्यासस्यापिव्यावृत्तिरित्यर्थः देहात्मबुद्धेर्भ्रमत्वाभावेफलितमाह॥आत्म
नरा[illegible]॥उपा[illegible]यधर्माणांसुखादीनामुपहितेजीवेवस्तुत्वमयुक्तमतिप्रसंगादितिपरिहरति॥नेत्यादिना॥प्रसंगमेवप्रकटयति॥यदीति॥

अविद्याकृतत्वाविशेषाज्जरामरसुखचांऽनुत्मत्वादिनिवेत्स्थाणुपुरुषौज्ञेयावेवसंतौज्ञात्रान्योन्यस्मिन्नध्यस्तावविद्ययादेहात्म
नोस्तुज्ञेयज्ञात्रोरेवेतरेतराध्यासइतिनसमोदृष्टांतोऽतो~~[illegible]~~देहधर्मोज्ञेयोऽपिज्ञातुरात्मनोभवतीतिचेन्नाचैतन्यादि
प्रसंगात्॥यदिहिज्ञेयस्यदेहादेःक्षेत्रस्यधर्माःसुखदुःखमोहेच्छाद्वेषादयःकेचनात्मनोज्ञातुर्भवंतितर्हिज्ञेयस्यक्षेत्रस्यधर्माः॥
केचनात्मनोभवंतिअविद्याध्यारोपिताः॥जरामरणादयस्तुनभवंतीतिविशेषहेतुर्वक्तव्यः॥नभवंतीति॥अस्त्यनुमानंमवि
द्याध्यारोपितत्वात्जरादिवदिति॥हेयत्वादुपादेयत्वादुपादेयत्वाच्चेत्यादि॥७॥

~~यदीति~~॥सुखादीनामात्मधर्मत्वंचेदुपाधिध
र्मत्वात्तस्यैवेत्थंजरादिकंचात्मनोदुर्वारंस्यादित्यर्थः॥सुखादिरात्मधर्मोनेतिपक्षेऽपिनास्तिविशेषहेतुरित्याशंक्याह॥नेति॥तदेवानु
मानमानेस्मारयति॥अविद्येति॥विमतंनात्मधर्मःआगमापायित्वात्संमतवदित्यनुमानांतरमाह॥हेयत्वादिति॥आदिश
॥ब्दाद्दृश्यत्वजडत्वादिगृह्यन्ते॥

आ०१३
२३॥रामः॥
३

सुखादीनां जरादिवदात्मधर्मत्वाभावेन तस्य वस्तुतोऽसंसारित्वे निष्फलितमाह ।। नचेति ।। आरोपितेनाधिष्ठानस्य वस्तुतोऽस्पर्शे दृष्टांतमाह ।। यथेति ।। पराभिमतस्यात्मनः संसारित्वमध्यस्तमिति निश्चिते यत्सुररस्य संसारित्वापादनं तदयुक्तमित्याह ।। एवं चेति ।। आत्मनि संसारस्यारोपितत्वात्तद्भिन्ने परस्मिन्नाशंकैव तस्यायुक्तेत्येतदुपपादयति ।। नहीति ।। स्थाणौ पुरुषनिश्चयवदात्मनो देहाद्यात्मत्वनिश्चयस्याध्यस्तत्वे तस्य युक्तं दृष्टांतस्य ज्ञेयमात्रविषयत्वादितरस्य ज्ञेयज्ञातृविषयत्वादित्युक्तमनुवदति ।। यत्विति ।। वैषम्यं

तत्रैवं सति कर्तृत्वभोक्तृत्वलक्षणः संसारो ज्ञेयस्थो ज्ञातर्यविद्ययाध्यारोपित इति न तेन ज्ञातुः किंचिद्दुष्यति यथा बालैरध्यारोपितेनाकाशस्य तलवत्वादिना ।। एवं च सति सर्वक्षेत्रेष्वपि सतो भगवतः क्षेत्रज्ञस्येश्वरस्य संसारित्वगंधमात्रमपि नाशंकनीयं । नहि क्वचिदपि लोकेऽविद्याध्यस्तेन धर्मेण कस्यचिदुपकारोपकारो वा दृष्टः । यत्तूक्तं न समो दृष्टांत इति तदसत् कथं अविद्याध्यासमात्रं हि दृष्टांतदार्ष्टांतिकयोः साधर्म्यं विवक्षितं ।। तन्न व्यभिचरति यत्तु ज्ञातरि व्यभिचरतीति मन्यसे तस्याप्यनैकांतिकत्वं दर्शितं जरादिभिः ।।२।।

दुष्यतीति ।। तदसदिति ।। नहि केन साधर्म्यमिति पृच्छति ।। कथमिति ।। अभीष्टं साधर्म्यं दर्शयति ।। अविद्येति ।। तस्योभयत्रानुगतेति ।। ज्ञेयांतरे ज्ञेयस्यारोपनियमाज्ज्ञातरि नारोपः स्यादित्याशंक्याह ।। यत्त्विति ।। नायं नियमो ज्ञातरि जराद्युक्तत्वादित्याह ।। तस्यापीति ।। ज्ञेयस्यैव ज्ञेयांतरेऽध्यासनियमस्येति यावत् ।। अतो ज्ञातरि नारोपव्यभिचारशंकेत्यर्थः ।।२।।

पुंसो दृश्यत्वेऽपि

[illegible]दे ।।

२

श्री० ॥४॥ श्री

आत्मन्यविद्ययाध्यासेतत्राविद्यायाःस्वाभाविकत्वात्तदधीनंसंसारित्वमपितथास्यादितिशंकते॥अविद्यावत्त्वादिति॥का० विद्याविपरीतग्रह[illegible] निर्वाच्यमज्ञानंवा॥नाद्योविपरीतग्रहादेस्तमःशब्दितानाद्यनिर्वाच्याज्ञानकार्यत्वात्तन्निष्ठस्यात्मधर्मत्वायोगादित्याह॥नेत्यादिना[illegible]न्तदेव 'पंचयति॥तामसोहीति॥आवरणात्मकत्वंवस्तुनिसम्यक्प्रकाशप्रतिबंधकत्वंविपरीतग्रहादेरविद्याकार्यत्वंविद्यापोघत्वेनसाधयति॥विवेकेति॥नचकारणाविद्यानादिनादिरनिर्वाच्यात्मधर्मःस्यादितियुक्तंअनिर्वाच्यत्वादेवतस्यास्तद्धर्मत्वस्य

अविद्यावत्त्वात् क्षेत्रज्ञस्यसंसारित्वमितिचेन्नाविद्यायास्तामसत्वात्॥तामसोहिप्रत्ययआवरणात्मकत्वादविद्याविपरीतग्राहकःसंशयोपस्थापकोवाऽग्रहणात्मकोवा॥विवेकप्रकाशाभावेतदभावात्॥तामसेचावरणात्मकेतिमिरादिदोषेसत्यग्रहणादेरविद्याप्रत्ययस्योपलब्धेः॥

दुर्वचत्वादितिभावःकिंचविपरीतग्रहादेरन्वयव्यतिरेकाभ्यांदोषजन्यत्वावगमादपिनात्मधर्मतेत्याह॥तामसेचेति॥तमःशब्दिताज्ञानोत्थवस्तुप्रकाशप्रतिबंधकस्तिमिरकाचादिदोषस्तस्मिन्सतत्सत्तानांमिथ्याधीःसंशयश्चेतित्रयस्योपलंभादसतितस्मिंश्चप्रतीतेरन्वयव्यतिरेकाभ्यांविपरीतज्ञानादेर्दोषाधीनत्वाधिगमान्नकेवलात्मधर्मतेत्यर्थः॥ ८३॥ श्रीरामचंद्रायनमः॥०

आ॰१३॥
२३४॥ राम॥

दोषस्य निमित्तत्वाद्भावकार्यस्योपादाननियमात् निर्वाच्याविद्यायाश्चासंमतेरात्मैव विपर्ययादेरुपादानमिति चोदयति ॥ अत्राहेति वि-
विपरीतग्रहादेर्दोषत्वं संप्रत्यपर्थः अग्रहादिरित्ययमविद्या ॥ विपर्ययादेः सत्योपादानत्वे सत्यप्रसंगान्नात्मा तदुपादानं किंतु दोष-
स्य चक्षुरादिधर्मत्ववदग्रहणादेरपि दोषतात्करणधर्मत्वे करणमविद्योपमंत्रः करणं न चक्षुर्हेतुरविद्यासिद्धेरिति वाच्यं ॥ अत्रो

दा२ नि२
त३

अत्राहैवं तर्हि ज्ञातृधर्मोऽविद्या । न करणे चक्षुषि तिमिरत्वादिदोषोपलब्धेः । पत्तुमन्यसे ज्ञातृधर्मोऽविद्या । नदेव चाविद्या-
धर्मवत्त्वं क्षेत्रज्ञस्य संसारित्वं । तत्र यदुक्तमीश्वरे वक्षेत्रज्ञो न संसारीत्येतदयुक्तमिति । तन्न ॥ यथा करणे चक्षुषि विपरी-
तग्राहकादिदोषस्य दर्शनात् न विपरीतादिग्रहणं तन्निमित्तो वा तैमिरिकत्वादिदोषो ग्रहीतुः ॥ ५४ ॥ श्रीरामायनमः ॥

हमित्यनुभवात्सापेक्षं च परामर्शान्न दवगमात्कार्यलिंगकानुमानादागमाच्चान्नत्वासिद्धेरिति परिहरति ॥ नेत्यादिना ॥ संगृही-
तं चोद्यपरिहारयोः श्लोकार्थं विवृणोति ॥ यत्विति ॥ अविद्यावत्वेपि ज्ञातुरसंसारित्वाद्युक्तत्वात्तदंशोरगवदविद्या किं करिष्यतीत्याशं-
क्याह ॥ देवेति ॥ मिथ्याज्ञानादिमत्वमेवात्मनः संसारित्वमिति निश्चितफलितमाह ॥ तत्रेति ॥ न करणे चक्षुषीत्यादिनोक्तमेव-
रं प्रपंचयति ॥ तत्रेत्यादिना ॥ ५९ ॥ ॥

टी॰
पु॰ ३ ॥ व

तिमिरादिदोषस्तत्कृतो विपरीतग्रहादिश्च न ग्रहीतुरात्मनोस्तीत्यत्र हेतुमाह ॥ चक्षुष इति ॥ न ह्यनेनांजनादिसंस्कारेण निरौदोषपराकृतेन दे
स्य ग्रहीतुर्दोषाद्यनुपलंभात्तस्य तद्धर्मत्वे नो विमतं नत्वतो नात्मधर्मो दोषत्वान्नकार्यत्वाद्वा संमतवदित्यर्थः । किंच विपरीत
ग्रहादिस्तत्वतो नात्मधर्मो वेद्यत्वात्संप्रतिपन्नवदित्याह ॥ संवेद्यत्वाच्चेति ॥ किंच यद्वा संमतवदित्यर्थः ॥ चं तत्स्वातिरिक्तवेद्यं य
थादीपादीनीतिव्याप्तेर्विपरीतग्रहादीनामपि वेद्यत्वादतिरिक्तवेद्यत्वे संवेदिता न संवेद्यधर्मवान्वेदितृत्वाद्यथा देवदत्तो न

मिं
यदे ३
त ४

चक्षुषः संस्कारेण तिमिरेऽपनीते ग्रहीतुरदर्शनात् ॥ न ग्रहीतुर्धर्मो यथा तथा सर्वत्रैवाग्रहणविपरीतसंशयप्रत्
यास्तन्निमित्ताः करणस्यैव कस्यचिन्न भवितुमर्हन्ति ॥ न ज्ञातुः ॥ क्षेत्रज्ञस्यासंवेद्यत्वाच्च तेषां प्रदीपप्रकाशवत् न ज्ञा
तृधर्मत्वं ॥ संवेद्यत्वादेव स्वात्मव्यतिरिक्तं संवेद्यत्वं ॥ सर्वकरणवियोगेन च कैवल्ये सर्वथा तिमिरविषादिदोष
वत्तानभ्युपगमात् ॥ आत्मनो यदि क्षेत्रज्ञस्याप्युष्मवत्स्वो धर्मस्ततो न कदाचिदपि तेन वियोगः स्यात् ॥ ७ ॥

आ॰ १३ ॥
२३५ ॥ राम ॥

स्वसंवेद्यरूपादिमात्मन्यनुमानांतरमाह ॥ संवेद्यत्वादेवेति ॥ किंच विपरीतग्रहादयस्तत्वतो नात्मधर्मा व्यभिचारित्वात्क्लेशत्वा
दिवदित्याह ॥ सर्वेति ॥ उक्तमेव विवरण न्नात्मनो विपरीतग्रहणादेः स्वाभाविको वाऽऽगन्तुको वेति विकल्पाद्यं दूषयति ॥ आत्मन
इति ॥ अतोऽनिर्मोक्षोऽविधानज्ञत्वध्वस्तेरभावादित्यर्थः ॥ ७ ॥

आगंतुकोपि स्वतः श्वेदमुक्तिः परतश्चेत्याह ।। अविक्रियस्येति ।। विभुत्वादविक्रियत्वादमूर्त्तत्वाच्चात्मा व्योमवन्न केनचित्संयोग
वियोगाववनुभवति । नहि विक्रियाभावे व्योम्नोपि वस्तुतः संयोगवियोगावसंगतावात्मनस्तद्योगात्परतोपि तस्मिन्विपरीत
ग्रहादीत्यर्थः ।। तस्यात्मधर्मत्वाभावे फलितमाह ।। सिद्धमिति ।। आत्मनो निर्धर्मकत्वे भगवदनुमतिमाह ।। अनादित्वादिति ।।
ईश्वरत्वे सत्यात्मनोऽसंसारित्वे विधिशास्त्रस्य प्रत्यक्षादेश्चानर्थक्यात्तात्विकमेव तस्य संसारित्वमिति निशंकते ।। नन्विति ।।

अविक्रियस्य च व्योमवत्सर्वगतस्यामूर्त्तस्यात्मनः केनचित्संयोगवियोगानुपपत्तेः सिद्धं क्षेत्रज्ञस्य नित्यमेवे
श्वरत्वं ।। अनादित्वान्निर्गुणत्वादित्यादीश्वरवचनाच्च ।। नन्वेवं संसारित्वाभावे शास्त्रानर्थक्यादिदोषः स्यादिति ।। न सर्वै
रभ्युपगमात् सर्वैर्हि आत्मवादिभिरभ्युपगतो दोषो नैकेन परिहर्त्तव्यो भवति ।। कथमभ्युपगत इति ।। मुक्तात्मनां सं
वी सारसंसारित्वव्यवहाराभावः सर्वैरेवात्मवादिभिरिष्यते ।। न च तेषां शास्त्रानर्थक्यादिदोषप्राप्तिरभ्युपगता ।। ७ ।।

विद्यावस्थायामविद्यावस्थायां वा शास्त्रानर्थक्यमिति विकल्प्याद्यं प्रत्याह ।। न सर्वैरिति ।। विदुषो मुक्तस्य संसारतदाधारत्वयोरभा
न वस्य सर्ववादिसंमतत्वात्तत्र शास्त्रानर्थक्यमिति चोद्यं मय्येवं प्रतिविधेयमित्यर्थः ।। संग्रहवाक्यं विवृणोति ।। सर्वैरिति ।। अभिप्राय
परिज्ञानात्प्रश्नस्याभिप्रायमाह ।। कथमित्यादिना ।। तर्हि मुक्तान्प्रति विधिशास्त्रस्य प्रत्यक्षादेश्चानर्थक्यमित्याशंक्याह ।।
न चेति ।। नहि व्यवहारातीतेषु तेषु गुणदोषाशंकेत्यर्थः ।। ७ ।। ।।

द्वैतिनां मते मुक्तात्मस्विवास्मत्पक्षेपि स्वेत्रतस्येश्वरत्वेन प्रतिशास्त्राद्यानर्थक्यं विद्यावस्थायामास्थितमिति फलितमाह ॥ तथेति ॥ द्वितीयं
दूषयति ॥ अविद्येति ॥ न देवदृष्टांतेन विरणोति ॥ यथेति ॥ एवमद्वैतिनामपि विद्योदयात्प्रागर्थवत्त्वं शास्त्रादेरिति विशेषः ॥ द्वैतिभिरद्वै
तिनां न साम्यमिति शंकते ॥ नन्विति ॥ अवस्थयोर्वस्तुत्वेनास्मन्मते शास्त्राद्यर्थवत्त्वं नेति फलितमाह ॥ अतर इति ॥ सिद्धांते तु नाव
स्थयोर्वस्तुत्वेनेति वैषम्यमाह ॥ अद्वैतिनामिति ॥ व्यावहारिकं च द्वैतमद्वैतेनापि स्वीकृतमिति ॥ ५ ॥ श्रीराम ॥ ताशंक्याह ॥ अविद्येति ॥

तथा नः क्षेत्रज्ञानामीश्वरैकत्वे सति शास्त्रानर्थक्यं भवत्यविद्याविषये चार्थवत्त्वं ॥ यथा द्वैतिनां सर्वेषां बंधावस्थायामेव
शास्त्राद्यर्थवत्त्वं न मुक्तावस्थायामेवमद्वैतवादिनामपि ॥ आत्मनः ननु आत्मनो बंधमुक्तावस्थे परमार्थत एव वस्तुभूते द्वैति
नां नः सर्वेषां ॥ अतो हेयोपादेयतत्साधनसद्भावे शास्त्राद्यर्थवत्त्वं स्याद् द्वैतिनां पुनः द्वैतस्यापरमार्थत्वाद् विद्याकृतत्वे
बंधावस्थाया आत्मनोऽपरमार्थत्वे निर्विषयत्वात् शास्त्राद्यानर्थक्यमिति ॥ चेन्नात्मनोऽवस्थाभेदानुपपत्तेः ॥ यदि ता
वदात्मनो बंधमुक्तावस्थे युगपत्स्यातां क्रमेण वा ॥ युगपत्तावदन्योन्यविरोधान्न संभवतः स्थितिगती इव ॥ कस्मि
॥ न ॥ क्रमभावित्वे च निर्निमित्तत्वेऽनिर्मोक्षप्रसंगः ॥ ५ ॥ श्रीरामः ॥ ५ ॥ ५ ॥

कस्मिन्नद्वैते न व्यवहाराज्ञानस्य वस्तुत्वेत्यर्थः ॥ बंधावस्थायां वस्तुत्वाभावे दोषांतरमाह ॥ बंधेति ॥ आत्मनस्तत्त्वतोऽवस्थाभेदो द्वैतिनामपि
नास्तीति परिहरति ॥ नेति ॥ अनुपपत्तिं दर्शयितुं विकल्पयति ॥ यदीति ॥ तत्राद्यं दूषयति ॥ युगपदिति ॥ द्वितीयेऽपि क्रमभाविन्योर
वस्थयोर्निर्निमित्तत्वं सनिमित्तत्वं वेति विकल्प्याद्ये सदा प्रसंगाद्बंधमोक्षयोरव्यवस्थास्यादित्याह ॥ क्रमेति ॥ ५ ॥ ० ॥ १

आ० १३ ॥
२३६ ॥ रामः ॥

कत्मांतरं निरस्यति॥ अन्येति॥ बंधमोक्षावस्थेन परमार्थे अस्वाभाविकत्वात्स्फटिकलौहित्यवदिति स्थितेफत्तिमाह॥ तथा चे
ति॥ वस्तुत्वमिच्छतोऽवस्थयोरवस्तुत्वोपगमादित्यर्थः॥ उतन्न्यावस्थयोर्नवस्तुत्वमित्याह॥ किं चेति॥ अवस्थयोर्वस्तुत्वमिच्छता
तयोर्यौगपद्यायोगाद्वाच्ये क्रमे बंधस्य पूर्वत्वं मुक्तेश्च पाश्चात्यमिति स्थिते बंधस्यादित्वकृतं दोषमाह॥ बंधेति॥ तस्याश्चाकृ
तागमकृतविघ्नाधानिवृत्तयेऽनादित्वमेष्टव्यमंतवत्वं च मुक्त्यर्थमास्थेयं॥ तच्च यदनादिभावरूपं तन्नित्यं यथात्मेति व्या-

अन्यनिमित्तत्वे च स्वतोऽभावादपरमार्थत्वप्रसंगस्तथा च सतत्वाभ्युपगमहानिः॥ किंच॥ बंधमुक्त्यावस्थयोः पौर्वापर्य
निरूपणायां बंधावस्थापूर्वप्रकल्प्यमानादिमत्त्वं तवनी च न तत्सर्वप्रमाणविरुद्धं॥ तथा मोक्षावस्थाया आदिमत्त्वमनंतता च
प्रमाणविरुद्धैवाभ्युपगम्यते॥ न चावस्थावतोऽवस्थांतरं गच्छतो नित्यत्वमुपपादयितुं शक्यं॥ ७१॥ श्री

प्तिविरुद्धमित्यर्थः॥ मोक्षस्य पाश्चात्यकृतं दोषमाह॥ तथेति साहि ज्ञानादिनासाध्यत्वादादिमती पुनरावृत्त्यनंगीकारादनंता च
तच्चापत्सादिभावरूपं तदंतवद्यथाघटादीति व्याप्त्यंतरविरुद्धमित्यर्थः॥ किंच क्रमभाविनीभ्यामवस्थाभ्यामात्मा संबध्यमानेन वाप्ययमेत्
र्वावस्थयासहैवोत्तरावस्थां गच्छति चेदुत्तरावस्थायामपि पूर्वावस्थायाऽवस्थानादनिर्मोक्षः॥ यदि पूर्वावस्थां त्यक्त्वोत
रावस्थां गच्छति तदा पूर्वसागोत्तरास्योरात्मनः सातिशयत्वान्नित्यत्वानुपपत्तिरित्याह॥ न चेति॥ ७२॥ श्रीरामायनम॥

पी॰ आत्मनो नस्थाद्वयसंबंधो नास्तीति द्वितीयम[illegible]चद्दूषयति ॥ अयेत्यादिना ॥ नर्हि पक्षद्वयेपि दोषाविशेषात्त्वाद्वैतमतानुरागे हेतुरित्याशंक्या
२ [illegible]दविषये चेत्युक्तं विवृणोति ॥ न चेति ॥ तदेवस्फुटयति ॥ अविदुषां हीति ॥ फलं भोक्तृत्वं कर्तृत्वं हेतुर्यस्य फलं देहविशेषो हेतुरदृष्टं तयोरना
[illegible]त्मनो भोक्ताहं कर्ताहं मनुष्योहमित्याध्यात्मदर्शनमधिकारकारणं तेनाविद्वद्विषयं विधिनिषेधशास्त्रमित्यर्थः ॥ विदुषामपि मनुष्योहमि
१४ त्यादिव्यवहारान्तद्विषयं शास्त्रं किं न स्यादित्याशंक्याह ॥ नेति ॥ भोक्तृत्वकर्तृत्वाभ्यां ब्राह्मण्यादिमत्त्वो देहाद्धर्माधर्माभ्यां चात्मनोऽन्यत्वं पश्य

अथानिसत्वदोषपरिहाराय बंधमुक्तावस्थाभेदेन कल्प्यते अन्योद्वैतिनां अपि शास्त्रानर्थक्यादिदोषोऽपरिहार्य एवेति समानत्वा
त्वाद्वैतवादिनापरिहर्तव्यो दोषः ॥ न च शास्त्रानर्थक्यं यथाप्रसिद्धा ५ विद्वत्पुरुषविषयत्वाच्छास्त्रस्य ॥ विदुषां हि फलहेत्वोरनात्मनोरात्म
पां॥विदु दर्शनं ॥ न विदुषां हि फलहेतुभ्यामात्मनोन्यत्वदर्शिसतितयोरहमित्यात्मदर्शनानुपपत्तेः ॥ न ह्यत्यंतं मूढ उन्मत्तादिरपि जला हि
ग्न्योः छायाप्रकाशयोर्वैकात्म्यतां पश्यति किमुत विवेकी ॥ तस्मात्त्न विधिप्रतिषेधशास्त्रं तावत्फलहेतुभ्यामात्मनोऽन्यत्वदर्शिनो भ ण

आ॰ १३ ॥
२३७ ॥ राम ॥

तोन विधिनिषेधाधिकारित्वं उक्तफलादावात्मात्मीयाभिमानासंभवादित्यर्थः आत्मनो देहादेरन्यत्वदर्शिनो न देहादावात्मधीरित्येतदुपपादयति
न हीति ॥ विदुषां न विधिनिषेधाधिकारितेत्युक्तमुपसंहरति ॥ तस्मादिति ॥ ७१ ॥ श्रीरामचंद्राय नमः ॥ श्रीकृष्णाय नमः ॥ ७१ ॥

शास्त्रस्याविद्वद्विषयत्वमिव विद्वद्विषयत्वमपि मंतव्यमुभयोरपि शास्त्रश्रवणाविशेषादित्याशंक्याह ।। नहीति ।। नत्रस्थो यस्मिन्देशे देवदत्तः ।। स्थि
तस्तत्रैव वर्त्तमानः सन्नित्यर्थः ।। ननु देवदत्ते नियुक्ते विष्णुमित्रोपि कदाचिन्नियुक्तोस्मीति प्रतिपद्यते ।। सत्यं ।। नियोगविषयान्नियोज्यादात्मनो
विवेकाग्रहणान्नियोज्यत्वभ्रांतेरित्याह ।। नियोगेति ।। अविवेकिनो नियोगधीर्भवतीति दृष्टांतमुक्त्वा फलहेतौ चात्मदृष्टिविशिष्टस्याविदुषः
संभवत्येव विधिनिषेधाधिकारित्वमिति दार्ष्टांतिकमाह ।। तथेति ।। विधिनिषेधशास्त्रमविद्वद्विषयमिति वदता शास्त्रानर्थक्यं समाहितं ।। सं

न हि देवदत्त त्वमिदं कुर्विति कस्मिंश्चित्कर्मणि नियुक्तो विष्णुमित्रोहं नियुक्त इति तत्रस्थो नियोगं शृण्वन्नपि प्रतिपद्यते । नियोगविष
याविवेकाग्रहणात्तूपपद्यते प्रतिपत्तिः । तथा फलहेत्वोरपि । ननु प्राक्तनसंबंधापेक्षया युक्तैव प्रतिपत्तिः शास्त्रार्थविषया फल
हेतुभ्यामन्यात्मत्वदर्शनेऽपि सति इष्टफलहेतोः प्रवर्तितोस्म्यनिष्टफलहेतोश्च निवर्तितोस्मीति ।। ६५ ।। ५ ।। श्रीरामः ।।

प्रतिशास्त्रस्याविद्वद्विषयत्वेनैवार्थवत्वं शक्यसमर्थनमितिशंकते ।। नन्विति ।। प्रकृतिरविद्याततोज्ञानोपाधेरहंकाराभिमानात्मसंबंधो विधो
[illegible]भागानुभूतफलादपेक्षया विधिना प्रवर्तितो निषेधेन निवर्तितोस्मीति विधिनिषेधविषयासंसारमपि विद्यायां धीर्युक्तैवेत्यर्थः ।। विदुषो
[illegible]माविद्यकं संबंधमनपेक्ष्य विधिनिषेधविषयां धियमुक्तामेव व्यनक्ति ।। इष्टेति ।। ६ ।। श्रीरामचंद्राय नमः ।। श्रीकृष्णाय नमः ।। ६ ।।

यद्यप्येष नस्मरपते अथपुत्रमा हस्तं प्र हलं पराः सं लोकः इत्यादि

•टी•
१९॥ राम॥
त

न्न विदुषो मिथ्याभिमानवत्त्व विदुषः सोनुवर्तनेन तथा चाविद्यासंबंधापेक्षया नयुक्ता विदुषो यथोक्ता धीरिति तत्राह॥ यथेति॥ पितापुत्रौ भ्रान्ते त्यादीनां
[illegible]न्तदृष्टावप्यन्योन्य नियोगार्थस्य निषेधार्थस्य च धीर्दृष्टा दीनरमधिकृतस्य विधौ निषेधे वानस्य तदनुष्ठानाशक्तो पुत्रस्य तदनुष्ठाना
[illegible]क्तौ द्विषयाग्राधीरिष्टा। संप्रतिकृत्याशेषानुष्ठानस्य पुत्रकार्यता प्रतिपादनात् पुत्रं चाधिकृत्य विधिनिषेधप्रवृत्तौ तस्य तदशक्तौ पितु
स्तदर्थधीरपगतानान्धान्याचादिष्वपि दृष्टव्यं एवं विदुषो हेतुफलाभ्याममत्वदर्शनेपि प्राक्कालीनाविद्यादेहादिसंबंधादविरुद्धा विधिनिषेधार्था

यथा पितृपुत्रादीनामितरेतरात्मान्यत्वदर्शने सत्यपि अन्योऽन्यनियोग प्रतिषेधार्थाधीः। नंव्यतिरिक्तात्मदर्शनप्रतिपत्तेः
प्रागेव फलहेत्वोरात्माभिमानस्य सिद्धत्वात्॥ प्रतिपन्ननियोगप्रतिषेधार्थो हि फलहेतुभ्यामात्मनोऽन्यत्वं प्रतिपद्यते॥
न पर्वं। तस्माद्विधिप्रतिषेधशास्त्रमविद्वद्विषयमिति सिद्धं॥ ६१॥ श्रीरामायनमः॥ ६१॥

तिप५

धीरित्यर्थः॥ पुत्रादीनां मिथ्याभिमानान्मिथो नियोगधीर्युक्ता तत्त्वदर्शिनस्तु तदभावान्न देहादिसंबंधाधीना नियोगधीरि॰
तिपरिहरति॥ नेत्यादिना॥ किंच सर्वापेक्षाधिकरणे सम्यग्ज्ञानस्यादृष्टसाध्यत्वोक्तेर्विधिनिषेधार्थानुष्ठानं सम्यग्ज्ञानात्॥
पर्वमिति कुतो विदुषस्तदनुष्ठानमित्याह॥ प्रतिपन्नेति॥ सत्यदृष्टे सम्यग्धीरदृष्टेऽसति चाशुद्धबुद्धेस्तदभावा~~द~~न्वयव्यति
रेकाभ्यां विविदिषावाक्याच्च विधिनिषेधानुष्ठानात्पर्वं न सम्यग्धीरित्याह॥ नपर्वमिति॥ विधिनिषेधयोर्विद्वद्विषयत्वायोगे
॥ फलितमाह॥ तस्मादिति॥ ६१॥

आ०१३॥
२३८॥ राम॥

स्या शास्त्रं विद्वद्विषयं तेनोक्तमर्थं वक्तुमाक्षेपसमाधिभ्यां प्रपंचयितुमाक्षिपति ॥ न चेति ॥ चकाराद्व्यर्थमप्रवृत्तिरिति संबध्यते ॥ आत्मनो देहादिव्य-
तिरेकं पश्यतां देहाद्यभिमानरूपाधिकारहेत्वभावाद्विधितो यागादावप्रवृत्तिर्निषेधाच्चाभक्ष्यभक्षणादेर्न निवृत्तिः ॥ तत्तेषां प्रवृत्तिनिवृत्त्योरभावे
देहादावात्मत्वमनुभवतामपि न तेपुत्के तेषां पारलौकिकभोक्तृप्रतिपत्त्यभावादित्यर्थः ॥ विदुषामविदुषां च प्रवृत्तिनिवृत्त्यभावे -
समपरो अन इति ॥ आत्मनो देहाद्व्यतिरेकं परोक्षं च देहाद्यात्मत्वं पश्यतः शास्त्रानुरोधादेव प्रवृत्तिनिवृत्त्युपपत्तेर्न शास्त्रानर्थक्यमित्युत्तरमाह ॥ नेत्य

ननु स्वर्गकामो यजेत कलंजं न भक्षयेदित्यादावात्मव्यतिरेकदर्शिनामप्रवृत्तिः केवलदेहाद्यात्मदृष्टीनां चातः कर्तुरभावान्न शास्त्रा- स्प ५
नर्थक्यमिति चेन्न ॥ यथाप्रसिद्धित एव प्रवृत्तिनिवृत्त्युपपत्तेः ॥ ईश्वरस्येत्र लोकवद्दर्शी ब्रह्मविन्नावत्त प्रवर्तते ॥ तथा नैरात्म्यवाद्यपि नास्ति
परलोक इति न प्रवर्तते ॥ यथाप्रसिद्धस्तु विधिप्रतिषेधशास्त्रश्रवणान्यथानुपपत्त्या अनुमितात्मास्तित्वः आत्माविशेषाद-
नभिज्ञः कर्मफलसंजाततृष्णः श्रद्धयान्वीया च प्रवर्तत इति सर्वेषां नः प्रत्यक्षः ॥ ५२ ॥ ॥ ॥ ॥ ॥ ०

प्रसिद्धिरत्र शास्त्रीयाभिमता ॥ एतदेव विवृण्वन् ब्रह्मविदो वा नैरात्म्यवादिनो वा परोक्षज्ञानवतो वा प्रवृत्तिं विवक्षसीति विकल्प्य पक्षं दूष-
यति ॥ ईश्वर इति ॥ न प्रवर्तते न निवर्तते चेत्यपि द्रष्टव्यं ॥ द्वितीयं निरस्यति ॥ तथेति ॥ पूर्ववदत्रापि संबंधः ॥ तृतीयमंगीकारोति ॥ ०
यथोक्तविधिनिषेधादीनां प्रसिद्धिमनुसंधानः सन्निति यावत् ॥ चकारान्निवर्तते चेत्यनुकृष्यते ॥ ५३ ॥ श्रीरामचंद्राय नमः ॥

०८।
२९।राम।।

मसविरं नैरात्म्यवादिनं च मुत्का देहाद्यतिरिक्तात्मानं परोक्षमपरोक्षं च देहाद्यात्मत्वं पश्यतो विधिनिषेधाधिकारित्वे सिद्धे फलितमाह।। अत
तो।। विधांतरेण शास्त्रानर्थक्यं चोदयति। विवेकिनामिति।। दृष्टा हि तेषां विधिनिषेधयोरप्रवृत्तिर्न हि देहादिभ्यो विविक्तमात्मानं दृष्ट
वतां तयोरधिकारस्तेन तान्प्रति शास्त्रं नार्थवच्च देहाद्यात्मत्वदृशस्तु शास्त्राधिक्रियंते तेषां यद्यदाचरतीति न्यायेन विवेकिनोऽनुगच्छतां
विध्यादावप्रवृत्तेरतोधिकार्यभावाद्विध्यादिशास्त्रस्य तदनुसारिशिष्टाचारस्य चानर्थक्यमित्यर्थः।। किं सर्वेषां विवेकित्वादधिकार्य
भावादानर्थक्यं शास्त्रस्योच्यते किं वा कस्यचिदेव विवेकित्वेपि तदनुवर्तित्वादन्येषामप्यप्रवृत्तेरानर्थक्यं चोद्यते तत्र प्रथमं प्रत्याह।।

अतो न शास्त्रानर्थक्यं।। विवेकिनाम प्रवृत्तिदर्शनात्तदनुगामिनाम प्रवृत्तौ शास्त्रानर्थक्यमिति चेत्।। न कस्यचिदेव विवे
कोपपत्तेः।। अनंतेषु हि प्राणिषु कश्चिदेव विवेकी स्यात् यथैवेदानीं न च विवेकिनमनुवर्तंते मूढाः रागादिदोषप
रतंत्रत्वात् प्रवृत्तेः।। अभिचरणादौ च प्रवृत्तिदर्शनात्।। स्वाभाव्याच्च प्रवृत्तेः।। ५।। श्रीगणाधिपतीनमः।। ५:

न कस्यचिदिति। मनुष्याणां सहस्रेष्विति न्यायेनोक्तमेव स्फुटयति।। अनंतेष्विति।। तत्रानुभवानुरोधेन दृष्टांतमाह।। यथेति।। द्वितीयं दूष
यति। न चेति।। किंच विवेकिनाम प्रवृत्तावन्येषामप्यप्रवृत्तिरित्युक्तमयुक्तं निषिद्धेपि श्येनादौ तदप्रवृत्तावपीतरप्रवृत्तेरित्याह।। अभिचरणा
दौ चेति।। अविवेकिनां रागादिद्वारा प्रवृत्त्यास्पदं सर्वसंग्रहीतुमादिपदं। एतेन च विवेकिनां प्रवृत्त्यभावेपि नान्यस्याप्रवृत्तिरित्याह।। स्वाभाव्या
।। च्चेति।।

आ०१३।।
२२९।।राम।।

प्रवृत्तेः स्वभावाख्याज्ञानकार्यत्वे भगवद्वाक्यमनुकूलयति ॥ स्वभावस्त्विति ॥ प्रवृत्तेरज्ञानजन्यत्वे विधिनिषेधाधीनप्रवृत्तिनिवृत्त्या
त्मकत्वं बंधस्याविद्यामात्रत्वादविद्वद्विषयत्वं शास्त्रस्य सिद्धमिति फलितमाह ॥ तस्मादिति ॥ दृष्टमेवानुसँन्न विद्यास्यथादृष्टस्तद्विष र २
यस्तदाश्रयः संसारस्तथा च प्रवृत्तिनिवृत्त्यात्मकसंसारस्याविद्वद्विषयत्वात्तद्धेतुविधिनिषेधशास्त्रस्यापि तद्विषयत्वमित्यर्थः ॥ न
न्वविद्याक्षेत्रज्ञमाश्रयंती स्वकार्यं संसारमपि तस्मिन्नाधत्ते तेन तस्यैव शास्त्राधिकारित्वं नेत्याह ॥ नेति ॥ उक्ताविद्यादेः प्रत्युदेक्षेत्र
ज्ञे वस्तुतोऽसंबंधेपि तस्मिन्नारोपितं तमेव दुःखीकरोतीत्याशंक्याह ॥ न चेति ॥ तदेव दृष्टांतेन स्पष्टयति ॥ न हीति ॥ क्षेत्र

स्वभावस्तु प्रवर्तत इत्युक्तं ॥ तस्मादविद्यामात्रः संसारो यथादृष्टविषय एव ॥ न क्षेत्रज्ञस्य केवलस्याविद्या तत्कार्यं च ॥
न च मिथ्याज्ञानं परमार्थवस्तु दूषयितुं समर्थं ॥ न ह्यूषरदेशं स्नेहेन पंकीकर्तुं शक्नोति मरीच्युदकं ॥ तथाऽविद्या क्षे
त्रज्ञस्य ॥ न किंचित्कर्तुं शक्नोत्यत इदमुक्तं क्षेत्रज्ञं चापि मां विद्धि अज्ञानेनावृतं ज्ञानं इति च ॥ अथ किमिदं संसारि
णामिवाहमेवं ममेदं इति पंडितानामपि ॥ ८२ ॥ श्रीरामः ॥

ज्ञस्य वस्तुतोऽविद्याद्यसंबंधे भगवद्वचोपि द्योतकमित्याह ॥ अत इति ॥ क्षेत्रज्ञस्येश्वरयोरैक्ये किमित्यसावात्माऽज्ञानमहमिति बुध्यमानोपि
स्वस्येश्वरत्वमीश्वरोस्मीति न बुध्यते तत्राह ॥ अज्ञानेनेति ॥ आत्मनो वस्तुतः संसाराऽसंस्पर्शे विद्वदनुभवविरोधः स्यादिं चो ति२
द्यति ॥ अथेति ॥ एवमित्यभिजात्यादिवैशिष्ट्यमुक्तं ॥ इदमा क्षेत्रकलत्रादिः ॥ पंडितानामपि प्रतीतं संसारित्वमिति शेषः ॥ १

०टी०
१०१

किंपांडित्यं देहादावात्मदर्शनं किंवा कूटस्थात्मदृष्टिराद्ये संसारित्वादिधीरिति विकल्प्याद्यं निराक्रसाह-स्वरिवति ॥ तस्य वस्तुतो ऽसंसारि[illegible]धिप्रातिभासिकं संसारित्वमभीष्टमिति विशेषः ॥ द्वितीयं दूषयति ॥ यदीति ॥ नहि कूटस्थात्मधियः संसारित्वं प्रतीयतेये[illegible]स्तुतो ऽसंसारित्वं विरुध्येन कूटस्थात्मधीविरुद्धायाः संसारित्वबुद्धेरनवकाशत्वादित्यर्थः ॥ आत्मानमविक्रियं पश्यतोपि कुतो भोगकर्मणी न स्यातामित्याशंक्याह ॥ विक्रियेति ॥ अविक्रियात्मबुद्धेर्भोगकर्माकांक्षयोरभावे कस्य शास्त्रे प्रवृत्तिरिताशंक्याह ॥ अथेति ॥ फलार्थित्वाभावाद्विदुषो न कर्मणि प्रवृत्तिरित्येवं स्थिते सत्यनंतरमविद्वान्फलार्थित्वात्तदुपाये कर्मणि प्रवर्ततः

श्रविदं तत्पांडित्यं यत्क्षेत्र एवात्मदर्शनं ॥ यदि पुनः क्षेत्रज्ञमविक्रियं पश्येयुस्ततो [illegible]न भोगं कर्म वा कांक्षेयुर्ममस्यादिति ॥ विक्रियैव हि भोगकर्मणी ॥ अथैवं सति फलार्थित्वाद्विद्वान् प्रवर्तते ॥ विदुषः पुनरविक्रियात्मदर्शिनः फलार्थित्वाभावात् प्रवृत्त्यनुपपत्तौ कार्यकरणसंघातव्यापारोपरमे निवृत्तिरुपचर्यते ॥ इदं चान्यत्पांडित्यं कस्यचिदस्तु क्षेत्रज्ञ ईश्वर ए

॥ व क्षेत्रं चान्यत्क्षेत्रज्ञस्याविषयः ॥ अहं तु संसारी ॥ ८१ ॥

आ०१३॥
२४५॥ रामः॥

शास्त्राधिकारीत्यर्थः विदुषो वैधप्रवृत्त्यभावेपि निषेधाधीननिवृत्तेरपि दुर्वचत्वात्तस्य निवृत्तिनिष्ठत्वासिद्धिरित्याशंक्याह ॥ विदुषइति ॥ तनीमुत्थापयति ॥ इदं चेति ॥ सिद्धांताद्विशेषमाशंक्य क्षेत्रस्य क्षेत्रज्ञाद्वस्तुतो भिन्नत्वेन तद्विषयत्वानंगीकारान्मैवमित्याह ॥ क्षेत्रं चेति ॥ अहंधीविषयस्यात्मनो वस्तुतः संसारित्वस्वीकाराच्च सिद्धांताद्भेदोस्तीत्याह ॥ अहं त्विति ॥ ८१ ॥ ८१ ॥०

संसारित्वमेवस्फोरयति ॥ सुखीति ॥ संसारस्य वस्तुत्वेन तदनिवृत्त्या पुमर्थासिद्धिरित्याशंक्याह ॥ संसारेति ॥ कथं तदुपरमस्य हेतुं विना
कर्तव्यत्वमित्याशंक्याह ॥ क्षेत्रेति ॥ क्षेत्रं ज्ञात्वा ततो निष्कृष्टस्य क्षेत्रज्ञस्य ज्ञानं कथं संसारोपरतिमुत्पादयेदित्याशंक्याह ॥ ध्यानेनेति
संसारित्वमात्मनो बुध्यमानस्य तदहितादीश्वरादन्यत्वं वक्तव्यमिति वक्तुमिति शेषः ॥ तदेवान्यत्वमुपपादयति ॥ यश्चेति ॥ मम
संसारिणोऽसंसारीश्वरत्वं कर्तव्यमित्येवं यो बुध्यते यो वा न तथाविधं ज्ञानं नव कर्तव्यमित्युपदिशति स क्षेत्रज्ञतादीश्वरादन्यो ज्ञेयोऽन्यथो
पदेशानर्थक्यादित्यर्थः ॥ आत्माऽसंसारी परस्मादात्मनोऽन्यस्तस्य ध्यानाधीनज्ञानेनेश्वरत्वं कर्तव्यमित्येतज्ज्ञानां पांडित्यमिति ॥

सुखी दुःखी च संसारोपरमश्च मम कर्तव्यः ॥ क्षेत्रं क्षेत्रज्ञविज्ञानेन ध्यानेन चेश्वरं क्षेत्रज्ञं साक्षात्कृत्वा तत्स्वरूपावस्थानेनेति ॥
यश्च एवं बुध्यते यश्च बोधयति नासौ क्षेत्रज्ञतरस्तेवं मन्वानो यः स पंडितापसदः संसारमोक्षयोः शास्त्रस्य चार्थवत्त्वं करोमीति ॥ ७ ॥

रूपपत्तिरेवमिति ॥ अयमात्मा ब्रह्मेत्यात्मनो ब्रह्मत्वश्रुतिविरोधादित्यर्थः ॥ ननु संसारस्य वस्तुत्वांगीकारात्तत्तदवस्थायां कर्मकांडस्यार्थवत्त्वं संसा
धि रनिरासेनात्मनो ब्रह्मत्वे ध्यानादिना सौते मोक्षावस्थायां ज्ञानकांडस्यार्थवत्त्वं तत्कथं यथोक्तस्य न वा पंडितापसदत्वेनाक्षिप्यते तत्राह ॥ सं
सारेति ॥ करोमीति मन्यमानो यः स पंडितापसद इति पूर्वेण संबंधः ॥ कर्मकांडं हि कल्पितं संसारित्वमधिकृत्य साध्यसाधनसंबंधं
[illegible]दर्थवदिष्टं ॥ ज्ञानकांडमपि तथाविधं संसारित्वं पराकृत्याखंडैकरसे प्रत्यग्ब्रह्मणि पर्यवस्यदर्थवन्मन्वेदित्यर्थः ॥ ७ ॥ श्री ॥

मनः शास्त्रसिद्धं ब्रह्मत्वं त्यक्त्वा ऽब्रह्मत्वं कल्पयन्नात्महा भवतीत्यतो कथं बहिर्मुखः स्यादित्याह ॥ आत्महेति ॥ ननु क्षेत्रज्ञं चापि मां विद्धीत्यनेन
ंतर्यामी परो जीवात्मयो निरूप्यनेन जीवस्येश्वरत्वमत्र प्रतिपाद्यनेन कथमित्या माक्षिप्यनेनत्राह ॥ स्वयमिति ॥ किंच न तत्त्वमसीति व
त्यप्रसिद्धक्षेत्रज्ञानुवादेनाप्रसिद्धं तस्येश्वरत्वं रहोपदेशनः श्रुतं तत्स्पृहानिमग्नश्रुतस्य च जीवेश्वरयोरात्यंतिकभेदस्य कल्पनां कुर्वन्कथं व्या न
मूढः स्यादित्याह ॥ श्रुतेति ॥ ननु केचन व्याख्यातारो यथोक्तं पांडित्यं पुरस्कृत्य क्षेत्रज्ञं चापीत्यादिश्लोकं व्याख्यानवंतस्तत्कथमुक्तं पांडित्यमा
स्थाय व्यामूढत्वं तत्राह ॥ तस्मादिति ॥ क्षेत्रज्ञं चापीत्यत्र क्षेत्रज्ञेश्वरयोरैक्यं स्वाभीष्टं स्पष्टयितुं प्रस्तुतमेव बोधमनुद्रवंति ॥ यदुक्तमिति ॥ नातिकमे

आत्महा स्वयंमूढोऽन्यांश्च व्यामोहयति शास्त्रार्थसंप्रदायरहितत्वात् ॥ श्रुतहानिमश्रुतपरिकल्पनां च कुर्वन्नस्मादसंप्रदायवित्
सर्वशास्त्रार्थविदपि मूर्खवदेवोपेक्षणीयः ॥ यदुक्तं ईश्वरस्य क्षेत्रज्ञैकत्वे संसारित्वं प्राप्नोति क्षेत्रज्ञानां चेश्वरैकत्वे संसारिणोऽ
भावात् संसाराभावप्रसंग इत्येतौ दोषौ प्रस्तुतौ विद्याविद्ययोर्वैलक्षण्याभ्युपगमादिति । कथंमविद्यापरिकल्पितेन दोषेणात
द्विषयं वस्तु पारमार्थिकं न दुष्यतीति ॥

समाधानं

कत्वमतात्विकं संसारित्वमित्यंगीकृत्योक्तमेव समाधिं स्मारयति ॥ एतावितिं ॥ ईश्वरस्य संसारित्वं संसार्यभावेन संसाराभावश्चेत्युक्तौ
दोषौ विद्याविद्ययोर्वैलक्षण्येपि कथं प्रस्तुतौ विनिपतति ॥ कथमिति ॥ कल्पितेन संसारेण कल्पनाधिष्ठानमद्वयं वस्तुनो न संब
ध्यमिति परिहरति ॥ अविद्येति ॥ तद्विषयं कल्प्यं नास्पदं अधिष्ठानमिति यावत् ॥ ८२ ॥ श्रीरामचंद्राय नमः ॥ ६ ॥ ६ ॥

कल्पितेनाधिष्ठानस्य वस्तुनोऽस्पर्शे दृष्टांतैः स्मारयति ॥ तथा चेति ॥ ईश्वरस्य संसारित्वाप्रसंगं प्रकटीकृत्य संगं नरविराममनुस्मारयति ॥ संसारि प्र
णइति ॥ नन्वविद्या संसारं संसारिणं च कल्पयंती स्वतंत्रा न तत्त्वव्याघातात्सारतंत्र्ये वाश्रयांतराभावात्क्षेत्रज्ञस्य तद्वत्त्वे संसारित्वमिति शंक
ते ॥ नन्विति ॥ न चाविद्यावत्त्वमविद्याकृतमनवस्थानादिति भावः ॥ यत्तत्त्वानंदं तोरगवद्विद्या किं करिष्यतीति तत्राह ॥ तत्कृतं चेति ॥ ०
उक्तविद्यातज्जयोर्ज्ञेयत्वान्नात्मधर्मतेत्युत्तरमाह ॥ नेत्यादिना ॥ तदेव प्रपंचयति ॥ यावदिति ॥ ज्ञेयस्य क्षेत्रधर्मत्वेपि क्षेत्रद्वारा क्षेत्रज्ञस्यत

तथा च दृष्टांतो दर्शितो मरीच्यंभसोषरदेशो न पंकीक्रियत इति ॥ संसारिणोऽभावात् संसाराभावप्रसंगदोषोपि संसारसंसारि
णोरविद्याकल्पितत्वोपपत्त्या प्रत्युक्तः ॥ नन्वविद्यावत्त्वमेव क्षेत्रज्ञस्य संसारित्वदोषः ॥ तत्कृतं च दुःखित्वादि प्रत्यक्षमुपलभ्यतेति न ॥ ३
ज्ञेयस्य क्षेत्रधर्मत्वात् ज्ञातुः क्षेत्रज्ञस्य तत्कृतदोषानुपपत्तेः ॥ यावत् किंचित् क्षेत्रज्ञस्य दोषजातमविद्यमानमासंजयसि तस्य
ज्ञेयत्वोपपत्तेः क्षेत्रधर्मत्वमेव न क्षेत्रज्ञधर्मत्वं ॥ न चैतेन क्षेत्रज्ञो दुष्यति ज्ञेयेन ज्ञातुः संसर्गानुपपत्तेः ॥ यदि हि संसर्गः स्यात् ज्ञे
यत्वमेव नोपपद्येत ॥ यद्यात्मनो धर्मोऽविद्यावत्त्वं दुःखित्वादि च कथं भोः प्रत्यक्षमुपलभ्यते ॥ ५ ॥ श्रीरामायनमः ॥

[illegible] त्वमित्याशंक्याह ॥ न चेति ॥ क्षेत्रस्यापि ज्ञेयत्वान्न तेन चितो वस्तुनः संस्पर्शोस्तीत्युपपादयति ॥ यदि हीति ॥ धर्मधर्मित्वे
र्मेपि ज्ञेयत्वैकांतिरित्याशंक्याह ॥ यदीति ॥ आत्मधर्मस्यात्मना ज्ञेयत्वे स्वस्यापि स्वज्ञेयत्वापत्त्या कर्मकर्तृविरोधः स्यादित्यर्थः ॥

टी० किंचविनतंनक्षेत्रज्ञाश्रितं तद्दृश्यत्वाद्रूपादिवदित्याह ।। कथं वेति ।। किंच महाभूतानीत्यादिना ज्ञेयमात्रस्य क्षेत्रांतर्भावान्नाविद्यादेर्ज्ञात
म ।। [illegible]त्वाह ।। ज्ञेयं चेति ।। किंचैतच्चोद्यमीत्युक्तत्वात्क्षेत्रज्ञस्य तात्त्वनिर्णयाच्च तत्र संशयं किंचित्प्रविशन्नीत्याह ।। तानेवेति ।। क्षेत्रक्षेत्र
ज्ञयोरेवं स्वाभाव्ये सिद्धे सिद्धं क्षेत्रधर्मत्वमविद्यादेरिति फलितमाह ।। इत्यवधारित इति ।। विरोधाच्च न क्षेत्रज्ञधर्मत्वमविद्याद
रित्याह ।। क्षेत्रज्ञेति ।। विरुद्धत्वादित्येतत्संदर्शयति ।। अविद्येति ।। मात्रपदस्य व्यावर्त्यमानयुक्त्याख्यमवष्टंभांतरमिति वक्तुं केवलपदं ।।
यया अविद्यया विरुद्धमपि निर्वोढुं शक्यते न तस्याः स्वातंत्र्याभावाच्चितो ऽन्यस्याविद्यमानत्वे नानदाश्रयत्वात्तस्या विद्यास्वभावत्वयानद

६ कथं वा क्षेत्रज्ञधर्मः ज्ञेयं च सर्वं क्षेत्रं ज्ञातैव क्षेत्रज्ञ इत्यवधारितेऽविद्यादुःखित्वादेः क्षेत्रज्ञविशेषणत्वं क्षेत्रज्ञधर्मत्वं तस्य च
प्रत्यक्षोपलभ्यत्वमिति विरुद्धमुच्यते ।। अविद्यामात्रावष्टंभात्केवलं ।। अत्राह ।। सा अविद्या कस्येति ।। यस्य दृश्यते तस्यैव कस्य
दृश्यत इत्यत्रोच्यते अविद्या कस्य दृश्यत इति प्रश्नो निरर्थकः ।। ५ ।। ५ ।।

श्रयत्वव्याघातात्तदाश्रयजिज्ञासया पृच्छतीति ।। अत्राहेति ।। आश्रयमात्रं पृच्छ्यते तद्विशेषो वा प्रथमे प्रश्नस्यानवकाशत्वं मत्वाह ।। यस्ये
ति ।। अविद्यादृश्यायाः दृश्यत्वे पारतंत्र्यात्किंचिन्निष्ठत्वेनैव तद्दृष्टेर्नाश्रयमात्रं प्रष्टव्यं ।। अदृश्यत्वे चास्य प्रकाशत्वादसिद्धिरेव स्यादित्यर्थः ।। दृश्या
द्वितीयमालंबते ।। कस्येति ।। अविद्याया दृश्यमानत्वात्तदाश्रयविशेषस्यात्मनोपि स्वानुभवसिद्धत्वात्प्रश्नस्य निरवकाशत्वे सुतर
।। माह ।। अत्रेति ।। ५ ।।

आ० १३ ।।
२४२ ।। राम ।।

प्रश्नानर्थक्यं प्रश्नद्वारा स्फोरयति ॥ कथमित्यादिना ॥ तथापि कथं प्रश्नासिद्धिरित्यत आह ॥ नचेति ॥ तदेव दृष्टांतेन स्पष्टयति ॥ नहीति ॥ दृष्टां
तदार्ष्टांतिकयोर्वैषम्यं चोदयति ॥ नन्विति ॥ अज्ञानाश्रयस्य परोक्षत्वेपि प्रश्नानर्थक्यमित्याह ॥ अप्रत्यक्षत्वेति ॥ अविद्यावतोऽप्रत्यक्षत्वेपि तेना
विद्यासंबंधे सिद्धे प्रष्टुस्तव प्रश्नानर्थक्यं समाधिर्न कश्चिदित्यर्थः ॥ अबुद्धपराभिसंधिः शंकते ॥ अविद्यावत इति ॥ अविद्यावतस्तस्य परिहा
रात्तस्येन प्रयतितव्यमित्याह ॥ यस्येति ॥ ममैवाविद्यावत्तात्तत्परिहारे मया प्रयतितव्यमिति शंकते ॥ नन्विति ॥ तर्हि प्रश्नानर्थक्यमिति •

कथं दृश्यते चेदविद्यावन्तं मामपि पश्यसि ॥ न च तद्वत्युपलभ्यमाने सा कस्येति प्रश्नो युक्तो नहि गोमत्युपलभ्यमाने गावः कस्येति
प्रश्नोऽर्थवान्भवेत् ॥ ननु विषमो दृष्टांतो गवां तद्वतश्च प्रत्यक्षत्वात् ॥ संबंधोपि प्रत्यक्ष इति प्रश्नोऽनर्थको न तथाऽविद्यातद्वां
श्च प्रत्यक्षो यतः प्रश्नोऽनर्थकः स्यात् ॥ अप्रत्यक्षेणा [illegible] विद्यावताऽविद्यासंबंधे ज्ञाते किं तव स्यात् । विद्याया अनर्थहेतुत्वात्परि
हर्तव्या स्यात् ॥ यस्याविद्या स तां परिहरिष्यति ॥ ननु ममैवाविद्यां जानासि तर्ह्यविद्यावन्तं चात्मानं ॥ जानामि तु प्रत्यक्षेणाऽ
नुमानेन च ज्ञानासि कथं संबंधग्रहणं ॥ ५ ॥ थं ९

म सिद्धांतीस्याभिसंधिमाह ॥ जानासीति ॥ आत्मानमविद्यावंतं जानन्नपि तद्विषयप्रत्यक्षाभावात्पृच्छामीति शंकते ॥ जानामीति ॥ •
विद्यावतोऽप्रत्यक्षत्वं वदता तस्याहमविद्याकार्यवत्ताव्यतिरेकेणानुमातात्मवदित्यनुमेयत्वमिष्टमित्युपेत्य दूषयति ॥ अनुमा
॥ नेनेति ॥

न.८

वानर अविद्या

5

०टी० आत्मनोऽविद्यासंबंधग्रहे कानुपपत्तिरित्याशंक्य ज्ञातैवात्मा स्वस्याविद्यासंबंधं बुध्यतेन्यो वाज्ञानेनेति विकल्प्याद्यं दूषयति ॥ नहीति ॥ नत्का

५ ॥ राम ॥ लेस्वस्याविद्यां प्रतिज्ञातृत्वावस्थायामिति यावत् ॥ अविद्यां विषयत्वेन गृहीत्वा न ज्ञातृत्वेनैवोपयुक्तस्यात्मनस्तस्याः स्वात्मनि

[illegible]ः संबंधज्ञातृत्वमेकस्य कर्मकर्तृत्वविरोधादित्याह ॥ अविद्येति ॥ द्वितीयं निरस्यति ॥ न चेति ॥ योग्रहीता सोन्यो न संभवतीति

संबंधः ॥ तद्विषयमिति ज्ञातुरविद्यायाश्च संबंधस्तद्वदर्थः ॥ अनवस्थामेव प्रपंचयति ॥ यदीति ॥ आत्मनः स्वपरज्ञेयत्व

न हि नवतातुर्ज्ञेयभत्नपाऽविद्यमानत्काले संबंधो ग्रहीतुं शक्यते ॥ अविद्याविषयत्वेनैव ज्ञातुरुपयुक्तत्वात् । न च ज्ञातुरवि
द्यायाश्च संबंधस्य योग्रहीता ज्ञानं चास्मत् तद्विषयं संभवत्यनवस्थाप्राप्तेः ॥ यदि ज्ञातापि ज्ञेयसंबंधो ज्ञायेतान्यो ज्ञा
ताकल्प्यः स्यात् ॥ तस्याप्यन्यः तस्याप्यन्य इत्यनवस्थाऽपरिहार्या । यदि पुनरविद्या ज्ञेया अन्यद्वा ज्ञेयं ज्ञेयमेव तथा ज्ञा
तापि ज्ञातैव न ज्ञेयं भवति ॥ यदा चैवमविद्यादुःखित्वाद्यैर्न ज्ञातुः क्षेत्रज्ञस्य किंचिद्दुष्यति । नन्वयमेव दोषो यत्तं दोषवत्
क्षेत्रविज्ञातृत्वं ॥ न विज्ञानस्वरूपस्यैवाविक्रियस्य विज्ञातृत्वोपचारात् ॥ छ ॥ श्रीराम~~भ्यं~~क्षाय नमः ॥ छ ॥ छ ॥

आ० १३ ॥
२४३ ॥ राम ॥

योरयोगात्तस्मिंश्चाविद्यासंबंधस्याप्रामाणिकत्वान्नित्यानुभवगम्यत्वे स्थिते फलितमाह ॥ यदि पुनरिति ॥ यदा चैवं न देतसध्याहार्थं
ज्ञातुरात्मनो न किंचिद्दूष्यतीत्येतदमृष्यमाणः शंकते ॥ नन्विति ॥ किं ज्ञातृत्वं ज्ञानक्रियाकर्तृत्वं ज्ञानस्वरूपं वा नाद्यस्तदन
भ्युपगमात्तदुक्तदोषाभावात् द्वितीये तु ज्ञातृत्वस्यौपचारिकत्वाच्च न तत्त्वतो दोषोऽस्तीत्याह ॥ नेत्यादिना ॥ छ ॥ छ ॥ श्रीराम ॥

असत्यामपि क्रियायां क्रियोपचारं दृष्टान्तेन स्फुटयति ॥ यथेति ॥ आत्मनि वस्तुतो विक्रियात्वाभावे भगवदनुमतिं दर्शयति ॥ मयात्नेति ॥ गीताशा-
स्त्रं सप्तम्यर्थः ॥ स्वतएवात्मनि क्रियाद्यात्मत्वाभावो भगवता शास्त्रे यथोक्तस्तथैव व्याख्यातमस्माभिरिति संबंधः कथं तर्हि क्रियादिरा-
त्मनि भातीत्यत आह ॥ अविद्येति ॥ यथा वस्तुतो नास्त्यात्मनि क्रियादिरुपचारात्तु भाति तथा तत्र तत्रातीतप्रकरणेषु भगवतोक्तो

॥ यथोष्मतामात्रेणाग्नेस्तद्भिक्रियोपचारः तद्वत् ॥ तथाऽत्र भगवता क्रियाकारकफलात्मत्वाभाव आत्मनि स्वतएव प्रदर्शितः
अविद्याध्यारोपितमेव क्रियाकारकाद्यात्मन्युपचर्यते ॥ तथा तत्रतत्रैव एवं वेत्ति हंतारं प्रकृतेः क्रियमाणानि गुणैः कर्मा-
णि सर्वशः ॥ नादत्ते कस्यचित्पापमित्यादिप्रकरणे भगवता दर्शितः ॥ तथैव च व्याख्यातमस्माभिरतरेषु च प्रकरणेषु
च दर्शयिष्यामोहेतं ह्यात्मनि क्रियाकारकफलात्मकौतायाः स्वतोऽभावेऽविद्यमाचाध्यारोपितत्वे कर्माण्यविद्वत्कर्तव्या-
न्येव न विदुषामिति प्राप्तं ॥ ५४ ॥

यत्नरत्याह ॥ तथेति ॥ न केवलमतीतेष्वेव प्रकरणेषु वास्तवक्रियाद्यभावादात्मन्याध्यासिकी तद्धीरुक्ता किंतु वक्ष्यमाणप्रकरणेष्वपि
च तथैव भगवदभिप्रायप्रदर्शनं भविष्यतीत्याह ॥ उत्तरेषु चेति ॥ आत्मनि वास्तवक्रियाद्यभावेऽध्यासाच्चतत्सिद्धौ कर्मकांडस्यावि-
दु[illegible]कारित्वप्राप्तौ विद्वान्यजतेत्यात्वाकर्मारंभेनेत्यादिशास्त्रविरोधः स्यादिति शंकते ॥ हंतेति ॥ श्रीरामकृष्णाय नमः ॥ श्रीगुरु ५ ॥

०टी०
५१॥सूम१॥

गस्य सांख्यनिरेकविज्ञानाभिप्रायत्वादशनायाद्यतीतात्मधीविधुरस्यैव कर्मकाण्डाधिकारित्वसंगीरोतीति॥ सत्यमिति निं कथमतस्यैव कर्माधि
कारो [illegible]दुपपन्नमित्याशंक्याह॥ एतदेवेति॥ ज्ञानिनो ज्ञाननिष्ठायामेवाधिकारो निष्ठान्तरे त्वज्ञस्यैवेत्युपसंहारप्रकरणे विशेषेणोक्तो भवि
ष्यतीत्याह॥ सर्वेति॥ तदेवानुक्रामति॥ समासेनेति॥ जीवब्रह्मणोरैक्याभ्युपगमेन किंचिदवद्यमित्युपसंहरति॥ अलमिति॥
॥१०॥ एवं श्लोकद्वयं व्याख्याय श्लोकान्तरमवतारयति॥ इदमिति॥ कुत्र संग्रहोक्तिरुपयुज्यते तत्राह॥ व्याचिख्यासितस्येति॥

सत्यमेवं प्राप्तमेतद्वचनं हि देहभृता शक्यमित्यत्र दर्शयिष्यामः॥ सर्वशास्त्रार्थोपसंहारप्रकरणे च समासेनैव केवलं तेयं निष्ठा ज्ञा
नस्य या परेत्यत्र विशेषतो दर्शयिष्यामः॥ अलमिह बहुप्रपंचेनेत्युपसंह्रियते॥ इदं शरीरमित्यादिश्लोकोपदिष्टस्य क्षेत्राध्याया
र्थस्य संग्रहश्लोकोऽयमुपन्यस्यते तत्क्षेत्रं यच्चेत्यादि व्याचिख्यासितस्य ह्यर्थस्य संग्रहोपन्यासो न्याय्य इति॥ यन्निर्दिष्टमिदं शरी
रमिति॥ तत्क्षेत्रं यच्च यादृक्च यद्विकारि यतश्च यत्॥ स च यो यत्प्रभावश्च तत्समासेन मे शृणु॥ यन्निर्दिष्टं शरीरमिति तत्तच्छब्दे
परामृशति॥ यच्चेदं निर्दिष्टं क्षेत्रं तद्यादृक् यादृशं स्वकीयैर्धर्मैः॥५॥

प्रतिपत्तिसौकर्यार्थं संग्रहोक्तिरर्थवतीत्यर्थः॥ वक्ष्यमाणेऽर्थे श्रोतुर्मनःसमाधानार्थं सर्वत्र न वाक्यार्थविवरणं प्रतिज्ञानमभिप्रेत्याह॥ यन्निर्दि
ष्टमिति॥ इदं शरीरमितीयन्निर्दिष्टं तच्छरीरं तच्छब्देन परामृशति॥ प्रकृतार्थत्वात्तस्येति [illegible] योजना॥ तत्क्षेत्रं ज्ञातव्यमित्यध्याहारः यच्चेति
येन रूपेण गुणरूपवद्भिस्तदेव क्षेत्रं विशिष्यते तस्य क्षेत्रस्य स्वकीया धर्मा जन्मादयस्तैर्विशिष्टस्य ज्ञेयत्वे हेतुत्वं फलतीति॥५॥ श्रीराम॥:

क १

आ०१३॥
२४४॥राम॥

चशब्दः पंचकस्येतरेतरसमुच्चयार्थत्वमाह॥ चशब्द इति॥ विकारित्वेनापि हेयत्वं समुच्चयति॥ यद्विकारीति॥ यत्कार्यं तत्सर्वं यस्मादुत्पद्यतेन
कारणत्वात्तज्ज्ञातव्यमित्याह॥ यत इति॥ क्षेत्रमिव क्षेत्रज्ञं हेत्वा नव्यं दर्शयति॥ स चेति॥ स ज्ञातव्य इति॥ संबंधः चक्षुराद्युपाधिकृतद
ष्ट्यादिशक्तिवशात्तस्य ज्ञातव्यत्वं समुच्चयति॥ यत्प्रभावश्च इति॥ तेनात्मकेन प्रभावेन तस्य ज्ञातव्यतेति शेषः॥ कथं यथाविशेषितं क्षेत्रं

चशब्दः समुच्चयार्थः यद्विकारि यो विकारोऽस्य तत् यत् विकारियतो यस्माच्च यत्कार्यमुत्पद्यत इति वाक्यशेषः स च यः॥
क्षेत्रज्ञो निर्दिष्टः स च यत्प्रभावश्च ये प्रभावा उपाधिकृताः शक्तयो यस्य स यत्प्रभावश्च तत् क्षेत्रक्षेत्रज्ञयाथात्म्यं यथाविशेषितं
म समासेन संक्षेपेण मे मम वाक्यतः शृणु त्वं अवधारय इत्यर्थः॥ तत्क्षेत्रक्षेत्रज्ञयाथात्म्यं विवक्षितं स्तौति श्रोतृबुद्धिप्ररो
चनार्थं॥ ऋषिभिर्बहुधा गीतं छंदोभिर्विविधैः पृथक्॥ ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितैः॥४॥ ऋषिभिर्व
सिष्ठादिभिर्बहुधा बहुप्रकारं गीतं कथितं॥ छंदोभिश्छदांसि ऋगादीनि तैः छंदोभिर्विविधैर्नानाप्रकारैः पृथक् विवेक

[illegible] शक्योऽसावनुमित्याशंक्या [illegible] भगवद्वाक्यादित्याह॥ तदिति॥३॥ श्लोकांतरस्य तात्पर्यमाह॥ तदित्यादिना॥ विवक्षितं निर्धारितमित्यर्थः॥
[illegible] प्यत्वमाह॥ ऋषिभिरिति॥ न केवलमार्षोक्तेरेव क्षेत्रादियाथात्म्यं संभावितं किंतु वेदवाक्यादपीत्याह॥ छंदोभिरिति॥ ५॥

०टी०टी०
५॥ मगोम

…ं चातुर्वर्ण्यमपि वेदानां नानाप्रकारत्वं शाखाभेदाद्दृष्टं न केवलं श्रुतिस्मृतिसिद्धमुक्तं याथात्म्यं किंतु यौक्तिकं चेत्याह ॥ किंचेति ॥ ०
…तानि सूत्राणीत्याशंक्याह ॥ आत्मेत्येवेति ॥ आदिपदेन ब्रह्मविदाप्नोति परमथ योन्यां देवतामित्यादीनि विद्याविद्यासूत्राण्युक्ता
नि ॥ आत्मेति विशेषेत्वज्ञोपादानं तु व्यक्षेत्रोपलक्षणं ॥ अथातो ब्रह्मजिज्ञासेत्यादीन्यपि सूत्राण्यत्र गृहीतानि अन्यथा छंदोभिरित्यादि
नापौनरुक्त्यादिति मतां विशिनष्टि ॥ हेतुमद्भिरिति ॥ ४ ॥ क्षेत्रादियाथात्म्यस्तुत्या प्रलोभिताय किं तदिति जिज्ञासवे यथोद्देशं क्षेत्रं

किंच। ब्रह्मसूत्रपदैश्चैव ब्रह्मणः सूचकानि वाक्यानि ब्रह्मसूत्राणि तैः पद्यते गम्यते ज्ञायते ब्रह्मेति तानि पदान्युच्यंते। तैरेव च
क्षेत्रक्षेत्रज्ञयाथात्म्यं गीतमित्यनुवर्तते ॥ आत्मेत्येवोपासीतेत्यादिभिर्हि ब्रह्मसूत्रपदैरात्मा ज्ञायते ॥ हेतुमद्भिर्युक्तियुक्तैर्वि
निश्चितैर्नसंशयरूपैर्विनिश्चितब्रह्मप्रत्ययोत्पादकैरित्यर्थः ॥ स्तुत्याभिमुखीभूतायार्जुनाय भगवानुवाच ॥ महाभूतान्यहं
कारो बुद्धिरव्यक्तमेव च ॥ इंद्रियाणि दशैकं च पंच चेंद्रियगोचराः ॥ ५ ॥ महाभूतानीति। महांति च तानि भूतानि च सर्वविकारव्या
पकत्वात् भूतानि च सूक्ष्माणि न ॥ स्थूलानींद्रियगोचरशब्देनाभिधायिष्यंते। अहंकारो महाभूतकारणमहंप्रत्ययलक्षणः ॥

आ०१३॥
२४५॥ रामः

निर्दिशति ॥ सत्येति ॥ महत्त्वे हेतुमाह ॥ सर्वेति ॥ भूतशब्देन स्थूलानामपि विशेषाभावात्कुहे का हानिरित्याशंक्याह ॥ स्थूलानीति ॥ अहं०
कारो ऽहंप्रत्ययलक्षण इति संबंधः ॥ भूतोप्रानीतिकत्वेनाभिमानमात्रात्मत्वे मत्वाऽहंकारं विशिनष्टि महाभूतेनेति ॥ ५ ॥ श्रीरामः

नां०

महतः परमित्यादौ प्रसिद्धं महध्वद्वार्थमहंकारहेतुमाह ॥ अहंकारेति ॥ ईश्वरशक्तिरित्युक्ते चैतन्यमपिशंक्यतेतदर्थमाह ॥ ममेति ॥
अवधारणारूपमर्थमेवास्फुटयति ॥ एवैतोस्वेचेति ॥ पंचतन्मात्राण्यहंकारो महदव्याकृतमित्यष्टधा भिन्नत्वं ॥ सत्वप्रकृत्या सहतन्मा
त्रादिभेदानां समुच्चयश्चकारार्थः दशेंद्रियाण्येव विभज्यव्युत्पादयति ॥ श्रोत्रेत्यादिना ॥ तदेव प्रश्नद्वारा स्फुटयति ॥ किंतदिति ॥
शब्दादिविषयशब्देन स्थुलानि भूतानि गृह्यंते ॥ शब्दादीनामेव ग्रहणे कर्मेंद्रियाणां विषयानुक्तेर्वैरप्यप्रसंगात् ॥ उक्तेषु तन्मा

कार अहंकारोऽयं बुद्धिरध्यवसायलक्षणा ॥ तत्कारणमव्यक्तमेव च न व्यक्तमव्यक्तमव्याकृतमीश्वरशक्तिर्माया मम माया दुरत्ययेत्यु
क्तं ॥ एवशब्दः प्रकृत्यवधारणार्थः एतावत्येवाष्टधा भिन्ना प्रकृतिः ॥ चशब्दोऽत्र भेदसमुच्चयार्थः ॥ इंद्रियाणि दश श्रोत्रादीनि पं
च बुद्ध्युत्पादकत्वात् बुद्धींद्रियाणि ॥ वाक्पाण्यादीनि पंच कर्मनिर्वर्तकत्वात् कर्मेंद्रियाणि तानि दश ॥ एकं च किं तन्मन एकाद
शं संकल्पाद्यात्मकं ॥ पंच चेंद्रियगोचराः शब्दादयो वि षयास्तान्येतानि सांख्याः चतुर्विंशतितत्वान्याचक्षते ॥ ५ ॥ श्रीरामः

त्रादिषु तंत्रांतरीयसंमतिमाह ॥ तानीति ॥ मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त षोडशकश्च विकार इति पद्धतिं ॥
[illegible]काहंकारादीनां त्रैगुण्याभिमानादिधर्मकत्वं प्रसिद्धमिति शब्दादीनामेव ग्रहणे कर्मेंद्रियाणां विषयानुक्तेर्वैरप्यप्रसं
[illegible]त्र निरूपणस्य च प्रकृतत्वात्स्वरूपनिर्देशो नैव च तत्वे त्वं पंचयाद्दक्केति व्याख्यानं ॥ ५ ॥ श्रीरामः ॥ श्रीगुरुसमर्थः

०टी०
भा०राम

इदानीमिच्छादीनामात्मविकारत्वनिरसनपेक्षेत्रविकारत्वनिरूपणेनपद्धिका॥रीत्येतन्निरूपयन्मतांतरनिवृत्तिपरत्वेनश्लोकमवतारयति
नेति॥सर्वलोकविरुद्धत्वाद्वैशेषिकमतमितिमत्वोक्तं॥भगवानिति॥उपलब्धजातीयस्योपलभ्यमानस्यादानेइच्छायांहे
तुमाह॥सुखेति॥इतिशब्दोहेत्वर्थः॥सुखहेतुत्वात्तस्मिन्निच्छेत्यर्थः इच्छांसुखतद्धेतुविषयत्वेनव्याख्यायात्मधर्मत्वंतस्याःव्युदस्य
ति॥सेयमिति॥तथापिकथंक्षेत्रांतर्भूतत्वंतत्राह॥ज्ञेयत्वादिति॥इच्छावद्द्वेषोपिधर्मोबुद्धेरित्याह॥तथेति॥कोसौद्वेषोयस्यबुद्धिधर्म

अथेदानीमात्मगुणानितियानाचक्षतेवैशेषिकास्तेपिक्षेत्रधर्माएवनतुक्षेत्रज्ञस्येत्याह॥भगवान्॥इच्छाद्वेषःसुखंदुःखंसंघातश्चेतनाधृतिः।
एतत्क्षेत्रंसमासेनसविकारमुदाहृतं॥६॥इच्छायज्जातीयंसुखहेतुमर्थमुपलब्धवान्पूर्वंपुनस्तज्जातीयमुपलभमानस्तमादा
तुमिच्छतिसुखहेतुरिति॥सेयमिच्छांतःकरणधर्मोज्ञेयत्वात्क्षेत्रं॥तथाद्वेषोयज्जातीयंअर्थंदुःखहेतुत्वेनानुभूतवान्पूर्वंपु
नस्तज्जातीयंउपलभमानःतद्द्वेष्टि॥सोयंद्वेषःज्ञेयत्वात्॥क्षेत्रमेव॥तथासुखमनुकूलंप्रसन्नंसत्वात्मकंज्ञेयत्वात्क्षेत्रमेव।
दुःखंप्रतिकूलात्मकंज्ञेयत्वात्तदपिक्षेत्रंसंघातोदेहेंद्रियाणांसंहतिः॥५॥ • । • ॥ • ॥ • ॥

त्वेनतस्यापिस्वरूपोपन्यासेक्षेत्रांतःपातित्वमाह॥अनुकूलमिति॥दुःखस्यापिस्वरूपोपन्यासेक्षेत्रमध्यवर्तित्वमाह॥ ॥दुःखमिति॥ •
+हे यज्जातीयमिति॥तस्यापीच्छावत्क्षेत्रांतर्भावमाह॥सोयमिति॥इच्छाद्वेषवद्बुद्धिधर्मःसुखमपीत्याह॥तथेति॥तं×देहेंद्रियात्मवा
दोव्युदसितुंक्षेत्रांतर्गमेवंसंघातंविभजते॥देहेति॥॥५॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ •

आ०१३॥
२४६॥राम॥

विज्ञानवादं प्रत्याह ॥ तस्यामिति ॥ तप्ते लोहपिंडे वन्हेरभिव्यक्तिवदुक्तसंहतौ बुद्धिवृत्तिरभिव्यज्यते न तत्र चाग्निरभिव्यक्तो लोहपिंडमेवाग्नि
बुद्ध्या ग्राहयति तथात्मचैतन्यं बुद्धिवृत्तावभिव्यक्तं नामेवात्मतया बोधयत्यतस्तदाभासानुविद्धा सैव चेतनेत्युच्यते सा च मुख्यं चेतनं
प्रतिज्ञेयत्वादनरूपत्वात्क्षेत्रमेवेत्यर्थः ॥ धृतिस्वरूपोत्साहक्षेत्रत्वं तस्यादर्शयति ॥ धृतिरिति त्यादिना ॥ नन्वस्मेपि संकल्पादयो ये मनोधर्माः
संतिते किमित्यत्र क्षेत्रत्वेन नोच्यंतेत [illegible] माह ॥ सर्वेति ॥ तस्योपलक्षणार्थत्वे हेतुमाह ॥ य नरति ॥ इच्छादिवँस्मिन्नवसरे संकल्पादीनामपि दर्शित दत्र

तस्यामभिव्यक्तांतःकरणवृत्तिस्तप्तरवत्लोहपिंडेऽग्निरात्मचैतन्याभासरसविद्धा चेतना सा च क्षेत्रं ज्ञेयत्वात् ॥ धृतिर्ययाऽवसा
दग्रस्तानि देहेंद्रियाणि ध्रियंते सा च ज्ञेयत्वात्क्षेत्रं सर्वांतःकरणधर्मोपलक्षणार्थमिच्छादिग्रहणं यत उक्तं तदुपसंहरति ॥
एतत्क्षेत्रं समासेन सविकारं सह विकारेण महदादिना उदाहृतमुक्तं ॥ यस्य क्षेत्रभेदज्ञानस्य संहतिरिदं शरीरं क्षेत्रमित्युक्तं तत्र
क्षेत्रं व्याख्यानं महाभूतादिभेदभिन्नं धृत्यंतं ॥ ५ ॥

तं सिद्धवत्कृत्य प्रकरणविभागार्थं यतो भगवानुक्तं क्षेत्रमुपसंहरत्यतो युक्तमिच्छादिग्रहणस्य सर्वानुक्तबुद्धिधर्मोपलक्षणार्थत्वमि
त त्यर्थः ॥ ६ ॥ विरक्तस्य ज्ञानाधिकाराद्वैराग्यार्थं क्षेत्रं व्याख्यातमित्यनुवदति ॥ यस्येति ॥ क्षेत्रभेदज्ञानस्य व्यष्टिदेहविभागस्य सर्व
स्येत्यर्थः संहतिः समष्टिशरीरं ॥ ५ ॥ श्रीरामचंद्राय नमः ॥ ५ ॥ ॥ ॥ ॥ ॥ ॥

भ॰गी॰

ननुकेक्षेत्रेक्षेत्रज्ञोवक्तव्यस्तंहित्वाकिमितिसम्यदुच्यतेनत्राह॥क्षेत्रज्ञइति॥अनादिमदित्यादिनावक्ष्यमाणविशेषणंक्षेत्रज्ञंस्वयमेवभगवा
न्विवक्षितविशेषणसहितंज्ञेयंयत्तदित्यादिनावक्ष्यतीतिसंबंधः॥किमितिक्षेत्रज्ञोवक्ष्यतेनत्राह॥यस्येति॥ज्ञेयंयत्तदित्यतःप्रा
क्तनग्रंथस्यतात्पर्यमाह॥अधुनेति॥अमानित्वादिलक्षणंविदधातीत्युत्तरत्रसंबंधः॥ज्ञानसाधनसमुदायबोधनंकुत्रोप
युज्यतेनत्राह॥यस्मिन्निति॥योग्यमधिकृतमेवविवृणोति॥यस्येति॥एतज्ज्ञानमितिवचनात्कथमिदंज्ञानसाधनमि २

क्षेत्रज्ञोवक्ष्यमाणविशेषणोयस्यसप्रभावस्यक्षेत्रज्ञस्यपरिज्ञानादमृतत्वंभवतितंनुज्ञेयंयत्तत्प्रवक्ष्यामीत्यादिनास
विशेषणंस्वयमेववक्ष्यतिभगवान्॥अधुनातुतत्ज्ञानसाधनगणममानित्वादिलक्षणंयस्मिन्सतिज्ञेयविज्ञानयो
ग्योऽधिकृतोभवति॥यत्परःसंन्यासीज्ञाननिष्ठउच्यते॥तममानित्वादिगणंज्ञानसाधनत्वात्ज्ञानशब्दवाच्यंविदधाति
भगवान्॥अमानित्वमदंभित्वमहिंसाक्षांतिरार्जवं॥आचार्योपासनंशौचंस्थैर्यमात्मविनिग्रहः॥७॥अमानि
त्वंमानिनोभावोमानित्वंआत्मनःश्लाघनंतदभावोऽमानित्वं॥अदंभित्वं॥स्वधर्मप्रकटीकरणंदंभित्वंतदभावोऽ ॥टी॥मू॥ आ१३॥ २४७॥राम॥

साशंक्याह॥तमिति॥नहिध्यानस्यवस्तुद्वारादार्ढ्यंसूचयति॥भगवानीति॥अमानित्वादिनिष्ठस्यांतर्धियोज्ञानमितिनियमार्थमाह॥
अमानित्वमिति॥मानस्तिरोहितोवलेपःसाक्षात्मस्युत्कर्षारोपहेतुंसोस्येतिमानीतन्मानिनस्यभावोऽमानित्वमितिव्याकरोति॥
अमानित्वमित्यादिना॥प्रतियोगिमुखेनादंभित्वंविवृणोति॥अदंभित्वमिति॥८॥श्रीरामचंद्रायनमः॥८॥श्रीगुरुप्रसन्नः

वाङ्मनोदेहैरपीडनं प्राणिनामहिंसनं तद्देवाहिंसेत्याह ॥ अहिंसेति ॥ परापराधस्य चित्तविकारणस्य प्राप्तावेवाविकृतचित्तत्वेनापकारसहि॰ कार
ष्णुत्वं क्षांतिमित्याह ॥ क्षांतिरिति ॥ अवक्रत्वमकौटिल्यं यथाहृदयं व्यवहारः सदैकरूपप्रवृत्तिनिमित्तत्वं चेत्यर्थः ॥ उपनीयतुयः शिष्यमि
त्यादिनोक्तं आचार्यं व्यवच्छिनत्ति ॥ मोक्षेति ॥ शुश्रूषादीत्यादिशब्दो नमस्कारादिविषयः बाह्यमांतरं च द्विप्रकारं शौचं क्रमेण विभ
जते ॥ शौचमित्यादिना ॥ मनसो रागादिमलानामिति संबंधः ॥ तदपनयोपायमुपदिशति ॥ प्रतिपक्षेति ॥ रागादिप्रतिकूलस्य भा

अहिंसा अहिंसनं प्राणिनामपीडनं ॥ क्षांतिः परापराधप्राप्तावविक्रियत्वं ॥ आर्जवमृजुभावोऽवक्रत्वं आचार्योपासनं मोक्ष
साधनं मोक्षोपसाधनोपदेष्टुराचार्यस्य शुश्रूषादिप्रयोगेन सेवनं ॥ शौचं कायमलानां मृज्जलाभ्यां प्रक्षालनं ॥ अंतःकर
च णस्य प्रतिपक्षभावनया रागादिमलानामपनयः शौचं ॥ स्थैर्यं स्थिरभावो मोक्षमार्गे एव कृताध्यवसायत्वं आत्मवि॰
निग्रहः ॥ आत्मनोपकारकस्यात्मशब्दवाच्यकार्यकरणसंघातस्य विनिग्रहः स्वभावेन सर्वतः प्रवृत्तस्य सन्मार्ग एव नि
रोध आत्मविनिग्रहः ॥ किंच ॥ इंद्रियार्थेषु वैराग्यमनहंकार एव च ॥ जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनं ॥८॥ ५॥ ७॥

वना विषयेषु दोषदृष्ट्याऽप्रवर्तितस्येतियावत् ॥ स्थिरभावमेव विशदयति ॥ मोक्षेति ॥ आत्मनो नित्यसिद्धस्यानाधेयातिशयस्य कुतो
ऽपि निग्रहस्तत्राह ॥ आत्मन इति ॥ न केवलममानित्वादीन्येव ज्ञानस्यांतरंगसाधनानि किंतु वैराग्यादीन्यपि तथाविधानि संतीत्याह ॥
५॥ किंचेति ॥ ५॥

गी०टी०
४८॥ राम

दृष्टानुश्रविकार्थेषु रागेन तस्य निवृत्तं ज्ञानं नोत्पद्यतेति मत्वा व्याकरोति॥ इंद्रियेति॥ आविर्भूतो गर्वोहंकारस्तदभावोपि ज्ञानहेतुरित्याह॥ अनहंकार इति॥ इंद्रियार्थेषु वैराग्यमुक्तमुपपादयति॥ जन्मेति॥ प्रत्येकं दोषानुदर्शनमित्युक्तं तत्र जन्मनि दोषानुदर्शनं विशदयति॥ जन्मनीति॥ यथा जन्मनि दोषानुसंधानं तथा मृत्यौ दोषस्य सर्वमर्मनिकृंतनादेरालोचनं कार्यमित्याह॥ तथेति जन्मनि मृत्यौ च दोषानुसंधानवदित्याह॥ तथेति॥ व्याधिषु दोषस्यासत्यतारूपस्यानुसंधानं॥ दुःखेषु त्रिविधेष्वपि दोषानुसंधानं प्रसिद्धं

इंद्रियार्थेषु शब्दादिषु दृष्टादृष्टेषु भोगेषु विरागभावो वैराग्यं॥ अनहंकारोऽहंकाराभाव एव च॥ जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनं॥ जन्म च मृत्युश्च जरा व्याधयश्च दुःखानि च तेषु जन्मादिषु दुःखांतेषु प्रत्येकं दोषानुदर्शनं॥ जन्मनि गर्भवासयोनिद्वारनिःसरणं दोषस्तस्यानुदर्शनमालोचनं तथा मृत्यौ दोषानुदर्शनं॥ तथा जरायां प्रज्ञाशक्तितेजोनिरोधदोषानुदर्शनं परिभूतता चेति॥ तथा व्याधिषु शिरोरोगादिषु दोषानुदर्शनं तथा दुःखेष्वध्यात्माधिभूताधिदैवनिमित्तेषु॥ अथवा दुःखान्येव दोषो दुःखदोषस्तस्य जन्मादिषु पूर्ववदनुदर्शनं॥ दुःखं जन्म दुःखं मृत्युर्दुःखं जरा दुःखं व्याधयो दुःखनिमित्तत्वाज्जन्मादयो दुःखं न पुनः स्वरूपेणैव दुःखमित्येवं जन्मादिषु दुःखदोषानुदर्शनाद्देहेंद्रियविषयानां भोगेषु वैराग्यमुपजायते॥

व्याख्यानांतरमाह॥ अथवेति॥ यथा जन्मादिषु दुःखांतेषु दोषदर्शनमुक्तं तथा तेष्वेव दुःखाख्यदोषस्य दर्शनं स्फुटयति॥ दुःखमित्यादिना कथं जन्मादीनां बाह्येंद्रियग्राह्याणां दुःखत्वं तत्राह॥ दुःखेति॥ जन्मादिषु दोषानुदर्शनकृतं फलमाह॥ एवमिति॥ ८॥

य ३

ष

आ०१३॥
२४८॥ राम॥

वैराग्ये सत्यात्मदृष्ट्यर्थं करणानां तदभिमुख्येन प्रवृत्तिरिति वैराग्यफलमाह॥ तत इति॥ जन्मादिदुःखदोषानुदर्शमज्ञानहेतुषु किमि
त्युपसंख्यानमित्यार्थशंक्य वैराग्यद्वाराधीहेतुत्वादित्याह॥ एवमिति॥८॥ ज्ञानस्यांतरंगमेव हेत्वंतरमाह॥ किंचेति॥ नच
सक्तिरेवाभिष्वंगाभावस्तथा च पुनरुक्तिरित्याशंक्याभिष्वंगोक्तिद्वारा निरस्यति॥ अभिष्वंगो नामेति॥ अन्यस्मिन्नेव पुत्रा

ततः प्रत्यगात्मनि प्रवृत्तिः करणानामात्मदर्शनाय॥ एवं ज्ञानहेतुत्वात् ज्ञानमुच्यते जन्मादिषु दुःखदोषानुदर्शनं॥ किंच॥
असक्तिरनभिष्वंगः पुत्रदारगृहादिषु॥ नित्यं च समचित्तत्वमिष्टानिष्टोपपत्तिषु॥९॥ असक्तिः सक्तिः संगनिमित्तेषु
विषयेषु प्रीतिमात्रं तदभावोऽसक्तिः॥ अनभिष्वंगोऽभिष्वंगाभावः अभिष्वंगो नाम सक्तिविशेष एवान्यात्मभा
वनालक्षणो यथाऽन्यस्मिन् सुखिनि दुःखिनि वाहमेव सुखी दुःखी च जीवति मृते वाहमेव जीवामि मरिष्यामि चेति॥
क्वेत्याह पुत्रदारगृहादिषु पुत्रेषु दारेषु गृहेषु आदिग्रहणादन्येष्वप्यत्यंतेष्टेषु दासवर्गादिषु॥ तच्चोभयं ज्ञानार्थत्वात् ज्ञान
मुच्यते॥ नित्यं च समचित्तत्वं तुल्यचित्तता॥ क्व इष्टानिष्टोपपत्तिषु। इष्टानामनिष्टानां चोपपत्तयः संप्राप्तयस्तास्विष्टा
निष्टोपपत्तिषु नित्यमेव तुल्यचित्तता इष्टोपपत्तिषु न हृष्यति॥ न कुप्यत्यनिष्टोपपत्तिषु॥९॥ ५॥ ॰॥ ५॥ ०॥

दारपुत्रेत्यभिधानं तेषु सुखाद्यात्मनि तद्भावनाख्यं सक्तिविशेषमेवोदाहरति॥ यथेति॥ उक्तविशेषणयोराकांक्षाद्वारा विषयमाह॥
क्वेत्यादिना॥ उक्तविशेषणयोर्नञ्शब्दस्योपपत्तिमाह॥ तच्चेति॥ सदा हर्षविषादशून्यमनस्त्वमपि ज्ञानहेतुरित्याह। नित्यं चेति॥ तदेव विभजते॥
॥इष्टेति॥

टी०
तस्य ज्ञानहेतुत्वं निगमयति ॥ तत्त्वैवेति ॥९॥ साधनांतरमाह ॥ किंचेति ॥ अनन्ययोगमेवं संक्षिप्तं व्यनक्ति ॥ नेत्यादिना ॥ उक्तधीद्वारा ज्ञानाया
नात्मे [illegible]र्निवृत्तिस्त्वेष्टेयं दर्शयति ॥ नेति ॥ तत्रापि ज्ञानशब्दस्तद्धेतुत्वादित्याह ॥ साचेति ॥ देशस्य विविक्तत्वं द्विविधमुदाहरति ॥ विविक्तेति ॥

तच्चैतत्त्रितयं समन्वितं ज्ञानं ॥ किंच ॥ मयि चानन्ययोगेन भक्तिरव्यभिचारिणी ॥ विविक्तदेशसेवित्वमरतिर्जनसंसदि ॥१०॥ मयि चेश्वरेऽ
ना नन्ययोगेनापृथक्योगसमाधिनान्यो भगवतो वासुदेवात्परोऽस्त्यतः स एव नो गतिरित्येवं निश्चिताऽव्यभिचारिणी बुद्धिरनन्ययोगस्तेन
भजनं भक्तिः । न व्यभिचरणशीलाऽव्यभिचारिणी सा च ज्ञानं ॥ विविक्तदेशसेवित्वं ॥ विविक्तः स्वभावतः संस्कारेण वाऽशुच्यादि
भिः सर्पव्याघ्रभयादिभिश्च रहितः अरण्यनदीपुलिनदेवगृहादिर्विविक्तो देशस्तं सेवितुं शीलमस्येति विविक्तदेशसेवी तद्भा
वो विविक्तदेशसेवित्वं ॥ विविक्तेषु हि देशेषु चित्तं प्रसीदति यतस्तत आत्मादिभावना विविक्ते उपजायते ॥ अतो विविक्तदेशसेवित्वं
ज्ञानमुच्यते ॥ अरतिररमणं प्राकृतजनसंसदि प्राकृतानां जनानां संस्कारशून्यानामविनीतानां कलहोन्मुखवृत्तीनां संसत्समवायो ज
नसंसत् न संस्कारवतां विनीतानां संसत् ॥ तस्याः संसदो ज्ञानोपकारकत्वात् अतः प्राकृतजनसंसद्यरतिर्ज्ञानार्थत्वात् ज्ञानं ॥१०॥ आ०१३॥
२४१॥राम॥

तद्द्वयं स्पष्टयति ॥ अरत्येति ॥ उक्तदेशसेवित्वं कथं ज्ञानहेतुस्तत्राह ॥ विविक्तेष्विति ॥ आत्मादीत्यादिशब्देन परमात्मा वाक्यार्थश्चोच्यते नन्व
रतिविषयत्वेनाविशेषितो जनसंसर्गमात्रं किमिति न गृह्यते तत्राह ॥ तस्या इति ॥ संतः संगस्य भेषजमित्युपलंभादित्यर्थः ॥१०॥

साधनांतरमाह ॥ किंचेति ॥ आत्मादीत्यादिशब्दोऽनात्मधर्मस्तद्विषयं ज्ञानं विवेकस्तन्नित्यत्वं तत्रैव निष्ठावत्त्वं विवेकनिष्ठो हि वाक्यार्थ-
ज्ञानसमर्थो भवति ॥ तेषां भावानां परिपाको नाम यत्नेन साधितानां प्रकर्षपर्यंतत्वं तन्निमित्तं तत्वज्ञानमैक्यसाक्षात्कारस्तत्फलालोच-
नं किमर्थमित्याशंक्याह ॥ तत्वेति ॥ प्रवृत्तिः स्यादित्यतस्तत्वज्ञानार्थदर्शनमर्थवदिति शेषः ज्ञानस्यांतरंगहेतुमुक्तमुपसंहरति ॥

किंच ॥ अध्यात्मज्ञाननित्यत्वं तत्वज्ञानार्थदर्शनं ॥ एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा ॥ ११ ॥ अध्यात्मज्ञाननित्यत्वं आत्मा-
दिविषयं ज्ञानमध्यात्मज्ञानं तस्मिन् नित्यभावो नित्यत्वममानित्वादीनां ज्ञानसाधनानां भावनापरिपाकनिमित्तं ॥ तत्वज्ञानं तस्या-
र्थो मोक्षः संसारोपरमस्तस्यालोचनं तत्वज्ञानार्थदर्शनं ॥ तत्वज्ञानफलालोचने हि तत्साधनानुष्ठाने प्रवृत्तिः स्यादिति ॥ एतदमा-
नित्वादितत्वज्ञानार्थदर्शनांतमुक्तं ज्ञानमिति प्रोक्तं ज्ञानार्थत्वात् ॥ अज्ञानं यदतोऽ[illegible]स्माद्यथोक्तादन्यथा विपर्ययेण मानित्वं
दंभित्वं हिंसाऽक्षांतिरनार्जवमित्याद्यज्ञानं विज्ञेयं ॥ परिहरणाय संसारप्रवृत्तिकारणत्वादिति ॥ यथोक्तेन ज्ञानेन ज्ञानेन ज्ञेयं किमि-
॥ त्याकांक्षायामाह ज्ञेयं यत्तदित्यादि ॥ १२ ॥

एतदिति किमिति तस्य विज्ञेयत्वमित्याशंक्याह ॥ परिहरणायेति ॥ तत्र हेतुः ॥ संसारेति ॥ तस्य तस्य प्रवृत्तिरस्तिनिरूढहेतुत्वान्मा-
नित्वादित्याज्यं ॥ ज्ञाते च त्याज्यत्वं तेन तस्य ज्ञेयपनेत्यर्थः ॥ इतिशब्दः साधनाधिकारसमाप्त्यर्थः ॥ ११ ॥ उत्तरग्रंथमवतारयति
॥ यथोक्तेनेति ॥ १२ ॥

॰टी॰ अमानित्वादीनां ज्ञानत्वमाक्षिपति ॥ नन्विति ॥ वस्तुपरिच्छेदकत्वाज्ज्ञानत्वमाशंक्याह ॥ न हीति ॥ परिच्छेदकत्वाज्ज्ञानत्वं ज्ञानत्वात्परिच्छेदकत्वमित्यन्योन्याश्रयादित्यभिप्रेत्याह ॥ सर्वत्रेति ॥ स्वार्थस्यैव ज्ञानं परिच्छेदकमित्येन व्यतिरेकद्वारा विशदयति ॥ न हीति ॥ व्यतिरेके दृष्टांतमाह ॥ यथेति ॥ अमानित्वादीनां ज्ञानत्वमाक्षिप्तं प्रतिक्षिपति ॥ नैष दोष इति ॥ तत्र हेतुत्वेनोक्तं स्मारयति ॥ ज्ञानेति ॥ तेषु ज्ञानशब्दे हेतुंतरमाह ॥ हे

ननु यमानियमाश्चामानित्वादयो न ते ज्ञेयज्ञापने ॥ न ह्यमानित्वादिकस्यचिद्वस्तुनः परिच्छेदकं दृष्टं । सर्वत्रैव च यद्विषयं यत् ज्ञानं तदेव तस्य तैवस्य परिच्छेदकं दृश्यते ॥ न ह्यन्यविषयेण ज्ञानेनान्यदुपलभ्यते यथा घटविषयेण ज्ञानेनाग्निः ॥ नैष दोषः ॥ ज्ञाननिमित्तत्वात् ॥ ज्ञानमुच्यत इत्यवोचाम ॥ ज्ञानसहकारिकारणत्वाच्च ॥ ज्ञेयं यत्तत्प्रवक्ष्यामि यज्ज्ञात्वामृतमश्नुते ॥ अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते ॥१२॥ ज्ञेयं ज्ञातव्यं यत्तत्प्रवक्ष्यामि प्रकर्षेण यथावद्वक्ष्यामि ॥ किं फलं तदिति प्ररोचनेन श्रोतुरभिमुखीकरणायाह यत् ज्ञेयं ज्ञात्वा अमृतममृतत्वमश्नुते न पुनर्म्रियत इत्यर्थः ॥ अनादिमत् आदिरस्यास्तीत्यादिमत् न आदिमदनादिमत् ॥ ५३ ॥ श्रीरामचंद्राय नमः ॥

आ॰ १३ ॥
२५० ॥ राम ॥

ज्ञानेति ॥ अमानित्वादीनां ज्ञानत्वमुक्त्वा ज्ञेयमवतारयति ॥ ज्ञेयमिति ॥ प्रश्नद्वारा ज्ञेयप्रवचनस्य फलमुक्त्वा प्ररोचनं कृत्वा तेन श्रोतुराभिमुख्यमापादयितुं प्रवचनफलोक्तिपरं अनंतरवाक्यमित्याह ॥ किमित्यादिना ॥ तदेव विशिनष्टि ॥ अनादिमदिति ॥ ५३ ॥ श्रीः

आदिमत्वराहित्यमव्याकृतस्यापीत्यतो विशेषं दर्शयति ॥ किं तदिति ॥ भोक्तुरपि भोग्यात्परत्वमित्यतो विविनक्ति ॥ ब्रह्मेति ॥ अनादीत्येकं
पदं मत्परमिति चापरमिति पदच्छेदात्पुनरुक्तिरिति मत्वा मतांतरमुत्थापयति ॥ अत्रेति ॥ एकपदत्वसंभवे किमिति पदद्वयमित्याशंक्याह ॥
बहुव्रीहिणेति ॥ आदिरस्य नास्तीति यो बहुव्रीहिणोक्तोऽर्थस्तस्मिन्नादिमत्वनिषेधे नास्ति मतुपोऽर्थवत्वमिति मतुबानर्थक्यमनिष्टं स्या
दिति मत्वा पदं छिंदंतीति पूर्वेण संबंधः ॥ आदिरस्य नास्तीत्यनादीत्युक्ते मत्परमित्युच्यमाने कोऽर्थः स्यादित्याशंक्याह ॥ अर्थेति ॥

किं तत्परं निरतिशयं ब्रह्म ज्ञेयमिति प्रकृतं ॥ अत्र केचिदनादि मत्परमिति पदं छिंदंति ॥ बहुव्रीहिणोक्तेऽर्थे मतुप आनर्थक्यमनि
ष्टं स्यादित्यर्थविशेषं च दर्शयंति अहं वासुदेवाख्या परा शक्तिर्यस्य तन्मत्परमिति ॥ सत्यमेवमपुनरुक्तं स्यादर्थश्चेत्संभवति न त्व
र्थः संभवति ॥ ब्रह्मणः सर्वविशेषप्रतिषेधेनैव विजिज्ञापयिषितत्वान्न सत्तन्नासदुच्यत इति ॥ विशिष्टशक्तिमत्वप्रदर्श
नं विशेषप्रतिषेधश्चेति विप्रतिषिद्धं तस्मान्मतुपो बहुव्रीहिणा समानार्थत्वेपि प्रयोगः श्लोकपूरणार्थः ॥ १२॥ १२॥ २

युक्त्याख्यानस्यायुक्तत्वात्तात्पर्यं पुनरुक्तिसमाधिरित्याह ॥ सत्यमिति ॥ अर्थासंभवं समर्थयते ॥ ब्रह्मण इति ॥ तथापि विशिष्टशक्ति
मत्वं किं न स्यादित्याशंक्याह ॥ विशिष्टेति ॥ तथापि मतुपो बहुव्रीहिणा तुल्यार्थस्य कथं नानर्थक्यं तत्राह ॥ तस्मादिति ॥ अनादि
मत्परं ब्रह्मेत्यत्र पक्षांतरं प्रतिक्षिप्य स्वपक्षः समर्थितः ॥ ॥ १२॥ ● ॥ ॥ ॥ १२॥

ा॰टी॰
ामः॥

संगतिं ब्रह्मणो ब्रह्मत्वादेव कार्यकारणात्मकत्वप्रमाणानुक्तानुवादद्वारा न सदित्याद्यवतारयति॥ अमृतत्वेति॥ सत्कार्यमभिव्यक्तनामरूपं तत्॥ असत्कारणं तद्विपर्ययादिति विभागः॥ ज्ञेयप्रवचनमनिर्वाच्यविषयत्वात्प्रक्रमप्रतिकूलमित्याक्षिपति॥ नन्विति॥ निर्विशेषस्य वस्तुनो ज्ञेयत्वात्तद्विषयं प्रवचनं प्रक्रमानुकूलमित्युत्तरमाह॥ नेत्यादिना॥ अनिर्वाच्यत्वेन सत्तन्नासदित्युच्यमाने कथमिदमनुरूपमिति पृच्छति॥ कथमिति॥ ब्रह्मात्मप्रकाशस्य स्वसिद्धत्वात्तदर्थं विधिमुखेनोपदेशायोगादध्यस्ततद्धर्मनिवृत्तये निषेधद्वारोपदेशस्य

अमृतत्वफलं ज्ञेयं मयोच्यत इति प्ररोचनेनाभिमुखीकृत्याह न सत्तत् ज्ञेयमुच्यते॥ नाप्यसदुच्यते॥ ननु महता कंठरवेणोद्घुष्य ज्ञेयं प्रवक्ष्यामीत्यननुरूपमुक्तं न सत्तन्नासदुच्यत इति॥ न अनुरूपमेवोक्तं॥ कथं सर्वासु ह्युपनिषत्सु ज्ञेयं ब्रह्म नेति नेति अस्थूलमनण्वित्यादिविशेषप्रतिषेधेनैव निर्दिश्यते॥ नेदं तदिति॥ वाचोऽगोचरत्वात्॥ ननु न तदस्ति यद्वस्त्वस्तिशब्देन नोच्यते॥ अथास्तिशब्देन नोच्यते नास्ति तत् ज्ञेयं॥ विप्रतिषिद्धं च ज्ञेयं तदस्तिशब्देन नोच्यत इति च॥ १२॥ ॥श्रीरामः॥

आ॰१३॥
२५१॥ रामः॥

वेदान्तेषु प्रसिद्धेरारोपितविशेषनिषेधरूपमिदं प्रवचनमुचितमिति परिहरति॥ सर्वास्विति॥ ज्ञेयस्य ब्रह्मणो विधिमुखोपदेशायोगे हेतुमाह॥ वाच इति॥ ब्रह्मणोऽस्तिशब्दावाच्यत्वे नरविषाणवन्नास्तित्वमित्यनिष्टमाशंकते॥ नन्विति॥ एवं सुतरामपि ब्रह्मणि किमायातमित्याशंक्याह॥ अथेति॥ ज्ञेयस्यास्तिसंशब्दावाच्यत्वे व्याघातश्चेत्याह॥ विप्रतिषिद्धं चेति॥ १२॥ श्रीरामचंद्राय नमः॥ ॥०॥

अस्तिशब्दावाच्यत्वादवस्तुत्वे सत्त्वाप्रयोजकत्वमाह॥ नन्वावदिति॥ नास्तिधीविषयत्वमेवावस्तुत्वेपि मतं तद्भावाद्ब्रह्मणो नाव॰
स्तुत्वेत्येतद्देवव्यक्तीकर्तुं चोदयति॥ नन्विति॥ सर्वासां धियामस्तिधीत्वेन नास्तिधीत्वेन वाऽनुगतत्वे अन्यतरधीगोचरत्वाभावे ब्रह्म
णोऽनिर्वाच्यत्वं दुर्वारमिति फलितमाह॥ नचेति॥ ब्रह्मणो घटादिवैलक्षण्यादुभयबुध्यविषयत्वेपि नानिर्वाच्यमित्याह॥ नेत्यादिना॥

न्वतावन्नास्तिनास्तिबुध्यविषयत्वात्॥ ननु सर्वाबुद्धयोस्तिनास्तिबुध्यनुगताएव न चैवं सति ज्ञेयमप्यस्तिबुध्यनुगतप्र
य त्ययविषयं वास्यात् नास्तिबुध्यनुगतप्रत्ययविषयं वास्यात्॥ नातींद्रियत्वेनोभयबुध्यनुगतप्रत्ययाविषयत्वात्॥ यदिंद्रि
यगम्यं वस्तु घटादिकं तदस्तिबुध्यनुगतप्रत्ययविषयं वास्यान्नास्तिबुध्यनुगतप्रत्ययविषयं वास्यात्॥ इदं तु ज्ञेयम
तींद्रियत्वेन शब्दैकप्रमाणगम्यत्वान्न घटादिवदुभयबुध्यनुगतप्रत्ययविषयमित्यतो न सत्तन्नासदित्युच्यते॥ यत्तु
क्तं विरुद्धं तूच्यते ज्ञेयं तन्न सत्तन्नासदुच्यत इति॥ न विरुद्धं अन्यदेव तद्विदितादथोऽविदितादधीति श्रुतेः श्रुतिरपि विरुद्धार्थेति चेत्॥

यथादेरिंद्रियग्राह्यस्योभयबुद्धिविषयत्वेपि ब्रह्मणस्तदग्राह्यस्य नोभयधीविषयत्वं तथापि नानिर्वाच्यत्वं साक्ष्येकतानस्य शब्दप्रमा
णाद्विषयत्वेन दृष्टत्वादित्युक्तमेव प्रपंचयति॥ यद्वीति॥ परोक्षं विरोधमनुवदति॥ यत्विति॥ श्रुत्यवष्टंभेन निराचष्टे॥ नवि
रुद्धमिति॥ सापि विरुद्धार्थत्वान्न मानं बोधकत्वस्याविरोधापेक्षत्वादिति शंकते॥ श्रुतिरिति॥ ५॥ ॐ॥ ॐ॥ ॐ॥

ना०टी०

१।।

तस्मात् विरुद्धार्थत्वेनाप्रामाण्येन दृष्टान्तमाह।। यथेति।। प्राचीनवंशं करोतीति पारलौकिकफलत्वयत्नानुष्ठानार्थं शास्त्रान्निर्माणं प्रसक्तस्य को
[illegible]न्दे देशाद्यापरलोकसत्त्वे संदिहानाय यथा विरुद्धार्थाः श्रुतिरप्रमाणमेवं विदिताविहितान्यत्वश्रुतिरपौरुषेयः यैनैश्रु ति विरुद्धार्थत्वे
नानानतयाहातस्याप्रामाण्यस्य द्वितीये प्रसक्तप्रतिपादनेन मानत्वादित्युत्तरमाह।। न विदितेति।। यत्तु विरुद्धार्थत्वे को हि स्तुहाहन्तं
नरसत्र।। अर्थवादस्य विशेषस्य स्वार्थातात्पर्यादित्याह।। यदीति।। यत्र जात्यादिमत्त्वेन न वाच्यत्वं यथा गवादौ न प्रसलिजात्यादि

यथा यज्ञीयशालामारभ्य को हि तद्वेद यद्यमुष्मिन् लोकेऽस्ति वा न वेतीत्येवमिति चेन्न।। न विदिताविविहितान्या
मन्यत्वश्रुतेरवश्यं विज्ञेयार्थप्रतिपादनपरत्वात्।। यद्यमुष्मिन्नित्यादि तु विधिशेषोऽर्थवादः उपपन्नेश्च स
हादिशब्देभ्ये उनोच्यन इति सर्वो हि शब्दोऽर्थप्रकाशनाय प्रयुक्तः श्रूयमाणश्च श्रोतृभिर्ज्ञाति क्रिया
गुणसंबंधद्वारेण संकेतग्रहणसव्यपेक्षोऽर्थं प्रत्याययति। नान्यथाऽदृष्टत्वात्।। तद्यथा गौरश्व इति
वा जातितः।। पाचकः पाठक इति वा क्रियातः।। शुक्लः कृष्ण इति वा गुणतः।। धनी गोमानिति वा संबंधतः

~~मत्वेनन वाच्यत्वं यथा गवादौ न प्रसलिजात्या~~दिमत्त्वमनन्तस्याऽवाच्यत्वान्निषेधेनैव बोध्यत्वमित्याह।। उपपन्नेश्चे
ति।। नोच्यन्त इति।। निषेधेनैव तस्योपदेश इति शेषः जात्यादिमतोऽर्थस्यैव वाच्यत्वं तत्रैव संगतिग्रहादिति प्रपं
चयति।। सर्वो हीति।। ऽश्रुतस्य जात्यादिद्वारेणाज्ञानसंगतेर्वशब्दस्य न बोधकत्वमदृष्टेरित्याह। नान्यथेति जात्यादेः स

शब्दाविषयत्वमुदाहरन्ति।। न यथेत्यादिना।। ७।।

आ०१३।।
२५२।।
रामः।।

ब्रह्मणस्तु गोत्रमवर्णमित्यादिश्रुतेर्जातिमत्त्वाभावान्न शब्दवाच्यत्वमित्याह॥ न त्विति॥ केवलो निर्गुणश्चेति श्रुतेर्गुणद्वाराप्यस्य [illegible]नोच्यत इ
त्याह॥ नापीति॥ न क्रियत्वेमानमाह॥ निष्कलमिति॥ ब्रह्मणोऽद्वयस्याशेषोपनिषत्सु प्रसिद्धत्वाद्विशिष्टसंबंधस्य तस्मिन्नसिद्धेस्तद्वा
रापि न तस्य वाच्यत्वमित्याह॥ न चेति॥ ब्रह्मण्यभिधावृत्त्याशब्दाप्रवृत्तौ हेत्वंतरमाह॥ अद्वयत्वादिति॥ ब्रह्मणोऽवाच्यत्वे श्रुतिमपि
संवादयति॥ यत इति॥१२॥ सर्वविशेषरहितस्य वाङ्मनसगोचरस्यादृष्टेर्दृष्टविपरीतस्य ग्रासे ब्रह्मणः स्वस्यत्वे प्रत्यक्षे नेंद्रिय
प्रवृत्त्यादिहेतुत्वेन कल्पितद्वैतसमानस्फूर्तिप्रदत्वेनेश्वरत्वेन च सत्त्वं दर्शयन्नादौ देहादीनां प्रवृत्तिमत्तां रथादिवदचेतनानां प्रेक्षा

५ ना

ननु ब्रह्म जातिमत्तो न सदादिशब्दवाच्यं॥ पि गुणवत्त्वेन गुणशब्देनोच्यते निर्गुणत्वात्॥ नापि क्रियाशब्दवाच्यं निःक्रियत्वात्॥ निः
कलं निःक्रियं शांतमिति श्रुतेः॥ न च संबंधि एकत्वात् अद्वयत्वात्॥ अविषयत्वादात्मत्वाच्च॥ न केनचित् शब्देनोच्यत इति युक्तं॥
यतो वाचो निवर्तंत इत्यादिश्रुतिमपि श्च॥ सत् शब्दप्रत्ययाविषयत्वादसत्ताशंकायां ज्ञेयस्य सर्वप्राणिकरणोपाधिद्वारेण तदस्ति

॥ त्वं प्रतिपादयंस्तदाशंकां निरस्यर्थमाह॥ : ॥ ५॥

पूर्वकप्रवृत्तिमत्ताच्चेतनाधिष्ठितत्वमनुमिमानस्तत्सत्त्वसिद्धेन नैवं ब्रह्मेत्याह॥ सर्वत इति॥ तदस्तित्वमिति निरुद्धदोषप्रज्ञानांऽर्थः न त्वाशंके
ति [illegible] वेनासत्त्वमुच्यते॥ ननु सर्वदेहेषु पाणिपादस्येति कथं पाणीनां पादानां च देहस्थत्वेनात्मधर्मत्वं तत्राह॥ सर्वेति॥ करण
प्रवृत्तिरथादिप्रवृत्तिवत्प्रेक्षापूर्वका प्रवृत्तित्वाच्चेतनाधिष्ठातृपूर्विकेत्यर्थः॥ ५॥ ॥ ॥ ॥ ॥ ॥

उक्तप्रवृत्त्या चेतनास्तित्वसिद्धावपि कथं क्षेत्रज्ञास्तित्वमित्याशंक्य चेतनस्यैव क्षेत्रोपाधिना क्षेत्रज्ञत्वात्तेनास्तित्वेन तदस्तित्वमेवेत्याह ॥ क्षेत्रज्ञेति ॥ तस्य क्षेत्रोपाधित्वेपि कथं पाणिपादाक्षिशिरोमुखवत्त्वमित्याशंक्याह ॥ क्षेत्रं चेति ॥ अनध्यासोपाधितस्तस्मिन्विशेषोक्तिरिति विशेषः कथमेत० , सर्वत्रासदिति निर्विशेषत्वोक्तिरित्याशंक्याह ॥ क्षेत्रेति ॥ पाणिपादादिमत्त्वमौपाधिकं मिथ्या चेज्ज्ञेयप्रवचनाधिकारे कथं तदु०

सर्वतः पाणिपादं तत्सर्वतोऽक्षिशिरोमुखं ॥ सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति ॥१३॥ सर्वतः पाणिपादं सर्वतः पाणयः पादाश्चास्येति सर्वतः पाणिपादं तत् ज्ञेयं ॥ सर्वप्राणिकरणोपाधिभिः क्षेत्रज्ञास्तित्वं विभाव्यते ॥ क्षेत्रज्ञश्च क्षेत्रोपाधित उच्यते ॥ क्षेत्रं च पाणिपादादिभिरनेकधा भिन्नं ॥ क्षेत्रोपाधिभेदकृतं च विशेषजातं मिथ्यैव क्षेत्रज्ञस्येति तदपनयेन ज्ञेयत्वमुक्तं न सत्तन्नासदुच्यत इति ॥ उपाधिकृतं मिथ्यारूपमप्यस्तित्वाधिगमाय ज्ञेयधर्मवत्परिकल्प्योच्यते सर्वतः पाणिपादमित्यादि तथा हि संप्रदायविदां वचनमध्यारोपापवादाभ्यां निःप्रपंचं प्रपंच्यत इति ॥ सर्वत्र सर्वदेहावयवत्वेन गम्यमानाः पाणिपादादयो ज्ञेयशक्तिसद्भावनिमित्तस्वकार्या इति ज्ञेयसद्भावलिंगानि ज्ञेयस्येत्युपचारत उच्यंते ॥ छ ॥ श्रीरामाय नमः ॥ छ ॥

क्तिरित्याशंक्याह ॥ उपाधीति ॥ मिथ्यारूपमपि ज्ञेयवस्तुज्ञानोपयोगीत्यत्र वृद्धसंमतिमाह ॥ तथाहीति ॥ पाणिपादादीनामन्यगतानामात्मधर्मत्वेनाऽरोपव्यपदेशे को हेतुरिति चेत्त्राह ॥ सर्वत्रेति ॥ ज्ञेयस्य ब्रह्मणः शक्तिः सन्निधिमात्रेण प्रवर्तमानसामर्थ्यं तत्सत्त्वं निमित्तीकृत्य स्वकार्यवंतो भवंति पाण्यादयस्तल्लिंगत्वेनेति योजना ॥ छ ॥ ॥ ॥ ॥ ॥ ॥ ०

सर्वतोक्षीत्यादावुत्क्रमनिर्दिशति ।। तथेति ।। तज्ज्ञेयं यथा सर्वतः पाणिपादमिति व्याख्यानं तथेत्युत्क्रमेव स्फुटयति ।। सर्वत इति ।। सर्वतोक्षी
त्यादेरक्षरार्थमाह ।। सर्वतोक्षीणीति ।। अक्षिश्रवणवत्व~~[illegible]~~मवशिष्टज्ञानेंद्रियवत्वस्य पाणिपादमुखवत्वं चाव०
शिष्टकर्मेंद्रियवत्वस्य मनोबुद्ध्यादिमत्वस्य चोपलक्षणं ।। एकस्य सर्वत्र पाण्यादिमत्वं साधयति ।। सर्वमिति ।। १३ ।। आरोपादनेसाक्षा

तथा व्याख्येयमस्य तत् सर्वतः पाणिपादं तत् ।। ज्ञेयं ।। सर्वतोक्षिशिरोमुखं सर्वतोक्षीणि शिरांसि मुखानि च यस्य तत् सर्वतोक्षिशि
रोमुखं ।। सर्वतः श्रुतिमत् श्रुतिः श्रवणेंद्रियं तत् यस्यास्तीति तत् श्रुतिमत् लोके प्राणिनिकाये ।। सर्वमावृत्य संव्याप्य तिष्ठति
स्थितिं लभते ।। न चलतीत्यर्थः ।। उपाधिभूतपाणिपादादींद्रियाध्यारोपणात् ज्ञेयस्य तद्वत्ताशंका माभूदित्येवमर्थः ~~भांसं सर्वेंद्रि~~
श्लोकारंभः सर्वेंद्रियगुणाभासं सर्वेंद्रियविवर्जितं ।। असक्तं सर्वभृच्चैव निर्गुणं गुणभोक्तृ च ।। १४ ।। सर्वेंद्रियगुणाभासं
सर्वाणि च तानि इंद्रियाणि श्रोत्रादीनि बुद्धींद्रियकर्मेंद्रियाख्यानि ।। अंतःकरणे च बुद्धिमनसी ज्ञेयोपाधित्वस्य तुल्यत्वात् स
र्वेंद्रियग्रहणेन गृह्येते ।। अपि चांतःकरणोपाधिकद्वारेणैव श्रोत्रादीनां अप्युपाधित्वं इत्यतोंऽतःकरणवहिःकरणोपाधि
।। भूतैः सर्वेंद्रियगुणैरध्यवसायसंकल्पश्रवणवचनादिभिरवभासत इति सर्वेंद्रियगुणाभासं ।। ५३ ।। ० ।।

देवज्ञेयस्य पाण्यादिमत्वमाशंक्याह ।। उपाधीति ।। इंद्रियविशेषणाभ्रत सर्वशब्दाज्ज्ञेयोपाधित्वन्यायाविशेषश्चात्र बुद्ध्यादेरपि०
[illegible]त्याह ।। अंतःकरणे चेति ।। श्रोत्रादीनां ज्ञेयोपाधित्वस्य मनोबुद्धिद्वारत्वादपि तयोरिह ग्रहणमित्याह ।। अपि चे
।। ति ।। तयोरपीहोपादाने फलितमाह ।। अत इति ।। ५३ ।। ५३ ।। श्री ।।

टी॰ ॥

अक्षरार्थमुक्त्वा वाक्यार्थमाह ॥ सर्वेति ॥ उपाधिद्वारा कल्पितव्यापारवत्त्वे मानमाह ॥ ध्यायतीवेति ॥ कल्पितमेवास्य व्यापारवत्त्वं न वास्तव
मित्यत्र भगवतोपि संमतिमाकांक्षाद्वारा दर्शयति ॥ कस्मादित्यादिना ॥ सर्वकरणराहित्ये फलितमाह ॥ अत इति ॥ साक्षादेव ज्ञेयस्य वेग
वद्ग्रहणादिक्रियावत्तायां मंत्रवर्णितत्वात्कुतोस्य करणव्यापारैरव्यापृतत्वमित्याशंक्यानुवादपूर्वकं मंत्रस्य प्रकृतानुगुणत्वमाह ॥
यस्त्विति ॥ करणगुणानुगुण्यभजनमंत्रेण साक्षादेव जवनादिक्रियावत्त्वप्रदर्शनपरत्वे मंत्रस्य मुख्यार्थत्वं स्यादित्याशंक्य तदसंभ

सर्वेंद्रियव्यापारैर्व्यापृतमिव तत्तज्ज्ञेयमित्यर्थः ध्यायतीव लेलायतीवेति श्रुतेः ॥ कस्मात्पुनः कारणान्न व्यापृतमेवेति गृह्य
त इत्याह ॥ सर्वेंद्रियविवर्जितं सर्वकरणरहितमित्यर्थः ॥ अतो न करणव्यापारैर्व्यापृतं तज्ज्ञेयं ॥ यस्त्वयं मंत्रोऽपाणिपादो
जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्ण इत्यादिः स सर्वेंद्रियोपाधिगुणानुगुण्यभजनशक्तिमत्तज्ज्ञेयमित्येवं प्र
दर्शनार्थः ॥ न तु साक्षादेव जवनादिविक्रियावत्त्वप्रदर्शनार्थः ॥ अंधो मणिमविंददित्यादिमंत्रार्थवत्तस्य मंत्रस्यार्थः ॥
यस्मात्सर्वकरणवर्जितं ज्ञेयं तस्मादसक्तं सर्वसंश्लेषवर्जितं ॥ यद्यप्येवं तथापि सर्वभृच्चैव ॥ १४ ॥ १४ ॥ ०

आ॰ १३॥
२५४॥ राम॥

वान्नैवमित्याह ॥ अंध इति ॥ अर्थवादस्य श्रुतेरर्थे तात्पर्याभावान्न प्रकृतप्रतिकूलत्वमित्यर्थः सर्वकरणराहित्यं तद्व्यापारराहित्य
स्योपलक्षणमित्यंगीकृत्योक्तमेव हेतुं कृत्वा वस्तुनः सर्वसंगवर्जितत्वमाह ॥ यस्मादिति ॥ वस्तुनः सर्वसंगाभावे
ऽपि सर्वाधिष्ठानत्वमाह ॥ यद्यपीति ॥ १४ ॥ १४ ॥ श्रीरामः ॥

स्यसत्तामात्रेणाधिष्ठानतया सर्वं गृह्णातीत्येतदुपपादयति ॥ सदिति ॥ विमतं सतिकल्पितं प्रत्येकं सदनुविद्धधीबोध्यत्वात्प्रत्येकं चंद्रानुवि-
द्धधीबोध्यचंद्रभेदवदित्यर्थः ॥ सर्वं सदास्पदमित्ययुक्तं मृगतृष्णिकादीनां तदभावादित्याशंक्याह ॥ न हीति ॥ तेषामपि कल्पितत्वे-
न निरधिष्ठानत्वायोगात्तिरप्यमाणं तदधिष्ठानं सदेवेति सर्वस्य सतिकल्पितत्वमविरुद्धमित्यर्थः ॥ सर्वाधिष्ठानत्वेन ज्ञेयस्य ब्र-
ह्मणोऽस्तित्वमुक्तमुपसंहरति ॥ अत इति ॥ इतश्च ज्ञेयं ब्रह्मास्तीत्याह ॥ इदं चेति ॥ न हि तस्योपलब्धृत्वमसत्त्वे सिध्यतीत्यर्थः ॥१४॥

सदास्पदं हि सर्वं सर्वत्र सद्बुद्ध्यनुगमात् ॥ न हि मृगतृष्णिकादयोऽपि निरास्पदा भवंत्यतः सर्वभृत् सर्वं बिभर्तीति स्यादि-
दं चान्यत् ज्ञेयस्य सत्त्वाधिगमद्वारं । निर्गुणं सत्त्वरजस्तमांसि गुणास्तैर्वर्जितं तत् ज्ञेयं ॥ तथापि गुणभोक्तृ च गुणानां स-
त्त्वरजस्तमसां शब्दादिद्वारेण सुखदुःखमोहाकारपरिणतानां भोक्तृ चोपलब्धृ तत् ज्ञेयमित्यर्थः ॥ किंच ॥ बहिरंतश्च
भूतानामचरं चरमेव च ॥ सूक्ष्मत्वात्तदविज्ञेयं दूरस्थं चांतिके च तत् ॥१५॥ बहिस्त्वक्पर्यंतं देहमात्मत्वेनाविद्याकल्पित-
मपेक्ष्य तमेवावधिं कृत्वा बहिरुच्यते ॥ तथा प्रत्यगात्मानमपेक्ष्य देहमेवावधिं कृत्वांतरुच्यते ॥ १५ ॥ श्रीरामचंद्रायनमः ॥

इतोऽपि ज्ञेयं ब्रह्मास्तीत्याह ॥ किं चेति ॥ बहिरिति व्याख्येयमादाय व्याचष्टे ॥ ०
चतिति ॥ भूतेभ्यो बहिर्बाह्यं विषयाद्यात्मकमित्यर्थः ॥ कथमनात्मन एवात्मत्वं कल्पनयेत्याह ॥ आत्मत्वेनेति ॥ अंतः शब्दार्थमाह ॥
तथेति ॥ भूतानां चराचराणामंतर्मध्ये प्रत्यगात्मतामित्यर्थः ॥ श्रीरामचंद्रायनमः ॥ ॥ १५ ॥

टी॰ द्वितीयं पादमवतार्य व्याचष्टे॥ बहिरित्यादिना॥ यन्मध्ये भ्रान्तात्मकं नानाविधदेहात्मनाभासमानं तदपि ज्ञेयां न भ्रान्तं तत्त्वसदित्यर्थः॥ कथं चराचरा
त्म॰।भं तजातस्य ज्ञेयत्वं तत्राह॥ यथेति॥ अधिष्ठाने रज्ज्वां कल्पितस्य सर्पादेरंतर्भाववद्देहादिभावस्यापि ज्ञेयांतर्भावाभासहं मध्ये ज्ञेय
त स्पर्शो किं नव्यमित्यर्थः॥ सर्वात्मकं चेज्ज्ञेयं सर्वैरिदमिति किमिति न गृह्यत इत्याशंकते॥ यदीति॥ इदमिति ग्राह्यत्वयोग्यत्वाभावान्नेत्याह॥
उच्यत इति॥ सर्ववस्त्वात्मनाभासनतस्तद्योग्यत्वं कथमित्याशंक्याह॥ सत्यमिति॥ सूक्ष्मत्वेपि किं स्यादित्याशंक्याह॥ अन्तर इति॥ सूक्ष्म

बहिरंतश्चेत्युक्ते मध्येऽभावे प्राप्ते इदमुच्यते॥ अचरं चरमेव चापद्वराचरं देहाभासमपि तदेव सर्वं ज्ञेयं। यथा रज्जुः सर्पाभासो
यद्यच्चरं चरमेव च व्यवहारविषयं सर्वं ज्ञेयं किमर्थमिदमिति सर्वैर्न विज्ञेयमित्युच्यते॥ सत्यं सर्वाभासं तथापि व्योमवत्
सूक्ष्मतः॥ सूक्ष्मत्वात्तत्स्वेन रूपेण तत् ज्ञेयमविज्ञेयमविदुषां विदुषां त्वात्मैवेदं सर्वं ब्रह्मैवेदं सर्वमित्यादिप्रमाणतो नि
त्यविज्ञातं॥ अविज्ञाततया दूरस्थं वर्षसहस्रकोट्याप्यविदुषामप्राप्यत्वात्॥ अंतिके च तदात्मत्वाद्विदुषां॥ १५॥ श्रीरामयनमः॥ दु

अ॰१३॥
२५५॥राम॥

त्वमतींद्रियत्वं तस्याविज्ञेयत्वे कुतस्तज्ज्ञानान्मुक्तिस्तत्राह॥ अविदुषामिति॥ विशेषणफलमाह॥ विदुषां त्विति॥ तेषामात्मत्वेन ज्ञानं च
त त्कथं दूरस्थत्वमित्याशंक्याह॥ अविज्ञाततयेति॥ कथं तर्हि तस्य प्रत्यक्त्वं तत्राह॥ अंतिके चेति॥ विद्वदविद्वद्देहापेक्षया दूरात्सुदूरे तदि
हांतिके चेति श्रुतिं तदर्थोऽत्र प्रसंगादनूदित इत्यर्थः॥ ५७॥ ५८॥ १५॥ ॥ ॥ ॥ ॥ ॥

ज्ञेयस्यास्तित्वे हेत्वंतरमाह ॥ किंचेति ॥ नहि प्रतिदेहं नभोवदेकं तद्देहे मानाभावाद्भिन्नत्वे च घटवदनात्मत्वापातादतोऽद्वयं सर्वत्र प्रत्यग्भूतं
ज्ञेयं नास्तीत्यतिसाहसमित्याह ॥ अविभक्तं चेति ॥ कथं तर्हि देहभेदे भेदधीरित्याशंक्य कल्पनयेत्याह ॥ भूतेष्विति ॥ तत्र हेतुः ॥ देहेष्विति ॥
कार्याणां स्थितिहेतुत्वाच्च ज्ञेयमस्तीत्याह ॥ भूतेति ॥ निमित्तोपादानतया तेषां प्रलये प्रभवे च कारणत्वाच्च तदस्तीत्याह ॥ प्रलयेति ॥
तर्हि कार्यकारणत्वस्य वस्तुत्वान्नाद्वैतमित्याशंक्याह ॥ यथेति ॥ १६ ॥ इतोऽपि ज्ञेयस्यास्तित्वमित्याह ॥ किंचेति ॥ हेत्वंतरमेव स्फोरयि

किंच ॥ अविभक्तं च भूतेषु विभक्तमिव च स्थितं ॥ भूतभर्तृ च तज्ज्ञेयं ग्रसिष्णु प्रभविष्णु च ॥ १६ ॥ अविभक्तं च प्रतिदेहं व्यो
मवत्तदेकं ॥ भूतेषु सर्वप्राणिषु विभक्तमिव च स्थितं ॥ देहेष्वेव विभाव्यमानत्वात् ॥ भूतभर्तृ च भूतानि बिभर्तीति तत् ज्ञेयं भूत
भर्तृ स्थितिकाले प्रलयकाले ग्रसिष्णु ग्रसनशीलं उत्पत्तिकाले प्रभविष्णु च प्रभवनशीलं ॥ यथा रज्ज्वादिः सर्पादेर्मिथ्याक
ल्पितस्य ॥ किंच ॥ सर्वत्र विद्यमानं सन्नोपलभ्यते चेत् ज्ञेयं तमस्तर्हि ॥ न किं तर्हि ॥ ज्योतिषामपि तज्ज्योतिस्तमसः पर
मुच्यते ॥ ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य विष्ठितं ॥ १७ ॥ ज्योतिषां आदित्यादीनामपि तत् ज्ञेयं ज्योतिः ॥ आत्मचैतन्यज्योति
षेद्धानि हि आदित्यादीनि दीप्यंते ॥ येन सूर्यस्तपति तेजसेद्धस्तस्य भासा सर्वमिदं विभातीत्यादिश्रुतिभ्यः ॥ १७ ॥ श्रीरामः ॥

तुं रूपयति ॥ सर्वत्रेति ॥ न तत्तमो मंतव्यमित्याह ॥ नेति ॥ तर्हि किं तस्य रूपमिति पृच्छति ॥ किं तर्हीति ॥ तत्रोत्तरं ॥ ज्योतिषामिति ॥ सूर्यादीनां बुद्ध्यादी
नां च प्रकाशकत्वादस्ति ज्ञेयं ब्रह्मेत्याह ॥ ज्योतिषामिति ॥ तदेवोपपादयति ॥ आत्मेति ॥ तत्र श्रुतिद्वयं प्रमाणयति ॥ येनेति ॥ १७ ॥ श्रीरामः ॥

भा० टी०

उक्तैर्धर्मैर्वाक्यशेषमनुकूलयति ।। स्परतेश्चेति ।। ज्ञेयस्यानन्तत्वेपि तमःस्पृष्टत्वमाशंक्योक्तं ।। तमसरन्ति ।। उत्तरार्द्धस्य तात्पर्यमाह ।। ज्ञानादेरिति ।। ०
[illegible] मन्नमुद्दीपनं प्रकटीकरणमिति यावत् ।। ज्ञानममानित्वादिकरणव्युत्पत्त्येति विशेषः ।। ज्ञानगम्यं ज्ञेयमिति पुनरुक्तिं शंकित्वोक्तं ।।
ज्ञेयमिति ।। उक्तं च यस्य बुद्धिस्थतया प्राकट्यं प्रकटयति ।। तदेतदिति ।। तत्रानुभवमनुकूलयति ।। तत्रैवेति ।। १७ ।। त्वमर्थशुध्य

स्परतेश्चेहे वयरादित्यगतं तेज इत्यादिना तमसोऽज्ञानात् परमसंस्पृष्टमुच्यते ।। ज्ञानादेर्दुःप्रसंपादनबुध्याभासावसारस्योतं
मनार्थमाह ज्ञानममानित्वादि ज्ञेयं यत्तत्प्रवक्ष्यामीत्यादिनोक्तं । ज्ञानगम्यं ।। ज्ञेयमेव ज्ञानं स्यात् ज्ञानफलमिति ज्ञानगम्यमुच्यते
साधमानेनतुज्ञेयं ।। तदेतत्त्रयमपि हृदि बुद्धौ सर्वस्य प्राणिजातस्य विष्ठितं । विशेषेणास्थितं तत्रैव हि त्रयं विभाव्यते ।। यथो-
क्तार्थोपसंहारार्थोऽयं श्लोक आरभ्यते ।। इति क्षेत्रं तथा ज्ञानं ज्ञेयं चोक्तं समासतः ।। मद्भक्त एतद्विज्ञाय मद्भावायोपपद्यते
।। १८ ।। इत्येवं क्षेत्रं महाभूतादि धृत्यंतं ।। तथा ज्ञानममानित्वादि तत्त्वज्ञानार्थदर्शनपर्यंतं । ज्ञेयं च ज्ञेयं यत्तदित्यादि तमसः
परमुच्यत इत्येवं मंत मुक्तं समासतः ४ संक्षेपेण ।। एतावानेव हि सर्वो वेदार्थो गीतार्थश्चोपसंहृत्योक्तः ।। १८ ।। १८ ।।

ल

आ० १३ ।।
२५६ ।। रामगः

ए र्थ्यं सविकारं क्षेत्रं पदवाक्यार्थविवेकसाधनं चामानित्वादि तैस्तदर्थं च शुद्धं नर्म्मावोत्स्यार्थमुक्त्वा तेषां फलमुपसंहरतियथोक्तेति ।। सर्वो विभ- क्तं
ज्यते ।। इत्येवमिति ।। वक्तव्यांतरे सति किमिति त्रितयमेव संक्षिप्योपसंहृतं तत्राह ।। एतावानिति ।। १८ ।। श्रीरामचंद्राय नमः ।। १८ ।। ०

उत्तरार्द्धमाकांक्षाद्वारा ऽवतारयति ॥ अस्मिन्निति ॥ ईश्वरे सर्वात्मभावमेवाभिनयति ॥ पश्यपतीति ॥ विज्ञायत इत्यध्येवसर्थः ॥ १८ ॥ प्रकृ
तिमित्यादि वक्ष्यमाणेनानेन रस्पर्वग्रंथस्य संबंधीत्याशंक्य व्यवहितेन संबंधार्थं व्यवहितमनुवदति ॥ तत्रेति ॥ प्रधानमोक्ष्य प्रकृत्योर व्य
न्कं भूतनेकारणत्वमित्याह ॥ एतद्विति भूता ज्ञानमिव प्रकृत्योरपि प्रकृत्संतरापेक्षया ऽनवस्थानाच्च भूतयोनित्वे नित्यशांकते ॥ इत्ते

अस्मिन्सम्यग्दर्शने कोऽधिक्रियत इत्युच्यते ॥ मद्भक्तो मयीश्वरे सर्वज्ञे परमगुरौ वासुदेवे समर्पितसर्वात्मभावः प
श्यति शृणोति स्पृशति वा सर्वमेव भगवान्वासुदेव इत्येवंग्रहाविष्टबुद्धिर्मद्भक्तः सतद्यथोक्तं सम्यग्दर्शनं विज्ञा
य मद्भावाय मम भावो मद्भावः परमात्मभावस्तस्मै मद्भावायोपपद्यते ॥ मोक्षं गच्छति ॥ तत्र सप्तमेऽध्याये
ईश्वरस्य द्वे प्रकृती उपन्यस्ते परापरे क्षेत्रक्षेत्रज्ञलक्षणे ॥ एतद्योनीनि भूतानीति चोक्तं क्षेत्रक्षेत्रज्ञप्रकृतिद्वयो
नित्वं कथं भूतानामित्ययमर्थोऽधुनोच्यते ॥ प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि ॥ विकारांश्च गुणांश्चैव विद्धि प्रकृ
तिसंभवान् ॥ १९ ॥ प्रकृतिं पुरुषं चैवेश्वरस्य द्वे प्रकृती ते प्रकृतिपुरुषावुभावप्यनादी विद्धि ॥ ५ ॥

ति ॥ तत्राकृताभ्यागमादिवारणाय बंधस्य निदानज्ञानार्थं आत्मनो विक्रियत्वादिदोषनिरासार्थं च प्रकृतिपुरुषयोरनादित्वं क्षेत्रज्ञे
ने [illegible]नां प्रकृतिविकारभावं च दर्शयति ॥ अयमर्थ इति ॥ सच्चयोयत्नभावश्चेत्युपदिष्टं व्याचष्टे ॥ प्रकृतिमिति ॥ ईश्वर
[illegible]ः परा प्रकृतिरत्र प्रकृतिशब्देनोक्ता परा च प्रकृतिर्जीवाख्या पुरुषशब्देन विवक्षितेति व्याकरोति ॥ ईश्वरस्येति ॥ ५ ॥

ताभाष्टी
पु ॥

व

तयोरनादित्वं व्युत्पादयति ॥ नेत्यादिना ॥ तत्र युक्तिमाह ॥ नित्यत्वादिति ॥ ईश्वरस्योक्तप्रकृतिद्वयवत्त्वं कथमित्याशंक्याह ॥ प्रकृतीति ॥ नस्य जगज्ज-
न्मादौ बीजत्वमेवेश्वरत्वं तु न प्रकृतिद्वयवत्त्वमित्याशंक्याह ॥ याभ्यामिति ॥ प्रकृत्योरनादित्वं कुत्रोपयुक्तमित्याशंक्याह ॥ नेदमिति ॥
मतांतरमाह ॥ नेत्यादिना ॥ तयोर्मूलकारणत्वाभावे कस्यतद्देष्टव्यमित्याशंक्याह ॥ तेनेति ॥ प्रकृतेरेव मूलकारणत्वे श्रुति-
स्मृतिसिद्धमीश्वरस्य तथात्वं न स्यादित्याह ॥ यदीति ॥ प्रकृतिद्वयस्य कार्यत्वपक्षं प्रत्याह ॥ तदसदिति ॥ किंच प्रकृतिद्वयमनपे-

न विद्यते आदिर्ययोस्तावनादी ॥ नित्यत्वादीश्वरस्य तत्प्रकृत्योरपि युक्तं नित्यत्वेन भवितुं ॥ प्रकृतिद्वयवत्त्वमेव ही-
श्वरस्येश्वरत्वं ॥ याभ्यां प्रकृतिभ्यां ईश्वरो जगदुत्पत्तिस्थितिप्रलयहेतुस्ते द्वे अनादी सत्यौ संसारस्य कारणं ॥ न आ-
दी अनादी इति तत्पुरुषसमासं केचिदिच्छंति तेन ॥ कित्वेश्वरस्य कारणत्वं सिध्यति ॥ यदि पुनः प्रकृतिपुरुषावेवानि-
त्यौ स्यातां तत्कृतमेव जगन्नेश्वरस्य जगत्कर्तृत्वं ॥ तदसत् प्राक् प्रकृतिपुरुषयोरुत्पत्तेरीशितव्याभावादीश्वर-
स्यानीश्वरत्वप्रसंगात् । संसारस्य च निर्निमित्तत्वेऽनिर्मोक्षप्रसंगात् ॥ शास्त्रानर्थक्यप्रसंगात् बंधमोक्षाभावप्रसं-

गा [illegible] ॥ ७ ॥

अ।१३॥
२५७॥राम॥

श्चेश्वरस्य संसारहेतुत्वे स्वांतं ज्ञान्मुक्तानामपि ततः संसारापत्तेर्निषेधान्मोक्षशास्त्राप्रामाण्यापत्तेस्तस्यैव संसारहेतुत्वेत्याह ॥ संसारस्येति
निर्निमित्तत्वं प्रकृतिद्वयापेक्षात्र ने परस्यैव निमित्तत्वमिति यावत् ॥ किंच कार्यत्वे प्रकृत्योस्तदुदयात्पूर्वं बंधाभावेन द्विष्टेषात्तनो मोक्षस्याभावा-
त्कदाचिदुभयाभावे पुनस्तत्प्रसंगात् प्रकृतिद्वयकार्यत्वेत्याह ॥ बंधेति ॥ १९ ॥ श्रीरामचंद्रायनमः ॥ श्रीगुरुमूर्तयेनमः ॥ श्री विश्वेनाथ:

प्रकृत्योर्मूलकारणत्वेनानुपपत्तिरित्याह ॥ नित्यत्वमिति ॥ स्वपक्षे दोषाऽभावं प्रश्नपूर्वकं प्रपंचयति ॥ कथमित्यादिना ॥ संभवः सन्ता
हे गापकौ तुः प्रकृत्योरनादित्वे विकाराणां गुणानां च तत्कार्यत्वादात्मनो निर्विकारत्वं निर्गुणत्वं च सिध्यतीति भावः ॥१९॥ विकाराणां
गुणानां प्रकृतेश्च स्वरूपताकांक्षाद्वारा निर्णेतुमुत्तरश्लोकपूर्वार्द्धं पातयति ॥ के पुनरिति ॥ पुरुषस्यानादित्वकृतं बंधहेतुत्वमाह ॥

नित्यत्वे पुनरीश्वरप्रकृत्योः सर्वमेतदुपपन्नं भवेत् ॥ कथं ॥ विकारांश्च गुणांश्चैव वक्ष्यमाणान् बुद्ध्यादिदेहेंद्रियांतान् गुणांश्च
सुखदुःखमोहप्रत्ययाकारपरिणतान् विद्धि जानीहि प्रकृतिसंभवान् ॥ प्रकृतिरीश्वरस्य हि विकारकारणशक्तिस्त्रिगुणा
त्मिका माया सा संभवो येषां विकाराणां गुणानां च तान् विकारान् गुणांश्च विद्धि जानीहि प्रकृतिसंभवान् प्रकृतिपरि
णामान् ॥ के पुनस्ते विकारा गुणाश्च ये प्रकृतिसंभवाः ॥ कार्यकारणकर्तृत्वे हेतुः प्रकृतिरुच्यते ॥ पुरुषः सुखदुःखा
नां भोक्तृत्वे हेतुरुच्यते ॥२०॥ कार्यकारणकर्तृत्वे कार्यं शरीरं करणानि तत्स्थानि त्रयोदश देहस्यारंभकाणि भूत
॥ तानि विषयाश्च प्रकृतिसंभवा विकाराः पूर्वोक्ता इह कार्यग्रहणेन गृह्यंते ॥

पुरुष इति ॥ पूर्वार्द्धं व्याचष्टे कार्यमित्यादिना ॥ ज्ञानेंद्रियपंचकं कर्मेंद्रियपंचकं मनोबुद्धिरहंकारश्चेति त्रयोदश करणानि तथापि
भूतानां विषयाणां चाग्रहणात्कथं तेषां प्रकृतिकार्यत्वेत्याशंक्याह ॥ देहेति ॥ २० ॥ श्रीरामचंद्राय नमः ॥ श्रीगुरुस्मुर्तियाः

॰भा॰टी॰ तथापि गुणानामिहाग्रहणान्न प्रकृतिकार्यत्वं तत्राह ।। गुणाश्चेति ।। उक्तरीत्या निष्पन्नमर्थमाह ।। एवमिति ।। पाठांतरमनूद्य व्याख्यापूर्वकमर्थाभे
२५ ।। राम ।। दमाह ।। कार्येत्यादिना ।। व्याख्यांतरमाह ।। अथवेति ।। एकादशेंद्रियाणि पंच विषया इति षोडशसंख्याको विकारोऽत्र कार्यशब्दार्थो महा
नहंकारो भूततन्मात्राणीति प्रकृतिविकृतयः सप्त कारणं तेषामारंभकत्वेन कर्तृत्वेन हेतुराद्यो मूलप्रकृतिरित्यर्थः ।। उत्तरार्द्धस्य

गुणाश्च प्रकृतिसंभवाः सुखदुःखमोहात्मकाः कारणाश्रयत्वात्कार्यग्रहणेन गृह्यंते ।। तेषां कार्यकारणानां कर्तृत्वमुत्पादकत्वं यत्त
त्कार्यकारणकर्तृत्वं तस्मिन्कार्यकारणकर्तृत्वे हेतुः कारणमारंभकत्वेन प्रकृतिरुच्यते ।। एवं कार्यकारणकर्तृत्वेन संसारस्य कारणं
प्रकृतिं ।। कार्यकारणकर्तृत्वे इत्यस्मिन्नपि पाठे कार्यं यस्य विपरिणामस्तत्तस्य कार्यं विकारो विकारि कारणं तयोः विकारविकारि
णोः कार्यकारणयोः कर्तृत्वमिति ॰ तान्येव कार्यकारणान्युच्यंते अथवा षोडश विकाराः कार्यं सप्त प्रकृतिविकृतयः कारणं ।। तेषां क
र्तृत्वे हेतुः प्रकृतिरुच्यते आरंभकत्वेनैव ।। पुरुषश्च संसारस्य कारणं यथा स्यात्तदुच्यते ।। पुरुषः जीवः क्षेत्रज्ञः भोक्तेति पर्यायाः ।। ॰
सुखदुःखानां भोग्यानां भोक्तृत्वेऽपलब्धृत्वे हेतुरुच्यते ।। कथं पुनरनेन कार्यकारणकर्तृत्वेन सुखदुःखभोक्तृत्वेन च प्रकृति ।। आ०१३ ।।
।। पुरुषयोः संसारकारणत्वमुच्यत इति ।। २५८ ।। राम ।। :

तात्पर्यमाह ।। पुरुषश्चेति ।। तस्य परमात्मत्वं व्यावर्तयति ।। जीव इति ।। तस्य प्राणधारणनिमित्तस्पन्दरूपचेतनत्वमाह ।। क्षेत्रज्ञ इति ।। तस्यानौ ह्रौ
पाधिकत्वं वारयति ।। भोक्तेति ।। तयोः संसारकारणत्वमुपपादयितुं शंकते ।। कथमिति ।। ६१ ।। ।। श्रीरामचंद्राय नमः ।। श्रीसुंदरः ।।

अन्वयव्यतिरेकाभ्यां तयोस्तथात्वमित्याह ॥ अन्वेति ॥ तत्र व्यतिरेकं दर्शयति ॥ कार्येति ॥ न हि नित्यमुक्तस्यात्मनः स्वतः संसारोस्ती
त्यर्थः ॥ इदानीमन्वयमाह ॥ यदेति ॥ अन्वयादि फलमुपसंहरति ॥ इत्यतरति ॥ आत्मनोविक्रियस्य संसरणं नोचितमित्याक्षिप
ति ॥ कः पुनरिति ॥ सुखदुःखान्यतरसाक्षात्कारो भोगः स चाक्रियस्यैव द्रष्टुः संसारस्तद्विधं भोक्तृत्वमस्य संसारित्व

अत्रोच्यते ॥ कार्यकरणसुखदुःखरूपेण हेतुफलात्मना प्रकृतेः परिणामाभावे पुरुषस्य चत्वेन नस्यासति तदुपलब्धृ
त्वे कुतः संसारः स्यात् यदा पुनः कार्यकरणरूपेण हेतुफलात्मना परिणतया प्रकृत्या भोग्यया पुरुषस्य तद्विपरीतस्य
भोक्तृत्वेनाविद्यारूपः संयोगः स्यात्तदा संसारः स्यात् इत्यतो यत्प्रकृतिपुरुषयोः कार्यकारणकर्तृत्वेन सुख
दुःखभोक्तृत्वेन च संसारकारणत्वमुक्तं तत्तु युक्तमुक्तं ॥ कः पुनरयं संसारो नाम सुखदुःखसंभोगः संसार ॥ पु
रुषस्य च सुखदुःखानां भोक्तृत्वं संसारित्वमिति ॥ यत्तु पुरुषस्य सुखदुःखानां भोक्तृत्वं संसारित्वमित्यु ॥ •
मित्तं
क्तं तस्य तत् किंनिमित्तमुच्यते ॥ पुरुषः प्रकृतिस्थो हि भुंक्ते प्रकृतिजान् गुणान् ॥ कारणं गुणसंगोऽस्य सदसद्योनिजन्म
सु ॥ २१ ॥ पुरुषो भोक्ता प्रकृतिस्थः प्रकृतावेवाविद्यालक्षणायां स्थितः प्रकृतिस्थः प्रकृतिमात्मत्वेन गतः इत्येतद्धि यस्मात्
तस्मात् भुंक्ते उपलभत इत्यर्थः प्रकृतिजान् ॥ प्रकृतितो जातान् सुखदुःखमोहाकाराभिव्यक्तान् गुणान् ॥ ५ ॥ •

मित्युत्तरमाह ॥ सुखेति ॥ श्लोकव्याख्यासमाप्ताविति शब्दः ॥ २० ॥ श्लोकांतरं प्रश्नोत्तरत्वेनावतारयति ॥ यदिति ॥ निमित्तं वक्तुं मादौ
संसारित्वमस्याविद्यैव्याध्यादित्याह ॥ पुरुष इति ॥ ५ ॥ श्रीरामचंद्राय नः माः हा ॥
सा

गी॰भा॰टी॰
१॰२१॥ राम

यस्मात्प्रकृतिमात्मत्वेनगतः तस्माद्भुंक्तइतियोजना॥ गुणविषयंभोगमभिनयति॥ सुखीति॥ अविद्याया भोगहेतुत्वात्किंकारणगवे
षणयेत्याशंक्याह॥ सत्यामपीति॥ संगस्यजन्मादौसंसारे प्रधानहेतुत्वेमानमाह॥ सयथेति॥ उक्तेर्थे द्वितीयार्द्धमवतार्यव्याच
ष्टे॥ तदेतद्दित्यादिना॥ साध्याहारंयोजनांतरमाह॥ अथवेति॥ सदसद्योनीर्विविच्यव्याचष्टे॥ सद्योनयइति॥ योनिद्वयनिर्दे

सुखीदुःखीमूढः पंडितोहमित्येवंसत्यामप्यविद्यायांसुखदुःखमोहेषुगुणेषुभुज्यमानेषुयःसंगःआत्मभावःस
प्रधानंकारणमस्यपुरुषस्यजन्मनःसयथाकामोभवतितत्क्रतुर्भवतीत्यादिश्रुतेः॥ तदेतदाहकारणंहेतुर्गुण
संगोगुणेषुसंगोऽस्यपुरुषस्यभोक्तुःसदसद्योनिजन्मसु॥ सत्यश्चासत्यश्चयोनयःसदसद्योनयस्तासुसदसद्यो
निषुजन्मानिसदसद्योनिजन्मानितेषुसदसद्योनिजन्मसुविषयभूतेषुनिमित्तकारणंगुणसंगोऽथवासदसद्योनि
जन्मसुअस्यसंसारस्यकारणंगुणसंगइतिसंसारपदमध्याहार्यं॥ सद्योनयोदेवादियोनयोऽसद्योनयःप
श्वादियोनयःसामर्थ्यात् सदसद्योनयोपिमनुष्ययोनयोऽविरुद्धाद्द्रष्टव्याः एतदुक्तंभवति॥ प्रकृतिस्थत्वा
ख्याविद्यागुणेषुचसंगःकामश्चसंसारस्यकारणमिति॥ २१॥ तच्चपरिवर्जनायोच्यते॥ २१॥ २१॥ श्रीराम॥:

आ॰१३॥
२५१॥ राम:॥

शान्मध्यवर्तिन्योमनुष्ययोनयोपिध्वनिताइत्याह॥ सामर्थ्यादिति॥ संगस्यसंसारकारणत्वेनाविद्यायास्तत्कारणत्वमेकस्मादेवहेतोस्तदु
पपत्तेरित्याशंक्याह॥ एतदिति॥ अविद्योपादानंसंगोनिमित्तमित्युभयोरपिकारणत्वसिद्धिरित्यर्थः॥ २१॥ द्विविधहेतूक्तेर्विवक्षितंफलमाह॥
॥ तच्चेति॥

सासंगस्याज्ञानस्यत्वतो॥ निवृत्तेस्तन्निवर्तकं वाच्यमित्याशंक्याह॥ अस्येति॥ वैराग्ये सति संन्यासस्तत्पूर्वकं ज्ञानं सासंगात्तान
निवर्तकमित्यर्थः उक्ते ज्ञाने मानमाह॥ गीतेति॥ अध्यायादौ चोक्तं ज्ञानमुदाहृतमित्याह॥ न[illegible]ति॥ न देवतानां यज्ज्ञात्वेत्यादिना
नसन्नासदित्यंतेनान्यनिषेधेन सर्वतःपाणिपादमित्यादिना चानद्धर्माध्यासेनोक्तमित्याह॥ यज्ज्ञात्वेति॥ प्रकृतस्यैवमुक्ति

अस्य च निवृत्तिकारणं ज्ञानवैराग्ये ससंन्यासे गीताशास्त्रे प्रसिद्धं॥ तच्च ज्ञानं पुरस्तादुपन्यस्तं क्षेत्रक्षेत्रज्ञविषयं॥ यत्
ज्ञात्वामृतमश्नुत इत्यादिना उक्तं चान्यापोहेनानद्धर्माध्यारोपणेन च॥ तस्यैव पुनः साक्षान्निर्देशः क्रियते॥ उपद्रष्टानुमं
ताच भर्ता भोक्ता महेश्वरः॥ परमात्मेति चाप्युक्तो देहेऽस्मिन्पुरुषः परः॥ २२॥ उपद्रष्टा समीपस्थः सन्द्रष्टा स्वय॥
मव्यापृतो यथा ऋत्विग्यजमानेषु यज्ञकर्मव्यापृतेषु तटस्थोऽन्योऽव्यापृतो यज्ञविद्याकुशल ऋत्विग्यजमानव्यापार
गुणदोषाणामीक्षिता तद्वत्कार्यकरणव्यापारेष्वव्यापृतोऽन्यो विलक्षणस्तेषां कार्यकरणानां स व्यापाराणां सामीप्येन
द्रष्टोपद्रष्टा॥ अथवा देहचक्षुर्मनोबुध्यात्मनो द्रष्टारः॥ ॥ ५१॥ ५१॥

देहेतोऽज्ञानस्य साक्षान्निर्देशायोत्तरश्लोकमुत्थापयति॥ तस्येति॥ कार्यकारणानां व्यापारवतां समीपे स्थितः सन्निधिमात्रेण ते
षां साक्षीत्येवमर्थत्वेनोपद्रष्टेति पदं व्याचष्टे॥ समीपस्थ इति॥ लौकिकस्येव द्रष्टुरस्यापि स्वव्यापाराविष्टतया निष्क्रियत्वविरो
धमाशंक्याह॥ स्वयमिति॥ स्वव्यापारादृते सन्निधिरेव द्रष्टृत्वं दृष्टांतेन स्पष्टयति॥ यथेति॥ उपद्रष्टेत्यस्यार्थांतरमाह॥ अथवेति॥

बहुनां द्रष्टृत्वे पिकस्योपद्रष्टृत्वं तत्राह ॥ तेषामिति ॥ उपोपसर्गस्य सामीप्यार्थत्वेन प्रत्यगर्थत्वात्तस्यैव सामीप्यावसानात्प्रत्यगात्मा च द्रष्टेत्युपद्रष्टा सर्वसाक्षी प्रत्यगात्मेत्यर्थः ॥ उक्तमेव व्यनक्ति ॥ यथेति ॥ यथा यजमानस्यर्त्विजां च यज्ञकर्मणि गुणं वा दोषं वा सर्वं यत्ताभितः सन्नुपद्रष्टा विषयीकरोति ॥ तथायमात्मा चिन्मात्रस्वभावः सर्वं गोचरयतीत्युपद्रष्टे वोपद्रष्टेति पक्षान्तरमाह ॥ यज्ञेति ॥ अनु

तेषां बाह्यो देहस्तत आरभ्यान्तरतमश्च प्रत्यक्समीपे आत्मा द्रष्टा यतः परोऽन्तरो नास्ति द्रष्टा सोऽतिशयसामीप्येन द्रष्टृत्वादुपद्रष्टा स्यात् ॥ यज्ञोपद्रष्टृवद्वा सर्वविषयीकरणादुपद्रष्टा अनुमन्ता च ॥ अनुमोदनमनुमननं कुर्वत्सु तत्क्रियासु परितोषस्तत्कर्तानुमन्ता ॥ अथवाऽनुमन्ता कार्यकरणप्रवृत्तिषु स्वयमप्रवृत्तोऽपि प्रवृत्त इव तदनुकूलो विभाव्यते तेनानुमन्ता अथवा प्रवृत्तान् स्वव्यापारेषु तत्साक्षिभूतः कदाचिदपि न निवारयतीत्यनुमन्ता ॥ भर्ता भरणं नाम देहेन्द्रियमनोबुद्धीनां संहतानां चैतन्यात्मपारार्थ्येन निमित्तभूतेन चैतन्याभासानां यत्स्वरूपधारणं तच्चैतन्यात्मकृतमेवेति भर्तात्मोच्यते ॥

मन्ता चेत्येतद्व्याकरोति ॥ अनुमन्तेति ॥ ये स्वयं कुर्वन्तो व्यापारवन्तो भवन्ति तेषु कुर्वत्सु सत्सु यास्तेषां क्रियास्तासु पार्श्वस्थस्य परितोषोऽनुमननं तदानुमोदनं तस्य सन्निधिमात्रेण कर्ता यः सोऽनुमन्तेत्यर्थः ॥ व्याख्यान्तरमाह ॥ अथवेति ॥ तद्वदस्य दर्शयति ॥ कार्येति ॥ अर्थान्तरमाह ॥ अथवेत्यादिना ॥ भर्तेति पदमादाय किं भरणं नामेति पृच्छति ॥ भर्तेति ॥ तद्रूपं निरूपयन्नात्मनो भर्तृत्वं साधयति ॥ देहेति ॥ २२ ॥ श्रीरामचन्द्राय नमः

भोक्तेत्युक्तेक्रियावत्वेप्राप्तेभोगश्चिदवसानत्वेनेत्यायेनविभजते ॥ अश्नीति ॥ विशेषणांतरमादायव्याचष्टे ॥ महेश्वरइति
परमात्मत्वमुपपादयति ॥ देहादीनामिति ॥ अविद्यायाकल्पितानामितिसंबंधः ॥ परमत्वंप्रकृत्वत्वंसर्वोक्तविशेषणा
वानितियावत् ॥ परमात्मशब्दस्यप्रकृतात्मविषयत्वेश्रुतिमनुकूलयति ॥ अनंतरेति ॥ तस्यताटस्थ्यंप्रश्नद्वाराप्रत्याचष्टे ॥

भोक्ताग्न्युष्णवन्नित्यचैतन्यस्वरूपेणबुद्धेःसुखदुःखमोहात्मकाःप्रत्ययाःसर्वेविषयविषयाश्चैतन्यात्मग्रस्ताइवजायमानाः ॥
३ अविभक्ताविभक्ताइवविभाव्यंतइतिभोक्तात्मोच्यते ॥ महेश्वरःसर्वात्मत्वात्~~स्वतंत्रत्वा~~त्स्वतंत्रत्वाच्चमहानीश्वरश्चे
तिमहेश्वरःपरमात्मादेहादीनांबुद्ध्यंतानांप्रत्यगात्मत्वेनप्रकल्पितानामविद्ययापरमउपद्रष्टृत्वादिलक्षणआत्मा
चेतिपरमात्मासोऽतःपरमात्मेत्यनेनशब्देनचाप्युक्तःकथितःश्रुतौ ॥ क्वासावस्मिन्देहेपुरुषःपरोऽव्य
क्तादुत्तमःपुरुषस्त्वन्यःपरमात्मेत्युदाहृतइतियोवक्ष्यमाणःक्षेत्रज्ञंचापिमांविद्धीत्युपन्यस्तोव्याख्यायोपसंहृत
श्च ॥ तमेतंयथोक्तेनप्रकारेणवेत्तिपुरुषंसाक्षादात्मभावेनायमहमिति ॥+॥ उक्तलक्षणमात्मानं ॥ यएवंवेत्तिपुरुषंप्र
कृतिंचगुणैःसह ॥ सर्वथावर्तमानोपिनसभूयोऽभिजायते ॥ २३ ॥ यएवंपश्चे × ४

॥ देहेतिकस्मात्परत्वंतदाह ॥ अव्यक्तादिति ॥ तत्रैववाक्यशे

नुकूलयमाह ॥ उत्तमइति ॥ सोऽस्मिन्देहेपरःपुरुषइतिसंबंधः ॥ शोधितार्थयोस्तत्वंपदार्थयोरैक्यज्ञानंप्रागुक्तंफलोक्त्यास्तौति ॥
क तेनतेचेति ॥ २३ ॥ यथोक्तेनप्रकारेणजीवेश्वरादिसर्वात्मनाधिष्ठानत्वेनेत्यर्थः ॥ साक्षादपरोक्षेणेतियावत् ॥ ५ ॥ श्रीरामः ॥

यथोक्तामनाद्यनिर्वाच्यां सर्वानर्थोपाधिभूतामित्यर्थः ॥ विद्यया प्रागुक्तैकत्वब्रह्मगोचरया प्रकृतिमविद्यारूपां सकार्यामभावमापादितां यो वे-
त्तीति संबंधः ॥ सर्वप्रकारेण विहितेन निषिद्धेन वेत्यर्थः ॥ पुनर्नकारोऽन्वयार्थः ॥ निपातनसूचितन्यायमाह ॥ अपीति ॥ न स भूयोभिजाय-
युक्तमाक्षिपति ॥ नन्विति ॥ ज्ञानोत्पत्त्यनंतरं जन्माभावस्योक्तत्वात्पुनर्देहारंभमुपेत्य नाक्षेपः स्यादित्याशंक्याह ॥ यद्यपीति ॥ तथापि

प्रकृतिं च यथोक्तामविद्यालक्षणां गुणैः स्वविकारैः सह निवर्तितामभावमापादितां विद्यया सर्वथा सर्वप्रकारेण वर्तमानोऽपि न
स भूयः पुनः पतितेऽस्मिन् विद्वच्छरीरे देहांतराय नाभिजायते नोत्पद्यते देहांतरं न गृह्णातीत्यर्थः ॥ अपिशब्दात् किमु वक्तव्यं
स्ववृत्तस्थोऽपि न जायत इत्यभिप्रायः ॥ ननु यद्यपि ज्ञानोत्पत्त्यनंतरं पुनर्जन्माभाव उक्तस्तथापि प्राक् ज्ञानोत्पत्तेः कृतानां कर्म-
णां उत्तरकालभाविनां च यानि चातिक्रांतान्यनेकजन्मकृतानि तेषां च फलमदत्वा नाशो न युक्त इति स्युस्त्रीणि जन्मानि ॥
॥ कृतविप्रणाशो हि न युक्त इति ॥ छ ॥ श्रीरामः ॥

स्युस्त्रीणि जन्मानीति संबंधः ॥ वर्तमाने देहे ज्ञानात्सर्वोत्तरकालीनानां कर्मणां फलमदत्वा नाशायोगाज्जन्मद्वयमावश्यकमतीता-
नेकदेहेष्वपि कृतकर्मणां नाभुक्तं क्षीयते कर्मेति स्मृतेरदत्वा फलमनाशादस्मिंस्तृतीयमपि जन्मेत्याह ॥ प्रागिति ॥ फलदानं विनापि
कर्मनाशे दोषमाह ॥ कृतेति ॥ न युक्त इति कृत्वा फलं दत्वा कर्मनाशो नेति शेषः ॥ छ ॥ श्रीरामचंद्राय नमः ॥ छ ॥ श्रीसदाशिवः ॥

विमतानि कर्माणि फलमदत्त्वा न क्षीयन्ते वैदिककर्मत्वादारब्धकर्मवदिति मत्वाह ॥ यथेति ॥ नाशो न ज्ञानादिति शेषः नन्वनारब्धकर्मणां ज्ञानान्नाशो
युक्तोऽप्रवृत्तफलत्वादारब्धकर्मणां तु प्रवृत्तफलत्वेन बलवत्त्वाज्ज्ञानान्निवृत्तिर्नेत्याह ॥ न चेति ॥ अज्ञानोत्थत्वेन ज्ञानविरोधित्वाविशेषात्प्रवृ व
त्ताप्रवृत्तफलत्वमनुपयुक्तमिति भावः ॥ कर्मणां फलमदत्त्वा नाशाभावे फलितमाह ॥ तस्मादिति ॥ ननु कर्मणां बहुत्वात्तत्फलेषु जन्मसु कुत
स्त्रित्वमारंभककर्मणां त्रिप्रकारत्वादिति चेन्नानारब्धत्वेनैकप्रकारत्वसंभवादित्याह ॥ संहृतानीति ॥ इति नास्ति ज्ञानस्यैकानेकफलत्वमिति

यथा फले प्रवृत्तानामारब्धजन्मनां कर्मणां ॥ न च कर्मणां विशेषो गम्यते नेतस्मात्त्रिप्रकाराण्यपि कर्माणि त्रीणि जन्मान्यारभेरन् ॥ सं
हृतानि वा सर्वाण्येकं जन्मारभेरन् अन्यथा कृतविप्रणाशे सति सर्वत्रानाश्वासप्रसंगः ॥ शास्त्रानर्थक्यं च स्यादित्यत इदमयुक्तं न
सम्यग्घोऽभिधीयत इति ॥ न क्षीयन्ते चास्य कर्माणि ॥ ब्रह्म वेद ब्रह्मैव भवति ॥ तस्य तावदेव चिरमिषीकातूलवत्सर्वाणि कर्मा
णि प्रदूयन्त इत्यादिश्रुतिशतेभ्यः उक्तो विदुषः सर्वकर्मदाहः ॥

शेषः ॥ उक्तकर्मणां जन्मानारंभकत्वे प्रागुक्तदोषमनुभाष्य तस्यानिष्टप्रसंजकत्वमाह ॥ अन्यथेति ॥ सर्वत्रेत्यारब्धकर्मस्वपीति यावत्
फल[illegible]कृतत्वाऽनिश्चयोऽनाश्वासः कर्मणां जन्मानारंभे कर्मकाण्डानर्थक्यं दोषान्तरमाह ॥ शास्त्रेति ॥ अनारब्धकर्मणां सत्यपि ज्ञाने
जन्मारंभकत्वध्रौव्ये फलितमाह ॥ इत्यत इति ॥ श्रुत्यवष्टंभेन परिहरति ॥ नेत्यादिना ॥ ८२ ॥ श्रीकृष्णायनमः ॥ श्रीरामचंद्रायनमः ॥

भा॰ टी॰
८२ ॥

ज्ञानाग्निनारब्धकर्मदाहे भगवतोपि संमतिमाह ॥ इहापीति ॥ ज्ञानाधीनसर्वकर्मदाहे ~~सर्वधर्मसंके~~ सर्वधर्मान्परित्यज्येत्यादि वा
शेषोपि प्रमाणं भवतीत्याह ॥ वक्ष्यति चेति ॥ ज्ञानाग्निनारब्धाशेषकर्मक्षये युक्तिरपि वक्तुं शक्येत्याह ॥ उपपन्नेश्चेति ॥ नामेव
रणोति ॥ अविद्येति ॥ अज्ञस्याविद्यास्मितारागद्वेषाभिनिवेशाख्यक्लेशात्मकानि सर्वानर्थबीजानि तानि निमित्तीकृत्य यानि ध
र्माधर्मकर्माणि तानि जन्मारंभकाणि यानि तु विदुषो विद्यादग्धक्लेशबीजस्य प्रतिभासमात्रशरीराणि कर्माणि न तानि शरीरा
इहापि चोक्तो यथैधांसि रित्यादिना सर्वकर्मदाहो वक्ष्यति ॥ चोपपन्नेश्चाविद्याकामक्लेशबीजनिमित्तानि हि कर्माणि फलारंभकाणि जन्मांत
रांकुरमारभंते ॥ इहापि च साहंकाराभिसंधीनि कर्माणि फलारंभकाणि नेतराणीति तत्र तत्र भगवतोक्तं ॥ बीजान्यग्न्युपदग्धानि
न रोहंति यथा पुनः ॥ ज्ञानदग्धैस्तथा क्लेशैर्नात्मा संबध्यते पुनरिति च ॥ अस्तु तावत् ज्ञानोत्पत्त्युत्तरकालकृतानां कर्मणां ज्ञानेन दाहो
ज्ञानसहभावितानां त्विह जन्मनि ज्ञानोत्पत्तेः प्राक्कृतानामतीतानेकजन्मांतरकृतानां कर्मणां च दाहो युक्तः ॥ श्रीरामाः ॥ ७ ॥

ग

आ॰ १३ ॥
२६२ ॥ रामः

रंभकाणि दग्धपटवदर्थक्रियासामर्थ्याभावादित्यर्थः प्रतीतिमात्रदेहानां कर्माभासानां न फलारंभकत्वेऽस्मिन्नर्थे भगवतोपि सं
मतिमाह ॥ इहापीति ॥ न त्वज्ञानादूर्ध्वं प्रातीतिकक्लेशानां कर्मद्वारा देहानारंभकत्वे वाक्यांतरमपि प्रमाणयति ॥ बीजानीति ॥
ज्ञानानंतरभाविकर्मणां ज्ञानेन दाहमंगीकरोति ॥ अस्त्विति ॥ विरोधिग्रस्तानामेवोत्पत्तिरिति हेतुमाह ॥ ज्ञानेति ॥ अस्मिन्जन्म
नि जन्मांतरे वा ज्ञानात्पूर्वभाविकर्मणां न ततो दाहो विरोधिनं विना प्रवृत्तेरित्याह ॥ नत्विति ॥ ८ ॥ श्रीरामचंद्रायनमः ॥

श्रुतिस्मृतिविरोधान्नैवमिति परिहरति ॥ नेत्यादिना ॥ सर्वशब्दश्रुतेः संकोचं शंकते ज्ञानेति ॥ प्रकरणादिसंकोचकाभावान्नैवमित्याह ॥ नेति ॥ आक्षेपदशायामुक्तमनुमानमनुवदति ॥ यत्विति ॥ आभासत्वादिदमसाधकमिति दूषयति ॥ तदसदिति ॥ व्याप्त्यादिसत्वे कथमाभासत्वमिति पृच्छति ॥ कथमिति ॥ प्रारब्धेतरफलत्वोपाधिना हेतोर्व्याप्तिभंगादाभासत्वधीरित्याह ॥

न सर्वकर्माणीति विशेषणात् ॥ ज्ञानोत्तरकालभाविनामेव सर्वकर्मणामिति चेन्न ॥ संकोचकारणानुपपत्तेः ॥ यत्तूक्तं यथा वर्तमानजन्मारंभकाणि कर्माणि न क्षीयन्ते फलदानाय प्रवृत्तान्येवं सत्यपि ज्ञाने तथाऽनारब्धफलानामपि कर्मणां क्षयो न युक्त इति ॥ तदसत् ॥ कथं तेषां मुक्तेषुवत् प्रवृत्तफलत्वात् ॥ यथा पूर्वं लक्ष्यवेधाय मुक्त इषुर्धनुषो लक्ष्यवेधोत्तरकालमप्यारब्धवेगक्षयात् पतनेनैव निवर्तते ॥ एवं शरीरारंभकं कर्म शरीरस्थितिप्रयोजने निवृत्तेऽपि ॥ आसंस्कारवेगक्षयात् पूर्ववद्वर्तत एव ॥

तथापीति ॥ तदेव प्रपंचयति ॥ यथेत्यादिना ॥ धनुषः सकाशादिषुर्मुक्तो बलवत्प्रतिबंधकताभावे मध्ये न पततीति तथा प्रबलप्रतिबंधकं विना प्रवृत्तफलानां कर्मणां भोगादृते न क्षयो न च तत्त्वज्ञानं तादृक्प्रतिबंधकमुत्पत्तावेव पूर्वप्रवृत्तेन कर्मणा प्रतिबद्धशक्तित्वादित्यर्थः ॥

भाष्ये
दृ॥

न ज्ञानेनादाह्यत्वं तत्र प्रवर्तनफलत्वमित्यन्वयेपि यत्राप्रवर्तनफलत्वं तत्र ज्ञानदाह्यत्वमिति न व्यतिरेकसिद्धिरित्याशंक्याह ॥ एवेति ॥ प्र
तीति ॥ नमिनष्टतोऽनारब्धो वेगोऽनेनेति विग्रहः ॥ स्वाश्रयस्थानि साभासान्तःकरणनिष्ठानीतियावत् ॥ विमतानि न तत्त्वधीनिमित्तनि
त्तानि तत्त्वज्ञानकारणनिवर्तिकत्वाद्रज्जुसर्पादिवदिति व्यतिरेकसिद्धिरिति भावः ॥ विदुषो वर्तमानदेहपाते देहांतरे हेत्वभावान्नत्व
कांतिकफलेष्वुपसंहरति ॥ इतिपतितिनइति ॥२३॥ ज्ञेयं यत्तदित्यादिना तत्पदार्थस्त्वंपदार्थश्चानंतरमेव शोधितौ तयोरैक्यं च

योभि

यथा सर्वेषु प्रवृत्तिनिमित्तोऽनारब्धवेगस्त्वमुक्तो धनुषि प्रयुक्तोप्युपसंह्रियते ॥ तथाऽनारब्धफलानि कर्माणि स्वाश्रयस्थान्येव
ज्ञानेन निर्बीजी क्रियंते ॥ इति पतितेऽस्मिन् विद्वच्छरीरे न सम्यग्ज्ञानायतनादिति युक्तमेवोक्तमिति सिद्धं ॥ अत्रात्मदर्शने उपायविक
ल्पा इमे ध्यानादय उच्यंते ॥ ध्यानेनात्मनि पश्यंति केचिदात्मानमात्मना ॥ अन्ये सांख्येन योगेन कर्मयोगेन चापरे ॥२४॥ ध्यानेन
ध्यानं नाम शब्दादिभ्यो विषयेभ्यः श्रोत्रादीनि करणानि मनस्युपसंहृत्य मनश्च प्रत्यक्चेतयितर्येकाग्रतया यच्चिंतनं तत्

क्षेत्रज्ञं चापि मां विद्धीत्युक्तमिदानीं तद्दृष्टिहेतुं न्यायाधिकारं कथयति ॥ अत्रेति ॥ ध्यानाख्यं साधनं किंरूपमिति पृच्छति ॥
ध्यानं नामेति ॥ तद्रूपं वदन्नुत्तरमाह ॥ शब्दादिभ्य इति ॥ एकाग्रतयोपसंहृत्येति संबंधः यच्चिंतनं प्रत्यक्चेतयितरीति पूर्वे
॥ ग्रन्थयुः ॥५॥

स

अ० १३ ॥
२६३ ॥ रामः

किंतच्चिंतनमित्युक्ते दृष्टांतद्वारा श्रुत्यवष्टंभेन ध्यानं प्रपंचयति ।। तयेति ।। विवक्षितध्यानानुरोधेनेतियावत् ।। आत्मानं पश्यंति परमात्म
तयेति शेषः केचिदित्युत्तमाधिकारिणो ग्रह्यंते मध्यमाधिकारिणो निर्दिशति ।। अन्य इति ।। सांख्यशब्दितं साधनं किंनामेत्युक्ते विचारजन्यं
ज्ञानं तदेव ज्ञानहेतुतया योगतुल्यत्वाद्योगशब्दितमित्याह ।। सांख्यमिति ।। अथमानधिकारिणः संगिरते ।। कर्मेति ।। चित्तैकाग्र्यं यो

तथाध्यायतीव बको ध्यायतीव पृथ्वी ध्यायंतीव पर्वता इत्युपमोपात्ततैलधारावत्संततोऽविच्छिन्नप्रत्ययो ध्यानं तेन ध्यानेना
त्मनि बुद्धौ पश्यंत्यात्मानं प्रत्यक्चेतनमात्मना ध्यानसंस्कृतेनांतःकरणेन केचित् योगिनोऽन्ये सांख्येन योगेन ।। सांख्यं नाम इमे
सत्वरजस्तमांसि गुणास्तद्व्यापारसाक्षिभूतो नित्यो गुणविलक्षण आत्मेति चिंतनमेष सांख्ययोगस्तेन पश्यंत्यात्मानमात्मने
ति वर्तते ।। कर्मयोगेन कर्मैव योग ईश्वरार्पणबुद्ध्यानुष्ठीयमानं घटनरूपं योगार्थत्वाद्योग उच्यते ।। गुणतः ।। तेन सत्वशुद्धि
ज्ञानोत्पत्तिद्वारेण चापरे ।। अन्ये त्वेवमजानंतः श्रुत्वाऽन्येभ्य उपासते । तेपि। चातितरंत्येव मृत्युं श्रुतिपरायणाः ।।२५।। ०
अन्ये त्वेषु विकल्पेषु अन्यतरेणाप्येवं यथोक्तमात्मानमजानंतोऽन्येभ्य आचार्येभ्यः श्रुत्वेदमेवं चिंतयेत्युक्ता उपासते ।।२६।। ०।।

दृष्टं कर्मणः शुद्धिहेतोरस्तित्वेन गौण्या वृत्त्या योगशब्दितं कर्मेत्याह ।। गुणतः इति ।। अपरे पश्यंत्यात्मानमात्मनेति पूर्ववदनुषंगमंगीकृत्या
त ।।२५।। अथमाधिकारिणां मोक्षमार्गे प्रवृत्तिं प्रतिलंभयति ।। अन्ये त्विति ।। आचार्याधीनां श्रुतिमेवाभिनयति ।। इदमिति ।।२६।। श्रीरामः ।।

पासनमेव विवृणोति॥ श्रद्दधाना इति॥ परोपदेशात्प्रवृत्तानामपि प्रवृत्तेः साफल्यमाह॥ तेपीति॥ तेषां मुमुक्ष्वाधिकारित्वं व्यावर्तयति॥ श्रु-
णीस्वपि नास्त्युचितमर्थमाह॥ किमिति॥ २५॥ ऐक्यधीर्मुक्तिहेतुरिति प्रागुक्तमर्थं प्रश्नपूर्वकं जिज्ञासितहेतुपरत्वेन श्लोकम-
तारयति॥ अत्र क्षेत्रक्षेत्रज्ञेति॥ सर्वस्य प्राणिजातस्य क्षेत्रक्षेत्रज्ञसंबंधाधीना यस्मादुत्पत्तिस्तस्मात्क्षेत्रज्ञात्मकपरमात्मातिरेके

श्रद्दधानाः संतश्चिंतयंति तेपि चातितरंत्येवातिक्रामंत्येव मृत्युं मृत्युयुक्तं संसारमित्येतत् श्रुतिपरायणाः श्रुतिः श्रवणं
परं अयनं गमनं मोक्षमार्गप्रवृत्तौ परं साधनं येषां ते श्रुतिपरायणाः केवलपरोपदेशज्ञानप्रमाणाः स्वयंविवेकरहिता
इत्यभिप्रायः किमु वक्तव्यं प्रमाणं प्रति स्वतंत्रा विवेकिनो मृत्युमतितरंतीत्यभिप्रायः॥ अत्र क्षेत्रक्षेत्रज्ञैक्यैकत्वविषयज्ञानं
मोक्षसाधनं यत्तज्ज्ञात्वामृतमश्नुत इत्युक्तं॥ तत्कस्मात् हेतोरिति तद्धेतुप्रदर्शनार्थं श्लोक आरभ्यते॥ यावत्संजायते किं-
चित्सत्वं स्थावरजंगमं॥ क्षेत्रक्षेत्रज्ञसंयोगात्तद्विद्धि भरतर्षभ॥ २६॥ यावत्किंचित् यत्किंचित् संजायते समुत्पद्यते सत्वं
वस्तु किमविशेषेणेत्याह स्थावरजंगमं स्थावरं च जंगमं च स्थावरजंगमं॥ क्षेत्रक्षेत्रज्ञसंयोगात् तज्जायत इत्येवं विद्धि जा-
नीहि हे भरतर्षभ॥ किं पुनरयं क्षेत्रक्षेत्रज्ञयोः संयोगोऽभिप्रेतः॥ न तावत् रज्ज्वेव घटस्यावयवसंश्लेषद्वारकः संबंधविशेषः॥

॥ संयोगः क्षेत्रेण क्षेत्रज्ञस्य संभवति॥ आकाशवन्निरवयवत्वात्॥

णप्राणिनिकायस्याभावादैक्यज्ञानादेव मुक्तिरित्याह॥ तत्कस्मादिति॥ क्षेत्रक्षेत्रज्ञसंबंधमुक्त्वा माक्षिपति॥ कः पुनरिति॥ क्षेत्रज्ञस्य क्षे-
त्रेण संबंधः॥ संयोगो वा समवायो वेति विकल्पाद्यं दूषयति॥ न तावदिति॥ ५॥

म

द्वितीयं निरस्यति ॥ नापीति ॥ वास्तवसंबंधाभावेपि तयोरध्यासे सपेः सोस्तीति परिहरति ॥ उच्यत इति ॥ भिन्नस्वभावत्वे हेतुमाह ॥ विषयेति ॥
इतरेतरत्व क्षेत्रक्षेत्रज्ञे वा तद्धर्मस्य क्षेत्रानधिकरणस्य क्षेत्रज्ञगतस्य चैतन्यस्य क्षेत्रज्ञानधिकरणस्य च क्षेत्रनिष्ठस्य जाड्यादेरारो
परूपो योगस्तयोरित्याह ॥ इतरेतरेति ॥ तत्र निमित्तमाह ॥ क्षेत्रेति ॥ अविवेकादारोपितसंयोगे दृष्टांतमाह ॥ रज्ज्विति ॥ उक्तं सं
बंधं निगमयति ॥ सोयमिति ॥ तस्य निवृत्तिप्रयोगात्वं सूचयति ॥ मिथ्येति ॥ कथं तर्हि मिथ्याज्ञानस्य निवृत्तिरित्याशंक्याह ॥ प

नापि समवायलक्षणः तंतुपटयोरिव क्षेत्रक्षेत्रज्ञयोः इतरेतरकार्यकारणभावानभ्युपगमादित्युच्यते ॥ क्षेत्रक्षेत्रज्ञयोर्विष
यविषयिणोर्भिन्नस्वभावयोरितरेतरधर्माध्यासलक्षणः संयोगः क्षेत्रक्षेत्रज्ञस्वरूपविवेकाभावनिबंधनः रज्जुशुक्ति
कादीनां तद्विवेकविज्ञानाभावादध्यारोपितसर्परजतादिसंयोगवत् सोऽयमध्यासस्वरूपः क्षेत्रक्षेत्रज्ञसंयोगो मिथ्या
ज्ञानलक्षणो यथाशास्त्रं क्षेत्रक्षेत्रज्ञलक्षणभेदपरिज्ञानपूर्वकं प्राक् प्रदर्शितरूपात् क्षेत्रान्मुंजादिवेषीकां य
थोक्तलक्षणं क्षेत्रज्ञं प्रविभज्य न सत्तन्नासदुच्यत इत्यनेन निरस्तसर्वोपाधिविशेषं ज्ञेयं ब्रह्मस्वरूपेण यः पश्यति ॥छ॥

ति ॥ योयं विज्ञानमयः प्राणेष्वित्यादि त्वंपदार्थविषयं शास्त्रमनुसृत्य विवेकज्ञानमापाद्य महाभूतादिधृतसंघातात्क्षेत्रादुपद्रष्टृत्वा
दिलक्षणं प्रागुक्तं क्षेत्रज्ञं मुंजेषीकादिन्यायेन विविच्य सर्वोपाधिविशेषविनिर्मुक्तं ब्रह्मस्वरूपेणैवं योनुभवति तस्य मिथ्याज्ञान
॥ मपगच्छतीति संबंधः ॥छ॥ श्रीरामः ॥छ॥

पमस्य निर्विशेषत्वं क्षेत्रस्य सविशेषत्वे हेतोः सत्वादित्याशंक्याह ॥ क्षेत्रं चेति ॥ बहुदृष्टांतोक्तैर्बहुविधत्वं क्षेत्रस्य द्योतयते उक्तज्ञाना
थ्याज्ञानापगमे हेतुमाह ॥ यथोक्तेति ॥ तथापि कथं पुरुषार्थसिद्धिः कालांतरे तुल्यजातीयमिथ्याज्ञानोदयसंभवादित्या
क्याह ॥ तस्येति ॥ सम्यग्ज्ञानादज्ञानतत्कार्यनिवृत्त्या मुक्तिरिति निश्चितेन फलितमाह ॥ यएवमिति ॥ २६ ॥ उत्तरग्रंथमवता
यितुं व्यवहितत्वेन तं कीर्तयति ॥ नेत्यादिना ॥ अविद्यानाद्यनिर्वाच्यमज्ञानं मिथ्याज्ञानं तत्संस्कारश्चादिशब्दार्थः ॥ व्यवहि

क्षेत्रंच मायानिर्मितहस्तिस्वप्नदृष्टवस्तुगंधर्वनगरादिवदसदेव सदिवावभासत इत्येवं विनिश्चितविज्ञानो यस्तस्य य
थोक्तसम्यग्दर्शनविरोधात् अपगच्छति मिथ्याज्ञानं ॥ तस्य जन्महेतोरपगमात् यएवं वेत्ति पुरुषंकृतिं च गुणैःसह इ
त्यनेन विद्वान्न स भूयोऽभिजायत इति यदुक्तं तदुपपन्नमुक्तं ॥ २५ ॥ न स भूयोऽभिजायत इति सम्यग्दर्शनफलमवि
द्यादिसंसारबीजनिवृत्तिद्वारेण जन्माभाव उक्तः ॥ जन्मकारणं चाविद्यानिमित्तकः क्षेत्रक्षेत्रज्ञसंयोग उक्तोऽत

प्र

॥ तस्य अविद्याया निवर्तकं सम्यग्दर्शनमुक्तमपि पुनः शब्दांतरेणोच्यते ॥

तमनुद्याव्यवहितमनुवदति ॥ जन्मेति ॥ व्यवधानाऽव्यवधानीभ्यां सर्वानर्थमूलत्वादज्ञानस्य तन्निवर्तकसंम्यग्ज्ञानं वक्तव्यमित्याह ॥
अनइति तस्यासकृदुक्तत्वात्तदुक्त्यार्थायत्ननिर्देशेत्याशंक्यातिसूक्ष्मार्थस्य शब्दभेदेन पुनःपुनर्वचनमधिकारिभेदादनुग्रहायेति
॥ मत्वाह ॥ उक्तमिति ॥ ५ ॥ श्रीरामः ॥ ५ ॥ श्रीरामः ॥ छ ॥

सर्वत्र परस्यैकत्वान्नोत्कर्षापकर्षवत्त्वमित्याह ॥ सममिति ॥ परमत्वमीश्वरत्वं चोपपादयति ॥ देहेति ॥ आत्मा जीवस्तन्मित्यादिना
न्वयोक्तिः ॥ आश्रयनाशादाश्रितस्यापि नाशमाशंक्याह ॥ तं चेति ॥ अविनश्यंतमिति विशिनष्टीति संबंधः उभयत्र विशेषणद्व न
२ग३ यस्य तात्पर्यमाह ॥ भूतानामिति ॥ नाशानाशाभ्यां वैलक्षण्येप्येकत्वमसंतवैलक्षण्यं सविशेषत्वमनित्यत्वयोस्तुल्यत्वादिति शं

समं सर्वेष्वित्यादि ॥ समं सर्वेषु भूतेषु तिष्ठंतं परमेश्वरं ॥ विनश्यत्स्वविनश्यंतं यः पश्यति स पश्यति ॥२७॥ समं नि
र्विशेषं तिष्ठंतं स्थितिं कुर्वंतं ॥ क्व सर्वेषु समस्तेषु भूतेषु ब्रह्मादिषु स्थावरांतेषु प्राणिषु कं परमेश्वरं देहेंद्रियमनोबु
न६ द्ध्यव्यक्तात्मनोऽपेक्ष्य परमश्चासावीश्वरश्च [illegible]शीलश्चेति परमेश्वरस्तं सर्वेषु भूतेषु समं तिष्ठंतं ॥ तानि विशिनष्टि ॥
५७ विनाशिषु विनश्यत्स्विति ॥ तं परमेश्वरं त्वविनश्यंतमिति ॥ भूतानां परमेश्वरस्य चात्यंतवैलक्षण्य[illegible]प्रदर्शनार्थं सर्वेषां कथं
हि भावविकाराणां जनिलक्षणो भावविकारो मूलं जन्मोत्तरकालभाविनोऽन्ये सर्वे भावविकाराः विनाशांताः विनाशात्परो न कश्चि
दस्ति भावविकारः भावाभावात्सति हि धर्मिणि धर्मा भवंति ॥२८॥

[illegible]॥ रूपमिति ॥ भूतानां सविशेषत्वादिभावेऽपि परस्य तदभावादत्यंतवैलक्षण्यमिति वक्तुं जन्मनो भावविकारेष्वाद्यत्वमाह ॥ सर्वे
णञ्ज [illegible]नामिति ॥ तत्र हेतुमाह ॥ जन्मेति ॥ न हि जन्मांतरेणांतरे विकारा युज्यंते जन्मवतस्तदुपलंभादित्यर्थः विनाशानंतरभाविनोऽपि विका
[illegible]रस्यचिदुपपन्नेनं नित्यां सविकारत्वमित्याशंक्याह ॥ विनाशादिति ॥२९॥ ॥ ॥ ॥ ॥ ॥

भा॰टी॰
९६॥राम

[illegible]यांत्यविकारत्वे सिद्धे फलितमाह॥ अत इति॥ तेषां जन्मादीनां कार्याणि कादाचित्कसत्त्वानि तदधिकरणानि तैः सहेति यावत्॥ परमेश्व
रस्य भूतेभ्योऽसत्त्वं न वैलक्षण्यमुपसंहरति॥ तस्मादिति॥ निर्विशेषत्वं सर्वभावविकारविरहितत्वं कूटस्थत्वमेकत्वमद्वितीयत्वं यः पश्यती॰
त्यादि व्याचष्टे॥ एवमिति॥ उक्तविशेषणमीश्वरं पश्यन्नेव पश्यतीत्युक्तमाक्षिपति॥ नन्विति॥ ईश्वरपराङ्मुखस्यानात्मनिष्ठस्य तद् ड्

अतोऽन्त्यभावविकाराभावानुवादेन तत्पूर्वभाविनः सर्वे भावविकाराः प्रतिषिद्धा भवंति सह कार्यैस्तस्मात्सर्वभूतैर्वैलक्षण्यमत्यं
तमेव परमेश्वरस्यासिद्धं निर्विशेषत्वमेकत्वं च॥ एवं यथोक्तं परमेश्वरं पश्यति स पश्यतीति ननु सर्वोऽपि लोकः पश्यति किं विशेषणे
नेति॥ सत्यं पश्यति किंतु विपरीतं पश्यत्यतो विशिनष्टि स एव पश्यतीति यथा तिमिरदृष्टिरनेकं चंद्रं पश्यति तमपेक्ष्यैक
चंद्रदर्शी विशिष्यते स एव पश्यतीति तथेहाप्येकमविभक्तं यथोक्तमात्मानं यः पश्यति स विभक्तानेकात्मविपरीतदर्शिभ्यो
विशिष्यते स एव पश्यतीति॥ इतरे पश्यंतोऽपि न पश्यंति विपरीतदर्शित्वात् अनेकचंद्रदर्शिवदित्यर्थः॥ श्रीगणपतिः प्रसन्नः

आ॰१३॥
२९६॥रामः॥

र्शित्वेऽपि विपरीतदर्शित्वादीश्वरप्रवणस्यैव सम्यग्दर्शित्वमिति विवक्षित्वा विशेषणमिति परिहरति॥ सत्यमिति॥ उक्तमेव दृष्टांतेन विवृणो
ति॥ यथेत्यादिना॥ पश्यतीत्यादेरर्थमुपसंहरति॥ इतर इति॥ परवस्तुनिष्ठेभ्यो व्यतिरिक्ता इत्यर्थः॥ २७॥ श्रीरामचंद्राय नमः॥

युक्तन सम्यग्ज्ञाने न किमित्यपेक्षायां तत्फलं तस्मात्स्पेवस्तु सानंदेतो पुरुषं प्रवर्तयितुं श्लोकांतरमित्याह ।। यथोक्तस्येति ।। यस्मादि
त्यस्यनतः शब्देन संबंधः सर्वभूतेषु तुल्यतया स्थितं पूर्वोक्तलक्षणमीश्वरं निर्विशेषं पश्यन्नात्मानमात्मना यस्मान्नहिनस्ति
ननस्तस्मान्मोक्षाख्यां परां गतिं यातीति योजना नात्र पादत्रयेण ज्ञानादज्ञानध्वस्त्याध्वस्तिरनर्थस्योक्ता अज्ञानमिथ्याज्ञानयोरा
ननस्तस्मान्मोक्षाख्यां

यथोक्तस्य सम्यग्दर्शनस्य फलवचनेन स्तुतिः कर्तव्येति श्लोक आरभ्यते ।। समं पश्यन्हि सर्वत्र समवस्थितमीश्वरं ।।
न हिनस्त्यात्मनात्मानं ततो याति परां गतिं ।।२८।। समं पश्यन्नुपलभमानो हि यस्मात्सर्वत्र सर्वभूतेषु समवस्थितं तुल्य
तयावस्थितमीश्वरमतीतानंतरश्लोकोक्तलक्षणमित्यर्थः समं पश्यन्किं ।। न हिनस्ति हिंसां न करोति आत्मना स्वेनैव
स्वमात्मानं ततस्तदहिंसनात् याति परां प्रकृष्टां गतिं मोक्षाख्यां ।। ननु नैव कश्चित्प्राणी स्वयं स्वमात्मानं हिनस्ति कथमु
च्यते अप्राप्तं न हि नस्तीति यथा न पृथिव्यामग्निश्चेतव्यो नांतरिक्ष इत्यादि ।। ५८ ।। श्रीरामः श्रीकृष्ण ।।

वकृ

त्रिगु योर्नाशो सर्वोत्कृष्टां गतिं परमपुरुषार्थं परमानंदमनुभवति विद्वानिति चतुर्थपादार्थः ।। न हिनस्त्यात्मनात्मानमिति यथाश्रुतमा
यचोदयति ।। नन्विति ।। न पृथिव्यामिति प्राप्ति द्वारा निषेधवन्नांतरिक्षे न हि जीवीति प्राप्त्यभावाच्च पुनर्निषेधो मुख्यो नेष्यते तथे
हापि प्राप्तिं विना न निषेधो युक्तिमानित्याह ।। यथेति ।। ५७ ।। अज्ञानामात्मनैवात्महिंसासंभवाद्विदुषां तदभावोक्तिर्युक्तेति समाधत्ते ।।

भा॰टी॰
२९७

इति ॥ संग्रहवाक्यं विवृणोति ॥ सर्वो हीति ॥ अनात्मशब्दो देहादिविषयः अविदुषामारोपितात्महंतृत्वं निगमयति ॥ इत्यात्महेति ॥
नापि पारमार्थिकस्यात्मनो हननाभावान्न तेषां सर्वेषामात्महंतृत्वमित्याशंक्याह ॥ यस्त्विति ॥ उक्तरीत्या सर्वेषामविदुषामात्महं
तृत्वं सिद्ध

नैष दोषोऽज्ञानामात्मतिरस्करणोपपत्तेः ॥ सर्वो ह्यज्ञोऽत्यंतप्रसिद्धं साक्षादपरोक्षमप्यात्मानं तिरस्कृत्यानात्मानमात्म
त्वेन परिगृह्य तमपि धर्माधर्मौ कृत्वोपात्तमात्मानं हत्वान्यमात्मानमुपादत्ते नवं तमपि हत्वा ऽन्यमेवमुपात्तमात्मानं हं
तीत्यात्महा सर्वोऽज्ञो यस्तु परमार्थात्मा असावपि सर्वदा ऽविद्यया हत इव विद्यमानफलाभावादिति ॥ सर्व आत्महन ए
वाविद्वांसः ॥ यस्त्वितरो यथोक्तात्मदर्शी स उभयथाप्यात्मनात्मानं न हिनस्ति ततो याति परां गतिं यथोक्तं फलं तस्य
॥ भवतीत्यर्थः ॥२८॥

आ॰१३॥
२९७॥रामः॥

मित्युपसंहरतीति ॥ सर्व इति ॥ आत्मनैवात्महननमविदुषां दृष्टं तदिह विद्वद्विषये शक्यं निषेद्धुमित्याह ॥ यस्त्वितर इति ॥ उभ
यथापीत्यारोपानारोपाभ्यामित्यर्थः ॥ ज्ञानादनर्थभ्रमभ्रंशे पूर्वोक्तपरमानंदप्राप्त्या परिनिष्ठितत्वं वक्तुमित्याह ॥ तत इति ॥२८॥

श्लोकांतरं शंकोत्तरत्वेनावतारयितुमुक्तमनुवदति॥ सर्वेति॥ प्रतिदेहं धर्माधर्मादिमत्त्वेन आत्मनो भेदभानात्तत्र सम्यग्दर्शनमिति शंकते ने
तदिति॥ स्वगुणैः स्वसुखदुःखादिभिः स्वकर्मभिश्च धर्माधर्माख्यैर्वैलक्षण्यात्प्रतिदेहं भेदेनाविशिष्टेष्वात्मसु कथं साम्येन दर्शनमित्ये
तदाशंकां परिहरति॥ रत्येनेति॥ प्रकृतिशब्दस्य स्वभाववाचित्वं व्यावर्तयति प्रकृतिरिति॥ मायाशब्दस्य संवित्पर्यायत्वं प्रत्याह॥ ०

सर्वभूतस्थमीश्वरं समं पश्यन्हिनस्त्यात्मनात्मानमित्युक्तं न तदुपपन्नं। स्वगुणकर्मवैलक्षण्यभेदभिन्नेष्वात्मस्वित्ये
तदाशंक्याह॥ प्रकृत्यैव च कर्माणि क्रियमाणानि सर्वशः॥ यः पश्यति तथात्मानमकर्तारं स पश्यति॥२९॥ प्रकृत्या प्रकृतिर्भग
वतो माया त्रिगुणात्मिका मायां तु प्रकृतिं विद्यादिति मंत्रवर्णोक्तया प्रकृत्यैव च नान्येन महदादिकार्यकरणाकारपरिणतया
नान्येव कर्माणि वाग्मनःकायारभ्याणि क्रियमाणानि निर्वर्त्यमानानि सर्वशः सर्वप्रकारैर्यः पश्यत्युपलभते। तथात्मानं क्षे
त्रज्ञमकर्तारं सर्वोपाधिविर्जितं यः पश्यति॥

त्रिगुणेति॥ उक्ता परस्य शक्तिर्मायेत्यत्र श्रुतिसंमतिमाह॥ मायांत्विति॥ अन्येन केनचित्क्रियमाणानि न भवंति कर्माणीत्येवकारार्थमाह॥ ना
२ने न्येनेति॥ किं तस्य त्रिषेध्यं सुक्ते सांख्याभिप्रे[illegible]ता प्रधानाख्या प्रकृतिरित्याह॥ महदादीति॥ सर्वैः कारत्वं काम्यत्वनिषिद्धत्वादिना प्रकार प्र
रुक्तं आत्मानमुक्तविशेषणं यः पश्यतीति पूर्वेण संबंधः॥ ५२॥ ॥ ५॥ श्रीरामचंद्राय नमः॥ श्रीकृष्णाय नमः॥ ५॥ ५॥
भि२

०भा०टी० नुपश्यतीत्ययुक्तं पुनरुक्तेरित्याशंक्याह ।। सपरमार्थेति ।। आत्मनां प्रतिदेहं भिन्नत्वेन तेषु समदर्शनमयुक्तमित्युक्तस्यैकः समाधिरित्या
२६८ ।। शंक्याह ।। निर्गुणस्येति ।। २१ ।। प्रकृतेर्विकाराणां च सांख्यवत्पुरुषादन्यत्वप्रसक्तौ प्रत्याह ।। पुनरपीति ।। उपदेशजनितं प्रत्यक्षदर्शनम न२
नुवदति ।। आत्मैवेति ।। भूतानां विकाराणां नानात्वं प्रकृत्या सहात्ममात्रतया प्रलीनं पश्यति तेन ।। हि भूतन पृथक्त्वं सत्यां प्रकृतौ के
वले परस्मिन्विलापयितुं शक्यन इत्यर्थः परिपूर्णादात्मन एव प्रकृत्यादेर्विशेषानस्य स्वरूपलाभमनुपश्यतस्तन्मात्रतां पश्यतीत्याह ।।

स परमार्थदर्शीत्यभिप्रायः निर्गुणस्य कर्तुर्निर्विशेषस्याकाशस्येव भेदे प्रमाणानुपपत्तिरित्यर्थः ।। पुनरपि तदेव सम्यग्दर्शनं
शब्दान्तरेण प्रपंच्यते ।। यदा भूतपृथग्भावमेकस्थमनुपश्यति ।। तत एव च विस्तारं ब्रह्म संपद्यते तदा ।। ३० ।। यदा यस्मि ।।
न्काले भूतपृथग्भावं भूतानां पृथग्भावं पृथक्त्वं एकस्थमेकस्मिन्नेवात्मनि स्थितमेकस्थमनुपश्यति शास्त्राचार्योप
देशंमत्वात्मप्रत्यक्षत्वेन पश्यत्यात्मैवेदं सर्वमिति ।। तत एव च तस्मादेव च विस्तारमुत्पत्तिं सविकारां आत्मतः प्राण आत्मत आशा
आत्मनः स्मर आत्मन आकाश आत्मनस्तेज आत्मन आप आत्मन आविर्भावतिरोभावावात्मतोन्नमित्येवमादिप्रकारैर्वि आ १३ ।।
स्तारं यदा पश्यति ब्रह्म संपद्यते ब्रह्मैव भवति ।। तदा तस्मिन्काले इत्यर्थः ।। २६८ ।।
राम: ।।

तत एवेति ।। उक्तमेव विस्तारं श्रुत्यवष्टंभेन स्पष्टयति ।। आत्मन इति ।। ब्रह्मसंपत्तिर्नाम पूर्णत्वेनाभिव्यक्तिः पूर्णत्वहेतोः सर्वस्यात्मसा०
त त्त्वादित्याह ।। ब्रह्मैवेति ।। ज्ञानेन समानकालैव मुक्तिरिति सूचयति ।। तदेति ।। ५१ ।। ५१ ।। ।। ।। ।। ।। ।।

परिपूर्णत्वेन सर्वात्मत्वे प्राप्तमात्मनो देहादिगतेन कर्तृत्वादिना न तद्दुःखं दृष्टं हि पवित्रस्यापि पंचगव्यादेरपवित्रसंसर्गात्तद्दोषेण दुष्टत्वमित्याशंकामन्यथान्तरत्वेन श्लोकमवतारयति ।। एकस्येति ।। अनादित्वमेव साधयति ।। आदिरिति ।। तथापि किं स्यादित्याशंक्य कार्यत्वकर्तृत्वयोरभावः सिध्यतीत्याह ।। यदीति तथापि गुणापकर्षद्वारकोऽव्ययो भविष्यतीनेत्याह ।। नयेति ।। निरवयवत्वादवयवद्वारकस्य

एकस्यात्मनः सर्वदेहात्मत्वे न तद्दोषसंबंधे यथा तथेदमुच्यते ।। अनादित्वान्निर्गुणत्वात्परमात्मायमव्ययः ।। शरीरस्थोऽपि कौंतेय न
न करोति लिप्यते ।।३१।। अनादित्वादनादेर्भावोऽनादित्वमादिः कारणं तद्यस्य नास्ति तदनादि यदादिमत्तत्त्वेनात्मना व्येत्ययं त्वनादित्वान्निरवयवत्वान्निष्कलत्वान्न व्येति ।। तथा निर्गुणत्वात्सगुणो हि गुणव्ययाद्व्येत्ययं तु निर्गुणत्वाच्च न व्येतीति ।। परमात्मायमव्ययो नास्य व्ययो विद्यत इत्यव्ययः ।। यत एवमतः शरीरस्थोऽपि शरीरेष्वात्मन उपलब्धिर्भवतीति शरीरस्थ उच्यते । तथापि न करोति ।।

निर्गुणत्वाद्गुणद्वारकस्य च व्ययस्याभावेऽपि स्वभावतो व्ययः स्यादित्याशंक्याह ।। परमात्मेति ।। परमात्मनः स्वतो वा परतो वा व्ययाभावे फलितमाह ।। यत इति ।। स्वमहिम्नि प्रतिष्ठस्य कथं शरीरस्थत्वं न चाह ।। शरीरेष्विति ।। सर्वगतत्वेन सर्वात्मत्वेन च देहादौ स्थितोऽपि स्वतो देहाद्यात्मना न करोति कूटस्थत्वाद्देहादिस्थकर्मलिप्तत्वादिस्पर्शः ।।७।।७।।७।।छ।।

कर्तृत्वाभावेपिभोक्तृत्वंस्यादित्याशंक्याह॥ तदकरणादिति॥ तदेवोपपादयति॥ योहीति॥ परस्यकर्तृत्वादेरभावेकस्यनदिष्टमितिपृच्छति॥
कः पुनरिति॥ परस्मादन्यस्यकस्यचिज्जीवस्यकर्तृत्वादित्याशंकामनुवदति॥ यदीति॥ तस्मिन्पक्षेप्रक्रमभंगःस्यादितिदूषयति॥ ननरति॥
ईश्वरातिरिक्तजीवानंगीकारान्नोपक्रमविरोधोस्तीतिशंकते॥ अथेति॥ नहिप्रतीनकर्तृत्वादेरधिकरणंवक्तव्यमितिपूर्वेवाधाह॥ करति॥

तदकरणादेवनत्फलेननलिप्यते॥ योहिकर्तासकर्मफलेन।लिप्यतेऽयंतुकर्ताऽतोनफलेनलिप्यतइत्यर्थः॥ कःपुनर्देहेषुकरोतिलिप्यतेच॥
यदितावदन्यःपरमात्मनोदेहीकरोतिलिप्यतेचेतिततइदमनुपपन्नमुक्तंक्षेत्रज्ञेश्वरयोरेकत्वंक्षेत्रज्ञंचापिमांविद्धीत्याद्यथनास्तीश्व
रादन्योदेहीकःकरोतिलिप्यतेचेतिवाच्यंपरोवानास्तीति॥ सर्वथादुर्विज्ञेयंदुर्वाच्यंचेतिभगवत्प्रोक्तमौपनिषदंदर्शनंपरित्यक्तंवैशेषिकैः ॥
॥ सांख्याहनवौद्धैश्च॥५॥

परस्यैवकर्तृत्वाद्याधारत्वान्नास्तिवक्तव्यमित्याशंक्याह॥ परोवेति॥ नास्तीतिवाच्यमितिपूर्वेणसंबंधः॥ नहिकर्तृत्वादिभाक्त्वेपरस्यास्मदा॰
दिवदीश्वरत्वमितिभावः॥ परस्यान्यस्यवाकर्तृत्वाद्यवविशिष्टस्यातिरस्कोपीत्यादिश्रुतिमूलमपितानुंवक्तुंचाशक्यत्वात्साम्यमेवेतिपरीक्ष
कसंमत्योपसंहरति॥ सर्वथेति॥५॥

परस्पवस्तुतोऽकर्तुरभोक्तुश्चाविद्ययान्यथाव्यवहारादेयमेवभगवन्मतमितिपरिहरति॥ तत्रेति॥ तमेवपरिहारंप्रपंचयति॥ अविद्येति॥
व्यावहारिकेकर्तृत्वादावविशिष्टेपारमार्थिकमेवकिंनेष्यतेतत्राह॥ नत्विति॥ वास्तवकर्तृत्वाद्यभावेलिंगमुपन्यस्यति॥ इत्यतइति॥२९॥

तत्रायंपरिहारोभगवतास्वेनैवोक्तः स्वभावस्तुप्रवर्तत इत्यविद्यामात्रः स्वभावोहिकरोतिलिप्यतइतिव्यवहारोभवतिनतुपरमार्थ
तएकस्मिन्परमात्मनितदस्तीत्यतएतस्मिन्परमार्थसांख्यदर्शनेस्थितानांज्ञाननिष्ठानांपरमहंसपरिव्राजकानांतिरस्कृताविद्याव्य
वहाराणांकर्माधिकारोनास्तीतितत्रतत्रप्रदर्शितंभगवता॥ किमिवनकरोतिनलिप्यतइत्यत्रदृष्टांतमाह॥ यथासर्वगतंसौक्ष्म्यादा
काशंनोपलिप्यते सर्वत्रावस्थितोदेहेतथात्मानोपलिप्यते॥३२॥ यथासर्वगतंव्याप्यपिसत्सौक्ष्म्यात्सूक्ष्मभावादाकाशंखंनोप
लिप्यतेनसंबध्यते॥ सर्वत्रावस्थितोदेहेतथात्मानोपलिप्यते॥५॥ किंच॥ यथाप्रकाशयत्येकःकृत्स्नंलोकमिमंरविः॥ क्षेत्रंक्षेत्रीतथाकृ
त्स्नंप्रकाशयतिभारत॥३३॥ यथाप्रकाशयत्यवभासयतिएकःकृत्स्नंलोकमिमंरविःसविताआदित्यः तथातद्वन्महाभूतादिधृत्यंतं
तत्क्षेत्रंएकःसन्प्रकाशयति॥ कः क्षेत्रीपरमात्मेत्यर्थः। रविदृष्टांतोऽत्रात्मनउभयार्थोऽपिभवति॥ रविवत्सर्वक्षेत्रेष्वेकआत्माऽले
॥पकश्चेति॥

सूक्ष्मभावादप्रतिहतस्वभावत्वादित्यर्थः॥ नसंबध्यतेपंकादिभिरितिशेषः॥३१॥ नकरोतिनलिप्यतेचेत्यत्रहेतुत्वेनदृश्यधर्मैरस्पृष्टत्वं
हेतुमाह॥ किंचेति॥ दृष्टांतेनविवक्षितमंशंदर्शयति॥ रवीति॥ उभयविधमर्थमेवस्पष्टयति॥ रविवदिति॥३३॥ ५५॥ श्रीकृष्णायनमः ५५॥

ध्यायार्थं सफलमुपसंहरति ॥ समस्तेति ॥ विशेषं कौटस्थ्यपरिणामादिलक्षणं तदेवममानित्वादिनिष्टतपाद्येत्रज्ञयाथात्म्यविज्ञानवतः सर्वानर्थनि
वृत्त्यापरिशिष्टपुरुषार्थसिद्धिरिति सिद्धं ॥ ३४ ॥ हरिः ॐ तत्सदिति श्रीपरमहंसपरिव्राजकाचार्यश्रीमधुसूदनानंदपूज्यपादशिष्यश्रीमदानंदरत्ना

समस्ताध्यायार्थोपसंहारार्थः श्लोकः ॥ क्षेत्रक्षेत्रज्ञयोरेवमंतरं ज्ञानचक्षुषा ॥ भूतप्रकृतिमोक्षं च ये विदुर्यांति ते परं ॥ ३४ ॥ क्षेत्रक्षेत्र
ज्ञयोर्यथाव्याख्यातयोरेवं यथाप्रदर्शितप्रकारेणांतरमितरेतरवैलक्षण्यविशेषं ज्ञानचक्षुषा ॥ शास्त्राचार्योपदेशजनितमात्म
प्रत्यायिकं ज्ञानं तदेव चक्षुः तेन ज्ञानचक्षुषा ॥ भूतप्रकृतिमोक्षं च भूतानां प्रकृतिरविद्यालक्षणाऽव्यक्ताख्या तस्या ॥ भूतप्रकृते
र्मोक्षणमभावगमनं च ॥ ये विदुर्विजानंति यांति गच्छंति ते परं परमार्थतत्त्वं ब्रह्म न पुनर्देहमाददत इत्यर्थः ॥ इति श्रीगीताभाष्ये श्री
शंकरभगवत्पादकृतौ त्रयोदशोध्यायः ॥ १३ ॥ ९१ ॥ ॥

नंदविरचितायां श्रीमद्भगवद्गीताभाष्यटीकायां त्रयोदशोध्यायः ॥ १३ ॥ समाप्तः ॥ श्रीरामकृष्णायनमः ॥ श्रीसदाशिवायनमः ॥ ९१ ॥ ०॥०

श्रीगणेशाय नमः ॥ क्षेत्रक्षेत्रज्ञसंयोगस्य सर्वोत्पत्तिनिमित्तत्वमस्तातं ज्ञापयितुमध्यायांतरमवतारयन्नध्याययोरुस्याप्योस्यापकत्वरूपां सं- प २
गतिमाह ॥ सर्वमिति ॥ विधांतरेणाध्यायांतरारंभं सूचयति ॥ अथवेति ॥ तदेव वक्तुमुत्क्रमनुवदति ॥ ईश्वरेति ॥ प्रकृतिस्थत्वं पुरुषस्य प्रकृत्या
सहैक्याध्यासस्तस्यैव गुणेषु शब्दादिविषयेषु संगोभिनिवेशः षष्ठीधामाकांक्षां निक्षिप्य तदुत्तरस्यैं त्वेनाध्यायारंभे पूर्ववदेव पूर्वाध्याय
संबंधसिद्धिरित्याह ॥ कस्मिन्निति ॥ एवंक्तिनार्थेनास्यार्थस्य समुच्चयार्थश्चकारः ॥ परमितस्य भाविकालार्थत्वं व्यावर्तयितुं संगतिमाह ॥

हरिः ॥ ॐ सर्वं वस्तु जायमानं क्षेत्रक्षेत्रज्ञसंयोगात् उत्पद्यत इत्युक्तं तत्कथमिति तत्प्रदर्शनार्थं परं भूय इत्याद्यध्याय आरभ्यते ॥ अथ
वेश्वरपरतंत्रयोः क्षेत्रक्षेत्रज्ञयोर्जगत्कारणत्वं उच्यते न तु सांख्यानामिव स्वतंत्रयोरित्येवमर्थं प्रकृतिस्थत्वं गुणेषु च संगः संसारकारण- क्ष
मित्युक्तं ॥ कस्मिन्गुणे कथं संगः के वा गुणाः कथं ते व बध्नंतीति गुणेभ्यश्च मोक्षणं कथं स्यात् मुक्तस्य च लक्षणं वक्तव्यमित्येवमर्थं
च श्रीभगवानुवाच ॥ परं भूयः प्रवक्ष्यामि ज्ञानानां ज्ञानमुत्तमं ॥ यज्ज्ञात्वा मुनयः सर्वे परां सिद्धिमितो गताः ॥ १ ॥ परं ज्ञान
मिति व्यवहितेन संबंधः ॥ भूयः पुनः पूर्वेषु सर्वेष्वध्यायेषु असकृदुक्तमपि प्रवक्ष्यामि ॥ तच्च परं परवस्तुविषयत्वात् ॥
॥ किं तत् ॥ ज्ञानं ॥ ५१ ॥

परमिति भूयः शब्दस्याधिकार्थत्वमिह नास्तीत्याह ॥ पुनरिति ॥ पुनः शब्दार्थमेव विवृणोति ॥ सर्वेष्विति ॥ पुनरुक्तिस्तर्हीत्याशंक्य स्व
स्पत्वेन दुर्बोधत्वात्पुनर्वचनमर्थवदित्याह ॥ तच्चेति ॥ विशेष्यं प्रश्नद्वारा निर्दिशति ॥ किं त[illegible]दिति ॥ ५१ ॥ श्रीरामचंद्राय नमः ॥ ५१ ॥

गी॰भा॰टी॰ ७१॥

निर्धारणार्थे षष्ठीमादाय प्रकर्षं दर्शयति ॥ सर्वेषामिति ॥ परमुत्तममिति पुनरुक्तिमाशंक्य विषयफलभेदान्मैवमित्याह ॥ उत्तमेति ॥ ज्ञानं
रोत्तमेत्याशंक्य ज्ञानशब्देनामानित्वादीनामुक्तत्वात्तन्मध्ये च ज्ञानस्य साध्यत्वेनोत्तमत्वात्तत्र तस्य वक्तव्यतेत्याशंक्याह ॥ ज्ञानानामिति ॥ नामानि म२
त्वादीनां ग्रहणमिति विशेषः ॥ इतिशब्दादूर्ध्वं पूर्ववदेव शेषो द्रष्टव्यः ॥ यथोक्तज्ञानापेक्षयापि कुतोऽस्य ज्ञानस्य प्रकर्षस्तत्राह ॥ ज्ञानीति ॥ स्तुति
फलमाह ॥ श्रोतृबुद्धीति ॥ ज्ञानं ज्ञात्वेति ज्ञानस्य ज्ञेयत्वोपगमादनवस्थेत्याशंक्याह ॥ प्राप्येति ॥ मुनिशब्दस्य चतुर्थाश्रमविषय

सर्वेषां ज्ञानानामुत्तमं उत्तमफलत्वात् ॥ ज्ञानानामिति नामानित्वादीनां किं तर्हि यज्ञादिज्ञेयवस्तुविषयाणामिति ॥ तानि
न मोक्षायेदं तु मोक्षायेति परोत्तमशब्दाभ्यां स्तौति श्रोतृबुद्धिप्रसादनार्थं यज्ज्ञानं [illegible] आत्मज्ञानं ज्ञात्वा प्राप्य मुनयः संन्यासि
नो मननशीलाः सर्वे परां सिद्धिं मोक्षाख्यां इतोऽस्माद्देहबंधनात् [illegible]ः ऊर्ध्वं गताः प्राप्ताः ॥१॥ तस्याश्च सिद्धेरैकांतिक
त्वं दर्शयति ॥ इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः ॥ सर्गेऽपि नोपजायंते प्रलये न व्यथंति च ॥२॥ इदं ज्ञानं यथोक्त
माश्रित्य ज्ञानसाधनमनुष्ठायेत्येतत् मम परमेश्वरस्य साधर्म्यं ॥५

आ॰१४॥
२७१॥ रामः॥

त्वे तन्मात्रादेव ज्ञानायोगात्कुतस्तेषां
मुक्तिरित्याशंक्याह ॥ मननेति ॥ सिद्धेरात्यंतिकत्वं परामिति विशेषणाद्यावर्त्यमुक्तित्वमाह ॥ मोक्षाख्यामिति ॥ देहाख्यस्य बंधनस्याध्यक्षत्वमाह ॥ अस्मादि
ति ॥ ज्ञानफलस्य कर्मफलवैलक्षण्यमाह ॥ तस्याश्चेति ॥ कथं ज्ञानाश्रयणं तद्धेतुश्रवणादिसामग्रीसंपत्तिद्वारेत्याह ॥ ज्ञानेति ॥ ५ ॥

साधर्म्यं गोगवयप्योरिव विद्वदीश्वरयोरपि भेदः स्यादित्याशंक्याह ॥ मत्स्वरूपतामिति ॥ साधर्म्यस्य मुख्यत्वे भेदध्रौव्याद्गीताशास्त्रे विरोधः ॥ स्यादित्याह ॥ नत्विति ॥ ज्ञानस्कृतयेन फलस्य विवक्षितत्वाच्च नात्र सारूप्यमिष्टमित्याह ॥ फलत्वेति ॥ सारूप्ये धीफलत्वं हित्वाध्यानफलमप्र स्कृतं प्रसज्येतेत्यर्थः ॥ ईश्वरात्मतां गतानामवान्तरसर्गादौ जन्माद्यभावेपि महासर्गादौ जन्म भविष्यतीत्याशंक्याह ॥ सर्गेपीति ॥ १ ॥ ज्ञान० स्कृत्यानदमिसुखायावहितचेतसे विवक्षितमर्थमाह ॥ क्षेत्रेति स्वरूपत्वेन स्वभर्तृत्वं वारयति ॥ मदीयेति ॥ ऐश्वरीचित्पुंलिंगं वारयति ॥

मत्स्वरूपतामागताः प्राप्ता इत्यर्थः ॥ ननु समानधर्मता साधर्म्यं क्षेत्रज्ञेश्वरयोर्भेदाऽनभ्युपगमान्न गीताशास्त्रे ॥ फलत्वादस्यार्थं स्कृतस्यार्थ उच्यते ॥ सर्गेऽपि सृष्टिकालेऽपि नोपजायन्ते ॥ नोत्पद्यन्ते प्रलये ब्रह्मणोऽपि विनाशकाले न व्यथन्ति च न व्यथामापद्यन्ते न च लीयन्त इत्यर्थः ॥ क्षेत्रक्षेत्रज्ञसंयोग ईदृशो भूतकारणमित्याह ॥ मम योनिर्महद्ब्रह्म तस्मिन्गर्भं दधाम्यहं ॥ संभवः सर्वभूतानां ततो भवति भारत ॥ ३ ॥ मम स्वभूता मदीया माया त्रिगुणात्मिका प्रकृतिर्योनिः ॥ सर्वभूतानां सर्वकार्येभ्यो महत्त्वाद्भरणाच्च स्वविकाराणां महद्ब्रह्मेति च योनिरे[illegible]व विशिष्यते ॥ ३ ॥ ० ॥

त्रिगुणात्मिकेति ॥ सांख्यीयप्रकृति[illegible]रपि मदीयेति व्यावर्तितां योनिशब्देन सर्वाणि भवनयोग्यानि कार्याणि प्रत्युपादानत्वमभिप्रेतमित्याह ॥ सर्वभूतानामिति ॥ प्रकृतेर्महत्त्वं साधयति ॥ सर्वेति ॥ सर्वकार्यव्याप्तिमादाय योनावेव ब्रह्मशब्दो नतिंग वेष [illegible] हद्ब्रह्मेत्यर्थांतरं किंचिदित्याशंक्याह ॥ योनिरिति ॥ ३ ॥ श्रीरामाय वासुदेवाय नमो नमः ॥ श्रीकृष्णाय नमो नमः ॥

गी०भा०टी० ७२॥

ऽगन्तुगर्भमित्यादि व्याचष्टे ॥ तस्मिन्निति ॥ ईदृशस्य क्षेत्रक्षेत्रज्ञसंयोगस्य भूतकारणत्वमिति वक्तुमुपक्रम्य किमिदमन्यथा दर्शितमित्याशंक्याह
ममेति ॥ गर्भशब्दितोक्तसंयोगस्य फलं दर्शयति ॥ संभवइति ॥ आदिकर्तासभूतानां तिनिस्पष्टयाहिरण्यगर्भकार्यत्वावगमाद्भूतानां कथं
यथोक्तगर्भाधाननिमित्तत्वमित्याशंक्याह ॥ हिरण्यगर्भेति ॥३॥ ननु कथमुक्तकारणतुरो येन हिरण्यगर्भोद्भवमस्युपेस भूतानां

तस्मिन्महति ब्रह्मणि योनौ गर्भं हिरण्यगर्भस्य जन्मनो बीजं सर्वभूतजन्मकारणं बीजं दधामि निक्षिपामि । क्षेत्रक्षेत्रज्ञप्र
कृतिद्वयशक्तिमानीश्वरोऽहमविद्याकामकर्मोपाधिस्वरूपानुविधायिनं क्षेत्रज्ञं क्षेत्रेण संयोजयामीत्यर्थः । संभवउत्पत्तिः सर्वभूतानां
ब्रह्मादिस्थावरान्तानां हिरण्यगर्भोत्पत्तिद्वारेण ततस्तस्माद्गर्भाधानाद्भवति भारत ॥३॥ सर्वयोनिषु कौन्तेय मू
र्तयः संभवन्ति याः ॥ तासां ब्रह्म महद्योनिरहं बीजप्रदः पिता ॥४॥ देवपितृमनुष्यपशुमृगादिसर्वयोनिषु हे कौन्तेय मूर्तयो
देहसंस्थानलक्षणा मूर्छिताङ्गावयवा मूर्तयः संभवन्ति यास्तासां मूर्तीनां ब्रह्म महत् सर्वावस्थं योनिः कारणमहमीशो
रः बीजप्रदो गर्भाधानस्य कर्ता पिता ॥४॥ श्रीभगवान् ॥

आ०१४॥ २७२॥रामः॥

२८ मुत्पत्तिरस्यन्ते देवादिजातिभेदे देहविशेषाणां कारणान्तरसंभवात्तत्राह ॥ सर्वयोनिष्विति ॥ न तत्र हेत्वं नरप्रतिभासे कुतोऽस्य हे
तुत्वमित्याशंक्य तत्तद्रूपेणास्यैवावस्थानादित्याह ॥ सर्वावस्थमिति ॥४॥ एवं ब्रह्मणैव क्षेत्रक्षेत्रज्ञसंयोगाज्जगदुत्पत्तिं दर्शयित्वा
॥५॥ ताञ्चेवाविद्यया संसरतीत्युक्तं ॥५॥ ण२

इदानीमध्यायादावुक्तमाकांक्षाद्वयमनन्तरश्लोकेनोत्तरमाह॥ के गुणा इति॥ सत्वादिषु कथं गुणशब्दप्रवृत्तिरित्याशंक्य परतंत्रत्वादित्याह॥ गुणा इतीति॥ रूपादिष्विव गुणशब्दः सत्वादिषु द्रव्याश्रितत्वं निमित्तीकृत्य किं न स्यादित्याशंक्य प्रकृत्यात्मकानां तेषां सर्वाश्रयत्वान्नैवमित्याह॥ न रूपादिवदिति॥ गुणानां प्रकृतेश्च रूपगुणकेरन्यत्वे कुतस्तेषां प्रकृत्यात्मकत्वमित्याशंक्याह॥ न गुण इति॥ अं

वा त्यंतभेदे गवाश्ववत्तद्भावासंभवादित्यर्थः भेदाभेदे च तद्भावासंभवादिविशेषाकुलत्वे सगुणपरिभाषेत्याशंक्याह॥ तस्मादिति॥ क्षे

के गुणाः कथं बध्नंतीत्युच्यते॥ सत्वं रजस्तम इति गुणाः प्रकृतिसंभवाः। निबध्नंति महाबाहो देहे देहिनमव्ययं॥५॥ सत्वं रजस्तम इत्येवंनामानो गुणा इति पारिभाषिकः शब्दो न रूपादिवत् द्रव्याश्रितः न गुणगुणिनोरन्यत्वमत्र विवक्षितं॥ तस्माद्गुणा इव नित्यपरतंत्राः क्षेत्रज्ञं प्रत्यविद्यात्मकत्वात्॥ क्षेत्रज्ञं निबध्नंतीव तमास्पदीकृत्यात्मानं प्रतिलभंते इति निबध्नंतीत्युपचर्यते॥ ते च प्रकृतिसंभवाः भगवन्मायासंभवाः निबध्नंतीव॥५॥ श्रीगणाधिपतये नमः॥ श्रीरामः

त्रज्ञं प्रतीति नित्यपारतंत्र्ये हेतुमाह॥ अविद्येति॥ के गुणा इत्यस्योत्तरमुक्त्वा कथं बध्नंतीत्यस्योत्तरमाह॥ क्षेत्रज्ञमिति॥ तदेवोपपादयति॥ तमास्पदीकृत्येति॥ संभवत्यस्मादिति संभवः प्रकृतिः संभवो येषां ते तथेति प्रकृतानां गुणानां प्रकृत्यात्मकत्वमाह॥ [illegible]तिसांख्यीयां प्रकृतिं प्रधानाख्यां व्यावर्तयति॥ भगवदिति॥ ५॥ श्रीरामचंद्राय नमः॥ श्रीशंकरादिगुरवे नमः॥

०भा०टी०
७३॥

एवकारानुबंधेननितरांवध्नंतीत्यविकारवत्तयोपदर्शयंतीतिक्रियापदंव्याख्यायमहाबाहुपदंव्याचष्टे॥महांताविति॥देहवंतंदेहमात्मानंम
स्यानंदेहस्वामिनमित्यर्थः॥कूटस्थस्यकथंवध्यमानत्वमित्याशंक्यकुर्यान्मेरावणुधियमितिन्यायेनमायामाहात्म्यमिदमित्याह॥अव्ययमि
ति॥स्वतोधर्मतोवाव्ययरहितमित्यपेक्षायामाह॥अव्ययत्वंचेति॥५॥लिप्यतेनसपापेनेत्यनेनविरुद्धमिदंनिबध्नंतीतिवचनमितिशंक
ते॥नन्विति॥एवकारानुबंधेनक्रियापदंव्याचक्षाणैरस्माभिरस्यचोद्यस्यपरिहृतत्वान्मैवमित्याहपरिहृतमिति॥किंलक्षणोगुणः

हेमहाबाहोमहांतौसमर्थतराबाजानुप्रलंबौबाहूयस्यसमहाबाहुःहेमहाबाहो।देहेशरीरेदेहिनंदेहवंतमव्ययमस्मिन्शास्त्रे
प६ तिद्द अव्ययत्वंचोक्तमनादित्वादित्यादिश्लोकेन॥ननुदेहीनलिप्यतइत्युक्तंतत्कथमिहनिबध्नंतीत्यन्यथोच्यते॥परिहृतमस्माभिरिव
शब्देननिबध्नंतीवेति॥तत्रसत्त्वंनिर्मलत्वात्प्रकाशकमनामयंसुखसंगेनबध्नातिज्ञानसंगेनचानघ॥६॥तत्रसत्त्वादी
नांसत्त्वस्यैवतावत्लक्षणमुच्यतेनिर्मलत्वात्स्फटिकरवमणिःप्रकाशकमनामयंनिरुपद्रवंसत्त्वंतन्निबध्नाति॥५

आ०१४॥
२७३॥राम॥

केनबध्नातीत्यपेक्षायामाह॥तत्रेति॥निर्धारणार्थतयासप्तमींव्याचष्टे॥तत्रसत्त्वादीनामिति॥पुनस्तत्रेत्यनुवादमात्रं॥निर्म
लत्वंस्वच्छत्वंआवरणक्षमत्वंतस्मात्प्रकाशकंचैतन्याभिव्यंजकंनिरुपद्रवमितिनिर्मलत्वंसत्सुखस्यापिव्यंजकमित्यर्थः॥

केनद्वारेणतदात्मानंनिबध्नातीतिपृच्छति॥कथमिति॥सुखसंगेनबध्नातीत्युत्तरंनदेवविवृणोति॥सुख्यहमित्यादिना॥मुख्यसुखस्याभि
व्यंजकःसत्वपरिणामोत्रविषयभूतःसुखमुच्यतेसंश्लेषापादनमेवविशदयति॥मृषैवेति॥किमिति मृषैवेतिविशेषणंसंगस्यवस्तुत्व
संभवादित्याशंक्याह॥सैषेति॥नत्विच्छासंगोऽभिनिवेशश्चेत्सेकोर्थस्तत्रेच्छादेरात्मधर्मत्वात्किमविद्ययेत्याशंक्यमनोधर्मत्वादिच्छादेर्ना
त्मधर्मत्वेनेत्याह॥नहीति॥इच्छादेरनात्मधर्मत्वेकिंप्रमाणमित्याशंक्याह॥इच्छादिचेति॥तस्मात्तद्धर्मत्वासंभवेफलितमाह॥अतइति॥संजयती

कथं॥सुखसंगेनसुख्यहमितिविषयभूतस्यसुखस्यविषयिण्यात्मनिसंश्लेषापादनेनैवसुखंसंजातमिति॥मृषैवसुखसंजननं
सैषाऽविद्यानहिविषयधर्मोविषयिणोभवति॥इच्छादिचधृत्यंतंक्षेत्रस्यैवविषयस्यधर्मइत्युक्तंभगवता॥अतोऽविद्ययैवस्व
कीयधर्मभूतयाविषयविषय्यविवेकलक्षणयाऽस्वात्मभूतेसुखेसंजयतीवासक्तंसक्तमिवकरोत्यसुखिनंसुखिनमिव॥६॥

ति सत्वमितिशेषः॥इवकारप्रयोगेहेतुमाह॥अविद्ययेति॥तस्याःवस्तुतोनात्मसंबंधस्तथापिसंबंधांतराभावादध्यासात्तस्यात्मधर्मत्व
मापाद्यदृष्टत्वमाचष्टे॥स्वकीयेति॥वृत्तिमदंतःकरणस्यविषयत्वादात्मनःसाधकत्वेनतद्विषयित्वेपितेनतदविवेकरूपाविद्येतितत्स्वरूप
माह॥विषयेति॥यथोक्ताविद्यामाहात्म्यमिदंयदस्वरूपेतद्धर्मेचसक्तिसंपादनमित्याह॥अस्वेति॥तदेवस्पष्टयति॥सक्तमिवेति॥६॥०

भ०टी०
७८॥

प्रकारांतरेण सत्वस्य निबंधकत्वमाह ॥ तत्रेति ॥ ज्ञापनेनेनेति सत्वपरिणामो ज्ञानं तेन ज्ञान्यहमिति विपरीताभिमानेन सत्वमात्मानं निबध्नातीत्याह ॥
नमित्यादिना ॥ विपक्षे दोषमाह ॥ आत्मेति ॥ स्वाभाविकत्वेन प्राप्तत्वान्नत्वस्यतः संगायोगात्तद्द्वारा बंधे च तन्निवृत्त्यनुपपत्तेर्नात्मधर्मत्वमित्य
र्थः ॥ ज्ञानैश्वर्यादावपि क्षेत्रधर्मसंगस्य पूर्ववद्बाविघकत्वं सूचयति ॥ सुखइवेति ॥ पापादिदोषहानस्यैवात्र शास्त्रेऽधिकार इति द्योतयति ॥
अनघेति ॥ ६ ॥ रजः किंलक्षणं कथं वा पुरुषं निबध्नातीत्याशंक्याह ॥ रज इति ॥ रज्यते संसज्यतेऽनेन पुरुषो दृश्यैरिति रागोऽसावात्मा ३

तथा ज्ञानसंगेन च देहिनं ॥ ज्ञानमिति सुखसाहचर्यात् क्षेत्रस्यैव विषयस्यांतःकरणस्य धर्मो नात्मनः ॥ आत्मधर्मत्वे संगानुप
पत्तेर्बंधानुपपत्तेश्च ॥ सुखज्ञानादौ संगो मंतव्यो हेऽनघ अघशून्य ॥ रजो रागात्मकं विद्धि तृष्णासंगसमुद्भवं ॥ तन्निबध्ना
ति कौंतेय कर्मसंगेन देहिनं ॥ ७ ॥ रजो रागात्मकं ॥ रंजनात् रागो गैरिकादिवत् रागात्मकं विद्धि जानीहि तृष्णासंगसमुद्भ
वं तृष्णा अप्राप्ताभिलाषः ॥ आसंगः प्राप्ते विषये मनसः प्रीतिलक्षणः संश्लेषः तृष्णासंगसमुद्भवं तृष्णासंगयोः समु
द्भवं तृष्णासंगसमुद्भवं तन्निबध्नाति तद्रजः कौंतेय कर्मसंगेन ॥ ८ ॥ श्रीरामकृष्णाय नमः ॥ राम राम राम राम रामः ॥

अ०१४॥
२७६॥ राम॥

स्येति रागात्मकं रजो जानीहीत्याह ॥ रंजनादिति ॥ समुद्भवस्तस्मादिति समुद्भवं तृष्णा चासंगश्च तृष्णासंगौ तयोः समुद्भवस्तमिति विग्रहं कृ
त्वा कार्यद्वारा रजो विवक्षुस्तृष्णासंगयोरर्थभेदमाह ॥ तृष्णेत्यादिना ॥ रजोलक्षणमुक्त्वा निबंधनप्रकारमाह ॥ तद्रजइति ॥ ७ ॥ ०

कर्मसंगंविभजते ॥ दृष्टेति ॥ अकर्तारमेवपुरुषंकरोमीत्यभिमानेनप्रवर्तयतीत्यर्थः ॥७॥ तमस्तर्हिकिंलक्षणंकथंवापुरुषंनिबध्नाति
तत्राह ॥ तमस्त्विति ॥ गुणानांप्रकृतिसंभवत्वाविशेषेपितमसोऽज्ञानजत्वविशेषणंतद्विपरीतस्वभावानर्थोपेतेरितिमत्वाह ॥ अज्ञा
नादिति ॥ मुख्यंतिहितनाहितेनविविच्यंतप्यतेनेतिमोहनंविवेकप्रतिबंधकमितिकार्यद्वारातमेवनिर्दिशति ॥ मोहनमित्यादिना ॥ लक्ष
णमुक्त्वातमसोबंधकरत्वंदर्शयति ॥ प्रमादेति ॥ कार्यंनिरासक्तेनयाचिकीर्षितस्यकर्तव्यस्याकरणंप्रमादः निरीहत्वयोत्साहप्रतिबं

दृष्टादृष्टार्थेषुकर्मसुसंजननंतत्परताकर्मसंगस्तेनबध्नातिरजोदेहिनं ॥७॥ तमस्त्वज्ञानजंविद्धिमोहनंसर्वदेहिनांप्रमादा
लस्यनिद्राभिस्तन्निबध्नातिभारत ॥८॥ तमस्तृतीयोगुणोऽज्ञानजमज्ञाऽनाज्ञानंअज्ञानजंविद्धिमोहनंमोहकरमविवेककरं ॥
सर्वदेहिनांसर्वेषांदेहवतां ॥ प्रमादालस्यनिद्राभिः प्रमादश्चालस्यंचनिद्राचप्रमादालस्यनिद्रास्ताभिः प्रमादालस्यनिद्राभिः
तत्तमोनिबध्नातिभारत ॥ पुनर्गुणानांव्यापारःसंक्षेपतउच्यते ॥ सत्वंसुखेसंजयतिरजःकर्मणिभारत ॥ ज्ञानमावृत्यतुतमः
॥ प्रमादेसंजयत्युत ॥९॥ सत्वंसुखेसंजयतिसंश्लेषयति ॥९॥

धश्चालस्यंस्वापोनिद्राताभिरात्मानमविकारमेवतमोपिविकारयतीत्यर्थः ॥८॥ उक्तानांमध्येएकस्मिन्कार्येकस्यगुणस्योत्कर्षस्तत्राह ॥ पुनरि
ति ॥ सुखेसाध्येविषयेसमुत्कृष्यतेसत्वमित्याह ॥ सत्वमिति ॥ संजयतिपस्यार्थमाह ॥ संश्लेषयतीति ॥९॥ श्रीरामायनमः ॥ (९॥
द

सा०टी
७५॥

शिष्टाभ्यो रजः समुत्कृष्यत इत्याह॥ रज इति॥ प्रमादे प्राधान्यं तमसो दर्शयति॥ ज्ञानमिति॥ ९॥ इतरेतराविरोधेन वा सत्वादयो गुणा युगपदुत्कृष्यन्ते विरोधेन वा क्रमेणेति संदेहा[illegible]ति॥ उक्तमिति॥ सत्वोत्कर्षार्थिनामितराभिभवार्थं क्रमापेक्षामा[illegible]श्रित्योत्तरमाह॥ १०॥ उच्यत इति॥ सत्वाभिवृद्धिमेव विवृणोति॥ तदेति॥ रजस्तमसोस्तिरोधानदशायामिति यावत्॥ रजसो वृद्धिप्रकारं तत्कार्यं

उ

रजः कर्मणि भारत संजयति प्रवर्त्तते॥ ज्ञानं सत्वकृतं विवेकमावृत्याच्छाद्य तु तमः स्वेनावरणात्मना प्रमादे संजयत्युत अपि प्रमादो नाम प्राप्तकर्तव्यताऽकरणं॥ उक्तं कार्यं कदा कुर्वन्ति गुणा इत्युच्यते॥ रजस्तमश्चाभिभूय सत्वं भवति भारत॥ रजः सत्वं तमश्चैव तमः सत्वं रजस्तथा॥ १०॥ रजस्तमश्चोभावपि अभिभूय सत्वं भवत्युद्भवति वर्द्धते यदा तदा लब्धात्मकं सत्वं स्वकार्यं ज्ञानसुखाद्यारभते॥ तथा रजो गुणः सत्वं तमश्चैवोभावप्यभिभूय तथैव वर्द्धते यदा तदा कर्म तृष्णादि स्वं कार्यमारभते॥ तमआख्यो हि गुणः सत्वं रजश्चोभावपि अभिभूय तथैव वर्द्धते यदा तदा ज्ञानावरणादि स्वं कार्यमारभते॥ यदा यो गुण उद्भूतो भवति तदा तस्य किं लिंगमित्युच्यते॥ सर्वद्वारेषु देहेस्मिन्प्रकाश उपजायते॥ ज्ञानं यदा तदा विद्याद्विवृद्धं सत्वमित्युत॥ ११॥

आ१४॥
२७५॥राम॥

चः दर्शयति तथेति॥ तमसोपि विवृद्धिं तत्कार्यं च निर्दिशति॥ तम इति॥ १०॥ उत्तरश्लोकत्रयस्याकांक्षां दर्शयति॥ यदेति॥ सत्वोद्भावलिंगप्रदर्शनार्थमनन्तरश्लोकमुत्थापयति॥ उच्यत इति॥ ९॥ ॥ श्रीरामचंद्राय नमः॥ श्रीगुरुभ्यो नमः॥

सर्वद्वारेष्वित्यादिसप्तमीनिमित्तेनेतव्याउतशब्दोपिशब्दपर्यायोप्यतिशयार्थः॥११॥अतिशयेनोद्भूतस्यरजसोलिंगमाह॥रजसइतिउपक्रम
पर्यायस्यारंभस्यविषयंपृच्छति॥कस्येति॥काम्यानिनिषिद्धानिचलौकिकानिकर्माणिविषयत्वेननिर्दिशति॥कर्मणामिति॥अनुपशमोबा
ह्यांतःकरणानामितिशेषः॥लोभाद्युपलंभाद्रजोवृद्धिर्बोद्धव्येतिभावः॥१२॥उद्भूतस्यतमसोलिंगमाह॥३॥अप्रकाशइति॥सर्व=

सर्वद्वारेष्वात्मनउपलब्धिद्वाराणिश्रोत्रादीनिसर्वाणिकरणानितेषुसर्वद्वारेष्वंतःकरणस्यबुद्धेर्वृत्तिःप्रकाशोदेहेऽस्मिन्प्रकाशशब्दवाच्यः

उपजायतेतदैवज्ञानंयदैवप्रकाशोज्ञानाख्यउपजायते॥तदाज्ञानप्रकाशेनलिंगेनविद्यात्विवृद्धंउद्भूतंसत्त्वंमित्युताऽपि॥रजसउ
द्भूतस्येदंचिह्नं॥लोभःप्रवृत्तिरारंभःकर्मणामशमःस्पृहा॥रजस्येतानिजायंतेविवृद्धेभरतर्षभ॥१२॥लोभःपरद्रव्यादित्साप्रवृत्तिः

प्रवर्तनंसामान्यचेष्टा॥आरंभःउद्यमःकस्यकर्मणांअशमोऽनुपशमोहर्षरागादिप्रवृत्तिःस्पृहासर्वसामान्यवस्तुविषयातृष्णा॥रजसि
गुणेविवृद्धेएतानिलिंगानिजायंतेहेभरतर्षभ॥१२॥अप्रकाशोऽप्रवृत्तिश्चप्रमादोमोहएवच॥तमस्येतानिजायंतेविवृद्धेकुरुनंदन॥
अप्रकाशोऽविवेकोऽत्यंतंअप्रवृत्तिश्चप्रवृत्त्यभावस्तत्कार्यंप्रमादोमोहएवच॥अविवेकोमूढतेत्यर्थः॥तमसिगुणेविवृद्धेएता
निलिंगानिजायंतेहेकुरुनंदन॥१३॥

थैवतानकर्मणोरभावोविशेषणाभ्यामुक्तस्तत्कार्यमितितच्छब्दोदर्शितोविवेकार्थःप्रमादोव्याख्यातोमोहोवेदितव्यस्याप्य
ध्यवेदनं॥तस्येवप्रौढपांतरत्वमाह॥अविवेकइति॥अविवेकातिशयादिनाप्रवृद्धंतमोऽज्ञेयमितिभावः॥१३॥श्रीरामायनमः॥

कं कार्य

टी०।
७५

सात्विकादीनांउद्भवानोपारलौकिकंफलविभागमुदाहरति॥मरणेति।संगःसक्तिःरागस्तस्मात्तद्द्वारातदनुष्ठानद्वारालभ्यमान।
त्यर्थः।गौणंसत्वादिगुणप्रयुक्तमितियावत्॥तत्रसत्वगुणवृद्धिकृतंफलविशेषमाह॥यदेति॥मलरहितान्रजस्तमसोरभ्यन्तर
स्योद्भवोमलस्तेनरहितानागमसिद्धान्ब्रह्मलोकादीनित्यर्थः॥१४॥रजःसमुद्रेकेमृतस्यफलविशेषंदर्शयति॥रजसीति॥जायतेश

मरणद्वारेणापियत्फलंप्राप्यतेतदपिसंगहेतुकंसर्वंगौणमेवेतिदर्शयन्नाह॥यदासत्वेप्रवृद्धेतुप्रलयंयातिदेहभृत्॥त
दोत्तमविदांल्लोकानमलान्प्रतिपद्यते॥१४॥यदासत्वेप्रवृद्धेउद्भूतेतुप्रलयंमरणंयातिप्रतिपद्यतेदेहभृदात्मा॥त
दाउत्तमविदांमहदादितत्वविदांरसेनतल्लोकानमलान्मलरहितान्॥प्रतिपद्यतेप्राप्नोतिरसेनतु॥१४॥रजसिप्रलयं
गत्वाकर्मसंगिषुजायते॥तथाप्रलीनस्तमसिमूढयोनिषुजायते॥१५॥रजसिप्रवृद्धेप्रलयंमरणंगत्वाप्राप्यकर्मसं
गिषुजायते॥कर्मण्यासक्तियुक्तेषुमनुष्ये[illegible]सधतेतथा॥तद्वदेवप्रलीनोमृतस्तमसिविवृद्धेमूढयोनिषुपश्वा
दियोनिषुजायते॥अतीतश्लोकार्थस्यैवसंक्षेपउच्यते॥कर्मणःसुकृतस्याहुःसात्विकंनिर्मलंफलं॥रजसस्तुफलं
दुःखमज्ञानंतमसःफलं॥१६॥श्रीरामचंद्रायनमः॥

ष
आ०१४।
२७६।।रामः

रीरंगृह्णातीत्यर्थः।यथासत्वेरजसिचप्रवृद्धेमृतोब्रह्मलोका
दिषुमनुष्यलोकेचजायतेदेवादिषुमनुष्येषुचजायतेतथेत्याह॥तदिति॥१५॥उद्भवान्मुक्तासात्विकादीनांकर्मणांफलमाह॥अ
॥तीतेति॥

सुकृतस्य शोभनस्य कृतस्य पुण्यस्येत्यर्थः ॥ सात्विकस्याशुद्धिरहितस्येत्यर्थः ॥ सात्विकं सत्वेन निर्वृत्तं निर्मलं रजस्तमः समुद्भवान्मलान्निष्क्रांतं रजः शब्दस्य राजसे कर्मणि कुतो वृत्तिरित्यत्राह ॥ कर्मेति ॥ दुःखमेव दुःखबहुलं सुदुःखमेवेत्यर्थः कथमित्थं व्याख्यापनेनत्राह ॥ कारणेति ॥ पापमिश्रस्य पुण्यस्य रजोनिमित्तस्य कारणत्वात्तदनुरोधात्फलमपि रजोनिमित्तं यथोक्तं युक्तमेवेत्यर्थः ॥

कर्मणः सुकृतस्य सात्विकस्येत्यर्थः ॥ आहुः शिष्टाः सात्विकमेव निर्मलं फलमिति ॥ रजसस्तु राजसस्य कर्मण इत्यर्थः ॥ कर्माधिकारात् फलमपि दुःखमेव कारणानुरूप्यात् राजसमेव ॥ तथाऽज्ञानं तमसः तामसस्य कर्मणोऽधर्मस्य फलं पूर्ववत् किंच गुणेभ्यो भवति ॥ सत्वात्संजायते ज्ञानं रजसो लोभ एव च ॥ प्रमादमोहौ तमसो भवतोऽज्ञानमेव च ॥१७॥ सत्वात्सत्वात्मकात् संजायते समुत्पद्यते ज्ञानं । रजसो लोभ एव च ॥ प्रमादमोहौ प्रमादश्च मोहश्च प्रमादमोहौ उभौ तमसो भवतः ॥ अज्ञानमेव च भवति ॥ किंच ॥ ऊर्ध्वं गच्छंति सत्वस्था मध्ये तिष्ठंति राजसाः ॥ जघन्यगुणवृत्तस्था अधो गच्छंति तामसाः ॥१८

अज्ञानमविवेकप्रायं दुःखं तामसाधर्मफलमित्याह ॥ तथेति ॥१६॥ विहितप्रतिषिद्धत्वानि कर्माणि सत्वाद्दीनां लक्षणानि संक्षिप्य दर्शयति ॥ किंचेति ॥ ज्ञानं सर्वकर्मद्वारकं अज्ञानं विवेकाभावः ॥१७॥ सात्विकादिज्ञानकर्मफलान्युक्तान्यनुक्तसंग्रहार्थं सामान्येनोपसंहरति ॥ किंचेति ॥ वक्ष्यमाणफलद्वारापि सत्वादिसुज्ञानमित्यर्थः ॥१८॥

गी॰सा॰टी॰ स॰त्वगुणस्यचनंशोभनंज्ञानंकर्मवानत्रतिष्टंतीति॥तथाराजसारजोगुणनिमित्तेज्ञानेकर्मणिवानिरताः॥१८॥कस्मिन्गुणेकथमित्या
२७७॥ दिप्रश्नान्तत्याख्यायगुणेभ्योमोक्षणंकथमितिप्रश्नप्रत्याख्यानार्थंवृत्तानुवादपूर्वकंमिथ्याज्ञाननिवर्तकंसम्यग्ज्ञानंप्रस्तौति॥

ऊर्द्धंगच्छंतिदेवलोकादिषुउत्पद्यंतेसत्वस्थाःसत्वगुणवृत्तस्थाःमध्येतिष्टंतिमनुष्यलोकेषुराजसाःजघन्यगुणवृत्तस्थाः।जघ
न्यश्चासौगुणश्चेतिजघन्यगुणस्तमस्तस्यवृत्तंनिद्रालस्यादितत्रस्थिताजघन्यगुणवृत्तस्थास्तदाअधोगच्छंतिपश्वादिषूत्पद्यं
तेतामसाः॥पुरुषस्यप्रकृतिस्थत्वरूपेणमिथ्याज्ञानेनयुक्तस्यभोग्येषुगुणेषुसुखदुःखमोहात्मकेषुसुखीदुःखीमूढोऽ
हमस्मीत्येवंरूपोयःसंगस्तत्कारणंपुरुषस्यसदसद्योनिजन्मप्राप्तिलक्षणस्यसंसारस्येतिसमासेनपूर्वाध्यायेयदुक्तंतदिह
सत्वंरजस्तमइतिगुणाःप्रकृतिसंभवाइत्यारभ्यगुणस्वरूपंगुणवृत्तंस्ववृत्तेनचगुणानांबंधकत्वंगुणवृत्तनिबद्धस्यच
पुरुषस्यवागतिरित्येतत्सर्वंमिथ्याज्ञानंअज्ञानमूलंबंधकारणंविस्तरेणोक्त्वाऽधुनासम्यग्दर्शनान्मोक्षोवक्तव्यइत्याहभग
वान्॥नान्यंगुणेभ्यःकर्तारंयदाद्रष्टानुपश्यति॥गुणेभ्यश्चपरंवेत्तिमद्भावंसोऽधिगच्छति॥५॥१९॥श्रीभगवानः॥५

अ॰१४॥
२७७॥रामः

पुरुषस्येत्यादिना॥पुरुषस्यपागतिःसाचेतिशेषःमोक्षोगुणेभ्योविश्लेषपूर्वकोब्रह्मभावः॥५॥श्रीरामायनमः॥५॥॰०

सम्यग्ज्ञानोक्तिपरं श्लोकं व्याख्यातुं प्रतीकमादत्ते।। नान्यमिति।। सत्वादिकार्यविशेषस्य गुणशब्दस्य विवक्षितमर्थमाह।। कर्त्तेति।। विचानंन
र्यमनुशब्दार्थः।। अक्षरार्थमुक्त्वा पूर्वार्द्धस्यार्थिकमर्थमाह।। गुणाएवेति।। सर्वावस्थाः स्वतत्कार्यकरणाकारपरिणताइतियावत्।। सर्वक
र्मणां कायिकवाचिकमानसानां विहितप्रतिषिद्धानामित्यर्थः।। परं व्यतिरिक्तं व्यतिरेकमेव स्फोरयति।। गुणेति।। निर्गुणं ब्रह्मात्मानमित्यर्थः।।

नान्यं कार्यकरणविषयाकारपरिणतेभ्यो गुणेभ्यः कर्त्तारमन्यं यदा द्रष्टा विद्वान्सन्नानुपश्यति गुणा एव सर्वावस्थाः स १
र्वकर्मणां कर्त्तार इत्येवं पश्यति गुणेभ्यश्च परं गुणव्यापारसाक्षिभूतं निर्गुणं वेत्ति।। मद्भावं मम भावं वासुदेवत्वं वासुदे
वः सर्वमित्येवं पश्यन्स द्रष्टाधिगच्छति। प्राप्नोति।। कथमधिगच्छतीत्युच्यते।। गुणानेतानतीत्य त्रीन्देही देहसमुद्भवा
न्।। जन्ममृत्युजरादुःखैर्विमुक्तोऽमृतमश्नुते।।२०।। गुणानेतान्मायोत्क्राम्यातीत्य जीवन्नेवातिक्रम्य मायोपाधिभू
तान्त्रीन्देही देहसमुद्भवान्देहोत्पत्तिबीजभूतान्।।२०।। श्रीरामचंद्रायनमः।। श्रीलक्ष्म्यायनमः।।२०।। गुरुभ्योः।।

मद्भावं ब्रह्मात्मतामसौ प्राप्नोति ब्रह्मभावोऽस्याभिव्यज्यत इत्यर्थः।।१९।। अनर्थज्ञानमपोह्य विद्वान्ब्रह्मत्वं प्राप्नोतीत्येनतत्र द्वारावि
वृणोति।। कथमित्यादिना।। यथोक्तानित्येतद्व्याचष्टे।। मायेति।। मायैवोपाधिस्तद्भूतांस्तदात्मनः सत्वादीननर्थरूपानित्यर्थः।। एभ्यः।
गुणवर्तीति।। तैस्समुद्भवाः देहस्य समुद्भवाद्देहसमुद्भवास्तानिनिव्युत्सनिंगृहीत्वाव्याचष्टे।। देहोत्पत्तीति।।२०।। श्रीरामचंद्रायनमः।।

भ० टी
८ ॥ ॥

विद्यामयाद्गुणान्जीवन्नेवातिक्रम्याखिन्नस्तमेव विशिनष्टि ॥ जन्मेति ॥ पुरस्ताद्विस्तरेणोक्तस्य प्रसंगात्संक्षिप्तस्यास्य ज्ञानस्य फ
लमुपसंहरति ॥ एवमिति ॥ २० ॥ सम्यग्धीफलं गुणातिक्रमणपूर्वकममृतत्वमुक्तं श्रुत्वा मुक्तस्य लक्षणं वक्तव्यमिति प्रकृतं विवक्षित्वा प्रश्नमु
त्थापयति ॥ जीवन्नेवेति ॥ येव्याख्याताः सत्वादयो गुणास्तत्परिणाममहत्तानध्यासात्तानतिक्रांतः सन्कैर्लिंगैर्ज्ञातो भवतीति तानि वक्तव्यानि

प्र

जन्ममृत्युजरादुःखैर्जन्म च मृत्युश्च जरा च दुःखानि च तैर्जीवन्नेव मुक्तः सन् विद्वानमृतमश्नुते ॥ एवं मद्भावमधिगच्छतीत्यर्थः
जीवन्नेवैतान्गुणानतीत्यामृतमश्नुत इति प्रश्नबीजं प्रतिलभ्यार्जुन उवाच ॥ कैर्लिंगैस्त्रीन्गुणानेतानतीतो भवति प्रभो ॥
किमाचारः कथं चैतांस्त्रीन्गुणानतिवर्तते ॥ २१ ॥ कैर्लिंगैश्चिन्हैः स्त्रीनेतान् यथाव्याख्यातान्गुणानतीतोऽतिक्रांतो भवति प्र
भो ॥ किमाचारः कोऽस्याचार इति किमाचारः कथं केन च प्रकारेणैतान्त्रीँगुणानतिवर्तते ॥ ८१ ॥ श्रीरामचंद्राय नमः ॥ ० न्

टी ॥ आः
२७८ ॥ राम ॥

सिध्यर्थं सर्वमनुष्ठेयानि पश्चादयत्नलभ्यानि लिंगानि तानि कानीति पृच्छति ॥ कैरिति ॥ यथेष्टचेष्टाव्यावृत्त्यर्थं प्रश्नांतरं ॥ किमाचार इति ॥ ज्ञानस्य
गुणातीतोपायस्योक्तत्वादुपायप्रकारजिज्ञासया प्रश्नांतरं ॥ कथमिति ॥ २१ ॥ ८१ ॥ श्रीरामकृष्णाय नमः ॥ श्रीगुरुभ्यो नमः ॥ श्रीहरये नमः ॥ ०

प्रश्नस्वरूपमनूद्यतेनदुत्तरं दर्शयति ॥ गुणातीतस्येति ॥ दृष्टो भगवानिति संबंधः । किंरूपस्त्रिधाप्रयोगदर्शनात्प्रश्नद्वयार्थमितितूपलक्षणं प्रश्नत्र
यार्थमिति द्रष्टव्यं ॥ उत्तरमवतार्य अनंतरश्लोकतात्पर्यमाह ॥ एतावदिति ॥ तानि सम्यग्दर्शी न द्वेष्टीत्युक्तमेव स्पष्टयितुं निषेध्यमसम्यग्द   दू २
र्शिनो द्वेषं तेषु प्रकटयति ॥ ममेत्यादिना ॥ सम्यग्दर्शिनः सम्यक्प्रवृत्तेषु प्रकाशादिषु द्वेषाभावमुपसंहरति ॥ तदेवमिति ॥ न निवृ

गुणातीतस्य लक्षणं गुणातीतत्वोपायश्चार्जुनेन पृष्टोऽस्मिन् श्लोके प्रश्नद्वयार्थ प्रतिवचनं ॥ श्रीभगवानुवाच ॥ यत्तावत्कैर्लिं
गैर्युक्तो गुणातीतो भवतीति तत् शृणु ॥ प्रकाशं च प्रवृत्तिं च मोहमेव च पांडव ॥ न द्वेष्टि संप्रवृत्तानि न निवृत्तानि कांक्षति ॥ २२ ॥
प्रकाशं च सत्त्वकार्यं प्रवृत्तिं च रजःकार्यं । मोहमेव च तमःकार्यमित्ये तानि न द्वेष्टि संप्रवृत्तानि सम्यग्विषयभावेनोद्भूतानि ॥
मम तामसः प्रत्ययो जातस्तेनाहं मूढस्तथा राजसी प्रवृत्तिर्मे मोत्पन्ना दुःखात्मिका तेनाहं रजसा प्रवर्तितः प्रचलितः स्व
रूपात्कष्टं मम च वर्तते ॥ योऽयं स्वरूपावस्थानात् भ्रंशस्तथा सात्त्विको गुणः प्रकाशात्मा मां विवेकित्वमापादयन् सुखेन च
संजयन् मां बध्नातीति तानि न द्वेष्टि सम्यग्दर्शित्वेन । तदेवं गुणातीतो न द्वेष्टि संप्रवृत्तानि ॥ यथा च सात्त्विकादिः पुरुषः सत्वादि
कार्याण्यात्मानं प्रति प्रकाश्य निवृत्तानि कांक्षति न तथा गुणातीतो निवृत्तानि कांक्षतीत्यर्थः ॥ ५१ ॥

द्वै॰ सादि व्याचष्टे । यथा चेति ॥ तेषामनात्मीयत्वं सम्यक्पश्यन्नात्मानुकूलप्रतिकूलारोपणेन नोद्विजते तेभ्यश्च न स्पृहयतीत्यर्थः ॥ ५१ ॥ श्रीरा:

तुभयविसिद्धं गुणातीतस्य लक्षणमुक्तमित्याह ॥ एतन्नेति ॥ परप्रत्यक्षताभावं प्रपंचयति ॥ नहीति ॥ आश्रयो विषयः ॥ २२ ॥ कैर्लिंगै
न्गुणानित्यादि परिहृत्य द्वितीयं प्रश्नं परिहरति ॥ अथेति ॥ दृष्टांतं व्याचष्टे ॥ यथेति ॥ उपेक्षकस्य पक्षपातित्वायोगादित्यर्थः ॥ आ
मविदात्मनः कौटस्थ्यज्ञानेनासीनो निवृत्तकर्तृत्वाभिमानोऽप्रयतमानो भवतीति दार्ष्टांतिकमाह ॥ तथेति ॥ गुणातीतत्वोपाय

एतच्च परप्रत्यक्षं लिंगं किं तर्हि स्वात्मप्रत्यक्षत्वादात्मार्थमेवैतल्लक्षणं ॥ नहि स्वात्मविषयं द्वेषमाकांक्षां वा परः पश्यति ॥ छ ॥
अथेदानीं गुणातीतः किमाचार इति प्रश्नस्य प्रतिवचनमाह ॥ उदासीनवदासीनो गुणैर्यो न विचाल्यते ॥ गुणा वर्तंत इत्ये
वं योऽवतिष्ठति नेंगते ॥ २३ ॥ उदासीनवत् यथा उदासीनो न कस्यचित्पक्षं भजते तेन तथायं गुणातीतत्वोपायमार्गेऽवस्थि
त आसीनः आत्मवित् गुणैर्यः संन्यासी न विचाल्यते विवेकदर्शनावस्थानमदेनत् स्फुटीकरोति ॥ गुणाः कार्यकर
णविषयाकारपरिणता अन्योन्यस्मिन् वर्तंत इति योऽवतिष्ठति ॥ छ ॥ श्रीरामाः ॥ छ ॥

मार्गे ज्ञानमेव शब्दादिभिर्विषयैरस्पृष्टकूटस्थत्वज्ञानात्प्रच्यवनमाशंक्याह ॥ गुणैरिति ॥ उपनतानां विषयाणां रागद्वेषद्वारा प्रवर्त
कत्वमित्येतत्प्रपंचयति ॥ नेंगत इति ॥ योऽवतिष्ठति स गुणातीत इत्युत्तरत्र संबंधः ॥ छ ॥ श्रीरामलक्ष्मणप्रसन्नं ॥ छ ॥ श्री छ ॥

अव सर्वस्य तिष्ठतेरात्मनेपदे प्रयोक्तव्ये कथं परस्मैपदं इत्याशंक्याह ॥ छंदो भंगेति ॥ पाठांतरे तु वाधितानुवृत्तिमात्रमनुष्ठानं करणकारप गि
णतानां गुणानां विषयाकारपरिणतेषु प्रवृत्तिर्नेममेति पश्यन्नचलन्नयाकूटस्थदृष्टिमात्मनो न जहातीत्याह ॥ नेंगत इति ॥ २३ ॥ गुणातीतस्य
लिंगांतरमाह ॥ किंचेति ॥ तयोः समत्वं रागद्वेषानुत्पादकत्व पास्यकीयत्वाभिमानानास्पदत्वं प्रसंन्नत्वं स्वास्थ्यादप्रच्युतिनिर्विक्रियत्वं वि

छंदोभंगभयात्परस्मैपदप्रयोगोऽनुतिष्ठतीति वा पाठांतरं नेंगते न चलति स्वरूपावस्थ एव भवतीत्यर्थः ॥ किंच समदुःखसुखः स्वस्थः
समलोष्टाश्मकांचनः ॥ तुल्यप्रियाप्रियो धीरस्तुल्यनिंदात्मसंस्तुतिः ॥ २४ ॥ समदुःखसुखः समे तुल्ये दुःखसुखे यस्य स समदुःख स
सुखः स्वस्थः स्वात्मनि स्थितः प्रसन्नः समलोष्टाश्मकांचनः लोष्टंचाश्मा च कांचनं च समानि यस्य स समलोष्टाश्मकांचनः ॥
तुल्यप्रियाप्रियः प्रियं चाप्रियं च तुल्ये समे प्रियाप्रिये यस्य सोयं तुल्यप्रियाप्रियः धीरो धीमान् तुल्यनिंदात्मसंस्तुतिः ॥ [illegible] ॥
निंदा च आत्मसंस्तुतिश्च तुल्ये निंदात्मसंस्तुती यस्य यतेः स तुल्यनिंदात्मसंस्तुतिः ॥ किंच ॥ मानावमानयोस्तुल्यो मित्रारिपक्षयोः ॥ तुल्य ८
॥ सर्वारंभपरित्यागी गुणातीतः स उच्यते ॥ २५ ॥ ५ ॥ ॥ ५ ॥

दृढस्याप्रियाप्रिययोरसंभवेपि लोकदृष्टिमाश्रित्याह ॥ प्रियं चेति ॥ प्रियाप्रियग्रहणेन गृहीतानां कांचनादीनां प्रालए परिव्राजकवत्स्वयमग्रहणं । गि २
निंदादोषोक्तिः ॥ आत्मसंस्तुतिरात्मनो गुणकीर्तनं ॥ २४ ॥ इत्थं गुणातीतः शक्योस्तानुमित्याह ॥ किंचेति ॥ ५ ॥ श्रीरामचंद्राय नमः ॥ ५ ॥

मानः सत्कारस्तिरस्कारोऽवमानः परद्दष्टौ यौ सरिविशत्रून योः पक्षयोर्निशेषो न कस्यचित्पक्षे तिष्ठतीत्याह ॥ तुल्य इति ॥ विदुषो मित्रारिबुद्ध्यभावा
त्तुल्यो मित्रारिपक्षयोरित्ययुक्तमित्याशंक्याह ॥ यद्यपीति ॥ सर्वकर्मत्यागे देहधारणमपि निमित्ताभावान्नस्यादित्याशंक्याह ॥ देहेति ॥ उक्तवि
शेषणो गुणातीतो ज्ञानव्यस्त्याह ॥ गुणेति ॥ यद्युक्तमुपेक्षकत्वादिन्नद्विघोद्यात्त्वं यत्नसाध्यं विद्याधिकारिणां साधनत्वेनानुष्ठेयमुत्पन्नायां तु वि

मानावमानयोस्तुल्यः ॥ समो निर्विकारस्तुल्यो मित्रारिपक्षयोः यद्यप्युदासीनाभवंतिकेचित्स्वाभिप्रायेण तथापि पराभिप्रायेण
मित्रारिपक्षयोरिव भवंतीति अयं पुनः तुल्यो मित्रारिपक्षयोरित्याह ॥ उदासीनवत्तुल्यत्वात्समवादिव ॥ सर्वारंभपरित्यागी दृष्टादृष्टा
र्थानि कर्माणि आरभ्यंत इत्यारंभाः सर्वे चते आरंभाश्चेति सर्वारंभास्तान् परित्यक्तुं शीलमस्येति सर्वारंभपरित्यागी देहधारणमात्र
निमित्तव्यतिरेकेण सर्वकर्मपरित्यागीत्यर्थः ॥ गुणातीतः स उच्यते उदासीनवदित्यादिगुणातीतः स उच्यत इत्यंतेन तदुक्तं याव
द्यत्नसाध्यं तावत्संन्यासिनानुष्ठेयं गुणातीतत्वसाधनं ॥ मुमुक्षोः स्थिरीभूतं तु स्वसंवेद्यं सद्गुणातीतस्य लक्षणं भवति
॥०॥ अधुना च कथं चैतान्गुणाननिवर्तत इति प्रश्नस्य प्रतिवचनमाह ॥२६॥

द्यायां तु~~विद्यायां~~ जीवन्मुक्तस्योक्तं धर्मज्ञानं स्थिरीभूतं स्वानुभवसिद्धं लक्षणत्वेन निष्टमित्युक्ते धर्मज्ञाने विभागं दर्शयति ॥ उदासी
नवदित्यादिना ॥२५॥ प्रश्नद्वयमेवं परिहृत्य तृतीयं प्रश्नं परिहरति ॥ अधुनेति ॥ २६ ॥ श्रीरामचंद्राय नमः ॥ ॥०

मच्छब्दस्यसंसारिविषयत्वंव्यावर्तयति॥ईश्वरमिति।तत्रैवनारायणशब्दान्मूर्तिभेदोव्यावर्त्यते॥तस्यतादर्थ्यंव्यवच्छिनत्ति॥सर्वेति
मा मुख्यामुख्याधिकारिभेदेनविकल्पःभक्तियोगस्यैवैहिककर्तव्यत्वबोधेतुमव्यभिचारेणेत्युक्तंतदाचष्टे॥नेति॥भजनंनैरंमप्रेमासए प
वयुस्यते।नेनेनियोगः॥सेवनेपरासक्तिनतांविनासदानुसंदधानीत्यर्थः॥समेवदनुग्रहकृतसम्यग्धीसंपन्नोविद्वान्जीवन्नेवेत्यर्थः ग३

मांचयोव्यभिचारेणभक्तियोगेनसेवते॥सगुणान्समतीत्यैतान्ब्रह्मभूयायकल्पते॥२६॥मांचेश्वरंनारायणंसर्वभूतहृद
याश्रितंयोयतिःकर्मीवाअव्यभिचारेणनकदाचिद्योव्यभिचरतिभक्तियोगोभजनंभक्तिःसैवयोगस्तेन[illegible]विवेकविज्ञाना
व त्मकेनहिभक्तियोगपुरःसरोभगवदनुग्रहःप्रसादजोभवतिभक्तियोगेनज्ञानसमुद्भवेनसेवतेसगुणान्समतीत्यैतान्यथोक्तान्ब्रह्म तस्मात्
भूयायब्रह्मभवनंभूयोब्रह्मभूयायब्रह्मभवनायमोक्षायकल्पतेसमर्थोभवतीत्यर्थः॥कुतएतदित्युच्यते॥ब्रह्मणोहिप्रतिष्ठा
हममृतस्याव्ययस्यच॥शाश्वतस्यचधर्मस्यसुखस्यैकान्तिकस्यच॥२७॥ब्रह्मणोहिपरमात्मनोहियस्मात्प्रतिष्ठाहं॥प्र
तितिष्ठत्यस्मिन्नितिप्रतिष्ठाहंप्रत्यगात्मा।कीदृशस्यब्रह्मणः।अमृतस्याविनाशिनःअव्ययस्याविकारिणःशाश्वतस्यचनि
सस्यधर्मस्य॥६॥

॥२६॥विद्वान्जीवन्नेवेत्यस्यहेतुंपृच्छति॥कुतइति॥तत्रोत्तरमाह॥उच्यतइति॥ब्रह्मशब्दस्यासन्निबाधकेमुख्यार्थग्रहणमभिप्रेत्याह॥परमात्मनइति॥तंप्रत्य प्र
गात्मायोपत्यलिङ्गत्वंतदुपपादयति॥प्रतितिष्ठतीयत्रप्रत्यगात्मनिमन्निष्ठन्नितिकिंविशेषणमित्यपेक्षायामुक्तं॥अमृतस्येत्यादि॥तत्रामृतशब्दे
नाव्ययशब्दस्यपौनरुक्त्यंपरिहरति॥अविकारिणइति॥नित्यत्वमपक्षयराहित्यंतेनपूर्वस्यापौनरुक्त्यं॥२७॥श्रीरामचंद्रायनमः॥८९॥

प्रसिद्धार्थस्य धर्मशब्दस्य ब्रह्मण्यनुपपत्तिमाशंक्याह॥ ज्ञानेनेति॥ अर्थेंद्रियसंबंधोत्थं सुखं व्यावर्तयितुं ऐकांतिकस्येत्युक्तं॥ अक्षरार्थमुक्त्वा वाक्या
र्थमाह॥ अमृतादिति॥ प्रतिष्ठा यस्मादिति पूर्वेण संबंधः तस्मात्प्रत्यगात्मा परमात्मतया निश्चीयते सम्यग्ज्ञानेनेति योजना॥ अस्य
स्य पूर्वश्लोकेनैकवाक्यतामाह॥ तदेतदिति॥ विवक्षितं वाक्यार्थं प्रपंचयति॥ ययेति सा शक्तिर्ब्रह्मैवेति कथं सामानाधिकर
ण्यं तत्राह॥ शक्तीति॥ व्याख्यानांतरमाह॥ अथवेति॥ विशेषणानि पूर्ववदपुनरुक्तानि नेतव्यानि॥ तदनेनाध्यायेन क्षेत्रक्षेत्रज्ञ

ज्ञानयोगधर्मप्राप्यस्य॥ सुखस्यानंदरूपस्यैकांतिकस्याव्यभिचारिणः अमृतादिस्वभावस्य परमात्मनः प्रत्यगात्मा
~~[illegible]~~ प्रतिष्ठा सम्यग्ज्ञानेन परमात्मतया निश्चीयते तदेतद्ब्रह्मभूयाय कल्पत इत्युक्तं ययेश्वरशक्त्या भक्तानुग्रहादि
प्रयोजनाय ब्रह्म प्रतिष्ठते प्रवर्तते सा शक्तिर्ब्रह्मैवाहं शक्तिशक्तिमतोरनन्यत्वादित्यभिप्रायोऽथवात्र ब्रह्मशब्दवाच्यत्वा
त्सविकल्पं ब्रह्म तस्य ब्रह्मणो निर्विकल्पोहमवाच्यः प्रतिष्ठा आश्रयः किंविशिष्टस्यामृतस्यामरणधर्मकस्याव्ययस्य
व्ययरहितस्य॥ किंच॥ शाश्वतस्य च नित्यस्य धर्मस्य ज्ञाननिष्ठालक्षणस्य॥ सुखस्य तज्जनितस्यैकांतिकस्यैकांत
॥२७॥ नियतस्य प्रतिष्ठाहमिति वर्तते ॥इति श्रीभगवद्गीताभाष्ये शंकरभगवत्कृतौ चतुर्दशोध्यायः॥

योगस्य संसारकारणत्वं पंचप्रश्ननिरूपणद्वारेण च सम्यग्ज्ञानस्य सकलसंसारनिवर्तकत्वमित्येतदुपपादयता मुमुक्षोर्पल्लसा·
ध्यं गुणैश्चलत्वादिमुक्तस्यापलसिद्धं तल्लक्षणमिति निर्धारितं॥२७॥ इति श्रीभगवद्गीताटीकायां चतुर्दशोध्यायः समाप्तः॥१४॥

श्रीगणेशाय नमः ॥ हरिः ॐ ॥ ज्ञानेन गुणात्यये दर्शिते नाशित्वे तेषां विनाशज्ञानेनात्ययाद नाशित्वे तेनापि तद्योगान्नज्ञा
नं गुणात्ययहेतुरित्याशंकां निरस्य साक्षादेव श्रवणादिहेतुं संन्यासं विधित्सुर्ब्रह्मत्वस्य परमपुरुषार्थतां विवक्षुरध्या
यांतरमारभते यस्मादिति ॥ कर्मिणो ज्ञानिनश्चपराशास्त्रे अधिकृतास्तत्र कर्मिणां कर्मानुकूलं फलमीश्वरायत्तं फलमत
त इति न्यायात् ॥ ज्ञानिनामपि तत्फलमीश्वरायत्तमेव ततोऽस्य स्वबंधविपर्यया विरक्तत्वात् यस्मादेवं तस्मात् ये भक्त्या

हरिः ॐ ॥ यस्मान्मदधीनं कर्मिणां कर्मफलं ज्ञानिनां च ज्ञानफलमतो भक्तियोगेन मां ये सेवंते ते मत्प्रसादाद् ज्ञान
प्राप्तिक्रमेण गुणातीताः मोक्षं गच्छंति ॥ किमु वक्तव्यमात्मनस्तत्त्वमेव सम्यग्विज्ञानं तरह सतो भगवानर्जुनेनापृष्टो
प्यात्मनस्तत्त्वं विवक्षुरुवाच ॥ ऊर्ध्वमूलमित्यादि ॥ तत्र तावद्वृक्षरूपकल्पनया वैराग्यहेतोः संसारस्वरूपं वर्ण
॥ यति ॥ विरक्तस्य हि संसाराद्भगवत्तत्त्वविज्ञानेऽधिकारो नान्यस्येति ॥ छ ॥

रव्यनयोगेन मामेव सेवंते तेम
त्प्रसादद्वारा ज्ञानं प्राप्य ते न गुणातीता मुक्ता भवंतीति स्थितमित्यर्थः ॥ ये त्वात्मनस्तत्त्वमेव संदेहाद्यपोहेन जानंति
ते तेन ज्ञानेन गुणातीताः संतो मुक्तिं गच्छंतीति किमु वक्तव्यमित्यर्थसिद्धमर्थमाह ॥ किमु वक्तव्यमिति ॥ आत्म
तत्त्वमज्ञातं यतः संसारहेतुः ज्ञानं मोक्षानुकूलमतोऽर्जुनेन किं तदिति अपृष्टमपि तत्त्वं भगवानुक्तवान् प्रश्नाभावेपि
तस्य तदुत्पादनाभिमानादित्याह । अत इति ॥ तत्त्वे विवक्षिते किमिति संसारो वर्ण्यते तत्राह ॥ तत्रेति ॥ अध्यायादिः स
म्यगर्थः ॥ वैराग्यमपि किमिति मृग्यते । तत्राह ॥ विरक्तस्येति ॥ इति वैराग्याय संसारवर्णनमिति शेषः ॥ छ ॥ छ ॥ छ ॥

ता०

टी०अ०
१५

नाशसंभावनायेवृक्षरूपकंबंधहेतोर्दर्शयति॥ऊर्ध्वमूलमिति॥कथंकालतःसूक्ष्मत्वंतदाह॥कारणत्वादिति
तदेवकथंकार्यापेक्षयानियतपूर्वभावित्वादित्याह॥नित्यत्वादिति॥सर्वव्यापित्वाद्वोर्ध्वत्वंसंभावयति॥महत्वा
च्चेति॥ऊर्ध्वमुच्छ्रितमुत्कृष्टमितियावत्॥तस्यकूटस्थस्यकथंमूलत्वमित्याशंक्याह॥अव्यक्तेति॥स्मृतिमूल
त्वेनश्रुतिमुदाहरति॥श्रुतिश्चेति॥अवाच्योनिष्ठ्याःशाखाइवमहदाद्यायस्यसतथाप्रकृतेसंसारवृक्षेपुराण

ऊर्ध्वमूलमधःशाखमश्वत्थंप्राहुरव्ययं॥छंदांसियस्यपर्णानियस्तंवेदसवेदवित्॥१॥ऊर्ध्वमू
लंकालतःसूक्ष्मत्वात्कारणत्वात्नित्यत्वान्महत्वाच्चोर्ध्वंमूलमुच्यतेब्रह्माव्यक्तमायाशक्तिमत्त
न्मूलमस्येतिसोयंसंसारवृक्षऊर्ध्वमूलः॥श्रुतेश्चऊर्ध्वमूलोवाक्शाखइति॥पुराणेच॥अव्यक्त
मूलप्रभवस्तस्यैवानुग्रहोत्थितः॥बुद्धिस्कंधमयश्चैवइंद्रियांतरकोटरः॥महाभूतविशाखश्चवि
षयैःपत्रवांस्तथा॥धर्माधर्मसुपुष्पश्चसुखदुःखफलोदयः॥छ॥ ॥छ॥ ॥छ॥

संमतिमाह॥पुराणेचेति॥अव्यक्तमव्याकृतंतदेवमूलंतस्मात्प्रभवनंसंभवोयस्य॥तस्यैवमूलस्याव्यक्तस्यानु
ग्रहादतिदृढत्वादुत्थितःसंवर्धितः॥तस्यलौकिकवृक्षसाधर्म्यमाह॥बुद्धीत्यादिना॥वृक्षस्यहिशाखाःस्कंधादु
द्भवंति॥संसारस्यचबुद्धेःसकाशान्नानापरिणामाजायंतेतेनबुद्धिरेवस्कंधस्तन्मयस्तत्प्रचुरोयंसंसारतरुः॥
इंद्रियाणामंतराणिछिद्राणिकोटराणियस्यस॥तथामहांतिभूतानिपृथिव्यादीन्याकाशांतानिविशाखवत्तंभो

रामराम॥

२८२

आजीव्यत्वमुपजीव्यत्वं ॥ ब्रह्मणोऽधिष्ठितो वृक्षो ब्रह्मवृक्षस्तथा विज्ञानं विना छेत्तुमशक्यतया सनातनश्चिरंत
नएतच्च ब्रह्मणः परस्यात्मनो वनं वननीयं संभजनीयमत्र हि ब्रह्म प्रतिष्ठितं तस्य वृक्षस्य संसाराख्यस्य तदेव ब्रह्म
सारभूतं। अथवाऽस्य ब्रह्मवृक्षस्यानवच्छिन्नस्य संसारमंडलस्य तदेतद्ब्रह्म वनमिव वर्त्तते वननीयं भजनीयं न हि
ब्रह्मातिरिक्तं संसारस्यास्पदमस्ति ब्रह्मैवाविद्यया संसरतीत्यभ्युपगमादित्यर्थः ॥१॥ अहं ब्रह्मेत्यतिदृढज्ञानेनोक्तं स

आजीव्यः सर्वभूतानां ब्रह्मवृक्षः सनातनः ॥ एतद्ब्रह्मवनं चैव ब्रह्माचरति साक्षिवत् ॥ एतच्छित्वा च भित्वा च
ज्ञानेन परमासिना ॥ ततश्चात्मरतिं प्राप्य यस्मान्नावर्त्तते पुनरित्यादि ॥ तमूर्ध्वमूलं संसारं मायामयं वृक्ष
मधःशाखं ॥ महदहंकारतन्मात्रादयः शाखा इवास्याधो भवंतीति सोऽधःशाखस्तमधःशाखं ॥ नश्वोपि
स्थास्यतीत्यश्वत्थस्तं क्षणप्रध्वंसिनमश्वत्थं प्राहुः कथयंति श्रुतिवादाः ॥ अव्ययं संसारमायाया अना
दिकालप्रवृत्तत्वात् सोऽयं संसारवृक्षोऽव्ययोऽनाद्यनंतदेहादिसंतानाश्रयो हि सुप्रसिद्धस्तमव्ययं ॥ तस्यै
व संसारवृक्षस्य इदमन्यद्विशेषणांतरं छंदांसि छादनात् ऋग्यजुःसामलक्षणानि यस्य संसारवृक्षस्य पर्णा
॥नीव पर्णानि ॥ छं॥

सारवृक्षं छित्वा प्रतिबंधकाभावादात्मनिष्ठो भूत्वा पुनरावृत्तिरहितं कैवल्यं प्राप्नोतीत्याह ॥ एतदिति ॥ अधःशाखमित्ये
तद्व्याचष्टे। महदिति ॥ आदिशब्देनेंद्रियादिसंग्रहः। संसारवृक्षस्यातिचंचलत्वे प्रमाणमाह ॥ प्राहुरिति ॥ क्षणध्वं
सिनोऽप्यव्ययत्वं विरुद्धमित्याशंक्याह ॥ संसारेति ॥ तदेवोपपादयत्यनादीति ॥ छादनं रक्षणं प्रावरणं वा कर्मकांडा निरव
च्यारोहावरोहफलानि नानाविधार्थवादयुक्तानि संसारवृक्षं रक्षंतीति तन्निष्ठदोषमावृण्वंतीति तेन तानि छंदांस्यस्य प

पर्णानीव भवंतीत्यर्थः॥ १५॥ १५॥ ५॥

तदेव प्रपंचयति ॥ यथेति ॥ उक्तेऽर्थे हेतुमाह ॥ धर्मेति ॥ कर्मकांडात्मनां वेदानामिति विशेषः ॥ कर्मब्रह्माख्यस्य सर्ववेदार्थस्य तत्रांतर्भावमुपेत्य व्याचष्टे ॥ वेदार्थेति ॥ समूलसंसारवृक्षज्ञाने कुतूहलं हि वा मूलमेव निःक्ष व्यज्ञातुं शक्यमिति तज्ज्ञानार्थं प्रतिपत्तव्यमिति मत्वा तज्ज्ञानस्तुतिरत्र विवक्षितेत्याह ॥ न हीति ॥ अवयवसं

यथा वृक्षस्य परिरक्षणार्थानि पर्णानि तथा वेदाः संसारवृक्षस्य परिरक्षणार्थानि पर्णानि ॥ धर्माधर्मतद्धेतुफलप्रकाशनार्थत्वात् ॥ यथाव्याख्यातं संसारवृक्षं समूलं यस्तं वेद स वेदवित् ॥ वेदार्थविदित्यर्थः ॥ न हि संसारवृक्षादस्मात् समूलाज्ज्ञेयोऽन्योऽणुमात्रोऽप्यवशिष्टोऽस्त्यतः सर्वज्ञः स यो वेदार्थविदिति समूलवृक्षज्ञानं स्तौति ॥ तस्यैव संसारवृक्षस्याव्ययस्यावयवव्यापारकल्पनोच्यते ॥ अधश्चोर्ध्वं प्रसृतास्तस्य शाखा गुणप्रवृद्धा विषयप्रवालाः ॥ अधश्च मूलान्यनुसंततानि कर्मानुबंधीनि मनुष्यलोके ॥२॥ अधो मनुष्यादिभ्यो यावत्स्थावरं ॥ ऊर्ध्वं च यावद्ब्रह्मा विश्वसृजो धर्म इत्येतदंतं । यथाकर्म यथाश्रुतं ज्ञानकर्मफलानि तस्य वृक्षस्य शाखा इव शाखाः प्रसृताः प्रगताः गुणप्रवृद्धाः गुणैः सत्त्वरजस्तमोभिः प्रवृद्धाः स्थूलीकृता उपादानभूतैर्विषयप्रवालाः विषयाः शब्दादयः प्रवालाइव देवादिकर्मफलेभ्यः शाखाभ्योंऽकुरीभवंतीव तेन विषय ॥ देवादीति ॥१५॥

यप्रवालाः शाखा ॥ ॥१५॥

॥१५॥ ॥१५॥ ॥१५॥

बंधिन्यपराप्रागुक्तादतिरिक्ता कल्पनेति यावत् ॥ आमनुष्यलोकादाविरिंचेरिति सधःशब्दार्थमाह ॥ मनुष्यादिभ्य इति तस्मादेवारभ्यासत्यलोकादिषूर्ध्वशब्दार्थमाह ॥ यावदिति ॥ शाखाशब्दार्थं दर्शयति ॥ ज्ञानेति ॥ तेषां हेतुत्वगुणत्वेन बहुविधत्वं सूचयति ॥ यथेति ॥ प्रसक्ताणां शब्दादिविषयाणां प्रवालत्वं शाखासु पल्लववत्तमंकुरत्वं स्फोरयति

उर्द्धमूलत्वमित्यत्रसंसारवृक्षस्यमूलमुक्तं किमिदानींअधश्चमूलानीत्युच्यतेतत्राह॥संसारेति॥अनुप्रविष्टत्वंसर्वेषुलिंगेष्वनुगततयासं
ततत्वमविच्छिन्नत्वंरागादीनांकर्मफलजन्यत्वंप्रकटयति॥कर्मेति॥कर्मणांरागादीनांचमिथोहेतुमत्वंतेषांतथात्वेन॥विच्छिन्नततया हेतु२
प्रवृत्तिविशेषतोमनुष्यलोकेभवतीतित्रहेतुमाह॥अत्रहीति॥कर्मव्युत्सत्ताप्राणिनिकायोलोकः मनुष्यश्चासौलोकश्चेत्यधिकतो
ब्राह्मण्यादिविशिष्टदेहोमनुष्यलोकः॥२॥पुनःपुनारागादिनाप्रवर्त्यत्वेनानादित्वाच्चसंसारवृक्षःस्वयमुच्छिद्यतेचेत्तोछेत्तुं

संसारवृक्षस्यपरमंमूलमुपादानंसर्वमुक्तमथेदानींकर्मफलजनितरागद्वेषादिवासनाःमूलानीवधर्माधर्मप्रवृत्तिकारणा
निअवांतरभावीनितान्यधश्चादेवताद्यपेक्षयामूलान्यनुसंततानिअनुप्रविष्टानि॥कर्मानुबंधीनिकर्मधर्माधर्मलक्षणम
नुबंधःपश्चाद्भावीयेषासुभूतिमनुभवंति॥तानिकर्मानुबंधीनि॥मनुष्यलोकेविशेषतोऽत्रहिमनुष्याणांकर्माधिका
रःप्रसिद्धः॥यस्त्वयंवर्णितःसंसारवृक्षः॥नरूपमस्येहतथोपलभ्यतेनांतोनचादिर्नचसंप्रतिष्ठा॥अश्वत्थमेनंसुविरूढमू
लमसंगशस्त्रेणदृढेनछित्वा॥३॥नरूपमस्येहयथावर्णितंतथानैवोपलभ्यते॥स्वप्नमरीच्युदकमायागंधर्वनगरसमत्वात्॥
दृष्टनष्टस्वरूपोहिसइति॥

शक्यतेकेनापीत्याशंक्याह॥यस्त्विति॥यथासर्वं वर्णितंयथावालोकेप्रसिद्धंतथास्यरूपमिहशास्त्रेऽनुमीयते॥तथाचास्यज्ञानापनोद्यत्वमु
क्तमित्याह॥यथेति॥तस्याप्रमितत्वेहेतुमाह॥स्वप्नेति॥तस्यस्वप्नादिसमत्वेदृष्टनष्टस्वरूपत्वंहेतुंकरोति॥दृष्टेति॥इत्यमेयत्वेविशेषः॥

टी
गी०
२

नदेवामेयत्नंहेलन्कृत्यावसानमपितस्यनभातीत्याह।।अतएवेति।।ज्ञानंविनाभ्रांतिवासनाकर्मणामन्योन्यनिमित्तत्वात्नावसानमस्तीत्यर्थः।।इदंप्र
ष्यम। [illegible]पिनास्यपरिच्छेत्तुंशक्यमित्याह।।तथेति।।आद्यंतवन्मध्यमपिनास्यप्रामाणिकमित्याह।।मध्यमिति।।संसारवृक्षस्याश्वत्थस्यशाद्वि
नस्य [illegible]सल्लभ्यंगुरस्यस्वयमेवोच्छेदसंभवात्तदुच्छेदार्थंनप्रयतितव्यमित्याशंक्याह।।अश्वत्थमिति।।मुमुक्षुणानंवैराग्यपूर्वकंपरिव्राज्यंद

अतएवनांतोनपर्यंतोनिष्ठासमाप्तिर्वाविद्यते।।नचानचादिरितआरभ्यायंप्रवृत्तइतिनकेनचित्गम्यते।।नचसंप्रतिष्ठास्थितिर्मध्यमस्यनके
नचिदुपलभ्यते।।अश्वत्थमेनंयथोक्तंसुविरूढमूलंसुष्टुविरूढानिविरोहंगतानिसुदृढानिमूलान्यस्यतमेनंसुविरूढमूलमसंगशस्त्रेण।।
असंगःअसंगताशस्त्रंपुत्रवित्तलोकैषणाभ्योव्युत्थानंतेनासंगशस्त्रेणसुदृढेनपरमात्माभिमुखनिश्चयदृढीकृतेनपुनःपुनर्वि
वेकाभ्यासाश्मनिशितेनछित्त्वासंसारवृक्षंसबीजमुद्धृत्य।।ततःपदंतत्परिमार्गितव्यंयस्मिन्गतानिवर्तंतिभूयः।।तमेवचाद्यं
पुरुषंप्रपद्येयतःप्रवृत्तिःप्रसृतापुराणी।।४।।ततःपश्चात्यत्पदंवैष्णवंतत्परिमार्गितव्यंपरिमार्गणमन्वेषणंज्ञातव्यमित्य
र्थः।।यस्मिन्पदेगताःप्रविष्टानिवर्तंतिनावर्तंतेभूयःपुनःसंसाराय।।कथंपरिमार्गितव्यमित्याह।।तमेवचयः पदशब्देनोक्तः
आद्यंआदौभवंआद्यं।।पुरुषंप्रपद्यइत्येवंतत्परिमार्गितव्यंतच्छरणतयेत्यर्थः।।

पु नि

व

आ०१५।।
२८४।।राम:।।

दीकृतत्वमेवविवेकपूर्वकत्वेनस्फुटयति।।पुनःपुनरिति।।३।।उर्ध्वस्यकिंकर्तव्यंतदाह।।ततइति।।पश्चादश्वत्थादूर्ध्वंव्यवस्थितमित्यर्थः।।
किंतत्पदंयदन्विष्यज्ञातव्यंतदाह।।यस्मिन्निति।।येनसर्वंप्रसृतंप्रवृत्तंप्ररुषुवाशयानंपुरुषंप्रपद्येशरणंगतोस्मीत्यर्थः।।४।।४।।श्री

विवर्तवादानुरोधिनं हष्टांतमाह ॥ ऐंदेति ॥ ४ ॥ पतिमार्गेणपूर्वकं वैष्णवं पदं गच्छतामंगानंतराण्याकांक्षापूर्वकं कथयति ॥ कथमित्यादिना ॥ मानो
प्राक् हंकारः मोहस्त्वविवेकः जितसंगदौशत्रुमित्रसन्निधावपि द्वेषप्रीतिवर्ज्जिताइत्यर्थः ॥ नसरतं श्रवणादिनिष्ठत्वं संन्यासिनो वैराग्यद्वारासक्त

स्तु कोऽसौपुरुषः उच्यते ॥ यतोयस्मात्पुरुषात्संसारमायावृक्षप्रवृत्तिः प्रसृतानिःसृतेदानींतनिकादिर्मायापुराणीचिरंतनी ॥ ४ ॥ व
कथंभूतास्तत्पदंगच्छंतीत्युच्यते ॥ निर्मानमोहा जितसंगदोषा अध्यात्मनित्या विनिवृत्तकामाः ॥ द्वंद्वैर्विमुक्ताः सुखदुःखसं
ज्ञैर्गच्छंत्यमूढाः पदमव्ययं तत् ॥ ५ ॥ निर्मानमोहा मानश्च मोहश्च मानमोहौ तौ निर्गतौ येभ्यस्ते निर्मानमोहाः मानमोहव
र्जिताः ॥ जितसंगदोषाः संग एव दोषः संगदोषः जितः संगदोषो यैस्ते जितसंगदोषाः अध्यात्मनित्याः परमात्मस्वरूपालो
निःशेषेण चननित्याः तत्पराः विनिवृत्तकामा विशेषतो निर्लेपेन निवृत्ताः कामा येषां ते विनिवृत्तकामाः यतयः संन्यासिनो द्वंद्वैः प्रियाप्रि
नि यादिभिर्विमुक्ताः सुखदुःखसंज्ञैः परित्यक्ताः गच्छंत्यमूढा मोहवर्जिताः पदमव्ययं तद्यथोक्तं ॥ तदेव पदं पुनर्विशेष्यते ॥ नतद्भा
सयते सूर्यो न शशांको न पावकः ॥ यद्गत्वा न निवर्त्तंते तद्धाम परमं मम ॥ तद्धामेति व्यवहितेन धाम्ना संबंधः ॥ तत् धाम
तेजोरूपं पदं न भासयते सूर्य आदित्यः सर्वावभासनशक्तिमत्वेऽपि सति ॥ तथा न शशांकश्चंद्रो न च पावकोऽग्निरपि ॥०
यद्धाम वैष्णवं पदं गत्वा प्राप्य न निवर्त्तंते ॥ यच्च सूर्यादिना नावभास्यं तद्धाम पदं परमं विष्णो
॥ र्मम ॥

सर्वकर्मोपरत्यर्थः ॥ आदिशब्देन तद्धेतुग्रहः मोहवर्जितत्वमुक्तहेतुतः संजातसम्यक्धीत्वं ॥ ५ ॥ तच्चेत्सदं वेद्यं कर्तुरस्य तत्कर्मैतिद्धैता
से पातोऽवेद्यं चेदप्युमर्थतात्सैद्धिनत्वासिद्धिरित्याशंक्याह ॥ नतदेवेति ॥ ६ ॥ उक्तमनुवाक्षिपति ॥ यद्गत्वेति ॥ तत्रप्रसिद्धिं प्रमाणयति ॥

संयोग इति ॥ गमनस्यागमनांतत्वप्रसिद्धेरयुक्तं यद्गत्वेत्यादिश्लुपहसेरति ॥ कथमिति ॥ आक्षेपं परिहरति ॥ शृणिवति ॥ भगवत्साम्नेर्निःसंसंनत्वा
भा[illegible]प्रसंगः ॥ जीवस्य परांशत्वेपि कथमुक्तदोषसमाधिरित्याशंक्य प्रतिबिंबपक्षमादाय दृष्टांतेन प्रत्याचष्टे ॥ यथेति ॥ अवच्छेदपक्षमाश्रि
त्य दृष्टांतांतरेणोक्तदोषसमाधिं दर्शयति ॥ यथावेति ॥ आक्षेपसमाधिमुपसंहरति ॥ अत इति ॥ परस्य निरवयवत्वात्तदंशत्वं जीव

यद्गत्वा न निवर्तंत इत्युक्तं ॥ ननु सर्वा हि गतिरागमांता संयोगा विप्रयोगांता इति हि प्रसिद्धं ॥ कथमुच्यतेनेन धाम गतानां
नास्ति निवृत्तिरिति तत्र ॥ शृणु तत्रैव कारणं ॥ ममैवांशो जीवलोके जीवभूतः सनातनः ॥ मनःषष्ठानींद्रियाणि
प्रकृतिस्थानि कर्षति ॥७॥ ममैव परमात्मनोंशो भागोऽवयव एकदेश इत्यनर्थांतरं ॥ जीवलोके जीवानां लोके संसारे
जीवभूतो भोक्ता कर्तेति प्रसिद्धः सनातनः पुरातनः ॥ यथा जलसूर्यकः सूर्यांशो जलनिमित्तापाये सूर्यमेव गत्वा
न निवर्तते नैवात्मनागच्छत्येवमेव ॥ यथा वा घटाद्युपाधिपरिच्छिन्नो घटाकाश आकाशांशः सन् घटादिनिमि
त्तापाये आकाशं प्राप्य न निवर्तत इत्येवं ॥ अत उपपन्नमुक्तं यद्गत्वा न निवर्तंत इति ॥ ननु निरवयवस्य परमात्मनः कुतोवय
ऽव एकदेशोंऽश इति सावयवत्वे च विनाशप्रसंगोऽवयवविभागात् नैष दोषो विद्याकृतोपाधिपरिच्छिन्न एकदेशोंऽश इव कल्पितः

व

स्यायुक्तमिति शंकते नन्विति ॥ तस्य निरवयवत्वं साधयति ॥ सावयवत्वे चेति ॥ वस्तुतो निरंशस्यापि परस्य कल्पनया जीवोंशो भविष्यती
॥ त्यपरिहरति ॥ नैष दोष इति ॥८॥

वस्तुतस्तु जीवस्यांशत्वं परमात्मतावन्मात्रतायाद्दर्शितत्वादित्याह ॥ दर्शितश्चेति ॥ यदि परस्यांशत्वेन कल्पितो जीवो वस्तुतस्तदा तस्यैव न तर्हि तस्य सं-
सारित्वमुत्क्रांतिर्वेति शंकते ॥ सचेति ॥ जीवस्य संसरणमुत्क्रमणं चोपपादयितुमुपक्रमते ॥ उच्यत इति ॥ ७ ॥ स्वस्थाने स्थितानामिंद्रियाणां जी-
वेनाकर्षणस्य कालं पृच्छति ॥ कस्मिन्निति ॥ जीवस्योत्क्रांतिर्नैश्वरस्येत्याशंक्येश्वरशब्दार्थमाह ॥ देहादीति ॥ उत्क्रांत्यनंतरभाविनियोगनिरि-

दर्शितश्चायमर्थः क्षेत्राध्याये विस्तरशः ॥ स च जीवो मदंशत्वेन कल्पितः कथं संसरत्युत्क्रांतिनिचेत्युच्यते ॥ मनःषष्ठानि श्रोत्रा-
दीनिंद्रियाणि प्रकृतिस्थानि स्वस्थाने कर्णशष्कुल्यादौ प्रकृतौ स्थितानि कर्षत्याकर्षति ॥ कस्मिन् काले शरीरं यदवाप्नोति
यच्चाप्युत्क्रामतीश्वरः ॥ गृहीत्वैतानि संयाति वायुर्गंधानिवाशयात् ॥ ८ ॥ यच्चापि यदाप्युत्क्रामति ईश्वरो देहादिसंघातस्वा-
मी जीवः तदाकर्षतीति ॥ श्लोकस्य द्वितीयः पादोऽर्थवशात् प्राथम्येन संबध्यते ॥ यदा च पूर्वस्माच्छरीराच्छरीरांतरमाप्नोति
तदा गृहीत्वैतानि मनःषष्ठानींद्रियाणि संयाति सम्यक् याति गच्छति ॥ किमिवेत्याह ॥ वायुः पवनो गंधानिवाशयात् ॥
पुष्पादेः ॥ कानि पुनस्तानि ॥ श्रोत्रं चक्षुः स्पर्शनं च रसनं घ्राणमेव च ॥ अधिष्ठाय मनश्चायं विषयानुपसेवते ॥ ९ ॥
श्रोत्रं चक्षुः स्पर्शनं च त्वगिंद्रियं ॥ रसनं घ्राणमेव च ॥ मनश्च षष्ठं प्रत्येकं इंद्रियेण सहाधिष्ठाय देहस्थो विषयान् शब्दादी-
नुपसेवते ॥

ततश्चार्थवशादित्युक्तं ॥ अवशिष्टानि श्लोकाक्षराणि व्याचष्टे ॥ यदा चेति ॥ ८ ॥ मनःषष्ठानींद्रियाण्येव प्रश्नद्वारा विशेषतो दर्शयति ॥
क[illegible] ॥ शरीरमित्यादिश्लोके देहादात्मनो निरेकमुक्तं ॥ श्रोत्रं चक्षुरित्यादौ स्वामित्वं विषये विषये यथायथं करणानां प्रवर्तकत्वाने-
भ्यो निरिक्तश्चात्मेत्युक्तं ॥ ९ ॥ श्रीरामाय नमः ॥ ९ ॥ ९ ॥

भा०टी
९६॥

तर्हि तन्मुक्तौ त्यादि कुर्वंतं स्वस्वरूपत्वात्किमिति सर्वे न पश्यंतीत्याशंक्याह॥ एवमिति॥ सन्निहिततमत्वेन दर्शनयोग्यमपि विषयपार्वश्यादा
त्मानं सर्वे न पश्यंतीति भगवतोनुक्रोशं दर्शयति॥ एवंभूतमिति॥ तर्हि केषामात्मदर्शनं तत्राह॥ ये तु पुनरिति॥१०॥ ज्ञानचक्षुः शब्देन
न्यायानुगृहीतं शास्त्रं ज्ञानसाधनमुक्तं॥ तत्किमिदानीं शास्त्रमात्रेण न्यायाननुगृहीतेनात्मानं पश्यंतीनेत्याह॥ केचित्त्विति॥ प्रय

२
नं२

श

एवं देहगतं देहात्॥ उत्क्रामंतं स्थितं वापि भुंजानं वा गुणान्वितं॥ विमूढा नानुपश्यंति पश्यंति ज्ञानचक्षुषः॥१०॥ उत्क्रामंतं परित्य
जंतं देहं स्वोपात्तं स्थितं वा देहे तिष्ठंतं॥ भुंजानं वा शब्दादींश्चोपलभमानं गुणान्वितं सुखदुःखमोहाद्यैर्गुणैरन्वितं अनुगतं
संयुक्त मित्यर्थः॥ एवंभूतमप्येनमत्यंतदर्शनगोचरं प्राप्तं॥ विमूढा दृष्टादृष्टविषयभोगतलबलकृष्टचेतसस्तमनेक
धा मूढा नानुपश्यंति॥ अहो कष्टं वर्तत इत्यनुक्रोशति भगवान्॥ ये तु पुनः प्रमाणजनितज्ञानचक्षुषस्त एवैनं पश्यंति
ज्ञानचक्षुषो विविक्तदृष्टय इत्यर्थः॥ केचित्॥ यतंतो योगिनश्चैनं पश्यंत्यात्मन्यवस्थितं॥ यतंतोप्यकृतात्मानो नैनं
पश्यंत्यचेतसः॥११॥ यतंतः प्रयत्नं कुर्वंतो योगिनश्च समाहितचित्ताः एनं प्रकृतमात्मानं पश्यंत्ययमहमस्मीत्यु
पलभंते॥ आत्मनि स्वस्यां बुद्धौ अवस्थितं॥ यतंतोऽपि शास्त्रादिप्रमाणैरकृतात्मानोऽसंस्कृतात्मानः॥ तपसेंद्रियज
येन च दुश्चरितादनुपरता अशांतदर्पाः प्रयत्नं कुर्वंतोपि नैनं पश्यंत्यचेतसोऽविवेकिनः॥

नं

आ०१५॥
२८६॥रामः॥

त्नः श्रवणमननात्मकः शास्त्रादिप्रमाणैर्यतंतोपीति संबंधः॥ असंस्कृतात्मत्वं प्रकटयति तपसेति॥ दुश्चरिताद्विरतिफलं कथयति॥
६ अशांतेति॥ अशुद्धबुद्धीनामविवेकिनां सदपि श्रवणादि न फलवदिति मत्वाह॥ प्रयत्नमिति॥ ८७॥ श्रीरामायनमः॥ ८७॥

अनंतरश्लोकचतुष्टयस्य वृत्तानुवादद्वारा तात्पर्यमाह ॥ यत्पदमिति ॥ जीवात्मत्वेन चिद्रूपमुक्त्वा तृतीयचैतन्येनादित्यादीनामवभासकत्वाच्च ब्रह्मणश्चिद्रूपत्वमित्याह ॥ यदादित्येति ॥ चिद्रूपस्यैव ब्रह्मणः सर्वात्मकत्वप्रतिपादकत्वेन श्लोकं व्याचष्टे ॥ यदित्यादिना ॥ आदित्यादौ तत्र तत्र स्थितं ब्रह्मचैतन्यज्योतिः ॥ सर्वावभासकमित्यर्थः ॥ ब्रह्मणः सर्वज्ञत्वेन चिद्रूपत्वमत्र विवक्षितमिति ॥ व्याख्यांतरमाह ॥

यत्पदं सर्वस्यावभासकमप्यग्न्यादिकं ज्योतिर्नावभासयति ॥ यत्प्राप्ताश्च मुमुक्षवः पुनः संसाराभिमुखा न निवर्तन्ते यस्य च पदस्योपाधिभेदमनुविधीयमाना जीवा घटाकाशादय इवाकाशस्यांशास्तस्य पदस्य सर्वात्मकत्वं सर्वव्यवहारास्पदत्वं च विवक्षुश्चतुर्भिः श्लोकैर्विभूतिसंक्षेपमाह भगवान् ॥ यदादित्यगतं तेजो जगद्भासयतेखिलं ॥ यच्चंद्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकं ॥ १२ ॥ यदादित्यगतमादित्याश्रयं किं तत्तेजो दीप्तिः प्रकाशः जगद्भासयते प्रकाशयत्यखिलं समस्तं ॥ यच्चंद्रमसि शशभृति तत्तेजोऽवभासकं वर्तते ॥ यच्चाग्नौ हुतवहे ॥ तत्तेजो विद्धि जानीहि मामकं मदीयं मम श्रीविष्णोस्तज्ज्योतिः ॥ अथवा यदादित्यगतं तेजश्चैतन्यात्मकं ज्योतिः यच्चंद्रमसि शशभृति हुतवहे यच्चाग्नौ तत्तेजो विद्धि मामकं मदीयं विष्णोस्तज्ज्योतिः ॥ ननु स्थावरेषु जंगमेषु च यत्समानं चैतन्यात्मकं ज्योतिस्तत्र कथमिदं विशेषणं यदादित्यगतमित्यादि नैष दोषः सत्वाधिक्यात् आधिक्योपपत्तेः ॥ ~~आविर्भरत्वोपपत्तेः~~ ॥ ५ ॥ श्रीराम ॥ ५ ॥

अथवेति ॥ चैतन्यज्योतिषः सर्वत्राविशेषाद्यदादित्यादिगतत्वविशेषणमयुक्तमिति शंकते ॥ नन्विति ॥ सर्वत्र सत्वेपि क्वचिदेव व्यक्तिविशेषाद्विशेषणमिति परिहरति ॥ नैष इति ॥ ५ ॥ श्रीरामः ॥

भा॰टी॰

त्तदेवप्रपंचयति ॥ आदित्यादिष्विति ॥ सर्वत्रचैतन्यज्योतिषस्तुल्यत्वेपिक्वचिदेवाभिव्यक्त्याविशेषणोपपत्तिंदृष्टांतेनस्पष्टयति ॥ यथाहीति ॥ भ
रतश्चसर्वा[illegible]व प्रकृतपदस्ययुक्तमित्याह ॥ किंचेति ॥ ईश्वरोऽपिपृथिवीदेवतारूपेणपृथिवींप्रविश्यभूतशब्दितंजगदैश्वरेणैवबलेनबिभ
र्ति ततोगुर्व्यपिपृथिवीविदीर्यनाधो[illegible]पततीत्यत्रप्रमाणमाह ॥ तथाचेति वृस्थानान्तरमंत्रयोरन्यपरत्वेनेतिभावः ॥ देवतात्मनाधारय
× परस्यैवहिरण्यगर्भात्मना ×३

ति३

आदित्यादिषुहिसत्वमत्यंतप्रकाशकमत्यंतभास्वरमतस्तत्रैवाविस्तरंज्योतिरितितद्विशिष्यतेनतुतत्रैवाधिकमिति ॥ यथाहि
लोकेतुल्येपिमुखसंस्थानेनकाष्ठकुड्यादौमुखमाविर्भवति आदर्शादौचस्वच्छेस्वच्छतरेचतारतम्येनाविर्भवतितद्वत् ॥ किंच ॥
गामाविश्यचभूतानिधारयाम्यहमोजसा ॥ पुष्णामिचौषधीःसर्वाःसोमोभूत्वारसात्मकः ॥१३॥ गांपृथिवीमाविश्यप्रविश्य
धारयामिभूतानिजगदहमोजसाबलेनयद्बलंकामरागविवर्जितमैश्वरं ॥ जगद्विधारणायपृथिव्यामाविष्टंयेनगुर्वीपृथि
वीनाधःपतन्तिचनविदीर्यन्ते ॥ तथाचमंत्रवर्णोयेनद्यौरुग्रापृथिवीचदृढेति ॥ सदाधारपृथिवीमित्यादिश्च ॥ अतोगा
माविश्यचभूतानिचराचराणिधारयामि ॥ किंचपृथिव्यांजाताःओषधीःसर्वाःव्रीहियवाद्याःपुष्णामि ॥ पुष्टिमतीरसस्वा
दुमतीश्चकरोमिअहंसोमोभूत्वारसात्मकःसोमःसंन्सर्वरसात्मकोरसस्वभावःसर्वरसानामाकरःसोमःसहिसर्वा
ओषधीःस्वात्मरसानुप्रवेशेनपुष्णाति ॥८१॥

थि

त

आ॰ १५॥
२८७॥ राम॥

थिव्याउग्रत्वमुत्कर्षणत्वंसामर्थ्यंतथापीश्वराधीनमेवस्वरूपधारणंतदपेक्षयादुर्बलत्वादितिद्रष्टव्यं ॥ ईश्वरस्यसर्वात्मत्वेहेत्वंतरमाह ॥
किंचेति ॥ रसात्मकसोमरूपताऽपन्नोऽपिकथमोषधीरीश्वरःसर्वाः[illegible]पुष्टिमतीःकरोतीत्याशंक्याह ॥ सर्वेति ॥१३॥ ८१ ॥ ८१ ॥

भगवतः सर्वात्मत्वेहेत्वंतरमाह ॥ किंचेति ॥ अहमेवेत्यहंशब्देनपरोलक्ष्यते ॥ भूत्वाप्यस्मीतिसंबंधः ॥ परस्यैवजाठरात्मनास्थितौश्रुतिंप्रमाणयति ॥ अयमिति ॥ बाह्यंभौममग्निंव्यावर्तयति ॥ योयमिति ॥ देहांतरारंभकंतृतीयंभूतंव्यवच्छिनत्ति ॥ येनेति ॥ जाठरात्मनापरःस्थितश्चेत्तस्यदेहाश्रितत्वंसिद्धमितिनपृथक्त्वेनवक्तव्यमित्याशंक्यपुरुषविधंपुरुषेंऽतःप्रतिष्ठितंवेदेतिश्रुतिमाश्रित्याह ॥

किंच ॥ अहंवैश्वानरोभूत्वाप्राणिनांदेहमाश्रितः ॥ प्राणापानसमायुक्तःपचाम्यन्नंचतुर्विधं ॥ १४ ॥ अहमेववैश्वानरउदरस्थोऽग्निर्भूत्वाऽयमग्निर्वैश्वानरोयोऽयमंतःपुरुषेयेनेदमन्नंपच्यतेइत्यादिश्रुतेः ॥ वैश्वानरःसन्प्राणिनांप्राणवतांदेहमाश्रितःप्रविष्टः ॥ प्राणापानसमायुक्तःप्राणापानाभ्यांसमायुक्तःसंयुक्तःपचामिपक्तिंकरोमिअन्नंचतुर्विधं ॥ भोज्यंभक्ष्यंचोष्यंलेह्यंचपेयं ॥ भोक्तावैश्वानरोऽग्निरग्नेर्भोज्यमन्नंसोमस्तदेवंउभयमग्नीषोमौसर्वमितिपश्यतोऽन्नदोषलेपोनभवति ॥ किंच ॥ सर्वस्यचाहंहृदिसंनिविष्टोमत्तःस्मृतिर्ज्ञानमपोहनंच ॥ वेदैश्चसर्वैरहमेववेद्योवेदांतकृद्वेदविदेवचाहं ॥ १५ ॥ श्रीरामायनमः ॥ ५ ॥

प्रविष्टइति ॥ परस्यजाठरात्मनोऽन्नपाकेसहकारिकारणत्वमाह प्राणेति ॥ संयुक्तत्वंसंधुक्षितत्वंअन्नस्यचातुर्विध्यंप्रकटयति ॥ भोज्यमिति ॥ भोक्तरिवैश्वानरदृष्टिर्भोज्येसोमदृष्टिरेवंभोक्तृभोज्यरूपंसर्वंजगदग्निसोमात्मनाभुक्तिकालेध्यायतोभोक्तुरन्नकृतोदोषोनेतिप्रासंगिकंसफलंध्यानंदर्शयति ॥ भोक्तेति ॥ १४ ॥ इतश्चसर्वात्मत्वेनसर्वव्यवहारास्पदत्वमीश्वरस्येत्याह ॥ किंचेति ॥

भा०टी०
२८८

प्राणिज्ञानश्रमादिप्रतिकांतमात्मनयाबुद्धौसंनिविष्टत्वंनु एणदोषाणामशेषेणदृष्टत्वमन्तोबुद्धिमध्यस्थस्यगुणदोषदृष्टत्वादितिपावत् ।
मतः सर्वकर्माध्यक्षाज्जगद्यंत्रसूत्रधारादिस्वरूपः ।। प्राणिनांस्मृतिज्ञानयोस्तदपोहस्यचभगवदधीनत्वेभगवतोवैषम्यंस्यादित्याशंक्य
ह ।। देष्यामिति ।। स्मृतिर्जन्मांतरादावनुभूतस्यपरामर्शः ।। देशकालस्वभावविप्रकृष्टस्यापिज्ञानमनुभवः ।। धर्माधर्माभ्यां वि
न कार्यंकुर्वतोनेश्वरस्यवैषम्यमितिभावः वेदवेद्यंपरब्रह्मभगवतोन्यदितिशंकांवारयति ।। वेदैरिति ।। वेदांतानामपौरुषेयत्वं

सर्वस्यचप्राणिजातस्याहमात्मासन्हृदिबुद्धौसन्निविष्टोऽतोमत्तआत्मनः सर्वप्राणिनांस्मृतिर्ज्ञानंतदपोहनंचअपगमनं
येषांयथापुण्यकर्मणांपुण्यकर्मानुरोधेनज्ञानस्मृतीभवतः ।। तथापापकर्मणांपापकर्मानुरूपेणस्मृतिज्ञानयोरपोहनंचा
पायनंमपगमनंचवेदैश्चसर्वैरहमेवपरमात्मावेद्यो वेदितव्यः वेदांतकृत्वेदांतार्थसंप्रदायकृत्गुरुरित्यर्थः वेदवित्वेद
र्थविदेवचाहं ।। भगवतईश्वरस्यनारायणारव्यस्यविभूतिसंक्षेपतउक्तो विशिष्टोपाधिकृतः यदादित्यगतंतेजइत्यादिना ।।
अथाधुनातस्यैवक्षराक्षरोपाधिप्रविभक्ततयानिरुपाधिकस्यकेवलस्यस्वरूपनिर्दिधारयिषयोत्तरश्लोकाआरभ्यं
ते ।। तत्रसर्वमेवातीतानागताध्यायार्थजातंत्रिधाराशीकृत्याह ।। १५ ।। श्रीरामः ।।

अ०१५ ।
२८८ ।। रामः ।

परिहरति । वेदेति । तदर्थसंप्रदायप्रवर्तकत्वार्थंतदर्थयाथात्म्यज्ञानवत्त्वमाह ।। वेदार्थेति ।। १५ ।। उत्तरश्लोकत्रयतात्पर्यंवक्तुंवृत्तंकी
र्तयति ।। भगवत इति । विशिष्टोपाधिरादित्यादिः संप्रत्याध्यायसमाप्तेरुत्तरसंदर्भस्यतात्पर्यमाह ।। अथेति । नकेवलत्वंनिरुपा
धिकात्मस्वरूपनिर्धारणयोत्तरग्रंथः ।। किंतुसर्वस्यैवगीताशास्त्रस्यार्थनिर्णयार्थमाह ।। तत्रेति ।। क्षराक्षरोपाधिभ्यांपरमात्मनाचराशित्रयं

उक्तेनसर्वात्मत्वेनाऽशुद्ध्यादिदोषप्रसक्तावुक्तं ॥ द्वाविमाविति ॥ पुरुषोपाधित्वात्पुरुषत्वंनसाक्षादितिविवक्षित्वाह ॥ पुरुषाविति ॥ परपुरुषंव्या
वर्तयन्ति भगवतइति ॥ तत्रकार्यलिंगकमनुमानंसूचयन्ति ॥ क्षराख्यस्येति ॥ मायाशक्तिंविनाभोक्तॄणांकर्मादिसंस्कारादेवोक्तका
र्योत्पत्तिरित्याशंक्यतस्यनिमित्तत्वेपिमायायाशक्तिरुपादानमितिमताह ॥ अनेकेति ॥ कामकर्मादीत्यादिशब्देनज्ञानंगृह्यते ॥ प्रकृति
पुरुषंचैवेतिप्रकृत्योरिहग्रहणमितिशंकामाकांक्षाद्वारावारयति ॥ कौनाविति ॥ कूटशब्दार्थमुक्त्वातेनस्थितस्यकूटस्थत्वेनेति

द्वाविमौपुरुषौलोकेक्षरश्चाक्षरएवच ॥ क्षरःसर्वाणिभूतानिकूटस्थोऽक्षरउच्यते ॥ १६ ॥ द्वौइमौपृथग्राशीकृतौपुरुषौ
विलुच्येते ॥ लोकेसंसारे ॥ क्षरश्चाक्षरश्च क्षरतीतिक्षरोविनाशीएकोराशिरपरःपुरुषोऽक्षरस्तद्विपरीतोभगवतोमाया
शक्तिःक्षराख्यस्यपुरुषस्योत्पत्तिबीजंअनेकसंसारिजंतुकामकर्मादिसंस्काराश्रयोऽक्षरःपुरुषउच्यते ॥ कौतौपुरुषौ
वित्याह ॥ स्वयमेवभगवान् ॥ क्षरःसर्वाणिभूतानिसमस्तंविकारजातमित्यर्थः ॥ कूटस्थःकूटोराशिरिवस्थितःअथवा
कूटोमायावंचनाजिह्मत्वंकुटिलताचेतिपर्यायाः ॥ अनेकमायादिप्रकारेणस्थितःकूटस्थःसंसारबीजानंत्यान्नक्षरती
त्यक्षरउच्यते ॥ आभ्यांक्षराक्षराभ्यांविलक्षणःक्षराक्षरोपाधिद्वयदोषेणास्पृष्टोनित्यशुद्धबुद्धमुक्तस्वभावः ॥ ५१ ॥ श्रीरा:

प्र
पिडितमर्थमाह ॥ अनेकेति ॥ तस्यकथमक्षरत्वंविनाब्रह्मज्ञानमनाशादित्याह ॥ संसारेति ॥ १६ ॥ कार्यकारणाख्ययोराशीदर्शयित्वारा
श्यंतरंदर्शयन्ति ॥ अभ्यामिति ॥ वैलक्षण्यफलमाह ॥ क्षरेति ॥ उपाधिद्वयकृतेगुणदोषाऽस्पर्शफलितमाह ॥ नित्येति ॥ आभ्यांक्ष
राक्षराभ्यामितियावत् ॥ ५१ ॥

आदी॰
९॥

त्तमोन्यइतिपदद्वयंव्याख्यातः सर्वथैवक्षराक्षरात्मकत्वाभावद्योतनार्थंतदवर्गस्यान्यत्वमुक्तंतस्यानंत्यंनिरस्यति॥ सएवेति॥ लोकत्रयमित्युपल
क्षणंसर्वंजगदत्रविवक्षितंचैतन्यमेवबलंतच्छक्तिर्मायायाधत्तयेतियावत्॥ जगद्धारणेपरस्यव्यापारांतरंवारयति॥ स्वरूपेति॥ नचा
न्यान्योधारयितास्यतोऽचलत्वादित्याह॥ अव्ययइति॥ संयुक्तमेतत्क्षरमक्षरंचव्यक्ताव्यक्तंभरतेविश्वमीशः इतिश्रुतस्यार्थंगृहीतवान्॥

उत्तमःपुरुषस्त्वन्यःपरमात्मेत्युदाहृतः॥ योलोकत्रयमाविश्यबिभर्त्यव्ययईश्वरः॥१७॥ उत्तमः उत्कृष्टतमः पुरुषः तुअ
न्य अत्यंतविलक्षणः॥ आभ्यांपरमात्मेतिपरश्चासौआत्माचदेहाद्यविद्याकृतात्मभ्योऽन्नमयादिभ्यःपंचभ्यःआत्मा
भ
चसर्वभूतानांप्रत्यक्चेतनइत्यतःपरमात्मेत्युदाहृतउक्तोवेदांतेषुसएवविशिष्यते॥ योलोकत्रयंभूर्भुवःस्वराख्यंस्व
स
कीययामाययाचैतन्यबलशक्त्याऽऽविश्यप्रविश्यबिभर्तिस्वरूपसद्भावमात्रेणबिभर्तिधारयतिऽव्ययोनास्यव्ययोवि
द्यतइत्यव्ययः॥ ईश्वरःसर्वज्ञोनारायणाख्यईशनशीलः॥ यथाव्याख्यातस्येश्वरस्यपुरुषोत्तमइत्येतन्नामप्रसिद्धं॥
तस्यनाम॥ निर्वचनप्रसिद्ध्यर्थवत्त्वंनाम्नोदर्शयन्निरतिशयोऽहमीश्वरइत्यात्मानंदर्शयतिभगवान्॥ यस्मात्क्ष
अ॰१५॥
रमतीतोऽहमक्षरादपिचोत्तमः॥ अतोस्मिलोकेवेदेचप्रथितःपुरुषोत्तमः॥१८॥ छ॥ श्रीरामचंद्रायनमः॥७
२८९॥ राम॰

ईश्वरइति॥१७॥ किंचलोकवेदयोर्भगवन्नामप्रसिद्ध्यासिद्धमप्रपंचत्वमित्याह॥ यथेति॥ अश्वकर्णादिवदस्यनाम्नोरू
ढत्वादर्थविशेषाभावात्॥ भगवतोपिलौकिकेश्वरत्ववदीश्वरत्वंसातिशयमितिनेत्याह॥ तस्येति॥ श्रीरामायनमः॥७

भिव

यस्मादित्यस्यापेक्षितं निक्षिपति ॥ अतइति ॥ सउत्तमः पुरुषइतिवाक्यशेषः ॥१८॥ आत्मनोऽप्रपंचत्वं ज्ञानफलोक्त्यास्तौति ॥ अथेति ॥ यथो
२। क्तविशेषणं सर्वात्मत्वादिविशेषणोपेतमितियावत् ॥ इत्थाइत्थैंनीतत्वं यथोक्तप्रकारः संमोहवर्जितः ॥ संमोहेन देहादि[illegible]आत्मात्मीयत्वबु
द्ध्यारहितइत्यर्थः ॥ भगवंतं जानतः सर्ववित्वं तस्यैव सर्वात्मनामेयत्वादित्याह ॥ ससर्वविदिति ॥ सर्वात्मनि मय्येवासक्तचित्तत्वेनेत्यर्थः ॥ १९।

यस्मात्क्षरमतीतोहं संसारमायावृक्षमश्वत्थाख्यं अतीक्रांतोऽहं अक्षरादपि संसारवृक्षबीजभूतादपि चोत्तमः उत्कृष्टत
मः ॥ उर्द्धतमोर्वांतत्ताभ्यां क्षराक्षराभ्यामुत्तमत्वादस्मि भवामि लोके वेदे च प्रथितः प्रख्यातः पुरुषोत्तमइत्येवं मां भक्तज
नाविदुः कवयः काव्यादिषु चेदं नामनिबध्नंति ॥ पुरुषोत्तमइति अनेन अभिधानाभिगृणंति ॥ अथेदानीं यथानिरुक्तमात्मानं योवे ने
दतस्येदं फलमुच्यते ॥ यो मामेवमसंमूढो जानाति पुरुषोत्तमं ॥ स सर्वविद्भजति मां सर्वभावेन भारत ॥१९॥ यो मामीश्वरं यथो
क्तविशेषणमेवं यथोक्तेन प्रकारेणासंमूढः संमोहवर्ज्जितः सन् जानात्ययमहमस्मीति पुरुषोत्तमं ॥ ससर्ववित् सर्वात्मना सर्वं वे
त्तीति सर्वज्ञः सर्वभूतस्थं सर्वात्मना भजति मां सर्वभावेन सर्वात्मिसँचितया हे भारत ॥छ॥ अस्मिन्नध्याये भगवतत्वज्ञानं मोक्ष क्त
फलमुक्त्वाऽथेदानीं तत्स्तौति ॥ इति गुह्यतमं शास्त्रमिदमुक्तं मयानघ ॥ एतद्बुद्ध्वा बुद्धिमान्स्यात्कृतकृत्यश्च भारत ॥२०॥
इत्येतत् गुह्यतमं गोप्यतमममत्यंत रहस्यंरत्येतत् ॥ किंतत् शास्त्रं यद्यपि गीताख्यं शास्त्रं समस्तमुच्यते तेन तथाप्ययमेवाध्याय
॥ इह शास्त्रमित्युच्यते स्तुत्यर्थः प्रकरणात् ॥छ॥॥छ॥ श्रीरामः ॥

अध्यायार्थमनूद्योपसंहारश्लोकमवतारयति ॥ अस्मिन्निति ॥ सर्वस्यां गीतायां शास्त्रशब्दे वक्तव्ये कथमस्मिन्नेवाध्याये तत्प्रयोगः स्यादित्याशंक्याह ॥
॥ यद्यपीति ॥२०॥

टी०॥
॥ राम

संनिहितमध्यायंस्तोतुमपिकृत्स्नंहिशास्त्रशब्दसामर्थ्याभावान्नाह॥ सर्वोहीति॥ गीताशास्त्रार्थस्यसर्वस्यात्रसंक्षिप्तत्वाद्वकेवलंशास्त्रशब्दोन
भवति॥ किंतुवेदार्थस्यापिसर्वस्यात्रसमाप्तेर्युक्तंशास्त्रपदमित्याह नेति॥ तत्रगमकमाह॥ यस्मिन्निति भगवत्तत्वज्ञानेकृतकृत्यतेत्येतदुप
पादयति॥ विशिष्टेति॥ नान्यथेत्युक्तंप्रपंचयति॥ नचेति॥ सत्यपितत्वज्ञानेकर्मणांकर्तव्यत्वान्नकर्तव्यसमाप्तिरित्याशंक्याह॥ सर्वमिति॥

गीताशास्त्रार्थोऽस्मिन्नध्यायेसमासेनोक्तोनकेवलंसर्वश्चवेदार्थइहपरिसमाप्तोयस्तंवेदसवेदवित्॥ वेदैश्चसर्वैरहमे
ववेद्यइतिचोक्तं॥ इदमुक्तंकथितंमयाहेअनघअपाप॥ एतच्छास्त्रंयथादर्शितार्थंबुद्ध्वाबुद्धिमान्स्यात्भवेत्॥ नान्यथाकृतकृत्य
श्चभारतकृतंकृत्यंकर्तव्यंकार्यंयेनसकृतकृत्योविशिष्टजन्मप्रसूतेनब्राह्मणेनयत्कर्तव्यंतत्सर्वंभगवत्तत्वेविदितेकृतं
भवेदित्यर्थः॥ नचान्यथाकर्तव्यंपरिसमाप्यतेकस्यचिदित्यभिप्रायः॥ सर्वंकर्माखिलंपार्थज्ञानेपरिसमाप्यतइतिचोक्तं
एतद्द्विजन्मसामग्र्यंब्राह्मणस्यविशेषतः॥ प्राप्यैतत्कृतकृत्योहिद्विजोभवतिनान्यथेतिचमानववचनं॥ यतएतत्परमा
र्थतत्वमत्तःश्रुतवानसि॥ अतःकृतार्थस्त्वंभारतेति॥ इतिश्रीगीताभाष्येशंकरभगवत्कृतेपंचदशोध्यायः॥ समाप्तः॥

आ०१५॥
२९०॥राम॥

सर्वमिति॥ तत्वज्ञानेकृतार्थतेत्यत्रमनोरपिसंमतिमाह॥ एतद्धीति॥ भारतेतिसंबोधनतात्पर्यमाह॥ यतइति॥ नरदेहेनात्मनोदेहाद्यतिरिक्तत्वं
चिद्रूपत्वंसर्वज्ञत्वंसर्वात्मत्वंकार्यकारणविनिर्मुक्तत्वेनाप्रपंचत्वंतस्याऽखंडैकरसब्रह्मात्मतत्वज्ञानादशेषपुरुषार्थपरिसमाप्तिरितियु
क्तं॥ ६॥ इतिश्रीगीताभाष्यटीकायांपंचदशोध्यायःसमाप्तः॥ १५॥ श्रीरामकृष्णायनमः॥ श्रीगुरुभ्योनमः॥ ६॥ श्रीरामः॥

नि

॥श्रीगणेशायनमः॥हरिः॥ॐ॥ व्यवहितेनसंबंधं वदन्नध्यायांतरमवतारयति॥दैवीति॥सूचिताराक्षसीमासुरींचैव प्रकृतिंमोहिनीमित्या
दावितिशेषः॥प्रकृतीनांविस्तरेणदर्शनंकुर्वौं योगीसाशंक्य विभज्योपयोगमाह॥संसारेति॥अतीतेचाध्यायेकर्मानुबंधीनिअधश्च
मूलान्यनुसंततानीत्यत्रकर्मव्यंग्यावासनाःसंसारस्यावांतरमूलत्वेनोक्तास्तामनुष्यदेहप्राग्भवीयकर्मानुसारेणव्यज्यमानाःसाति

॥श्रीलक्ष्मायनमः॥दैव्यासुरीराक्षसीचेतिप्राणिनांप्रकृतयोनवमेऽध्यायेसूचितास्तासांविस्तरेणप्रदर्शनायाभयंसत्वसंशु
द्धिरित्यादिरध्यायआरभ्यते॥तत्रसंसारमोक्षायदैवीप्रकृतिर्निर्बंधनायासुरीराक्षसीचेतिदैव्याआदानायप्रदर्शनंक्रियतेइतरयोः
परिवर्ज्जनाय॥श्रीभगवानुवाच॥अभयंसत्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः॥दानंदमश्चयज्ञश्चस्वाध्यायस्तपआर्जवं॥
अभयमभीरुता॥सत्वसंशुद्धिःसत्वस्यांतःकरणस्यव्यवहारेषुपरवंचनादिमायानृतादिपरिवर्ज्जनंशुद्धभावेनव्यवहा
ररसर्थः॥ज्ञानयोगव्यवस्थितिः॥ज्ञानंशास्त्रतःआचार्यतश्चात्मादिपदार्थानामवगमोऽवगतानामिंद्रियाद्युपसंहा
रेणैकाग्र्य तयास्वात्मसंवेद्यतापादनंयोगः तयोर्ज्ञानयोगयोर्व्यवस्थितिर्व्यवस्थानंतन्निष्ठता॥१॥श्रीरामः॥

दि दैनदैव्यादिप्रकृतित्रयत्वेनविभक्ताआविश्चिकीर्षुर्भगवानुक्तवानित्याह॥भगवानिति॥अभीरुताशास्त्रोपदिष्टेऽर्थेसंदेह
हि[illegible]ननिश्चलत्वं॥परवंचनापरस्यव्याजेनवशीकरणं॥मायाहृदयेऽन्यथाकृत्वाबहिरन्यथाव्यवहरणं॥अनृतंअयथादृष्टकथनं॥
॥०आदिपदेनविप्रलंभविभ्रमादिग्रहः॥उक्तमर्थंसंक्षिप्याह॥शुद्धेति॥१॥

एषेत्सभयाद्याज्ञानादिस्थितिस्तंतास्त्रिधोक्तेतियावत्।।तामेवसात्त्विकींप्रकृतिंप्रकटयति।।यत्रेति।।ज्ञानेकर्मणिवाऽधिकृतानामभीरुताख्याया
प्रकृतिः।।सातेषांतत्रसात्त्विकीसंपदित्यर्थः।।महाभाग्यानामस्तुनमोदैवीसंपदुक्तासंप्रतिसर्वेषांयथासंभवंसंपदंव्यपदिशति।।दान
मिति।।बाह्यकरणविशेषणेकारणमाह।।अंतःकरणस्येति।।देवयज्ञादिरित्यादिशब्देनपितृयज्ञोभूतयज्ञोमनुष्ययज्ञश्चेतित्रयमुक्तं।।

एषाप्रधानादैवीसात्त्विकीसंपत्।।यत्रचयेषामधिकृतानांयाप्रकृतिःईदृशीसंभवतिसात्त्विकीसोच्यते।।दानंयथाशक्तिसंविभागो
ऽन्नादीनां।।दमश्चबाह्यकरणानामुपशमः।।अंतःकरणस्योपशमंशांतिंवक्ष्यति।।यज्ञश्चश्रौतोऽग्निहोत्रादिःस्मार्तश्चदेव
यज्ञादिः।।स्वाध्यायोऽत्रऋग्वेदाद्यध्ययनमदृष्टार्थंतपोवक्ष्यमाणंशारीरादि।।आर्जवमृजुत्वंसर्वदा।।किंच।।अहिंसास
त्यमक्रोधस्त्यागःशांतिरपैशुनं।।दयाभूते[illegible]लोलुत्वंमार्दवंह्रीरचापलं।।१।।अहिंसाहिंसनंप्राणिनांपीडावर्जनं।।सत्यम
प्रियानृतवर्जितंयथाभूतार्थवचनं।।अक्रोधःपरैराकृष्टस्याभिहतस्यवाप्राप्तस्यक्रोधस्योपशमनं।।त्यागःसंन्यासः
सर्वदानस्योक्तत्वात्।।शांतिरंतःकरणस्योपशमः।।अपैशुनंअपिशुनता।।परस्मैपररंध्रप्रकटीकरणंपैशुनंतदभा
वोऽपैशुनं।।दयाकृपाभूतेषुदुःखितेषु।।अलोलुत्वंइंद्रियाणांविषयसन्निधानेप्यविक्रिया।।मार्दवंमृदुता।।अक्रौर्यं।।प।।

ब्रह्मयज्ञस्यस्वाध्यायेनपृथक्करणात्।।१।।दैवींसंपदमभिजातस्यविशेषणानिदर्शयति।।किंचेति।।त्यागशब्देनदानंकस्मान्नोच्यतेतत्राह।।
।।सर्वमिति।।

लज्जा अकार्यनिवृत्तिहेतुर्गर्हानिमित्ता मनोवृत्तिः ॥२॥ दैवीं संपदं प्राप्तस्य विशेषणांतराण्यपि संतीत्याह ॥ किंचेति व्यावर्त्यं कीर्तयति ॥ नेति
अध्यात्माधिकारादिति शेषः ॥ क्षमाक्रोधयोरेकार्थत्वेन पौनरुक्त्यमाशंक्य परिहरति ॥ उत्पन्नायामिति ॥ तयोरेवं विशेषादपौनरुक्त्यं फल

ह्रीर्लज्जा अचापलमसति प्रयोजने वाक्पाणिपादादीनामव्यापारयितृत्वं ॥ किंच ॥ तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता ॥
भवंति संपदं दैवीमभिजातस्य भारत ॥३॥ तेजः प्रागल्भ्यं न त्वग्गता दीप्तिः ॥ क्षमा आक्रुष्टस्य ताडितस्य वांतर्विक्रियानुत्पत्तिर्
त्पन्नायां विक्रियायां प्रशमनमक्रोधस्त्ववोचाम ॥ इत्थं क्षमाया अक्रोधस्य च विशेषः ॥ धृतिर्देहेंद्रियेष्ववसादं प्राप्तेषु तस्य प्रतिषेधकोंतःक
रणवृत्तिविशेषो येनोत्तंभितानि करणानि देहश्च नावसीदंति ॥ शौचं द्विविधं ॥ मृज्जलाभ्यां कृतं बाह्यमाभ्यंतरं मनोबुद्ध्योर्नैर्मल्यं माया
रागादिकालुष्याभावः ॥ एवं द्विविधं शौचं ॥ अद्रोहः परजिघांसाभावोऽहिंसनं ॥ नातिमानिता अत्यर्थं मानोऽतिमानः स यस्य विद्य
तेसोऽतिमानी तद्भावोऽतिमानिता ॥ तदभावो नातिमानिता आत्मनः पूज्यतातिशयभावनाभाव इत्यर्थः ॥ भवंत्यभयादीन्येतदंतानि
ति ॥ संपदमभिजातस्य किंविशिष्टां संपदं दैवीं ॥

तीत्याह ॥ एवमिति ॥ धृतिविशेषमेव विशदयति ॥ येनेति ॥ शौचस्य द्वैविध्यमेव प्रकटयति ॥ मृज्जलेत्यादिना ॥ नैर्मल्यमेव स्फोरयति ॥ मायेति
॥ उक्तमुपसंहरति ॥ एवमिति ॥ अतिमानिताभावमेव व्यनक्ति ॥ आत्मन इति ॥ कस्यैतानि विशेषणानीत्यपेक्षायामाह ॥ भवंतीति ॥ ३ ॥ श्रीरामः

भा॰टी॰

२॥

साधकस्यमनुष्यदेहस्थस्यैवकथंदेवसंपदमभिलक्ष्यजातत्वमित्याशंक्याह॥देवानामिति॥३॥आदेयत्वेनदैवींसंपदमुक्त्वाहेयत्वेनासुरींसंपदमाह॥अथेति॥उत्सेकोमदोमहदवधीरणाहेतुरात्मन्युत्कृष्टत्वाध्यारोपोऽभिमानःक्रोधस्तुकोपापरपर्यायःस्वपरापकारप्रवृत्तिहेतुर्नेत्रा

देवानांसंपत्तिमभिलक्ष्यजातस्यदैवीविभूत्यर्हस्यभाविकल्याणस्येत्यर्थः॥हेभारत॥अथेदानीमासुरीसंपदुच्यते॥दंभोदर्पोऽभिमानश्च
क्रोधःपारुष्यमेवच॥अज्ञानंचाभिजातस्यपार्थसंपदमासुरीं॥४॥दंभोधर्मध्वजित्वंदर्पोधनस्वजनादिनिमित्तउत्सेकोऽभिमानः
पूर्वोक्तःक्रोधश्च॥पारुष्यमेवचपरुषवचनंयथाकाणंचक्षुष्मान् विरूपंरूपवान्हीनाभिजनंउत्तमाभिजनइत्यादिअज्ञानंचाविवे
कज्ञानंमिथ्याप्रत्ययः कर्तव्याकर्तव्यादिविषयमभिजातस्यपार्थकिमभिजातस्येत्याह॥संपदमासुरीं॥असुराणांसंपत्तिमा
सुरीतामभिजातस्येत्यर्थः॥अनयोःसंपदोःकार्यमुच्यते॥दैवीसंपद्विमोक्षायनिबंधायासुरीमता॥माशुचःसंपदंदैवीमभिजा
तोऽसिपांडव॥५॥दैवीसंपत्यासाविमोक्षायसंसारबंधनान्निबंधायनियतोबंधोनिबंधस्तदर्थमासुरीसंपत्॥मताभिप्रेतान

पाराक्षसीच॥५॥

दिविकारलिंगोंतःकरणवृत्तिविशेषः॥परुषोनिष्ठुरःप्रत्यक्षरूक्षवाक्तस्यभावःपारुष्यंतदुदाहरन्ति॥यथेति॥तामभि
जातस्यदंभादीन्यज्ञानांतानिभवंतीत्यनुषज्यते॥४॥कार्यफलविभागःआसुरीत्युपलक्षणंराक्षसी
॥चेतिद्रष्टव्यमित्याह॥तथेति॥५॥

अ॰१६॥

२९८ राम:॥

फलविभागे संपदोरेवमुक्ते सतीत्यार्जुनस्याभिप्रायं भगवनोवचनमित्याह।। नचेति।। नत्वाभिजातस्यं हेतत्करोतीति।। हे पांडवेति।। निर्दयानां रक्षसां
संपत्तृतीयास्ति सा कस्मान्नोक्तेत्याशंक्यासुर्यामंतर्भावादित्याह।। द्वाविति।। भूतानां द्वैविध्ये मानत्वेनोक्तापि ब्राह्मणमुदाहरति।। द्वयाहेति।। सं

नन्वेवमुक्ते सत्यर्जुनस्यांतर्गतं भावं किमहमासुरीसंपद्युक्तः किंवा दैवीसंपद्युक्तः इत्येवमालोचनारूपं भावमालक्ष्याह भगवान् मा शुचः मा शो
कं मा कार्षीः संपदं दैवीमभिजातोऽस्यभिलक्ष्य जातोऽसि भाविकल्याणस्त्वमसीत्यर्थः।। हे पांडव।। द्वौ भूतसर्गौ लोकेऽस्मिन्दैव आसुर एव स
च।। दैवो विस्तरशः प्रोक्त आसुरं पार्थ मे शृणु।। ६।। द्वाविति संख्याकौ भूतसर्गौ भूतानां मनुष्याणां सर्गौ भूतसृष्टी सर्गौ सृज्येते इति स
र्गौ भूतान्येव सृज्यमानानि दैवासुरसंपद्द्वययुक्तानीति भूतसर्गौ इत्युच्यते।। द्वयाह प्राजापत्या देवाश्चासुराश्चेति श्रुतेः।। लोके
ऽस्मिन् संसारे इत्यर्थः।। सर्वेषां द्वैविध्योपपन्नेः लोकेस्मिन् मनुष्यलोके कौ भूतसर्गौ इत्युच्यते।। प्रकृतानाचेवं दैव आसुर एव च।। पु
उक्तयोरेव च पुनरनुवादे प्रयोजनमाह।। दैवो भूतसर्गोऽभयं सत्वसंशुद्धिरित्यादिना विस्तरशो विस्तरप्रकारैः प्रोक्तः कथितो
न त्वासुरो विस्तरशो गदितोऽतस्तत्परिवर्जनार्थमासुरं पार्थ मे मम वचनादुच्यमानं विस्तरशः श्रवणावधारय।। आख्याय परि
समाप्तेरासुरी संपत् प्राणि विशेषविषयत्वेन प्रदर्श्यते।। प्रत्यक्षीकरणेन च शक्यतेऽस्याः परिवर्जनं कर्तुमिति।। ६।। श्रीरामः

संपद्द्वययुक्तेभ्योऽतिरिक्तानामपि प्राणिभेदानां संभवात्कुतो भूतानां द्वित्वनियतिरित्याशंक्याह।। सर्वेषामिति।। नन्वध्यायशेषेणासुरसंपदुपदर्शनमयु
क्तं तस्यास्त्याज्यत्वेन पंकप्रक्षालनन्यायावतारादित्याशंक्याह।। प्रत्यक्षीकरणेनेति।। ६।।

वर्जनीयामासुरीं संपदं विवृणोति ॥ प्रवृत्तिं चेति ॥ तां विहितां प्रवृत्तिं न जानंतीत्यर्थः ॥ तां च निषिद्धां क्रियां न जानंतीति संबंधः ॥ न शौचमित्या
देस्तात्पर्यमाह ॥ अनाचारा इति शौचसत्ययोराचारांतर्भावेपि ब्राह्मणपरिव्राजकन्यायेन पृथगुपादानं ॥ ७ ॥ आसुराणांजनानां ॰

प्रवृत्तिं च निवृत्तिं च जना न विदुरासुराः ॥ न शौचं नापि चाचारो न सत्यं तेषु विद्यते ॥ ७ ॥ प्रवृत्तिं च प्रवर्त्तनं यस्मिन्पुरुषार्थसाधने
कर्त्तव्यं सा प्रवृत्तिस्तां प्रवृत्तिं च निवृत्तिं च तद्विपरीतां यस्मादनर्थहेतोर्निवर्त्तितव्यं सा निवृत्तिस्तां च ॥ जना आसुरा न विदुः न जा
नंति ॥ न केवलं प्रवृत्तिनिवृत्ती एव न विदुः । न शौचं च विदुः नापि चारो न सत्यं तेषु विद्यते अशौचाः अनाचाराः ॥ मायाविनो ऽ
नृतवादिनो ह्यासुराः ॥ किंच ॥ असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरं ॥ अपरस्परसंभूतं किमन्यत्कामहैतुकं ॥ ८ ॥ असत्यं
यथा वयमनृतप्रायास्तथेदं जगत्सर्वमसत्यं अप्रतिष्ठं च ॥ नास्य धर्माधर्मौ प्रतिष्ठा अस्त्यतो ऽप्रतिष्ठं चेति ते आसुरा जनाः ज
गदाहुरनीश्वरं ॥ न च धर्माधर्मसव्यपेक्षको ऽस्येशितेश्वरो न विद्यत इत्यतो ऽनीश्वरं जगदाहुः ॥ किंच ॥ अपरस्परसंभूतं
अपरश्च परश्चेत्यपरस्परं अन्योन्यमित्यर्थः कामप्रयुक्तयोः स्त्रीपुरुषयोरन्योन्यसंयोगात् जगत्सर्वं संभूतं किमन्यत्का
मैहतुकं कामहेतुकमेव कामहैतुकं किमन्यत् जगतः कारणं न किंचिददृष्टं धर्माधर्मादिकारणांतरं विद्यतेतुलैः काम एव प्राणिनां कारणमिति लोकायतिकदृष्टिरियं ॥
विशेषणांतराण्यपि संतीत्याह ॥ किंचेति ॥ विद्यते इत्याहुरिति पूर्वेण संबंधः शास्त्रैकगम्यमदृष्टं निमित्तीकृत्य पक्षस्याधिष्ठात्रात्मकेन ब्रह्मणा रहितं
जगदिष्यते चेत्कथं तदुत्पत्तिरित्याशंक्याह ॥ किंचेति ॥ किमन्यदित्यादेराक्षेपस्य तात्पर्यमाह ॥ न किंचिदिति ॥ ८ ॥ श्रीरामायनमः ॥ श्री पु

८

यथोक्ताद्दृष्टिर्भ्रान्तदृष्टिर्वदिष्टैवेत्याशंक्याह॥ एतामिति॥ प्रागुपदिष्टामेतां लोकायतिकदृष्टिमवलंब्येत्यादिना यावत्॥ नष्टस्वभावत्वमेवस्पष्टयति॥ विभ्रष्टेति॥
विषयबुद्धेरल्पत्वं दृष्टमात्रोद्देशेन प्रवर्तनत्वं जगतः॥ प्राणिजातस्येत्यादिना यावत्॥९॥ तानेव दुराचारानासुरान्प्रकारांतरेण विशिनष्टि॥ तेचेति॥ १०१)
एतांदृष्टिमवष्टभ्यनष्टात्मानोऽल्पबुद्धयः॥ प्रभवंत्युग्रकर्माणः क्षयायजगतोऽहिताः॥९॥ एतांदृष्टिंअवष्टभ्यआश्रित्यनष्टात्मानोनष्टस्वभा
ऽल्प वाविभ्रष्टपरलोकसाधनाः अल्पबुद्धयोविषयाऽल्पैवबुद्धिर्येषांतेऽल्पबुद्धयः॥ प्रभवंतिउद्भवंतिउग्रकर्माणः क्रूरकर्माणोहिंसात्मकाः
क्षयायजगतः प्रभवंतीतिसंबंधः॥ जगतोऽहिताःशत्रवइत्यर्थः॥ क्षयायप्रव[illegible]त्तान्॥ तेच॥ काममाश्रित्यदुःष्पूरंदंभमानमदान्वि
ताः॥ मोहाद्गृहीत्वाऽसद्ग्राहान्प्रवर्ततेऽशुचिव्रताः॥१०॥ काममिच्छाविशेषमाश्रित्यावष्टभ्यदुःष्पूरमशक्यपूरणंदंभमानमदान्विताः
दंभश्चमानश्चमदश्चदंभमानमदास्तैरन्विताः अनुगताः दंभमानमदान्विताः॥ मोहादविवेकतोगृहीत्वोपादायासद्ग्राहानशुभनिश्च
यान्प्रवर्तंतेलोकेऽशुचिव्रताः॥ अशुचीनिव्रतानियेषांतेअशुचिव्रताः॥ किंच॥ चिंतामपरिमेयांचप्रलयांतामुपाश्रिताः॥ कामोप
भोगपरमाएतावदितिनिश्चिताः॥११॥ चिंतामपरिमेयांचनपरिमातुंशक्यतेयस्याश्चिंतायाइयत्तासाअपरिमेयातांअपरिमेयांप्र
लयांतांमरणांतांउपाश्रिताः सदाचिंतापराइत्यर्थः॥ कामोपभोगपरमाः॥ काम्यंतइतिकामाःशब्दादयस्तदुपभोगपरमाः अयमेवपर
॥ मः पुरुषार्थोयः कामोपभोगस्तत्सेवंनिश्चितात्मानः॥११॥

१२

तानेवविधांतरेणविशिनष्टि॥ किंचेति॥ चिंतामात्मीययोगक्षेमोपायालोचनात्मिकामपरिमेयविषयत्वात्परिमातुमशक्यामाश्रिता
॥७ इतिसंबंधः॥ ॥७॥ श्रीरामचंद्रायनमः॥

एषकामोपभोगः परममयनं सुखस्येत्येतावन्नास्ति किंतु नास्ति सुखमिति निश्चयवंत इत्याह ॥ एतावदिति ॥ ११ ॥ असुरानेव पुनर्विशिनष्टि आशे
ग ति ॥ अशक्योपायार्थविषयाः नवंतोपायार्थविषया वा प्रार्थना वा आशास्ता एव पाशा इव पाशास्तेषां शतैर्बद्धा इव श्रेयसः प्रच्याव्येतस्ततो नी
यमाना इत्याह ॥ आशा एवेति ॥ १२ ॥ तेषामभिप्रायोपि विवेकविरोधीत्याह ॥ इदमद्येति ॥ द्रव्यं गोहिरण्यादि ॥ इदमन्यद्बुद्धौ प्रार्थ्यमानत्वेन
श्री एतावदिति निश्चिताः ॥ आशापाशशतैर्बद्धाः कामक्रोधपरायणाः ॥ ईहंते कामभोगार्थमन्यायेनार्थसंचयान् ॥ १२ ॥ आशापाशश
पा तैराशा एव शैतं तद्व तैराशापाशशतैर्बद्धाः संतः सर्वत आकृष्यमाणाः कामक्रोधपरायणाः कामक्रोधौ परमयनं परमाश्र
यो येषां ते कामक्रोधपरायणाः ईहंते चेष्टंते ॥ कामभोगार्थं कामभोगप्रयोजनाय न धर्मार्थं अन्यायेनार्थसंचयानर्थप्रच
यान् ॥ अर्थप्रचयं अन्यायेन परस्वापहरणादिनेत्यर्थः ॥ ईदृशश्च तेषामभिप्रायः इदमद्य मया लब्धमिदं प्राप्स्ये मनोरथं ॥
इदमस्तीदमपि मे भविष्यति पुनर्धनं ॥ १३ ॥ इदं द्रव्यमद्येदानीं मया लब्धमिदं चान्यं प्राप्स्ये मनोरमं मनोरथं मनस्तुष्टिकरं प्राप्स्ये
इदं चास्ति ॥ इदमपि मे भविष्यत्यागामिनि संवत्सरे पुनर्धनं ॥ तेनाहं धनी विख्यातो भविष्यामीति ॥ असौ मया हतः शत्रुर्हनि
ष्ये चापरानपि ॥ ईश्वरोहमहं भोगी सिद्धोहं बलवान्सुखी ॥ १४ ॥ असौ देवदत्तनामा मया हतो दुर्जयः शत्रुर्हनिष्ये चापरानन्यान्वरा
का~~न्सपत्ना~~नपि किमेते करिष्यंतीति तपस्विनः ॥ सर्वथा हि नास्ति मत्तुल्यः ॥ ५२ ॥

विपरिवर्तमानमित्येतत् ॥ १३ ॥ यथोक्ते मदभिप्राये प्रतिबंधकः शत्रुरपि न संभवतीत्याह ॥ असाविति ॥ ततोतिहीनानां तस्यापरिभ
वेपि तत्तुल्यानां शत्रूणां परिभवो निश्चितो न भवतीत्याशंक्याह ॥ सर्वथेति ॥ ५१ ॥ श्रीरामचंद्रायनमः ॥ श्रीसर्वेश्वरायनमः ॥ १

ऐश्वर्यातिरेकेपि कुतस्ते भोगसामर्थ्यमित्याशंक्याह॥ अहमिति॥ सिद्धत्वमेव स्फुटयति॥ संपन्न इति॥ बलवानोजस्वी सुखी रोगरहितः॥१४॥ वि-
द्याजनधनाभिजनैर्मत्तुल्यो नास्तीत्याह॥ आढ्य इति॥ तथापि यागदानाभ्यां तत्फलेन वा कश्चिदधिको भविष्यतीत्याह॥ किंचेति॥ न च नेषा

ईश्वरोहमहं भोगी सर्वप्रकारेण च सिद्धोहं संपन्नः पुत्रैर्नप्तृभिर्न केवलं मानुषो बलवान्सुखी चाहमेव अन्ये तु भूमिभारावताराः
आढ्योभिजनवानस्मि कोन्योऽस्ति सदृशो मया॥ यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानविमोहिताः॥१५॥ आढ्यो धनेन अभिजनवान्
सप्तपुरुषं श्रोत्रियत्वादिसंपन्नस्तेनापि न मत्तुल्योस्ति कश्चित् कोन्योस्ति सदृशस्तुल्यो मया॥ किंच॥ यक्ष्ये यागेनाप्यन्यानभिभवि-
ष्यामि दास्यामि नटादिभ्यो मोदिष्ये हर्षं चातिशयं प्राप्स्यामीत्येवमज्ञानविमोहिताः विविधं मोहिता अविवेकभावमापन्नाः॥ अने-
कचित्तविभ्रांता मोहजालसमावृताः॥ प्रसक्ताः कामभोगेषु पतंति नरकेऽशुचौ॥१६॥ अनेकचित्तविभ्रांता उक्तप्रकारैरनेकैश्चित्ते-
र्विभ्रांता विविधैर्भ्रांता अनेकचित्तविभ्रांता मोहजालसमावृताः॥ मोहोऽविवेकोऽज्ञानं तदेव जालमिव आवरणात्मकत्वात् तेन स-
मावृताः॥ प्रसक्ताः कामभोगेषु तत्रैव निषण्णाः संतस्तेनोपचितकल्मषाः पतंति नरकेऽशुचौ वैतरण्यादौ॥१६॥ श्री॥

मेषोभिप्रायः साधीयानित्याह॥ एवमिति॥१५॥ उक्तप्रकारविपर्ययेण कृत्स्नात्कृत्स्नविवेकविकलानां किंस्यादित्यपेक्षायामाह॥ अनेकेति॥ पे
॥० कामा विषयास्तेषां भोगेषु तत्प्रयुक्तेषूपभोगेष्विति यावत्॥१८॥ धां२

गी० टी०
२९५।।

ननु तेषामपि केषांचिद्वैदिककर्मणि यागदानादौ प्रवृत्तिपत्तेरयुक्तं वैतरण्यादौपन्नमिति चेन्नत्राह।।आत्मेति।।आसुरीसंपदमभिजातैरधर्मज्ञा
नमेव संचीयते प्रवृत्तैरपि वैदिके वर्त्मनि नैव पुण्यमित्युक्तं।।१७।।आसत्तानास्युन्नरासुराःहरादेवोद्विजं नरस्याह।।अहंकारमिति।।अहंकारमे
वस्फोरयति।।विद्यमानैरिति।।अध्यारोपित वैशिष्ट्यविषयत्वादहंकारस्याविद्यात्मत्वेनाविद्यात्मैमाह।।अविद्याख्य इति।।विवेकि

कता ३

आत्मसंभावितास्तब्धा धनमानमदान्विताः यजंते नामयज्ञैस्ते दंभेनाविधिपूर्वकं।।१७।।आत्मसंभाविताः सर्वगुणविशिष्ट
तयात्मनैव आत्मनि संभाविता न साधुभिः स्तब्धा अप्रणतात्मानो धनमानमदान्विताः धननिमित्तो मानो मदश्च ताभ्यां धन
मानमदाभ्यां अन्विता यजंते।।नामयज्ञैर्नाममात्रैर्यज्ञैस्ते दंभेन धर्मध्वजितया।।अविधिपूर्वकं विहितांगेतिकर्तव्यतारहितैः।।१७।।
अहंकारं बलं दर्पं कामं क्रोधं च संश्रिताः।।मामात्मपरदेहेषु प्रद्विषंतोभ्यसूयकाः।।१८।।अहंकारमहंकरणमहंकारो विद्यमानैरवि
द्यमानैश्च गुणैरात्मन्यध्यारोपितैर्विशिष्टमात्मानमहमिति मन्यते सोऽहंकारोऽविद्याख्यः कष्टतमः सर्वदोषाणां मूलं सर्वा
नर्थप्रवृत्तीनां च तं परिगृह्य तथा बलं पराभिभवनिमित्तं कामरागान्वितं।।दर्पं दर्पो नाम यस्योद्भवे धर्ममतिक्रामति सोऽयमं
तःकरणाश्रयो दोषविशेषः।।कामं स्त्र्यादिविषयं।।क्रोधमनिष्टविषयमेतानन्यांश्च महतो दोषान् संश्रिताः।।१८।।श्रीरामः।।१८।।

अ०१६।।
२९५।।रामः।।

हे भिमतस्यानिष्टत्वादेव हेयत्वं सूचयति।।कष्टतम इति।।तदेव स्पष्टयति।।सर्वेति।।तं संश्रिता इति संबंधः।।कार्यकारणसामर्थ्यमुक्तं विशेषणं बलं।।
अहंकार एव महदवधीरणापर्यंतत्वेन परिणतो दर्पस्तं व्याकरोति।।दर्पो नामेत्यादिना।।अन्यांश्च दोषान्मात्सर्यादीन्।।१८।।श्रीरामायनमः।।१८।।

नकेवलमुक्तमेवतेषांविशेषणंकिंतुकष्टतममस्तिविशेषणांतरमित्याह॥किंचेति॥यद्यपीश्वरंप्रतिद्वेषस्तेषांसंभाव्यतेतथापिकथंस्वदेहेपरदेहेषुचतंप्रति ८
द्वेषः॥नहितत्रभोक्तारमंतरेणेश्वरस्यावस्थानमित्याशंक्याह॥तद्बुद्धीति॥तेषामीश्वरप्रद्वेषमेवप्रकटयति॥मच्छासनेति॥ईश्वरस्यशासनंश्रुति
स्मृतिरूपंतदतिवर्तित्वंतदुक्तार्थज्ञानानुष्ठानपराङ्मुखत्वं॥१८॥तेषामुक्तविशेषणवतामासुराणांकिंस्यादित्यतआह॥तानितीति॥भगवतोनै

किंच॥तेमामीश्वरमात्मपरदेहेषुस्वदेहेपरदेहेषुचतद्बुद्धिकर्मसाक्षिभूतंमांप्रद्विषंतोमच्छासनातिवर्तित्वंप्रद्वेषस्तंकुर्वंतः॥अभ्यसू
यकाः॥सन्मार्गस्थानांगुणेष्वसहमानाः॥तानहंद्विषतःक्रूरान्संसारेषुनराधमान्॥क्षिपाम्यजस्रमशुभानासुरीष्वेवयोनिषु॥१९॥
तानहंसन्मार्गप्रतिपक्षभूतान्साधुद्वेषिणोद्विषतश्चमांक्रूरान्संसारेष्वेवनरकसंसरणमार्गेषुनराधमान्॥अधर्मदोषव
त्वात्क्षिपामिप्रक्षिपामि॥अजस्रंसततंअशुभान्॥अशुभकर्मकारिणः॥आसुरीष्वेवयोनिषुक्रूरकर्मप्रायासुव्याघ्रसिंहादियोनि
षुक्षिपामीत्यनेनसंबंधः॥आसुरींयोनिमापन्नामूढाजन्मनिजन्मनि॥मामप्राप्यैवकौंतेयततोयांत्यधमांगतिं॥१९॥आसुरींयोनिमाप
न्नाःप्रतिपन्नामूढाअविवेकिनोजन्मनिजन्मनिप्रतिजन्मतमोबहुलास्वेवयोनिषुजायमानाअधोगच्छंतोमूढामामीश्वरमप्राप्यैवाना
॥साधैवहेकौंतेयततस्तस्मादपियांत्यधमांनिकृष्टतमांगतिं॥२०॥
त

ल्पप्रसंगंप्रत्यादिशति॥अधर्मेति॥१९॥ननुतेषामपिक्रमेणबहूनांजन्मनामंतेश्रेयोभविष्यतीतित्याह॥आसुरीमिति॥२०॥श्रीरामचंद्रायनमः॥२०॥

गी॰ ता॰ टी॰
२९६

तेषामीश्वरप्राप्तिशंकाभावे कथं तन्निषेधः स्यादित्याशंक्याह ॥ मामित्यादिना ॥ यस्मात्तदासुरीसंपदनर्थपरंपरारूपा सर्वपुरुषार्थपरिपंथिनी तस्मात्सावधानेन
सुरषः स्वतंत्र॰ न कांचित्सारवश्यकरीं योनिमापन्नस्तावदेवनेनासौ परिहरणीयेति समुदायार्थः ॥२०॥ कथमासुरीसंपदनंतभेदवती पुरुषायुषेण
षेपरिहर्तुं शक्येत्याशंक्याह ॥ सर्वस्या इति ॥ संक्षेपोक्तिफलमाह ॥ यस्मिन्निति ॥ कामादौ त्रिविधे सर्वस्यासुरसंपद्भेदस्यांतर्भावे कथमसौ परि

मामप्राप्यैवेति न मत्प्राप्तौ काचिच्छंकास्ति ततो मत्तः शिष्टसाधुमार्गमप्राप्येत्यर्थः ॥ सर्वस्या आसुर्याः संपदः संक्षेप उच्यते ॥ यस्मिन्
त्रिविधे सर्व आसुरीसंपद्भेदोऽन्तर्भवति ॥ यत्परिहारेण परिहृतश्च भवति ॥ यत्त्रितयं सर्वस्यानर्थस्य तदेतदुच्यते ॥ त्रिविधं
नरकस्येदं द्वारं नाशनमात्मनः ॥ कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत् ॥२१॥ त्रिविधं त्रिकारं नरकस्य प्राप्तौ द्वारं नाशनमात्मनः ॥ प्र
न यत् द्वारं प्रविशन्नेव नश्यत्यात्मा न कस्मैचित्पुरुषार्थाय योग्यो भवतीत्येतदुच्यते द्वारं नाशनमात्मन इति ॥ किं तत् ॥ कामः क्रो
धस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत् ॥ यतः एतत् द्वारं नाशनमात्मनस्तस्मात् कामादित्रयमेतत्त्यजेत् त्यागस्तत्रिरियं ॥७॥

आ॰ १६॥
२९६॥ रामः॥

२ हियतेनेत्याह ॥ यत्परिहारेणेति ॥ कामादिपरिहारेणासुरीसंपद्भेदपरिहारेऽपि कथं सर्वानर्थपरिवर्जनमित्याशंक्याह ॥ यन्नरकमिति ॥ कथमात्मनो नित्यस्य नाश
नशंकेत्याह ॥ न कस्मैचिदिति ॥ त्रिविधमिति सामान्यतो दर्शितमाकांक्षाद्वारा विशेषतो दर्शयति ॥ किं तदिति ॥ तस्मादिति ॥ व्याचष्टे ॥ यत इति ॥
॥ कामादित्यागे सत्यनर्थाचरणाश्रेयःप्रतिबंधनिवृत्तिः स्यादिति भावः ॥२१॥७॥

न केवलं श्रेयः समाचरन्नासुरीं संपदं च वर्जयन्मोक्षमेव सम्यग्धीद्वारा लभते किंतु लौकिकमपि सुखमित्यपेरर्थः ॥ आसुर्याः संपदो वर्जने श्रेयस्तश्च
करणे किं कारणं तदाह ॥ सर्वस्येति ॥ तस्य कारणत्वं साधयति ॥ शास्त्रेति ॥२२॥ उक्तमुपजीव्यानंतरश्लोकं प्रवर्तयति ॥ अत इति ॥ शिष्यते बोध्यतेऽने

एतैर्विमुक्तः कौंतेय तमोद्वारैस्त्रिभिर्नरः ॥ आचरत्यात्मनः श्रेयस्ततो याति परां गतिं ॥२२॥ एतैर्विमुक्तः कौंतेय तमोद्वारैस्तमसो नरकस्य
दुःखमोहात्मकस्य द्वाराणि कामादयस्तैरेतैस्त्रिभिर्मुक्तो नर आचरति अनुतिष्ठति ॥ किमात्मनः श्रेयो यत्प्रतिबद्धः पूर्वं नाचरति तदप
गमाद्याचरति ततस्तदाचरणात् याति परां गतिं मोक्षमपीति ॥ सर्वस्यैतस्यासुरीसंपत्परिवर्जनस्य श्रेयआचरणस्य च शास्त्रं कारणं ॥
शास्त्रप्रमाणात्तु उभयं कर्तुं शक्यं नान्यथा ॥ अतः ॥ यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः ॥ न स सिद्धिमवाप्नोति न सुखं न परां गतिं ॥
॥२३॥ यं शास्त्रविधिं शास्त्रं वेदः तस्य विधिं कर्तव्याकर्तव्यज्ञानकारणं विधिप्रतिषेधाख्यमुत्सृज्य त्यक्त्वा वर्तते ॥ कामकारतः ॥ काम
प्रयुक्तः सन् स सिद्धिं पुरुषार्थयोग्यतामवाप्नोति नाप्यस्मिन् लोके सुखं ॥ नापि परां प्रकृष्टां गतिं स्वर्गं मोक्षं वा ॥ ५९ ॥ श्रीरामः ॥

नापूर्वार्थरतिशास्त्रं न च विधिनिषेधात्मकमित्युपेत्य व्याचष्टे ॥ कर्तव्येति ॥ कामस्य करणं कामकारस्तस्माद्धेतोरित्युपर्थे कामाधीनाशास्त्रविमु ख
स्य प्रवृत्तिरित्याह ॥ कामेति ॥ कामाधीनप्रवृत्तेः सता पुमर्थयोग्यस्य सर्वपुरुषार्थासिद्धिरित्याह ॥ नापीति ॥२३॥ श्रीरामचंद्राय नमः ॥ ५९ ॥

गी॰टी॰
२९७॥

शास्त्रादृते कर्मणो निष्फलत्वे फलितमाह॥ तस्मादिति॥ कर्तव्याकर्तव्यौ धर्माधर्मौ तत्र शास्त्रस्य प्रमाणत्वमतः किं कर्तव्यमित्याशंक्याह॥ अत इति॥
स्वकर्म क्षत्रियस्य युद्धादि॥ इतिशब्दोऽध्यायपरिसमाप्त्यर्थः॥ तदनेनाध्यायेन प्राग्भावीयकर्मवासनानुसारेणाभिव्यज्यमानसात्त्विकादिप्रकृति
त्रयविभागेन दैव्यासुरीसंपद्द्वयमादानहानाभ्यामुपपदिश्य कामक्रोधलोभानपहाय पुरुषार्थार्थिना शास्त्रप्रवणेन तदुक्तकारिणा भवितव्यम्

तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ॥ ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि॥२४॥ तस्मात्तु शास्त्रं प्रमाणं ज्ञानसा
धनं ते तव कार्याकार्यव्यवस्थितौ कर्तव्याकर्तव्यव्यवस्थायां॥ अतो ज्ञात्वा बुध्वा शास्त्रविधानोक्तं विधिर्विधानं शास्त्रेण विधा
नं शास्त्रविधानं कुर्यान्न कुर्यादित्येवं लक्षणं तेनोक्तं स्वकर्म यत्तत्कर्तुमिहार्हसि॥ इहेति कर्माधिकारभूमिप्रदर्शनार्थं॥ इति श्री
भगवद्गीताभाष्ये शांकरभगवत्कृते षोडशोऽध्यायः॥ समाप्तः॥ श्रीरामचंद्राय नमः॥ श्रीलक्ष्मिनरसिंहाय नमः॥ छ॥

आ१६॥
२९७॥ रामः॥

मिति निर्धारितं॥२४॥ इति श्रीमच्छुद्धानंदपूज्यपादशिष्यश्रीमदानंदज्ञानविरचितायां श्रीमद्भगवद्गीताभाष्यटीकायां षोडशोऽध्यायः॥
॥समाप्तः॥ छ॥ श्रीरामाय नमः॥ छ॥

॥श्रीगणेशाय नमः॥ हरिः ॐ॥ आस्तिकानां नास्तिकानां च शास्त्रैकचक्षुषां गतिरुक्ता संप्रत्यास्तिकानामेव शास्त्रानभिज्ञानां गतिं जिज्ञासया पृच्छतीत्याह॥ तस्मादिति॥ यजंत इति यागग्रहणं दानादेरप्युपलक्षणं॥ यदि वेदोक्तं विधिमपश्यंतस्तमुत्सृजंति कथं तर्हि श्रद्धधाना यागादि कुर्वंति न हि मानं विनाश्रद्धया यागादि कर्तुं शक्यमित्याशंक्याह॥ श्रुतीति॥ ननु शास्त्रीयं विधिं पश्यंतोपि केचित्तमुपेक्ष्य स्वोत्प्रेक्षया यागादि कुर्वंतो दृश्यंते तेषामिह ये

हरिः॥ ॐ॥ तस्माच्छास्त्रं प्रमाणं त इति भगवद्वाक्याल्लब्धप्रश्नबीजोऽर्जुन उवाच॥ ये शास्त्रविधिमुत्सृज्य यजंते श्रद्धयान्विताः॥ तेषां निष्ठा तु का कृष्ण सत्वमाहो रजस्तमः॥१॥ ये केचित् अविशेषिता[illegible] शास्त्रविधिं शास्त्रविधानं श्रुतिस्मृतिशास्त्रचोदनामुत्सृज्य परित्यज्य यजंते देवादीन् पूजयंति श्रद्धयास्तिक्यबुद्ध्यान्विताः संयुक्ताः संतः श्रुतिलक्षणं स्मृतिलक्षणं वा कंचित् शास्त्रविधिमपश्यंतो वृद्धव्यवहारदर्शनादेव श्रद्दधानतया ये देवादीन् पूजयंति त इह ये शास्त्रविधिमुत्सृज्य यजंते श्रद्धयान्विता इत्येवं गृह्यंते॥ ये पुनः २ कंचित् शास्त्रविधिमुपलभमाना एव तमुत्सृज्यायथाविधि देवादीन् पूजयंति त इह ये शास्त्रविधिमुत्सृज्य यजंत इति न परिगृह्यंते॥ कस्मात् श्रद्धयान्वितत्वविशेषणात्॥ देवादिपूजाविधिपरं किंचित् शास्त्रं पश्यंत एव तदुत्सृज्याश्रद्दधानतया तद्विहितायां देवादिपूजायां श्रद्धयान्विताः प्रवर्तंत इति न शक्यं कल्पयितुं॥

शास्त्रविधिमुत्सृज्येति ग्रहो भविष्यतीत्यत आह॥ ये पुनरिति॥ तेषामत्रापरिग्रहे प्रश्नपूर्वकं हेतुमाह॥ कस्मादिति॥ शास्त्रज्ञानां तदुपेक्षावतां ग्रहेपि विशेषणमविरुद्धमित्याशंक्याव्याघातान्मैवमित्याह॥ देवादीति॥ अश्रद्दधानतया तदुत्सृज्येति संबंधः॥ ६॥

गी०भा०टी०
१८१॥

शास्त्रोक्तंविधिमधिगच्छतामपितमवधीर्यस्वेच्छयादेवपूजादौप्रवृत्तानामसुरेष्वेवांतर्भावोयस्मादनंतराध्यायेसिद्धस्तस्मादास्तिकाधिकारेतेषांप्र
संगोनास्तीत्युपसंहरति॥ यस्मादिति॥ पूर्वोक्ताःशास्त्रानभिज्ञावृद्धव्यवहारानुसारिणइतियावत्॥ तैःश्रद्धयाक्रियमाणंकर्मकुत्रपर्यवस्यती
ख्वतितेषामिति॥ कानिष्ठेत्येतद्विवृणोति॥ सत्त्वमिति॥ कार्याणांकारणैर्व्यपदेशमाश्रित्यतात्पर्यमाह॥ एतदिति॥१॥ विशेषेणेष्टमुत्तरंसा

यस्मात्स्मात्सर्वोक्ताएवयेशास्त्रविधिमुत्सृज्ययजंतेश्रद्धयान्विताइत्यत्रगृह्यंते॥ तेषामेवंभूतानांनिष्ठातुकाकृष्णसत्त्वमा
होरजस्तमः किंसत्त्वंनिष्ठावस्थानंआहोस्वित्रजोऽथवातमइति॥ एतदुक्तंभवति॥ यातेषांदेवादिविषयापूजासाकिंसात्त्विक्याहो
स्विद्राजसीउततामसीति॥ सामान्यविषयःप्रश्नोनाप्रविभज्यप्रतिवचनमर्हतीतिश्रीभगवानुवाच॥ त्रिविधाभवतिश्र
द्धादेहिनांसास्वभावजा॥ सात्त्विकीराजसीचैवतामसीचेतितांशृणु॥२॥ त्रिविधात्रिप्रकाराभवतिश्रद्धा॥ यस्यांनिष्ठात्वंपृच्छ
सिदेहिनांसास्वभावजाजन्मांतरकृतोधर्माधर्मादिसंस्कारोमरणकालेऽभिव्यक्तःस्वभावउच्यते॥ ततोजातास्वभावजा॥

मान्येनवक्तुंनशक्यमित्याशयेनपरिहरति॥ सामान्येति॥ किमितिश्रद्धात्रैविध्यंप्रश्नानुपयुक्तंउच्यतेतत्राह॥ यस्यामिति॥ श्रद्धापूर्विकायां
क्रियायामितियावत्॥ श्रद्धात्रैविध्येहेतुमाह॥ सास्वभावजेति॥ स्वभावशब्दार्थंप्रकृतोपयोगितयाकथयति॥ जन्मांतरेति॥४॥

गी

अ०१७॥
२१८॥राम॥

कथं त्रिविधेत्यपेक्षायामाह ॥ सात्विकीत्यादिना ॥ कथमुक्ता श्रद्धा स्वभावजेत्युत त्राह ॥ तामिति ॥ प्राचीनकर्मोद्बोधिता त्रिविधा वासना स्वभावशब्दिता
त्रिविधायाः श्रद्धाया निमित्तमित्युक्तमिदानीमुपादानं तस्या दर्शयति ॥ सैवमिति ॥ विशिष्टचित्तोपादाना श्रद्धा तत्त्रैविध्ये त्रिविधेति सर्वस्येस्यार्थः
कथं निष्ठायाः सत्वादिप्रकारप्रश्नद्वारा श्रद्धायास्त्रैविध्यनिरूपणमुपयुक्तमिति मन्वानः शंकते ॥ यद्येवमिति ॥ श्रद्धेयं विषयमभिध्या

सात्विकी सत्वनिर्वर्तता देवपूजादिविषया ॥ राजसी रजोनिर्वर्तता यक्षरक्षःपूजादिविषया ॥ तामसी तमोनिर्वर्तता प्रेतपिशाचादिपूजा
विषया एवं त्रिविधां ॥ तामुच्यमानां श्रद्धां शृणु ॥ सैवं त्रिविधा भवतीति ॥ सत्वानुरूपा सर्वस्य श्रद्धा भवति भारत ॥ श्रद्धामयो
यं पुरुषो यो यच्छ्रद्धः स एव सः ॥३॥ सत्वानुरूपा पूर्वजन्मकृतप्रसयविषयविशिष्टसंस्कारोपेतांतःकरणानुरूपा सर्वस्य
प्राणि जातस्य श्रद्धा भवति भारत ॥ यद्येवं ततः किं स्यादित्युच्यते ॥ श्रद्धामयः श्रद्धाप्रायः अयं पुरुषः योयं संसारीजी
वः ॥ कथं यो यच्छ्रद्धो या श्रद्धा यस्य जीवस्य स यच्छ्रद्धः स एव न तत् श्रद्धानुरूप एव जीवः ॥१७॥ श्रीरामकृष्णायनमः ॥१७॥

[illegible]यं स्वयालत्वैव प्रवर्तनं रतिमत्तापरिहरति ॥ उच्यत इति ॥ श्रद्धामयत्वं प्रश्नपूर्वकं कथयति ॥ कथमिति ॥ श्रद्धारवत्वाधिकृते पुरुषे
प्राचुर्येण प्रकृते तिनस्य श्रद्धामयत्वसिद्धिरित्यर्थः ॥३॥ श्रीरामकृष्णायनमः ॥ श्रीगुरुगुरुसुर्नियनमः ॥ श्रीसीवायनमः ॥५॥ ७

भा॰टी॰
९९॥

तथापिकथंसत्वादिनिष्ठायथोक्तस्यपुरुषस्यज्ञातुंशक्येत्याशंक्याह॥तत्तश्चेति॥अधिकृतस्यपुरुषस्यश्रद्धाप्रधानत्वादित्यावत्॥देवाः
वस्वादयःयक्षाःकुबेरादयःरक्षांसिनिर्ऋत्यादयःस्वधर्मात्प्रच्युताविप्रादयोदेहपातादूर्ध्वंवायुदेहमापन्नाःप्रेताःएभ्यश्चयथा
यथमाराध्यादेवादयःसात्विकराजसतामसान्सकामान्प्रयच्छंतीतिसामर्थ्यादवगंतव्यं॥४॥ननुसत्वादिनिष्ठाःशास्त्रेण॥

ततश्चकार्येणलिंगेनदेवादिपूजयासत्वादिनिष्ठानुमेयेत्याह॥यजंतेसात्विकादेवान्यक्षरक्षांसिराजसाः॥प्रेतान्भूत
गणांश्चान्येयजंतेतामसाजनाः॥४॥यजंतेप्रजयंतिसात्विकाःसत्वनिष्ठादेवान्यक्षरक्षांसिराजसाः॥प्रेतान्भूतगणां
श्चसप्तमातृकादींश्चान्येयजंतेतामसाजनाः॥एवंकार्यतोनिर्णीताःसत्वादिनिष्ठाःशास्त्रविध्युत्सर्गे॥तत्रकश्चिदेवस
हस्रेषुदेवपूजादितत्परःसत्वनिष्ठोभवति॥बाहुल्येनतुरजोनिष्ठास्तमोनिष्ठाश्चैवप्राणिनोभवंति॥कथं॥अशास्त्रविहि
तंघोरंतप्यंतेयेतपोजनाः॥दंभाहंकारसंयुक्ताःकामरागबलान्विताः॥५॥५॥श्रीमगणपतियनमः॥५॥५॥५॥

आ१७॥
२९९॥रामः॥

ज्ञातुंशक्यतेत्युक्तंकार्यलिंगकानुमानेनेतितत्राह॥एवमिति॥सत्वादिनिष्ठानांजंतूनांअवांतरविशेषंप्रचुरताप्रचुरतारूपंदर्शय
ति॥तत्रेत्यादिना॥राजसानांतामसानांचप्राणिनांप्राचुर्यंप्रश्नद्वाराविवृणोति॥कथमित्यादिना॥५॥श्रीरामायनमः॥५॥

कामश्चकाम्यमानोविषयोरागश्चतद्विषयभोगाभिलाषस्तत्कृतंतन्निमित्तमित्यावत्॥५॥रजोनिष्ठाप्राधान्येनप्रदर्श्यतमोनिष्ठाप्राधान्येन
दर्शयति॥कर्षयंतइति॥कथंशरीरादिसाक्षिणमीश्वरंप्रतिकृशीकरणंप्राणिनांप्रकल्प्यतेतत्राह॥ मदनुशासनेति॥तेषांविपर्यास

अशास्त्रविहितंनशास्त्रविहितंअशास्त्रविहितं॥ घोरंपीडाकरंप्राणिनामात्मनश्च॥तपस्तप्यंतेनिर्वर्त्तयंति॥ येतपोजना
स्तेचदंभाहंकारसंयुक्ताः दंभश्चाहंकारश्चदंभाहंकारौताभ्यांसंयुक्ताः दंभाहंकारसंयुक्ताः॥कामरागबलान्विताः॥
कामश्चरागश्चकामरागौतत्कृतंबलंकामरागबलंतेनान्विताः॥कामरागबलान्विताःकामरागबलैर्वान्विताः॥कर्श
यंतःशरीरस्थंभूतग्राममचेतसः॥ मांचैवांतःशरीरस्थंतान्विद्ध्यासुरनिश्चयान्॥६॥ कर्षयंतः॥कृशीकुर्वंतःश
रीरस्थं॥भूतग्रामंकरणसमुदायमचेतसःअविवेकिनोमांचैवतत्कर्मबुद्धिसाक्षिभूतमंतःशरीरस्थंकर्षयंतोमदनु
शासनाकरणमेवमत्कर्शनंतान्विद्ध्यासुरनिश्चयान्आसुरोनिश्चयोयेषांतेआसुरनिश्चयास्तान्परिहरणार्थंवि
दितुपदेशः॥आहाराणांचरस्यस्निग्धादिवर्गत्रयरूपेणभिन्नानांयथाक्रमंसात्विकराजसतामसपुरुषप्रियत्वदर्श
॥नमिहक्रियते॥७॥

।क

निश्चयवत्त्वांपरिज्ञानंकुत्रोपयुज्यतेतत्राह॥परिहरणार्थमिति॥६॥उत्तरश्लोकपूर्वार्द्धतात्पर्यमाह॥आहाराणामिति॥७॥श्रीरामः॥

स्यादिवर्गस्यसात्विकपुरुषप्रियत्वंकद्वादिवर्गस्यराजसप्रियत्वंयातयामादिवर्गस्यतामसप्रियत्वमिति ॥ प्रदर्शनंकुर्वन्श्लोकयुग्मेनेत्याह ॥ रस्येति ॥ श्लोकोत्तरार्द्धतात्पर्यमाह ॥ तथेति ॥ आहारस्त्रैविध्यवदितियावत् ॥ कथमेतेषांप्रत्येकंत्रैविध्यंतदाहतेषामिति ॥७॥ सात्विकप्री

रस्यस्निग्धादिष्वाहारविशेषेषुआत्मनःप्रीत्यतिरेकेणलिंगेनसात्विकत्वंराजसत्वंतामसत्वंवाबुध्वाराजसतामसलिंगानांआहाराणां परिवर्जनार्थंसत्वलिंगानांचोपादानार्थं ॥ तथायज्ञादीनामपिसत्वादिगुणभेदेनत्रिविधत्वप्रतिपादनमिहराजसतामसान्बुध्वा कथंनुनामपरित्यजेत् ॥ सात्विकानेवानुतिष्ठेदित्येवमर्थं ॥ आहारस्त्वपिसर्वस्यत्रिविधोभवतिप्रियः ॥ यज्ञस्तपस्तथादानंतेषांभे दमिमंशृणु ॥७॥ आहारस्त्वपिसर्वस्यभोक्तुस्त्रिविधोभवतिप्रियःइष्टस्तथायज्ञस्तथातपस्तथादानं ॥ तेषामाहारादीनांभे दमिमंवक्ष्यमाणंशृणु ॥ आयुःसत्वबलारोग्यसुखप्रीतिविवर्द्धनाः ॥ रस्याःस्निग्धाःस्थिराहृद्याआहाराःसात्विकप्रियाः ॥८॥ आयुश्चसत्वंचबलंचारोग्यंचसुखंचप्रीतिश्चतासांविवर्द्धनाः ॥ ~~आयुःसत्वंबलंआरोग्यंसुखंप्रीतिश्चतासांआयुःसत्वबलारोग्य~~ ~~सुखप्रीतिविवर्द्धनाः~~ ॥८॥

रो

आ१७॥
२००रामः॥

तिविषयमाहारविशेषमुदाहरन्ति ॥ आयुरिति ॥ आयुर्ज्योग्जीवनं ॥ सत्वंचित्तस्थैर्यं वीर्यंवाबलंकार्यकरणसामर्थ्यं ॥ आरोग्यता ॥ सुखं अंतराल्हादः प्रीतिः ॥ परेषामपिसंपन्नानांदर्शनात्परमोहर्षःतासांविवर्द्धनाःविवर्द्धयं[illegible]तीतिव्युत्पत्तेः ॥८॥ श्रीरामाः॥

रसोपेताः रसपित्व्याः रसाः देहे चिरकालस्थायित्वं चिरं नरशरीरोपकारहेतुत्वं ॥ ८ ॥ राजसप्रीतिविषयमाहारविशेषं दर्शयति ॥ कट्विति ॥ :
कटुस्तिक्तः कटुकस्य तीक्ष्णशब्देनोक्तत्वान्न रूक्षो विस्नेहः ॥ विदाहि संतापकः ॥ अतिशब्दस्य सर्वत्र योजनामेवाभिनयति ॥ अतिकट्विति ॥

तेच रस्याः रसोपेताः स्निग्धाः स्नेहवंतः स्थिराश्च स्थिरकालस्थायिनो देहे ॥ हृद्याः हृदयप्रियाः आहाराः सात्विकप्रियाः सात्विकस्येष्टाः
कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः ॥ आहारा राजसस्येष्टा दुःखशोकामयप्रदाः ॥ ९ ॥ कटु आम्लः लवणः अत्युष्णः अ
तिशब्दः कट्वम्लादिषु सर्वत्र योज्यो ऽतिकटुरतितीक्ष्णारस्सेवं कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः एवंविधाः आहारा राज
सस्येष्टाः प्रियाः दुःखशोकामयप्रदाः ॥ दुःखं च शोकं चामयं च प्रयच्छंतीति दुःखशोकामयप्रदाः ॥ यातयामं गतरसं पूतिपर्यु
षितं च यत् ॥ उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियं ॥ १० ॥ यातयामं मंदपक्वं निर्वीर्यस्य गतरसेनोक्तत्वात् ॥ गतरसं रसवियुक्तं ॥
पूतिः दुर्गंधि पर्युषितं च यत् ॥ पक्वं सत्रात्र्यंतरितं च यत् ॥ उच्छिष्टमपि च भुक्तशिष्टमुच्छिष्टममेध्यममयज्ञार्हं भोजनमीदृशं
तामसप्रियं ॥ ५ ॥ अथेदानीं यज्ञास्त्रिविधा उच्यन्ते ॥ ५३ ॥

दुःखं तात्कालिकापीडा इष्टवियोगजं दुःखं शोकः आमयो रोगः ॥ ९ ॥ तामसप्रीतिविषयमाहारमुदाहरति ॥ यातयाममिति ॥ ननु नि म
र्वीर्यातयाममुच्यतेनेन पुनः सामिपक्वमिति तत्राह ॥ निर्वीर्यस्येति ॥ १० ॥ हानादानार्थमाहारत्रैविध्यवं विभज्य प्रकृतमप्रास यज्ञत्रै
विध्यं कथयति ॥ अथेति ॥ ५३ ॥ श्रीरामचंद्रायनमः ॥ ५३ ॥

गी॰आ॰१७॰टी
१२

तत्रसात्विकं यज्ञं ज्ञापयति॥ अफलेति॥ फलाभिसंधिं विना यज्ञोस्वरूपमेव भाव्यमिति बुध्वा शास्त्रतोनुद्दिष्टमानो यज्ञः सात्विक इत्यर्थः
॥११॥ राजसं यज्ञं हानार्थं दर्शयति॥ अभिसंधायेति॥ स्वर्गाद्युद्दिश्य धार्मिकत्वख्यापनार्थं च यद्यजनं क्रियते तं यज्ञं राजसं निर्वर्त्तं त्या

अफलाकांक्षिभिर्यज्ञो विधिदृष्टो य इज्यते॥ यष्टव्यमेवेति मनः समाधाय स सात्विकः॥११॥ अफलाकांक्षिभिः फलार्थिभिर्य
ज्ञो विधिदृष्टः॥ शास्त्रचोदनादृष्टो यो यज्ञ इज्यते निर्वर्त्यते॥ यष्टव्यमेवेति यज्ञस्वरूपनिर्वर्तनमेव कार्यमिति मनः समा
धाय नानेन पुरुषार्थो मम कर्तव्य इत्येवं निश्चित्य स सात्विको यज्ञ उच्यते॥ अभिसंधाय तु फलं दंभार्थमपि चैव यत्॥
इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसं॥१२॥ अभिसंधाय तुद्दिश्य तत्फलं॥ दंभार्थमपि च एव यत्॥ इज्यते भरतश्रेष्ठ तं
यज्ञं विद्धि राजसं रजोगुणनिर्वृत्तं॥ विधिहीनमसृष्टान्नं मंत्रहीनमदक्षिणं॥ श्रद्धाविरहितं यज्ञं तामसं परिचक्षते
॥१३॥ विधिहीनं यथाचोदितं विपरीतं॥ असृष्टान्नं ब्राह्मणेभ्यो न सृष्टमन्नं यस्मिन् यज्ञे सोऽसृष्टान्नस्तमसृष्टान्नं मं
त्रहीनं मंत्रतश्च स्वरतो वर्णतश्च वियुक्तं मंत्रहीनमदक्षिणमुक्तदक्षिणारहितं॥ श्रद्धाविरहितं यज्ञं तामसं परि
चक्षते तेन तमो निर्वर्त्यं कथयंति॥ अथेदानीं तपस्त्रिविधमुच्यते॥ देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवं ब्रह्म
॥ चर्यमहिंसा च शारीरं तप उच्यते॥१४॥८३॥

आ॰१७॥
३०१॥ राम॰

ज्यमवगच्छेत्यर्थः॥१२॥ तामसं यज्ञं हानार्थमेवोदाहरति॥ विधीति॥१३॥ सात्विकादिभावं निरूपयितुं सर्वस्य तपसः
स्वरूपं त्रिविधं निरूपयति॥ अथेति॥८२॥ श्रीरामकृष्णायनमः॥ श्रीसदाशिवायनमः॥ श्रीकृष्णायनमः॥८:

तच्छारीरं तपो निर्दिशति ॥ देवेति ॥ देवाः ब्रह्मविष्णुशिवादयः द्विजाः पूज्यत्वात् द्विजोत्तमाः गुरवः पित्रादयः प्राज्ञाः पंडिता विदितवेदितव्यास्तेषां पूजनं प्रणाममंशुश्रूषादि ॥ शौचं मृज्जलाभ्यां शरीरशोधनं ॥ ऋजुत्वं विहितप्रतिषिद्धयोरेकरूपप्रवृत्तिनिवृत्तित्वं ॥ ब्रह्मचर्यं मैथुनासमाचरणं ॥ अहिंसा प्राणिनामपीडनं ॥ शरीरमात्रनिर्वर्त्यत्वमस्य तपसो न संभवतीति मन्वानो विशिनष्टि ॥ शारीरेति ॥ कथं कर्त्रादिसाध्यत्वेन तपसः शारीरत्वं शारीरत्वे वा कथं कर्त्रादिसाध्यत्वमित्याशंक्याह ॥ पंचेति ॥ १४ ॥ संप्रति वाङ्मयं तपो व्यपदिशति ॥ अनुद्वे

देवाश्च द्विजाश्च गुरवश्च प्राज्ञाश्च देवद्विजगुरुप्राज्ञास्तेषां पूजनं देवद्विजगुरुप्राज्ञपूजनं ॥ शौचं आर्जवं ऋजुत्वं ब्रह्मचर्यमहिंसा च शरीरनिर्वर्त्यं शारीरं शरीरप्रधानैः सर्वैरेव कार्यकरणैः कर्त्रादिभिः साध्यं शारीरं तप उच्यते ॥ पंचैते तस्य हेतव इति वक्ष्यति ॥ अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत् ॥ स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते ॥ १५ ॥ अनुद्वेगकरं प्राणिनामदुःखकरं वाक्यं ॥ सत्यं प्रियहितं च यत् ॥ प्रियहिते दृष्टादृष्टार्थे अनुद्वेगकरत्वादिभिर्धर्मैर्वाक्यं विशिष्यते ॥
॥ विशेषणधर्मसमुच्चयार्थश्चशब्दः ॥

गकरमिति ॥ सत्यं यथादृष्टार्थवचनं प्रियं श्रुतिसुखं हितं परिणामपथ्यं ॥ प्रियहितयोर्विधांतरेण विभागमाह ॥ प्रियेति ॥ कथमत्र विशेषणविशेष्यत्वं तदाह ॥ अनुद्वेगेति ॥ विशेषणानां धर्माणामनुद्वेगकरत्वादीनां विशेष्येण वाक्येन समुच्चितानां परस्परसमुच्चयद्योती
॥ चकार इत्याह ॥ विशेषणेति ॥

गी॰आ॰१७॰टी॰ ०२

किमिलितवाक्यमेतैर्विशेष्यते किमिलितवा तेषां मिथः समुच्चयस्त्वाह ॥ परेति ॥ यद्यपि विधायकवाक्यमात्रस्याविशेषितस्य वाङ्मयतपस्त्वानुपपत्तिस्तथापि सत्यवाक्यस्य विशेषणांतराभावेपि वाङ्मयतपस्त्वमित्याशंक्याह ॥ तथेति ॥ तथापि प्रियवाक्यमात्रस्य तथात्वं स्यादित्याशंक्याह ॥ तथा प्रियेति ॥ तथापि परिणामपथ्यं वाक्यमात्रं तथा भविष्यतीति नेत्सौंपमिति प्रश्नपूर्वकं विशदयति ॥ किंपुनरिति ॥ विह ॥ तथाहितेति ॥ कीदृक्तर्हि तपो वाङ्मय ॥ २

परप्रत्यायनार्थं प्रयुक्तस्य वाक्यस्य सत्यप्रियहितानुद्वेगकरत्वादीनामन्यतमेन द्वाभ्यां त्रिभिर्वा हीनत्वं स्यान्यदि न तद्वाङ्मयं तपः ॥ तथा सत्यवा॰क्यस्येतरेषामन्यतमेन द्वाभ्यां त्रिभिर्विहीनतास्याद्यदि न तद्वाङ्मयतपस्त्वं तथा प्रियवाक्यस्यापि अन्यतमेन द्वाभ्यां त्रिभिर्वा विहीनस्य न वाङ्मयतपस्त्वं ॥ तथा हितवाक्यस्यापीतरेषामन्यतमेन द्वाभ्यां त्रिभिर्वा वियुक्तस्य न वाङ्मयतपस्त्वं ॥ किंपुनस्तत्तपो यत्सत्यं वाक्यमनुद्वेगकरं प्रियं हितं च यत्तत्परमं तपो वाङ्मयं यथा शांतो भव वत्स स्वाध्यायं योगं चानुतिष्ठ तथा ते श्रेयो भविष्यतीति ॥ स्वाध्यायाभ्यसनं चैव यथाविधि वाङ्मयं तप उच्यते इति ॥ मनः प्रसादः सौम्यत्वं मौनमात्मविनिग्रहः ॥ भावसंशुद्धिरित्येतत्तपो मानसमुच्यते ॥१६॥ श्रीरामायनमः ॥ आ॰१७॥ २०२॥राम॥

शिष्टे वाङ्मये तपसि दृष्टांतमाह ॥ यथेति ॥ प्राङ्मुखत्वं पवित्रपाणित्वमित्यादिविधानमनतिक्रम्य स्वाध्यायस्यावर्तनमपि वाङ्मयतपस्त्वं न भवतीत्याह ॥ स्वाध्यायेति ॥ वाक्प्राचुर्येण प्रस्तुतास्मिन्निति वाङ्मयं वाक्प्राधान्यमित्यर्थः ॥१५॥ श्रीरामचंद्राय नमः ॥ ८३ ॥ ०

मानसं तपः संक्षिपति॥मन इति॥प्रशांतिमेव व्यनक्ति॥स्वच्छतेति॥मनसः स्वास्थ्यमव्याकुलता नैश्चिंत्यमित्यर्थः॥सौमनस्यं सर्वेभ्यो हितैषित्वं अविहिताचिंतनं च तत्कथं गम्यते तत्राह॥मुखादीति॥तस्य स्वरूपमाह॥अंतःकरणस्येति॥ननु मौनं वाङ्यमनं वाऽस्य येन तपस्त्वं भवति तत्कथं मानसेन तपसि व्यपदिश्यते तत्र वाचः संयमस्य कार्यत्वान्मनःसंयमस्य कारणत्वात्कार्येण कारणं ग्रहणान्मानसेन तपसि मौनमुक्तमित्याह॥वागिति॥यद्वा मौनं मुनिभावो मननमात्मनो मनसो विनिग्रहो निरोधः॥नन्वेवं मौनस्य मनोविनिग्रहस्य च मनसः

मनःप्रसादो मनसः प्रशांतिः प्रसन्नतास्वच्छतापादनं मनःप्रसादः सौम्यत्वं यत्सौमनस्यमाहुर्मुखादिप्रसादकार्यं अंतःकरणस्य वृत्तिः मौनं वाक्संयमोपि मनःसंयमनपूर्वको भवतीति कार्येण कार्येण कारणमुच्यते मनःसंयमो मौनमिति॥आत्मविनिग्रहो मनोनिरोधः॥सर्वतः सामान्यपुरुष आत्मविनिग्रहो वाग्विषयस्यैव मनसः संयमो मौनमिति विशेषः॥भावसंशुद्धिः परैर्व्यवहारकालेऽमायावित्वं भावसंशुद्धिरित्येतत्तपो मानसमुच्यते॥यथोक्तं कायिकं वाचिकं मानसं च तपस्तप्तं नरैः सत्वादिभेदेन कथं त्रिविधं भवतीत्युच्यते॥श्रद्धया परया तप्तं तपस्तत्त्रिविधं नरैः॥अफलाकांक्षिभिर्युक्तैः सात्विकं परिचक्षते॥१७॥श्रीरामचंद्रायनमः॥

अं

संयमत्वेनैकत्वात्पौनरुक्त्यं नेत्याह॥सर्वत इति॥भावस्य हृदयस्य संशुद्धिः रागादिमलविकलतेति व्याचष्टे॥परैरिति॥मानसं मनसा प्रधानेन निर्वर्त्यमित्यर्थः॥१६॥त्रिविधस्य तपसो यथासंभवं सात्विकादिभावेन त्रैविध्यमाकांक्षाद्वारा तत्रैव निक्षिपति॥

॥यथोक्तमिति॥

गी०अ०टी० अधिष्ठानंदेहमात्मवाङ्मनोनिर्वर्त्यमित्यर्थः॥समाहितैःसिद्ध्यसिद्ध्योर्निर्विकारैरितियावत्॥१७॥राजसंतपोनिर्दिशति॥सत्कारेति॥सा
१०४१ धुकारमेवस्फोरयति॥साधुरिति॥दंभेनचैवनास्तिक्येनकेवलधर्मध्वजित्वेनेत्यर्थः॥नदिहमोक्षमस्मिन्नेवलोकेफलप्रदमित्यर्थः॥०

५

श्रद्धयाआस्तिक्यबुध्यापरयाप्रकृष्टयातप्तमनुष्ठितं॥तपस्तत्प्रकृतंतत्त्रिविधंत्रिप्रकारंअधिष्ठानंनरैरनुष्ठातृभिरफलाकां
क्षिभिःफलाकांक्षारहितैर्युक्तैःसमाहितैर्यदीदृशंतपस्तत्सात्विकंसत्वनिर्वृत्तंपरिचक्षतेकथयंतिशिष्टाः॥सत्कारमान
पूजार्थंतपोदंभेनचैवयत्॥क्रियतेतदिहप्रोक्तंराजसंचलमध्रुवं॥१८॥सत्कारमानपूजार्थंसत्कारःसाधुकारःसाधुरयं
तपस्वीब्राह्मणइत्येवमर्थं॥मानोमाननंप्रत्युत्थानाभिवादनादिस्तदर्थं॥पूजापादप्रक्षालनार्चनाशिनाशयितृत्वादिस्तद
र्थंचतपःसत्कारमानपूजार्थं॥दंभेनचैवयत्क्रियतेतपस्तदिहप्रोक्तंकथितंराजसंचलंकादाचित्कफलत्वेनाध्रुवं॥
मूढग्राहेणात्मनोयत्पीडयाक्रियतेतपः॥परस्योत्सादनार्थंवातत्तामसमुदाहृतं॥१९॥मूढग्राहेणाविवेकनिश्चयेनात्म आ१७॥
नःपीडयायत्॥क्रियतेतपः॥परस्योत्सादनार्थंवाविनाशार्थंवातत्तपस्तामससमुदाहृतं॥श्रीगणेशायनमः॥५॥ ३०३॥रामः

कादाचित्कफलत्वंक्षणिकफलत्वमध्रुवमनियतमनैकांतिकफलमितियावत्॥१८॥तामसंतपःसंगृह्णाति॥मूढेति॥मूढोऽसंना
विवेकिनस्तपग्राहोनामाग्रहोभिनिवेशस्तेनेत्याह॥अविवेकेति॥आत्मनःस्वस्यदेहादेरित्यर्थः॥श्रीरामचंद्रायनमः॥५

क्रमप्राप्तंदानस्यगुणनिमित्तंभेदमाह॥इदानीमिति॥दातव्यमित्येवंमनःकृत्वादानमेवंमयाभाव्यंनफलमित्यभिसंधायेत्यर्थः॥

इदानींदानभेदउच्यन्ते॥दातव्यमितियद्दानंदीयतेनुपकारिणे॥देशेकालेचपात्रेचतद्दानंसात्विकंस्मृतं॥२०॥दातव्यमि
त्येवमनसिकृत्वायद्दानंदीयतेअनुपकारिणे प्रत्युपकारासमर्थायसमर्थायापिनिरपेक्षंदीयते॥देशेपुण्येकुरुक्षेत्रा
दौकालेचसंक्रांत्यादौपात्रेचषडंगविद्वेदपारगइत्यादौआचारनिष्ठायइत्यर्थः तद्दानंसात्विकंस्मृतं॥यत्तुप्रत्युपकारार्थंफल
मुद्दिश्यवापुनः॥दीयतेचपरिक्लिष्टंतद्दानंराजसंस्मृतं॥२१॥यत्तुदानंप्रत्युपकारार्थंकालेत्वयंमांप्रत्युपकरिष्यतीत्येवम
र्थं॥फलंचास्यदानस्यमेभविष्यत्यदृष्टमिति॥तदुद्दिश्यपुनर्दीयतेचपरिक्लिष्टंखेदसंयुक्तंतद्राजसंस्मृतं॥अदेश
कालेयद्दानमपात्रेभ्यश्चदीयते॥असत्कृतमवज्ञातंतत्तामससमुदाहृतं॥२२॥अदेशकालेअदेशेअपुण्यदेशेम्लेच्छाशु
च्यादिसंकीर्णे॥अकालेअपुण्यहेतुत्वेनाप्रख्यातेसंक्रांत्यादिविशेषरहिते॥अपात्रेभ्यश्चमूर्खवंचकादिभ्यश्चदेशादिसं
पत्तौवा॥असत्कृतंप्रियवचनपादप्रक्षालनपूजादिरहितमवज्ञातं॥पात्रपरिभवयुक्तंचयत्तद्दानंतामससमुदाहृतं॥५
यज्ञदानतपःप्रभृतीनांसाद्गुण्यकरणायमुपदेशउच्यते॥ॐतत्सदितिनिर्देशोब्रह्मणस्त्रिविधःस्मृतः॥ब्रा[illegible]णास्ते न
॥नवेदाश्चयज्ञाश्चविहिताःपुराः॥२३॥

राजसतामसदानविभजनंस्पष्टार्थं॥२२॥विहितानांकर्मणांप्रमादप्रयुक्तेवैगुण्येकथंपरिहारःस्यादित्याशंक्याहयज्ञेति॥२३॥

न्दी

ओमिति ब्रह्मेत्यादिश्रुतेरोमितितावद्ब्रह्मणो नाम निर्देशः ।। तत्वमसीतिश्रुतेस्तदित्यपि ब्रह्मणो नामनिर्देशः ।। सदेवसोम्येतिश्रुतेः सदि
नामेतिमत्वाह ।। ओमिति ।। कथं निर्देशो न तेषां विधानमित्याशंक्याह ।। निर्दिश्यन्त इति ।। यज्ञादीनां वैगुण्य प्र तीति कात्स्न्यमथोक्त
नमोच्चारणाद्वैगुण्यं सिध्यन्तीति भावः कर्मसाद्गुण्य कारणं त्रिविधं नाम स्तौति ।। ब्राह्मणा इति ।। पूर्वं सर्गादौ निर्माणं

ॐ तत्सदित्येष निर्देशो निर्दिश्यते इति निर्देशस्त्रिविधो नामनिर्देशो ब्रह्मणः स्मृतश्चिंतितो वेदांतेषु ब्रह्मविद्भिर्ब्राह्म
णास्तेन निर्देशेन त्रिविधेन वेदाश्च यज्ञाश्च विहिता निर्मिताः पुरा पूर्वमिति निर्देशस्तुत्यर्थमुच्यते ।। तस्मादोमित्युदाहृ
त्य यज्ञदानतपःक्रियाः ।। प्रवर्तंते विधानोक्ताः सततं ब्रह्मवानां ।। २४ तस्मात् ॐ मित्युदाहृत्योच्चार्य यज्ञदानतपः
क्रियाः यज्ञादिस्वरूपाः क्रियाः प्रवर्तंते विधानोक्ताः विधिनोक्ताः शास्त्रचोदिताः ।। सततं सर्वदा ।। ब्रह्मवादिनां ब्रह्मवद
नशीलानां संन्यासिनां ।। तदित्यनभिसंधाय फलं यज्ञतपःक्रियाः दानक्रियाश्च विविधाः क्रियंते मोक्षकांक्षिभिः २५ ।। तदित्य
नभिसंधाय तदिति ब्रह्माभिधानमुच्चार्य अनभिसंधाय च कर्मणः फलं यज्ञतपःक्रियाः ।। यज्ञक्रियास्तपःक्रियाश्च यज्ञतपः
क्रियाः ।। दानक्रियाश्च विविधाः क्षेत्रहिरण्यप्रदानादिलक्षणाः क्रियंते निर्वर्त्यंते मोक्षकांक्षिभिर्मोक्षार्थिभिर्मुमुक्षुभिः

च प्रजापतिकर्तृकं ।। १३ ।। यस्माद्ब्राह्मणादीनां च कारणं यस्माच्च ब्रह्मणो निर्देशस्तस्मादित्युपसंहरति ।। ब्रह्मवादिनामित्यत्र ब्रह्मवेदः ।।
।। १४ ।। ॐ शब्दस्य विनियोगमुक्त्वा तच्छब्दस्य विनियोगमाह ।। तदित्यादिना ।। ।। ८३ ।। १५ ।। श्रीरामचंद्रायनमः ।। ८४ ।। श्रीकृष्णायनमः ।।

दि

आ-१७ ।।
३०४ ।। रामः ।।

व्रतमन्त्रयानंतरश्लोकतात्पर्यमाह ॥ ॐ तत्सद्द्वयोरिति ॥ २६ ॥ प्रकारांतरेण सच्छब्दस्य विनियोगमाह ॥ यज्ञ इति ॥ नामत्रयोच्चारणात्सागु
ण्यं सिध्यतीति प्रकरणार्थमुपसंहरति ॥ तदेतदिति ॥ २७ ॥ अश्रद्धयान्वितस्यापि कर्मणो नामत्रयोच्चारणाद्वैगुण्ये श्रद्धाप्राधान्यं

ॐ तत्‌शब्दयोर्विनियोग उक्तः । अथेदानीं सच्छब्दस्य विनियोगः कथ्यते ॥ सद्भावे साधुभावे च सदित्येतत्प्रयुज्यते ॥ प्रशस्ते कर्म
२ भा० णि तथा सच्छब्दः पार्थ युज्यते ॥ २६ ॥ सद्भावे सन्तः सद्भावो ॥ यथाऽविद्यमानस्य पुत्रस्य जन्मनि ॥ तथा साधुभावे असद्वृत्त
स्यासाधोः सद्वृत्तता साधुभावस्तस्मिन् साधुभावे च सदित्येतदभिसंधानं ब्रह्मणः प्रयुज्यते ॥ तत्रोच्यतेऽभिधीयते प्रश
स्ते कर्मणि विवाहादौ च ॥ तथा सच्छब्दः पार्थ युज्यते प्रयुज्यत इत्येतत् ॥ यज्ञे तपसि दाने च स्थितिः सदिति चोच्यते ॥ कर्म चैव
तदर्थीयं सदित्येवाभिधीयते ॥ २७ ॥ यज्ञे यज्ञकर्मणि या स्थितिस्तथा तपसि च या स्थितिर्दाने च स्थितिर्या सा सदित्युच्यते
धा विद्वद्भिः ॥ कर्म चैव तदर्थीयं यज्ञदानतपोर्थीयं ॥ अथवा यस्याभिधानत्रयं प्रकृतं तदर्थीयं ईश्वरार्थीयमित्येतत् ॥ सदित्येवाभि
धीयते ॥ तदेतत् ॥ यज्ञदानतपआदिकर्म असात्त्विकं विगुणमपि श्रद्धापूर्वकं ब्रह्मणोऽभिधानत्रयप्रयोगेण सगुणं सात्त्विकं सं
पादितं भवति ॥ तत्र च सर्वत्र श्रद्धाप्राधान्यं यथा सर्वं संपाद्यते यस्मात् ॥ तस्मात् ॥ २८ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

ाजसताम
ाशंक्याह ॥ तत्र चेति ॥ सप्तमीभ्यां प्रकृतं यज्ञादि गृह्यते ॥ श्रीरामकृष्णायनमः श्रीगुरुसरस्वतीयनमः ॥ २८ ॥

गी ओ[illegible]त्नादिसगुणमिति विशेषः तस्यासत्वं साधयति॥ सम्प्राप्नोतीति॥ ऐहिककमामुष्मिकं वा फलमश्रद्धेनापि कर्मणा संपत्स्यते कुतोऽस्या
व[illegible]त्याशंक्याह॥ नचेति तस्योभयविधफलाहेतुत्वे हेतुमाह॥ साधुभिरिति॥ निंदंति हि साधवः श्रद्धारहितं कर्मातो न तदुभय
[illegible]फलकमित्यर्थः॥ तदनेन शास्त्रानभिज्ञानामपि श्रद्धावतां श्रद्धया सात्विकत्वादिवैविध्यभाजां राजसतामसाहारादित्या
ता [illegible]गेन सात्विकाहारादिसेवया सत्वैकशरणानां प्राप्तमपि यज्ञादिवैगुण्यं ब्रह्मनामनिर्देशेन परिहरतां परिशुद्धबुद्धीनां श्र

अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत्॥ असदित्युच्यते पार्थ न च तत्प्रेत्य नो इह॥ २८॥ अश्रद्धया हुतं हवनं कृतं॥ ॥
दत्तं च ब्राह्मणेभ्यो ऽश्रद्धया तपस्तप्तमनुष्ठितमश्रद्धया॥ तथा अश्रद्धयैव कृतं च यत् स्तुतिनमस्कारादि तत्स
र्वमसदित्युच्यते॥ सत्प्राप्तिसाधनमार्गबाह्यत्वात् पार्थ॥ न च तत्कर्म ब[illegible]यासमपि प्रेत्य फलाय नो अपि इहा
र्थं॥ साधुभिर्निंदितत्वादिति॥ २८॥ इति श्रीभगवद्गीताभाष्ये शंकरभगवत्पादकृतौ सप्तदशोऽध्यायः समाप्तः॥

आ॰२११॥
३०५॥
रामः॥

श्री वणादिसामग्रीसंजाततत्वसाक्षात्कारवतां मोक्षोपपत्तिरिति सिद्धं॥ २८॥ हरिः ॐ तत्सदिति श्रीपरमहंसपरिव्राजकाचा
र्यश्रीमच्छुद्धानंदभगवत्पूज्यपादशिष्यश्रीमदानंदज्ञानविरचितायां श्रीमच्छांकरीयश्रीमद्भगवद्गीताभाष्यटीकायां
॥ सप्तदशोऽध्यायः॥ समाप्तः॥ २८॥ श्रीकृष्णार्पणमस्तु॥ २८॥

॥श्रीगणेशायनमः॥पूर्वैरध्यायैर्विस्तरेणयतस्ततोविक्षिप्ततयोक्तमर्थंसुखप्रतिपत्तयेसंक्षेपेणोपसंहृत्याभिधातुमध्यायान्त
रमवतारयति॥सर्वस्यैवेति॥उपसंहृत्यवक्तव्यइतिसंबंधः॥किंचोपनिषत्सुयतस्ततोविस्तृतस्यार्थस्यबुद्धिसौकर्यार्थमस्मिन्न
ध्यायेसंक्षिप्याभिधानंकर्तव्यमुपनिषद्रांगीतानांचैकार्थत्वादित्याह॥सर्वश्चेति॥कथंसर्वोपिशास्त्रार्थोऽस्मिन्नध्यायेसंक्षिप्योपसंहि

श्रीगणेशायनमः॥हरिःॐ सर्वस्यैवगीताशास्त्रस्यार्थोऽस्मिन्नध्यायेउपसंहृत्यसर्वश्चवेदार्थोवक्तव्यइत्येवमर्थोयमध्यायआरभ्यते॥
सर्वोह्यतीतेष्वध्यायेषूक्तोऽर्थोऽस्मिन्नध्यायेऽवगम्यते॥अर्जुनस्तुसंन्यासत्यागशब्दार्थयोरेवविशेषंबुभुत्सुरुवाच॥
अर्जुनउ·३ संन्यासस्यमहाबाहोतत्त्वमिच्छामिवेदितुं॥त्यागस्यचहृषीकेशपृथक्केशिनिषूदन॥१॥संन्यासस्यसंन्यासश
ब्दार्थस्येत्येतत्‌महाबाहो॥तत्त्वंतस्यभावस्तत्त्वंयाथात्म्यमित्येतत्॥इच्छामिवेदितुंज्ञातुं॥त्यागस्यचत्यागशब्दार्थस्ये
१ त्येतत्॥हृषीकेशपृथक्इतरेतरविभागतः॥केशिनिषूदनकेशीनामहयच्छद्माऽसुरस्तंनिषूदितवान्भगवान्
॥१॥ वासुदेवस्तेनतन्नाम्नासंबोध्यतेऽर्जुनेन॥

इत्याह॥सर्वोहीति॥ननुवेदार्थश्चेदत्रोपसंजिहीर्षितस्तर्हिकिमितित्यागेनैकेसंन्यासयोगादीनिचवेदार्थैकदेशविषयं
[illegible]प्रतिवचनंतत्राह॥अर्जुनस्त्विति॥पृथगनयोस्तत्त्वंवेदितुमिच्छामीति।विशेषणादपृथगर्थत्वमनयोरस्तीतिग
म्यतेबुभुत्सितस्यद्रष्टव्यत्वादेकदेशेतस्माद्वादुक्तप्रश्नोपपत्तिरितिभावः॥१॥॥०

गी० भा० टी० ॥
३०६ ॥

[illegible]र्वेष्वेवाध्यायेषु तत्र तत्र संन्यासत्यागयोरुक्तत्वात्किमिति पुनः तौ पृष्टौ ते ज्ञाते नेतद्योगात्तत्राह ॥ तत्र तत्रेति ॥ न निर्लुंठि-
तार्थौ न निष्कृष्टार्थौ विविक्तार्थौ विसर्घः ॥ बुभुत्सया प्रश्नस्य प्रवृत्तत्वात्प्रष्टुरभिप्रायं प्रश्नेन प्रतिपाद्य भगवानुत्तरमुक्त-
वानित्याह ॥ अनंतरेति ॥ पक्षद्वयोपन्यासेन संन्यासत्यागशब्दयोरर्थभेदं कथयति ॥ काम्यानामिति ॥ २ ॥ नत्किमिदानीं

तत्र तत्र निर्दिष्टौ संन्यासत्यागशब्दौ न निर्लुंठितार्थौ सर्वेष्वध्यायेष्वतोऽर्जुनाय पृष्टवते तेन निर्णयाय ॥ श्रीभगवा-
नुवाच ॥ काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुः ॥ सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः ॥ २ ॥ काम्यानाम-
श्वमेधादीनां कर्मणां न्यासं परित्यागं संन्यासं संन्यासशब्दार्थमनुष्ठेयत्वेन प्राप्तस्यार्थस्याननुष्ठानं ॥ कवयः पं-
डिताः केचित् विदुर्विजानंति ॥ नित्यनैमित्तिकानां अनुष्ठीयमानानां सर्वकर्मणां आत्मसंबंधितया प्राप्तस्य फ-
लस्य परित्यागः सर्वकर्मफलपरित्यागस्तं प्राहुः ॥ कथयंति त्यागं त्यागशब्दार्थं विचक्षणाः पंडिताः ॥ यदि काम्य-
कर्मपरित्यागः फलपरित्यागो वार्थो वक्तव्यः ॥ सर्वथा परित्यागमात्रं संन्यासत्यागशब्दयोरेकार्थो न घटपट-
शब्दादिवज्जात्यंतरभूतार्थः ॥ ननु नित्यनैमित्तिकानां कर्मणां फलमेव नास्तीत्याहुः कथमुच्यते तेषां फलत्या-
ग इति यथा वंध्यायाः पुत्रत्यागः ॥ ५ ॥

संन्यासत्यागशब्दयोरात्यंतिकं भिन्नार्थत्वं तथा च प्रसिद्धिविरोधः स्यादित्याशंक्य अवांतरभेदेऽपि नात्यंतिकभेदोऽस्तीत्याह ॥ यदीति ॥ पुत्राभावाद्वं-
ध्यायास्तत्त्यागायोगवन्नित्यनैमित्तिककर्मणाम फलानां फलत्यागानुपपत्तेरुक्तस्त्यागशब्दार्थो न सिध्यतीति शंकते ॥ नन्विति ॥ ५ ॥ ५ ॥

आ० १८ ॥
३०६ ॥ रामः

नित्यनैमित्तिककर्मफलस्य वंध्यापुत्रसादृश्याभावान्न त्यागासंभवादुक्तस्त्यागशब्दार्थः संभवतीति समाधत्ते ।। नैष इति ।। भगवता तेषां फलवत्त्वमिष्टमित्यत्र वाक्यशेषमनुकूलयति वक्ष्यतीति ।। तर्हि संन्यासिनामसंन्यासिनांच नित्याद्यनुष्ठायिनामविशेषेण तत्फलं स्यादिति चेन्नेत्याह ।। न त्विति ।। वक्ष्यतीत्यनुकर्षणं चकारार्थः प्रसक्तस्य वचसोऽर्थं प्रकृतोपयोगित्वेन संगृह्य स्मारयति ।। संन्यासिनामिति ।। काम्यानि वर्जयित्वा नित्यनैमित्तिकानि फलाभिलाषादृते कर्तव्यानीत्युक्तं पक्षं प्रतिपक्षनिरासेन दृढ

नैष दोषः ।। नित्यानामपि कर्मणां भगवता फलवत्त्वस्येष्टत्वात् ।। वक्ष्यति हि भगवान् ।। अनिष्टमिष्टं मिश्रं चेति ।। न तु संन्यासिनामिति च । तत्र संन्यासिनामेव हि केवलं कर्मफलासंबंधं दर्शयन् असंन्यासिनां नित्यकर्मफलप्राप्तिं भवत्यत्यागिनां प्रेत्येति दर्शयति ।। त्याज्यं दोषवदित्येके कर्म प्राहुर्मनीषिणः ।। यज्ञदानतपः कर्म न त्याज्यमिति चापरे ।। ३ ।। त्याज्यं त्यक्तव्यं दोषवत् दोषोऽस्यास्तीति दोषवत् किं तत् कर्म बंधहेतुत्वात् सर्वमेव ।। अथवा दोषो यथा रागादिस्त्यज्यते तद्वत् त्याज्यमित्येके कर्म प्राहुर्मनीषिणः पंडिताः ।। सांख्यादिदृष्टिमाश्रिताः ।। अधिकृतानां तु कर्मिणामपीति ।।

पि तु विप्रतिपत्तिमाह ।। त्याज्यमिति ।। कर्मणः सर्वस्य दोषवत्त्वे हेतुमाह ।। बंधेति ।। दोषवदित्येतद्दृष्टांतेन व्याचष्टे ।। अथवेति ।। कर्मण्यनधिकृतानामकर्मिणामेव कर्म त्याज्यं कर्मिणां न त्यागे प्रत्यवायादित्याशंक्याह ।। अधिकृतानामिति ।। न हि तेषामपि कर्मत्यागे प्रत्यवायो हिंसादियुक्तस्य कर्मणोऽनुष्ठाने परं प्रत्यवायादिति भावः ।। सांख्यादिपक्षसमाप्ताविति शब्दः ।। ६ ।।

गी०भा०टी०
३०८७।।

मीमांसकपक्षमाह ।। तत्रैवेति ।। कर्माधिकृते चैवेति यावत् ।। कर्म नित्यं नैमित्तिकं च ।। काम्यानां कर्मणामित्यारभ्य श्लोकाभ्यां कर्मिणोऽ
कर्मिणोऽधिकृतान् अनधिकृतांश्चापेक्ष्य दर्शितविकल्पानां प्रवृत्तिरित्याशंक्याह ।। कर्मिण इति एवकारव्यवच्छेद्यमाह ।। नत्विति ।। न
देवस्फुरयति ।। ज्ञानेति ।। कर्माधिकृतानां ज्ञाननिष्ठानां ततो विभक्तनिष्ठावत्त्वेन पृथगुक्तानामपि शास्त्रार्थोपसंहारे पुनर्विचार्यत्व मि

तत्रैव यज्ञदानतपः कर्म न त्याज्यमिति चापरे ।। कर्मिणां कर्मणि एवाधिकृतानपेक्ष्यैते विकल्पाः ननु ज्ञाननिष्ठान् व्युत्थायिनः
संन्यासिनोऽपेक्ष्य ज्ञानयोगेन सांख्यानां निष्ठा मया पुरा प्रोक्तेति कर्माधिकारादथोद्धृतां येनं तान्प्रति चिंता ।। ननु कर्मयोगे
न योगिनामित्यधिकृताः कर्म कुर्वन्तः पूर्वं प्रति विभक्तनिष्ठा अपि इह सर्वशास्त्रार्थोपसंहारप्रकरणे यथा विचार्यन्ते तथा सां
ख्या अपि ज्ञाननिष्ठा विचार्यंतामिति ।। न तेषां मोहदुःखनिमित्तत्यागानुपपत्तेः ।। न कायक्लेशदुःखं सांख्या आत्मनि पश्यं
ति ।। इच्छादीनां क्षेत्रधर्मत्वेनैव दर्शितत्वात् ।। अतस्ते न कायक्लेशदुःखभयात्कर्म परित्यजंति ।। ५ ।। श्रीरामाय नमः ।। १

आ०१८
३८७।। रामः

वज्ञाननिष्ठानामपि विचार्यत्वम[illegible]विरुद्धमिति शंकते ।। नत्विति ।। सांख्यानां परमार्थज्ञाननिष्ठानां नात्र विचार्यतेत्युत्तरमाह ।। न तेषा
मिति ।। ननु तेषामपि स्वात्मनि क्लेशदुःखानि पश्यतां तदनुरोधेन राजसकर्मत्यागसिद्धेर्विचार्यत्वं नेत्याह ।। न कायेति ।। तत्र
क्षेत्राध्यायोक्तं हेतुं करोति ।। इच्छादीनामिति ।। स्वात्मनि सांख्यादीनां क्लेशाद्यप्रतीतौ फलितमाह ।। अत इति ।। ५ ।। ०

[illegible]नुतेषांक्लेशाद्यदर्शनेपिस्वात्मनिकर्माणिपश्यतांनत्यागोयुक्तइत्येषांकायक्लेशादिकरत्वाच्चेत्याह॥नापीति॥अस्मानां
[illegible]मोहात्त्याज्यंनियतमपिकर्मत्यक्तुंशक्यंननतुविदांस्वात्मनिकर्मादर्शनेतत्यागेहेत्वभावादितिमत्वाह॥मोहादिति॥कथंतर्हिते
षां[illegible]त्मनिकर्माण्यपश्यतांप्राप्तभावेतत्यागःसंन्यासइत्यत्राह॥गुणानामिति॥अविवेकप्राप्तानांकर्मणांत्यागस्तत्त्ववि वे
प्र दां[illegible]मित्युक्तंस्मारयन्नप्राप्तंतन्निषेधंप्रत्यादिशति॥सर्वेति॥नत्वविदामत्राविचार्यत्वेफलितमाह॥तस्मादिति॥येऽनात्मविद:

॥स्तएवेत्युत्तरत्रसंबंधः॥

नापितेकर्माण्यात्मनिपश्यंति।येनित्यंकर्ममोहात्परित्यजन्तेमुः॥गुणानांकर्मनैवकिंचित्करोमीतिविदित्वैतेसंन्यस्यंति॥
सर्वकर्माणिमनसासंन्यस्येत्यादिभिर्हितत्त्वविदःसंन्यासप्रकारउक्तः॥तस्मात्येन्येऽधिकृताःकर्मण्यनात्मविदस्ते
षांचमोहात्त्यागःसंभवतिकायक्लेशभयाच्चतएवतामसास्त्यागिनोराजसाश्चेतिनिंद्यंते॥कर्मिणामनात्मज्ञा
नांकर्मफलत्यागस्तुसत्त्वस्थः॥सर्वारंभपरित्यागीमौनीसंतुष्टोयेनकेनचित्।अनिकेतःस्थिरमतिरितिगुणातीत
लक्षणेचपरमार्थसंन्यासिनोविशेषितत्वात्॥वक्ष्यतिचज्ञानस्ययापरानिष्ठेति॥तस्मात्ज्ञाननिष्ठाःसंन्यासिनो नेहविवक्षिताः॥

कर्मण्यधिकृतानामनात्मविदांकर्मत्यागसंभावनांदर्शयति॥येषांचेति॥तन्निंदाकुत्रोपयुज्यतइत्याशंक्याह॥कर्मिणामिति॥किंचपर
मार्थसंन्यासिनांप्रसीस्पतोपलंभाच्चनिंदाविषयत्वमित्याह॥सर्वेति॥किंचात्रापिसिद्धिंप्राप्तोयथेत्यादिनाज्ञाननिष्ठायावक्ष्यमा
णत्वात्तद्वतांनेहविचार्यत्वेत्याह॥वक्ष्यतीति॥कर्माधिकृतानामेवात्रविवक्षितत्वान्नज्ञाननिष्ठानामित्युपसंहरति॥तस्मादिति॥

गी०भा०टी०
३०८॥

ननुसंन्यासशब्देनसर्वकर्मसंन्यासस्यग्राह्यत्वात्तथाविधसंन्यासिनामिहविवक्षितत्वंप्रतिभातितत्राह॥कर्मेति॥संन्यासशब्देनमुख्यस्यैवसंन्यासस्यग्रहणंगौणमुख्ययोर्मुख्येसंप्रत्ययादन्यथातदसंभवेहेतूक्तिवैयर्थ्यादशक्यप्रतिषेधाद्वेतिशंकते॥सर्वेति॥नेदंहेतुवचनंसर्वकर्मसंन्यासासंभवसाधकंकर्मफलत्यागस्तुतिपरत्वादितिपरिहरति॥नेत्यादिना॥एतदेवदृष्टांतेनस्पष्टयति॥यथेति॥दृष्टांतेपियथाश्रुतार्थत्वंकिंनस्यादित्याशंक्याह॥यथोक्तेति॥नहिफलत्यागा

कर्मफलत्यागएवसात्विकत्वेनगुणेनतामसत्वाद्यपेक्षयासंन्यासउच्यते॥नमुख्यसर्वकर्मसंन्यासः॥सर्वकर्मसंन्यासासंभवेचनहिदेहभृतेतिहेतुवचनान्मुख्यएवेतिचेत्॥नहेतुवचनस्यस्तुत्यर्थत्वाद्यथात्यागाच्छांतिरनंतरमितिकर्मफलत्यागस्तुतिरेव॥यथोक्तानेकपक्षानुष्ठानाशक्तिमंतमर्जुनंप्रतिविधानात्तथेदमपिनहिदेहभृताशक्यमितिकर्मफलत्यागस्तुत्यर्थंवचनं॥नसर्वकर्माणिमनसासंन्यस्यनैवकुर्वन्नकारयन्नास्तइत्यस्यपक्षस्यापवादःकेनचिद्दर्शयितुंशक्यः।

दृष्टानविदुरान्मुक्तिर्मुक्तासुक्तेर्ज्ञानैकाधीनत्वसाधकश्रुतिविरोधादद्वेष्टेत्यादिनाचानंतरमेवज्ञानसाधनविधानानर्थक्यादतस्त्यागस्तुतिरेषाग्राह्येत्यर्थः॥दृष्टांतगतमर्थंपदार्ष्टांतिकेयोजयति॥तथेति॥प्रागुक्तपक्षापवादविवक्षयाहेतूक्तेर्मुख्यार्थत्वमेवकिंनस्यादित्याशंक्यतदपवादहेत्वभावान्नैवमित्याह॥नसर्वेति॥नचेयमेवहेतूक्तिस्तदपवादिकाऽन्यथासिद्धेरुक्तत्वादितिभावः॥ ॥ ५॥श्रीरामः॥

अ०१८॥
३०८॥
रामः॥

प्रकृतार्थोपसंहारेणमकमाह ।। एतान्यपीति ।। अपिशब्दविवक्षितमर्थं दर्शयति ।। सासंगस्येति ।। व्यावर्त्यं कीर्तयति ।। नतिति ।। एतान्यपीत्यादि
वाक्यं न नित्यकर्मविषयमिति निमित्तमुपन्यस्यति ।। अनघ इति ।। न चेदिदं नित्यकर्मविषयं किंविषयं तर्हीत्याशंक्य वाक्यमवतार्य व्या
करोति ।। एतानीत्यादिना ।। नित्यानामफलत्वमुपेत्य पक्षोऽयं तदयुक्तमिति दूषयति ।। तदसदिति ।। यत्तु काम्यान्यपि कर्तव्यानी

एतान्यपीति प्रकृतसंनिकृष्टार्थतोपपत्तेः ।। सासंगस्य फलार्थिनो बंधहेतून्येतान्यपि तु मुमुक्षोरपि कर्तव्यानीत्यपिशब्दस्या
र्थो न त्वन्यानि कर्माण्यपेक्ष्यैतान्यपीत्युच्यते ।। अन्ये वर्णयंति ।। नित्यानां कर्मणां फलाभावात् संगं त्यक्त्वा फलानि चेति नोपपद्य
ते ।। एतान्यपीति यानि काम्यानि कर्माणि नित्येभ्योऽन्यानि एतान्यपि कर्तव्यानि किमुत यज्ञदानतपांसि नित्यानीति ।। तदसत् ।। ०
नित्यानामपि कर्मणां फलवत्त्वस्योपपादितत्वाद्यज्ञो दानं तपश्चैव पावनानीत्यादिवचनेन नित्यान्यपि कर्माणि बंधहेतुत्वाशंक
याजिहासोर्मुमुक्षोः कुतः काम्येषु संगः ।। दूरेण ह्यवरं कर्मेति च निंदितत्वात् ।। यज्ञार्थात् कर्मणोऽन्यत्रेति च काम्यकर्मणां बं
धहेतुत्वस्य निश्चितत्वात् ।। त्रैगुण्यविषया वेदास्त्रैविद्या श्च क्षीणे पुण्ये मर्त्यलोकं विशंतीति च ।। ०।। ६।।

तिन्निरस्यति ।। नित्यानामपीति ।। किंच काम्यानां भगवता निंदितत्वान्न तेषु मुमुक्षोरनुष्ठानमित्याह ।। दूरेणेति ।। किंच मुमुक्षोरपेक्षितमो
क्षापेक्षया विरुद्धफलता काम्यकर्मणां न तेषु तस्यानुष्ठानमित्याह ।। यज्ञार्थादिति ।। काम्यानां बंधहेतुत्वं निश्चितमित्यत्रैव पूर्वोक्तं वा
क्यानुकूल्यं दर्शयति ।। त्रैगुण्येति ।।

गी॰ भा॰ टी॰
३१०॥
रामः॥

किंच पूर्वश्लोके एतादिनित्यकर्मणां प्रकृतत्वादेतच्छब्देन सन्निहितवाचिना परामर्शात्काम्यकर्मणां च काम्यानां कर्मणामिति व्यवहितानां सन्निहितपरामर्शकेनैतच्छब्दाविषयत्वाच्च काम्यकर्मस्वेतान्यपीति व्यपदेशमर्हतीत्याह ॥ दूरेणेति ॥ ६ ॥ नित्यकर्मणामवश्यकर्तव्यत्व ॥ सु ॥ उपजीव्यापेक्षितं परस्य त्वनंतरश्लोकमवतारयति ॥ तस्मादिति ॥ ननु कश्चिन्नियतमपि कर्म त्यजन्नुपलभ्यते तत्राह ॥ मोहादिति ॥

दूरव्यवहितत्वाच्च न काम्येष्वेतान्यपीति व्यपदेशः ॥ तस्मादज्ञस्याधिकृतस्य मुमुक्षोः ॥ नियतस्य तु संन्यासः कर्मणो नोपपद्यते मोहात्तस्य परित्यागस्तामसः परिकीर्तितः ॥ ७ ॥ नियतस्य तु नित्यस्य संन्यासः परित्यागः कर्मणो नोपपद्यते अज्ञस्य पावनत्वस्येष्टत्वात् ॥ मोहादज्ञानात्तस्य नियतस्य परित्यागो नियतं चावश्यं कर्तव्यं त्यज्यते चेति विप्रतिषिद्धमतो मोहनिमित्त[illegible]परित्यागस्तामसः परिकीर्तितो मोहश्च तम इत्यनर्थान्तरं ॥ किंच ॥ दुःखमित्येव यत्कर्म कायक्लेशभयात्त्यजेत् ॥ स कृत्वा ॥ राजसं त्यागं नैव त्यागफलं लभेत् ॥ ८ ॥

आ॰ १८॥
३१०॥
रामः॥

अज्ञानं पावनत्वाऽपरिज्ञानं अज्ञस्य नित्यकर्मपरित्यागो मोहादित्येतदुपपादयति ॥ नियतं चेति ॥ नित्यकर्मत्यागस्य मोहकृतत्वे कुतस्तामसत्वमित्याशंक्याह ॥ मोहश्चेति ॥ एतच्च नित्यकर्मत्यागोऽज्ञस्य न संभवतीत्याह ॥ किंचेति ॥ ननु मोहं विनैव दुःखात्मकं कर्म कायक्लेशभयात्त्यजति करणानि हि कार्यं जनयंति सांप्रतं तथा च न त्यागस्तामसो युक्तस्तत्राह ॥ दुःखमित्येवेति ॥ ०

गी॰भा॰टी॰
३०९
रामः

सात्विकोराजसस्तामसश्चेत्युक्तेर्थे त्रैविध्येपि स्वयमेव निश्चयसंभवात्किमत्र भागवतेन निश्चयेनेत्याशंक्याह ॥ यस्मादिति ॥ भगवतोन्यस्योक्तविभागेऽनवगता निश्चयाभावाद्भागवतनिश्चयस्यापेक्ष्यतेति निगमयति ॥ तस्मादिति ॥ ४ ॥ तमेव भगवतो निश्चयं विशेषयन्तो निर्द्धारयितुं प्रश्नपूर्वकमनंतरश्लोकप्रवृत्तिं दर्शयति ॥ कः पुनरिति ॥ यज्ञादीनां कर्तव्यत्वे हेतुमाह ॥ यज्ञेति ॥ न केवलं न त्याज्यं किंतु क

श

यस्मात्तामसादिभेदेन त्यागसंन्यासशब्दवाच्योर्थोधिकृतस्य कर्मिणोऽनात्मज्ञस्य त्रिविधः संभवति न परमार्थदर्शिनस्तस्मादयमर्थो दुर्ज्ञानस्तस्मादत्र तत्त्वं नान्यो वक्तुं समर्थस्तस्मान्निश्चयं परमार्थशास्त्रार्थविषयमध्यवसायमैश्वरं शृणु कः पुनरसौ निश्चय इत्याह ॥ यज्ञदानतपःकर्म न त्याज्यं कार्यमेव तत् ॥ यज्ञो दानं तपश्चैव पावनानि मनीषिणां ॥ ५ ॥ यज्ञो दानं तप इत्येतत्त्रिविधं कर्म न त्याज्यं न त्यक्तव्यं ॥ कार्यं करणीयमेव तत् ॥ कस्माद्यज्ञदानं तपश्चैव पावनानि विशुद्धिकराणि मनीषिणां फलानभिसंधीनामित्येतत् ॥ एतान्यपि तु कर्माणि संगं त्यक्त्वा फलानि च ॥ कर्तव्यानीति मे पार्थ निश्चितं मतमुत्तमं ॥ ६ ॥ एतान्यपि तु कर्माणि यज्ञदानतपांसि पावनान्युक्तानि संगं त्यक्त्वा संगमासक्तिं तेषु त्यक्त्वा फलानि च तेषां त्यक्त्वा परित्यज्य कर्तव्यानीत्यनुष्ठेयानीति मे मम निश्चितं मतमुत्तमं ॥ निश्चयं शृणु मेऽत्रेति प्रतिज्ञाय पावनत्वं च हेतुमुक्त्वा एतान्यपि कर्माणि कर्तव्यानीति
॥ यन्निश्चितं मतमुत्तममिति प्रतिज्ञातार्थोपसंहार एव नापूर्वार्थवचनं ॥ ६ ॥

आ॰ १८॥
३०९॥
रामः॥

र्तव्यमेवेत्याह ॥ कार्यमिति ॥ प्रतिज्ञामेवं विभज्य कार्यहेतुं विभजते ॥ कस्मादिति ॥ ५ ॥ प्रतिज्ञातमर्थमुपसंहरति ॥ एतान्यपीति ॥ उपसंहारश्लोकाक्षराणि व्याकरोति ॥ एतानीत्यादिना ॥ अक्षरार्थमुक्त्वा तात्पर्यमाह ॥ निश्चयमिति ॥ ६ ॥ श्रीरामकृष्णाय नमः ॥ ६ ॥ श्रीः

मुख्यसंन्यासापवादासंभवे संन्यासत्यागविकल्पस्य कथं सावकाशतेत्याशंक्याह ॥ तस्मादिति ॥ ज्ञाननिष्ठास्वसुक्तविकल्पोनुपप
त्तौ कुत्र तेषामधिकारस्तत्राह ॥ येत्विति ॥ संन्यासिनां विकल्पानर्हत्वेन ज्ञाननिष्ठायामेवाधिकारस्य भ्रत्यः सुप्रदेशोपुसाधि

तस्मात्कर्मण्यधिकृतानां प्रत्येवैष संन्यासत्यागविकल्पः येतु परमार्थदर्शिनः सांख्यास्तेषां ज्ञाननिष्ठायामेव सर्वकर्मसंन्यास
लक्षणायामेवाधिकारो नान्यत्रेति न ते विकल्पार्हाः ॥ तथोपपादितमस्माभिर्वेदाविनाशिनमित्यस्मिन्प्रदेशे तृतीयादौ च ॥३॥० नृ
तत्रैतेषु विकल्पभेदेषु ॥ निश्चयं शृणु मे तत्र त्यागे भरतसत्तम ॥ त्यागो हि पुरुषव्याघ्र त्रिविधः संप्रकीर्तितः ॥४॥ निश्चयं शृणु एव व
धारय मे मम वचनात् ॥ तत्र त्यागे त्यागसंन्यासविकल्पे यथादर्शिते भरतसत्तम भरतानां साधुतम ॥ त्यागो हि त्यागसंन्यास
प्रे शब्दवाच्यो हि योऽर्थः स एक एवेत्यभिप्रेत्याह त्यागो हीति ॥ पुरुषव्याघ्र ॥ त्रिविधस्त्रिप्रकारस्तामसादिप्रकारैः संकीर्ति
॥ तः सम्यक्शास्त्रेषु कथितः ॥४॥

तानुसाधनीयत्वापेक्षेत्याह ॥ तयेति ॥ कर्माधिकृतानामस्येवोक्तविकल्पप्रवृत्तावपि कुतो निर्धारणसिद्धिस्तत्राह ॥
तनेति ॥ तमेव निश्चयं दर्शयितुमादौ त्यागगतमवान्तरविभागमाह ॥ त्यागो हीति ॥ ननु त्यागसंन्यासयोरुभयोरपि प्र
कृतत्वाविशेषे त्यागस्यैवावान्तरविभागाभिधाने संन्यासस्यापेक्षितत्वमापद्येतेत्याह ॥ त्यागेति ॥ ४ ॥ श्रीरामाः

यत्कर्मदुःखात्मकमशक्यसाध्यमित्येवालोच्यनन्निर्वर्तनेदेहस्येंद्रियाणांचक्लेशात्मनोभयात्त्यजतिसतस्यसत्कारजोनिमित्तंत्यागंकृ
त्वापिनतत्फलंमोक्षंलभतेकिंतूक्तेनैवराजसेनत्यागेनतदनुरूपंनरकंप्रतिपद्यतेइत्याह।।दुःखमित्येवेत्यादिना।।८।।कर्मत्यागस्तामसोरा
सश्चेतिद्विविधोदर्शितः।।संप्रतिसात्विकंत्यागंप्रश्नपूर्वकंवर्णयति।।कःपुनरिति।।कर्तव्यमित्येवेत्येवकारेणनित्यस्यभाव्यांतरंनि
षिध्यते।।नित्यानांविध्युद्देशेफलाश्रवणात्तेषांफलंत्यक्त्वेत्ययुक्तमित्याशंक्याह।।नित्यानामिति।।फलंत्यक्त्वेत्यस्यविधांतरेण

दुःखमित्येवयत्कर्मकायक्लेशभयात्शरीरदुःखभयात्त्यजेत्परित्यजेत्।।सकृत्वाराजसंरजोनिर्वृत्तंनैवत्यागफलंज्ञान
पूर्वकस्यसर्वकर्मत्यागस्यफलंमोक्षाख्यंनैवलभेत्।।कःपुनःसात्विकस्त्यागः।।कार्यमित्येवयत्कर्मनियतंक्रियतेऽर्जु
न।।संगंत्यक्त्वाफलंचैवसत्यागःसात्विकोमतः।।९।।कार्यंकर्तव्यमित्येवयत्कर्मनियतंनित्यंक्रियतेनिर्वर्त्यतेऽर्जुनसंगंत्यक्त्वा
फलंचएवं।।नित्यानांकर्मणांफलवत्वेभगवद्वचनंप्रमाणमित्यवोचाम।।अथवायद्यपिफलंनश्रूयतेनित्यस्यकर्मणस्तथा नित्यस्य
पिनित्यंकर्मकृतमात्मसंस्कारंप्रत्यवायपरिहारंवाफलंकरोत्यात्मनइतिकल्पयन्त्येवातस्तांनाममपिकल्पनांनिवारयति।।फलंत्यक्त्वे

तात्पर्यमाह।।अथवेति।।नहिविधिनोक्तंकर्मानर्थकंविध्यानर्थक्यापातेनश्रौतफलाभावेपिनित्यंकर्मविधितोऽनुतिष्ठन्नात्मानमज्ञानत
उपहतमनस्त्वोत्पात्तस्मिन्कर्मण्यात्मसंस्कारंफलंकल्पयतितदकरणेप्रत्यवायस्मरणात्तत्कारणंकर्तुरात्मनस्तन्निवृत्तिंकरोती
तिवा।।नित्येकर्मण्युक्तांकल्पनामनुनिष्पादितफलकल्पनांचफलंत्यक्त्वेत्यनेनभगवान्निवारयतीत्यर्थः।।९।।९।।

६

त्यागं

श्री

गी०भ०टी०
३११
राम:

नित्यकर्मसुफलत्यागोक्तेः संभवेफलितमाह॥ अनइति॥ कर्मतत्फलत्यागस्यत्यागसंन्यासशब्दाभ्यां प्रकृतस्यत्यागोहीति त्रैविध्यं प्रतिज्ञायप्र
तिज्ञानुरोधेनद्वैविध्यस्युसाधनीयांविधांतद्विरोधेनस्युसाधयतोभगवतोऽकौशलमापतीतिशंकते॥ नन्विति॥ अतिक्रमप्रतिकूलत्वमुप
संहारवचनमनुचितमित्यत्रदृष्टांतमाह॥ यथेति॥ एवंतरविरोधेनप्राप्तमकौशलंप्रत्यादिशति॥ नैषइति॥ कर्मत्यागफलत्यागयोस्त्या

अतःसाधुत्वंसंगंत्यक्त्वाफलंचेतिसत्यागोनित्यकर्मसुसंगफलपरित्यागःसात्विकःसत्वनिर्वृत्तो मतोभिमतः॥ ननुकर्मपरि
त्यागस्त्रिविधःसंन्यासइतिचप्रकृतः॥ तत्रतामसोराजसश्चोक्तस्त्यागःकथमिहसंगफलयोःत्यागस्तृतीयत्वेनोच्यते॥ य
थात्रयोब्राह्मणाःआगतास्तत्रषडंगविदौद्वौक्षत्रियस्तृतीयइतिवद्युक्तं॥ नैषदोषः॥ त्यागसामान्येनस्तुत्यर्थत्वादस्तिहिकर्म
संन्यासस्यफलाभिसंधित्यागत्वसामान्यं॥ नचराजसतामसत्वेनकर्मत्यागनिंदयाकर्मफलाभिसंधित्यागःसात्विकत्वेन
स्तूयतेसत्यागःसात्विकोमतइति॥ यस्त्वधिकृतःसंगंत्यक्त्वाफलाभिसंधिंचनित्यंकर्मकरोतितस्यफलरागादिनाऽक अ
लुषीक्रियमाणमंतःकरणंनित्यैश्चकर्मभिःसंस्क्रियमाणंविशुद्ध्यति॥ ॥९॥ श्रीरामकृष्णायनमः॥ ९॥

आ१८॥
३११॥
राम॥

गत्वेनसादृश्यात्कर्मत्यागनिंदयातत्फलत्यागस्तुत्यर्थइदंवचनमित्युपगमान्नविरोधोस्तीत्युक्तमेवव्यक्तीकुर्वन्नादौत्यागसामान्यंविश
दयति॥ अस्तीति॥ सत्तिसामान्येनिर्देशस्यस्तुत्यर्थत्वंसमर्थयति॥ नत्रेति॥ ८॥ एवंपूर्वापरविरोधंपराकृत्यानंतरश्लोकतात्पर्यमाह॥
यस्त्विति॥ फलरागादिनेत्यादिशब्देनकर्मस्वरूपासंगोगृह्यते॥ अंतःकरणमकलुषीक्रियमाणमितिच्छेदः॥ ९॥ श्रीरामचंद्रायनमः

ल

विशुद्धेंनःकरणेकिंस्यादित्याशंक्याह॥विशुद्धमिति॥मलविकलत्वंविशुद्धत्वं॥संस्कारवत्त्वंप्रसन्नत्वमितिभेदः॥क्रमेणश्रवणधारणद्वारेणेस
र्थः॥तन्निष्ठेस्यात्मज्ञाननिष्ठोक्ता॥काम्येकर्मणित्याज्यत्वेनद्वेषमभिनयति॥किमिति॥उभयत्रद्वेषंप्रीतिंचनकरोतिसामान्येनोक्तंकर्त्तारं
प्रश्नपूर्वकंविशेषतोनिर्दिशति॥कःपुनरिति॥त्यागीत्युक्तंत्यागिनमभिव्यनक्ति॥पूर्वोक्तेनेति॥कर्मणिसंगस्यतत्फलस्यचत्यागेनेतिया

तद्विशुद्धंप्रसन्नमात्मालोचनक्षमंभवतीति॥तस्यैवंनि[illegible]सकर्मानुष्ठानेनविशुद्धांतःकरणस्यात्मज्ञानाभिमुखस्यक्रमेण
यथातन्निष्ठास्यात्तद्वक्तव्यमित्याह॥नद्वेष्ट्यकुशलंकर्मकुशलेनानुषज्जते॥त्यागीसत्त्वसमाविष्टोमेधावीछिन्नसंशयः॥१०॥
नद्वेष्ट्यकुशलमशोभनंकाम्यंकर्म॥शरीरारंभद्वारेणसंसारकारणं॥किमनेनेत्येवंकुशलेशोभनेनित्यकर्मणिसत्त्वशुद्धि
ज्ञानोत्पत्तितन्निष्ठाहेतुर्नमोक्षकारणमिदमित्येवंनानुषज्जते॥तत्रापिप्रयोजनमपश्यन्नानुषंगंप्रीतिंकरोतीत्येतत्॥
ले
कःपुनरसौत्यागीपूर्वोक्तेनकर्मफलत्यागेनतद्वांस्त्यागी॥यःकर्मणिसंगंत्यक्त्वातत्फलंचनित्यकर्मानुष्ठायीसत्यागी॥कृता
॥पुनरसावकुशलंकर्मनद्वेष्टिकुशलेचनानुषज्जतइति॥

रा

[illegible]

वता॥उक्तमेवत्यागिनंविवृणोति॥यःकर्मणीति॥तत्फलंचत्यक्त्वेतिसंबंधः॥काम्येनिषिद्धेचकर्मणिबंधहेतुरितितन्नद्वेष्टिनित्येनैमित्तें
तिकेचमोक्षहेतुरितिप्रीयतेनतत्रकात्वविशेषंपश्यति॥कदेति॥नित्यादिकर्मणाफलाभिसंधिवर्जितेनक्षपितकल्मषस्यसत्त्वंयथार्थ

गी० भा० टी०
३१२

ग्रहणसमर्थमुद्बुध्यते तेन समावेशदशामुक्त्वामीद्वेषयोरभावो भवतीत्याह ॥ उच्यत इति ॥ अत एवेति सत्त्वबुद्ध्युद्धयथार्थग्रहणसामर्थ्यस
माविष्टत्वादित्यर्थः छिन्नसंशयत्वमेव विशदयति ॥ आत्मेति ॥ परं निःश्रेयसं तदस्य च साधनं सम्यग्ज्ञानमेवेति योजना ॥ न द्वेष्टीत्यादिनाश्लोके

उच्यते ॥ सत्त्वसमाविष्टो यदा सदा सत्त्वेनात्मानात्मविवेकज्ञानहेतुना समाविष्टः संव्याप्तः संयुक्त इत्येतत् ॥ अत एव मेधावी मेधया
त्मतानलक्षणया प्रज्ञया संयुक्तस्तद्वान् मेधावी मेधावित्वादेव छिन्नसंशयः छिन्नोऽविद्याकृतः संशयो यस्य ॥ आत्मस्वरूपावस्थानमेव
५ परं निःश्रेयसं तस्य च साधनं नान्यत् किंचिदित्येवं ॥ निश्चयेन छिन्नसंशयः ॥ यो धिकृतः पुरुषः पूर्वोक्तेन प्रकारेण कर्मयोगानुष्ठाने
न क्रमेण संस्कृतात्मा सन् ॥ जन्मादिविक्रियारहितत्वेन निःक्रियमात्मानमात्मत्वेन संबुद्धः सन् सर्वकर्माणि मनसा संन्यस्य
नैव कुर्वन्न कारयन्नासीनो नैःकर्म्यलक्षणां ज्ञाननिष्ठामश्नुत इत्येतत् ॥ पूर्वोक्तस्य कर्मयोगस्य प्रयोजनमनेन श्लोकेनोक्तं ॥

आ० १८ ॥
३१२ ॥
रामः ॥

कें नोक्तमर्थं संक्षिप्यानुवदति ॥ यो धिकृत इति ॥ पूर्वोक्तिप्रकारेणेति कर्मणि तत्फलत्वे च संगेनेत्यर्थः ॥ कर्मात्मनो योगस्यानुष्ठानेन संस्कृतात्मा स
क्रमेण श्रवणाद्यनुष्ठानद्वारेण कूटस्थं ब्रह्म प्रत्यक्त्वेन संबुद्ध इति संबंधः ॥ परस्य निष्क्रियत्वे हेतुमामाह ॥ जन्मादीति ॥ उक्तज्ञानवतः ॥ स
२ र्वकर्मत्यागद्वारा मुक्तिभाक्त्वं दर्शयति ॥ स सर्वेति ॥ १० ॥ ४९ ॥ श्रीरामः ॥

आत्मज्ञानवतः सर्वकर्मत्यागसंभावनामुक्त्वा तद्धीनस्य तदसंभवे हेतुवचनत्वेनानंतरश्लोकमवतारयति ॥ यः पुनरिति ॥ नबाधितमात्म
निकर्तृत्वविज्ञानमस्येत्यज्ञस्तथानस्य भावेऽस्तनानयेत्यावत्न ॥ एतमर्थं दर्शयितुमज्ञस्य सर्वकर्मसंन्यासासंभवे हेतुमाहेति योज
गी ना ॥ यस्मादिति यस्मात्तस्मादित्युत्तरेण संबंधः ॥ विवेकिनोऽपि देहधारितया देहभृत्त्वाविशेषे कर्माधिकारः स्यादित्याशंक्याह ॥ न हीति ॥ ● न

यः पुनरविद्वान्सन्देहात्माभिमानित्वेन देहभृदज्ञोऽबाधितात्मकर्तृत्वविज्ञानतयाऽहं कर्तेति निश्चितबुद्धिस्तस्याशेषकर्म
परित्यागस्याशक्यत्वात्कर्मफलत्यागेन चोदितकर्मानुष्ठान एवाधिकारो न तत्त्यागे इत्येतमर्थं दर्शयितुमाह ॥ न हि देहभृता श
क्यं त्यक्तुं कर्माण्यशेषतः ॥ यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयते ॥ ११ ॥ न हि यस्मान्न देहभृता देहं बिभर्तीति देहभृत् देहा
त्माभिमानवान्देहभृदुच्यते न विवेकी ॥ स हि वेदाविनाशिनमित्यादिना कर्तृत्वाधिकारान्निवर्तितोऽतस्तेन देहभृताऽज्ञेन न श
क्यं त्यक्तुं संन्यसितुं कर्माण्यशेषतो निःशेषेण ॥ तस्माद्यस्त्वज्ञोऽधिकृतो नित्यानि कर्माणि कुर्वन्कर्मफलत्यागी कर्मफलाभिसं
धिमात्रसंन्यासी स त्यागीत्यभिधीयते ॥ कर्म्यपि सन्निति स्तुत्यभिप्रायेण ॥ ११ ॥ श्रीरामचंद्राय नमः ॥ ११ ॥ ॥ पु ॥

कर्तृताधिकारस्तत्पूर्वकं कर्मानुष्ठानं तस्मादित्यावत् ॥ ज्ञानवतो देहधारणेऽपि तदभिमानित्वाभावोऽतः शब्दार्थः ॥ अज्ञस्य सर्वकर्मत्या
गायोगमुक्तं हेतूक्तस्य फलितमाह ॥ तस्मादिति ॥ कर्मानुष्ठायिनस्त्यागित्वोक्तिरयुक्तेत्याशंक्याह ॥ कर्म्यपीति ॥ कर्मिणोऽपि फलत्या
गेन त्यागित्ववचनं फलत्यागस्तुत्यर्थमित्यर्थः ॥ ११ ॥ ॥ ॥ ॥ ॥ ●

गी० भा० टी
३१३॥

कस्यतर्हि सर्वकर्मत्यागः संभवतीत्याशंक्य विवेकवैराग्यादिमतो देहाभिमानहीनस्येत्युक्तं निगमयति ॥ तस्मादिति ॥११॥
ज्ञाधिकारिणः सर्वकर्मसंन्याससंभवेति फलाभावे कुतस्तस्य कर्तव्यतेति शंकते ॥ किंपुनरिति ॥ गौणस्य मुख्यस्य वा सं
न्यासस्य फलं विवक्षितमिति विकल्पयति ॥ उच्यत इति ॥ सर्वकर्मत्यागो नाम तदनुष्ठानेपि तत्फलाभिसंधित्यागः स चामु
ख्यः संन्यासस्तस्य फलमाह ॥ अनिष्टमिति ॥ मुख्ये तु संन्यासे सर्वकर्मत्यागे सम्यग्धीद्वारा सर्वसंसारोच्छित्तिरेव फलमित्याह ॥

तस्मात्परमार्थदर्शित्वेनैवाऽदेहभृता देहात्मभावरहितेनाशेषकर्मसंन्यासः शक्यते कर्त्तुं ॥ किंपुनस्तत्प्रयोजनं यत्
सर्वकर्मपरित्यागात्स्यादित्युच्यते ॥ अनिष्टमिष्टंमिश्रंच त्रिविधं कर्मणः फलं ॥ भवत्यत्यागिनां प्रेत्य न तु संन्यासिनां
क्वचित् ॥१२॥ अनिष्टं नरकतिर्यगादिलक्षणं ॥ इष्टं देवादिलक्षणं ॥ मिश्रं इष्टानिष्टसंयुक्तं मनुष्यलक्षणं च ॥ एवं त्रि
विधं त्रिप्रकारं कर्मणो धर्माधर्मलक्षणस्य फलं ॥ बाह्यानेककारकव्यापारनिष्पन्नं सदविद्याकृतमिंद्रजालमायोपमं म

भवत्यत्या॥

आ० १८॥
३१३॥
रामः॥

न त्विति पादत्रयं व्याकरोति ॥ अनिष्टमित्यादिना ॥ तिर्यगादीत्यादिपदमवशिष्टनिकृष्टयोनिसंग्रहार्थं ॥ देवादीत्यादिपदं अवशि
ष्टोत्कृष्टयोनिसंग्रहायेति विभागः ॥ फलशब्दं व्युत्पादयति ॥ बाह्येति करणद्वारकमनेकविधत्वमुक्त्वा मिथ्यात्वमाह ॥ अविद्येति ॥ न
ष्टं तत्वे न दृष्टिमात्रदेहेत्वे दृष्टांतमाह ॥ इंद्रेति ॥ प्रतीतितो रमणीयत्वं सूचयति ॥ महामोहेति ॥१२॥ श्रीरामचंद्राय नमः ॥१२॥

अविद्योत्थितस्याविद्याश्रितत्वाद्दात्माश्रितत्वं वस्तुतो नास्तीत्याह ॥ प्रत्यगिति ॥ उक्तं फलं कर्मिणामिष्यते चेदमुख्यसंन्यासफलोक्तिपरत्वं पादत्रयस्य कथमिष्टमित्याशंक्याह ॥ अपरमार्थेति ॥ फलाभिसंधिविकलानां कर्मिणां देहपातादूर्ध्वं कर्मानुरोधिफलमावश्यकमित्यर्थः ॥ कर्मिणामेव सतामफलाभिसंधीनां अमुख्यसंन्यासित्वात्तदीयाऽमुख्यसंन्यासस्य फलमुक्त्वा चतुर्थं पादं व्याचष्टे ॥ न त्विति ॥ अमुख्यं संन्यासमनंतरप्रकृतं व्यवच्छिनत्ति ॥ परमार्थेति ॥ तेषां प्रधानं धर्ममुपदिशति ॥ केवलेति ॥ क्वचिद्देशे काले वा नास्ति

प्रत्यगात्मोपसर्पि च फल्गुतयालयमदर्शनं गच्छतीति फलमिति फलनिर्वचनं तदेतदेवं लक्षणं च फलं भवत्यत्यागिनामज्ञानां कर्मिणामपरमार्थसंन्यासिनां प्रेत्य शरीरपातादूर्ध्वं ॥ न तु परमार्थसंन्यासिनां परमहंसपरिव्राजकानां केवलज्ञाननिष्ठानां क्वचित् न हि केवलसम्यग्दर्शननिष्ठा अविद्यादिसंसारबीजं नोन्मूलयंति कदाचिदित्यर्थः अतः परमार्थदर्शिन एवाशेषकर्मसंन्यासित्वं संभवत्यविद्याध्यारोपितत्वात् आत्मनि क्रियाकारकफलानां ॥ न त्वज्ञस्याधिष्ठानादीनि ॥ ना

यथोक्तं फलं तेषामिति संबंधः ॥ तर्हि परमार्थसंन्यासो विफलत्वान्नानुष्ठीयेतेत्याशंक्य तस्य मोक्षावसायित्वान्मैवमित्याह ॥ न हीति ॥ न च परमार्थसंन्यासवदविशेषादज्ञानां परमार्थसंन्यासोपि किं न स्यात्त्यागस्य सुकरत्वादत्राह ॥ परमार्थेति ॥ न हि सम्यग्दर्शनादविद्यानिवृत्तौ तदारोपितक्रियाकारकादिनिवृत्तेरिति हेत्वर्थः ॥ विद्यावतः सर्वकर्मसंन्यासित्वसंभावनामुक्त्वा एवकारव्यावर्त्यं दर्शयति ॥ न त्विति ॥ १२ ॥ श्रीरामकृष्णाय नमः ॥

अविदुषोऽशेषकर्मणांनह्येतत्नांरागादीनांत्यागायोगेकारकेष्वधिष्ठानादिष्वात्मत्वदर्शनंहेतुमाह ॥ त्रिपेति ॥ १२ ॥ कथंअधिष्ठानादी
नांक्रियाकर्तृत्वंकथंवाऽविदुषस्तेष्वात्मत्वधीरित्याशंक्यानंतरश्लोकचतुष्टयस्यतात्पर्यमाह ॥ तदेतदिति ॥ कर्मार्थिनामधिष्ठा
नादीनामप्रमाणिकत्वाशंकामादावुद्धरति ॥ पंचेति ॥ उत्तरत्रेत्यधिष्ठानादिषुवक्ष्यमाणेष्वित्यर्थः उक्तानांतेषामेववैसा०

क्रियाकर्तॄणिकारकाणिआत्मत्वेनपश्यतोऽशेषकर्मसंन्यासःसंभवति ॥ तदेतदुत्तरैःश्लोकैर्दर्शयति ॥ पंचैतानिम
हाबाहोकारणानिनिबोध मे ॥ सांख्येकृतांतेप्रोक्तानिसिद्धयेसर्वकर्मणां ॥ १३ ॥ पंचैतानिवक्ष्यमाणानिहेमहा
बाहोकारणानिनिर्वर्तकानिनिबोधमेममसरस्तुत्तरत्रचेतःसमाधानार्थं ॥ वस्तुवैषम्यप्रदर्शनार्थंचतानिचकारणा
नि ज्ञातव्यतयास्तीतिसांख्ये ॥ ज्ञातव्याःपदार्थाःसंख्यायंतेयस्मिन्शास्त्रेतेनतत्सांख्यंवेदांतः ॥ कृतांतइतित
स्यैवविशेषणं ॥ कृतमितिकर्मोच्यतेतस्यांतःकृतस्यपरिसमाप्तिर्यत्रसकृतांतःकर्मांतइत्येतत् ॥ ५३ ॥ ॥०

म्यंनिर्दिदर्शयिषितुंनहिचेतःसमाधानादृतेतज्ज्ञातुंशक्यंते ॥ सांख्यशब्दंव्युत्पादयतिज्ञातव्याइति ॥ आत्मात्वंपदार्थस्तत्स
दार्थोब्रह्मतयोरैक्यधीस्तदुपयोगिनश्चश्रवणादयःपदार्थास्तेसंख्यायंतेव्युत्पाद्यंते ॥ कृतांतशब्दस्यवेदांतविषयत्वंविभज
॥ ते ॥ कृतमित्यादिना ॥

वेदांतस्यतत्वधीद्वाराकर्मावसानमित्येवास्योपक्रमानुकूल्यंदर्शयति॥यावानिति॥उदपानेकूपादौयावानर्थः॥स्नानादिस्तावानर्थः
समुद्रेसंपद्यतेऽतोयथाकूपादिकृतंकार्यंसर्वंसमुद्रेणभवति॥तथासर्वेषुवेदेषुकर्मार्थेषुयावत्फलंतावत्ज्ञानवतोब्राह्मणस्यज्ञा
नेनभवति॥ज्ञानंप्राप्तस्यकर्तव्यानव[redacted]शेषादित्यर्थः॥तत्रैववाक्यांतरमनुक्रामति॥सर्वमिति॥उदाहृतवाक्यस्यता
त्पर्यमाह॥आत्मेति॥आत्मज्ञानेसतिसर्वकर्मनिवृत्तावपिकथंवेदांतस्यकृतांतत्वमित्याशंक्याह॥अनंतरमिति॥तानिमहद्वचनतोनिबो

यावानर्थउदपानेसर्वतःसंप्लुतोदके॥सर्वंकर्माखिलंपार्थज्ञानेपरिसमाप्यतइति॥आत्मज्ञानेसंज्ञानेसर्वकर्मणांनिवृत्तिं
दर्शयन्तस्मिन्नात्मज्ञानार्थेसांख्येकृतांतेवेदांतेप्रोक्तानिकथितानि॥सिद्धयेसिध्यर्थंनिष्पत्त्यर्थंसर्वकर्मणां॥
तानिकानीत्युच्यंते॥अधिष्ठानंतथाकर्ताकरणंचपृथग्विधं॥विविधाश्चपृथक्चेष्टादैवंचैवात्रपंचमं॥१४॥:
अधिष्ठानमिच्छाद्वेषसुखदुःखज्ञानादीनामभिव्यक्तेराश्रयोऽधिष्ठानंशरीरं॥तथाकर्ताउपाधिलक्षणोभोक्ता॥
॥करणंचश्रोत्रादिशब्दाद्युपलब्धयेपृथग्विधंनानाप्रकारंद्वादशसंख्यं॥५३॥श्रीराम॥

धेतिपूर्वेणसंबंधः॥१३॥कर्मार्थान्यधिष्ठानादीनिमानसत्वतज्ज्ञेयानीत्युक्तं॥इदानींप्रश्नपूर्वकंविशेषतस्तानिनिर्दिशति॥कानी न्नि
त्यादिना॥प्रतीकमादायव्याकरोति॥अधिष्ठानमिति॥उपाधिलक्षणोबुध्यादिरुपाधि[redacted]स्तल्लक्षणस्तत्स्वभावोबुध्याद्यनु
विधायीतिकर्मात्मनिपरश्चनुपहितस्तस्मात्प्रधानरत्यर्थः॥तत्रकार्यात्लिंगमनुमानंसूचयति॥शब्दादीति॥ज्ञानेंद्रियाणिपंचकर्मे
॥द्रियाणिपंचमनोबुद्धिश्चेतिद्वादशसंख्यत्वं॥५॥श्रीरामः॥५॥

टी०

चेष्टानांविविधत्वंनानाप्रकारत्वं॥तदेवस्पष्टयति॥वायवीयाइति॥पृथक्त्वमसंकीर्णत्वं॥नहिप्राणापानादिचेष्टानांमिथःसंकरोस्ति॥
दैवमेवविशदयति॥आदित्यादीति॥१४॥पंचानामधिष्ठानादीनामुक्तानांसर्वकर्मसिध्यर्थत्वंस्पष्टयति॥शरीरेति॥ननुजीवन
कृतंनिमिषोन्मेषादिकर्मांतरंसाधारणमस्तितत्कथंशरीरेंद्रियकरणमितिनत्राह॥यच्चेति॥अधिष्ठानादीनांकर्ममात्रहेतुत्वं

विविधाश्चपृथक्चेष्टाःवायवीयाःप्राणापानाद्याः॥दैवंचैवंदैवमेवचात्रैतेषुश्रोत्रादिषुपंचमंपंचानांपूरणमादित्यादिंच॥
क्षुराद्यनुग्राहकंच॥शरीरवाङ्मनोभिर्यत्कर्मप्रारभतेनरः॥न्याय्यंवाविपरीतंवापंचैतेतस्यहेतवः॥१५॥शरीरवाङ्मनो
भिर्यत्कर्मत्रिभिरेतैःप्रारभतेनिर्वर्तयतिनरः॥न्याय्यंवाधर्म्यंशास्त्रीयंविपरीतंवाअधर्म्यंअशास्त्रीयं॥यच्चापिनि
मिषितचेष्टितादिजीवनहेतुस्तदपिपूर्वकृतधर्माधर्मयोरेवकार्यमितिन्याय्यविपरीतयोरेवग्रहणेनगृहीतं॥पंचैतेय
थोक्तास्तस्यसर्वस्यैवकर्मणोहेतवःकारणानि॥नन्वेतानिअधिष्ठानादीनिसर्वकर्मणांनिर्वर्तकानिकथमुच्यतेश
रीरवाङ्मनोभिःकर्मप्रारभतइति॥नैषदोषः॥विधिप्रतिषेधलक्षणंसर्वकर्मशरीरादित्रयप्रधानं॥तदंगतयादर्शनश्र
वणादिचजीवनलक्षणंत्रिधैवराशीकृतमुच्यतेशरीरादिभिरधिष्ठानादिभिरारभतइति॥१५॥श्रीरामचंद्रायनमः॥

आ०१८॥
३१५॥रामः॥

प्रतिज्ञायशरीरादित्रिविधकर्महेतुत्वोक्तिरयुक्तेतिशंकते॥नन्विति॥पूर्वापरविरोधंपरिहरति॥नैषइति॥ननुजीवनकृतानिस्वाभाविका
निकर्माणिदर्शनादीनिविधिनिषेधबाह्यत्वान्न[illegible]हादिनिर्वर्त्यानीत्याशंक्याह॥तदंगतयेति॥यस्यदेहादित्रयस्यप्रधानस्यांगंच
क्षुरादितन्निष्पाद्यत्वेनजीवनकृतंदर्शनादिप्रधानकर्मएवंनभवतमितित्रैविध्यमविरुद्धमित्यर्थः॥१५॥श्रीगजानन॥१५॥

सा

देहाधारभ्येत्रिविधकर्मणिसर्वकर्मांतर्भावेपिकथंपंचानामेवाधिष्ठानादीनांतत्रहेतुत्वंफलोपभोगकालेकारणांतरापे
क्षासंभवादित्याशंक्य जन्मकालभाविनोभोगकालभाविनश्चसर्वस्यकारणस्यतेष्वेवांतर्भावान्मैवमित्याह॥ फलेति॥
॥१५॥ क्रियाकर्तृत्वमधिष्ठानादीनामापाद्याविदुषस्तेष्वेवात्मत्वदृष्टिमनुवदति॥ तत्रेति॥ तत्पदपरामर्शयोग्यं प्रकृतं

फलकालेपि॥ तत्प्रधानैर्भुज्यत इति पंचानामेव हेतुत्वं न विरुध्यत इति॥ तत्रैवं सति कर्तारमात्मानं केवलं तु
यः॥ पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः॥ १६॥ तत्रेति प्रकृतेन संबध्यते॥ एवं सति एवं यथोक्तैः पंचभिः
हेतुभिर्निर्वर्त्ये सति कर्मणि॥ तत्रैवं सतीति दुर्मतित्वस्य हेतुत्वेन संबध्यते॥ तत्र तेष्वात्मानं अनन्यत्वेनाविद्यया
परिकल्पितेः क्रियमाणस्य कर्मणोऽहमेव कर्तेति कर्तारमात्मानं केवलं तु शुद्धं तु यः पश्यति अविद्वान्॥ कस्मा
॥ त्वेदांताचार्योपदेशन्यायैरकृतबुद्धित्वात् असंस्कृतबुद्धित्वात्॥ ७॥

सर्वकर्मप्रतीकमादायपूर्वेणसहाक्षरार्थंकथयति॥ एवमिति॥ अधिष्ठानादीनामुक्तरीत्याकर्तृत्वेसत्यनुगतंकर्तृत्वमात्म
नोमतोऽध्यारोप्यपश्यतस्ततोदुर्मतिरात्मनिकर्तृत्वंपश्यतीत्याह॥ तत्रैवमिति॥ कर्तारमित्यादिव्याचष्टे॥ तत्रेत्यादिना
तेष्वधिष्ठानादिषुतैरधिष्ठानादिभिरारोपितात्मभावैरित्यर्थः॥ अकर्तारमात्मानंकर्तारंपश्यतीत्यत्रप्रश्नद्वाराहेतुमाह॥
॥ कस्मादिति॥ ८॥

गी॰ टी॰
३१६

विर-दुः॥ यस्त्व संस्कृतबुद्धिरेवातिरिक्तात्मवादी कर्तृत्वं तस्यानुमन्यते नासौ कर्तृत्वमात्मनि पश्यन्नपि भवत्यकृतबुद्धिस्तत्राह॥ योपीति॥
निस्पाशिशास्त्रपूर्वं दृढमाचार्योपदेशेन तदनुसारिन्यायैश्चानाहितबुद्धित्वादकृतबुद्धित्वं सिद्धमित्यर्थः॥ कौटस्थ्यमात्मनस्त
च याथात्म्यं कर्मणोपि तत्त्वमविद्याकृताधिष्ठानादिकृतत्वेनात्मास्पर्शित्वमात्मकर्मणोस्तत्त्वदर्शनाभावोऽतः शब्दार्थः॥
दुष्टत्वं स्पष्टीकुर्वन्दुर्मतित्वं विवृणोति नसेति॥ अहं कर्तेत्यात्मदर्शनवतोपि नाविदुषः तद्दर्शनमस्तीत्यत्र दृष्टान्तमाह पश्येति॥ त

योपि देहादिव्यतिरिक्तात्मवाद्यप्यन्यमात्मानमेव केवलं कर्तारं पश्यत्यसावप्यकृतबुद्धिरेव। अतोऽकृतबुद्धित्वान्न
स पश्यत्यात्मनस्तत्त्वं कर्मणो वेत्यर्थः। अतो दुर्मतिः कुत्सिता विपरीता दुष्टाऽजस्रं॥ जन्ममरणप्रतिपत्तिहेतुभूता
मतिरस्येति दुर्मतिः॥ स पश्यन्नपि न पश्यति॥ यथा तैमिरिकोऽनेकं चंद्रं नभः यथा वा वाहनेऽपविष्टोऽन्येषु धा
वत्स्वात्मानं धावन्तं पश्यति॥ १६॥ कः पुनः सुमतिर्यः सम्यक् पश्यतीत्युच्यते॥ १६॥ श्रीकृष्णायनमः॥ १६॥

अ॰ १८॥
३१६॥
रामः॥

तिमिरोपहतदृष्टिरनेकं चंद्रं पश्यन्नपि तत्त्वतो न तं पश्यत्येवमविद्वानात्मानं कर्तारं पश्यन्नपि न पश्यति तत्त्वतो न तं पश्य
तीत्यर्थः॥ अधिष्ठानादिष्वविषयासंबंध्यात्मनः स्वात्मनि तत्तत्क्रियापरोदृष्टांतमाह॥ यथा वेति॥ अन्येषु वाहकेषु पु
रुषेषु धावनकर्तृष्वेवासन्ने स्थितः स्वात्मानं धावनकर्तारमविवेकादभिमन्यते तथाधिष्ठानादिषु क्रियाकर्तृषु तद्वत्तं
स्वात्मानं कर्तारमभिमन्यमानो दुर्मतिरित्यर्थः॥ १६॥ विपरीतदृष्टेर्दुर्मतित्वं शिष्ट्वा सम्यग्दृष्टेः सुमतित्वं प्रश्नपूर्वकमाह॥
॥ कः पुनरित्यादिना॥

अहंकर्तेत्यात्मनिकर्तृत्वप्रत्ययाभावेकुत्रकर्तृत्वधीरित्याशंक्याह॥एतइति॥कथंतर्हिकर्तृत्वधीरात्मनीत्याशंक्याधिष्ठानादीनांतद्व्यापाराणांचसाक्षित्वादि
त्याह॥अहंकृतेति॥आत्मनोनस्वतोलिप्तिक्रियाशक्तिमत्त्वमित्यत्रप्रमाणमाह॥अप्राणोहीति॥नापितस्यस्वतोज्ञानशक्तिमत्त्वमित्याह॥अमनाइति॥
उपाधि[illegible]द्वयासंबंधेसुद्धत्वंफलितमाह॥सुभ्रइति॥कारणसंबंधादशुद्धिमाशंक्योक्तं॥अक्षरादिति॥कार्यकारणयोरात्माऽस्पर्शित्वेनपार्थक्यव

यस्यनाहंकृतोभावोबुद्धिर्यस्यनलिप्यते॥हत्वापिसइमाँल्लोकान्नहंतिननिबध्यते॥१७॥यस्यशास्त्राचार्योपदेशन्यायसंस्कृतात्मनोन
भवत्यहंकृतोऽहंकर्तेत्येवंलक्षणोभावोभावनाप्रत्ययः॥एतेएवपंचाधिष्ठानादयोऽविद्ययात्मनिकल्पिताःसर्वकर्मणांकर्तारोनाहं॥
अहंतुतद्व्यापाराणांसाक्षिभूतः॥अप्राणोह्यमनाःशुभ्रोअक्षरात्परतःपरः॥केवलोऽविक्रियाःइत्येवंपश्यतीत्येतत्॥बुद्धिरंतःक
रणंयस्यात्मनउपाधिभूतानलिप्यतेनानुशायिनीभवति॥इदमहंपापकर्माकार्षंतेनाहंनरकंगमिष्यामीत्येवंबुद्धिर्यस्यनलिप्यतेऽ
सौसुमतिः॥सपश्यतिहत्वाऽपिसइमान्लोकान्सर्वान्प्राणिनइत्यर्थः॥नहंतिहननक्रियांनकरोति॥ननिबध्यतेनापितत्का
र्येणाधर्मफलेनसंबध्यते॥

निष्पा

स्येसद्वि[illegible]तीयत्वमाशंक्यतयोरवस्कृतान्नैवसं[illegible]तांनैवमित्याह॥केवलइति॥जन्मादिसर्वविक्रियारहितत्वेनकौटस्थ्यमाह॥अविक्रियइति॥
[illegible]बुद्धिर्यस्येत्यादिव्याचष्टे॥बुद्धिरिति॥नानुशायिनीनानुशयवतीनक्लेशशालिनीत्यर्थः॥द्वितीयपादस्याक्षरार्थमुक्त्वावाक्यार्थमाह॥इदमिति॥
[illegible]यातंकर्मेदंमत्परामृश्यते॥लोकानांप्राणसंबंधाभावेकुतोहिंसेत्याशंक्याह॥प्रा[illegible]णिनइति॥१७॥श्रीरामकृष्णायनमः॥१७॥

के

३१८

विरु[illegible]ं कस्मात्कर्तापि न युक्तेति शंकते॥ नन्विति॥ विरोधं परिहरति॥ नैष इति॥ लौकिकदृष्टिमवष्टभ्य हत्वापीति निर्देशं विशदयति॥ दे[illegible]हादि
[illegible]॥ नास्तिकीं दृष्टिमास्थाय न हंतीत्यादिनिर्देशमुपपादयति॥ यथेति॥ नाहं कर्ता किंतु न तत्कर्तृ न व्यापारसाक्षी॥ क्रियाज्ञानशक्तिमदुपा
धिद्वयविनिर्मुक्तः शुद्धः सत्कापकारणासंबंधोऽद्वितीयोऽविक्रिय इत्येव पारमार्थिकदृष्टेर्यथादर्शित्वं द्रष्टव्यं॥ हत्वापीत्येतन्न हंती०
त्यादिनोभयं दृष्टिद्वयावष्टंभादुपपन्नमित्युपसंहरति॥ तदुभयमिति॥ केवलमेवात्मानं कर्तारं पश्यन्दुर्मतिरित्यत्रात्मविशेषणस

ननु हत्वापि न हंतीति प्रतिषिद्धमुच्यते यद्यपि स्तुतिं॥ नैष दोषः॥ लौकिकपारमार्थिकदृष्ट्यपेक्षया तदुपपत्तेः देहाद्यात्मबु
ध्याहं हंताहमिति लौकिकीं दृष्टिमाश्रित्य हत्वापीत्याह॥ यथादर्शितां पारमार्थिकीं दृष्टिमाश्रित्य न हंति न निबध्यत इति॥ तदुभयमुपपद्यत एव॥
ननु अधिष्ठानादिभिः संभूय करोत्येवात्मा कर्तारमात्मानं केवलं त्विति केवलशब्द प्रयोगात्॥ नैष दोषः॥ आत्मनोऽविक्रियस्वभा
वत्वेऽधिष्ठानादिभिः संहतत्वानुपपत्तेः विक्रियावतो ह्यन्यैः संहननं भवति संहत्य वा कर्तृत्वं स्यात्॥ १७॥ श्रीरामः॥ १७॥०

आ०१८॥
३१७॥
रामः॥

मर्पकं केवलशब्दसामर्थ्यादात्मनो विशिष्टस्य कर्तृत्वमिति शंकते॥ नन्विति॥ आत्मनो वैशिष्ट्यायोगान्न विशिष्टस्यापि कर्तृत्वमिति दूषय
ति॥ नैष इति॥ अविक्रियस्वभाववत्वेऽपि कथमात्मनोऽसंहतत्वमित्याशंक्याह॥ विक्रियेति॥ अधिष्ठानादिभिरात्मनः संहननेऽपि न कर्तृ
॥ त्वं अविक्रियस्य क्रियाश्रयत्वव्याघातादित्याह॥ संहत्यवेति॥ १७॥ श्रीरामः॥

प संहतत्वानुपपत्तिं व्यक्तीकरोति ॥ न त्विति ॥ असंहतत्वे फलितमाह ॥ तत इति ॥ कथं तर्हि केवलमात्मानमिति केवलशब्दादुक्तं तत्राह ॥ ननु ०
सा ति ॥ कर्तृत्वमात्मनोऽनुपपन्नं स्याद्विक्रियत्वमपैतीशंक्याह ॥ अविक्रियत्वं चेति ॥ तत्र स्मृतिवाक्यान्युदाहरति ॥ अविकार्योऽयमिति ॥
नायं हन्ति न हन्यत इत्यादिवाक्यमादिशब्दार्थः उक्तवाक्यानामात्माविक्रियत्वे तात्पर्यं सूचयति ॥ असक्त इति ॥ निष्कलं निष्क्रियं
शान्तमित्यादिवाक्यं श्रुत्यादिशब्दार्थः ॥ यानि वाक्यानि तैरात्मनोऽविक्रियत्वं दर्शितमिति योजना ॥ न्यायतश्चेतद्दर्शितमिति प

न त्वविक्रियस्यात्मनः केनचित्संहननमस्तीति न संभूय कर्तृत्वमुपपद्यते ॥ ततः केवलत्वमात्मनः स्वाभाविकमिति केव
लशब्दोऽनुवादमात्रमविक्रियत्वं चात्मनः श्रुतिस्मृतिन्यायसिद्धमविकार्योऽयमुच्यते गुणैरेव कर्माणि क्रियन्ते शरीरस्थोऽपि
व न करोतीत्याद्यसकृदुपपादितं गीतास्वेव तावच्छ्रुतिषु च ध्यायतीव लेलायतीवेत्येवमादीनि वाक्यानि न्यायतश्च निरवय
वमपरतन्त्रमविक्रियमात्मतत्त्वमिति राजमार्गो विक्रियावत्त्वाभ्युपगमेऽप्यात्मनः स्वकीयैव विक्रिया स्वस्य भवितुमर्हति ॥
॥ नाधिष्ठानादीनां कर्माण्यात्मकर्तृकाणि स्युः ॥

र्वेन संबंधः ॥ न्यायमेव प्रदर्शयति ॥ निरवयवमिति ॥ न तावदात्मा स्वतो विक्रियते निरवयवत्वादाकाशवन्नापि परतोऽसंगस्याका
र्यस्यापराधीनत्वायोगादित्यर्थः ॥ किंचात्मनः स्वनिष्ठा वा क्रिया आधिष्ठानादिनिष्ठा वा नाद्यः स्वनिष्ठक्रियानुपपत्तेरात्मनो दर्शितत्वा
दित्याशयेनाह ॥ विक्रियावत्त्वेति ॥ सा चायुक्तेत्युक्तमिति शेषः ॥ द्वितीयं दूषयति ॥ नेत्यादिना ॥ अधिष्ठानादिकृतमपि कर्म न तद्योगादात्म

गी॰ भा॰ टी॰ विर[illegible]त्तीत्याशंक्य तदागमनं वास्तवमाविद्यकं वेति विकल्प्याद्यं दूषयति ॥ नहीति ॥ द्वितीयं निरस्यति ॥ यत्विति ॥ आत्मन्यविद्याध्यापितं कर्म ना
३१९ [illegible]॥ यतीत्येतद्दृष्टान्ताभ्यामुपपादयति ॥ यथेत्यादिना ॥ आत्मनोऽविक्रियावत्वेन कर्तृत्वाभावे फलितमाह ॥ तस्मादिति ॥ ननु प्रागेवात्मनोऽवि°
[illegible]त्वं प्रतिपादितं तदिह कस्मादुच्यते ॥ तत्राह ॥ नायमिति ॥ शास्त्रादौ प्रतिज्ञायहेतुपूर्वकं संक्षिप्योक्ता मध्ये तत्र तत्र प्रसंगं कृत्वा प्रसारितां कर्मा

न हि परस्य कर्म परेणाकृतमागंतुमर्हति ॥ यत्वविद्यया गमितं न तत्तस्य ॥ यथा रजतत्वं न शुक्तिकायाः ॥ यथा वा तलमलिन
त्वं बालैरभिमतमविद्यमानं आकाशस्य ॥ तथाधिष्ठानादिविक्रियापि तेषामेव नात्मनस्तस्मात् युक्तमुक्तं अहंकृतत्वबुद्धिले
पाभावे विद्वान्न हंति न निबध्यत इति ॥ नायं हंति न हन्यत इति प्रतिज्ञाय न जायते इत्यादिहेतुवचनेनाविक्रियत्वमात्मन आ १८ ॥
उक्त्वा वेदाविनाशिनमिति विदुषः कर्माधिकारनिवृत्तिं शास्त्रादौ संक्षेपत उक्त्वा मध्ये प्रसारितं च तत्र तत्र प्रसंगं कृत्वेहोप ३१८ ॥
संहरति ॥ शास्त्रार्थपिंडीकरणाय विद्वान्न हंति न निबध्यत इति ॥ एवं च सति देहभृत्त्वाऽभिमानाऽनुपपत्तावविद्याकृ रामः ॥
ताशेषकर्मसंन्यासोपपत्तेः संन्यासिनामनिष्टादि त्रिविधं कर्मणः फलं न भवतीत्युपपन्नं ॥ १७ ॥ श्रीरामाय नमः ॥ प

धिकारनिवृत्तिमिहोपसंहरतीति संबंधः ॥ प्रतिज्ञातस्य हेतुनोपपादितस्यांते निगमनं किमर्थमित्याशंक्याह ॥ शास्त्रार्थेति ॥ कर्माधिकारो
विदुषो नेति स्थितेन तस्य देहाभिमानाभावे सत्यविद्योत्थसर्वकर्मत्यागसिद्धेरनिष्टमिष्टं मिश्रं चेति त्रिविधं कर्मफलं संन्यासिनां नेति प्रागुक्तं
॥ युक्तमेवेति परमप्रकृतमुपसंहरति ॥ एवं चेति ॥

वर्गं९

येतुनरविद्वांसोदेहाभिमानिनस्तेष्वेवत्रिविधंकर्मफलंभवत्येवेतिहेतुवचनसिद्धमर्थंनिगमयति॥तद्विपर्ययाद्धेति॥अधिष्ठानादिकृतंकर्मनात्म
कृतमविदुषामेवकर्माधिकारो देहाभिमानित्वेनतत्त्यागायोगात्॥ देहाभिमानाभावात्तु विदुषांकर्माधिकारनिवृत्तिरित्युपसंहृतमर्थंसंक्षिप्या
ह॥इत्येषइति॥उक्तश्चगीतार्थोवेदार्थत्वादुपादेयइत्याह॥सएषइति॥कथमयुक्तार्थोवेदार्थोपिप्रतिपत्तुंशक्यतेतत्राह॥निपुणेति॥भा
ष्यकृताप्रमानयुक्तिभ्यांविभज्यानुक्तत्वात्तस्यार्थस्योपादेयत्वमित्याशंक्याह॥इतितत्रतत्रेति॥१७॥शास्त्रार्थोपसंहारानंतर्यमथेत्यु

तद्विपर्ययाच्चेतरेषांभवतीत्येतच्चाप्यपरिहार्यमित्येषगीताशास्त्रस्यार्थउपसंहृतःसएषसर्ववेदार्थसारोनिपुणमतिभिःपंडितैर्वि
चार्यप्रतिपत्तव्यः॥इतितत्रतत्रप्रकरणविभागेनदर्शितोऽस्माभिः शास्त्रन्यायानुसारेण॥छ॥अथेदानींकर्मणांप्रवर्तकमु
च्यते॥ज्ञानंज्ञेयंपरिज्ञातात्रिविधाकर्मचोदना॥करणंकर्मकर्तेतित्रिविधःकर्मसंग्रहः॥१८॥ज्ञानंज्ञायतेऽनेनेतिसर्वविष
यमविशेषेणोच्यते॥तथाज्ञेयंज्ञातव्यंतदपिसामान्येनैवसर्वमुच्यते॥तथापरिज्ञातोपाधिलक्षणोऽविद्याकल्पितोपा
॥ धिर्भोक्तेति॥एतत्त्रयमेषामशेषेणसर्वकर्मणां॥

क्तमिदानीमितिप्रवर्तकोपदेशावस्थोक्ता॥कर्मणांयेषांविदुषांनाधिकारोऽविदुषांचाधिकारस्तेषामित्यर्थः॥ज्ञानशब्दस्यकरणव्युत्पत्त्याज्ञानमा
[illegible]त्वमाह॥ज्ञानमिति॥ज्ञेयशब्दस्यापितद्वदेवज्ञातव्यमात्रार्थत्वमाह॥तथेति॥उपाधिलक्षणत्वंतत्प्रधानत्वमुपहितत्वंतस्यावस्थ
र्थमविद्याकल्पितविशेषणमेतदेवत्रयंसर्वकर्मप्रवर्तकमित्याह॥एतदिति॥सर्वकर्मणांप्रवर्तकमित्यध्याहर्तव्यं॥छ॥श्रीरामः॥

भा०टी० चोदनेति क्रियायाः प्रवर्तकं वचनमिति भाष्यानुसारेण चोदनाशब्दार्थमाह॥ प्रवर्तिकेति॥ सर्वकर्मणामिति पूर्वेण संबंधः त्रैविध्यं ज्ञाना
गी० दीनां प्रागुक्तं॥ कर्मणां चोदनेति विग्रहः॥ तेषां सर्वकर्मप्रवर्तकत्वमनुभवेन साधयति॥ ज्ञानादीनामिति॥ हानोपादानादीत्यादिपदेनो
३१९ पेक्षा विवक्षिता करणमित्यादेस्तात्पर्यमाह॥ ततइति॥ ज्ञानानांदीनां प्रवर्तकत्वादित्यर्थः॥ उक्तेर्थे श्लोकभागमवतारयति॥ इत्येतदिति॥ ॥
बोधमेतत्स्वं च द्विविधं करणं करणव्युत्पत्त्या कथयति॥ करणमिति॥ उक्तलक्षणं कर्मैव स्पष्टयति॥ कर्तुरिति॥ स्वतंत्रो हि कर्ता०

प्रवर्तिका त्रिविधा कर्मचोदना॥ ज्ञानादीनां हि त्रयाणां सन्निपाते हानोपादानादिप्रयोजनः सर्वकर्मारंभः स्यात्॥ ततः पं
चभिरधिष्ठानादिभिरारब्धं वाङ्मनःकायाश्रयभेदेन त्रिधा राशीभूतं त्रिषु करणादिषु संगृह्यत इत्येतदुच्यते॥ करणं क्रियतेऽने प
नेति बाह्यं श्रोत्राद्यंतस्थं बुद्ध्यादि कर्मेप्सिततमं॥ कर्तुः क्रियया व्याप्यमानं॥ कर्ता करणानां व्यापारयितोपाधिलक्षण इति
त्रिविधः त्रिप्रकारः कर्मसंग्रहः संगृह्यतेऽस्मिन्निति संग्रहः कर्मणः संग्रहः कर्मसंग्रहः॥ कर्मैव हि त्रिषु समवैतीति अ०१८॥
तेनायं त्रिविधः कर्मसंग्रहः॥१८॥ अथेदानीं क्रियाकारकफलानां सर्वेषां ३१९॥
विप रामः॥

स्यात्तं चैतं च कारका प्रयोज्यस्य तत्प्रयोक्तृत्वमित्याह॥ कर्तेति॥ कथमुक्ते त्रिविधे कर्मसंग्रहस्तेनत्राह॥ कर्मेति॥ कर्मणो हि प्रसिद्धं
कारकाश्रयत्वमिति भावः॥१८॥ अनंतरश्लोकदशकतात्पर्यमाह॥ अथेति॥ ज्ञानादिप्रस्तावानंतर्यमथशब्दार्थः॥ इदानीं प्रस्तुत
॥ ज्ञानाद्यवांतरभेदापेक्षायामित्यर्थः॥

तेषांगुणभेदात्त्रैविध्येहेतुमाह॥गुणात्मकत्वादिति॥वक्तव्योवक्ष्यमाणश्लोकनवकेनविशेषः॥एवंस्थितेप्रथममवांत
रभेदप्रतिज्ञाक्रियतइत्याह॥इत्यारभ्यतइति॥कर्तुरीप्सिततमंकर्मेतियत्पारिभाष्यतेतन्नात्रकर्मशब्दवाच्यमित्याह॥
नेति॥गुणातिरेकेणविधांतरंज्ञानादिषुनेतिनिर्धारयितुमवधारणमित्याह॥गुणेति॥ज्ञानादीनांप्रत्येकंगुणभेदप्रयुक्तंत्रै

गुणात्मकत्वात्सत्वरजस्तमोगुणभेदतः त्रिविधोभेदोवक्तव्यइत्यारभ्यते।ज्ञानंकर्मचकर्ताचत्रिधैवगुणभेदतः
प्रोच्यतेगुणसंख्यानेयथावच्छृणुतान्यपि॥१९॥ज्ञानंकर्मचैकंक्रियानंकारकंपारिभाषिकमी प्सिततमंकर्म कर्ताच
निर्वर्तकःकर्मणां।त्रिधैवेत्यवधारणंगुणव्यतिरिक्तजात्यंतराभावप्रदर्शनार्थंगुणभेदतःसत्वादिभेदेनेत्यर्थः॥प्रोच्य
तेकथ्यतेगुणसंख्यानेकापिलेशास्त्रेकापिलंगुणसंख्यानंशास्त्रं॥तदपिगुणभोक्तृविषयेप्रमाणमेवपरमार्थब्रह्मात्मै
कत्वविषयेयद्यपिविरुध्यते॥नहिकापिलागुणगौणव्यापारनिरूपणेअभियुक्ताइति॥१९॥श्रीजनार्दनायनमः॥

कर्म २

तमपि ४

विध्येप्रमाणमाह॥प्रोच्यतइति॥ननुकापिलंपातंजलमित्यादिशास्त्रंविरुद्धार्थत्वादप्रमाणंकथमिहप्रमाणीक्रियतेतत्राह॥
तदपीति॥विषयविशेषेविरोधेपिप्रकृतेर्थेप्रामाण्यमविरुद्धमित्यर्थः॥यद्यपिकापिलादयोगुणत्वविचारेगौणव्यापारस्यभोग
योर्निरूपणेचनिपुणास्तथापिकथंतदीयंशास्त्रमत्रप्रमाणीकृतमित्याशंक्याह॥तेहीति॥ज्ञानादिषुप्रत्येकमवांतरभेदो
नस्वप्रामाण्यार्थंस्वस्यतंत्रांतरेपिप्रसिद्धिकथनंकृतमितितस्मादर्थेनकापिलादिमतोपादानमिहोपयोगीत्यर्थः॥१९॥श्रीराम॥१९॥

पो १

त[illegible]पादस्याविरुद्धार्थत्वं निगमयति ॥ इति वेति ॥ यथावदिति व्याचष्टे ॥ यथान्यायमिति ॥ १९ ॥ ज्ञानादीनां प्रत्येकं च त्रैविध्यं ज्ञानव्यं प्रतिज्ञाय ज्ञानत्रै
[illegible] श्लोकत्रयमवतारयति ॥ ज्ञानस्येति ॥ तत्र सात्विकं ज्ञानं मुमुक्षुस्पृहति ॥ सर्वेति ॥ भूतानि कार्यकरणात्मकान्युपाधिजातानि ॥ अद्वितीयमसंब
द्धं[illegible] सं प्रत्यगात्मानं [illegible] बाधितं तत्त्वं ज्ञेयत्वेन विवक्षितमित्यात्याह ॥ एकमिति ॥ विवक्षितमव्ययत्वं संक्षिपति ॥ कूटस्थेति ॥ प्रतिदेहम

तत्र शास्त्रमपि वक्ष्यमाणार्थस्य सत्यत्वेनोपादीयत इति न विरोधः ॥ यथावद्यथान्यायं यथाशास्त्रं शृणु तान्यपि ज्ञानादीनि तद्भे
दजातानि च गुणभेदकृतानि शृणु ॥ वक्ष्यमाणेऽर्थे मनःसमाधिं कुरु इत्यर्थः ॥ ज्ञानस्य तु तावत्त्रिविधत्वमुच्यते ॥ सर्वभूतेषु येनै
कं भावमव्ययमीक्षते ॥ अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्विकं ॥ २० ॥ सर्वभूतेषु अव्यक्तादिस्थावरांतेषु भूतेषु येन ज्ञाने
नैकं भावं वस्तु भावशब्दो वस्तुवाची एकमात्मवस्त्वित्यर्थः अव्ययं न व्येति स्वात्मना स्वधर्मैर्वा कूटस्थं नित्यमित्यर्थः ॥ ईक्ष
ते येन ज्ञानेन पश्यति तं च भावं अविभक्तं प्रतिदेहं विभक्तेषु देहभेदेषु न विभक्तं तदात्मवस्तु व्योमवन्निरंतरमित्यर्थः ॥

तत् अद्वैतात्मदर्शनं सात्विकं सम्यग्दर्शनं विद्धीति गौ॰ जानीहि ॥ यानि द्वैतदर्शनान्यसम्यग्भूतानि ॥ राजसानि तामसानि चेति न
॥ साक्षात्संसारोच्छित्तये भवंति ॥ २० ॥

विभक्तमित्युक्तं व्यनक्ति ॥ विभक्तेष्विति तज्ज्ञानमित्यादि व्याचष्टे ॥ अद्वैतेनेति ॥ २० ॥ द्वैतदर्शनान्यपि कानिचिद्भवंति सत्वनिर्वृत्तानि सम्यं
चीत्याशंक्याह ॥ यानीति ॥ तेषामसम्यक्त्वे हेतुमाह ॥ राजसानीति ॥ श्रीरामलक्ष्माय वासुदेवाय नमो नमः ॥ श्रीगंगायनमः ॥ २० ॥

प्रतिदेहमन्यत्वेनभिन्नानात्मनोयेनज्ञानेनजानातितज्ज्ञानंराजसमितिव्याचष्टे॥भेदेनेति॥पृथक्त्वंपृथग्विधत्वंचपुनरुक्तमित्याशंक्यहेतु
हेतुमत्वेनविभागंविवक्षित्वाह॥भिन्नेति॥ज्ञानस्यज्ञानकर्तृत्वमयुक्तमित्याशंक्याह॥सर्वेति॥२१॥सक्तत्वमेवव्यनक्ति॥एतावानिति॥

पृथक्त्वेनतुयज्ज्ञानंनानाभावान्पृथग्विधान्॥वेत्तिसर्वेषुभूतेषुतज्ज्ञानंविद्धिराजसं॥२१॥पृथक्त्वेनतुभेदेनप्रतिशरीरमन्यत्वेन यज्ज्ञानंनानाभावान्भिन्नानात्मनःपृथग्विधान्नानाप्रकारान्पृथगाकारान्भिन्नलक्षणानित्यर्थः॥वेत्तिविजानातियज्ज्ञानंसर्वभूतेषुज्ञानस्यकर्तृत्वासंभवात्येनज्ञानेनवेत्तीत्यर्थः॥तज्ज्ञानंविद्धिराजसंरजोगुणनिर्वृत्तं॥यत्तुकृत्स्नवदेकस्मिन्कार्येसक्तमहेतुकं॥अतत्वार्थवदल्पंचतत्तामसमुदाहृतं॥२२॥यत्तुज्ञानंकृत्स्नवत्समस्तवत्सर्वविषयमेवैकस्मिन्कार्ये देहेवहिर्वाप्रतिमादौसक्तमेतावानेवात्माईश्वरोवानातःपरमस्तीति॥यथानग्नक्षपणकादीनांशरीरानुवर्तीदेहपरिमाणो जीवईश्वरोवापाषाणदार्वादिमात्रइत्येवमेकस्मिन्कार्येसक्तमहेतुकंहेतुवर्जितंअयुक्तिकंनिःप्रमाणं॥अतत्वार्थवत्॥ यथाभूतोऽर्थस्तत्वार्थःसोऽस्यास्तीतितत्वार्थवत्नतत्वार्थवत्॥अतत्वार्थवत्॥अहेतुकत्वादेवअल्पंचाल्पविषयत्वा दल्पफलत्वाच्चतत्तामसमुदाहृतं॥तामसानांहिप्राणिनांअविवेकिनांज्ञानमीदृशमुच्यते॥श्रीरामचंद्रायनमः॥५॥

एक स्मिन्कार्येज्ञानस्यसक्तमेवदृष्टान्तेनसाधयति॥यथेत्यादिना॥यन्निर्युक्तिकत्वंतदेवज्ञानस्याभासत्वेकारणमित्याह॥अहेतुकत्वादिति॥
स्वरूपतोविषयतश्चाभासत्वंफलतश्चेत्याह॥अल्पेति॥तामसंज्ञानमुक्तलक्षणमित्यत्रानुभवंप्रमाणयति॥तामसानांहीति॥२२॥५॥०

गी॰ भा॰ टी॰
३२७

त्रिविधकर्मवक्तुमनंतरश्लोकत्रयमित्याह॥अथेति॥तत्रसात्विकंकर्मनिरूपयति॥नियतमिति॥२३॥राजसंकर्मनिर्दिशति॥यत्त्विति॥फलप्रेप्सु
नाकर्त्रायत्कर्मक्रियतेतत्राजसमित्युत्तरत्रसंबंधः॥ननुतत्वज्ञानवतानिरहंकारेणसाहंकारेणत्वज्ञेनक्रियतेकर्मेतिविवक्षांवारयति॥साहं
कारेणेति॥तत्वज्ञानवतानिरहंकारेणकृतंकर्मापेक्ष्यसाहंकारेणाज्ञेनकृतमेतत्कर्मेतिनविवक्ष्यतेचेत्तर्हिकिमत्रविवक्षितमित्यतआहेति॥

अथेदानींकर्मणस्त्रैविध्यमुच्यते॥नियतंसंगरहितमरागद्वेषतःकृतं॥अफलप्रेप्सुनाकर्मयत्तत्सात्विकमुच्यते॥२३॥नि
यतंनित्यंसंगरहितंआसक्तिवर्जितमरागद्वेषतःकृतं॥रागप्रयुक्तेनद्वेषप्रयुक्तेनचकर्त्रा [illegible] यत्कृतंतद्विपरीतकृतमरागद्वे
षतःकृतमफलप्रेप्सुनाफलंप्रेप्सतीतिफलप्रेप्सुःफलतृष्णस्तद्विपरीतेनाफलप्रेप्सुनाकर्त्राकृतंकर्मयत्तत्सात्विकमुच्यते॥२३॥
यत्तुकामेप्सुनाकर्मसाहंकारेणवापुनः॥क्रियतेबहुलायासंतद्राजसमुदाहृतं॥२४॥यत्तुकामेप्सुनाफलप्रेप्सुनेत्यर्थः॥कर्मसाहं
कारेणवाकर्मसाहंकारेणेतिनतत्वज्ञानापेक्षया॥किंतर्हिलौकिकश्रोत्रियनिरहंकारापेक्षया॥योहिपरमार्थनिरहंकारआत्मवि
॥त्नतस्यकामेप्सुत्वंबहुलायासकर्तृत्वंप्राप्तिरस्ति॥

रागद्वेषतः२

आ०१०॥
३२९॥
रामः॥

किंतर्हीतियोहिदुरितरहितःश्रोत्रियोलोकादनपेतस्तस्यपरहंकारवर्जितंकर्मतदपेक्षयेदंसाहंकारेणकृतंकर्मेत्युक्तमित्याह॥०
लौकिकेति॥ननुतत्वज्ञानवतोनिरहंकारस्यकर्मकर्तृत्वमपेक्ष्यसाहंकारेणेत्यादिकिंनेष्यतेतत्राह॥योहीति॥विशेषणांतर्वशादेव
न तत्वविदोनिवारितत्वान्नतदपेक्षितमिदंविशेषणमित्यर्थः॥२४॥ ० श्री ॥०॥ श्री ० ॥श्री ० श्री ० श्री ०॥

२

साहंकारस्येवराजसेकर्मणिकर्तृत्वमित्येतत्कैमुतिकन्यायेनसाधयति॥सात्विकस्येति॥नन्वात्मविदोप्यस्यनिरहंकारत्वायोगात्कथंतदपेक्ष
यासाहंकारेणेत्युक्तंतत्राह॥लोकइति॥२४॥संप्रतितामसकर्मोदाहरति॥अनुबंधमित्यादिना॥२५॥इदानींकर्तृत्रैविध्यंब्रुवन्नादौसात्वि

सात्विकस्यापिकर्मणोऽनात्मवित्साहंकारःकर्ताकिमुतराजसतामसयोर्लोकेऽनात्मविदपिश्रोत्रियोनिरहंकारउच्यतेनिरहंकारो
ऽयंब्राह्मणइति॥तस्मात्तदपेक्षयैवसाहंकारेणवेत्युक्तं॥पुनःशब्दःपादपूरणार्थः॥क्रियतेबहुलायासंमहतायासेननिर्वर्त्यमिति
तत्कर्मराजसमुदाहृतं॥अनुबंधंक्षयंहिंसामनपेक्ष्यचपौरुषं॥मोहादारभ्यतेकर्मयत्तत्तामसमुच्यते॥२५॥अनुबंधः॥पश्चाद्भा
विपद्वस्तुसोऽनुबंधउच्यते॥तंचानुबंधं॥क्षयंयस्मिन्कर्मणिक्रियमाणेधनक्षयोऽर्थक्षयोवास्यात्तंक्षयं॥हिंसांप्राणिपीडां
चानवेक्ष्यचपौरुषंपुरुषकारंशक्तोमीदंकर्मपरिसमापयितुमित्येवमात्मसामर्थ्यमित्येतान्यनुबंधादीन्यनपेक्ष्यचपौरुषांता
नि॥मोहादविवेकतःआरभ्यतेयत्कर्मतत्तामसमुच्यते॥मुक्तसंगोऽनहंवादी[redacted]धृत्युत्साह
समन्वितः॥सिध्यसिध्योर्निर्विकारःकर्तासात्विकउच्यते॥२६॥मुक्तसंगोमुक्तःपरित्यक्तःसंगोयेनसमुक्तसंगोऽनहंवादीनाहंवदन
स शीलोधृत्युत्साहसमन्वितोधृतिर्धारणमुत्साहउद्यमस्ताभ्यांसमन्वितःसंयुक्तोधृत्युत्साहसमन्वितःसिध्यसिध्योःक्रियमाणस्य
कर्मणःफलसिद्धावसिद्धौचसिध्यसिध्योर्निर्विकारः॥श्रीरामचंद्रायनमः॥श्रीवासुदेवायनमः॥श्रीगुरवेनमः॥०

ककर्तारंदर्शयति॥मुक्तेति॥संगोनामफलाभिसंधिर्वाकर्तृत्वाभिमानोवा॥नाहंवदनशीलःकर्ताहमितिवदनशीलोनभवतीत्यर्थः
॥धारणंधैर्यं॥

कि समाप्तस्य कर्मणो यदि फलासिद्धिस्तर्हि नानुष्ठानविश्रंभः संभवेदित्याशंक्याह ॥ केवलमिति ॥ फलरागादिनेत्यादिशब्देन कर्मरागो गृह्यते अयुक्त इ
त्रिशेषः ॥२६॥ राजसं कर्तारं कथयति ॥ रागीति ॥ कर्मविषयो रागः कर्मफलेप्सुरिति फलरागस्य पृथक्कथनात्साभिप्राया प्रकटीकरणपूर्वं

केवलं शास्त्रप्रमाणप्रयुक्तो न फलरागादिना यः स निर्विकार उच्यते ॥ एवंभूतः कर्ता यः स सात्विक उच्यते ॥ रागी कर्मफलप्रेप्सुर्लु
ब्धो हिंसात्मकोऽशुचिः ॥ हर्षशोकान्वितः कर्ता राजसः परिकीर्तितः ॥२७॥ रागी रागोऽस्यास्तीति रागी ॥ कर्मफलप्रेप्सुः कर्मफलार्थी
लुब्धः परद्रव्येषु संजाततृष्णः तीर्थादौ च स्वद्रव्यापरित्यागी हिंसात्मकः परपीडास्वभावोऽशुचिः बाह्यांतःशौचवर्जितः ॥ हर्षशो
कान्वितः इष्टप्राप्तौ हर्षोऽनिष्टप्राप्तौ इष्टवियोगे च शोकस्ताभ्यां हर्षशोकाभ्यां समन्वितः संयुक्तस्तस्यैव वा कर्मणः संपत्तिविप
त्त्योर्हर्षशोकौ स्यातां ताभ्यां संयुक्तो यः राजसः कर्ता परिकीर्तितः ॥ अयुक्तः प्राकृतः स्तब्धः शठो नैष्कृतिकोऽलसः ॥ विषादी दीर्घसू
त्री च कर्ता तामस उच्यते ॥२८॥ अयुक्तोऽसमाहितः प्राकृतोऽसंस्कृतबुद्धिः प्राकृतः प्रकृतिपरवशः बालसमः ॥ स्तब्धो दंडवन्नम
ति कस्मैचित् शठो मायावी शक्तिगूहनकारी ॥ नैष्कृतिकः परवृत्तिच्छेदनपरः ॥ अलसोऽप्रवृत्तिशीलः कर्तव्येष्वपि विषादी सर्वदाव
॥ सन्नस्वभावो दीर्घसूत्री च कर्तव्यानां दीर्घप्रसारणः सर्वदा मंदस्वभावः ॥५॥

कं परपीडनं परवृत्तिच्छेदनं तेन स्वार्थपरस्त्यर्थः ॥२७॥ दीर्घसूत्रयितुं शीलमस्येति व्युत्पत्तिं गृहीत्वा विवक्षितमर्थमाह कर्तव्यानामिति ॥ ०
एवं क्रियमाणमस्यानिष्टमिदं कथंचिदापद्येत यदा पुनरेवं क्रियते न तदा तदनिष्टमेव संभावनोपनीतमिति चिंतापरंपरया मंथरः शनैरित्यर्थः ॥

स

२६

तदेवस्पष्टयति॥ यदद्येति॥२८॥ ज्ञानादीनां प्रत्येकं त्रैविध्यमुक्त्वा इति मत्वा बुद्धेर्धृतेश्च धृत्याख्यापारत्रैविध्यं सूचयति॥ बुद्धेरिति॥ सूत्रविवरणं प्रतिजानीते॥ प्रोच्यमानमिति॥ अर्जुनस्य धनंजयत्वं प्रसादयति॥ दिगिति॥२९॥ तत्रादौ सात्त्विकीं बुद्धिं निर्दिशति॥ प्रवृत्तिं चेति॥ प्रवृत्ति

परश्वो वा कर्त्तव्यं तन्मासेनापि न करोति यश्चैवंभूतः कर्त्ता स तामस उच्यते॥२८॥ बुद्धेर्भेदं धृतेश्चैव गुणतस्त्रिविधं शृणु॥ प्रोच्यमानमशेषेण पृथक्त्वेन धनंजय॥२९॥ बुद्धेर्भेदं धृतेश्चैव भेदं गुणतः सत्त्वादिगुणतः त्रिविधं शृणु इति सूत्रोपन्यासः॥ प्रोच्यमानं कथ्यमानमशेषेण निरवशेषतो यथावत्पृथक्त्वेन विवेकतो धनंजय॥ दिग्विजये मानुषं दैवं च प्रभूतं धनं जितवानतस्तेनासौ धनंजयोऽर्जुनः॥ प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये॥ बंधं मोक्षं च या वेत्ति बुद्धिः सा पार्थ सात्त्विकी॥३०॥ प्रवृत्तिं च प्रवृत्तिं प्रवर्तनं बंधहेतुः कर्ममार्गः निवृत्तिं च निवृत्तिर्मोक्षहेतुः संन्यासमार्गः॥ बंधमोक्षसमानवाक्यत्वात् तत्र प्रवृत्तिनिवृत्ती म्प कर्मसंन्यासमार्गौ विवक्ष्येते॥ कार्याकार्ये विहितप्रतिषिद्धे लौकिके वा शास्त्रबुद्धे वा कर्तव्याकर्तव्ये करणाकरणे रसे तत्र॥ कस्य
॥ देशकालाद्यपेक्षया दृष्टादृष्टार्थानां कर्मणां॥

माचरणमात्रं अनाचरणमात्रं च निवृत्तिरिति किं नेष्यते नेत्याह॥ बंधेति॥ यस्मिन्वाक्ये बंधमोक्षावुच्यते तस्मिन्नेव प्रवृत्तिनिवृत्त्योरुक्तत्वात्कर्ममार्गस्य बंधहेतुत्वान्मोक्षहेतुत्वाच्च संन्यासमार्गस्य तावेवात्र ग्राह्यावित्यर्थः॥ करणाकरणयोर्निर्विषयत्वायोगाद्विषयापेक्षामवतार्य योग्यं विषयं निर्दिशति॥ कस्येति॥

गी॰भ॰टी
३२३॥

दुःखंअनिष्टसाधनंभयमिष्टसाधनमभयमितिविभजते॥भयेति॥बंधादिमात्रज्ञानस्यबुद्ध्यंतरेपिसंभवाद्विशेषणं॥ननुबुद्धिशब्देनस्वज्ञानस्य
प्रागेवत्रैविध्यप्रतिपादनात्किमितिबुद्धिरिदानींत्रैविध्यंप्रतिज्ञापव्युत्पाद्यतेतत्राह॥ज्ञानमिति॥तर्हिज्ञानेनगतत्वान्नपुनर्धृतिर्व्युत्पादनी
येसांदनीयेंस्याशंक्याह॥धृतिरपीति॥विशेषशब्देनज्ञानाद्धीवृत्तिरिष्टा॥३०॥कार्याकार्ययोर्धर्माधर्माभ्यांपौनरुक्त्यंपरिहरति॥प

भयाभयेबिभेत्यस्मादितिभयंचोरव्याघ्रादिनभयंअभयंभयंचाभयंचभयाभयेदृष्टादृष्टयोर्भयाभययोःकारणेइत्यर्थः॥बंधंसहे
तुकंमोक्षंचसहेतुकंयावेत्तिबुद्धिःसापार्थसात्विकी॥तत्रतत्रज्ञानंबुद्धेर्वृत्तिर्बुद्धिस्तुवृत्तिमती॥धृतिरपीतिविशेषणंच
बुद्धेः॥यया~~धर्म~~धर्ममधर्मंचकार्यंचाकार्यमेवच॥अयथावत्प्रजानातिबुद्धिःसापार्थराजसी॥३१॥ययाधर्मंशास्त्रचोदितं
अधर्मंचतत्प्रतिषिद्धंकार्यंचाकार्यमेवच॥पूर्वोक्तेएवकार्याकार्येअयथावन्नयथावत्सर्वतोनिर्णयेनप्रजानातियाबु
॥द्धिःसापार्थराजसी॥५॥

अ॰१८॥
३२३॥
रामः॥

र्वोक्तेरिति॥पूर्वश्लोकेकार्याकार्यशब्दाभ्यांदृष्टादृष्टार्थानांकर्मणांकरणाकरणेनिर्दिष्टेतयोरेवात्रापिग्रहणान्नधर्माधर्माभ्याम
पूर्वपर्यायाभ्यांगतार्थतेत्यर्थः॥याबुद्धिर्ययाबुध्यावोद्धानिर्णयेननजानातीत्यर्थः॥३१॥श्रीगणेशायनमः॥५॥श्रीरामः

धर्मशब्दो नपुंसकलिंगोप्यस्तीत्यभिप्रेत्यधर्ममित्युक्तं॥ तमसावृता॥ विवेकेन वेष्टितेत्यर्थः॥ कार्यादीनुक्तानुक्तांश्च संग्रहीतुं सर्वा
र्थानित्युक्तं तद्व्याचष्टे॥ सर्वानिवेति॥ विपरीतांश्चेति च कारमवधारणे गृहीत्वा विपरीतानेवेत्युक्तं॥ ३१॥ इदानीं धृतित्रैविध्यं व्यु

अधर्मं धर्ममिति या मन्यते तमसावृता॥ सर्वार्थान्विपरीतांश्च बुद्धिः सा पार्थ तामसी॥ ३२॥ अधर्मं प्रतिषिद्धं धर्मं
विहितमिति या मन्यते जानाति तमसावृता सती सर्वार्थान् सर्वानेव ज्ञेयपदार्थान्॥ विपरीतांश्च विपरीतान्सर्वथानेव
विजानाति बुद्धिः सा पार्थ तामसी॥ ५॥ धृत्या यया धारयते मनः प्राणेंद्रियक्रियाः॥ योगेनाव्यभिचारिण्या धृतिः॥
सा पार्थ सात्विकी॥ ३३॥ धृत्या यया अभिचारिण्येति व्यवहितेन संबंधः॥ धारयते किं मनः प्राणेंद्रियक्रियाः॥ म
नश्च प्राणाश्चेंद्रियाणि च मनःप्राणेंद्रियाणि तेषां क्रियाश्चेष्टास्ताः उच्छास्त्रमार्गप्रवृत्ते धारयति॥ धृत्या हि धार्यमा
णा उच्छास्त्रमार्गविषया न भवंति॥ योगेन समाधानेनाव्यभिचारिण्या नित्यं समाध्यनुगतयेत्यर्थः॥ ५॥ श्रीरामः॥

त्रिपारधृतिष्वादौ सात्विकीं धृतिं व्युत्पादयति॥ धृत्येति॥ निर्दिष्टानां चेष्टानां कथं धृत्या धारणं तत्राह॥ धारयतीति॥ तदेवानुभवेन साधय
ति॥ धृत्या हीति॥ ध्रियंतेऽनयेति धृतिर्यत्नविशेषस्तया धृत्या धार्यमाणा यथोपदिष्टाश्चेष्टाः शास्त्रमतिक्रम्य नार्थांतरावगा
हिन्यो भवंतीत्यर्थः॥ धृतिमेव समाध्यविनाभूतत्वेन विशिनष्टि॥ योगेनेति॥ ५॥ श्रीरामकृष्णाय नमः॥ श्रीवासुदेवः॥

ते

श्री गी० टी०
३९९

ननुधृतेर्नियमेनसमाध्यनुगतत्वेकथमुक्तक्रियाधारणोपयोगित्वमित्याशंक्याह ।। एतदिति ।। उक्तक्रियाधारयमाणोयोगेनअत्रचित्तस
माधानेनैकाग्र्येणाव्यभिचारिण्या ः विनाभूतयाधृत्याधारयतस्तथात्वतदविनाभावाभावेनियमेनतद्धारणासिद्धेरित्यर्थः ।।३३।।
राजसींधृतिंदर्शयति ।। ययात्विति ।। तेषांधारणप्रकारमभिनयति ।। मनसीति ।। फलाकांक्षीतिकस्यविशेषणंतत्राह ।। यःपु

एतदुक्तंभवति ।। अव्यभिचारिण्याधृत्यामनःप्राणेंद्रियक्रियाधारयमाणोयोगेनधारयतीतियैवंलक्षणाधृतिःसापा
र्थसात्विकी ।। ययातुधर्मकामार्थान्धृत्याधारयतेऽर्जुन ।। प्रसंगेनफलाकांक्षीधृतिःसापार्थराजसी ।।३४।। ययातुधर्म
कामार्थान्धर्मश्चकामश्चअर्थश्चतान्धर्मकामार्थान् ।। धृत्याययाधारयतेमनसिनित्यकर्तव्यरूपानेवधारयतेऽर्जु
न ।। प्रसंगेनयस्ययस्यधर्मादेर्धारणाप्रसंगस्तेनप्रसंगेनचफलाकांक्षीचभवतियःपुरुषस्तस्ययाधृतिः ।। सापार्थराजसी
ययास्वप्नंभयंशोकंविषादंमदमेवच ।। नविमुंचतिदुर्मेधाधृतिःसापार्थतामसी ।।३५।। ययास्वप्नंनिद्रांभयंत्रासंशोकं
संतापंविषादमवसादंविषण्णतांमदंविषयसेवामात्मनोबहुमन्यमानोमत्तत्वंमदमेवचमनसिनित्यमेवकर्तव्यरूप
तयाकुर्वन्नविमुंचतिधारयत्येव ।। दुर्मेधाःकुत्सितमेधाप्रज्ञःपुरुषोयातस्यधृतिःसातामसीमताऽभिप्रेता ।।३५।।०

अ०१८।।
३२६।।
रामः।।
भवतितं

रूपतयेति ।।३४।। तामसींधृतिंव्याचष्टेययेति ।। शोकंप्रियवियोगनिमित्तंसंतापं ।। विषण्णतांइंद्रियाणांग्लानिं ।। विषयसेवाकुमार्गप्रवृत्तेरूपलक्ष
णमुक्तं ।। स्वप्नादिमत्तांतंसर्वमेवकर्तव्यतयात्मनोबहुमन्यमानोमनसिनित्यमेवकुर्वन्दुर्मेधानविमुंचति ।। किंतुधारयत्येवेतियोजना ।। ३५।।

वृत्तमनुद्यानंतरश्लोकेनात्पर्यमाह॥गुणेत्यादिना॥क्रियाकारकाणांगुणतस्त्रैविध्योक्त्यनंतरंफलस्यसुखस्यत्रैविध्योक्त्यवसरेसमीत्याह॥ क० १८
रिदानीमिति॥हेयादेयभेदार्थंत्रैविध्येसमाधानमेकंक्रममवचनादितिशेषः॥यत्रेतुभयत्रसंबध्यते॥त्रिविधंसुखंतिहर्वेस्मसंबं मि

गुणभेदेनक्रियाणांकारकाणांचत्रिविधोभेदउक्तोऽथेदानींफलस्यचसुखस्यत्रिविधोभेदउच्यते॥सुखंत्विदानींत्रि
विधंशृणुमेभरतर्षभ॥अभ्यासाद्रमतेयत्रदुःखांतंचनिगच्छति॥३६॥सुखंत्विदानींत्रिविधंशृणुसमाधानंकुर्वित्येतत्॥
मेममवचनात्भरतर्षभ॥अभ्यासात्परिचयाद्यावृत्तेःरमतेरतिंप्रतिपद्यते॥यत्रयस्मिन्सुखानुभवेदुःखांतंच॥
न दुःखावसानंदुःखोपशमनंचनिगच्छति॥निश्चयेनप्राप्नोतीति॥यत्तदग्रेविषमिवपरिणामेऽमृतोपमं॥तत्सुखंसात्वि
कंप्रोक्तमात्मबुद्धिप्रसादजं॥३७॥यत्तत्सुखमग्रेपूर्वंप्रथमसन्निपातेज्ञानवैराग्यध्यानसमाध्यारंभेऽत्यंताभ्यासप्र
र्वकत्वाद्विषमिवदुःखात्मकंभवतिपरिणामेज्ञानवैराग्यादिपरिपाकजंसुखममृतोपमंतत्सुखंसात्विकंप्रोक्तंविद्वद्भिरा मर
त्मनोबुद्धिरात्मबुद्धिरात्मबुद्धेःप्रसादोनैर्मल्यंसलिलवत्स्वच्छत्वान्ततोजातमात्मबुद्धिप्रसादजं॥८॥श्रीरामायनमः॥

॥३६॥तत्रसात्विकंसुखमादेयत्वेनदर्शयति॥यत्तदिति॥प्रथमसन्निपातंविभजते॥ज्ञानेति॥कुतस्तस्यदुःखात्मकत्वं
तत्राह॥अत्यंतेति॥दुःखात्मकत्वेदृष्टांतः॥विषमिवेति॥ज्ञानादिपरिपाकावस्थापरिणामस्तस्मिन्सतिततोऽमृ
॥तमिति॥योजना॥तत्रैवहेत्वंतरमाह॥आत्मनइति॥८॥

गी०टी०
३२८॥

आत्मबुद्धिशब्दस्यार्थांतरमाह ॥ आत्मविषयेति ॥ अंतःकरणनैर्मल्यात्साक्षासम्यक्प्रसानप्रकर्षाज्जातत्वादितितच्छदार्थः ॥३७॥ राजसं
सुखं हेयत्वाय कथयति विषयेति ॥ बलं संघातसामर्थ्यं ॥ वीर्यं पराक्रमः कृतं यशः ॥ रूपं शरीरसौंदर्यं ॥ प्रज्ञां श्रुतार्थग्रहणसाम

आत्मविषयानीतिमात्तं वनाद्बुद्धिरात्मबुद्धिस्तत्प्रसादप्रकर्षाद्धाजातमितिसेत्तत्समात्सात्विकंमतं ॥ विषयेंद्रियसंयोगाद्यत्त
दग्रेऽमृतोपमं ॥ परिणामे विषमिव तत्सुखं राजसं स्मृतं ॥३८॥ विषयेंद्रियसंयोगाद्यत्तत्सुखं जायते अग्रे प्रथमक्षणेऽ
मृतोपमं अमृतसमं ॥ परिणामे विषमिव बलवीर्यरूपप्रज्ञामेधाधनधर्मोत्साहहानिहेतुत्वात् ॥ अधर्मतज्जनितनर
कादिहेतुत्वाच्च ॥ परिणामेतदुपभोगविपरिणामांते विषमिव तत्सुखं राजसं स्मृतं ॥ यदग्रे चानुबंधे च सुखं मोहनमात्म
नः ॥ निद्रालस्यप्रमादोत्थं तत्तामसमुदाहृतं ॥३९॥ यदग्रे चानुबंधे चावसानोत्तरकाले सुखं मोहनं मोहकरमात्मनः ॥ नि
निद्रालस्यप्रमादोत्थं निद्रा चालस्यं च प्रमादश्च तेभ्यः समुत्तिष्ठतीति निद्रालस्यप्रमादोत्थं तत्तामसमुदाहृतं ॥छ॥

अ०१८॥
३२५॥
राम:॥

र्यं ॥ मेधा गृहीतार्थस्याविस्मरणेन धारणाशक्तिः धनं गोहिरण्यादि ॥ उत्साहः स्वकार्ये प्रसुपक्रमादि ॥ एतेषां नाशकत्वाद्वैषयिकं
सुखं विषसममित्यर्थः तत्रैव हेत्वंतरमाह ॥ अधर्मेति ॥३८॥ तामसं सुखं सागार्थमेवोदाहरति ॥ यदग्रे चेति ॥ अनुबंधश
॥ ब्दार्थमाह ॥ अवसानेति ॥ मोहनं मोहकरं ॥ तदुत्पत्तिहेतुमाह ॥ निद्रेति ॥

क्रियाकारकफलात्मनः संसारस्य प्रत्येकं सात्विकादिभेदेन त्रैविध्यमुक्त्वा संसारांतर्भूतमेव किंचिद्गुणत्रयास्पृष्टमपि क्वचिद्भविष्यतीत्याशं
क्याह ॥ अथेति ॥ संसारस्य सर्वस्यैव गुणत्रयस्पृष्टत्वं प्रकरणं ॥ अन्यद्वाऽप्राणीत्यत्राप्राणिशब्देन प्रसिद्धा स्थावरादिर्गृह्यते ॥ ४० ॥ प्रकर
णार्थमुपसंहरन्ननुवदति ॥ सर्वइति ॥ तस्यानेकात्मत्वेन हेयत्वं सूचयति ॥ क्रियेति ॥ निर्गुणादात्मनो वैलक्षण्याच्चतस्य हेयतेत्याह ॥

अथेदानीं प्रकरणोपसंहारार्थः श्लोक आरभ्यते ॥ न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः ॥ सत्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात्त्रिभिर्गु
णैः ॥ ४० ॥ न तदस्तीति नत्वास्ति पृथिव्यां वा मनुष्यादिसत्वं प्राणिजातमन्यद्वाऽप्राणिजातं दिवि देवेषु वा पुनः सत्वं प्रकृतिजैर्मु
क्तं प्रकृतिजैः प्रकृतितो जातैरेभिस्त्रिभिर्गुणैः सत्वादिभिर्विमुक्तं परित्यक्तं यत्स्याच्चेन्न तदस्तीति पूर्वेण संबंधः ॥
सर्वः संसारः क्रियाकारकफललक्षणः सत्वरजस्तमोगुणात्मकोऽविद्यापरिकल्पितः समूलोऽनर्थ उक्तो वृक्षरूपपरि
कल्पनया चोर्ध्वमूलमित्यादिना तं चासंगशस्त्रेण दृढेन छित्वा परं पदं परिमार्गितव्यमिति चोक्तं ॥ ४० ॥ श्रीरामचंद्राय ॥ :

सत्वेति ॥ अनर्थत्वाच्चतस्य त्याज्यत्वमनर्थत्वं च तस्याविद्याकल्पितस्यावस्तुनो वस्तुवद्भानादित्याह ॥ अविद्येति ॥ न केवलं अस्मादृशो
संसारो दर्शितः किंतु पंचदशेपीत्याह ॥ वृक्षेति ॥ चकाराद्युक्तः संसार इत्यनुकृष्यते ॥ संसारध्वस्तिसाधनं सम्यग्ज्ञानं च तत्रैवोक्त
॥ मित्याह ॥ असंगेति ॥ ४० ॥

गी०भा०टी०
३२८॥

एतत्प्रसक्त्यानंतरश्लोकेनतात्पर्यमाह।।नत्रचेति।।उक्तो विनिवर्तयिषितः संसारः सनिमित्तः सप्रपंचः परामृश्यते।।सर्वो हि संसारो गुणत्रयात्मको न
त्रिगुणानां प्रकृत्यात्मकानां संसारकारणीभूतानां निवृत्तिर्युक्ता।।प्रकृतेर्नित्यत्वादित्याशंकायांस्वधर्मानुष्ठानात्तत्त्वज्ञानोत्पत्त्या गुण-
नामज्ञानात्मकानां निवृत्तिर्यथा भवति तथा स्वधर्मजातं वक्तव्यमित्युत्तरग्रंथप्रवृत्तिरित्यर्थः।।ननु तद्गुणप्रयुक्तज्ञानानुपदेशेवोप
संहारप्रकरणप्रकोपः स्यादित्याह।सर्वश्चेति।।उपसंहृते गीताशास्त्रार्थे यद्यपि सर्वो वेदार्थः स्मृत्यर्थश्च सर्व उपसंहृतस्तथापि=

तत्र च सर्वस्य त्रिगुणात्मकत्वात्संसारकारणनिवृत्त्यनुपपत्तौ शास्त्रायांयथा तन्निवृत्तिः स्यात्तद्वक्तव्यं।।सर्वश्च गीताशास्त्रा
र्थ उपसंहर्तव्यः।।एतावानेव च सर्वो वेदस्मृत्यर्थः पुरुषार्थसिद्धिरनुष्ठेय इत्येवमर्थं च ब्राह्मणक्षत्रियविशामित्यादिरार
भ्यते।।ब्राह्मणक्षत्रियविशां शूद्राणां च परंतप।।कर्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः।।४१।।ब्राह्मणश्च क्षत्रिय
।।श्च विट् च ब्राह्मणक्षत्रियविशस्तेषां ब्राह्मणक्षत्रियविशां।।५।।

आ०१८।।
३२६।।
रामः।।

मुमुक्षुभिरनुष्ठेयमवशिष्टमस्ति वक्तव्यमित्याशंक्याह।।एतावानिति।।अनुष्ठेयपरिमाणनिर्धारणवदुक्तशंकानिवर्तनं शास्त्रार्थोपसं
हारश्चेत्येतदुभयं चकारार्थः।।संप्रति वर्णचतुष्टयस्यानुष्ठेयं धर्मजातमसंकीर्णमिति सूत्रमुपन्यस्यति।।ब्राह्मणेति।।५।।श्रीरामः

उपनयनसंस्कारवत्वे सति वेदाधिकारित्वं सममिति त्रयाणां समासकरणमितरेषामसमासे हेतुमाह॥ शूद्राणामिति एकजातित्वमुपनयनवर्जितत्वं॥ कर्मणामसंकीर्णत्वेन व्यवस्थापकं प्रश्नपूर्वकं प्रकटयति॥ केनेत्यादिना॥ स्वभावप्रभवैर्गुणैरित्यस्यार्थांतरमाह॥ अथवेति॥ उक्तव्यवस्थायां कार्यदर्शनं प्रमाणयति॥ प्रशांतीति॥ स्वभावशब्दस्यार्थांतरमाह॥ अथेति॥ किमिति गुणाभिव्यक्तेरुक्तवासनाधीनत्वं नत्वाह॥ गुणे

शूद्राणां च शूद्राणामित्यसमाकरणमेकजातित्वे सति वेदेऽनधिकारात् परंतप॥ कर्माणि प्रविभक्तानीतरेतरविभागेन व्यवस्थापितानि॥ केन स्वभावप्रभवैर्गुणैः॥ स्वभावश्चईश्वरस्य प्रकृतिस्त्रिगुणात्मिका सा प्रभवो येषां गुणानां ते स्वभावप्रभवास्तैः शमदमादीनि कर्माणि प्रविभक्तानि ब्राह्मणादीनां॥ अथवा ब्राह्मणस्वभावस्य सत्वगुणः प्रभवः कारणं तथा क्षत्रियस्वभावस्य सत्वोपसर्ज्जनं रजः प्रभवः वैश्यस्वभावस्य तमउपसर्जनं रजः प्रभवः शूद्रस्वभावस्य रजःउपसर्जनं तमः प्रभवः॥ प्रशांतैश्वर्येहामूढस्वभावदर्शनाच्चतुर्णां॥ अथवा जन्मांतरकृतः संस्कारः प्राणिनां वर्तमानजन्मनि स्वकार्याभिमुखत्वेनाभिव्यक्तः स्वभावः स प्रभवो येषां गुणानां ते स्वभावप्रभवाः गुणाः॥ गुणप्रादुर्भावस्य निःकारणत्वानुपपत्तेः॥ स्वभावः कारणमिति कारणविशेषोपादानं॥ ४१॥

नि॥ ननु नास्ति गुणप्रादुर्भावस्य निष्कारणत्वं प्रकृतिजैर्गुणैरिति प्रकृतेर्गुणकारणत्वाभिधानादत आह॥ स्वभाव इति॥ वासनाकारणमिति गुणव्यक्तेर्निमित्तकारणत्वं विवक्ष्यते प्रकृतिस[illegible]स्तत्पादनमि[illegible]ति भावः॥ ४१॥ श्रीरामचंद्राय नमः॥ श्रीवासुदेवाय नमः॥ ०

गी०भा०टी०
३२८॥

उक्तमुपसंहरति॥ एवमिति॥ स्वभावप्रभवैः सत्वादिगुणैर्ब्राह्मणादीनां कर्माणि प्रविभक्तानीत्युक्तमाक्षिपति॥ नन्विति शास्त्रस्य धर्मविभागहेतोः
सत्वादिविशेषापेक्षयैव विभागज्ञापकत्वादुभयत्र विभागहेतुत्वोक्तिरविरुद्धेति परिहरति॥ नैषइति॥४१॥ प्रविभक्तानि कर्माण्येव प्रश्नद्वारा
विविच्य दर्शयति॥ कानीत्यादिना॥ अंतःकरणोपरतिः शमो दमो वाह्यकरणोपरतिरित्युक्तं स्मारयति॥ यथेति॥ त्रिविधं तपः सप्तदशे दर्शि-

एवं स्वभावप्रभवैः प्रकृतिप्रभवैः सत्वरजस्तमोभिर्गुणैः स्वकार्यानुरूपेण शमादीनि कर्माणि प्रविभक्तानि॥ ननु शास्त्रप्रवि-
भक्तानि शास्त्रेण विहितानि ब्राह्मणादीनां शमादीनि कर्माणि कथमुच्यंते सत्वादिगुणप्रविभक्तानीति॥ नैष दोषः॥ शास्त्रेणा-
पि ब्राह्मणादीनां सत्वादिगुणविशेषापेक्षयैव शमादीनि कर्माणि प्रविभक्तानि न गुणाऽनपेक्षयेति शास्त्रप्रविभक्तान्यपि कर्मा-
णि गुणप्रविभक्तानीत्युच्यंते॥५॥ कानि पुनस्तानि कर्माणीत्युच्यन्ते॥ शमो दमस्तपः शौचं क्षांतिरार्जवमेव च॥ ज्ञानं विज्ञानमास्ति-
क्यं ब्रह्मकर्म स्वभावजं॥४२॥ शमदमौ यथाव्याख्यातार्थौ॥ तपो यथोक्तं शारीरादि तपः॥ शौचं व्याख्यातं॥ क्षांतिः क्षमा॥ आर्जव-
मृजुतैव च ज्ञानं विज्ञानमुक्तं आस्तिक्यं आस्तिभावः श्रद्दधानता आगमार्थेषु ब्रह्मकर्म ब्राह्मणजातेः कर्म ब्रह्मकर्म स्वभा
॥५॥ वजं यदुक्तं स्वभावप्रभवैर्गुणैः प्रविभक्तानीति तदेवोक्तं स्वभावजमिति॥

तमित्याह॥ तप इति॥ शौचमिति बाह्यांतरभेदेन प्रागेवोक्तमित्याह॥ शौचमिति॥ क्षमा नामाऽक्रुष्टस्य ताडितस्य वा मनसि विकारराहित्यं
ज्ञानं शास्त्रीयपदार्थज्ञानं॥ विज्ञानं शास्त्रार्थस्य स्वानुभवायत्तत्वापादनं॥ त्रियाव्याख्यानं स्वभावशब्दार्थमुपेत्याह॥ यदुक्तमिति॥५॥ श्रीरामः॥

अ०१८॥
३२७॥
रामः॥

श्वरस्वभावो विक्रमो बलवत्तरानपि प्रहर्तुं प्रवृत्तिरिति ॥ प्रागल्भ्यं परैरधर्षणीयत्वं ॥ बृहत्सामपि विपदि देहेंद्रियोत्तंभनी चित्तवृत्तिर्धृतिरिति
व्याचष्टे ॥ सर्वावस्थास्थितिः ॥ दक्षस्वभावमेवं विभजते ॥ सहसेति स्वभावस्फुरद्वत् ॥४२॥ शमादि परिचर्यांतकर्मणां विभज्योक्ता

शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनं ॥ दानमीश्वरभावश्च क्षत्रकर्म स्वभावजं ॥४३॥ शौर्यं शूरस्वभावस्तेजः प्रागल्भ्यं
धृतिर्धारणं सर्वावस्थास्वनवसादो भवति यया धैर्यस्योत्तंभितस्य ॥ दाक्ष्यं दक्षस्वभावः सहसा प्रसुप्तेष्वेषु कार्येष्वव्यामोहेन
प्रवृत्तिर्युद्धे चाप्यपलायनमपराङ्मुखीभावः शत्रुभ्यो दानं देयेषु मुक्तहस्तता ॥ ईश्वरभावश्चेश्वरस्वभावः प्रभुशक्तिप्रक
टीकरणमीशितव्यान्प्रति ॥ क्षत्रकर्म क्षत्रजातेर्विहितं कर्म क्षत्रकर्म स्वभावजं ॥४३॥ कृषिगौरक्ष्यवाणिज्यं वैश्यकर्म स्वभा
वजं ॥ परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजं ॥४४॥ कृषिगौरक्ष्यवाणिज्यं कृषिश्च गौरक्ष्यं च वाणिज्यं च कृषिगौरक्ष्यवाणिज्यं
कृषिर्भूमेर्विलेखनं गौरक्ष्यं गा रक्षतीति गोरक्षस्तस्य भावो गौरक्ष्यं पाशुपाल्यं ॥ वाणिज्यं च वणिक्कर्म क्रयविक्रयादिलक्षणं
वैश्यकर्म वैश्यजातेः कर्म वैश्यकर्म स्वभावजं परिचर्यात्मकं शुश्रूषास्वभावं कर्म शूद्रस्यापि स्वभावजं ॥ एतेषां जातिवि
॥ हितानां कर्मणां सम्यगनुष्ठितानां स्वर्गप्राप्तिः फलं स्वभावतः ॥४४॥

तामभ्युदयफलमादरादुपसंसरतीति ॥ एतेषामिति ॥ स्वभावतो विहितत्वादेव मोक्षापेक्षामंतरेणानुष्ठानादित्यर्थः ॥४५॥

[illegible]
३२८।

तत्र प्रमाणमाह॥ वर्णा इति॥ शेषशब्देन भुक्तकर्मातिरिक्तं कर्मानुशयशब्दितमुच्यते॥ प्रत्येकं देशादिभिर्विशिष्टशब्दः संबध्यते॥ आदिश
ब्देन तद्यथा गृह इति स्मृतिर्दर्श्यते॥ इतश्चोक्तानां कर्मणां स्वर्गफलत्वं युक्तमि[illegible]साह॥ पुराणे चेति॥ उक्तं हि॥ यस्त्वसम्यक्करोत्येवं गृहस्थः
परमं विधिं गृहधर्मबंधमुक्तोसौ लोकानाप्नोत्यनुत्तमानिति॥ यस्त्वेतां नियतश्चर्यां वानप्रस्थश्चरेन्मुनिः॥ स दहत्यग्निवद्दोषाञ्जये
ल्लोकांश्च शाश्वतानिति च॥ मोक्षाश्रमं यश्चरते यथोक्तं शुचिः सुसंकल्पितबुद्धियुक्तः॥ अनिंधनं ज्योतिरिव प्रशांतं स ब्रह्मलो

वर्णा आश्रमाश्च स्वकर्मनिष्ठाः प्रेत्य कर्मफलमनुभूय ततः शेषेण विशिष्टदेशजातिकुलधर्मायुःश्रुतवृत्तवित्तसुख
मेधसो जन्म प्रतिपद्यंत इत्यादिस्मृतिभ्यः॥ पुराणे च वर्णिनामाश्रमिणां च लोकफलभेदविशेषस्मरणात्॥ कारणांतरा
नुइदं वक्ष्यमाणं फलत्वेन तउच्यते॥ स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः॥ स्वकर्मनिरतः सिद्धिं यथा विंदति तच्छृणु ४५

त
आ०१८।
३२८।
रामः॥

च कं श्रयते द्विजातिरिति॥ सर्व एते पुण्यलोका भवंतीति श्रुतिश्चकारार्थः॥ यदि पुनर्मोक्षापेक्षयोक्तानि कर्माण्यनुष्ठीयेरंस्तदा मोक्ष
फलत्वं तेषां सेत्स्यतीत्याह॥ कारणांतरादिति॥ तदेव कारणांतरं यन्मोक्षापेक्षया तेषामनुष्ठानं॥ ४४॥ मोक्षोपायेषु शमादिषु सात्वि
केषु ब्राह्मणधर्मेषु क्षत्रियादीनामनधिकाराद्ब्राह्मणानामेव मोक्षो न क्षत्रियादीनामित्याशंक्याह॥ स्वे स्व इति॥ ४५॥ श्रीरामः॥

यथास्वकर्मण्यभिरतस्य बुद्धिशुद्धिद्वारा ज्ञाननिष्ठायोग्यताप्राप्तौ प्राप्तस्य ज्ञानस्य मोक्षोपपत्तेर्ब्राह्मणातिरिक्तस्यापि ज्ञानतो मुक्तिरिति मत्वा पूर्वार्द्धं
व्याचष्टे ॥ स्वे स्व इत्यादिना ॥ संसिद्धिशब्दस्य मोक्षार्थत्वं गृहीत्वा स्वकर्मनिष्ठत्वमात्रेण तल्लाभे तादर्थ्येन संन्यासादिविधानार्थक्यमिति म न
न्वानः शंकते ॥ किमिति ॥ न तावन्मात्रेण साक्षान्मोक्षो ज्ञाननिष्ठायोग्यता नेति परिहरति ॥ नेति ॥ तर्हि किंरूपं स्वकर्मनिष्ठस्य संसिद्धिरिति

स्वे स्वे यथोक्तलक्षणे भेदेऽवितिं वक्ष्यमाणं फलं स्वे स्वे कर्मण्यभिरतः तत्परः संसिद्धिं स्वकर्मानुष्ठानादशुद्धिक्षये सति कायेंद्रि
याणां ज्ञाननिष्ठायोग्यतालक्षणां सिद्धिं लभते प्राप्नोति नरोऽधिकृतः पुरुषः किं स्वकर्मनिरत एव साक्षात्संसिद्धिं ॥ न कथं त
र्हि स्वकर्मनिरतः सिद्धिं यथा येन प्रकारेण विंदति तच्छृणु ॥४५॥ यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततं ॥ स्वकर्मणा तमभ्यर्च्य सिद्धिं
विंदति मानवः ॥४६॥ यतो यस्मात्प्रवृत्तिरुत्पत्तिश्चेष्टा वा यस्मादंतर्यामिण ईश्वराद्भूतानां स्याद्येनेश्वरेण सर्वमिदं जगत्
ततं व्याप्तं स्वकर्मणा पूर्वोक्तेन प्रतिवर्णं तमीश्वरमभ्यर्च्य पूजयित्वाराध्य ॥४६॥

प्रतीत्येति पृच्छति ॥ कथं तर्हीति ॥ उत्तरार्द्धेनोत्तरमाह ॥ स्वकर्मेति ॥ तच्छृणु तं प्रकारमेकाग्रचेता भूत्वा शृणु त्वमवधारयेत्यर्थः ॥४५॥ तमेव प्रकारं
स्फोरयति ॥ यत इति ॥ यतः शब्दार्थं यस्मादित्युक्तं व्यक्तीकरोति ॥ यस्मादिति ॥ प्राणिनामुत्पत्तिर्यस्मादीश्वरात्तेषां चेष्टा च यस्मादंतर्यामिणो
येन च सर्वं व्याप्तं कार्यस्य कारणातिरिक्तस्वरूपाभावात्तं स्वकर्मणाऽभ्यर्च्य मानवः सिद्धिं विंदतीति संबंधः ॥४६॥ ॥ ॥ ॥ ०

भ०गी०टी
३२९॥ वे

नहिवर्णाश्रमीणांयथोक्तकर्मनिष्टयासाक्षान्मोक्षो[illegible]लभ्यनेनस्यफलानैकलम्पलात्किंतुतन्निष्ठानांशुद्धबुद्धीनांकर्मसुफलमपश्यतामीश्वर
प्रसादहसादित्तिविवेकवैराग्यवतांसंन्यासिनांज्ञाननिष्ठायोग्यतावतांसानशास्यामुक्तिरित्यभिप्रेत्याह॥केवलमिति॥४६॥स्वधर्मानुष्ठा
नस्यबुद्धिशुध्यादिद्वारामोक्षावसायित्वात्तदनुष्ठानमावश्यकमित्याह॥यतइति॥ननुयुद्धादिलक्षणंस्वधर्मंकुर्वन्नपिहिंसादी
नःपापप्राप्नोतितत्कथंस्वधर्मःश्रेयानितितत्राह॥स्वभावेति॥स्वकीयवर्णाश्रमनिमित्तोक्तस्यविहितंस्वभावजमित्यर्थस्तादृ

केवलंज्ञाननिष्टायोग्यतालक्षणांसिद्धिंविंदतिमानवोमनुष्यः॥यतइवमतः॥श्रेयान्स्वधर्मोविगुणःपरधर्मात्स्वनुष्टि
तात्॥स्वभावनियतंकर्मकुर्वन्नाप्नोतिकिल्बिषं॥४७॥श्रेयान्प्रशस्यतरःस्वोधर्मःस्वधर्मोविगुणोपीत्यपिशब्दोऽत्र
व्यः॥परधर्मात्स्वनुष्टितात्॥स्वभावनियतंस्वभावेननियतं॥यदुक्तंस्वभावजमितिमितदेवोक्तंस्वभावनियतमिति ति
यथाविषजातस्येवकृमेर्विषंनदोषकरंतथास्वभावनियतंकर्मकुर्वन्नाप्नोतिकिल्बिषंपापं॥४७॥स्वभावनियतंकर्मकु
॥ ॥ र्वाणोविषजैरवकृमिः॥किल्बिषंनाप्नोतीत्युक्तं॥ ५॥

अ०१८॥
३२९॥
रामः॥

क्तमित्याह॥यदुक्तमिति॥निग्रहात्मकमपिविहितंकर्मकुर्वन्पापंनाप्नोतीत्यत्रदृष्टांतमाह॥यथेति॥४७॥इतस्यस्वविहितंकर्मदोष
वदपिकर्तव्यंप्रकारांतरासंभवादित्युक्तानुवादपूर्वकंकथयति॥स्वभावेत्यादिना॥नहिकृमिर्विषजोविषनिमित्तंमरणंप्रतिप
द्यतेतथायमधिकृतःपुरुषोदोषवदपिविहितंकर्मकुर्वन्पापंनाप्नोतीत्युक्तमित्यर्थः॥ ०॥ श्रीरामचंद्रायनमः॥७९॥०

तर्हिदोषरहितमेवभिक्षाटनादिसर्वैरनुष्ठीयतामतोनपापप्राप्तिरं केस्याशंक्याह॥परेति॥उक्तमित्यनुवर्त्तते॥तर्हिपापप्राप्तिशंकांपरिहर्तुमक
र्मनिष्ठत्वमेवसर्वेषांस्यादित्याशंक्य ज्ञानाभावान्नैवमित्याह॥अनात्म तरति॥एवंचदत्रापिसंबंधः॥प्रकारांतरासंभवक्तंफलमाह ॥
अनरति॥सहजायतइतिसहजंस्वभावनियतंनित्यंकर्मतद्विहितत्वान्निर्दोषमपिहिंसात्मकतयासदोषमित्यत्रहेतुमाह॥त्रिगुणेति ॥
त सत्वादिगुणत्रयारब्धत्वाद्धिंसादिदोषवदपिकर्मविहितंनत्याज्यमित्यर्थः॥कर्मणांदोषवत्त्वंप्रपंचयति॥सर्वेति॥आरंभशास्त्रस्य

परधर्मश्चभयावहस्स्यनात्मज्ञश्चनहिकश्चित्क्षणमप्यकर्मकृत्तिष्ठतीस्यतः॥सहजंकर्मकौंतेयसदोषमपिनत्यजेत्॥स
र्वारंभाहिदोषेणधूमेनाग्निरिवावृताः॥४८॥सहजंसहजन्मनैवोत्पन्नंकिंकर्मसहजंकर्मकौंतेयसदोषमपित्रिगुणात्मक
त्वान्नत्यजेत्॥सर्वारंभाहिआरभ्यंतइत्यारंभाः॥सर्वकर्माणीति नत्वकरणात्॥यःकश्चिदारंभःस्वधर्मःपरधर्मश्चते
स सर्वेदोषाःहियस्मात्त्रिगुणात्मकत्वमत्रहेतुस्त्रिगुणात्मकत्वात्दोषेणधूमेनसहजेनाग्निरिवावृताः॥ ॥ ॥ ॥ ॥

कर्मस्युसत्यास्यपरसर्वकर्मार्थत्वेकर्मणामकृतत्वंहेतुमाह॥सर्वकर्माणीति॥दोषेणेत्यादिव्याचष्टे॥यःकश्चिदिति॥तेसर्वेदोषेणावृता
इतिसंबंधः॥सर्वकर्मणांदोषावृतत्वेहिंसादोषानंतयस्मादित्युक्तंहेतुमेवाभिनयति॥त्रिगुणात्मकत्वमिति॥४९॥श्रीरामः॥ ४९॥

गी॰भा॰टी॰
३२०॥

मो

सभावनियतस्यकर्मणोदोषवत्त्वात्त्यागद्वारापरधर्ममातिष्ठमानस्यापिनैवदोषादिप्रमोक्षः संभवति॥नचपरधर्मोनुष्ठातुंशक्यते भया
वहत्वाच्चतर्हिकर्मणोऽशेषतोऽननुष्ठानमेवास्त्वस्याऽशेषकर्मत्यागायोगादतःसहजंकर्मसदोषमपिनत्याज्यमितिवाक्यार्थमाह॥०
सहजस्येति॥सहजंकर्मसदोषमपिनत्यजेदित्यत्रविचारमवतारयति॥किमिति॥नहिकश्चिदितिन्यायादितिशेषः॥दोषोविहि न०

सहजस्यकर्मणःस्वधर्मरूपस्यपरित्यागेनपरधर्मानुष्ठानेपिदोषान्नैवमुच्यते॥भयावहश्चपरधर्मोनचशक्यतेऽशे
षतस्त्यक्तुमज्ञेनकर्मयतस्तस्मान्नत्यजेदित्यर्थः॥किमशेषतस्त्यक्तुमशक्यंकर्मेतिनत्यजेत् किंवासहजस्यकर्मणस्त्या
गे दोषोभवतीति॥किंचातोयदिताव दशेषतस्त्यक्तुमशक्यंकर्मेतिनत्याज्यंसहजंकर्मैवंतर्ह्यशेषतस्त्यागेगुणएवस्यादि
तिसिद्धंभवति॥सत्यमेवमशेषतस्त्यागएवनोपपद्यतइतिचेत्॥ ॥ ॥ ॥४८॥

आ॰१८॥
३२०॥
रामः॥

स नित्यत्यागेप्रत्यवायः॥संदिग्धस्यप्रयोजनस्यविचार्यत्वादुक्तसंदेहेप्रयोजनंपृच्छति॥किंचातइति॥नत्वाद्यमनर्थफलंदर्शयति॥य
दीति॥अशक्यस्यार्थानुष्ठानस्यगुणत्वेनजगत्सिद्धत्वादप्रसिद्धंहिमहोदधेरगस्त्यस्यचुलकीकृत्यपिबतोगुणवत्त्वंनदाह॥एवंतर्हीति॥
अशेषकर्मत्यागस्यगुणवत्त्वेपिशास्त्रोक्तन्यायेनतदयोगान्नस्याशक्यानुष्ठाननेतिशंकते॥सत्यमिति॥४८॥ ॥ ४८॥ ॥४८॥

चोद्यमेव विवृण्वन्नाद्यं विभजते॥ किमिति॥ सत्वादिगुणवदात्मनो नित्यप्रचलितत्वेनाशेषतस्तोनं कर्मत्यक्तुं शक्यं। ना
पिरूपविज्ञानवेदनासंस्कारसंज्ञानां क्षणप्रध्वंसिनां स्कंधानामिव क्रियाकारकभेदाभावात्कारकस्यैवात्मनः क्रियात्व
मिस्थत्वे कर्माशेषतस्त्यक्तुं शक्यं॥ उभयथापि स्वभावभंगादित्याह॥ उभयथेति॥ पक्षद्वयानुरोधेनाशेषकर्मत्यागायोगे वैद्यो वि

॥ कश्चोदयति॥

किं नित्यप्रचलितात्मकः पुरुषो यथा सांख्यानां गुणाः किं वा क्रियैव कारकं यथा बौद्धानां रूपविज्ञानवेदनासंज्ञासंस्काराः पंच
स्कंधाः क्षणप्रध्वंसिनः॥ उभयथापि कर्मणोऽशेषतस्त्यागो न भवत्यथ तृतीयोपि पक्षो यदा करोति तदा सक्रियं वस्तु यदा न
करोति तदा निःक्रियं एतदेव॥ न चैवं सति शक्यं कर्माशेषतस्त्यक्तुं॥ अयं त्वस्मिंस्तृतीयपक्षे विशेषो न नित्यप्रचलितं वस्तु
नापि क्रियैव कारकं किं तर्हि व्यवस्थिते द्रव्ये त्वविद्यमाना क्रियोत्पद्यते विद्यमाना च विनश्यति॥ शुद्धं द्रव्यं शक्तिम
द्वतिष्ठते इत्येवमाहुः काणादास्तदेव कारकमिति॥ ५७॥ ॥

अथेति॥ कदाचिदात्मा सक्रियो निष्क्रियश्च कदाचिदिति स्थिते फलितमाह॥ न चेति॥ उक्तमेव पक्षं पूर्वोक्तपक्षद्वयाद्विशेषद
र्शनेन विशदयति॥ अयं त्विति॥ उनागमापायित्वे क्रियायास्तद्वतो द्रव्यस्य कथं स्थायित्वेत्याशंक्याह॥ शुद्धमिति॥ क्रियाश
क्तिमत्वेपि क्रियावत्ताभावे कथं कारकत्वं क्रियां कुर्वत्कारकं कारणमित्यभ्युपगमादित्याशंक्याह॥ न देवेति॥ क्रियाशक्तिद्रव

॥ कारकं च क्रियाधिकरणं परस्पराश्रयादित्यर्थः॥ ५७॥ श्रीरामः॥ ५७॥

गी०भा०टी
३३१।
दा

वैशेषिकपक्षे दोषाभावादस्ति सर्वैः स्वीकार्यतेत्युपसंहरति।। अस्मिन्निति।। भगवन्मतानुसारित्वाभावादस्य पक्षस्य त्याज्यतेति
दूषयति।। अयमेवेति।। भगवन्मताननुसारित्वमस्याप्रामाणिकमिति शंकते।। कथमिति।। भगवद्वचनमुदाहरन्परपक्षस्य तदनुगु-
णताभावमाह।। यत इति।। परेषामपि मतमेतदनुगुणमेव किं न स्यादित्याशंक्याह।। काणादानां हीति।। भगवन्मताननुगुणत्वा-
भावेपि न्यायानुगुणत्वेन दोषरहितं काणादिमतमुपादेयमेव नहि काणादमतविरोधादुपेक्ष्यते भगवन्मतमिति शंकते।। अ-
भागवतत्वेपीति।। न्यायवत्त्वमसिद्धमिति दूषयति।।

१५

अस्मिन्पक्षे को दोषस्त्वं मे वतु दोषो यतस्त्वऽभागवतं मतमिदं कथं ज्ञायते।। यत आह भगवान्नासतो विद्यते भा-
वइत्यादि।। काणादादीनां ह्यसतो भावः सतश्चाभाव इतीदं मतं।। अभागवतत्वेपि न्यायवच्चेत्को दोष इति चेदुच्यते दो-
षवत्त्वं सर्वप्रमाणविरोधात्कथं।। यदि तावद्व्यणुकादि द्रव्यं प्रागुत्पत्तेरत्यंतमेवासत्सत्त्वमापद्यते उत्पन्नं च स्थितं कं-
चित्कालं पुनरत्यंतमेवासत्त्वमापद्यते।। तथा च सत्यसदेव सज्जायते।। अभावो भावो भवति भावश्चाभाव इति।। ५।। ०।०

अ०१८।।
३३१।।
रामः।।

उच्यत इति।। सर्वप्रमाणानुसारिणो मतस्य न तद्विरोधितेत्याक्षिपति।। कथमिति।। वैशेषिकमतस्य सर्वप्रमाणविरोधं प्रकटय-
न्नादौ तन्मतमनुवदति।। यदीति।। असतो जन्म सतश्च नाश इति स्थिते फलितमाह।। तथा चेति।। उक्तमेव वाक्यं व्याकरोति।। ५
अभाव इति।। सदेवासत्त्वमापद्यत इत्युक्तं व्याचष्टे।। भावश्चेति इति मतमिति शेषः।। ५।। श्रीवासुदेवाय नमो नमः।। ५।।

नचैवाभ्युपगमांतरमाह ॥ नचेति ॥ अद्धतमतं सममार्यः ॥ तस्याभ्युपगमस्य इति विशेषः परकीयमभ्युपगमं दूषयति ॥ नचेति ॥ एवमिति परपरिभाषा
नुसारिणेत्यर्थः ॥ अदर्शनादुत्पत्तेरपेक्षायाश्चेति विशेषः ॥ कथं तर्हि तन्मतेपि घटादीनां कारणापेक्षाणामुत्पत्तिर्न हि भावानां कारणा
पेक्षोत्पत्तिर्वा युक्तेत्यत आह ॥ भावेति ॥ घटादीनामस्मत्पक्षे प्रागपि कारणात्सतामेवाव्यक्तानामरूपाणामभिव्यक्तिसामग्रीम
पेक्ष्य एवगाभिव्यक्तिसंभवान्न किंचिदवद्यमित्यर्थः ॥ असत्कार्यवादे दोषांतरमाह ॥ किंचेति परमते मानमेयव्यवहारे कश्चिदपि

तत्राभावो जायमानः प्रागुत्पत्तेः शशविषाणकल्पः समवाय्यसमवायिनिमित्ताख्यं कारणमपेक्ष्य जायत इति नचैवमभाव उत्पद्य
ते कारणं चापेक्षत इति शक्यं वक्तुं असतां शशविषाणादीनामदर्शनात् ॥ भावात्मकाश्चेत् घटादयद्यमानाः किंचिदभिव्यक्तिमा
त्रे कारणमपेक्ष्योत्पद्यंत इति शक्यं प्रतिपत्तुं ॥ किंचासतश्च सद्भावे सतश्चासद्भावे न कश्चित्प्रमाणप्रमेयव्यवहारेषु वि
श्वासः कस्यचित्स्यात् ॥ सत्सदेवासदसदेवेति निश्चयानुपपत्तेः ॥ किंचोत्पद्यत इति द्व्यणुकादेर्द्रव्यस्य स्वकार
णसत्तासंबंधमाहुः ॥

विश्वासो न कस्यचिदित्यत्र हेतुमाह ॥ सत्सदेवेति ॥ नहि सत्तथैवेति निश्चितं तस्यैव पुनरसत्वप्राप्तेरिष्टत्वात् न चासत्तथैवेति निश्चय
स्तस्यैव सत्वप्राप्तेरुपगमादतोपन्मानेन सदसदिति वा निर्णीतं तत्तथेति विश्वासाभावान्मानवैकल्यमित्यर्थः ॥ सर्वतश्चासत्का
र्यवादो न युक्तिमानित्याह ॥ किंचेति ॥ तदेव हेत्वंतरं स्फोरयितुं परमतमनुवदति ॥ उत्पद्यत इति ॥ ॥ ॥ ॥ ॥ ॥

परकीयवचनमेव व्याचष्टे ॥ प्रागिति ॥ संवत्स्यंसदित्यनेन कारणासंबंधे सति कार्यस्य सत्तासंबंधो भवतीत्युक्तं तदेव स्फुटयति ॥ कारणेति
परमतमेवमनुभाष्य दूषयति ॥ नत्रेति ॥ कार्यस्यासतोपि कारणं संभवति तस्य च कार्येणासंबंधः सिध्यतीत्याशंक्याह ॥ नहीति ॥ असत्वा
द्वासतः संबंधासंभवे कारणस्य सतोपि न तेन संबंधोनुमातुं शक्यते सदसतोः संबंधाभावादित्यर्थः कार्यस्यासत्तासत्वानभ्युपग सं ३
मात् कारणसंबंधःस्यादिति शंकते ॥ नन्विति ॥ सत्तामेव द्व्यणुकादीनां कारणसंबंधं शंकितं दूषयति ॥ न संबंधादिति ॥ अनभ्युपगमा

प्रागुत्पत्तेश्चासन् पश्चात्स्वकारकव्यापारं व्यापारमपेक्ष्य स्वकारणैः परमाणुभिः स्वसत्तया च समवायलक्षणेन संबंधेन संबध्यते
संबंधं सत्कारणसमवेतं संभवति ॥ न च वक्तव्यं कथमसतः सत्कारणं भवेत्संबंधो वा केनचित्स्यात् नहि वंध्यापुत्रस्य सत्तासंबं
धो वा कारणं वा केनचित्प्रमाणतः कल्पयितुं शक्यः ॥ ननु नैवैशेषिकैरभावस्य संबंधः कल्प्यते द्व्यणुकादीनां हि द्रव्याणां स्व
कारणेन समवायलक्षणः संबंधः सत्तामेवोच्यत इति ॥ न संबंधात्प्राक्सत्त्वानभ्युपगमात् ॥ नहि वैशेषिकैः कुलालदंडचक्रा हि
दिव्यापारात्प्राक् घटादीनामस्तित्वमिष्यते ॥ न चासदेव घटाद्याकारं प्राप्तमिष्यत इति ॥ न चासत एव संबंधः पारिशेष्यादिष्टो भ ण

मेव विशदयति ॥ नहीति ॥ सदेव कारणं कार्याकारमापाद्य कार्यव्यवहारं निर्वर्तयतीत्यभ्युपगमान्नास्ति संबंधानुपपत्तिरित्याशंक्यापसिद्धांतान्मैव
मित्याह ॥ न चेति ॥ कार्यस्य कारणासंबंधात्पूर्वं सत्वाभावे परिशेषसिद्धमर्थं दर्शयति ॥ ततश्चेति ॥ तत्र चानुपपत्तिरुक्तैव शेषः ॥ ५ ॥ ॥ ० ति

संबंधिनोः सतोरेव संयोगोपि समवायः सदसतोः संभावितस्य नित्यत्वादन्यतरसंबंधाभावेपि स्थितेरावश्यकत्वादित्याशंकते ॥ नन्विति ॥ सदसतोर्मिथः संबंधस्यादृष्टत्वान्नेति निराचष्टे ॥ न बंध्येति ॥ घटादि प्रागभावस्यासंतामावत्वाभावाद्वंध्यापुत्रादिविलक्षणतया स्वकारसंबंधः सिध्यतीत्याशंक्याह ॥ घटादेरिति ॥ उभयत्राभावत्वमावाविशेषेपि कस्यचित्कारणसंबंधो नेतरस्येति विशेषहेत्वभावान्न प्रागभावस्य कारणसंबंधः संभवतीत्यर्थः ॥ घटादि प्रागभावस्य सप्रतियोगिकत्वं वंध्यापुत्रादेर्नैवमिति विशेषमाशंक्य दूषयति ॥ ९

ण

नन्वसतोपि समवायलक्षणः संबंधो न विरुद्धो न वंध्यापुत्रादीनामदर्शनात् ॥ घटादेरेव प्रागभावस्य स्वकारणसंबंधो भवति ॥ न वंध्यापुत्रादेरभावस्य तुल्यत्वेपि निर्विशेषोऽभावस्य वक्तव्यः एकस्याभावो द्वयोरभावः सर्वस्याभावः प्रागभावः प्रध्वंसाभाव इतरेतराभावोऽत्यंताभाव इति लक्षणतो न केनचि~~द्विशेषो~~द्विशेषो दर्शयितुं शक्योसतीति च विशेषे घटस्य प्रागभाव एव कुलादि नोभिर्घटभावमापद्यते संबध्यते च भावेन रूपांतरेण स्वकारणेन संबद्धः सर्वव्यवहारयोग्यश्च भवति ॥ ५ ॥ श्रीकृष्णायनमः ॥

तस्येति ॥ प्रागभावस्यैव प्रध्वंसादेरपि सप्रतियोगिकत्वाविशेषे स्वकारणसंबंधाविशेष[illegible]स्यादित्यर्थः ॥ प्रागभावप्रध्वंसाभावयोर्विशेषाभावेकालिनमाह ॥ अस्तीति चेति ॥ कपालशब्दो घटकारणीभूतसदवयवविषयः ॥ सर्वोव्यवहारो घटाश्रितो जन्मनाशादिव्यवहारः ॥ ५

गीभाटी०
३३२॥

प्रध्वंसाभावस्यघटस्यैवाभावत्वेसत्यपिनघटत्वमापद्यतेनापिकारणेनसंबध्यतेनचोत्पत्त्यादिव्यवहारयोग्योभवतीत्येनदयुक्तंप्रागभावेन
स्याविशेषाभावादित्याह॥नत्विति॥असमंजसमित्यनेनेतिशब्दःसंबंध्यते॥असमंजसांतरमाह॥प्रध्वंसादीति॥अन्योन्याभावात्यं
ताभावावादिपदार्थौक्वचिदित्यादेशकालयोर्ग्रहणं॥व्यवहारोजन्मादिरेवप्रागभावोनोत्पत्त्यादिव्यवहारयोग्योऽभाववत्त्वात्प्रध्वंसादि
वदित्यर्थः॥प्रागभावस्यघटभावानभ्युपगमादनुमानंसिद्धसाधनमितिशंकते॥नन्विति॥अभावस्यैवंभावापत्त्यनभ्युपगमेभावस्यैव

ननुघटस्यैवप्रध्वंसाभावोऽभावत्वेसत्यपीति॥प्रध्वंसाद्यभावानांनक्वचिदपिव्यवहारयोग्यत्वंदृष्टंचप्रागभावद्व्यणुकादिद्रव्या
रब्धस्योत्पत्त्यादिव्यवहारार्हत्वंरत्येनदसमंजसं॥अभावत्वाविशेषादत्यंतप्रप्रध्वंसाभावयोरिव॥ननुनैवास्माभिःप्रागभावस्य
भावापत्तिरुच्यतेभावस्यैवहितर्हिभावापत्तिः॥यथाघटस्यवाघटापत्तिःपटस्यवापटापत्तिरेतदप्यभावस्यभावापत्तिवदेवप्र
माणविरुद्धं॥सांख्यस्यापियःपरिणामपक्षःसोऽप्यपूर्वधर्मोत्पत्तिविनाशाङ्गीकरणात्वैशेषिकपक्षान्नविशिष्यते॥५॥०
गी

आ१ ५॥
३३२॥
रामः॥

भावापत्तिरितीत्यनिष्टंस्यादितिदूषयति॥भावस्येति॥तस्यतदापत्त्ययोग्यत्वेदृष्टांतमाह॥यथेतिभावस्यभावापत्तिर्निष्टेतितात्पर्यमिति
कंस्पष्टयति॥एतदपीति॥आरंभवादोक्तदोषंपरिणामवादेपिसंचारयति॥सांख्यस्येति॥धर्मःपरिणामःअसतोऽपूर्वपरिण
मस्योत्पत्तेःसतश्चपूर्वपरिणामस्यनाशादसदसदेवसच्चसदेवेतिव्यवस्थानापिदुर्धरेत्यर्थः॥ ॥ ॥ ॥५॥

ननु कार्यं कारणात्मत्प्रागपि सदेवाव्यक्तं कारकव्यापाराद्व्यज्यते तेन व्यक्त्यव्यक्त्योर्जन्मनाशव्यवहारान्नानंतराद्वि
शेषसिद्धिस्तत्राह॥ अभिव्यक्तीति॥ कारकव्यापारात्प्रागनभिव्यक्तिवदभिव्यक्तेः सत्वमसत्वं वा सत्वे कारकव्यापारवैय
र्थ्यांतद्विषयप्रमाणविरोधः। द्वितीयपक्षे पक्षांतरवदत्यंतासतस्तन्निर्वर्त्तित्वायोगे स एव दोषः॥ कारकव्यापारादूर्ध्वं व्य
क्तिवदव्यक्तेरपि सत्वे स एव दोषः॥ असत्वेपि सतोऽसत्वांगीकारान्मानमेयव्यवहारेन क्वापि विश्वासः सत्सदेवासच्चासदेवे
त्यनिर्धारणादित्यर्थः॥ सांख्यीयपक्षप्रतिक्षेपन्यायेन पक्षांतरमपि प्रतिक्षिपतीत्याह॥ एतेनेति॥ कारणस्यैव कार्य

अभिव्यक्तितिरोभावांगीकरणेप्यभिव्यक्तितिरोभावयोर्विद्यमानाविद्यमानत्वनिरूपणे पूर्ववदेव प्रमाणविरो
धः॥ एतेन कारणस्यैव संस्थानमुत्पत्त्यादीत्येतदपि प्रत्युक्तं॥ परिशेष्यात्सदेकमेव वस्तु विषयोत्पत्तिविनाशादि
धर्मैर्नदव दूने कथाचिकल्पनतरतीरं भागवतं मतमुक्तं नासतो विद्यते भाव इत्यस्मिन् श्लोके॥ ५४॥ श्री राम:

रूपापत्तिरुत्पत्तिस्तस्यैव तद्रूपत्यागो नस्वरूपापत्तिर्नाश इत्येतदपि न॥ पूर्वरूपेऽस्थितेनेष्टे च परस्परपररूपापत्तेरनुपपत्तेर्न च
ज्ञातरूपं स्थितेन नष्टेन वात्यकुं शक्यमित्यर्थः॥ आरंभवादपरिणामवादेषु चोत्पत्त्यादिव्यवहारानुपपत्तौ परिशेषाया
तं दर्शयति॥ परिशेष्यादिति॥ एकस्यानेकधाविकल्पानुपपत्तिमाशंक्याह॥ अविषयेति॥ अस्यापि मतस्य भगवन्म
तानुरोधित्वाभावाद्विशिष्टासाज्यनेत्याशंक्याह॥ रतीरमिति॥ ५४॥ ५४॥ श्रीरामकृष्णाय नमः॥ वासुदेवाय नमः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गी॰भा॰
३३४॥

रस्तमेव भगवन्मतं विशदयति॥ सत्वयस्येति॥ सदेकमेव वस्तु स्यादिति शेषः॥ इतरेषां विकारजातस्य पानांरजतादिवदर्थव्यभि
चारादविद्यया तद्वैवस्त्वे न कथाविकल्पस्य नरत्याह॥ व्यभिचाराच्चेति॥ इतिश्लोके दर्शितमिति संबंधः॥ आत्मनश्चेदविक्रियत्वं
भगवतेष्टं तर्हि सर्वकर्मत्यागोपपत्तेः सहजस्यापि कर्मणस्त्यागसिद्धिरिति शंकते॥ कथमिति॥ किं कार्यकारणात्मकानां गुण
नाम कल्पितानां कल्पितानां वा कर्मधर्मत्वेनेष्टं॥ द्विधापि निःशेषकर्मत्यागोऽविदुषो विदुषो वा नाद्यइत्याह॥ यदीत्यादिना॥

सत्यत्वस्याव्यभिचारात्॥ व्यभिचाराच्चेतरेषामिति॥ कथं तर्हि आत्मनोऽविक्रियत्वेऽशेषतः कर्मणस्त्यागो नोपपद्य
त इति॥ यदि वस्तुभूता गुणा यदि वाऽविद्याकल्पितास्तद्धर्मः कर्म न ह्यात्मन्यविद्याध्यारोपितमेवेत्यविद्वान् हि कश्चित्क्षण
मप्यशेषतस्त्यक्तुं शक्नोतीत्युक्तं॥ विद्वांस्तु विद्ययाऽविद्यायां निवृत्तायां शक्नोत्येवाशेषतः कर्म परित्यक्तुं॥ अविद्या
ध्यारोपणस्याशेषानुपपत्तेः॥ नहि तैमिरिकदृष्ट्याध्यारोपितस्य द्वितीयचंद्रादेस्तिमिरापगमेऽपि शेषोऽवतिष्ठते॥
एवं च सतीदं वचनमुपपन्नं सर्वकर्माणि मनसेत्यादि॥ कथं दोषवच्चेत्कर्म॥ सिद्धिरित्युच्यते॥ स्वे स्वे कर्मण्यभिरतः संसिद्धि

[illegible]

आ॰१८॥
३३४॥
श्रीरामः॥

अविद्यारोपितमेव गुणशब्दितकार्यकारणारोपद्वारा कर्मेति शेषः॥ द्वितीयं प्रत्याह॥ विद्वांस्त्विति॥ आरोपशेषवशाद्विदुषो
पि नाशेषकर्मत्यागसिद्धिरित्याशंक्याह॥ अविद्येति॥ तामेवानुपपत्तिं दृष्टांतेन स्पष्टयति॥ न हीति॥ विदुषोऽशेषकर्मत्या
गे पांचमिकमपि वचोऽनुकूलमित्याह॥ एवं चेति॥ अविदुषः सर्वकर्मत्यागाभावे योगे च प्रसक्ते ताध्यायस्थमेव वाक्यमनु
॥ कूलमित्याह॥॥ स्वे स्व इति॥४५॥

वाक्यांतरमपि तत्रैवार्थे ह्युक्तार्थमित्याह॥ स्वकर्मणेति॥४६॥ विदुषः सर्वकर्मत्यागोऽपि नाविदुषस्तथेत्युक्तं॥ इदानीमुक्तमनूद्यानंतरश्लो
६ कतात्पर्यमाह॥ या च कर्मजेति॥ चकारोऽवधारणार्थो भिन्नक्रमो वक्तव्येत्यत्र संबध्यते॥ साधनान्युपदिश्य नैष्कर्म्यसिद्धिं व्यपदिशति
असक्तेति॥ पुत्रादिविषये चेतसः संगाभावेऽपि तस्याः स्वाधीनत्वमाशंक्याह॥ जितात्मेति॥ असक्तिमुक्त्वा स्पृहाभावं वदता पुनरुक्तिरिष्टेत्या

स्वकर्मणा तमभ्यर्च्य सिद्धिं विंदति मानवः इति च॥ या च कर्मजा सिद्धिरुक्ता तस्या ज्ञाननिष्ठायोग्यतालक्षणायाः फलभूता नैष्कर्म्य
सिद्धिर्ज्ञाननिष्ठालक्षणा वक्तव्येति श्लोक आरभ्यते॥ असक्तबुद्धिः सर्वत्र जितात्मा विगतस्पृहः॥ नैष्कर्म्यसिद्धिं परमां संन्या
सेनाधिगच्छति॥४९॥ असक्तबुद्धिरसक्ता संगरहिता बुद्धिरंतःकरणं यस्य सोऽसक्तबुद्धिः सर्वत्र दारादिषु सक्तिनिमित्तेषु॥
जितात्मा जितो वशीकृत आत्मा अंतःकरणं यस्य स जितात्मा विगतस्पृहो विगता स्पृहा देहजीवितभोगेषु यस्मात्स वि
गतस्पृहः॥ य एवंभूत आत्मज्ञः स नैष्कर्म्यसिद्धिं निर्गतानि कर्माणि यस्मान्निष्क्रियब्रह्मात्मसंबोधात्स निष्कर्मा तस्य भावो
नैष्कर्म्यं नैष्कर्म्यं च तत्सिद्धिश्चेति नैष्कर्म्यसिद्धिः नैष्कर्म्यस्य वा सिद्धिः निष्क्रियात्मस्वरूपावस्थानलक्षणस्य सिद्धिर्निर्वृत्तिस्तां
नैष्कर्म्यसिद्धिं परमां प्रकृष्टां॥ कर्मज[illegible]सिद्धिविलक्षणां सद्योमुक्त्यवस्थानरूपां संन्यासेन सम्यग्दर्शनेन॥४९॥ ॥४९॥४९॥

शंक्याह॥ देहेति॥ उक्तमनूद्य तत्फलं लंभयति॥ एवमिति॥ कर्मणां निर्गतौ हेतुमाह॥ निष्क्रियेति॥ सम्यग्ज्ञानार्थत्वेन नैष्कर्म्यसिद्धिशब्दं
व्याख्यायार्थांतरमाह॥ नैष्कर्म्यस्येति॥ प्रकर्षमेव प्रकटयति॥ कर्मजेति॥४९॥ श्रीरामायनमः॥

गी०भा०टी०
३३५॥

गुरुते॥स्यश्च निरस्तयोः सम्यग्दर्शनसाधनत्वप्रसिद्धेरयुक्तं तादात्म्यमित्याशंक्य पक्षांतरमाह ॥ तत्पूर्वकेणेति ॥ संन्यासान्नैष्कर्म्यप्राप्तिरित्युक्त्वा
क्रमानुकूल्यमाह ॥ तथा चेति ॥ ४९ ॥ ज्ञानप्राप्तियोग्यतावतो ज्ञानसम्पत्तिर्यस्तत्फलप्राप्तौ युक्तावुक्तायां वक्तव्यशेषो नास्तीत्याशंक्याह ॥

तत्पूर्वकेण वा सर्वकर्मसंन्यासेनाधिगच्छति प्राप्नोति ॥ तथा चोक्तं ॥ सर्वकर्माणि मनसा संन्यस्य नैव कुर्वन्न कारयन्नास्त इति ॥ ४९ ॥
पूर्वोक्तेन स्वकर्मानुष्ठानेनेश्वराभ्यर्चनरूपेण जनितां प्रागुक्तलक्षणां सिद्धिं प्राप्तस्योत्पन्नात्मविवेकज्ञानस्य केवलात्मज्ञाननिष्ठा
रूपा नैःष्कर्म्यलक्षणा सिद्धिर्येन क्रमेण भवति तद्वक्तव्यमित्याह ॥ सिद्धिं प्राप्तो यथा ब्रह्म तथाप्नोति निबोध मे ॥ समासेनैव कौंतेय निष्ठा ज्ञान
पा स्य या परा ॥ ५० ॥ सिद्धिं प्राप्तः स्वकर्मणेश्वरं समभ्यर्च्य तत्प्रसादजां कायेंद्रियाणां ज्ञाननिष्ठायोग्यतालक्षणां सिद्धिं प्राप्तः सिद्धिं
प्राप्त इति तदनुवाद उत्तरार्थः किं तदुत्तरं यदर्थोऽनुवाद इत्युच्यते ॥ यथा येन प्रकारेण ज्ञाननिष्ठारूपेण ब्रह्म परमात्मानं प्राप्नोति तथा तं
प्रकारं ज्ञाननिष्ठाप्राप्तिक्रमं मे मम वचनान्निबोध त्वं निश्चयेनावधारयेत्येतत् ॥ किं विस्तरेण नेत्याह ॥ समासेनैव संक्षेपेणैव हे कौंतेय ॥
यथा ब्रह्म प्राप्नोति तथा निबोधेति ॥ अनेन या प्रतिज्ञाता ब्रह्मप्राप्तिस्तामिदं तया दर्शयितुमाह निष्ठा ज्ञानस्य या परेति ॥ निष्ठा पर्यव
॥ सानं परिसमाप्तिरित्येतत् ॥

स
अ०१८।
३३५॥
श्रीरामः॥

पूर्वोक्तेनेति ॥ क्रमाख्यं वस्तु तदित्युच्यते ॥ सिद्धिं प्राप्तस्तूक्तमेव ॥ यस्मादनूद्यते तत्राह ॥ तदनुवाद इति ॥ उत्तरमेव प्रश्नपूर्वकं स्फोरयति ॥ किं त
दित्यादिना ॥ ज्ञाननिष्ठाप्राप्तिक्रमस्य विस्तरेणोक्तौ दुर्बोधत्वमाशंक्य परिहरति ॥ किमिति ॥ चतुर्थपादस्य पूर्वेण संगतिमाशंक्याह ॥ यथेति ॥

निष्ठायाः सापेक्षत्वात्प्रतिसंबंधि निर्देष्टुमित्याह ॥ कस्येति ॥ याब्रह्मज्ञान[illegible]स्यपरा निष्ठा सा प्रकृतज्ञानस्य निष्ठेत्याह ॥
ब्रह्मेति ॥ तस्यपरा निष्ठा न प्रसिद्धेति कृत्वा साधनानुष्ठानाधीनतया साध्येति मत्वा पृच्छति ॥ कीदृशीति ॥ प्रसिद्धमात्मज्ञानमनु
रूध्यप्रमत्तज्ञाननिष्ठासुज्ञानेत्याह ॥ यादृशमिति ॥ तत्रापि प्रसिद्धिरसिद्धेति शंकते ॥ कीदृगिति ॥ अर्थेनैव विशेषो हीतिन्यायेनो
त्तरमाह ॥ यादृशइति ॥ तस्मिन्नपि विप्रतिपत्तेरप्रसिद्धिमभिसंधाय पृच्छति ॥ कीदृशइति ॥ भगवद्वाक्यान्युपनिषद्वाक्यानि चाश्रि व
त्यपहरिरति ॥ यादृशइति ॥ न जायते म्रियते चेत्यादीनि वाक्यानि कूटस्थत्वमसंगत्वमित्यादिन्यायः ॥ ज्ञानस्य विषयाकारतादात्मन श्रा

कस्यं ज्ञस्य ज्ञानस्य या परा परिसमाप्तिः ॥ कीदृशी [illegible] सा या यादृशमात्मज्ञानं कीदृक्तन्न यादृशआत्मा कीदृशोसौ यादृशो
भगवतोक्त उपनिषद्वाक्येभ्यश्चावगतश्च ॥ ननु विषयाकारं ज्ञानं न विषयो नाप्याकार[illegible]वानात्मारब्धनेकचिन्न्यान्नचादित्यव
र्णोभारूपः स्वयंज्योतिरित्या[illegible]कारवत्त्वमात्मनः श्रूयते । न तमोरूपत्वप्रतिषेधार्थत्वात्तेषां वाक्यानां द्रव्यगुणाद्याकारप्रति
षेधे आत्मनस्तमोरूपत्वे प्राप्ते तत्प्रतिषेधार्थानीत्यादित्यवर्णइत्यादिवाक्यानि ॥ अरूपमिति च विशेषतो रूपप्रतिषेधात्

[illegible]

विषयत्वादनाकारत्वाच्च तदाकारज्ञानायोगादात्मप्रसिद्धावपि नात्मज्ञानप्रसिद्धिरिति शंकते ॥ नन्विति ॥ आकारवत्त्वमात्मनः श्रुतिसि
द्धमिति सिद्धं[illegible]नीचोदयति ॥ नन्वादित्येति ॥ उक्तवाक्यानामस्यार्थस्य दर्शनेन पूर्ववादीपरिहरति ॥ नेत्यादिना ॥ संग्रहवाक्यं प्रपंचयति ॥
[illegible]ति ॥ रतश्चाकारवत्त्वमात्मनो नास्तीत्याह ॥ अरूपमिति ॥ यदात्मनो विषयत्वाभावात्तद्विषयं ज्ञानं न संभवतीत्युक्तं तदुपपादयति ॥
॥ अविषयत्वाच्चेति ॥ ५ ॥

रा॰गी॰भा॰टी॰
३३६॥

आत्मनोऽविषयत्वेश्रुतीरुदाहरति॥नेत्यादिना॥संदृशेसम्यग्दर्शनविषयत्वायास्यात्मनोरूपंनतिष्ठतीत्यर्थः॥तदेवकरणगोचरत्वेनोपपादयति
नेति॥शब्दादिशून्यत्वादात्माविषयोनभवतीत्याह॥अशब्दमिति॥आत्मनोविषयताकारत्वयोरभावेफलितमाह॥तस्मादिति॥ज्ञानस्यात्मा
कारत्वाभावेसत्यात्मज्ञानमितिव्यपदेशासिद्धिरित्येकदेशीशंकते॥कथंतर्हीति॥काचोपपत्तिरित्याशंक्याह॥सर्वंहीति॥आत्मनोपितर्हि
विषयत्वेनज्ञानस्यतदाकारत्वंस्यादित्याशंक्याह॥निराकारश्चेति॥आत्मनोविषयताराहित्यंचकारार्थः॥आत्मवत्तज्ज्ञानस्यापितर्हिनिरा
कारत्वंभविष्यतीत्याह॥ज्ञानेनितंतद्वे[illegible]नात्मज्ञानंगृह्य॥

२२
नु

नसंदृशेतिष्ठतिरूपमस्यनचक्षुषापश्यतिकश्चनैनंअशब्दमस्पर्शमित्याद्यैस्तस्मादात्माकारंज्ञानमित्यनुपपन्नं॥कथंनह्यात्मनो
रागेंसर्वंहियद्विषयंज्ञानंतत्तदाकारंभवति॥निराकारश्चआत्मेत्युक्तं॥ज्ञानात्मनोश्चोभयोर्निराकारत्वेकथंतद्भावना॥निषेधेति॥
नास्यंननिर्मलत्वस्वच्छत्वसूक्ष्मतोपपत्तेरात्मनोबुद्धेश्चात्मसमनैर्मल्याद्युपपत्तेरात्मचैतन्याकाराभासतोपपत्तिर्बुद्ध्याभा
संमनस्तदाभासानींद्रियाणिइंद्रियाभासश्चदेह॥ ५॥

आ॰ १८।
३३६।
रामः॥

तेनस्यभावनापौनःपुन्येनानुसंधानंतस्यानिष्ठासम्मा।तिरात्मनिसाक्षात्कारदार्थंनचैवनतसर्वमात्मनोज्ञानस्य।वा।नाकारत्वेसिध्यतीत्यर्थः
ज्ञानात्मनोःसाम्योपन्यासेनसिद्धांतीसमाधत्ते॥नेत्यादिना॥यथोक्तसाम्यानुसारादात्मचैतन्याभासव्याप्ताज्ञानपरिणामवतीबुद्धिःसा
भासबुद्धिव्याप्तंमनः॥साभासमनोव्याप्तानींद्रियाणिसाभासेंद्रियव्याप्तःस्थूलोदेहः॥ ॥५॥श्रीरामचंद्रायनमः॥५॥ •

तत्रलौकिकभ्रांतिंप्रमाणयति॥अनंतरेति॥आत्मदृष्टेर्देहमात्रदृष्टत्वात्तत्रचैतन्याभासव्याप्तिरिंद्रियद्वाराकल्प्यते॥इंद्रियेषुचतद्दृष्टिदर्शनात्
चैतन्याभासवत्त्वंमनोद्वारासिध्यतिमनसिचित्तात्मदृष्टेश्चैतन्याभासवत्त्वंबुद्धिद्वारालभ्यते॥बुद्धौचात्मदृष्टेरज्ञानद्वाराचैतन्याभाससिद्धि
रित्यर्थः॥देहेलौकिकमात्मदर्शनंन्यायाभावादुपेक्षितमित्याशंक्याह॥देहेति॥तथापिकथमिंद्रियाणांन्यायहीनमात्मत्वमित्याशंक्याह॥तथे
तितथापिमनसोपादात्मत्वंतन्न्यायश्चस्यमित्याशंक्याह॥अन्यरेति॥बुद्धेरात्मत्वमपिन्यायोपेतमितिनिस्त्चयति॥अन्येबुद्धीतिदेहादौबु

प

अतोलौकिकेदेहमात्रएवात्मदृष्टिःक्रियते॥देहचैतन्यवादिनश्चलोकायतिकाश्चैतन्यविशिष्टःकायःपुरुषइत्याहुस्तथान्येइंद्रि
यचैतन्यवादिनोऽन्येमनश्चैतन्यवादिनोऽन्येबुद्धिचैतन्यवादिनस्ततोऽप्यंतरमव्यक्तमव्याकृताख्यमविद्यावस्थमात्मत्वे
नप्रतिपन्नाःकेचित्॥सर्वत्रहिबुध्यादिदेहांतेषुआत्मचैतन्याभासतात्मभ्रांतिकारणमित्यतश्चात्मविषयंज्ञानंनविधातव्यं
किंतर्हिनामरूपाद्यनात्माध्यारोपणनिवृत्तिरेवकार्यानात्मचैतन्यविज्ञानं॥५॥

ध्यंनेपरमात्मबुद्धिर्नान्यत्रेतिनियमंवारयति॥ततोपीति॥तत्रहिसाभासेंतर्यामिणि॥कारणोपासकानामात्मधीरस्तीत्यर्थः॥बुध्यादे
देहांतेलौकिकपरीक्षकाणामात्मत्वभ्रांतौसाधारणकारणमाह॥सर्वत्रेति॥आत्मज्ञानस्यलौकिकपरीक्षकप्रसिद्धत्वादेवविधिविषयं
त्वमपिपरेष्टंपरास्तमित्याह॥रसनरेति॥ज्ञानस्यविधेयत्वाभावेकिंकर्तव्यंद्रष्टव्यादिवाक्यैरित्याशंक्याह॥किंतर्हीति॥५॥श्रीरामः॥५

गी॰ आ॰ टी॰ आत्मतातस्याविधेयत्वे प्रागुक्तमनःशङ्कितं हेतुं विवृणोति ॥ अविषेति ॥ देहेंद्रियमनोबुध्यव्यक्तैरुपलभ्यमानैः सहोपलभ्यनेचैतन्यंनात्म
३३७॥ थानेनानुपलंभोज्ज्ञत्वादित्यत्रविज्ञानवादिभ्रांतिं प्रमाणयति ॥ अत एवेति ॥ सर्वं ज्ञेयं ज्ञानव्याप्तमेव ज्ञानेनज्ञायतेनेनज्ञानानातिरिक्तं नास्त्येव चार नं २
वस्तु समनंतेहि स्वप्नदृष्टवस्तु ज्ञानानातिरिक्तं नास्तीति ते भ्रांम्यंतीत्यर्थः ॥ ज्ञानस्यापि ज्ञेयत्वात्तज्ज्ञानं वस्त्वंतरमेष्टव्यमित्याशंक्याह ॥
प्रमाणांतरेति ॥ ज्ञानस्य स्वेनैव ज्ञेयत्वोपगमेनातिरिक्तप्रमापकनिरपेक्षत्वं च प्रतिपत्तारं प्रति संबंधः ॥ ब्रह्मात्मज्ञानस्य प्रसिद्धत्वेना० त्म ४

अविद्याध्यारोपितसर्वपदार्थाकारैरेवाविशिष्टतया गृह्यमाणता तदेतदेव विज्ञानवादिनो बौद्धा विज्ञानव्यतिरेकेण वस्त्वेव नास्तीति प्रतिप
वेध न्नाः ॥ प्रमाणांतरनिरपेक्षतां च स्वसंविदितत्वाभ्युपगमेन ॥ तस्मादविद्याध्यारोपणनिराकरणमात्रं ब्रह्मणि कर्तव्यं न तु ब्रह्मवि
ज्ञाने प्रयत्नोऽत्यंतप्रसिद्धत्वात् ॥ अविद्याकल्पितनामरूपविशेषाकारापहृतबुद्धितादृशं न प्रसिद्धं सुविज्ञेयमासन्नतरमात्मतत्व आ॰ ११८॥
भूतमप्यप्रसिद्धं दुर्विज्ञेयमतिदूरमन्यदिव च प्रतिभाति अविवेकिनां ॥ बाह्याकारनिवृत्तबुद्धीनां तु लब्धगुर्वात्मप्रसादानां ३३७॥
॥ नातःपरं सुखं प्रसिद्धं सुविज्ञेयं सुखासन्नमस्ति ॥ ५८ ॥ रामः॥

विधेयत्वे फलितमाह ॥ तस्मादिति ॥ यत्नोर्थभावना ॥ ब्रह्मणस्तद्ज्ञानस्य चात्यंतप्रसिद्धत्वे कथं ब्रह्मण्यप्यथाप्रयालौकिकानामित्याशंक्याह ॥ अ
विद्येति ॥ यथाप्रतिभासं दुर्विज्ञेयत्वादिरूपमेव ब्रह्म किं न स्यादित्याशंक्याह ॥ बाह्येति गुरुप्रसादः शुश्रूषयातोषितगुरोराचार्यस्य करुणा
तिरस्कारादेव तत्वं बुध्यतामिति निर्वेग्रहोऽनुग्रहः ॥ आत्मप्रसादस्त्वधिगतपदशक्तिवाक्यतात्पर्यस्य श्रोतनयुत्सनुसंधानादात्मनो
मनसो विषयत्वावरतस्य प्रत्यगेकाग्रतया तत्प्रावण्यमिति विवेकः ॥ ५८ ॥

६२

आत्मज्ञानस्यात्मद्वारा प्रसिद्धत्वेवास्योपक्रमं प्रमाणयति ॥ तथा चेति ॥ आत्मनो निराकारत्वात्तस्मिन्बुद्धेरप्रवृत्तेः सम्यग्ज्ञाननिष्ठा
सुसंपाद्येति मतमुत्थापयति ॥ केचित्त्विति ॥ बहिर्मुखानामंतर्मुखानां वा ब्रह्मणि सम्यग्ज्ञाननिष्ठा दुःखसाध्येति विकल्प्याद्यमंगीक
रोति ॥ सत्यमिति ॥ पूर्वं पूर्वं विशेषणमुत्तरोत्तरविशेषणे हेतुत्वेन योजनीयं [illegible] द्वितीयं दूषयति ॥ तद्विपरीतानामिति ॥ अंतर्निष्ठानां
द्वैतविषये सम्यग्बुद्धेरतिशयेन दुःसंपाद्यत्वे हेतुमाह ॥ आत्मेति ॥ तद्व्यतिरेकेण वस्त्वंतरस्यासत्त्वमित्याशंक्याह ॥ यथा चेति ॥

तथा चोक्तं प्रत्यक्षावगमं धर्म्यमित्यादि ॥ केचित्तु पंडितंमन्या निराकारत्वादात्मवस्तु नोऽपैति बुद्धिरतो दुःखसाध्या सम्यग्ज्ञान
निष्ठेत्याहुः ॥ सत्यमेवं गुरुसंप्रदायरहितानामश्रुतवेदांतानामत्यंतबहिर्विषयासक्तबुद्धीनां सम्यक्प्रमाणेष्वकृतश्रमा
णां ॥ तद्विपरीतानां तु लौकिकग्राह्यग्राहकद्वैतवस्तुषु सद्बुद्धिर्नितरां दुःसंपाद्या आत्मचैतन्यव्यतिरेकेण वस्त्वंतरस्यानुपल
ब्धेर्यथा चैतदेवमेव नान्यथेत्यवोचाम ॥ उक्तं च भगवता ॥ यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेरिति ॥ तस्माद्बाह्या
॥ कारभेदबुद्धिनिवृत्तिरेवआत्मस्वरूपालंबनकारणं ॥

अद्वैतमेव वस्तु द्वैतेनाविषयकं नान्यथा तात्त्विकमित्येतदेव यथा स्यात्तथैवं नोवपं तत्र तत्राध्यायेष्विति योजना ॥ अंतर्निष्ठानाम गं
द्वैतबुद्धीनां द्वैते नास्ति सद्बुद्धिरित्यत्र भगवतोऽपि संमतिमाह ॥ उक्तं चेति ॥ परमतं निराकृत्य प्रकृतमुपसंहरन्नात्मनो निरा
कारत्वे सानस्य तदालंबनत्वे किं कारणमित्याशंक्याह ॥ तस्मादिति ॥ ५१ ॥ ॥ ॥ ॥

गी॰भा॰टी॰
३३८॥

नन्वात्मा कथंचित्तान क्रियाव्याप्यत्वेन स्पहेयोपादेयान्यतरकोटिनिवेशात्स्नानांगादिवत्क्रियासाध्यत्वेनासिद्धत्वं नेत्याह ॥ न हीति ॥ आ स्व
त्मत्वादेव प्रसिद्धत्वेन प्राप्तत्वादनात्मवन्न स्पहेयोपादेयत्वयोरयोगान्न क्रियासाध्यत्वेत्यर्थः ॥ आत्मनश्चेद्दृते क्रियाप्रसिद्धत्वेन तदा सर्वप्रवृत्ती न
नामभ्युदयनिःश्रेयसार्थानामात्मार्थत्वायोगादर्थिनोऽभावे स्वार्थत्वमप्रमाणिकं स्यादित्याह ॥ अप्रसिद्धे हीति ॥ न प्रवृत्तीनां स्वार्थत्वे दे
हादीनामन्यतमस्यार्थित्वेन ननाद्यर्थ्यादिसाशांक्य घटादिवदचेतनस्यानर्थित्वान्नैवमित्याह ॥ न चेति ॥ ननु प्रवृत्तीनां फलत्वावसायितया सु
खदुःखयोरन्यतरार्थत्वान्न स्वार्थत्वं नेत्याह ॥ न चेति ॥ प्रवृत्तीनां सुखदुःखार्थत्वेपि तयोः स्वार्थतासिद्धेः ॥ अर्थित्वेनात्मा सिध्यतीत्यर्थः ॥

न त्वात्मा नाम कस्यचित्कदाचिदप्रसिद्धः प्राप्यो हेय उपादेयो वा ॥ अप्रसिद्धे हि तस्मिन्नात्मनि स्वार्थाः सर्वाः सर्वप्रवृत्तयो व्यर्थाः प्रस
नाम ज्येरन्न च देहाद्यचेतनार्थित्वं शक्यं कल्पयितुं ॥ न च सुखार्थं सुखं दुःखार्थं वा दुःखमिति ॥ आत्मावगत्यवसानार्थत्वाच्च सर्वव्यवहार
स्य ॥ तस्माद्यथा स्वदेहस्य परिच्छेदाय न प्रमाणांतरापेक्षा ततोप्यात्मनोंतरतमत्वात्तदवगतिं प्रति न प्रमाणांतरापेक्षेत्यात्मज्ञाने
॥ निष्ठा विवेकिनां सुप्रसिद्धेति सिद्धं ॥ ५ ॥ श्रीरामः ॥ ५९ ॥

आ१८॥
३३८॥
राम॥

किंच सर्वापेक्षान्यायादात्मावसानः सर्वो व्यवहारो न चात्मन्यप्रसिद्धे यज्ञादिव्यवहारस्य तज्ज्ञानार्थत्वं तेनात्मप्रसिद्धिरेष्टव्येत्याह ॥ आत्मेति ॥ न चात्मा
प्रसिद्धोपि प्रमाणद्वारा प्रसिध्यति यत्सिध्यति तत्प्रमाणादेवेति मा यात्तत्राह ॥ तस्मादिति ॥ मानमेयादि सर्वं व्यवहारस्यात्मावगत्यंतत्वोपग
मात्प्रागेव प्रमाणप्रवृत्तेरात्मप्रसिद्धेरेष्टव्यत्वादित्यर्थः ॥ आत्मगतेरेवं स्वाभाविकत्वे विवेकवतामारोपमित्याज्ञाननिष्ठा सुप्रसिद्धेत्यु
॥ पसंहरन्निगदस्यात्मेति ॥ ५९ ॥

नन्वनाकारामेवानुमिमीमहे बुद्धिमिति वदतामनाकारमप्रत्यक्षमिच्छतां प्रागर्थावगतेरप्रसिद्धमेव ज्ञानं नेत्याह ॥ येषामिति ॥ सु
खादिवज्जिज्ञासानुभवगम्यं ज्ञानं नानुमेयं विषयावगत्या तदनुमितावितरेतराश्रयादिति भावः ॥ इतश्च ज्ञानं प्रसिद्धमन्यथा तत्र जि
ज्ञासाप्रसंगान्न च ज्ञाने जिज्ञासाऽप्रसिद्धे प्रसिद्धे च तदयोगादित्याह ॥ जिज्ञासेति ॥ तदेव प्रपंचयति ॥ अप्रसिद्धं चेदिति ॥ दृ
ष्टांतमेव व्याचष्टे ॥ यथेति ॥ घटादीति किं विवरणोति ॥ तथेति ॥ इष्टापत्तिं निराचष्टे ॥ न चेति ॥ ज्ञानस्य ज्ञानांतरेण ज्ञेयत्वमेतच्छब्दार्थः

येषामपि निराकारं ज्ञानमप्रत्यक्षं तेषामपि ज्ञानवशेनैव ज्ञेयावगतिरिति ज्ञानमत्यंतं प्रसिद्धं सुखदुःखादिवदेवा
भ्युपगंतव्यं ॥ जिज्ञासानुपपत्तेश्च ॥ अप्रसिद्धं चेत् ज्ञानं ज्ञेयवत् जिज्ञास्येत ॥ यथा ज्ञेयं घटादिलक्षणं ज्ञानेन ज्ञाता व्याप्तुमिच्छ
ति ॥ तथा ज्ञानमपि ज्ञानांतरेण ज्ञाता व्याप्तुमिच्छेन्न चैतदस्ति ॥ अतोऽत्यंतप्रसिद्धं ज्ञानं ज्ञाताप्यत एव प्रसिद्ध इति ॥
तस्मात् ज्ञाने यत्नो न कर्तव्यः किं त्वनात्मनि आत्मबुद्धिनिवृत्तावेव ॥ तस्मात् ज्ञाननिष्ठा सुसंपाद्या ॥ ९० ॥ श्रीरामः ॥

अनवस्थापत्तेरित्यर्थः ॥ ज्ञाने जिज्ञासानुपपत्तौ फलितमाह ॥ अत इति ॥ प्रसिद्धेऽपि ज्ञाने ज्ञातर्यात्मनि किमायातं तदाह ॥ ज्ञाताऽपीति ॥
ज्ञानस्य विनां ज्ञानांतरमपर्यवसानादित्यर्थः ज्ञानस्य प्रसिद्धत्वेन तत्र भावनापर्यायो विधिर्नास्तीत्याह ॥ तस्मादिति ॥ कुत्र तर्हि
प्रयत्नाख्या भावनेत्याशंक्याह ॥ किं त्विति ॥ अविषये निराकारे चात्मनि ज्ञाननिष्ठाया दुःसंपाद्यत्वाभावे फलितं निगमयति ॥
॥ तस्मादिति ॥

ब्रह्मज्ञानस्य परां निष्ठां प्रतिपादितामनंतरश्लोकांतरमवतारयितुं प्रस्तौति॥ सेयमिति॥ येयं ब्रह्मज्ञानस्य परा निष्ठा समारोपिताऽनंतकर्म
निवृत्तिद्वारा ब्रह्मणि परिसमाप्तिर्ज्ञानसंतानरूपोच्यते सा कार्या सुसंपाद्येत्ययुक्तं तत्कथं केनोपायेनेति प्रश्नार्थं परेष्टमुपायभेदमुदा
हरति॥ बुद्ध्येति॥ अध्यवसायो ब्रह्मात्मत्वनिश्चयः॥ मायारहितत्वं संशयविपर्ययशून्यत्वं॥ शब्दादिसमस्तविषयत्यागे देहस्थितिरपि
दुःस्था स्यादित्याशंक्याह॥ सामर्थ्यादिति॥ विषयमात्रत्यागे देहस्थित्यनुपपत्तेर्ज्ञाननिष्ठाया असिद्धिप्रसंगादित्यर्थः॥ देहस्थि०

सेयं ज्ञानस्य परा निष्ठोच्यते कथं कार्येति॥ बुद्ध्या विशुद्धया युक्तो धृत्यात्मानं नियम्य च॥ शब्दादीन्विषयांस्त्यक्त्वा रागद्वेषौ व्युदस्य
च॥५१॥ बुद्ध्याऽध्यवसायात्मिकया॥ विशुद्धया मायारहितया॥ युक्तः संपन्नो धृत्या धैर्येण आत्मानं कार्यकरणसंघातं नियम्य
व च नियमनं कृत्वा वशीकृत्य॥ शब्दादीन् शब्द आदिर्येषां ते शब्दादयस्तान् विषयांस्त्यक्त्वा सामर्थ्यान्न् शरीरस्थितिः मात्रान्॥
न केवलान्सुखानतोऽधिकान्सुखार्थान्विषयांस्त्यक्त्वेत्यर्थः शरीरस्थित्यर्थत्वेन प्राप्तेषु च रागद्वेषौ व्युदस्य च परित्यज्य॥ ततः॥ वि
विक्तसेवी लघ्वाशी यतवाक्कायमानसः॥ ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः॥५२॥ श्रीरामकृष्णायनमः॥ श्रीगुरु॥

त्यर्थत्वेनानुज्ञातेष्वर्थेषु प्राप्तं रागादि ज्ञाननिष्ठाप्रतिबंधकं व्युदस्येति॥ शरीरेति॥ परित्यज्येति विविक्तसेवीत्यादिना संबंधः॥
॥५१॥ बुद्धेर्वैशारद्यं यत्नेन कार्यकरणनियमनं देहस्थितिहेत्वतिरिक्तविषयत्यागो देहस्थित्यर्थे [illegible]पितेषु रागद्वेषवर्जनमि
त्युपादेयभेदे सिद्धेर्संत्युपायांतराण्यपि यत्नसाध्यानीत्याह॥ ननरेति॥ ॥५२॥ ५२॥ श्रीरामकृष्णायनमः॥ श्रीगुरुसमर्थः

व्य

चित्तैकाग्र्यप्रसादार्थं विविक्तसेवित्वं व्याकरोति॥अरण्येति॥निद्रादिदोषनिवृत्त्यर्थं लघ्वाशित्वं विशदयति॥लघ्विति॥लघु परिमितं हितं मे
ध्यं चाशितुं शीलमस्येति॥तथोच्यते॥विशेषणयोस्तात्पर्यं विवृणोति॥विविक्तेति॥निद्रादीत्यादिशब्दादालस्यप्रमादादयो बुद्धिविक्षेपका वि
वक्षिताः॥वक्ष्यमाणयोर्ध्यानयोगयोरुपायत्वेन विशेषणांतरं विभजते॥वागिति॥वागादिसंयमस्यावश्यकत्वद्योतनार्थं स्यादि

विविक्तसेवी अरण्यगिरिगुहादीन् विविक्तान् देशान् सेवितुं शीलमस्येति विविक्तसेवी॥लघ्वाशीति लघ्वशनशीलो विविक्तसे
वि लघ्वशनशीलयोर्निद्रादिदोषनिवर्तकत्वेन चित्तप्रसादहेतुत्वाद्ग्रहणं॥यतवाक्कायमानसो वाक्कायश्च मानसं च निय
तानि संयतानि यस्य ज्ञाननिष्ठस्य स ज्ञाननिष्ठो यतिर्यतवाक्कायमानसः स्यात्॥एवमुपरतसर्वकरणः सन् ध्यानयोग
परो ध्यानमात्मस्वरूपचिंतनं योग आत्मविषय एवैकाग्रीकरणं तौ ध्यानयोगौ परत्वेन कर्तव्यौ यस्य ध्यानयोगपरो नित्य
ग्रहणं मंत्रजपाद्यन्यकर्तव्याभावप्रदर्शनार्थं॥वैराग्यं विरागभावो दृष्टेषु विषयेषु वैतृष्ण्यं॥समुपाश्रितः सम्यगुपाश्रि
तः नित्यमेवेत्यर्थः॥५२॥ किंच॥अहंकारं बलं दर्पं कामं क्रोधं परिग्रहं॥विमुच्य निर्ममः शांतो ब्रह्मभूयाय कल्पते॥

त्युक्तं॥संयतवागादिकरणग्रामस्यानायासेन कर्तव्यमुपदिशति॥एवमिति॥मंत्रजपादीत्यादिशब्देन प्रदक्षिणप्रणामादयो ध्यानयो
गप्रतिबंधका गृहीताः॥उक्तयोरेव ध्यानयोगयोरुपायत्वेनोक्तं विरागभावं विभजते॥दृष्टेति॥सम्यक्त्वमेव व्यनक्ति॥नित्यमि
॥ति॥५२॥ज्ञाननिष्ठस्य यतेर्विशेषणांतरं समुच्चिनोति॥किंचेति॥५२॥

श्री॰भ॰गी॰
२४०॥
ता

निरं[illegible]ध्यानयोगपरत्वे समुद्धितं कारणांतरं विवृणोति॥ अहंकरणमिति॥ सामर्थ्यमात्रे बलशब्दादुपलभ्यमाने किमिति विशे
षवचनमित्याशंक्याह॥ स्वाभाविकत्वेनेति॥ उक्ते दर्पे मानमाह॥ हृष्टेरिति॥ वैराग्यशब्देन लब्धस्यापि कामत्यागस्य पुनर्वच
नं प्रकृतैर्व्याख्यानार्थं॥ अहंकारादित्यागात्परिग्रहत्यागस्य भावान्न त्यागोक्तिरयुक्तेत्याशंक्याह॥ इंद्रियेति॥ परिग्रहाभावे म
मत्वविषयाभावान्निर्ममत्वं कथमित्याशंक्याह॥ देहेति॥ अहंकारममकारयोरभावे प्रशामंत[illegible]कारणोपरतिमनुवदति॥

अहंकारं अहंकरणमहंकारो देहादिषु तं बलं सामर्थ्यं कामरागादियुक्तं नेतरच्छरीरादिसामर्थ्यं॥ स्वाभाविकत्वेन त्या
गस्याशक्यत्वात् दर्पं हर्षानंतरभाविधर्मातिक्रमहेतुं हृष्टो दृप्यति दृप्तो धर्ममतिक्रामतीति स्मरणात् तं च काममिच्छां
च क्रोधं च द्वेषं च परिग्रहमिंद्रियमनोगतदोषपरित्यागेपि शरीरधारणप्रसंगेन धर्मानुष्ठाननिमित्तेन वा बाह्यपरि
ग्रहः प्राप्तस्तं च विमुच्य परित्यज्य परमहंसपरिव्राजको भूत्वा देहजीवनमात्रेपि निर्गतो ममभावो निर्ममोऽत एव
शांत उपरतः हर्षोयः संहृतकरणः सोयं ज्ञाननिष्ठो ब्रह्मभूयाय ब्रह्मभवनाय कल्पते समर्थो भवति॥ अनेन क्रमेण

ने
अ॰१८॥
२४०॥
रामः॥
मं

अत एवेति॥ उक्तमनुद्य जीवन्नेवासौ ब्रह्मीभवतीति फलितमाह॥ घट्टसंहृते निःशाननिष्पदाद्धर्ध्वंसशब्दो द्रष्टव्यः॥ ब्रह्मणो भवन
मनुसंधानपरिपाकपर्यंतं साक्षात्करणं तदर्थमितियावत्॥५३॥ अपेक्षितं॥ स्मरयन्नत्तरश्लोकमवतारयति॥ अनेनेति॥ बुद्ध्या विशुद्ध
येत्यादिरत्र क्रमः॥ ब्रह्मप्राप्तो जीवन्नेव निवृत्ताशेषानर्थो निरतिशयानंदं ब्रह्मात्मत्वेवानुभवन्नित्यर्थः॥ अध्यात्मप्रसगात्मान
स्मिन्प्रसादः सर्वानर्थनिवृत्त्या परमानंदाविर्भावः स लब्धो येन जीवन्मुक्तेन स तथा॥५४॥ श्रीरामकृष्णायनमः॥ श्रीरामः
न

र

५५

दे नशोचतीत्युक्तात्यर्थमाह॥ ब्रह्मभूतस्येति॥ प्राप्तस्याप्यपरिहार्याभावनिश्चयादित्यर्थः॥ स्वभावानुहंमुपपादयति॥ नहीतिनस्याप्राप्तवि-
षयाभावात्॥ नापि परिहार्यापरिहारप्रयुक्तः शोकः परिहार्यस्यैवाभावादित्यर्थः॥ पाठांतरे तु रमणीयं प्राप्य न प्रमोदते न दभावा-
दित्यर्थः॥ विवक्षितं समदर्शनं विशदयति॥ आत्मेति॥ ननु सर्वेषु भूतेष्वात्मनः समस्य निर्विशेषस्य दर्शनमात्रमभिप्रेतं किं

ब्रह्मभूतः प्रसन्नात्मा न शोचति न कांक्षति। समः सर्वेषु भूतेषु मद्भक्तिं लभते परां॥५४॥ ब्रह्मभूतो ब्रह्म प्राप्तः प्रस-
न्नात्मा लब्धाध्यात्मप्रसादस्वभावो न शोचति न किंचिदर्थवैकल्ये आत्मनो वा वैगुण्यं चोद्दिश्य न शोचति न संतप्यते॥ न
कांक्षति न च प्राप्तविषयाकांक्षा ब्रह्मविद उपपद्यते ऽतो ब्रह्मभूतस्यायं स्वभावोऽनूद्यते न शोचति न कांक्षतीति न हृष्य- नं
तीति वा पाठः॥ समः सर्वेषु भूतेषु॥ आत्मौपम्येन सर्वेषु भूतेषु सुखं दुःखं वा सममेव पश्यतीत्यर्थः॥ नात्मसमद-
र्शनमिह तस्य वक्ष्यमाणत्वात् तत्त्वमात्मानमभिजानातीति च॥ य एवंभूतो ब्रह्मज्ञाननिष्ठो भवति स मयि परमेश्वरे भक्तिं भ-
जनं परामुत्तमां ज्ञानलक्षणां चतुर्थीं लभते॥ चतुर्विधा भजंते मामित्युक्तं॥५४॥ श्रीरामकृष्णायनमः॥५॥०॥

नेष्यते तत्राह॥ नात्मेति॥ उक्तविशेषणवतो जीवन्मुक्तस्य ज्ञाननिष्ठा प्रागुक्तक्रमेण प्राप्तासु प्रतिष्ठा भवतीत्याह॥ य एवंभूत इति
श्रवणमननिदिध्यासनाभ्यासवतः॥ शमादियुक्तस्याभ्यस्तैः श्रवणादिभिर्ब्रह्मात्मैक्यपरोक्षं मोक्षफलं ज्ञानं सिध्यतीत्यर्थः॥ आ- रो
र्तादिभक्तित्रयापेक्षया ज्ञानलक्षणं भक्तिश्चतुर्थीत्युक्ता न त्वसामनमिकं वाक्यमनुकूलयति॥ चतुर्विधा इति॥५४॥५४॥ रामः

भा०टी०
१८॥

ननुसमाधिसाध्येनपरभक्त्यात्मकेनज्ञानेनकिमपूर्वमवाप्यतेतत्राह ॥ ततइति ॥ भक्त्यासमाधिजन्ययामांब्रह्माभिमुख्येनप्रसक्त
यावन्नानात्यभिव्याप्नोतीत्यर्थः ॥ तदेवज्ञानभक्तिपराधीनंविवृणोति ॥ यावानिति ॥ आकाशकल्पत्वमनवच्छिन्नत्वमसंगत्वं
चचैतन्यस्यविषयसापेक्षत्वंप्रतिक्षिपति ॥ अद्वैतेति ॥ यत्तुद्रव्यबोधात्मत्वमात्मनोमन्यंतेतान्प्रत्युक्तं ॥ मात्रेति ॥ आत्म

- ततोज्ञानलक्षणया ॥ भक्त्यामामभिजानातियावान्यश्चास्मितत्वतः ॥ ततोमांतत्वतोज्ञात्वाविशतेतद
नंतरं ॥ ५५ ॥ भक्त्यामामभिजानातिभक्तिरंतःकरणेनभजनंसेवनंयावानहंउपाधिकृतविस्तारभेदैर्यश्चा
स्म्यहंविध्वस्तसर्वोपाधिभेदउत्तमःपुरुषआकाशकल्पस्तंमामद्वैतंचैतन्यमात्रैकरसमजमजरममरमभय
मनिधनंतत्वतोऽभिजानातिततोमामेवंतत्वतोज्ञात्वाविशतेतदनंतरंमामेव ॥ नात्रज्ञानानंतरंप्रवेश
॥ क्रियेयभिन्नेविवक्षितेविशतेतदनंतरमिति ॥ ५५ ॥ श्रीराम ॥

लो० देवि२

अ०१८॥
२४१॥
राम:॥

नित्यमात्रेपिधर्मान्तरमुपेत्यधर्मधर्मित्वंप्रत्याह ॥ एकरसमिति ॥ सर्वविक्रियाराहित्येनास्याकौटस्थ्यमात्मनोव्यवस्थापयति ॥
अजमिति ॥ उक्तविक्रियाभावेनदेहत्वज्ञानासंबंधंहेतुमाह ॥ अभयमितितत्वज्ञानमत्रघनतत्फलंविदेह ॥ कैवल्यंलंभयति ॥
तनंतरइति ॥ तत्वज्ञानस्यतस्मादनंतरंप्रवेशक्रियायाश्चभिन्नत्वंप्राप्तंप्रत्याह ॥ नात्रेति ॥ ५५ ॥ श्रीरामचंद्रायनमः ॥

भिन्नत्वाभावे का गतिर्भेदोक्तेरित्याशंक्यौपचारिकत्वमाह॥ किंतर्हीति॥ प्रवेशादिति शेषः ब्रह्मप्राप्तिरेव फलं तां न रमित्याशंक्य ब्रह्मात्म
नोर्भेदाभावात्तज्ज्ञानातिरिक्ता न तत्प्राप्तिरित्याह॥ क्षेत्रज्ञं चेति॥ ज्ञाननिष्ठया परया भक्त्या मामभिजानातीत्युक्तमाक्षिपति॥
नन्विति॥ विरुद्धत्वं स्फोरयितुं पृच्छति॥ कथमिति॥ विरोधस्फुटीकरणं प्रतिजानीते॥ उच्यत इति॥ न तज्ज्ञानस्योत्पत्तिरेव वि

किंतर्हि फलं न राभावात्ज्ञानमात्रमेव॥ क्षेत्रज्ञं चापि मां विद्धीत्युक्तत्वात्॥ ननु विरुद्धमिदमुक्तं ज्ञानस्य या परा
निष्ठा तया मामभिजानातीति॥ कथं विरुद्धमिति चेत्॥ उच्यते॥ यदैव यस्मिन् विषये ज्ञानमुत्पद्यते ज्ञातुस्तदैव तं विष
यमभिजानाति विज्ञातेति॥ न ज्ञाननिष्ठां ज्ञानावृत्तिलक्षणामपेक्षत इति॥ अतश्च ज्ञानेन नाभिजानाति ज्ञानावृत्त्या तु॥
ज्ञाननिष्ठयाभिजानातीति॥ नैष दोषः ज्ञानस्य स्वात्मोत्पत्तिपरिपाकहेतुयुक्तस्य प्रतिपक्षविहीनस्य यदात्मानुभ
वनिश्चयावसानत्वं तस्य निष्ठाशब्दाभिलापात्॥५५॥

षयाभिव्यक्तिरित्याह॥ यदेति॥ एवकारनिरस्यं दर्शयति॥ न ज्ञानेति॥ इत्यावयोः सिद्धमिति शेषः॥ ज्ञानस्यो[illegible]नसत्तेरेव
विषयाभिव्यक्तित्वेपि कथं प्रकृते विरोधधीरित्याशंक्याह॥ अतश्चेति॥ विरुद्धमिति शेषः॥ शङ्कितं विरोधं निरस्यति॥ नैष
॥ इति॥५५॥

गी॰भा॰टी॰
७८
।१।
श्री
कृ

उक्तमेवहेतुं प्रपंचयति ॥ शास्त्रेति ॥ यो हि शास्त्रानुसार्याचार्योपदेशस्तेन ज्ञानोत्पत्तिराचार्यवान्पुरुषो वेदेति श्रुतेस्तस्याश्च परि
पाकः ॥ संध्यादिमलिबंधप्रध्वंसस्तत्र हेतुभूतमुपदेशस्यैव सहकारिकारणं यद्बुद्धिशुद्ध्यादि तदपेक्ष्य तस्मादेवोपदेशाज्जनितं
परैस्य ज्ञानं तस्य कारभेदबुद्धिनिबंधनानि यानि सर्वाणि कर्माणि तेषां संन्यासेन सहितस्य फलरूपे स्वात्मन्येव कर्तृत्वाना
रहिते यदवस्थानं सा ज्ञानस्य परा निष्ठेति व्यवह्रियते प्रामाणिकैरित्यर्थः ॥ यद्यपि यथोक्ता परा ज्ञाननिष्ठा कथं तर्हि सा च चतुर्थी

शास्त्राचार्योपदेशेन ज्ञानोत्पत्तिपरिपाकहेतुं सहकारिकारणं बुद्धिविशुद्धत्वामानित्वादिगुणादिं चापेक्ष्य जनितस्य क्षेत्र
ज्ञपरमात्मैकत्वज्ञानस्य कर्त्रादिकारकभेदबुद्धिनिबंधनसर्वकर्मसंन्याससहितस्य स्वात्मानुभवनिश्चयरूपेण यदवस्था
नं सा परा ज्ञाननिष्ठेत्युच्यते ॥ सेयं ज्ञाननिष्ठा आर्त्तादिभक्तित्रयापेक्षया परा चतुर्थी भक्तिरित्युक्ता ॥ तयानत्परया भ
क्त्या भगवंतं तत्त्वतोऽभिजानाति ॥ यदनंतरमेवेश्वरक्षेत्रज्ञभेदबुद्धिरशेषतो निवर्तते अतो ज्ञाननिष्ठालक्षणया भ
॥ क्त्या मामभिजानातीति वचनं न विरुध्यते ॥ ५५ ॥

आ॰ १८।
३५२।
राम॥

भक्तिरित्युक्तेत्यत्राह ॥ सेयमिति ॥ यथोक्तया भक्त्या भगवत्तत्त्वज्ञानं सिद्ध्यतीत्याह ॥ तयेति ॥ तत्त्वज्ञानस्य फलमाह ॥ यदनंत
रमिति ॥ ज्ञाननिष्ठारूपाया भगवद्भक्तेस्तत्त्वज्ञानानंतरकालत्वात्फलस्य चाज्ञाननिवृत्तेस्तस्मात्तत्त्वान्देहोक्तेश्चौपचारिकत्वा
त्सक्तं वा क्रमाविरुद्धमित्युपसंहरति ॥ अनंतरमिति ॥ ५५ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ०

औपदेशिके क्य ज्ञानस्य सर्वकर्मसंन्याससहितस्य स्वरूपावस्थानात्मकस्य परमपुरुषार्थोपयिकत्वमित्यस्मिन्नर्थे
मानमाह॥ अत्र चेति॥ तदेव शास्त्रमुसाहरति॥ विदित्वेत्यादिना॥ दर्शितानि वाक्यानि सर्वकर्माणि मनसेत्यादीनि॥ ननु ए
षां वाक्यानामविवक्षितार्थत्वान्नास्ति स्वार्थे प्रामाण्यमित्याशंक्याध्ययनविध्युपातत्वाद्वेदवाक्यानां तदनुरोधित्वाच्चैतदेषां

अत्र च सर्वनिवृत्तिविधायकं शास्त्रं वेदांतेतिहासपुराणस्मृतिलक्षणं न्यायप्रसिद्धमर्थवद्भवति॥ ॥
विदित्वा व्युत्थायाथ भिक्षाचर्यं चरंति।तस्मान्न्यासमेषां तपसामतिरिक्तमाहुः॥ न्यास एवासरेचयदिति संन्या
सः॥ कर्मणां न्यासो वेदविनाशिनमिमं लोकममुं च परित्यज्य त्यज धर्ममधर्मं चेत्यादिइह च दर्शितानि न चैते
षां वाक्यानामानर्थक्यं युक्तं॥ न चार्थवादत्वं स्वप्रकरणस्थत्वात्॥ प्रत्यगात्माऽविक्रियस्वरूपनिष्ठत्वाद्ध मोक्षस्य॥ नहि
पूर्वसमुद्रं जिगमिषोः प्रातिलोम्येन प्रत्यक्समुद्रं जिगमिषुणा समानमार्गत्वं संभवति॥ प्रत्यगात्मविषयप्रत्यय
संतानकरणाभिनिवेशश्च ज्ञाननिष्ठा सा च प्रत्यक्समुद्रगमनवत्कर्मणा सहभावित्वेन विरुध्यते॥ ॥ ॥ ॥

मेवमित्याह॥ न चेति॥ तथापि सोऽरोदीदित्यादिवन्न स्वार्थे मानतेत्याशंक्याह॥ न चार्थवादत्वमिति॥ इतश्चमुक्षोरपेक्षितमोक्षो मु
पयिके ज्ञाननिष्ठस्य संन्यासेऽधिकारो न कर्मनिष्ठायामित्याह॥ प्रत्यगिति॥ ज्ञाननिष्ठस्य कर्मनिष्ठाविरुद्धेत्येतत्सदृष्टांत
माह॥ नहीति॥ ज्ञाननिष्ठास्वरूपानुवादपूर्वकं कर्मनिष्ठया तस्याः सहभावित्वं विरुद्धमिति दार्ष्टांतिकमाह॥ प्रत्यगात्मेति॥ ५८॥

कथं ज्ञानकर्मणोर्विरोधधीरित्याशंक्य कर्मणां ज्ञाननिवर्त्यत्वस्य श्रुतिस्मृतिसिद्धत्वादित्याह॥पर्वतेति॥अंतरवानुभयो
रेकधर्मिनिष्ठत्वेन सांकर्याभावसंपादकभेदवानित्यर्थः॥ज्ञानकर्मणोरसमुच्चये फलितमुपसंहरति॥तस्मादिति॥५५॥
तर्हि ज्ञाननिष्ठयैव मोक्षसंभवान्न कर्मानुष्ठानसिद्धिरित्याशंक्याह॥स्वकर्मणेति॥तामेव सिद्धिं प्राप्तिं विशिनष्टि॥ज्ञानेति॥
ज्ञाननिष्ठायोग्यतायै स्वकर्मानुष्ठानं भगवदनुरूपं कर्तव्यमित्यर्थः॥ज्ञाननिष्ठायोग्यतापि किमर्थेत्याशंक्य ज्ञाननिष्ठासि

पर्वतसर्षपयोरिवांतरवान्विरोधः प्रमाणविदां निश्चितः तस्मात्सर्वकर्मसंन्यासेनैव ज्ञाननिष्ठा कार्येति सिद्धं॥
॥स्वकर्मणा भगवतोऽभ्यर्चनं भक्तियोगस्य सिद्धिः प्राप्तिः फलं॥ज्ञाननिष्ठायोग्यता यन्निमित्ता ज्ञाननिष्ठा मोक्ष
फलावसाना स भगवद्भक्तियोगोऽधुना स्तूयते॥शास्त्रार्थोपसंहारप्रकरणे शास्त्रार्थनिश्चयदार्ढ्याय॥
सर्वकर्माण्यपि सदा कुर्वाणो मद्व्यपाश्रयः॥मत्प्रसादादवाप्नोति शाश्वतं पदमव्ययं॥५६॥

ध्यर्थेत्याह॥यन्निमित्तेति॥ज्ञाननिष्ठापि कुत्रोपयुक्तेत्याशंक्याह॥मोक्षेति॥स्वकर्मणा भगवदर्चनात्मनो भक्तियोगस्य परं
परया मोक्षफलस्य कार्यत्वेन विध्येयत्वे विध्यपेक्षितां स्तुतिमवतारयति॥स भगवदिति॥ज्ञाननिष्ठाकर्मनिष्ठे उभ
यं प्रतिज्ञाय तत्र तत्र विभागेन प्रतिपादितं॥किमितीदानीं कर्मनिष्ठा पुनः स्तुत्या कर्तव्यत्वेनोच्यते तत्रा॥शास्त्रार्थेति॥
तत्र तत्रोक्तस्यैव कर्मानुष्ठानस्य प्रकरणवशादिहोपसंहारः॥स च शास्त्रार्थनिश्चयस्य दृढतां द्योतयतीत्यर्थः॥

यद्यपि कस्यचित् कर्मानुष्ठायिनो बुधिशुद्धिद्वारा कैवल्यं सिध्यति तथापि पापबाहुल्यात्कर्मानुष्ठायिनोपि कस्यचिद्बुधिशुध्यभावेन
कैवल्यासिद्धिरित्याशंक्याह सर्वकर्माणीति सर्वज्ञाद्यनुरोधादीश्वराराधनस्तुतिपरत्वेन श्लोकं व्याचष्टे प्रतिषिद्धान्यपीति ।। नि
त्यनैमित्तिकवदित्यपरेर्थः निषिद्धाचरणस्य प्रामादिकत्वं आवर्तयति सदेति अनुतिष्ठन्वैष्णवं पदमाप्नोतीति संबंधः ।। पापकर्म
कारिणो यथोक्तफलप्राप्तौ पापस्यापि मोक्षफलत्वमुपगंतव्यं स्यादित्याशंक्याह मद्व्यपाश्रय इति तस्यैव तात्पर्यमाह ।।

।। सर्वकर्माण्यपि प्रतिषिद्धान्यपि सदा कुर्वाणोऽनुतिष्ठन् मद्व्यपाश्रयोऽहं वासुदेव ईश्वरो व्यपाश्रयो यस्य स मद्व्यपाश्र ।। स
।। यो मय्यर्पितसर्वात्मभाव इत्यर्थः ।। सोपि मत्प्रसादान्ममेश्वरस्य प्रसादादवाप्नोति शाश्वतं वैष्णवं पदं अव्ययं यस्मादेवं ।।
।। चेतसा सर्वकर्माणि मयि संन्यस्य मत्परः ।। बुधियोगमुपाश्रित्य मच्चित्तः सततं भव ।। ५७ ।। चेतसा विवेकबुध्या सर्वकर्मा ।।
।। णि दृष्टादृष्टार्थानि मयीश्वरे संन्यस्य यत्करोषि यदश्नासीत्युक्तन्यायेन मत्परोहं वासुदेवः परो यस्य तव स त्वं ।।
बुद्धित्वं ।। मत्परः सन् बुधियोगं मयि समाहितबुद्धियोगस्त्वं समाहितबुधियोगं अपाश्रित्य अपाश्रयः ।। छ ।।

मयीति तर्हि ज्ञानेन मोक्षहेतुत्वमुपेक्षितमित्याशंक्य आह सोपीति प्रसादोनुग्रहः सम्यक्ज्ञानोदयः पदम् पद
पदनीयम् उपनिषत्तात्पर्यगम्यम् ।। अव्ययम् अपक्षयरहितम् ।। ५६ ।। परमेश्वरप्रसादस्य एवं वा माहात्म्यं ।।
अतः सिद्धम् अतः तत्प्रसादार्थं भवता प्रयतितव्यमित्यतः आह यस्मादिति भगवत्प्रसादात् आ
साहित सम्यक्ज्ञानादेव मुक्तिर्न कर्ममात्रादिति ज्ञानम् विवेकबुधिः ।। छ ।। श्रीगोपीजनमनोरथकृते नमः ।। छ

गी०टी० ८१०

आश्रयफलं दार्थमाह अनन्येति ५७ किमतो भगवन्नित आह मच्चित्त इति भोस्तापि प्रवर्तते इति मन्वानो विपक्षे दोषमाह अथचेदिति ५८

॥अनन्यकारणत्वं मच्चित्तो मय्येव चित्तं यस्य तव स त्वं मच्चित्तः सततं सर्वदा भव मच्चित्तः सर्वदुर्गाणि ~~तरिष्यसि~~ मत्प्रसा
दात् तरिष्यसि॥ अथ चेत्त्वमहंकारान्न श्रोष्यसि विनंक्ष्यसि॥५८॥ मच्चित्तः सर्वदुर्गाणि सर्वाणि दुर्गाणि दुस्तराणि सं
सारहेतुजातानि मत्प्रसादात्तरिष्यसि अतिक्रमिष्यसि अथ चेद्यदि त्वं मदुक्तमहंकारात्पंडितोहमिति न श्रोष्यसि न ग्र
हिष्यसि ततस्त्वं विनंक्ष्यसि विनाशं गमिष्यसि॥ इदं च त्वया न मंतव्यं स्वतंत्रोहं किमर्थं परोक्तं करिष्यामीति यदहंका
रमाश्रित्य न योत्स्य इति मन्यसे मिथ्यैव व्यवसायस्ते प्रकृतिस्त्वां नियोक्ष्यसि ५९ यच्चेत्त्वमहंकारमाश्रित्य न यो
त्स्य इति युद्धं न करिष्यामि इति मंन्यसे चिंतयसि निश्चयं करिष्यसि मिथ्यैव व्यवसायो निश्चयस्ते तव यस्मात्प्रकृतिः॥ व
क्षत्रियस्वभावः त्वां नियोक्ष्यति यस्माच्च स्वभावजेन कौंतेय निबद्धः स्वेन कर्मणा कर्तुं नेच्छसि यन्मोहात्करि
ष्यस्यवशोपि तत्॥ स्वभावजेन क्षात्रेण शौर्यादिना यथोक्तेन कौंतेय निबद्धो निश्चयेन बद्धः स्वेनात्मीयेन कर्मणा कर्तुं
नेच्छसि यत्कर्म मोहादविवेकतः करिष्यस्यवशोपि परवश एव सन् तत् कर्म॥ श्रीसीतारामाभ्यान्नमः छ

आ०१८॥
३२४॥
राम॥

स्वातंत्र्याभिमानेन भीतेरवकाशो नास्तीत्याशंक्याह इदं चेति ५९ इतश्च त्वया युद्धान्निवृत्त्य स्वं कर्तुमुचितमित्याह यस्माच्चेति स्वभावजेन स्वेन कर्मणा निबद्धस्त्वमिति संबंधः॥६०॥

७ मायावीपुरुषोऽमायामाति तथेश्वरः सर्वभूतानि ७

१ दूतोपित्वया युद्धं कर्तव्यमेवेत्यत आह यस्मादिति अर्जुनशब्दस्योक्तार्थत्वे श्रुतिमुदाहरति अहश्चेति अहश्च कृष्णमहरर्जुनं च विवर्तेते रजसी वेद्याभिरित्यत्र किंचिदहस्तावत्कृष्णमवच्छं कलुषितमिव लक्ष्यते किंचित्तु नरिहरर्जुनमतिस्वच्छं शुद्धस्वभावमुपलभ्यते एवमर्जुनशब्दपर्यालतया प्रयोगदर्शनादुक्तार्थवत्त्वमुचितमित्यर्थः यंत्रारूढानीवेति कथमुच्यते तत्रा

यस्मात् ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति॥ भ्रामयन्सर्वभूतानि यंत्रारूढानि मायया॥ ६१॥ ईश्वरः ईशनशीलो नारायणः सर्वभूतानां सर्वप्राणिनां हृद्देशे ऽर्जुन शुक्लांतरात्मस्वभाव विशुद्धांतःकरण इति अहश्च कृष्णमहरर्जुनं चेति दर्शनात् तिष्ठति स्थितिं लभते स कथं तिष्ठतीत्यत आह॥ भ्रामयन् भ्रमणं कारयन् सर्वभूतानि यंत्रारूढानि यंत्राण्यारूढानि अधिष्ठितानि इवेति इवशब्दोऽत्र द्रष्टव्यः॥ यथारूढं कृत्रिमपुरुषादीनि यंत्रारूढानि मायया छद्मना भ्रामयन् [illegible] तिष्ठतीति संबंधः॥ तमेव शरणं गच्छ सर्वभावेन भारत॥ तत्प्रसादात्परां शांतिं स्थानं प्राप्स्यसि शाश्वतं॥ ६२॥ तमेवेश्वरमेव शरणमाश्रयं संसारार्तिहरणार्थं गच्छ आश्रय॥ सर्वभावेन सर्वात्मना हे भारत भरतान्वय ततस्तत्प्रसादात् ईश्वरानुग्रहात् परां प्रकृष्टां शांतिं परामुपरतिं स्थानं च मम विष्णोः परमं पदमवाप्स्यसि शाश्वतं नित्यम् ७

ह इवशब्ददिति तदेव प्रपंचयति यंत्रेति दारुमयानि यंत्राणि यथा लोके कश्चिन्मायावी मायया भ्रामयन्वर्तते तथा ईश्वरोऽपि सर्वाणि भूतानि भ्रामयन्नेव हृदये तिष्ठतीत्यर्थः॥ ६१॥ ईश्वरः सर्वाणि भूतानि प्रेरयति चेत् आशं कैवल्यार्थस्यापि पुरुषकारस्यानर्थक्यमित्याशंक्याह तमेवेति सर्वात्मना मनोवृत्त्या वाचा कर्मणा चेत्यर्थः॥ ईश्वरस्यानुग्रहात्तज्ज्ञानोत्पत्तिपर्यंतादिति शेषः मुक्तात्मविश्रांतिस्थानं॥ ६२॥

भ॰गी॰भा॰टी॰ सं॰
३४५॥

शास्त्रमुपसंहर्तुमिच्छन्नाह इतितिज्ञानमिति ज्ञानं करणव्युत्पत्त्या गीताशास्त्रं यथेच्छसि तथाकुरु ज्ञानं कर्म वा यदिष्टं तदनु
तिष्ठ सर्वथः॥ ६३॥ गीताशास्त्रस्य पौर्वापर्येण विमर्शनद्वारेण तात्पर्यार्थं प्रतिपत्तुमसमर्थं प्रत्याह॥ भूयोपीति॥ किमर्थं पुनः पुनरभि

नं
म२

॥इति ते ज्ञानमाख्यातं गुह्याद्गुह्यतरं मया॥ विमृश्यैतदशेषेण यथेच्छसि तथा कुरु॥ ६३॥ इत्येतत्तुभ्यं ज्ञानमाख्या
तं कथितं॥ गुह्यात् गोप्यात् गुह्यतरमतिशयेन गुह्यं रहस्यमिति सर्वः॥ मया सर्वज्ञेन ईश्वरेण विमृश्य विमर्शनमालो
चनं कृत्वा एतद्यथोक्तं शास्त्रमशेषेण समस्तं यथोक्तं चार्थजातं यथेच्छसि तथा कुरु॥ ६३॥ तथा भूयोपि मयोच्यमा
नं शृणु॥ सर्वगुह्यतमं भूयः शृणु मे परमं वचः इष्टोसि मे दृढमिति ततो वक्ष्यामि ते हितं॥ ६४॥ सर्वगुह्यतमं सर्वगु
ह्येभ्योत्यंतरहस्यमुक्तमपि असकृद्भूयः पुनः शृणु मे मम परमं प्रकृष्टं वचो वाक्यं॥ न भयान्नाप्यर्थकारणाद्वा
वक्ष्यामि किं तर्हि इष्टः प्रियोसि मे मम दृढमव्यभिचारेणेति कृत्वा ततस्तेन कारणेन वक्ष्यामि कथयिष्यामि॥
ते तव हितं परं ज्ञानं प्राप्तिसाधनं तद्धि सर्वहितानां हिततमं ॥किं तदित्याह मन्मना भव मद्भक्तो मद्या
जी मां नमस्कुरु॥ मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोसि मे॥ ६५॥ मन्मना भव मच्चित्तो भव मद्भक्तो भ
व मद्भजनशीलो भव मद्याजी मद्यजनशीलो भव मां नमस्कुरु नमस्कारमपि ममैव कुरु॥ ६५॥

अ॰१८॥
३४५॥
रामः॥

[illegible]दधासीत्याशंक्याह॥ न भयादिति॥ हितमिति साधारणनिर्देशो कथं परमित्यादि विशेषणमि
[illegible]त्याशंक्याह तद्धीति तदेव प्रश्नद्वारा विवृणोति किं तदित्यादिना॥ श्री॥ श्रीराधाकृष्णाभ्यां नमः॥ छ

उत्तरार्द्धं व्याचष्टे॥ तत्रेति॥ एवमुक्तप्रारित्या वर्तमानस्त्वं तस्मिन्नेव वासुदेवे भगवत्समर्पितसर्वभावो मामेवागमिष्यसीति संबंधः॥ सत्यप्रतिज्ञाकरणे हेतुमाह॥ यत इति॥ इदानीं वाक्यार्थं श्रेयोर्थिनां परमसुपयोगित्वेन संगृह्णाति॥ एवमिति॥ ६५॥ एतमनूद्यानंतरश्लो

तत्रैवं वर्तमानो वासुदेव एव सर्वसमर्पितसाध्यसाधनप्रयोजनो मामेवैष्यसि आगमिष्यसि॥ सत्यत्वं ते वै प्रतिजाने सत्यां
प्रतिज्ञां करोमि एतस्मिन्वस्तुनीत्यर्थः॥ यतः प्रियोसि मे॥ एवं भगवतः सत्यप्रतिज्ञत्वं बुध्वा भगवद्भक्तेरवश्यंभाविमो त
क्षफलमवधार्य भगवच्छरणैकपरायणो भवेदिति वाक्यार्थः॥ सर्वकर्मयोगनिष्ठायाः परमं रहस्यमीश्वैपरायणता
मुपसंहृत्याथेदानीं कर्मयोगनिष्ठायाः फलं सम्यग्दर्शनं सर्ववेदांतविहितं वक्तव्यमित्याह॥ छ॥ सर्वधर्मान्परित्यज्य र
मो०५ मामेकं शरणं व्रज॥ अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः॥ ६६॥ सर्वधर्मान् सर्वे च ते धर्माश्चेति सर्वधर्माः तान्स
र्वधर्मान्॥ धर्मशब्देनात्राधर्मोपि गृह्यते नैःष्कर्म्यस्य विवक्षितत्वात्॥ नाविरतो दुश्चरितात्॥ त्यजधर्ममधर्मं चे
त्यादिश्रुतिस्मृतिभ्यः॥ सर्वधर्मान्परित्यज्य संन्यस्य सर्वकर्माणीत्येतत्॥ मामेकं सर्वात्मानं समं सर्वभूतस्थं ईश्व
रमच्युतं गु जन्मजरामरणवर्जितं वासुदेवं ईशामहमेवेत्येवमेकं शरणं व्रज॥ न मत्तोऽन्यदस्तीत्यवधारयेत्यर्थः॥ छ॥

कनासर्यमाह॥ कर्मयोगेति॥ धर्मविशेषणादधर्मानुज्ञां वारयति॥ धर्मेति॥ ज्ञाननिष्ठेन मुमुक्षुणा धर्मयोस्त्याज्यत्वे श्रु धर्मा
तिस्मृतीरुदाहरति॥ नाविरत इति॥ मामेकं इत्यादेस्तात्पर्यार्थमाह॥ न मत्तोन्यदिति॥ छ॥ श्रीरामकृष्णायनमः॥ छ॥

गी०भा०टी०
३४६॥

ऽर्जुनस्य क्षत्रियत्वाद्युक्तसंन्यासद्वारा ज्ञाननिष्ठायां मुख्यानधिकारेऽपि तं पुरस्कृत्य स अधिकारी भवत्वस्योपदिदिक्षितत्वाद् विरोधमभिप्रेसाः ॥ अहं त्वेति ॥ उक्तेऽर्थे हार्दिकं वाक्यमनुकूलयति ॥ उक्तं चेति ॥ ईश्वरस्य तदीयबंधननिरसनद्वारा स्वस्यात्मयितृत्वान्नेशोकावकाशोऽस्तीत्याह ॥ अत इति ॥ पूर्वापरालोचनात्तो गीताशास्त्रं व्याख्यायोपसंहरन्तात्पर्यार्थं निर्धारितमपि विचारद्वारा निर्धारयितुं विचारमवतारयति ॥ अस्मिन्निति ॥ किंशब्दार्थमेव त्रेधा विभजते ॥ ज्ञानमिति ॥ निमित्ताभावे संशय

अहं त्वामेवं निश्चितबुद्धिं सर्वपापेभ्यः सर्वधर्माधर्मबंधनरूपेभ्यो मोक्षयिष्यामीति स्वात्मभावप्रकाशीकरणेन ॥ उक्तं च नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वतेति ॥ अतो मा शुचः शोकं मा कार्षीरित्यर्थः ॥ अस्मिन् गीताशास्त्रे परमं निःश्रेयससाधनं निश्चितं किं ॥ ज्ञानं किंवा कर्म आहोस्विदुभयमिति ॥ कुतः संशयः ॥ यत्ज्ञात्वामृतमश्नुते ततो मां तत्त्वतो ज्ञात्वा विशते तदनंतरं इत्यादीनि वाक्यानि कर्मणां अवश्यकर्तव्यतां दर्शयंति ॥ एवं ज्ञानकर्मणोः कर्त्तव्यतोपदेशात् स्वतंत्रात् ज्ञानान्निःश्रेयसप्राप्तिं दर्शयंति ॥ कर्मण्येवाधिकारस्ते [illegible] कुरु कर्मैव तस्मादीनि वाक्यानि क+समुच्चितयोरपि निःश्रेयसहेतुत्वं स्यात् ॥ इति भवेत्संशयः कस्यचित् ॥ ६६ ॥ श्रीरामचंद्राय नमः ॥

उ-गा१८॥
३४६॥
रामः॥

स्याभासत्वान्न निरस्यत इति मत्वा पृच्छति ॥ कुत इति ॥ तत्तदर्थाववोधकानेकवाक्यदर्शनं तन्निमित्तमित्याह ॥ यज्ज्ञात्वेति ॥ कर्मणामवश्यकर्तव्यतोपलंभात्तेभ्योऽपि निःश्रेयसप्राप्तिर्भातीत्याह ॥ कर्मण्येवेति ॥ तथापि समुच्चयप्रापकं नास्तीत्याशंक्याह ॥ एवमिति ॥ सत्यां सामग्र्यां कार्यमवश्यंभावीत्युपसंहरति ॥ इति भवेदिति ॥ ६६ ॥ श्रीरामचंद्राय नमः ॥ ६६ ॥०

संदिग्धं सफलं च विचार्यमित्येवं स्थितेऽसति फले संदिग्धमपि न विचार्यमिति बुध्यापृच्छति॥ किंपुनरिति॥ प्रत्येकं ज्ञानकर्मणोः समुच्चित
योर्वा मुक्तिं प्रति परमसाधनत्वेनावधारणमेव विचारफलमिति परिहरति॥ नन्विति॥ संदेहप्रयोजनयोर्विचारप्रयोजकयोर्भावाद्विचार
भि द्वारा परममुक्तिसाधनं निर्धारणीयमिति निगमयति॥ अनरति॥ एवं विचारमवतार्य सिद्धान्तं संगृह्णाति॥ आत्मेति॥ संग्रहवाक्यं विवृ
एवं त्वाद्यावात्मज्ञानाय योग्यामविद्यां दर्शयति॥ क्रियेति॥ आश्रयोत्त्यानदनादित्वमाह॥ आत्मनीति॥ तामेवाविद्यामनाद्यविद्योत्था

किंपुनरत्र मीमांसाफलं॥ नन्वेतदेवैषामन्यतमस्य परमं निःश्रेयससाधनत्वावधारणं॥ अतो विस्तीर्णतरं मीमांस्यमेतत्॥ आत्मज्ञा
नस्य तु केवलस्य निःश्रेयसहेतुत्वं भेदप्रत्ययनिवर्तकत्वेन कैवल्यफलावसानत्वात्॥ क्रियाकारकफलभेदबुद्धिरविद्ययाऽऽत्म
नि नित्यप्रवृत्ता मम कर्म कर्ताहममुष्मै फलायेदं कर्म करिष्यामीतीयमविद्याऽनादिकालप्रवृत्ता॥ अस्या अविद्याया निव
र्तकमयमहमस्मि केवलोऽकर्ताऽक्रियोऽफलो न मत्तोऽन्योऽस्ति कश्चिदित्येवंरूपमात्मविषयं ज्ञानं॥ उत्पद्यमानं कर्मप्रवृत्ति
हेतुभूताया भेदबुद्धेर्निवर्तकत्वात्॥ ५४॥

मनर्थात्मिकां प्रपंचयति॥ ममेति॥ अनाद्यविद्याकार्यत्वात्प्रवाहरूपेणानादित्वमस्याः विवक्षितत्वाद्विशिनष्टि॥ अनादीति॥ न च कारणा
विद्यानिवर्तकत्वमात्मज्ञानस्योपपन्नस्यात्ति॥ अस्या इति॥ ननु नेदमुत्पन्नं सत्तां निवर्तयत्यविरोधेनोत्पन्नत्वात्तच्चानुसन्नमत्व्याम
ग्र१ कस्यानर्थक्रियाकारितानत्राह॥ उत्पद्यमानमिति॥ कथं तस्य कारणाविद्यानिवर्तकत्वमित्याशंक्य कार्याविद्यानिवर्तकत्वदृष्टेरि
॥ त्याह॥ कर्मेति॥ ५५॥

गी०भा०टी
३५७॥

॥ ज्ञानस्येत्यादिसंग्रहवाक्ये तुशब्दस्य विशेषाभावानदानर्थक्यमाशंक्याह ॥ तुशब्द इति ॥ पक्षद्वयव्यावर्तकत्वमेवास्य स्फुटयति नेत्या
दिना ॥ ज्ञानश्च कर्मसाध्यता मुक्तेरित्याह ॥ अकार्यत्वाच्चेति ॥ एष नित्यो महिमेति श्रुतेर्नित्यत्वेन मोक्षस्याकार्यत्वान्न तत्र हेत्वपेक्षेत्युपपादयति
नहीति ॥ ज्ञानेनापि मोक्षो न क्रियते चेत्तर्हि केवलमपि ज्ञानं मुक्त्यनुपयुक्तमिति कुतस्तस्य तत्र हेतुत्वधीरिति शंकते ॥ केवलेति ॥ ज्ञाना

तुशब्दः पक्षद्वयव्यावृत्त्यर्थः ॥ न केवलेभ्यः कर्मभ्यो न च ज्ञानकर्मभ्यां समुच्चिताभ्यां निःश्रेयसप्राप्तिरिति पक्षद्वयं निवर्तयति ॥ अ
कार्यत्वाच्च निःश्रेयसस्य कर्मसाधनत्वानुपपत्तिः नहि नित्यं वस्तु कर्मणा ज्ञानेन वा क्रियते ॥ केवलज्ञानमप्यपार्थकं तर्हि नाविद्या
निवर्तकत्वे सति दृष्टकैवल्यफलावसानत्वादविद्यातमोनिवर्तकस्य ज्ञानस्य दृष्टं कैवल्यफलावसानत्वं ॥ रज्ज्वादिविषये सर्पा
द्यज्ञानतमोनिवर्तकप्रदीपप्रकाशफलवद्धि निवृत्तसर्पादिविकल्परज्जुकैवल्यफलावसानं हि प्रकाशफलं ज्ञानं ॥ तथा ॥ ५

प्रकाशस्यफले
बद्धी

न
आ१८॥
३५७॥
राम॥

नर्थक्यं दूषयति ॥ नेति ॥ तदेव प्रपंचयति ॥ अविद्येति ॥ यदुक्तमविद्यानिवर्तकस्य ज्ञानस्य कैवल्यफलावसायित्वं दृष्टमिति तत्र दृष्टांतमा
हा ॥ रज्ज्वादीति ॥ उक्ते विषये तमोनिवर्तकप्रकाशस्य कस्मिन्फले पर्यवसानं तत्राह ॥ विनिवृत्तेति ॥ प्रदीपप्रकाशस्य सर्पभ्रमनि
त्तिद्वारा रज्जुमात्रे पर्यवसानवदात्मज्ञानस्यापि तदविद्यानिरसनात्मकैवल्यावसानमिति दार्ष्टांतिकमाह ॥ तथेति ॥ ५१॥०
त

ज्ञात्रादीनांज्ञाननिष्ठाहेतूनांकर्मणांनरैःप्रवृत्तिसंभवात्कर्मसहितैवसाकैवल्यायसाधिनीनेतिचेन्नेत्याह॥ दृष्टार्थानामिति॥ कर्म
साहित्यंज्ञाननिष्ठापाहदृष्टांतेनसाधयन्नाशंकते॥ भुजीति॥ भुजिक्रियायाः लौकिक्यावैदिक्याश्चाग्निहोत्रादिक्रियायाःसहा
या नुष्ठानवदग्निहोत्रादिक्रियायाःज्ञाननिष्ठायाश्चसाहित्यमित्यर्थः॥ भुजिफलेतृप्त्याख्येऽप्यासेपिस्वर्गादौनद्वैतौचाऽग्निहोत्राहाव
या र्थित्वदृष्टेर्युक्तंनत्रसाहित्यंनतस्यामुक्तिफलज्ञाननिष्ठांलाभेस्वर्गादौतद्धेतौवाकर्मणअर्थित्वंतेनज्ञाननिष्ठाकर्मणोर्न

दृष्टार्थानांचविहितक्रियाऽग्निमंथनादीनांव्यापनकर्त्रादिकारकाणांद्वैधीभावाऽग्निदर्शनादिफलादन्यफलेकर्मणांन
रैवाव्यापारानुपपत्तिर्यथातथाज्ञाननिष्ठाक्रियायांदृष्टार्थायांव्यापनस्यज्ञात्रादिकारकस्यात्मकैवल्यफलादन्यस्य
फलेकर्मणांनरैवाप्रवृत्तिरनुपपन्नेतिनज्ञाननिष्ठांकर्मसहितोपपद्यते॥ अथभुज्यग्निहोत्रादिक्रियावत्स्यादितिचेन्नाकैव
ल्यफलेज्ञानेक्रियाफलार्थित्वानुपपत्तेः॥ कैवल्यफलेहिज्ञानेप्राप्तेसर्वत॰संप्लुतोदकस्थानीयैकफलेकूपतडागा
दिक्रियाफलार्थिताऽभाववत्॥ फलांतरेतत्साधनायांचक्रियायामर्थितानुपपत्तिः॥ नहिराज्यप्राप्तिफलेकर्मणि
व्यापृतस्यक्षेत्रमात्रप्राप्तिफलेव्यापारोपपत्तिस्तद्विषयैवाऽर्थित्वं॥४६॥

र्नसाहित्यमितिपरिहरति॥ नेत्यादिना॥ संग्रहवाक्यंविवृणोति॥ कैवल्येति॥ ज्ञानेफलवतिलब्धेफलांतरेतद्धेतौचनार्थितेत्य
न[illegible]माह॥ सर्वतइति॥ सर्वतःसर्वत्रसंप्लुतंव्याप्तमुदकमितिसमुद्रोक्तिस्तत्फलंस्नानादितस्मिन्प्राप्तेनतडागादिनिर्माणक्रियांतर यां
[illegible]नेस्नानादौकस्यचिदर्थित्वंतथाप्रकृतेपीत्यर्थः॥ निरतिशयफलेज्ञानेलब्धेसातिशयफलेकर्मणिनार्थित्वरस्तेनदृष्टांतेनस्फुट
॥[illegible]ति॥ नहीति॥

कर्मणः सातिशयफलत्वमुक्तमुपजीव्य फलितमाह॥ तस्माच्चेति॥ ज्ञानकर्मणोः साहित्यासंभवेऽपि पूर्वोक्तं निगमयति॥ न चेति॥ न हि प्रकाशतमसोरिव मिथो विरुद्धयोस्तयोः साक्षादेकस्मिन्फले साहित्यमित्यर्थः॥ ननु ज्ञानमेव मोक्षं साधयद्दात्मसहायत्वेन कर्मापेक्षते करणस्योपकरणापेक्षत्वान्नेत्याह॥ नापीति॥ ज्ञानमुत्पत्तौ यज्ञाद्यपेक्षमपि नोत्पन्नं फलेन तदपेक्षं स्वोत्पत्तिनांतरियकत्वेन मुक्तेस्तन्मित्रायत्तत्वादित्यर्थः॥ यदुक्तमिति कर्तव्यत्वेन ज्ञानं कर्मापेक्षमिति तन्नेत्याह॥ अविद्येति॥ ज्ञानस्या[illegible]ज्ञाननिवर्तकत्वा

तस्मान्न कर्मणोऽस्ति निःश्रेयससाधनत्वसंभवः॥ न च ज्ञानकर्मणोः समुच्चितयोः॥ नापि ज्ञानस्य कैवल्यफलस्य कर्मसाहाय्यापेक्षा॥ अविद्यानिवर्तकत्वेन च विरोधात्॥ न हि तमस्तमसो निवर्तकं॥ अतश्च केवलं ज्ञानमेव निःश्रेयससाधनमिति॥ न नित्याकरणे प्रत्यवायप्राप्तेः कैवल्यस्य च नित्यत्वात्॥ यत्तावत्कैवल्यात् ज्ञानात्कैवल्यप्राप्तिरित्येतदसत्॥ यत्तो नित्यानां कर्मणां श्रुत्युक्तानामकरणे प्रत्यवायो नरकादिप्राप्तिलक्षणः स्यात्॥ ११॥ ॥ ॥ ॥ ॥ ॥

तत्र कर्मणो विरुद्धतया सहकारित्वायोगान्न फलेन तदपेक्षेत्यर्थः॥ कर्मणोऽपि ज्ञानवदज्ञाननिवर्तकत्वे कुतो विरुद्धतेत्याशंक्याह॥ न हीति॥ केवलस्य समुच्चितस्य वा कर्मणो मोक्षे साक्षादनन्वये फलितमाह॥ अत इति॥ केवलं ज्ञानं मुक्तिसाधनमित्युक्तं तन्निषेधन्नाशंकते॥ नेत्यादिना॥ निषेध्यमनूद्य तदर्थमाह॥ यत्तावदिति॥ नित्याकरणे प्रत्यवायप्राप्तेरिति हेतुं प्रपंचयति॥ यत इति॥ ज्ञानवतोपि नित्यानुष्ठानस्यावश्यकत्वान्न केवलज्ञानस्य कैवल्यहेतुतेत्यर्थः॥ ११॥ श्रीरामकृष्णाय वासुदेवाय नमो नमः॥ ११॥०

कैवल्यस्य च नित्यत्वादित्यस्य व्यावर्त्यं दर्शयति ॥ नन्विति ॥ यदि नित्यनैमित्तिककर्माणि श्रौतान्यकरणे प्रत्यवायकारीण्यवश्यानुष्ठेयान्येवं तर्हि ते
भ्यः समुच्छितेभ्यो ऽसमुच्छितेभ्यश्च मोक्षो नेत्युक्तत्वात्केवलज्ञानस्य चातद्धेतुत्वादनिबंधनामुक्तिर्न सिध्येदित्यर्थः ॥ कैवल्यस्य चेत्यादिव्या
कुर्वन्न निर्मोक्षप्रसंगं प्रत्यादिशति ॥ नैष इति ॥ मुक्तेर्नित्यत्वेनाप्रयत्नसिद्धेर्न तदभावशंकेत्युक्तं प्रपंचयति ॥ नित्यानामिति ॥ काम्यक
र्मवशादिष्टशरीरापत्तिं शंकित्वोक्तं ॥ काम्या नां चेति ॥ आरब्धकर्मकाद्देहांतरं नेत्याह ॥ वर्तमानेति ॥ न हि देहांतरं शेषकर्मणास्या ०

नन्वेवं तर्हि कर्मभ्यो मोक्षो नास्तीति अनिर्मोक्षप्रसंग एव ॥ नैष दोषो नित्यत्वान्मोक्षस्य ॥ नित्यानां कर्मणामनुष्ठानात्प्रत्यवा
यानुपपत्तेः ॥ प्रतिषिद्धस्य चाकरणादनिष्टशरीरानुपपत्तिः ॥ काम्यानां च परिवर्जनादिष्टशरीरानुपपत्तिः ॥ वर्तमान
शरीरारंभकस्य च कर्मणः फलोपभोगक्षये ॥ पतितेऽस्मिन् शरीरे देहांतरोत्पत्तौ च कारणाभावात् ॥ आत्मनो रागादीनां चाक
रणात् स्वरूपावस्थानमेव कैवल्यमित्ययत्नसिद्धं ~~[illegible]~~ कैवल्यमिति ॥ अतिक्रांतानेकजन्मांतरकृतस्य स्वर्गनरका
दिप्राप्ति फलस्यानारब्धकार्यस्योपभोगानुपपत्तेः ऽयाभाव इति चेन्न ॥ श्रीरामकृष्णाय नमः ॥ वासुदेवाय नमः ॥

दित्याशंक्य कर्माशयस्यैकभविकत्वान्नेत्याह ॥ पतितेऽस्मिन्निति ॥ रागादिना कर्मांतरं तेनो देहांतरं च भविष्यतीत्याशंक्याह ॥ रागादीनां
चेति ॥ आत्मनः स्वरूपावस्थानमिति संबंधः ॥ अतीतासंख्यजन्मभेदेष्वर्जितस्य कर्मणो नानाफलस्यानारब्धस्य भोगेनाक्ष
यात्तद्देहांतरारंभादैकभविकत्वस्याप्रामाणिकत्वान्न मुक्तेरयत्नसिद्धतेति चोदयति ॥ अतिक्रांतेति ॥ नोक्तकर्मनिमित्तं देहांतरं शं
॥ शंकितव्यमित्याह ॥ नेति ॥ ५ ॥

गी०भा०टी० नित्यनैमित्तिककर्माणि श्रौतानि अवश्यमनुष्ठेयानि तदनुष्ठाने च महानायासस्ततो दुःखोपभोगस्तस्योक्तानारब्धकर्मफलभोग
३४९॥ त्वंपश्यमाच्चततो देहान्तरमित्याह ॥ नित्येति ॥ नित्यादीनां दुरितनिबर्हणत्वेऽप्यविरोधाच्च सुकृतेन निवृत्तिस्ततो देहान्तरमित्याशं
र्न क्यसुकृतस्य नित्यादेरुत्पत्तेऽनारब्धत्वे च न्यायविरुद्धस्यासिद्धत्वान्न ततो देहान्तरायोगान्नित्यादेर्नैरूपत्वे च न तस्य फलान्त
रमिति मत्वा यथा प्रायश्चित्तमुपात्तदुरितनिबर्हणार्थं न फलान्तरापेक्षं तथेदं सर्वमपि नित्यादिकर्मोपात्तपापाऽपाकरणार्थं
रा०म नास्मिन्नेव पर्यवस्यन्न देहान्तरारम्भकमिति पक्षान्तमाह ॥ प्रायश्चित्तवदिति ॥ तथापि प्रारब्ध ॥ वशादेव देहान्तरंशाक्यपत्तेना २५

नित्यकर्मानुष्ठानायासदुःखोपभोगस्य तत्फलोपभोगत्वोपपत्तेः ॥ प्रायश्चित्तवद्वा पूर्वोपात्तदुरितक्षयार्थं नित्यं त्वं
कर्मणां ॥ आरब्धानां चोपभोगेनैव कर्मणां क्षीणत्वात् पूर्वाणां च कर्मणामनारंभेऽयत्नसिद्धं कैवल्यमिति ॥ न अ०१८॥
॥ तमेव विदित्वाऽतिमृत्युमेति नान्यः पंथा विद्यतेऽयनायेति विद्यायाः अन्यः पंथा मोक्षायन विद्यत इति श्रुते ३४९॥
श्चर्मवदाकाशवेष्टनासंभववदविदुषो मोक्षासंभवश्रुतेः ॥ ॥ १२ ॥ श्रीरामकृष्णायनमः ॥ वासुदेवायनमः राम:॥

जन्मान्तरारंभकाणामपि तेषां यावदधिकारन्यायेन संभवादित्याशंक्याह ॥ आरब्धानां चेति ॥ पूर्वार्जितकर्मणामेवं क्षीणत्वेऽपि कानि
मार चिदपूर्वकर्माणि देहान्तरमारंभेरन्नित्याशंक्याह ॥ अपूर्वाणां चेति ॥ विना ज्ञानं कर्मणैव मुक्तिरिति पक्षं श्रुत्यवष्टंभेन निराचष्टे ॥ नेत्या
दिना ॥ विद्यतेऽयनायेति श्रुतेरिति संबंधः ॥ एवकारार्थं विवृ[illegible]ण्वन्नेत्यादिभागं व्याकरोति ॥ अन्य इति ॥ यदा चर्मवदाकाशं वेष्ट
यिष्यन्ति मानवाः ॥ तदा देवमविज्ञाय दुःखस्यान्तो भविष्यतीति श्रुतिमर्थतोऽनुवदति ॥ चर्मवदिति ॥ १२ ॥ श्रीरामचंद्रायनमः ॥

श्रौतेर्थे स्मृतिं संवादयति॥ लानादिति॥ किंच तत्वदीपस्यापस्यानुग्राह्यसमानहीनत्वेनाभासत्वतया पुण्यकर्मणामनारब्धफलानां क्षयाभावे देहांत
रारंभसंभवाच्च ज्ञानं विना मुक्तिरित्याह॥ अनारब्धेति॥ तथाविधानां कर्मनांणां नास्ति संभावने[illegible]साशंक्याह॥ यथेति॥ अनारब्धफ
लपुण्यकर्मभावे पि कथं मोक्षानुपपत्तिरित्याशंक्याह॥ तेषां चेति॥ इतश्च कर्मक्षयानुपपत्त्या मोक्षानुपपत्तिरित्याह॥ धर्माधर्मेति
कर्मणा पितृलोक इति श्रुतिमाश्रित्य कर्मक्षयहेत्वंतरमाह॥ नित्यानामिति॥ स्मृत्यापि पयोक्तमर्थं समर्थयते॥ वर्ण

णानात्कैवल्यमाप्नोतीति च पुराणस्मृतेनोरेरब्धफलानां पुण्यानां कर्मणां क्षयानुपपत्तेश्च॥ यथापूर्वोपात्तानां दुरिता
नामनारब्धफलानां संभवं स्यात् तथा पुण्यानामप्यनारब्धफलानां स्यात् संभवस्तेषां च देहांतरमकृत्वा क्षयानु
पपत्तौ मोक्षानुपपत्तिः॥ धर्माधर्महेतूनां च रागद्वेषमोहानामप्यन्यत्रात्मज्ञानादुच्छेदानुपपत्तेर्धर्माधर्मोच्छेदा
नुपपत्तिः॥ नित्यानां च कर्मणां पुण्यलोकफलश्रुतेर्वर्णाश्रमाश्च स्वकर्मनिष्ठाः पुण्यलोकाभवंतीत्यादिस्मृतेश्च
कर्मक्षयानुपपत्तिः॥ ये त्वाहुर्नित्यानि कर्माणि दुःखस्वरूपत्वात् पूर्वकृतदुरितकर्मणां फलमेव॥ ननु तेषां स्वरूप
॥ व्यतिरेकेणान्यत्फलम[illegible]श्रुतत्वात्॥

इति॥ प्रेत्य कर्मफलमनुभूय ततः शेषेण विशिष्टजात्यादिभाजो जन्म प्रतिपद्यंत इत्येवमादिशास्त्रार्थः॥ यत्तु नित्यानुष्ठानायास
दुःखभोगस्य तत्फलभोगत्वमिति तदित्याभीमनुवदति॥ ये[illegible]ति॥ नित्यान्यनुष्ठीयमानान्यायासपर्यंतानीति शेषः॥ तथापि नि
त्यानां काम्यानामिव स्वरूपातिरिक्तं फलमाशंक्याविद्युद्धेशोनंदश्रवणान्मैवमित्याह॥ न[illegible]ति॥ ५४॥ श्रीरामचंद्रायनमः॥

मे

गी॰ भा॰ टी॰ विध्युद्देशेफलाश्रुतेनतत्कामनायानिमित्तस्याभावान्ननित्यानिविधीयेरन्नित्याशंक्याह ॥ जीवनादीति ॥ न नित्यानां विध्यसिद्धिरिति शेषः
अनुभाषितं दूषयति ॥ नेत्यादिना ॥ नह्येवविरावन्निषेध्यमनूद्यनयञ्अर्थमाह ॥ यदुक्तमिति ॥ अप्रवृत्तानामित्यादिहेतुं व्यनक्ति ॥ न
३५०॥ हीतिकर्मान्तरारब्धे देहे दुरितफलं नित्यानुष्ठानायासदुःखं भुञ्जतां कानुपपत्तिरित्याशंक्याह ॥ अन्यथेति ॥ यदुक्तं दुःखफलविशेषा

८

जीवनादिनिमित्ते च विधानादिति ॥ नाप्रवृत्तानां कर्मणां फलदानासंभवात् ॥ दुःखफलविशेषानुपपत्तिश्च स्यात् यदुक्तं सर्वजन्म
कृतदुरितानां कर्मणां फलं नित्यकर्मानुष्ठानायासदुःखं भुञ्जत इति तदसत् ॥ नहि मरणकाले फलदाना[illegible]ङ्कुरीभूतस्य कर्मणः म भा॰ १८॥
फलमन्यकर्मारब्धे जन्मन्युपभुज्यत इत्युपपत्तिरन्यथा स्वर्गफलोपभोगायाग्निहोत्रादिकर्मारब्धे जन्मनि नरककर्मफ ३५०॥
लोपभोगोपपत्तिः स्यात्तस्य दुरितदुःखविशेषफलत्वानुपपत्तेश्च ॥ अनेकेषु हि दुरितेषु संभवत्सु भिन्नदुःखसाधनफले रामः॥
षु नित्यकर्मानुष्ठानायासदुःखमात्रफलेषु कल्प्यमानेषु ॥ श्रीरामः ॥ ५ ॥

नुपपत्तिश्च स्यादिति तदुपपादयति ॥ तस्येति ॥ संभावितानि तावदनन्तानि संचितानि दुरितानि तानि च नानादुःखफलानि यदि तानि ॥
त्यानिनुष्ठानायासरूपदुःखतन्मात्रफलानि कल्प्येरंस्तदानेष्वेवं कल्प्यमानेषु सत्सु नित्यस्यानुष्ठितस्यायासमात्रसाध्यतोयो दुरितकृ
तो दुःखविशेषोऽनन्तफलं ॥ दुरितफलानां दुःखानां बहुलत्वादतो नित्यं कर्म यथाविशेषितं दुरितकृतदुःखविशेषफलकमित्ययु
॥ क्तमित्यर्थः ॥

किंच नित्यानुष्ठानायासदुःखमात्रफलानि चेन्न दुरितानिकृत्वं नेन द्वाद्वंद्वशाद्विनरागादिबाधस्य रोगादिबाधायाश्च दुरितनिमित्तत्वानुपपत्तेः सु
कृतफलत्वस्य चासंभवादनुपपत्तिरेवोदीरितबाधायाः स्यादित्याह॥ द्वंद्वेति॥ नैवं च नित्यानुष्ठानायासदुःखमेव दुरितफलमित्युक्त स्प
मित्याह॥ नित्येति॥ दुःखमिति नश्यत्यनेकल्मषमिति नु मितिपूर्वेण संबंधः॥ यदि तदेवं तत्फलं न तर्हि शिरसा पाषाणवहनादिदुःखं दुरि
तकृतं॥ न च तत्कारणं सुकृतं दुःखस्यात तत्कार्यत्वादन्यथा कस्मिकं स्यादित्यर्थः नित्यानुष्ठानायासदुःखमुपात्तदुरितफलमित्ये

द्वंद्वरोगादिबाधानिमित्तं दुःखं न हि शश्यत्यनेकल्मषमिति नु॥ नित्यकर्मानुष्ठानायासदुःखमेव पूर्वकृतदुरितफलं न शिरसा पाषाण
वहनादिदुःखमिति॥ अकृतं चेद्दुःखमुच्यते नित्यकर्मानुष्ठानायासदुःखं पूर्वकृतदुरितकर्मफलमिति॥ कथमप्रसूतक स
र्मफलस्य हि तत्पूर्वकृतदुरितस्य क्षयानुपपत्तेर्नोपपद्यत इति प्रकृतं॥ तत्राप्रसूतफलस्य कर्मणः फलं नित्यकर्मानुष्ठा
नायासदुःखफलमाह भवान्न प्रसूतफलस्येत्यथ सर्वमेव पूर्वकृतं दुरितं प्रसूतफलमेवेति मन्यते भवान्॥ ५१॥ ५१॥:

तदप्रकृतत्वादयुक्तं वक्तुमित्याह॥ अप्रकृतं चेति॥ तदेव प्रपंचयितुं पृच्छति॥ कथमिति॥ तत्रादौ प्रकृतमाह॥ अप्रसूतेति॥ तथापि क
थमस्माकमप्रकृतवादित्वं तत्राह॥ तत्रेति॥ प्रसूतफलत्वमप्रसूतफलत्वमिति प्राचीनदुरितगतविशेषानुपगमाद्विशेषे
पा [illegible]स्यैव तस्य प्रसूतफलत्वान्नित्यानुष्ठानायासदुःखफलत्वसंभवान्नाप्रकृतवादितेति शंकते॥ अथेति॥ ५॥ श्रीरामः॥ ५

त

पूर्वोपात्तदुरितस्याविशेषेणारब्धफलत्वे विशेषणानर्थक्यमिति परिहरति॥नन्विति॥दुरितमात्रस्यारब्धफलत्वेनानारब्धफलस्य तस्योक्तफलविशेषत्वानुपपत्तेरित्यर्थः॥पूर्वोपात्तदुरितमारब्धफलं चेद्भोगेनैव तत्क्षयसंभवात्तन्निरस्त्यर्थं नित्यं कर्म न विधातव्यमिति दोषान्तरमाह॥नित्येति॥इतश्च नित्यानुष्ठानायासदुःखं नोपात्तदुरितफलमित्याह॥किंचेति॥तदेव स्फोरयति॥श्रुतस्येति॥यथा व्यायामगमनादिकृतं दुःखं नान्यस्य दुरितस्येष्यते तत्फलत्वसंभवात्तथा नित्यस्यापि श्रुतस्योक्तस्यानुष्ठितस्यायासपर्यन्तस्य फलान्तरानुपगमात्तदनुष्ठानायासदुःखमेव चेत्फलं तर्हि तस्मादेव तद्दर्शनात्तस्य न दुरितफलत्वं कल्प्यं। नित्यफलत्वसंभवादित्यर्थः॥दुःखफलत्वे नित्यानामननुष्ठानमेव

ततो नित्यकर्मानुष्ठानायासदुःखमेव फलमिति विशेषणं न युक्तं॥नित्यकर्मानुष्ठानविध्यानर्थक्यप्रसंगश्चोपभोगेनैव प्रस्ततफलस्य दुरितकर्मणः क्षयोपपत्तेः॥किंच श्रुतस्य नित्यस्य कर्मणो दुःखं चेत्फलं नित्यकर्मानुष्ठानायासादेव तद्दृश्यते॥व्यायामादिवत्तदन्यस्येति कल्पनाऽनुपपत्तिः॥जीवनादिनिमित्ते च विधानान्नित्यानां कर्मणां॥प्रायश्चित्तवत्पूर्वकृतदुरितफलत्वानुपपत्तिः॥यस्मिन्पापकर्मणि निमित्ते यद्विहितं प्रायश्चित्तं न तत्तस्य पापस्य फलमथ तस्यैव पापस्य निमित्तस्य प्रायश्चित्तदुः

श्रेयः स्यादित्याशंक्याह॥जीवनादीति॥नित्यानां दुरितफलत्वानुपपत्तौ हेत्वन्तरमाह॥प्रायश्चित्तवदिति॥ दृष्टान्तं प्रपंचयति॥यस्मिन्निति॥यथा जीवनादिनिमित्ते विहितानां नित्यानां॥दुरितफलत्वासिद्धिरित्यविशेषः॥सत्यं प्रायश्चित्तं न निमित्तस्य पापस्य फलं किंतु त
॥त॥ दनुष्ठानायासदुःखं तस्य पापस्य फलमिति शंकते॥अथेति॥५७॥

प्रायश्चित्तानुष्ठानायासदुःखस्यनिमित्तभूतपापफलत्वेजीवनादिनिमित्तनित्यानुष्ठानायासदुःखमपिजीवनादेरेवफलंस्यान्नोपात्तदुरित॰
स्येतिपरिहरति॥जीवनादीति॥प्रायश्चित्तदुःखस्यतन्निमित्तपापफलत्ववज्जीवनादिनिमित्तनित्यादिकर्मकृतमपिदुःखंजीवनादिफलमित्य
त्रहेतुमाह॥नित्येति॥इतश्चनित्यानुष्ठानायासदुःखमेवोपात्तदुरितफलमित्यशक्यंवक्तुमित्याह॥किंचान्यदिति॥काम्यानुष्ठा
नायासदुःखमपिदुरितफलमित्यपगमात्प्रसंगस्येष्टत्वमाशंक्याह॥तथाचेति॥विहितानिनित्यावश्यानिचतेषुफलंश्रुतंन

जीवनादिनिमित्तमपिनित्यकर्मायासदुःखंजीवनादिनिमित्तस्यैवनत्फलत्वंप्रसज्येत॥नित्यप्रायश्चित्तयोर्नैमित्तिकत्वाविशे
षात्॥किंचान्यत्नित्यस्यकाम्यस्यचाग्निहोत्रादेरनुष्ठानायासदुःखस्यतुल्यत्वात्नित्यानुष्ठानायासदुःखमेवपूर्वकृत
दुरितस्यफलंनतुकाम्यानुष्ठानायासदुःखमितिविशेषोनास्तीतितदपिपूर्वकृतदुरितफलंप्रसज्येत॥तथाचसतिनित्या
नांफलाश्रवणात्तद्विधानान्यथानुपपत्तेश्चनित्यानुष्ठानायासदुःखंपूर्वकृतदुरितफलमित्यर्थापत्तिकल्पनाचानुपप
न्ना॥एवंविधानान्यथानुपपत्तेरनुष्ठायासदुःखव्यतिरिक्तफलत्वानुमानाच्चनित्यानांविरोधाच्चविरुद्धंचेदमुच्यते॥

चविनाफलंविधिस्तेनदुरितनिबर्हणार्थानिनित्यानीत्यर्थापत्त्याकल्प्यतेनचसायुक्ताकाम्यानुष्ठानादपिदुरितनिवृत्तिसंभवादित्यर्थः॥
किंचनित्यानामनुष्ठानायासदुःखातिरिक्तफलंविहितत्वात्काम्यवदित्यनुमानात्तेषांदुरितनिवर्त्यत्वमर्थनेत्याह॥एवमिति॥काम्यादि
कर्मस्वपितुल्यमेवमित्युक्तं॥स्वोक्तिव्याघाताच्चानित्यानुष्ठानात्दुरितफलभोगोक्तिरयुक्तेत्याह॥विरोधाच्चेति॥तदेवप्रपंचयति॥
॥विरुद्धंचेति॥

गी०भा०टी०
३५१॥

दृष्टार्थमेवविशदयति॥नित्येति॥अन्यस्यकर्मणोदुरितस्येति॥यावत्॥सएवेतियदनंतरंयःस्वविहितस्यकार्यमितिनियमादित्यर्थः॥
एतच्चनित्यानुष्ठानेदुरितफलभोगोनसिध्यतीत्याह॥किंचेति॥काम्यानुष्ठानस्यनित्यानुष्ठानस्यचयौगपद्यानुष्ठायायासदुःखेन
दुरितफलभोगेवत्काम्यफलस्यापिभुक्तत्वसंभवादितिहेतुमाह॥नन्वत्रतत्वादिति॥नित्यकाम्यानुष्ठानयोर्यौगपद्येपिनित्यानुष्ठाना
यासदुःखादन्यदेवकाम्यानुष्ठानफलंस्यान्नत्वादितिशंकते॥अयेति॥काम्यानुष्ठानफलंनित्यानुष्ठानायासदुःखाद्भिन्नंचेन

ना

नित्यकर्मणानुष्ठीयमानेनान्यस्यकर्मणःफलंभुज्यतइत्यभ्युपगम्यमानेसएवोपभोगोनित्यस्यकर्मणःफलमितिनित्य
स्यकर्मणःफलाभावइतिविरुद्धमुच्यते॥किंचकाम्याग्निहोत्रादावनुष्ठीयमानेनित्यमप्यग्निहोत्रादितंत्रेणैवानुष्ठितंभ
वतीतितदायासदुःखेनैवकाम्याग्निहोत्रादिफलमुपक्षीणंस्यात्तंत्रत्वादकाम्याग्निहोत्रादिफलमन्यदेवस्वर्गादि॥तदनु
ष्ठानायासदुःखमपिभिन्नंप्रसज्येत॥नचतदस्तिदृष्टविरोधान्नहिकाम्यानुष्ठानायासदुःखात्केवलनित्यानुष्ठाना
यासदुःखंभिन्नंदृश्यते॥किंचान्यत्अविहितमप्रतिषिद्धंचकर्मतत्कालफलं॥८॥ ॥ ॥ ॥ ॥ ॥

नः२ ४
अ०१८॥
३५२॥
रामः॥

र्हिकाम्यानुष्ठानायासदुःखंनित्यानुष्ठानायासदुःखंचमिथोभिन्नंस्यादित्याह॥तदनुष्ठानेति॥प्रसंगस्येष्टत्वमाशंक्यनिरा
चष्टे॥नचेति॥दृष्टविरोधमेवस्पष्टयति॥नहीति॥आत्मज्ञानवदग्निहोत्रादीनांमोक्षेसाक्षादन्वयोनेत्यन्यदपिकारणम
स्तीत्याह॥किंचान्यदिति॥तदेवकारणंविवृणोति॥अविहितमिति॥कर्ममर्दन[illegible]भोजनादितच्छास्त्रेणविहितंनिषिद्धंचनतदनं
॥तरफलंतथानुभवादित्यर्थः॥श्रीरामलक्ष्मणायनमः॥८॥८॥

शास्त्रीयंकर्मतुनानंतरफलमानंतर्यस्याचोदितत्वात्तोज्ञानदृष्टफलेनादृष्टफलंकर्मसहकारिभवतिनापिस्वयमेवदृष्टफलमोक्षेकर्मणरतिक्षममितिविवक्षितत्वाह॥नत्विति॥शास्त्रीयस्याग्निहोत्रादेरपिफलानंतर्येस्वर्गादीनामनंतरमनुपलब्धीविरुध्येततन्नत्वेषुदृष्टेष्वपितथाविधफलापेक्षयाप्रवृत्तिरग्निहोत्रादिषुनस्यादिष्टुंनेस्यादित्याह॥नदेति॥किंचनित्यानामग्निहोत्रादीनांनादृष्टंफलंतेषामेवकाम्यानांतादृक्फलं।नचहेतुंविनायंविभागोभागीत्याह॥अग्निहोत्रादीनामिति॥फलकामि

ननुशास्त्रचोदितंनानिष्टंवातत्कालफलंभवेत्॥यदिभवेत्तत्तदास्वर्गादिष्वपिअदृष्टफलानांशासनेनोद्यमोनस्यादग्निहोत्रादीनामेवकर्मस्वरूपाविशेषेऽनुष्ठानायासदुःखमात्रेणोपक्षयःकाम्यानांचस्वर्गादिमहाफलत्वमंगेतिकर्तव्यताद्याधिक्येत्वसतितत्फलकामित्वमात्रेणेतिनशक्यंकल्पयितुं॥तस्मान्नित्यानांकर्मणांअदृष्टफलाभावःकदाचिदप्युपपद्यते॥अतश्चाविद्यापूर्वकस्यकर्मणोविधेवशुभस्याशुभस्यवाक्षयकारणंअशेषतोननित्यकर्मानुष्ठानं॥५४॥०

त्वमात्रेणेतिनस्यादितिपूर्वेणसंबंधः॥यानिनित्यान्यग्निहोत्रादीनियानिचकाम्यानितेषामुभयेषामेवकर्मस्वरूपविशेषाभावेपिनित्यानांतेषामनुष्ठानायासदुःखमात्रेणक्षयोनफलांतरमस्तितेषामेवकाम्यानामंगाद्याधिक्याभावेपिफलकामित्वमधिकारिण्यस्तीत्येतावन्मात्रेणस्वर्गादिमहाफलत्वमितिस्वयंविभागोनप्रमाणवानित्यर्थः॥उक्तविभागायोगेफलितमाह॥तस्माच्चेति॥काम्यवन्नित्यानामपिपितृलोकाद्यदृष्टफलत्ववत्वेदुरितनिवृत्त्यर्थत्वायोगात्तादर्थ्येनात्मविद्यैवाभ्यु॥५४॥पगंतव्येत्याह॥अतश्चेति॥५६॥श्रीरामचंद्रायनमः॥।५४॥

शुभाशुभात्मकं कर्म सर्वमविद्यापूर्वकं चेदशेषतस्तर्हि तस्य क्षयकारणं विद्यैवेत्युपपद्यते तेन तु सर्वं कर्माविद्यापूर्वकमिति सिद्धमित्याशंक्याह॥
उक्त्वेति॥ तत्र हि शब्दो हेतौ तां युक्तिं दर्शयति॥ तथेति॥ इतश्चाविद्वद्विषयं कर्मेत्याह॥ अविद्वदिति॥ अधिकारिभेदेन निष्ठाद्वयमित्यत्र वा०
क्योपक्रममनुकूलयत्पाह॥ आत्मनि कर्तृत्वं कर्मत्वं चारोपयन्नज्ञानात्मानमिति विद्वत्ताकर्माऽज्ञानमूलमिति विवर्द्धितमित्याह॥ उभावि
ति॥ आत्मानं यथातथ्येन जानन्कर्तृत्वादिरहितो भवतीति विद्वत्ता कर्मसंन्यासे ज्ञानवतोऽधिकारित्वं सूचितमित्याह॥ वेदेति॥ निष्ठाद्वयम

अविद्याकामबीजं हि सर्वमेव कर्म तथा चोपपादितं॥ अविद्वद्विषयं कर्म विद्वद्विषया सर्वसंन्यासपूर्विका ज्ञाननिष्ठा॥ उभौ तौ न वि
जानीतो वेदाविनाशिनं नित्यं॥ ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनामज्ञानां कर्मसंगिनां तत्त्ववित्तु गुणा गुणेषु वर्तन्त इति म
त्वा न सज्जते॥ सर्वकर्माणि मनसा संन्यास्यास्ते॥ नैव किंचित्करोमीति युक्तो मन्येत तत्त्वविदर्थादज्ञः करोमीत्यारुरुक्षोः कर्मका
॥ कारणमारूढस्य योगस्थस्य शम एव कारणं॥

धिकारिभेदेन बोधव्यमित्यत्रैव वाक्यांतरमाह॥ ज्ञानेति॥ न बुद्धिभेदं जनयेदित्यत्र चाविद्यामत्त्वं कर्मणः सूचयता कर्मनिष्ठाऽविद्वद्विष
यानुमोदितेत्याह॥ अज्ञानामिति॥ यदुक्तं॥ विद्वद्विषया संन्यासपूर्विका ज्ञाननिष्ठेति तत्र तत्त्ववित्तु महाबाहो गुणकर्मविभागयोरित्यादिवा
८ क्यमुदाहरति॥ तत्त्वविदिति॥ तत्रैव वाक्यांतरं पठति॥ सर्वेति॥ विदुषो ज्ञाननिष्ठेत्यत्रैव पौचमिकं वाक्यांतरमाह॥ नैवेति॥ तत्रैवार्थ
सिद्धमर्थं कथयति॥ अज्ञ इति मन्यत इति संबंधः॥ अन्तस्थं चित्तशुध्यर्थं कर्म शुद्धचित्तस्य कर्मसंन्यासो ज्ञानप्राप्तौ हेतुरित्यत्र वाक्यां
॥६४॥ ॥ तरमाह॥ आरुरुक्षोरिति॥ ६४॥ ६४॥

यथोक्ते विभागे साप्तमिकमपि वाक्यमनुगुणमित्याह॥ उदारा इति॥ एवं हि त्रैधर्म्यमित्यादिना नावमिकं वाक्यमविद्वद्विषयं कर्मेत्यत्र प्रमाण
यति॥ अज्ञा इति॥ विदुषः संन्यासपूर्विकां ज्ञाननिष्ठां तत्रैव नावमिकं वाक्यान्तरमाह॥ अनन्या इति॥ मामित्येतद्व्याचष्टे॥ यथोक्तमिति॥
तेषां सततयुक्तानामित्यादि दाशमिकं वाक्यं तत्रैव प्रमाणयति॥ ददामीति॥ विद्यावतां ध्रुवमेव भगवत्प्राप्तिर्निर्दिष्टा दितरेषां नतत्प्राप्तिः स्व
चितेत्यर्थसिद्धमर्थमाह॥ अर्थादिति॥ ननु भगवत्कर्मकारिणां युक्ततमत्वात्कर्मिणोऽपि भगवन्तं यान्तीत्याशंक्याह॥ भगवदिति
येमत्कर्मकृदित्यादिन्यायेन भगवत्कर्मकारिणस्ते यद्यपि युक्ततमास्तथापि कर्मिणः अज्ञाः संतो न भगवन्तं सहसा गन्तुमर्हन्तीत्यर्थः

दी उदारास्त्वपोप्यतां नीत्वात्मैव मे मतं॥ अज्ञाः कर्मिणो गतागतं कामकामा लभंते॥ अनन्याश्चिंतयंतो मां नित्ययुक्ताः यथोक्तमात्मानं
आकाशकल्पमकल्मषमुपासते॥ ददामि बुद्धियोगं तं येन मामुपयांति ते॥ अर्थात्त्कर्मिणोऽज्ञा उपयांतीति॥ भगवत्कर्मका
रिणो ये युक्ततमा अपि कर्मिणोऽज्ञास्ते॥ उत्तरोत्तरहीनफलत्यागावसानसाधना॥ अनिर्देश्याक्षरोपासकास्तु अद्वेष्टा
॥ सर्वभूतानामित्याध्यायपरिसमाप्त्युक्तसाधनाः॥ ५॥

तेषामसत्त्वेगमकं दर्शयति॥ उत्तरोत्तरेति॥ चित्तसमाधानमारभ्य फलत्यागपर्यन्तं वाक्यक्रमेणोत्तरोत्तरं निहीनसाधनोपादानाद
भ्यासा[illegible]र्थस्य भगवत्कर्मकारित्वाभिधानाद्भगवत्कर्मकारिणामसत्त्वं विज्ञानमित्यर्थः॥ येत्वक्षरमनिर्देश्यमित्यादिवाक्यावष्टं
भेन विद्वद्विषयत्वं संन्यासपूर्वकज्ञाननिष्ठायां निर्द्धारयति॥ अनिर्देश्येति॥ उक्तसाधनास्तेन ते संन्यासपूर्वकज्ञाननिष्ठायाम
॥ धिक्रियेरन्निति शेषः॥ ५२॥

गी०भा०टी०
३५६॥

किंचत्रयोदशेयान्यमानित्वादीनिचतुर्दशेचप्रकाशंचप्रवृत्तिंचेत्यादीनियानिपंचदशेचयान्यसंगत्वादीन्युक्तानितैस्सर्वैःसाधनैःसहिता
भवंत्यनिर्देश्याक्षरोपासकास्ततोपितेज्ञाननिष्ठायामेवाधिक्रियेरन्नित्याह॥ क्षेत्रेति॥ निष्ठाद्वयमधिकारिभेदेनप्रतिष्ठाप्यज्ञाननिष्ठा
नामनिष्टमिष्टमिश्रमितित्रिविधंकर्मफलंनभवतिकिंतुमुक्तिरेवकर्मनिष्ठानांतुत्रिविधंकर्मफलंनमुक्तिरितिशास्त्रार्थविभाग
मभिप्रेत्यमुपसंहरति॥ अधिष्ठानादीति॥ यदुक्तमविद्याकामबीजंसर्वंकर्मेतितन्नशास्त्रावगतस्यकर्मणोऽविद्यापूर्वकत्वानुप

क्षेत्राध्यायाद्यध्यायत्रयोक्तज्ञानसाधनानांश्रयेतेषांयथोक्ताधिष्ठानादिपंचहेतुकसर्वकर्मसंन्यासिनामात्मैकत्वाकर्तृकत्वज्ञान
वतांपरस्यांज्ञाननिष्ठायांवर्तमानानांभगवत्तत्त्वविदांअनिष्टादिकर्मफलत्रयंपरमहंसपरिव्राजकानामेवलब्धभगवत्स्वरूपात्मै
कत्वशरणानांनभवति॥ भवत्येषांअज्ञानांकर्मिणामसंन्यासिनामित्येषगीताशास्त्रोक्तस्यकर्तव्यार्थस्यविभागः॥ अविद्या
पूर्वकत्वंसर्वस्यकर्मणोऽसिद्धमितिचेन्न॥ ब्रह्महत्यादिलक्षणवद्यद्यपिशास्त्रावगतं नित्यंकर्मतथाप्यविद्यावतएवभ
वतीति॥ यथाप्रतिषेधशास्त्रावगममपिब्रह्महत्यादिलक्षणंकर्मानर्थकारणंअविद्याकामादिदोषवतोभवत्यन्यथाप्रवृत्त्यनु
त॥ यथानेस्त थानित्यनैमित्तिककाम्यान्यपीति॥ १२॥

अ०१८॥
३५६॥
रामः॥

पत्तेरित्याक्षिपति॥ अविद्येति॥ दृष्टांतेनसमाधत्ते॥ नेति॥ तत्राभिमतांप्रतिज्ञांविभजते॥ यद्यपीति॥ उक्तदृष्टांतंव्याचष्टे॥
यथेति॥ अविद्यादिमतोब्रह्महत्यादिकर्मेत्यत्रहेतुमाह॥ अन्यथेति॥ दार्ष्टांतिकंसंगृह्णातितथेति॥ तान्यप्यविद्यादिम
तोभवंतीत्यविद्यापूर्वकत्वंतेषामेष्टव्यमित्यर्थः॥ श्रीरामलक्ष्मणायनमः॥ १२॥

पारलौकिककर्मसु देहाद्यतिरिक्तात्मज्ञानं विना प्रवृत्त्ययोगात्तेषामविद्यापूर्वकत्वे निशंकते ॥ व्यतिरिक्तात्मनीति ॥ सत्यपि व्यतिरिक्तात्मज्ञाने पारमार्थि-
कात्मज्ञानाभावान्मिथ्याज्ञानादेव हिंसादिकर्मसु प्रवृत्तेरविद्यापूर्वकत्वं तेषामप्रतिहतमिति परिहरति ॥ नेत्यादिना ॥ कर्मणश्चलना-
आत्मनः
त्मकत्वान्नात्मकर्तृकत्वं तस्य निष्क्रियत्वाद्देहादिसंघातस्य तु सक्रियत्वात्तत्कर्तृकं कर्मयुक्तं तथापि संघातेऽहमभिमानद्वाराहंकरो-
मीत्यात्मनो मिथ्याधीपूर्वकं कर्मणि प्रवृत्तिर्दृष्टेत्तेनाविद्यापूर्वकत्वं तस्य युक्तमित्यर्थः ॥ यदुक्तं देहादिसंघातेऽहमभिमानस्यामि-

व्यतिरिक्तात्मनि अज्ञाते प्रवृत्तिर्हिंसादिषु कर्मस्वनुपपन्नेति चेन्न ॥ चलनात्मकस्य कर्मणोऽनात्मकर्तृकस्याहं करोमीति प्रवृत्ति-
दर्शनाद्देहादिसंघातेऽहंकारो गौणो न मिथ्येति चेन्न ॥ तत्कार्येष्वपि गौणत्वोपपत्तेरात्मीये देहादिसंघातेऽहंप्रत्ययो गौणो
यथात्मीये पुत्रे आत्मा वै पुत्रनामासीति ॥ लोके च मम प्राणो वायं गौरिति तद्वन्नैवं मिथ्याप्रत्ययः ॥ ५२ ॥ श्रीरामचंद्राय नमः ॥

थ्याज्ञानत्वं तदाक्षिपति ॥ देहादीति ॥ अहंधियो गौणत्वेन तत्पूर्वककर्मस्वपि गौणत्वापत्तेरात्मनोऽनर्थाभावान्निवृत्त्यर्थहेत्वन्वेषणं न स्यादि-
ति दूषयति ॥ नेति ॥ एतदेव प्रपंचयन्नादौ चोद्यं प्रपंचयति ॥ आत्मीय इति ॥ तत्र श्रुत्यवष्टंभेन दृष्टांतमाह ॥ यथेति ॥ दर्शितश्रुतेरात्मीये पुत्रे-
ऽहंप्रत्ययो गौणो यथा संघातेष्वात्मीयेऽहंप्रत्ययस्तथा युक्त इत्यर्थः ॥ भेदधीपूर्वकत्वं गौणधियो लोकप्रसिद्धमित्याह ॥ लोके चेति ॥ लोकवे-
दानुरोधेनात्मीये संघातेऽहंधीरपि गौणी स्यादिति दार्ष्टांतिकमाह ॥ तद्वदिति ॥ मिथ्याधियोऽपि भेदधीपूर्वकत्वसंभवादात्मीये संघातेऽहं-
॥ ५२ ॥ धियो मिथ्यात्वमेव किं न स्यादिति सादृश्याशंक्याह ॥ नैवमिति ॥

गी०आ०टी०

५।।

भेदधीपूर्वकत्वाभावेकथंमिथ्याधीरित्याशंक्याह।। मिथ्येति।। अधिष्ठानारोप्ययोर्विवेकाग्रहान्नदुत्पत्तिरित्यर्थः देहादावहंधि
योगौणत्वेतिचोद्येविवक्षितेतत्कार्येष्वपीत्यादिपरिहारंविवृणोति।। नेत्यादिना।। हेतुभागंविभजते यथेति सिंहोदेवदत्तइतिवा
क्यंदेवदत्तः।। सिंहइवेत्युपमयादेवदत्तंक्रौर्याद्यधिकरणत्वेनानुभवन्तं अग्निर्माणवकइत्यपिवाक्यंमाणवकोग्निरिवेत्युपमयामाण
वकस्यपैंगल्याद्यधिकरणस्यस्वरूपार्थमेव।। नतथामनुष्योहमितिवाक्यस्याप्यधिकरणस्वरूपार्थताभातीत्यर्थः।। देवदत्तमाणवक
योरधिकरणत्वंकथमित्याशंक्याह।। क्रौर्येति।। किंचगौणशब्दप्रत्ययंचनिमित्तंकृत्वासिंहकार्यंनकिंचिद्देवदत्तेसाध्यते॰
।।नापिमाणवकेकिंचिदि।।५।।

मिथ्याप्रत्ययस्यस्थाणुपुरुषयोरगृह्यमाणविशेषयोर्नगौणप्रत्ययस्यमुख्यकार्यार्थत्वमधिकरणस्वरूपार्थत्वाद्गुणोपमाश
ब्देन।। यथासिंहोदेवदत्तोऽग्निर्माणवकइतिसिंहइवाग्निरिवक्रौर्यपैंगल्यादिसामान्यत्वंदेवदत्तमाणवकाधिकरणस्वरू
पार्थमेव।। ननुसिंहकार्यमग्निकार्यंवागौणशब्दप्रत्ययनिमित्तंकिंचिन्नसाध्यतेमिथ्याप्रत्ययकार्यत्वनर्थमनुभव
न्ति।। गौणभ्रमयविभ्रमंचज्ञानातिनैषसिंहोदेवदत्तःस्यात्तथानायमग्निर्माणवकइति।।५।। श्रीरामचंद्रायनमः।।५।।

आ०१८।।
३५५।।
रामः।।

वोति
न्यं

नो

ग्निकार्यंमिथ्याधीकार्यत्वंनर्थमात्मानुभवत्यतोनदेहाद्यहंधीर्गौणीत्याह।। नत्विति।। रतोपिदेहहीनाहंधीर्गौणीत्याह।। गौणे
ति।। योदेवदत्तोमाणवकोवागौण्याधियोविषयस्तंपरोनैवायंसिंहोनामाग्निरितिजानाति।। नैवमविद्वानात्मनःसंघात
स्यचसत्यपिभेदेसंघातस्यानात्मत्वंप्रत्येत्यतोनसंघातेऽहंशब्दप्रत्ययौगौणावित्यर्थः।।५।। श्रीरामचंद्रायनमः ५।।

म२

संघाते न तयोर्गौणत्वे दोषांतरं समुद्भिनोत्ति ॥ तथेति ॥ तथा सति आत्मनि कर्तृत्वादिप्रतिभासासिद्धिरिति शेषः ॥ गौणेन कृतं न मुख्येन कृतमित्युदाहरणेन स्फुटयति ॥ न हीति ॥ यद्यपि देवदत्तेन माणवकाभ्यां कृतं कार्यं मुख्याभ्यां सिंहाग्निभ्यां न क्रियते तथापि देवदत्तगतं क्रौर्यं मुख्यसिंहस्य माणवकनिष्ठपैंगल्येन मुख्याग्नेरिव च संघातत्वेनापि जडत्वेनात्मनो मुख्यस्य किंचित्कार्यं कृतं भविष्यतीत्याशंक्याह ॥ न चेति ॥ देहादावहंधियो गौणतायां हेत्वंतरमाह ॥ क्रियमाणाविति ॥ देवदत्तमाणवकयोः सिंहाग्निभ्यां भेदधीपूर्वकं न

तथा गौणेन देहादिसंघातेनात्मना कृतं कर्म न मुख्येनाहंप्रत्ययविषयेनात्मना कृतं स्यात् ॥ न हि गौणसिंहाग्निभ्यां कृतं कर्म मुख्याभ्यां सिंहाग्निभ्यां कृतं स्यान्न च क्रौर्यपैंगल्येन वा मुख्यसिंहाग्न्योः कार्यं किंचित्क्रियते तस्य स्वार्थत्वेनोपक्षीणत्वात् ॥ अतः स्वयमाणौ च विजानीतो नाहं सिंहो नाहमग्निरिति न हि सिंहस्य कर्म ममाग्नेश्चेति तथा न संघातस्य कर्म मे मुख्यस्यात्मन इति —म प्रत्ययो युक्ततरः स्यान्न पुनरहं कर्ता मम कर्मेति ॥ यदाहुरात्मीयैः स्मृतीच्छाप्रयत्नैः कर्महेतुभिरात्माकरोतीति तन्नेषां मि

॥ थ्याप्रत्ययपूर्वकत्वात् ॥

व्यापारवत्त्वाभावधीवदात्मनोऽपि मुख्यसंघाताद्भेदधीद्वारा तदीयव्यापाररहितस्यात्मनि दृष्टं स्यादित्यर्थः ॥ व्यावर्त्यं दर्शयति ॥ न पुनरिति ॥ संघातेऽहंधियो मिथ्यात्वेऽपि न तत्कृतमात्मनि कर्तृत्वं किं त्वात्मीयज्ञानेच्छाप्रयत्नैरस्य कर्तृत्वं वास्तवमिति मतमनुवदति ॥ यच्चेति ॥ ज्ञानादिकृतमपि कर्तृत्वं मिथ्याधीकृतमेव ज्ञानादीनां मिथ्याधीकार्यत्वादिति दूषयति ॥ तन्नेषामिति ॥ ५८ ॥ रामः ॥

न्देवप्रपंचयति॥ मिथ्येति॥ मिथ्याज्ञानं निमित्तं कृत्वा किंचिदनिष्टं इत्यारोप्य तद्द्वारानुभूतेनेतस्मिन्न्येसाजिहासाभ्यां क्रियां निर्वर्त्य तया इष्ट
मनिष्टं च फलं भुक्त्वा तेन संस्कारेणानन्तसर्गकाः स्मरत्यादय आत्मनि क्रियां कुर्वंती नियुक्तं कर्तृत्वस्य मिथ्यात्वमित्यर्थः॥ अतीतानागत
जन्मनोरिव वर्तमानेऽपि जन्मनि कर्तृत्वादिसंसारस्य वस्तुत्वमाशंक्याह॥ यथेति॥ विमतौ कालावविद्याकृतसंसारवंतौ कालत्वाद्वर्त
मानकालवदित्यर्थः॥ संसारस्याविद्याकृतत्वे फलितमाह॥ ततश्चेति॥ तस्याविद्यात्वेन विद्यापोह्यत्वे हेत्वंतरमाह॥ अवि
द्येति॥ कुतोऽस्या

~~॥मानकालवदित्यर्थः॥ संसारस्याविद्याकृतत्वे फलितमाह॥ ततश्चेति॥ तस्याविद्या~~ [illegible]

मिथ्याप्रत्ययनिमित्तेष्टानिष्टानुभूतक्रियाफलजनितसंस्कारपूर्वकाः स्मृतीच्छाप्रयत्नादयो यथास्मिन् जन्मनि देहादिसंघाताभिमानरागद्वेषादिकृ
तौ धर्माधर्मौ तत्फलानुभवश्च तथातीतेऽतीततरेऽपि जन्मनीत्यनादिरविद्याकृतः संसारोऽतीतोऽनागतश्चानुमेयः॥ ततश्च सर्वकर्मसंन्यासा
ज्ञाननिष्ठायां आत्यंतिकसंसारोपरम इति सिद्धं॥ अविद्यात्मकत्वाच्च देहाभिमानस्य तन्निवृत्तौ देहाद्यनुपपत्तेः संसारानुपपत्तिः देहादिसंघाते आत्मा
भिमानोऽविद्यात्मको नहि लोके गवादिभ्योऽन्योऽहं मत्तश्चान्ये गवादय इति जानानो नहि तेष्वहमिति प्रत्ययं मन्यते कश्चित् इदं जानंस्तु स्थाणौ पुरुषविज्ञानव
॥ दविवेकतो देहादिसंघाते कुर्यादहमिति प्रत्ययं न विवेकतो जानन्॥५॥

विद्याकृतत्वं धर्माधर्मकृतत्वसंभवादित्याशंक्याह॥ देहादीति॥ आत्मनो धर्मादिकर्तृत्वस्याविद्यत्वान्न विद्यावतां देहाभिमानः संभवत्यतश्चा
त्मनः संघातेऽहमभिमानस्याविद्यया विद्यमानत्वेत्यर्थः॥ आत्मनो देहाद्यभिमानस्याविद्यत्वमन्वयव्यतिरेकाभ्यां साधयन्व्यतिरेकं दर्शयति॥
॥७॥ नहीति॥ अन्वयं दर्शयन्व्यतिरेकमनुवदति॥ अजानन्निति॥५॥

पुत्रेपितुरहंधीवदात्मीयेदेहादावहंधीर्गौणीत्युक्तमनुवदति ॥ यस्त्विति ॥ तत्रदृष्टांतश्रुतेर्गौणात्मविषयत्वमुक्तमंगीकरोति ॥ सत्विति ॥ न हि देहा
दावपितथैवस्वकीयेस्यादहंधीर्गौणीसाक्षात्स्यात् ॥ गौणेनेति ॥ नहिस्वकीयेनपुत्रादिना गौणात्मनापिपितृभोजनादिकार्यंक्रियते तथा देहा
देरपिगौणात्मत्वेन तेन कर्तृत्वादिकार्यमात्मनो नवास्तवंसिध्यतीत्यर्थः ॥ गौणात्मनामुख्यात्मनो नास्तिवास्तवंकार्यमित्यत्र दृष्टांतमाह ॥
गौणेति ॥ नहिगौणसिंहेन देवदत्तेन मुख्यसिंहकार्यंक्रियते नापिगौणाग्निना माणवकेन मुख्याग्निकार्यं दाहादि ॥ तथा देहादि-
नागौणात्मनामुख्यात्मनो नवास्तवं कर्तृत्वादिकर्तुंशक्यमित्यर्थः ॥ स्वर्गकामादिवाक्यप्रामाण्यादात्मनोदेहाद्यतिरेकज्ञानानस्य

यस्त्वात्मा वै पुत्रनामासीति पुत्रेऽहंप्रत्ययः ॥ स तु जन्यजनकसंबंधनिमित्तो गौणो गौणेन चात्मना भोजनादिवत्परमार्थ
कार्यं न शक्यते कर्तुं गौणसिंहाग्निभ्यां मुख्यसिंहाग्निकार्यवद्दृष्टविषयचोदनाप्रामाण्यादात्मकर्तव्यं गौणैर्देहेंद्रिया
दिभिः क्रियत इति चेन्नाविद्याकृतात्मकत्वान्नेषां ॥ न च गौणा आत्मानो देहेंद्रियादयः ॥ ५३ ॥ श्रीरामचंद्रायनमः ॥ ५

चकेन तस्याकर्तृत्वात्तत्कर्तव्यं कर्म गौणैरेव देहाद्यात्मभिः संपाद्यते ॥ न हि सुप्ते च श्रौतातिरेकज्ञाने देहाद्यात्मत्वमात्मनो मुख्यं यु-
क्तमिति चोदयति ॥ अदृष्टेति ॥ न देहादीनामात्मत्वं गौणं न हीयात्मतस्याविद्यत्वेन मिथ्यात्वादतो न गौणात्मभिरात्मकर्तव्यं कर्म-
क्रियते किंतु मिथ्यात्मभिरिति परिहरति ॥ नाविद्येति ॥ तदेव विस्पष्टयन्नर्थं स्फुटयति ॥ न गौणा इति ॥ श्रीरामचंद्रायनमः ॥ ५ ॥

भा•टी•
२०॥

कथं तर्हि देहादिष्वात्मभ्रमेऽस्पाशंक्याविद्याकृतत्वेऽसदिहेतुं विभजते ॥ किं न हीति ॥ देहादीनामनात्मनामेव सतामात्मत्वं मिथ्याप्रत्ययकृतमित्य
त्रान्वयव्यतिरेकौ उदाहरति ॥ तद्भाव इति ॥ उक्तेऽन्वये शास्त्रीयसंस्कारशून्यानामनुभवं प्रमाणयति ॥ अविवेकिनामिति ॥ व्यतिरेके
ऽपि दर्शितिशास्त्राभिज्ञानामनुभवमनुकूलयति ॥ न त्विति ॥ अन्वयव्यतिरेकाभ्यामनुभवानुसारिभ्यां सिद्धमर्थमुपसंहरति ॥ त
स्मादिति ॥ तत्कृत एव देहादावहंप्रत्ययस्तद्विशेषः ॥ किं च व्यवहारभ्रमो भेदग्रहस्य गौणत्वव्यापकत्वात्तस्य प्रकृतेऽभावान्न देहादावु ग

किं च न हि मिथ्याप्रत्ययेनैवासंगस्यात्मनः संगातात्मत्वमापद्यते ॥ तद्भावे भावात्तदभावे चाभावात् ॥ विवेकिनां स्वज्ञानकाले
बालानां दर्पणे दीर्घोऽहं गौरोऽहमिति देहादिसंघातेऽहंप्रत्ययो न त्वविवेकिनामन्योऽहं देहादिसंघातादिति ज्ञानवतां न तत्काले दे
हादिसंघातेऽहंप्रत्ययो भवति ॥ तस्मान्मिथ्याप्रत्ययाभावेऽभावात्तत्कृत एव च न गौणः पृथक् गृह्यमाणसामान्यवि
शेषयोर्हि सिंहदेवदत्तयोरग्निमाणवकयोर्वा गौणः प्रत्ययः शब्दप्रयोगो वा स्यात् ॥ नागृह्यमाणसामान्यविशेष
योः ॥ यत्तूक्तं श्रुतिप्रामाण्यादिति ॥ न तत्प्रामाण्यस्यादृष्टविषयत्वात् ॥ श्रीरामः

आ०१८॥
३५७॥
रामः॥

हंशब्दप्रत्ययौ गौणावित्याह ॥ पृथगिति ॥ अदृष्टविषयचोदनाप्रामाण्यात्कर्तुरात्मनो देहादिव्यतिरेकावधारणात्तस्य दे
हादावहमभिमानस्य गौणस्य गौणत्वे स्वोक्तमनुवदति ॥ यत्त्विति ॥ श्रुतिप्रामाण्यस्याज्ञातार्थविषयत्वान्मानान्तरासि ष
द्धेव्यतिरिक्तात्मनि चोदनाप्रामाण्याभावाच्च न तद्वष्टंभेन देहादावात्माभिमानस्य गौणत्वेत्युत्तरमाह ॥ न नदिति ॥ ५४ ॥०

श्रुतिप्रामाण्यस्यादृष्टविषयत्वंस्पष्टयति।।प्रत्यक्षादीति।।अज्ञातार्थज्ञापकंप्रमाणमितिस्थितेनेर्नज्ञातेर्थेश्रुतिप्रामाण्यमित्या
ह।।अदृष्टेति।।अज्ञातसाध्यसाधनसंबंधबोधिनःशास्त्रस्यातिरिक्तात्मन्योदासीन्येफलितमाह।।तस्मादिति।।अन्वयव्यतिरे
काभ्यांदृष्टोमिथ्याज्ञाननिमित्तोदेहादिसंघातेऽहंप्रत्ययस्तस्यैक्रियावत्तु।।अस्यविषयत्वाच्चोदनायाः।।नातिरिक्तात्मविषयत्वेत्यु
क्तं।।इत्थमौंतद्विषयत्वांगीकारेपिननन्विवौद्धशास्त्रस्यप्रत्यक्षविरोधादित्याह।।नहीति।।अपौरुषेयायाःश्रुतेरसंभावितदोषायाः
भि मानांतरविरोधेपिप्रामाण्यमप्रत्याख्येयमित्यभिप्रेत्याह।।यदीति।।स्वार्थबोधयंस्याःश्रुतेरविरोधापेक्षितत्वाद्विरुद्धार्थेवा
।।दित्वेनत्स।।

हि प्रत्यक्षादिप्रमाणानुपलब्धेविषयेऽग्निहोत्रादिसाध्यसाधनसंबंधेश्रुतेःप्रामाण्यंनप्रत्यक्षादिविषयेऽदृष्टदर्शनार्थत्वा
त्प्रामाण्यस्य।तस्मान्नदृष्टमिथ्याज्ञाननिमित्तस्याहंप्रत्ययस्यदेहादिसंघातेगौणत्वंकल्पयितुंशक्यं।नहिश्रुतिशत
मपिशीतोग्निरप्रकाशोवेतिब्रुवत्प्रामाण्यमुपैति।।यदिब्रूयाच्छीतोऽग्निरप्रकाशोवेति।।तथाप्यर्थांतरंश्रुतेर्विवक्षि प्प
तंकल्प्यंप्रामाण्यान्यथानुपपत्तेः।।नतुप्रमाणांतरविरुद्धंस्ववचनविरुद्धंवा।।कर्मणोमिथ्याप्रत्ययवत्कर्तृकत्वात्कर्तुरभा
।।वेश्रुतेरप्रमाण्यमितिचेन्न।।

रित्याशयाविवक्षितमर्थांतरमविरुद्धंतस्याःस्वीकर्तव्यंविरोधेतत्प्रामाण्यानुपपत्तेरित्याह।।तथापीति।।अविरोधमेवधार्यश्रुतेःसर्वकल्प नउ
नानयुक्तेत्यावर्त्यमाह।।नत्विति।।अविद्यावत्कर्तृकंकर्मेतित्वयोपगमात्तुसन्नायांविद्यायामविद्यायाअभावेनदधीनकर्तुरभावादं
तरेणकर्तारमनुष्ठानासिद्धौकर्मकांडप्रामाण्यमित्यध्ययनविधिविरोधःस्यादितिशंकनेकर्मणइति।।५।।श्रीरामचंद्रायनमः

गी॰भा॰टी॰
३५८

कर्मकांडश्रुतेर्विधोद्यात्सर्वव्यापेव्यावहारिकप्रामाण्यस्यतात्विकप्रामाण्याभावेपिसंभवाद्ब्रह्मकांडश्रुतेश्चतात्विकप्रामाण्यस्यब्रह्म
विद्याजनकत्वेनोपपन्नत्वान्नाध्ययनविधिविरोधइतिपरिहरति॥नचेति॥कर्मकांडश्रुतेस्तात्विकप्रामाण्याभावेब्रह्मकांडश्रु
तेरपितदसिद्धिर्विशेषादितिशंकते॥कर्मेति॥उत्पन्नायाब्रह्मविद्यायाबाधकाभावेनप्रामाण्यतानहेतुश्रुतेस्तात्विकंप्रामाण्य॰
मितिदूषयति॥नबाधकेति॥ब्रह्मविद्यायाबाधकानुपपत्तिंदृष्टांतेनसाधयति॥यथेति॥देहादिसंघातवदित्यपेरर्थः॥लौकिकावगतेरिवा

नब्रह्मविद्यायामर्थवत्वोपपत्तेः॥कर्मविधिश्रुतिवत्‌ब्रह्मविद्याविधिश्रुतेरप्रामाण्यप्रसंगइतिचेन्नबाधकप्रत्ययानुपपत्ते
र्यथाचब्रह्मविद्याविधिश्रुत्यात्मन्यवगतेदेहादिसंघातेऽहंप्रत्ययोबाध्यतेतथात्मन्येवात्मावगतौनकदाचित्केनचि
त्कथंचिदपिबाधितुंशक्यफलाव्यतिरेकादवगतेःयथाग्निरुष्णःप्रकाशश्चेति॥नचकर्मविधिश्रुतेरप्रामाण्यंत
र्वपूर्वप्रवृत्तिनिरोधेनोत्तरोत्तरापूर्वापूर्वप्रवृत्तिजननस्यप्रत्यगात्माभिमुख्यप्रवृत्त्युत्पादनार्थत्वात्‌॥श्रीरामः

आ॰१८॥
३५८॥
रामः॥

त्मावगतेरपिफलाव्यतिरेकमुदाहरणेनस्फोरयति॥यथेति॥फलमज्ञाननिवृत्तिःकर्मविधिश्रुतिवदित्युक्तंदृष्टांतंविघ
टयति॥नचेति॥अनादिकालप्रवृत्तस्वाभाविकप्रवृत्तिव्यक्तीनांप्रवृत्तिनिबंधेनयागाद्यलौकिकप्रवृत्तिव्यक्तिंजनयतिकर्मकां
डश्रुतिस्तज्जननंचचित्तशुद्धिद्वाराप्रत्यगात्माभिमुख्यप्रवृत्तिमुत्पादयतितथाचकर्मविधिश्रुतीनांपारंपर्येणप्रत्यगा
॥त्मज्ञानार्थत्वात्तात्विकप्रामाण्यसिद्धिरित्यर्थः॥५॥श्री॥रामः॥

नन्वेवमपि श्रुतेर्मिथ्यात्वाद्धर्माभासवदप्रामाण्यमिति चेन्नेत्याह ॥ मिथ्यात्वेपीति ॥ स्वरूपेणासत्त्वेपि सत्योपेयद्वारा प्रामाण्यमित्यत्र दृष्टांतमाह ॥ यथेति ॥ मंत्रार्थवादेतिहासपुराणानां श्रुतेर्थे प्रामाण्याभावेपि शेषिविध्यनुरोधेन प्रामाण्यवत्प्रकृतेपि श्रुतेः स्वरूपेणासत्त्वापि विषयसत्तया सत्त्वं नतः प्रामाण्यमविरुद्धमित्यर्थः ॥ वाक्यस्य शेषिविध्यनुरोधेन प्रामाण्यं नालौकिकमित्याह ॥ लोकेपीति ॥ कर्मकांडश्रुतीनामुक्तरीत्या परंपरया प्रामाण्येपि साक्षात्प्रामाण्यमुपेक्षितमित्याशंक्याह ॥ प्रकारांतरेति ॥ आत्मज्ञानोदयात्प्रागवस्थाप्रकाशंतरं तत्रस्थितानां कर्मकांड

२ प्रमाणं।

मिथ्यात्वेऽप्युपायस्योपेयसत्यतया सत्त्वमेव स्याद्यथार्थवादानां विधिशेषाणां ॥ लोकेपि बालोन्मत्तादीनां पय आदिपाययितव्ये चूडावर्द्धनादिवचनं प्रकारांतरस्थानां च साक्षादेव वा प्रामाण्यसिद्धिः ॥ प्रागात्मज्ञानाद्देहाभिमाननिमित्तप्रत्यक्षादिप्रामाण्यवत् ॥ यत्तु मन्यसे स्वयमव्याप्रियमाणोप्यात्मा सन्निधिमात्रेण करोतीति तदेव मुख्यं कर्तृत्वमात्मनो यथा राज्ञा युध्यमानेषु योधेषु युध्यत इति प्रसिद्धं स्वयमयुध्यमानोऽ
)) ऽपि सन्निधानादेव जितः पराजितश्चेति ॥ ५४ ॥

श्रुतीनामज्ञानसंबंधबोधकत्वेन साक्षादेव प्रामाण्यमिष्टमित्यर्थः ॥ ज्ञानात्पूर्वं कर्मश्रुतीनां व्यावहारिकप्रामाण्ये दृष्टांतमाह ॥ प्रागिति ॥ प्रतीचि कर्तृत्वस्याविद्यत्वेपि श्रुतिप्रामाण्यमप्रत्यूहं इत्युक्तं ॥ संप्रति कर्तृत्वस्य प्रकारांतरेण पारमार्थिकत्वमुत्थापयति ॥ यत्त्विति ॥ स्वव्यापाराभावे सन्निधिमात्रेणाकुर्वतो मुख्यं कर्तृत्वमित्याशंक्य दृष्टांतमाह ॥ यथेति ॥ स्वयमयुध्यमानस्य कथं तत्फलवत्त्वमित्याशंक्य मासिद्धिवशादित्याह ॥ जित इति ॥ ५४ ॥ श्रीरामायनमः ॥ ५ ॥

गी०भा०टी०
३५१॥

कायिकव्यापाराभावेपिकर्तृत्वस्यमुख्यत्वेदृष्टांतमाह॥सेनापतिरिति॥तस्यापिफलवत्वंराजवदविशिष्टमित्याह॥क्रियेति॥अ
न्यकर्मण्यन्यस्यसान्निहितस्यमुख्येकर्तृत्वेवैदिकमुदाहरणमाह॥यथाचेति॥कथमृत्विजांकर्मयजमानस्येत्याशंक्याह॥तत्फ
लस्येति॥स्वव्यापाराद्दतेसन्निधेरेवान्यव्यापारहेतोर्मुख्यकर्तृत्वेदृष्टांतांतरमाह॥यथाचेति॥क्रियांकुर्वदेवकारणंकारकमित्यं
गीकारविरोधान्नैतदितिदूषयति॥तदसदिति॥अकुर्वतःकारकत्वप्रसंगात्कारकविशेषयैत्वेनांगीकारोपपत्तिरितिशंकते॥कार

तथासेनापतिर्वाचैवकरोतिक्रियाफलसंवंधश्चराज्ञःसेनापतेश्चदृष्टः॥यथाचऋत्विक्कर्मयजमानस्यतथादेहादीनां
कर्मआत्मकृतंस्यात्फलस्यात्मगामित्वात्यथाचभ्रामकस्यलोहभ्रामयितृत्वादव्यापृतस्यैवमुख्यमेवकर्तृत्वंतथास्वा
त्मनइति॥तदसदकुर्वतःकारकत्वप्रसंगात्कारकमनेकप्रकारमितिचेन्नराजप्रभृतीनांमुख्यस्यापिकर्तृत्वस्यदर्शना
त्राजातावत्स्वव्यापारेणापियुध्यते॥योधानांचयोधयितृत्वेनधनदानेनचमुख्यमेवकर्तृत्वं॥तथाजयपराजयफलो
पभोगेनतथायजमानस्यापिप्रधानत्यागेचदक्षिणादानेचमुख्यमेवकर्तृत्वं॥तस्मादव्यापृतस्यकर्तृत्वोपचारोयः॥
॥ सगौणइत्यवगम्यते॥५१॥

५१

कमिति॥स्वव्यापारमंतरेणनकिंचिदपिकारकमितिपरिहरति॥नराजेति॥दर्शनमेवविशदयति॥राजेति॥यथाराज्ञो
युध्येयोधयितृत्वेधनदानेचमुख्यंकर्तृत्वंतथाफलभोगेपिमुख्यमेवास्यकर्तृत्वमित्याह॥तथेति॥यदुक्तंऋत्विक्कर्मय
जमानस्येतितत्राह॥यजमानस्यापीति॥स्वव्यापारादेवमुख्यंकर्तृत्वमितिस्थितेफलितमाह॥तस्मादिति॥५१॥५१॥

आ०१८॥
३५१॥
रामः॥

र्च तदेवप्रपंचयति॥ यदिति॥ तर्हि सन्निधानादेव मुख्यं कर्तृत्वं राजादीनामुपगमम् इति नेत्याह॥ न तथेति॥ राजादीनां स्वव्यापारवत्वे प्रवृत्तं सिद्धमि
त्याह॥ तस्मादिति॥ राजप्रभृतीनां सन्निधेरेव कर्तृत्वस्य गौणत्वे जयादिफलवत्वस्यापि सिद्धं गौणत्वमित्याह॥ तथा चेति तत्र प्रवृत्तं हेतु
त्वेन स्मारयति॥ नेति अन्यव्यापारेण अस्य मुख्यकर्तृत्वाभावे फलितमुपसंहरति॥ तस्मादिति कृत्स्नं तर्हि त्वयात्मनि कर्तृत्वादि स्वीकृतं

परि मुख्यमन्यत् कर्तृत्वं स्वव्यापारलक्षणं नोपलभ्यते राजयजमानप्रभृतीनां तत्र सन्निधिमात्रेणापि कर्तृत्वं मुख्यं परिकल्प्येत
यथा भ्रामकस्य लोहभ्रामणे॥ न तथा राजयजमानादीनां स्वव्यापारो नोपलभ्यते॥ तस्मात् सन्निधिमात्रेण कर्तृत्वं गौणमेव॥ तथा च
सति गौणत्वात् तत्फलसंबंधोपि गौण एव स्यात्॥ न गौणेन मुख्यं कार्यं निर्वर्त्यते तस्मादसदेवैतत्ती पत्त देहादीनां व्या
पारेण व्यापृत आत्मा कर्ता भोक्ता च स्यादिति॥ भ्रांतिनिमित्तं तु सर्वं चोपपद्यते यथा स्वप्नमायायां चैवं॥ न च देहाद्यात्मप्रत्य
यभ्रांतिसंतानविच्छेदेषु सुषुप्तिसमाध्यादिषु कर्तृत्वभोक्तृत्वाद्यनर्थ उपलभ्यते॥ तस्माद्भ्रांतिनिमित्तप्रत्यय एवायं संसा
॥ रभ्रमो न तु परमार्थ इति॥ सम्यग्दर्शनादस्यंतमेवोपरम इति सिद्धं॥

न हि बुद्धेस्तदिष्टं कर्तृ शास्त्रार्थवत्वादित्यायात् तत्राह भ्रांतीति॥ कर्तृत्वाद्यात्मनि भ्रांतमित्येतदुदाहरणेन स्फोरयति॥
यथेति॥ मिथ्याज्ञानकृतमात्मनि कर्तृत्वादीत्यत्र व्यतिरेकं दर्शयति॥ तच्चेति॥ उक्तव्याप्तिकं फलं कथयति॥ तस्मादि २
ति॥ संसारभ्रमस्याविद्याकृतत्वे सिद्धे परमप्रयोजनमुपसंहरति॥ समाप्तमिति [illegible] ॥६६॥ श्रीरामः॥ श्रीः

[illegible]तात्पर्यार्थविचारद्वारा निर्धार्यानंतरं श्लोकमवतारयति ।। सर्वमिति ।। प्रकृतेरेवत्वष्टादशाध्याये गीताशास्त्रार्थं सर्वप्रतिपत्तिसौकर्यार्थ
उपसंहृत्यांते च सर्वधर्मान्परित्यज्येत्यादौ विशेषतस्तस्य संक्षेपेणोपसंहारं कृत्वा संप्रदायविधिवचनस्यावसरेसन्निदानीमिति योजना ।। कि
मिति विस्तरेणोपसंहृतः शास्त्रार्थः संक्षिप्योपसंह्रियते तेन तत्राह ।। शास्त्रार्थेति ।। संक्षेपविस्तराभ्यामुक्तोर्थः सर्वेषां दृढतया बुद्धिम

६२।मि

सर्वगीताशास्त्रार्थमुपसंहृत्यास्मिन्नध्याये विशेषतश्चांते इह शास्त्रार्थदार्ढ्याय संक्षेपत उपसंहारं कृत्वाऽथेदानीं शास्त्रसंप्र
सांदायविधिमाह ।। श्री ।। इदं ते नातपस्काय नाभक्ताय कदाचन ।। न चाशुश्रूषवे वाच्यं न च मां योऽभ्यसूयति ।। ६७ ।। इदं शास्त्रं ते
तव हिताय मयोक्तं संसारविच्छित्तये अस्मिञ्छास्त्रे श्रुते चावधारिते संसारोच्छित्तिर्भवतीति भावः ।। अतपस्काय तपोरहि
ताय न वाच्यमिति व्यवहितेन संबध्यते ।। तपस्विनेऽप्यभक्ताय गुरौ देवे च भक्तिरहिताय कदाचन कस्यांचिदप्यवस्था
यां न वाच्यं ।। भक्तस्तपस्व्यपि सन्नशुश्रूषुर्यो भवति तस्मा अपि न वाच्यं ।। न च मां यो वासुदेवं मनुष्यं प्राकृतं मत्वाऽभ्यसू
यत्यात्मप्रशंसादिदोषाध्यारोपणेन ममेश्वरत्वमजानन्न सहते असावप्ययोग्यस्तस्मा अपि न वाच्यं ।। भगवत्यनसूया
युक्ताय तपस्विने भक्ताय शुश्रूषवे च वाच्यं शास्त्रमिति सामर्थ्याद्गम्यते ।। तत्र मेधाविने तपस्विने वेत्यनयोर्विकल्पदर्शनात्

अ०१८।।
३६०।।
श्रीरामः।।

धिरोहतीत्यर्थः ।। हितायेत्येतद्व्याचष्टे ।। संसारेति ।। कदाचनेति सर्वैः संबध्यते ।। प्रतिषेधसामर्थ्यसिद्धमर्थं ।। कथयति ।।
भग[illegible]वतीति ।। अर्थसिद्धेर्थे स्मरतं नरमनुस्तत्समेधावित्वमंतर्भावयति ।। तत्रेति ।। विकल्पदर्शनात्तेष्वन्येषु विशेषणेषु मेधा
।। वित्वमपि प्रविशतीत्यर्थः ।।

विकल्पपक्षे कथमधिकारिप्रतिपत्तिरित्यत आह ॥ शुश्रूषेति ॥ ताभ्यां युक्ताय भगवत्यसूयारहिताय तपस्विने वाच्यमिति संबंधः ॥ न युक्ता
य शुश्रूषाभक्तियुक्ताय भगवत्यनसूयासहितायेत्यर्थः ॥ तपस्वित्वं मेधावित्वं वा निरपेक्षमधिकारिविशेषणमिति शंकां शातय
ति ॥ शुश्रूषेति ॥ भगवद्विषयाऽसूयाराहित्येनास्यैर्यं सूचयति ॥ भगवतीति ॥ कस्मै तर्हि वाच्यमेतदित्याशंक्य पूर्वोक्तसर्वगुणसंपन्ना
येत्याह ॥ गुरुशुश्रूषेति ॥ अनुक्तेतरविशेषणोपलक्षणार्थमुभयग्रहणं मेधाविनस्तपस्वित्वं नातीवापेक्ष्यमतः सर्वमन्यद्बाधका
भावादपेक्षितमेवेतिभावः ॥६७॥ शास्त्रसंप्रदायप्रवृत्त्यर्थमनंतरश्लोकप्रवर्त्तिं दर्शयति ॥ संप्रदायस्येति ॥ य इत्यध्यापको

शुश्रूषाभक्तियुक्ताय तपस्विने तद्युक्ताय मेधाविने वा वाच्यं ॥ शुश्रूषाभक्तिरहिताय न तपस्विने नापि मेधाविने वा वाच्यं भग
वत्यसूयायुक्ताय समस्तगुणवतेऽपि न वाच्यं ॥ गुरुशुश्रूषाभक्तिमते च वाच्यं इत्येष शास्त्रसंप्रदायविधिः संप्रदायस्य
कर्त्तुः फलमिदानीमाह ॥ य इमं परमं गुह्यं मद्भक्तेष्वभिधास्यति ॥ भक्तिं मयि परां कृत्वा मामेवैष्यत्यसंशयः ॥६८॥
परमं यथोक्तं परमं परमनिःश्रेयसार्थं केशवार्जुनयोः संवादरूपं ग्रंथं गुह्यं गोप्यं ॥ मद्भक्तेषु मयि भक्तिमत्स्वभिधा
॥६८॥ स्यति वक्ष्यति ग्रंथतोऽर्थतश्च स्थापयिष्यतीत्यर्थः ॥ यथा त्वयि मया ॥६८॥

निर्दिश्यते ॥ परमत्वं ग्रंथस्य निरतिशयपुरुषार्थसाधनत्वमित्याह ॥ परममिति ॥ गोप्यत्वमपि रहस्यार्थविषयत्वात् ॥ यथोक्तसंवादस्य
ग्रंथतोऽर्थतश्च भक्तेषु स्थापने दृष्टांतमाह ॥ यथेति ॥ मयि वासुदेवे भगवत्यनन्यभक्तेन त्वयि यथा मया ग्रंथोऽर्थतः स्थापितस्त
था मद्भक्तेष्वन्येष्वपि यो ग्रंथमिमं स्थापयिष्यति तस्येदं फलमित्युत्तरत्र संबंधः ॥६८॥ श्रीरामकृष्णायनमः ॥६८॥०॥

गी॰भा॰टी॰
३६१॥

ध्रि१

नाभक्तायेति भक्तेरधिकारिविशेषणत्वोक्तेर्मद्भक्तेष्विति पुनर्भक्तिग्रहणमनर्थकमित्याशंक्याह ॥ भक्तेरिति ॥ शुश्रूषादिसहकारि
राहित्यं केवलशब्दार्थः ॥ यद्यपि मात्रशब्देन सूचितमेतत्तथापीतरेण स्फुटीकृतमित्यविरोधः ॥ प्रश्नपूर्वकमभिधानप्रकारम
भिनयति ॥ कथमित्यादिना ॥ भगवति भक्तिकरणप्रकारं प्रकटयति ॥ भगवत इति ॥ यत्स्वद्वापोसितं दरयति ॥ तस्येति ॥ मामे
ष्यत्येवेत्यन्वयं गृहीत्वा व्याचष्टे ॥ मुच्यत एवेति ॥ ६८ ॥ ननु सर्वेषां मुक्तिसाधनानां ध्यानस्य श्रेष्ठत्वात्तन्निष्ठस्य मुमुक्षोर्ना
॥ स्तिविद्यासंप्रदाने प्रवृत्तिरिति चाह ॥

भक्तेः पुनर्ग्रहणात् भक्तिमात्रेण केवलेन शास्त्रसंप्रदाने पात्रं भवतीति गम्यते ॥ कथमभिधास्यतीत्युच्यते ॥ भक्तिं मयि परां कृत्वा
भगवतः परमगुरोः शुश्रूषा मयाक्रियत इत्येवं कृत्वेत्यर्थः ॥ तस्येदं फलं मामेवैष्यति मुच्यत एवात्र संशयो न कर्तव्यः ॥ ५
किंच ॥ न च तस्मान्मनुष्येषु कश्चिन्मे प्रियकृत्तमः ॥ भविता न च मे तस्मादन्यः प्रियतरो भुवि ॥ ६ ॥ न च तस्मात् शास्त्रसं
प्रदायकृतो मनुष्येषु मनुष्याणां मध्ये कश्चिन्मे मम प्रियकृत्तमः ॥ अतिशयेन प्रियः प्रियकृत्तमस्ततोऽन्यः प्रियकृत्तमो
नास्त्येवेत्यर्थः ॥ वर्तमानेषु भविता न भविष्यत्यपि कालेन तस्मात् द्वितीयो योऽन्यः प्रियतरो भुवि अस्मिंल्लोके ॥ ७ ॥

आ॰१८॥
३६१॥

किंचेति ॥ एतच्च विद्यासंप्रदानं मुमुक्षुणा यथोक्तविशेषणवते कर्तव्यमित्यर्थः ॥ वर्तमानेषु मध्ये ततोऽन्यो नास्त्येव प्रियकृत्तमो
नाप्यतीतेषु तादृक्कश्चिदासीदिति शेषः ॥ तस्माद्विद्यासंप्रदायकर्तुः सकाशादित्यर्थः ॥ ध्याननिष्ठस्य श्रेष्ठत्वेऽपि स्वसं
प्रदायप्रवक्तुः श्रेष्ठतमत्वादुचिता विद्यासंप्रदाने प्रवृत्तिरिति भावः ॥ ६९ ॥ श्रीरामचंद्राय नमः ॥ ७ ॥

संप्रदाय प्रवर्त्तकुः सर्वाधिकत्वं फलं स वक्ता विष्णुरित्युक्ते न स विश्वाधिदैवतमिति न्याये नोक्ता संप्रत्यध्येतुर्विवक्षितं फलमाह॥ योपीति॥ यथोक्तस्य शास्त्रस्य योध्येता तेनेदं कृतं स्यादिति संबंधः॥ तदेवाह॥ अध्येष्यते चेति॥ तेनेदं कृतं सित्सच्चरदंशाद्दार्थं विशदयति॥ ज्ञानेति॥ तेनाहमिष्टः स्यामिति संबंधः॥ चतुर्विधानां यज्ञानां मध्ये ज्ञानयज्ञस्य श्रेयान्द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञ इति विशिष्टत्वाभिधानात्तेनाहमिष्टः स्यामित्यध्ययनस्य स्तुतिरभिमतेत्याह॥ विधीति॥ पश्चांतनरमाह॥ ॥ः

योऽपि॥ अध्येष्यते च य इमं धर्म्यं संवादमावयोः॥ ज्ञानयज्ञेन तेनाहमिष्टः स्यामिति मे मतिः॥ ७०॥ अध्येष्यते च पठिष्यति य इमं धर्म्यं धर्मादनपेतं संवादरूपं ग्रंथमावयोस्तेनेदं कृतं स्यात्॥ ज्ञानयज्ञेन विधिजपोपांशुमानसानां यज्ञानां ज्ञानयज्ञो मानसत्वाद्विशिष्टतमस्तस्य तेन ज्ञानयज्ञेन गीताशास्त्राध्ययनं स्तूयते॥ फलविधिरेव वा॥ देवतादिविषयज्ञानयज्ञफलतुल्यमस्य फलं भवतीति तेनाध्ययनेनाहमिष्टः पूजितः स्यां भवेयामिति मे मम मतिः निश्चयः॥ ५
अथ श्रोतुरिदं फलं॥ श्रद्धावाननसूयश्च शृणुयादपि यो नरः॥ सोऽपि मुक्तः शुभाल्लोकान्प्राप्नुयात्पुण्यकर्मणां॥

फलेति॥ फलविधिमेव प्रकटयति॥ देवतादीति॥ यद्विज्ञानयज्ञस्य फलं कैवल्यं तेन तुल्यमस्याध्येतुः संपद्यते तच्चेदेवताद्यात्मत्वमित्यर्थः॥ कथमध्ययनादेव सर्वात्मकत्वं फलं लभ्यते॥ तस्मात्तत्सर्वमभवदिति हि श्रुतिरित्युचाह॥ तेनेति॥ तेनाध्येत्राज्ञानयज्ञतुल्येनाध्ययनेन भगवानिष्पन्ने॥ तथा च तज्ज्ञानाद्युक्तं फलमविरुद्धमित्यर्थः॥

प्रवक्तुरध्येतुश्चफलमुक्त्वाश्रोतुरिदानींफलंकथयति॥अथेति॥७१॥आचार्येणशिष्याययावद्ज्ञानसंशयविपर्यासंनाव
दनेकधोपदेष्टव्यमितिनिदर्शयितुंभगवानर्जुनंप्रतिपृष्टवानित्याह॥शिष्यस्येति॥प्रष्टुरभिप्रायंप्रकटयति॥तदग्रहणादिति॥
शिष्यश्चेदुक्तंग्रहीतुंनेष्टेनहितंप्रहीणोदासीन्यमाचार्यस्योचितंतस्यमंदबुद्धित्वादित्याशंक्याह॥यत्नांतरमिति॥कच्चि:

श्रद्धावान्श्रद्दधानोऽनसूयश्चासूयाविवर्जितःसन्निमंग्रंथंशृणुयादपियोनरोऽपिशब्दाद्विमुक्तार्थज्ञानवान्सोपिमुक्तःपापा
त्शुभान्प्रशस्तान्लोकान्प्राप्नुयात्पुण्यकर्मणांअग्निहोत्रादिकर्मवतांप्राप्नोति॥शिष्यस्यशास्त्रार्थग्रहणाग्रहणवि
वेकबुभुत्सयापृच्छति॥तदग्रहणेज्ञानेपुनर्ग्राहयिष्याम्युपायांतरेणेतिप्रष्टुरभिप्रायोयत्नांतरंवास्याच्छिष्यःकृ
तार्थःकर्तव्यरहिताचार्यधर्मःप्रदर्शितोभवति॥कच्चिदेतच्छ्रुतंपार्थत्वयैकाग्रेणचेतसा॥कच्चिदज्ञानसंमोहःप्रनष्टस्ते
धनंजय॥७२॥कच्चिदितिकिमेतन्मयोक्तंश्रुतंश्रवणेनावधारितंपार्थकिंत्वयाएकाग्रेणचेतसाएकाग्रेणचित्तेनकिं
वाप्रमादितं॥कच्चिदज्ञानसंमोहोऽज्ञाननिमित्तःसंमोहोविचित्तभावोविवेकनाशःस्वाभाविकःकिंप्रनष्टःयदर्थोऽयं
शास्त्रश्रवणायासस्तवममचोपदेष्टृत्वायासःप्रनष्टस्तेतुभ्यंधनंजय॥७२॥श्रीराम॥

दितिप्रशस्यप्रश्नेनतमेवव्याचष्टे॥किमेतदिति॥द्वितीयंकिंपदंपूर्वस्यव्याख्यानतयासंबध्यते॥कच्चिदिति॥द्वितीयंप्रश्नंवि
भजते॥किंप्रनष्टइति॥मोहप्रणाशस्यप्रसंगंदर्शयति॥यदर्थइति॥७२॥श्रीरामकृष्णायनमःवासुदेवायनमः॥७२॥

प्रथमोपदिष्टज्ञानस्यअज्ञानसंदेहविपर्यासरहितस्यप्रष्टस्यभगवदनुग्रहात्प्राप्तिकथनेनभगवंतंपरितोषयिष्यन्नर्जुनोविज्ञापितवा
नित्याह॥अर्जुनइति॥अज्ञानोत्थस्याविवेकस्यनष्टत्वमेवप्रकटयति॥समस्तइति॥स्वयंज्योतिषिप्रतीचिब्रह्मण्यविद्याभ्रमंवि-
धापनयतिनाविदितंप्रकाशयतीतिमत्वाह॥स्मृतिश्चेति॥स्मृतिलाभेकिंस्यादित्यतआह॥यस्मादिति॥मोहनाशेस्मृतिप्र

अर्जुनउवाच॥नष्टोमोहःस्मृतिर्लब्धात्वत्प्रसादान्मयाच्युत॥स्थितोस्मिगतसंदेहःकरिष्येवचनंतव॥७३॥नष्टोमो
होऽज्ञानजःसमस्तःसंसारानर्थहेतुःसागरइवदुरंतोरंरंदुरुत्तारः॥स्मृतिश्चात्मतत्वविषयालब्धा॥यस्माल्लाभात्स
र्वग्रंथीनांविप्रमोक्षः॥त्वत्प्रसादात्तवप्रसादात्॥मयात्वत्पादसमाश्रितेनाच्युत।दासेन॥अनेनमोहनाशप्रश्नप्रति
वचनेनसर्वशास्त्रार्थज्ञानफलमेतावदेवेतिनिश्चितंदर्शितंभवति॥यदुक्तंअज्ञानसंमोहनाशआत्मस्मृतिलाभश्चे
ति॥तथाचश्रुतिः॥अनात्मविद्बद्धोयामीतिउपन्यस्यात्मज्ञानेनैवसर्वग्रंथिविप्रमोक्षउक्तोभिद्यतेहृदयग्रंथिश्छिद्य॥
यंतेसर्वसंशयाःतत्रकोमोहःकःशोकएकत्वमनुपश्यतइतिचमंत्रवर्णात्॥७३॥श्रीरामःश्रीकृष्णायवासुदेवायः॥

तिलंभेचासाधारणकारणमाह॥त्वत्प्रसादादिति॥प्रकृतेनप्रश्नप्रतिवचनेनलब्धमर्थंकथयति॥अनेनेति॥यदुक्तंस्मृति
प्रतिलंभादशेषतोदयग्रन्थीनांविप्रमोक्षःस्यादितितत्रप्रमाणमाह॥तथाचेति॥ज्ञानादज्ञाननिवृत्तिकार्यनिरंतौश्रुत्यंतरमपि
ह ॥संवादयति॥भिद्यतइति॥७३॥

गी०भा०टी०
३६३॥

भगवदनुग्रहादज्ञानकृतमोहदाहस्यानंतरमात्मज्ञानेगतिर्लब्धेत्वदाज्ञाप्रतीक्षोहमित्युत्तरार्द्धं व्याकरोति ॥ अथेतिं तव वचनं करिष्येहमित्यस्य तात्पर्यमाह ॥ अहमिति ॥ ७३ ॥ शास्त्रार्थे समाप्ते सत्यस्यामवस्थायां संजयवचनं कुत्रोपयुक्तमित्यत आह ॥ परिसमाप्त इति ॥ वासुदेवस्य सर्वज्ञस्य सर्वेश्वरस्य कृतार्थस्य पार्थस्य पृथासुतस्यार्जुनस्य

॥ महात्मनोऽक्षुद्रबुद्धेः सर्वाधिकारिणः ॥

अथेदानीं ब्रह्मासने स्थितोऽस्मि गतसंदेहो मुक्तसंशयः करिष्ये वचनं तवाहं तत्त्वसाक्षात्कृतार्थो न मम कर्तव्यमस्तीत्यभिप्रायः ॥ परिसमाप्तः शास्त्रार्थः ॥ अथेदानीं कथासंबंधप्रदर्शनार्थं संजय उवाच ॥ इत्यहं वासुदेवस्य पार्थस्य च महात्मनः ॥ संवादमिममश्रौषमद्भुतं रोमहर्षणं ॥ ७४ ॥ इत्येवमहं वासुदेवस्य पार्थस्य च महात्मनः संवादमिमं यथोक्तमश्रौषं श्रुतवानस्म्यद्भुतमत्यंतविस्मयकरं ॥ रोमहर्षणं रोमांचकरं ॥ तंचद्रुमं ॥ व्यासप्रसादाच्छ्रुतवानेतद्गुह्यमहं परं ॥ योगं योगेश्वरात्कृष्णात्साक्षात्कथयतः स्वयं ॥ ७५ ॥ श्रीरामाय नमः ॥

आ०१८॥
३६२॥
रामः॥

संपन्नस्य सम्यग्वादं संवादं गुरुशिष्यभावेन प्रश्नप्रतिवचनाभिधानमिममनुक्रांतमद्भुतं विस्मयकरं रोमाणि हर्षनिपुलकीभवंत्यनेनेति रोमहर्षणमाल्हादकरं यथोक्तं श्रुतवानस्मीत्याह ॥ इत्येवमिति ॥ ७४ ॥ विप्रकृष्टं संवादं कथमश्रौषीरिति चेत्तत्राह ॥ तं चेति ॥ ७५ ॥

गी०

एतस्यदंसंवादपरत्वात्सुदृढिंगतेनेनव्यमित्याह॥एतदिति॥परमपुरुषार्थोपयिकत्वात्परत्वं॥परंगुह्यमतिशयेनरहस्यमितिवा॥०
योगोज्ञानंकर्मवात्तदर्थत्वादयंसंवादोयोगउक्तः॥अथवाथेचित्तवृत्तिनिरोधस्ययोगस्यांगत्वादेषसंवादोयोगइत्याह॥संवादमि
ति॥योगानामीश्वरोयोगेश्वरस्तदनुग्रहहेतुत्वाद्योगस्तत्फलत्वपोस्तनःसाक्षाद्व्यवधानेनश्रुतत्वान्नपरंपरयेत्याह॥योगेश्व

स

व्यासप्रसादात्ततोदिव्यचक्षुर्लाभात्श्रुतवानेतन्‌एतंसंवादंगुह्यमहंपरंयोगंयोगार्थत्वात्ग्रंथोपियोगस्तंसंवादमिमंयोगमेववा॥योगेश्व
रात्कृष्णात्वासुदेवात्न्साक्षात्कथयतःस्वयंनपरंपरातः॥राजन्संस्मृत्यसंस्मृत्यसंवादमिममद्भुतं॥केशवार्जुनयोःपुण्यंहृ
ष्यामिचमुहुर्मुहुः॥७६॥हेराजन्धृतराष्ट्रसंस्मृत्यसंस्मृत्यसंवादमिमंमद्भुतंकेशवार्जुनयोःपुण्यंश्रवणेनापिपापहरंस्म
त्वाहृष्यामिचमुहुर्मुहुःप्रतिक्षणं॥तच्चसंस्मृत्यसंस्मृत्यरूपमत्यद्भुतंहरेः॥विस्मयोमेमहान्राजन्हृष्यामिचपुनः
पुनः॥७७॥तच्चसंस्मृत्यसंस्मृत्यरूपमत्यद्भुतंहरेःविश्वरूपंविस्मयोमेमहान्राजन्हृष्यामिचपुनःपुनः॥७७॥॥

म

रादिति॥स्वयंस्वेनपारमेश्वरेणरूपेणअनिरवस्त्येनज्ञानैश्वर्यरूपेणकथयतोव्याचक्षाणादित्यर्थः॥७५॥यथोक्तंसंवादंभ
गवतःश्रुत्वाद्विस्मयेनेत्याह॥राजन्निति॥पुण्यात्वंसाधयति॥श्रवणेनापीति॥७६॥यत्तुविश्वरूपाख्यंरूपंसगुणमर्जु
नायभगवान्दर्शितवान्ध्यानार्थंतदित्यमीस्तौति॥तच्चेति॥७७॥श्रीरामः॥

श्री

गी०भा०टी
३६४।।

द्वयोरपि कृष्णार्जुनयोर्नारायणयोः संवादस्य प्रामाण्यार्थं परममुत्कर्षं दर्शयति।। किं बहुनेति।। कथं सर्वेषां योगानामीश्वरो भ-
गवानिति तत्राह।। तत्प्रभवत्वादिति।। सर्वो योगो ज्ञानं कर्म च तत्तस्य बीजं शास्त्रीयज्ञानवैराग्यादि तद्धि भगवदधीनं।। तदनुग्रहविहीनस्य
तदयोगात्तौ योगतत्फलयोर्भगवदनुग्रहायत्तत्वाद्भगवतो योगेश्वरत्वमित्यर्थः।। श्रीर्लक्ष्मीः। विजयः परमउत्कर्षः।। राज्ञोधृ

किं बहुना।। यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः।। तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम।। ७८।। यत्र यस्मिन्पक्षे यो-
गेश्वरः सर्वयोगानामीश्वरः सर्वयोगेश्वरस्तत्प्रभवत्वात्सर्वयोगबीजस्य कृष्णो यत्र पार्थो यस्मिन्पक्षे धनुर्धरो गांडी-
वधन्वा अर्जुनो ऽस्ति।। तत्र श्रीस्तस्मिन्पांडवानां पक्षे विजयस्तत्रैव भूतिः श्रियो विशेषो विस्तारो भूतिर्ध्रुवा अव्यभिचा-
रिणी नीतिर्नय इत्येवं मतिर्ममेति।। ७८।। इति श्रीगोविंदभगवत्पादशिष्यस्य परमहंसपरिव्राजकाचार्यस्य श्रीशंक- चौ
रभगवतः कृतौ श्रीगीताभाष्ये अष्टादशोऽध्यायः।। संपूर्णमस्तु।। श्रीरामकृष्णार्पणमस्तु।। १८।। विघ्ननिवारणाय नमः।।

त

आ१८।। वि३
३६४।।
राम।।

तराष्ट्रस्य च पुत्रेषु विजयाशां शिथिलीकृत्य पांडवेषु जयप्राप्तिमैकांतिकमुपसंहरति।। एवमिति।। उपायोपेयभावेन निष्ठाद्वय०
स्य प्रतिष्ठापितत्वात्कर्मनिष्ठापरं परया ज्ञाननिष्ठाहेतुर्ज्ञाननिष्ठा तु साक्षादेव मोक्षहेतुरिति शास्त्रार्थमुपसंहर्तुमिच्छन्नीत्युक्तं
।।।।७८।।।।

कांडत्रयात्मकं शास्त्रं पदवाक्यार्थगोचरं ॥ आदिमध्यांतषट्केषु व्याख्यया गोचरीकृतं ॥१॥ संक्षेपविस्तराभ्यां यो लक्ष्यते
गी०भा०टी० रूपपादितः ॥ सोऽर्थोऽतिमेन संक्षिप्य अध्यायेन विवक्षितः ॥२॥ गीताशास्त्रमहार्णवोत्थममृतं वैकुंठकंठोद्भवं श्रीकंठपर
६५॥ नामवन्मुनिकृतं निष्ठाद्वयद्योतितं ॥ निष्ठायत्रमतिप्रसादजननी साक्षात्कृतिं कुर्वती मोक्षे पर्यवसास्यति प्रतिदिनं सेव
ध्वमेतद्बुधाः ॥३॥ प्राचामाचार्यपादानां पदवीमनुगच्छती गीताभाष्ये कृता टीका टीकतां पुरुषोत्तमं ॥४॥ ॐ तत्सत् ॥
इति श्रीपरमहंसपरिव्राजकाचार्यश्रीमच्छुद्धानंदपूज्यपादशिष्यश्रीमदानंदज्ञानविरचितायां श्रीमच्छांकरीयश्रीमद्भ
गवद्गीताभाष्यटीकायां अष्टादशोऽध्यायः समाप्तोऽयं ग्रंथः ॥ ॥ ॐ तत्सत् ब्रह्मार्पणमस्तु ॥ यादृशं पुस्तकं दृष्ट्वा तादृशं लि आ०१८॥
खितं मया यदि शुद्धमशुद्धं वा मम दोषो न दीयते ॥ श्रीरामकृष्णार्पणमस्तु ॥ गुरुभ्यो नमः ॥ मिति आश्विन वद्य १२ ॥ ३६५॥
क्षयनाम संवत्सरे गंगातीरे काशिघट्टे दशाश्वमेधे ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॰ रामः॥
कार्या हस्ताक्षर वेंकटनर्णार्थपावास्तव्य कासीघारदशाश्वमेध अहेल्याबाई चिर्मलपुरित ॥ श्रीगुरुमुनि आशानदर्यैलिखिते ॥ ॥ ॰

गी०भा०१

श्रीगणेशायनमः श्रीगणेशायनम

३६५

NOTES

॥ श्रीसीतारामच्चंद्राभ्यां नमः ॥

ontn. sheet.

॥ श्री कृष्णानंदरामसमर्थी ८

॥श्रीकृष्णानंदरामसमर्थ॥

८.

```
[OrderDescription]
,CREATED=02.01.20 10:43
,TRANSFERRED=2020/01/02 at 11:32:02
,PAGES=303
,TYPE=STD
,NAME=S0002432
,Book Name=8568/
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
```

```
FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
```

```
FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
```

```
FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
```

```
FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF
,FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
```

```
FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF
,FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF
,FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF
,FILE142=00000142.TIF
,FILE143=00000143.TIF
,FILE144=00000144.TIF
,FILE145=00000145.TIF
,FILE146=00000146.TIF
,FILE147=00000147.TIF
,FILE148=00000148.TIF
,FILE149=00000149.TIF
,FILE150=00000150.TIF
,FILE151=00000151.TIF
,FILE152=00000152.TIF
,FILE153=00000153.TIF
```

```
FILE154=00000154.TIF
,FILE155=00000155.TIF
,FILE156=00000156.TIF
,FILE157=00000157.TIF
,FILE158=00000158.TIF
,FILE159=00000159.TIF
,FILE160=00000160.TIF
,FILE161=00000161.TIF
,FILE162=00000162.TIF
,FILE163=00000163.TIF
,FILE164=00000164.TIF
,FILE165=00000165.TIF
,FILE166=00000166.TIF
,FILE167=00000167.TIF
,FILE168=00000168.TIF
,FILE169=00000169.TIF
,FILE170=00000170.TIF
,FILE171=00000171.TIF
,FILE172=00000172.TIF
,FILE173=00000173.TIF
,FILE174=00000174.TIF
,FILE175=00000175.TIF
,FILE176=00000176.TIF
,FILE177=00000177.TIF
,FILE178=00000178.TIF
,FILE179=00000179.TIF
,FILE180=00000180.TIF
```

```
FILE181=00000181.TIF
,FILE182=00000182.TIF
,FILE183=00000183.TIF
,FILE184=00000184.TIF
,FILE185=00000185.TIF
,FILE186=00000186.TIF
,FILE187=00000187.TIF
,FILE188=00000188.TIF
,FILE189=00000189.TIF
,FILE190=00000190.TIF
,FILE191=00000191.TIF
,FILE192=00000192.TIF
,FILE193=00000193.TIF
,FILE194=00000194.TIF
,FILE195=00000195.TIF
,FILE196=00000196.TIF
,FILE197=00000197.TIF
,FILE198=00000198.TIF
,FILE199=00000199.TIF
,FILE200=00000200.TIF
,FILE201=00000201.TIF
,FILE202=00000202.TIF
,FILE203=00000203.TIF
,FILE204=00000204.TIF
,FILE205=00000205.TIF
,FILE206=00000206.TIF
,FILE207=00000207.TIF
```

```
FILE208=00000208.TIF
,FILE209=00000209.TIF
,FILE210=00000210.TIF
,FILE211=00000211.TIF
,FILE212=00000212.TIF
,FILE213=00000213.TIF
,FILE214=00000214.TIF
,FILE215=00000215.TIF
,FILE216=00000216.TIF
,FILE217=00000217.TIF
,FILE218=00000218.TIF
,FILE219=00000219.TIF
,FILE220=00000220.TIF
,FILE221=00000221.TIF
,FILE222=00000222.TIF
,FILE223=00000223.TIF
,FILE224=00000224.TIF
,FILE225=00000225.TIF
,FILE226=00000226.TIF
,FILE227=00000227.TIF
,FILE228=00000228.TIF
,FILE229=00000229.TIF
,FILE230=00000230.TIF
,FILE231=00000231.TIF
,FILE232=00000232.TIF
,FILE233=00000233.TIF
,FILE234=00000234.TIF
```

```
FILE235=00000235.TIF
,FILE236=00000236.TIF
,FILE237=00000237.TIF
,FILE238=00000238.TIF
,FILE239=00000239.TIF
,FILE240=00000240.TIF
,FILE241=00000241.TIF
,FILE242=00000242.TIF
,FILE243=00000243.TIF
,FILE244=00000244.TIF
,FILE245=00000245.TIF
,FILE246=00000246.TIF
,FILE247=00000247.TIF
,FILE248=00000248.TIF
,FILE249=00000249.TIF
,FILE250=00000250.TIF
,FILE251=00000251.TIF
,FILE252=00000252.TIF
,FILE253=00000253.TIF
,FILE254=00000254.TIF
,FILE255=00000255.TIF
,FILE256=00000256.TIF
,FILE257=00000257.TIF
,FILE258=00000258.TIF
,FILE259=00000259.TIF
,FILE260=00000260.TIF
,FILE261=00000261.TIF
```

```
FILE262=00000262.TIF
,FILE263=00000263.TIF
,FILE264=00000264.TIF
,FILE265=00000265.TIF
,FILE266=00000266.TIF
,FILE267=00000267.TIF
,FILE268=00000268.TIF
,FILE269=00000269.TIF
,FILE270=00000270.TIF
,FILE271=00000271.TIF
,FILE272=00000272.TIF
,FILE273=00000273.TIF
,FILE274=00000274.TIF
,FILE275=00000275.TIF
,FILE276=00000276.TIF
,FILE277=00000277.TIF
,FILE278=00000278.TIF
,FILE279=00000279.TIF
,FILE280=00000280.TIF
,FILE281=00000281.TIF
,FILE282=00000282.TIF
,FILE283=00000283.TIF
,FILE284=00000284.TIF
,FILE285=00000285.TIF
,FILE286=00000286.TIF
,FILE287=00000287.TIF
,FILE288=00000288.TIF
```

```
FILE289=00000289.TIF
,FILE290=00000290.TIF
,FILE291=00000291.TIF
,FILE292=00000292.TIF
,FILE293=00000293.TIF
,FILE294=00000294.TIF
,FILE295=00000295.TIF
,FILE296=00000296.TIF
,FILE297=00000297.TIF
,FILE298=00000298.TIF
,FILE299=00000299.TIF
,FILE300=00000300.TIF
,FILE301=00000301.TIF
,FILE302=00000302.TIF
,FILE303=00000303.TIF
,
```